SRIMAD VĀLMĪKI RĀMĀYANA

A CRITICAL EDITION

With the commentary of Sri Govindaraja

AND

Extracts from many other commentaries and Readings.

BĀLAKĀṆDA I.

EDITED AND PUBLISHED BY

T. R. KRISHNACHARYA & T. R. VYASACHARYA,

Proprietors, Madhva Vilâs Book Depot, Kumbakonam.

Printed by B. R. Ghanekar for the proprietors,

at the "Nirnaya-sagar" Press, 23, Kolbhat Lane,

BOMBAY.

1911.

॥ श्रीः ॥

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यानसमलंकृतम् ।

तथा

तिलकप्रभृत्यनेकापूर्वव्याख्यानोद्धृतैः

गोविन्दराजीयानुक्तापूर्वविषयैश्च संवलितम् ।

बालकाण्डम् १.

एतच्च

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च

अनेकेषां विदुषां साहाय्येन नानादेशीयकोशानुसारेण

संशोध्य

मुंबापुर्यां

तुकाराम जावजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८३२ साधारणनाम संवत्सरे ।

-॥ श्रीः ॥-

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

बालकाण्डम् १

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

लोके उत्तमः पुरुषः क इति नारदंप्रति वाल्मीकिप्रश्ने तेन तंप्रति श्रीरामस्य पुरुषोत्तमत्वज्ञापनाय तद्गुणानुवादपूर्वकं संक्षेपेण तच्चरित्रकथनम् ॥ १ ॥

तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् । नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥ १ ॥

श्रीरामचन्द्राय नमः ॥ ॥ आचार्यं शठकोपदेशिकमथ प्राचार्यपारंपरीं श्रीमल्लक्ष्मणयोगिवर्ययमुनावास्तव्यनाथादिकान् । वाल्मीकिं सह नारदेन मुनिना वाग्देवतावल्लभं सीतालक्ष्मणवायुसूनुसहितं श्रीरामचन्द्रं भजे ॥ १ ॥ श्रीमत्यञ्जनभूधरस्य शिखरे श्रीमारुतेः सन्निधावग्रे वेङ्कटनायकस्य सदनद्वारे यतिक्ष्माभृतः । नानादेशसमागतैर्बुधगणै रामायणव्याक्रियां विस्तीर्णां रचयेति सादरमहं स्वप्नेऽस्मि संचोदितः ॥ २ ॥ काहं मन्दमतिर्गभीरहृदयं रामायणं तत्क च व्याख्यानेऽस्य परिभ्रमन्नहमहो हासास्पदं धीमताम् । को भारोत्र मम स्वयं कुलगुरुः कोदण्डपाणिः कृपाकूपारो रचयत्यदः सपदि मज्जिह्वाग्रसिंहासनः ॥ ३ ॥ वैयर्थ्यं पुनरुक्ततामनुचितारंभं विरोधं मिथोसाधुत्वं च पदप्रबन्धरचनावाक्येषु निश्शेषयन् । स्वारस्यं च पदेपदे प्रकटयन् रामायणस्य स्वयं व्याख्यामेष तनोति सज्जनमुदे गोविन्दराजाह्वयः ॥ ४ ॥ पूर्वाचार्यकृतप्रबन्धजलधेस्तात्पर्यरत्नावलीर्ग्राहंग्राहमहं शठारिगुरुणा संदर्शितेनाध्वना । अन्यव्याकृतिजातरूपशकलैरायोज्य सज्जीकृतैः श्रीरामायणभूषणं विरचये पश्यन्तु निर्मत्सराः ॥ ५ ॥ सुस्पष्टमष्टादशकृत्व एत्य श्रीशैलपूर्णाद्यतिशेखरोयम् । शुश्राव रामायणसंप्रदायं वक्ष्ये तमाचार्यपरंपरात्तम् ॥ ६ ॥ कचित्पदार्थं कचिदन्वयार्थं कचित्पदच्छेदसमर्थनानि । कचित्कचिद्गाढनिगूढभावं वक्ष्ये यथापेक्षमवेक्षणीयम् ॥ ७ ॥

अवतारिका ॥ श्रियःपतिरवाप्तसमस्तकामः समस्तकल्याणगुणात्मकः सर्वेश्वरः "वैकुण्ठेतु परे लोके श्रिया सार्धं जगत्पतिः । आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैः सह ।" इत्युक्तरीत्या श्रीवैकुण्ठाख्ये दिव्यलोके श्रीमहामणिमण्टपे श्रीभूमिनीलाभिःसह रत्नसिंहासनमध्यासीनो नित्यैर्मुक्तैश्चनिरन्तरपरिचर्यमाणचरणनलिनोपि तद्वदेवस्वचरणयुगलपरिचरणार्हानपितद्धीनान् प्रलयेप्रकृतिविलीनान् मधूच्छिष्टमग्नहेमकणसदृक्षान् क्षीणज्ञानान् जीवानवलोक्य "एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः । जीवे दुःखाकुले विष्णोः कृपा काप्युपजायते ।" इत्युक्तरीत्या दयमानमनाः "विचित्रा देहसंपत्तिरीश्वराय निवेदितुम् । पूर्वमेव कृता ब्रह्मन् हस्तपादादिसंयुता ।" इत्युक्तप्रकारेण महदादिसृष्टिक्रमेण तेषां स्वचरणकमलसमाश्रयणोचितानि करणकलेबराणि दत्त्वा नदीतरणाय दत्तैः प्लवैर्नदीरयानुसारेण सागरमवगाहमानेष्विव तेषु तैर्विषयान्तरप्रवणेषु तेषांसदसद्विवेचनाय "शासनाच्छास्त्रं "इत्युक्तरीत्या स्वशासनरूपं वेदाख्यं शास्त्रं प्रवर्त्यापि तस्मिन्नप्रतिपत्तिविप्रतिपत्त्यन्यथाप्रतिपत्तिभिस्तैरनादृते स्वशासनातिलङ्घिनं जनपदं स्वयमेव साधयितुमभियियासुरिव वसुधाधिपतिः स्वाचारमुखेन तान् शिक्षयितुं रामादिरूपेण चतुर्धाऽवतितीर्षुरन्तराऽमरगणैः सद्रुहिणैरभ्यर्थितः स्वाराधकस्य दशरथस्य मनोरथमपि पूरयितुं चतुर्धाऽवततार ।

तत्ररामरूपेणावतीर्य रावणं निहत्य पितृवचनपरिपालनादिसामान्यधर्ममन्वतिष्ठत् । लक्ष्मणरूपेण रावणिं निरस्य भगवच्छेषत्वरूपंविशेषधर्मं भरतरूपेण गन्धर्वान्निर्वास्य भगवत्पारतन्त्र्यरूपं शत्रुघ्नरूपेण लवणासुरं ध्वंसयित्वा भागवतशेषत्वं। तानिमान् धर्मान् तानीमानि चापदानानि तत्कालमात्रपर्यवसितानि भविष्यन्तीतिमन्वानः सर्वलोकहितपरः पितामहो भगवान् ब्रह्मा रामचरित्रपवित्रितं शतकोटिप्रविस्तरं प्रबन्धंनिर्माय तं नारदादीनध्याप्य भूलोकेऽपिसंततरामनन्त्रानुसन्धानसन्धुक्षितहृदयवाल्मीकिमुखेन संग्रहेणप्रवर्तयितुं नारदंप्रेषयामास। तदुक्तंमात्स्ये "वाल्मीकिना च यत्प्रोक्तं रामोपाख्यानमुत्तमम् । ब्रह्मणाचोदितं तच्च शतकोटिप्रविस्तरम्। आहृत्य नारदेनैव वाल्मीकाय निवेदितं"इति। वाल्मीकिरपिनिखिलवेदान्तविदितपरतत्त्वनिर्दिधारयिषया यदृच्छयोपगतंनारदंपृष्ट्वाऽवगतपरतत्त्वस्वरूपः तदनुप्रसन्नेन विधिनादत्तसकलसाक्षात्कारप्रबन्धनिर्माणशक्तिर्वेदोपबृंहणमारभमाणः तस्यार्थप्रधानसुहृत्संमितेतिहासतां व्यङ्ग्यप्रधानकान्तासंमितकाव्यतांच पुरस्कुर्वन् "काव्यालापांश्चवर्जयेत्" इतिनिषेधस्यासत्काव्यविषयतां चनिर्धारयन्स्वग्रन्थेप्रेक्षावतांप्रवृत्त्यर्थंतदङ्गानिदर्शयति प्रथमतश्चतुस्सर्ग्या । तत्रप्रथमसर्गेणविषयप्रयोजनेदर्शयति । तत्रच "तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया" इतिवेदान्तरहस्यस्यप्रश्नपूर्वकंज्ञेयत्वविधानात् "नापृष्टःकस्यचिद्ब्रूयात्" इत्यपृष्टोत्तरस्यप्रत्यादिष्टत्वाच्च प्रश्नमाविष्करोत्यादितःपञ्चश्लोक्या ।

अथप्रारिप्सितस्यग्रन्थस्यनिष्प्रत्यूहपरिपूरणायप्रचयगमनायचगुरुनमस्कारंदेवतानमस्कारंचविदधाति—तपस्स्वाध्यायेति। तत्र "आचार्याद्धैवविद्याविदितासाधिष्ठंप्रापत् । आचार्यवान् पुरुषोवेद" इत्यादिश्रुत्या सदाचार्योपदेशस्यैवातिशयावहत्वात्स्वगुरोराचार्यलक्षणपूर्तिंदर्शयति द्वितीयान्तपदैः । तत्रवेदसंपन्नत्वमाह तपस्स्वाध्यायनिरतमिति । तपश्चस्वाध्यायश्चतपस्स्वाध्यायौ "अल्पाच्तरं" इतितपश्शब्दस्यपूर्वनिपातः । तपः चान्द्रायणादि स्वाध्यायो वेदः । "स्वाध्यायोवेदतपसोः" इतिवैजयन्ती। तयोर्निरतंनिरन्तरासक्तं। आवश्यकत्वादेतदुभयमुक्तम्। तदाहमनुः "तपोविद्याचविप्रस्यनिश्श्रेयसकरंपरं । तपसाकल्मषंहन्तिविद्ययाज्ञानमश्नुते"इति। यद्वा तपोज्ञानं तपआलोचनइत्यस्माद्धातोरसुन्प्रत्ययः। श्रुतिश्चात्रभवति "यस्यज्ञानमयंतपः" इति। योगइतियावत्। स्वाध्यायोवेदः तयोर्निरतं "स्वाध्यायाद्योगमासीतयोगात्स्वाध्यायमावसेत्। स्वाध्याययोगसंपत्त्यागमिष्यतिपरांगतिं" इत्युक्तप्रकारेणसक्तमित्यर्थः। यद्वा तपोवेदः "तपोहिस्वाध्यायः"इतिश्रुतेः। स्वाध्यायोजपः "स्वाध्यायो वेदजपयोः"इत्युक्तेः। तत्रनिरतम्। "स्वाध्यायान्माप्रमदः। वेदमेवजपेन्नित्यं" इत्युक्तरीत्यासक्तमित्यर्थः। यद्वा तपोब्रह्म "ब्रह्मैतदुपास्स्वैतत्तपः" इतिश्रुतेः तपःप्रधानःस्वाध्यायस्तपस्स्वाध्यायः। शाकपार्थिवादित्वान्मध्यमपदलोपीसमासः। वेदान्तइतियावत्। तत्रनिरतम् "स्वाध्यायप्रवचनाभ्यांनप्रमदितव्यम्" इत्युक्तरीत्याऽध्ययनाध्यापनादिपरमित्यर्थः । यद्वा तपो व्याकरणम्। तथोक्तंवाक्यपदीये । "आसन्नंब्रह्मणस्तस्यतपसामुत्तमंतपः । प्रथमंछन्दसामङ्गमाहुर्व्याकरणंबुधाः इति"। तत् इतरेषामङ्गानामुपलक्षणम्। तत्सहितःस्वाध्यायःतपस्स्वाध्यायः तत्रनिरतं साङ्ग-

श्रीरामचन्द्रायनमः । **महेश्वरतीर्थीयं।** परब्रह्मात्मिकां देवीं भुक्तिमुक्तिफलप्रदाम् । प्रणम्य स्तौमि तामेव ज्ञानशक्तिं सरस्वतीम् ॥ १ ॥ कारुण्यामृतनीरमाश्रितजनश्रीचातकानन्ददं शार्ङ्गाखण्डलचापमम्बुजभवोपेन्द्रादिबर्हीष्टदम् । चारुस्मेरमुखोल्लसज्जनकजासौदामिनीशोभितं श्रीरामांबुदमाश्रयेऽखिलजगत्संसारतापापहम् ॥ २ ॥ प्रणम्य नारायणतीर्थदेशिकान्भवानलार्तामृतपूरनीरदान् । करोति रामायणतत्वदीपिकां महेशतीर्थाख्यमुनिर्यथामति ॥ ३ ॥ सर्वेषां ग्रन्थकर्तृणां लेखकोऽहं न कल्पकः । लिखितान्यत्र तैर्यानि लिख्यन्ते तान्यतो मया ॥ ४ ॥ ग्रन्थबाहुल्यभीत्याऽत्र क्वचिच्छब्दसुशोधनम् । निघण्टुकथनं चार्थः पदानां लिख्यतेऽधुना ॥ ५ ॥ सीतारामौसमुद्दिश्य विराधखररावणैः । उक्तानां परुषोक्तीनां वास्तवार्थोत्रवर्ण्यते ॥ ६ ॥ ब्रह्मलोकप्रसिद्धंशतकोटिप्रविस्तररंरामचरितं भूलोकवर्तिनांचतुर्णांवर्णानांतापत्रयविमोचनाय संक्षिप्यरचयितुमुद्युक्तः परमकारुणिकोब्रह्मा वाल्मिकिरूपेण भूमौ स्वांशेनसमभवत्। तथाचस्कान्दे पार्वतींप्रति शिववचनम्। "वाल्मीकिरभवद्ब्रह्मा वाणी वाक्तस्य रूपिणी। चकार रामचरितं पावनं चरितव्रतः" इति । एवंच ब्रह्मांशभूतोभगवान्प्राचेतसः स्वचिकीर्षितं श्रीमद्रामचरितं गुरुमुखाच्छ्रोतव्यमिति न्यायेन भगवत्कथोपदेशेन स्वगुरुं नारदं प्रतीक्षमाण आस्तेस्म। अथब्रह्मनियोगेनसमागतंभगवन्तं नारदमभ्यर्च्य वाल्मीकिः कोन्वस्मिन्नित्यादिप्रपच्छ। सचद्देवर्षिः परमेश्वरकथाप्रश्नमुदितमनाः श्रीरामचरितंसंक्षिप्यवाक्यरूपेणोपदि-

वेदाध्यायिनमित्यर्थः। यद्वा तपः स्वं यस्यासौ तपस्वः। अध्यायोवेदः इङ्अध्ययनेइत्यस्माद्धातोः "अध्यायन्याय-" इत्यादिनानिपातनात्। अतएव "स्वाध्यायोध्येतव्यः" इत्यत्रस्वस्यअध्यायःस्वाध्यायःस्वशाखेत्याचार्यैर्व्याख्यातं तत्रनिरतोऽध्यायनिरतः। तपस्वश्चासावध्यायनिरतश्च तपस्वाध्यायनिरत इतिकर्मधारयः तम्। यद्वा तपोब्रह्म तद्रूपः स्वाध्यायः तपस्वाध्यायः तस्मिन्निरतं सामगानलोलमित्यर्थः। "वेदानांसामवेदोस्मि" इतिभगवतागीतत्वात्। एवंवेदाध्ययनमुक्तम्। अथ "यदधीतमविज्ञातंनिगदेनैवशब्द्यते। अनग्नाविवशुष्कैधोनतज्ज्वलतिकर्हिचित्" इतिकेवलाध्ययनस्यनिन्दितत्वात्तदर्थज्ञत्वमाह। वाग्विदांवरमिति। वाक् वेदः "अनादिनिधनाह्येषावागुत्सृष्टास्वयंभुवा" इतिवाक्शब्दस्यवेदेप्रयोगात्। तांविदन्तिजानन्तीतिवाग्विदः वेदार्थज्ञाः तेषांमध्येवरंश्रेष्ठं। निर्धारणेषष्ठी। यद्वा वाक् व्याकरणं "यश्चव्याकुरुतेवाचम्" "वाग्योगविद्दुष्यतिचापशब्दैः" इत्यादौव्याकरणपर्यायत्वेनशिष्टैर्व्यवहृतत्वात्। एतदङ्गान्तराणामुपलक्षणं। षडङ्गविदामग्रेसरमित्यर्थः। एतेनवेदार्थाभिज्ञत्वमर्थसिद्धम्। यद्वा वाग्विदः यावद्विवक्षितार्थप्रतिपादनक्षमशब्दप्रयोगविदः तेषांवरम्। पूर्ववेदाध्ययनमुक्तं अत्रतदध्यापनम्। यद्वा गोबलीवर्दन्यायेन वाचः वेदव्यतिरिक्तानिशास्त्राणि तद्विदांवरम्। अनेनचतुर्दशविद्यास्थानवेदित्वमुक्तम्। यद्वा भूमविद्योपक्रमे नारदेनात्मनःसर्वविद्याभिज्ञत्वमुक्तम् "ऋग्वेदंभगवोध्येमियजुर्वेदंसामवेदमाथर्वणंचतुर्थमितिहासपुराणंपञ्चमंवेदानांवेदंपित्र्यंराशिंदैवंनिधिंवाकोवाक्यमेकायनंदेवविद्यांब्रह्मविद्यांभूतविद्यांक्षत्रविद्यांनक्षत्रविद्यांसर्पदेवजनविद्यामेतद्भगवोध्येमि" इति। तदिदमुच्यतेवाग्विदांवरमिति। यद्वा वाक्सरस्वती "गीर्वाग्वाणीसरस्वती" इतिवचनात्। तयाविद्यन्तेलभ्यन्तइतिवाग्विदः सरस्वतीपुत्रामरीच्यादयः। विद्लृलाभइत्यस्माद्धातोःकर्मणिक्विप्। भगवद्भक्ततयातेषांवरम्। अनेनाभिजात्यमुक्तम्। तपस्वाध्यायनिरतमित्यनेन विद्योक्ता। समाहितत्वमाह—मुनिपुङ्गवमिति। तेन "अभिजनविद्यासमुदेतंसमाहितंसंस्कर्तारमीप्सेत्" इत्यापस्तंबोक्तमाचार्यलक्षणंज्ञापितम्। मुनयोमननशीलाः "मनेरुच्च" इतिइन्प्रत्ययः। पुमांश्चासौगौश्चेतिपुंगवः "गोरतद्धितलुकि" इतिसमासान्तष्टच्प्रत्ययः। श्रेष्ठइत्यर्थः। "बुधेचपुङ्गवःश्रेष्ठेवृषभेभिषजांवरे" इतिविश्वः। मुनिषुपुङ्गवोमुनिपुङ्गवः। "सप्तमी" इतियोगविभागात् नागोत्तमादिवत्समासः तं। तपस्वाध्यायनिरतमित्यनेनवेदार्थस्यश्रवणमुक्तम्। वाग्विदांवरमित्यनेनमननम्। मुनिपुङ्गवमित्यनेननिदिध्यासनम्। यद्वा "तस्माद्ब्राह्मणःपाण्डित्यंनिर्विद्यबाल्येनतिष्ठासेत्। बाल्यंचपाण्डित्यंचनिर्विद्याथमुनिः" इत्युक्तक्रमेणत्रिभिरेतैःपदैः पाण्डित्यबाल्यमौनान्युक्तानि। नरस्यसंबन्धि नारं "नराच्चेतिवक्तव्यं" इत्यण्। अज्ञानमित्यर्थः। तत्द्यतिखण्डयतीतिनारदः। दोअवखण्डनेइत्यस्माद्धातोः "आदेचउपदेशेऽशिति" इत्यात्वेसति "आतोनुपसर्गेकः" इतिकप्रत्ययः। अज्ञाननिवर्तकइत्यर्थः। उक्तंचनारदीये "गायन्नारायणकथांसदापापभयापहाम्। नारदोनाशयन्नेतिनृणामज्ञानजंतमः" इति। यद्वा नारंज्ञानंतद्ददातीतिनारदः। यद्वा नरतिसद्गतिंप्रापयतीतिनरः परमात्मा। नृनयइत्यस्माद्धातोःपचाद्यच्। तदुक्तंभारते "नरतीतिनरःप्रोक्तःपरमात्मासनातनः" इति। सएवनारः। तंददात्युपदिशतीतिनारदः तं। एवमाचार्यलक्षणपूर्तिमुक्त्वा अधिकारित्वसंपूर्तिप्रदर्शनाय शिष्यलक्षणमाह—तपस्वीत्यादिना। तपोस्यास्तीतितपस्वी "तपस्सहस्राभ्यांविनीनी" इतिमत्वर्थीयोविनिप्रत्ययः। भूमादयोमत्वर्थाः। तदुक्तं "भूमनिन्दाप्रशंसासुनित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायांभवन्तिमतुबादयः" इति। प्रशस्ततपस्कइत्यर्थः। तेन "तपसाब्रह्मविजिज्ञासस्व। सतपोतप्यत। सतपस्तप्त्वा आनन्दोब्रह्मेतिव्यजानात्" इतिश्रुतंब्रह्मज्ञानसाधनंतपउक्तम्। यद्वा तपोवेदोव्याकरणंज्ञानंच तद्वान्। तपश्शब्दानांतत्रावृत्त्येकशेषाद्यन्यतमेन अर्थस्मरणेसति

श्य जगाम। तदनु तमसातीरमुपसृत्यचरतः व्याधविद्धक्रौञ्चदर्शनजनितशोकस्यवाल्मीकेर्वदनात् मानिषादेतिश्लोकउदभूत्। ततः स्वाश्रममागत्य तमेवानुसंदधानः सविस्मयमास्त। अथभगवांश्चतुर्मुखआगत्य "मच्छन्दादेवतेब्रह्मन्" इत्यभिधाय रामचरितं सर्वंविदितंभवत्वितिवरंप्रदाय पद्यैरेवरामायणंकुर्वित्युपदिश्य स्वधामजगाम। अथचतुर्विंशत्यक्षरगायत्र्याख्यपरब्रह्मविद्याविलासभूतंरामायणं चतुर्विंशतिसहस्रैःश्लोकैश्चकार तदिदंव्याक्रियते। तपःस्वाध्यायेत्यादिगायत्रीवर्णसंयुक्तश्लोकसंकेतः। चतुर्विंशतिसंख्याका गायत्रीवर्णसंयुताः। ये श्लोकाः सन्ति तानत्र विलिखामि यथाक्रमम्॥ १॥ श्लोके च प्रतिसाहस्रं प्रथमेप्रथमे क्रमात्। गायत्र्यक्षरमेकैकं स्थापयामास वै मुनिः॥ २॥ गायत्र्यास्त्रीणि चत्वारि द्वेद्वे त्रीण्यथ षट्क्रमात्। चत्वारि सप्तका ण्डेषु

एकपदोपात्तकृतिकालादीनामिव अन्वयबोधःसुलभः । तथाचाधीतसाङ्गसशिरस्कवेदोऽधिगताल्पास्थिरफलकेवलकर्मज्ञानइत्युक्तं । निर्वेदश्चतपः “ तपस्वीतापसे शोच्ये ” इतिवैजयन्ती । तेन संजातमोक्षाभिलाष इत्युक्तं । तादृशएवहि ब्रह्मज्ञानाधिकारी । तपस्वीत्यनेन शमदमादिसंपत्तिरपिसिद्धा । यद्वा तपोन्यासः “ तस्मान्न्यासमेषांतपसामतिरिक्तमाहुः ” इतिश्रुतेः । न्यासःशरणागतिःप्रणिपातरूपा । एवं “तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया ” इत्याद्युक्तानिप्रणिपातपुरःसराणिदर्शितानि । वल्मीकस्यापत्यंवाल्मीकिः । “अतइञ् ” इतीञ्प्रत्ययः । नन्वसौकथंवल्मीकापत्यं । यतोयंभृगुपुत्रएवप्रतीयते । तथाचश्रीविष्णुपुराणे “ऋक्षोभूद्भार्गवस्तस्माद्वाल्मीकिर्योभिधीयते ” इति । अत्रापि उत्तरकाण्डेवक्ष्यति “ भार्गवेणेतिसंस्कृतौ । भार्गवेणतपस्विना ” इतिच । अन्यत्रचप्रचेतोपत्यत्वमभिधीयते “ चक्रेप्रचेतसःपुत्रस्तंब्रह्माप्यन्वमन्यत ” इति “ वेदःप्राचेतसादासीत् ” इतिच प्रसिद्धं । अतः कथमस्यवल्मीकापत्यत्वम् । उच्यते । निश्चलतरतपोविशेषेणास्यवल्मीकावृतौजातायांप्रचेतसावरुणेनकृतनिरन्तरवर्षेणप्रादुर्भावोऽभूदिति भृगुपुत्रस्यैवास्यप्रचेतसःपुत्रत्वंवल्मीकापत्यत्वंचसंगच्छते । ननुकथंतत्प्रभवत्वमात्रेणतदपत्यत्वम् । मैवम् । गोणीपुत्रःकलशीसुतइत्यादिव्यवहारस्यतत्प्रभवेपिबहुलमुपलब्धेः । उक्तं चब्रह्मवैवर्ते “अथाब्रवीन्महातेजाब्रह्मालोकपितामहः । वल्मीकप्रभवोयस्मात्तस्माद्वाल्मीकिरित्यसौ ” इति । मास्त्वपत्यार्थत्वं । तथापिवाल्मीकिशब्दस्साधुरेव गर्हादिषुपठितत्वात् । यद्वाभृगुवंश्यःकश्चित् प्रचेतानाम तस्यायंपुत्रः ऋक्षोनाम। “चक्रेप्रचेतसः पुत्रः” इतिपुत्रत्वाभिधानात् । भार्गवभृगुनन्दनशब्दौ रामेराघवरघुनन्दनशब्दवत् उन्नेयौ । वाल्मीकिशब्दः पुत्रत्वोपचारात् । अतएव कचित् “वाल्मीकेनमहर्षिणा” इतिसंबन्धमात्रेऽण्प्रयुज्यते । सत्स्वपिनामान्तरेषुवाल्मीकिशब्देनाभिधानं ज्ञानाङ्गशमदमाद्युपेतत्वस्फोरणाय । परिपप्रच्छ परि विशेषेण पृष्टवान् । “ कोन्वस्मिन् ” इत्यादिवक्ष्यमाणमितिशेषः । तपइतिभिन्नंपदंवाब्रह्मवाचि । नारदंब्रह्मपरिपप्रच्छेत्यर्थः । अतोनद्विकर्मकत्वहानिः । उक्तंहिवृत्तिकृता “दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषां” इत्यादिनाप्रच्छेर्द्विकर्मकत्वं। परिपप्रच्छेति परोक्षेलिट् । प्रश्नस्यपरोक्षत्वं विवक्षितभगवद्गुणानुसंधानकृतवैचित्यात् । “सुप्तोहंकिलविललाप” इतिवत् । विभक्तिप्रतिरूपकमव्ययंवा । स्वविनयव्यञ्जनायप्रथमपुरुषनिर्देशोवा “ ईश्वरःसर्वभूतानांहृद्देशेऽर्जुनतिष्ठति” इतिवत् । स्वस्मिन्नन्यत्वमारोप्यपरोक्षनिर्देशोवा । अनेन “परीक्ष्यलोकान्कर्मचितान् ब्राह्मणोनिर्वेदमायात् नास्त्यकृतःकृतेन । तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठं । तस्मै सविद्वानुपसन्नायसम्यक्प्रशान्तचित्तायशमान्विताय । येनाक्षरंपुरुषंवेदसत्यंप्रोवाचतांतत्त्वतोब्रह्मविद्याम्” इत्याथर्वणिकीश्रुतिर्गुरूपसदनविषयोपबृंह्यते । तथाहि तपस्वीत्यनेन “परीक्ष्यलोकान् कर्मचितान् ब्राह्मणोनिर्वेदमायात्” इत्यस्यार्थोऽदर्शि । अधीतसाङ्गसशिरस्कवेदोऽधिगताल्पास्थिरफलकेवलकर्मज्ञानतयासंजातमोक्षाभिलाषोहि तपस्विशब्दार्थोवर्णितः । वाल्मीकिरित्यनेन “सम्यक्प्रशान्तचित्तायशमान्विताय” इत्यस्यार्थोदर्शितः । स्वाध्यायनिरतमित्यनेन श्रोत्रियपदार्थउक्तः । “श्रोत्रियंश्छन्दोऽधीते ” इतिश्रोत्रियशब्दार्थप्रकाशनात् । वाग्विदांवरमित्यनेन विद्वच्छब्दार्थः । मुनिपुङ्गवमित्यनेन ब्रह्मनिष्ठशब्दार्थः । नारदशब्देनगुरुशब्दार्थः । “गुशब्दस्त्वन्धकारःस्याद्रुशब्दस्तन्निरोधकः । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते ” इतितन्निरुक्तिः । परिपप्रच्छेत्यनेन तद्विज्ञानार्थंसगुरुमेवाभिगच्छेदित्येतदुपपादितं “विधिवदुपसन्नः पप्रच्छ” इति श्रुतेः । अत्र ब्रह्मवाचितपःशब्दप्रयोगेण देवतानमस्काररूपंमङ्गलमाचरितं । तथोक्तं । “अइतिभगवतोनारायणस्यप्रथमाभिधानमभिदधताकिंनाममङ्गलंनकृतम् ” इति । “देवतावाचकाःशब्दायेचभद्रादिवाचकाः । ते सर्वेमङ्गलार्थाःस्युर्लिपितोगणतोपिच” इति निरन्तरनिरतिशयानन्दरूपंतपोज्ञानरूपंब्रह्म स्वाध्याय सुष्ठुध्यात्वेतिवा देवतानमस्कारः । गुरुनमस्कारश्चकृतोभवति । कथम् । तपस्सुनिरतंनारदमाध्याय परिपप्रच्छेति । यद्वा परि पूजयित्वेत्यर्थः “परिः समन्ततोभावव्याप्तिदोषकथासुच । भाषाश्लेषेपूजनेचवर्जनेवसनेशुभे ” । इतिवचनात् नारदंसंपूज्यपप्रच्छेत्यर्थः । “ पराशरंमुनिवरंकृतपौर्वाह्णिकक्रियम् । मैत्रेयःपरिपप्रच्छप्रणिपत्या

स्थापितान्यक्षराणितु ॥ ३ ॥ तत्र तत् इतिगायत्र्याःप्रथमाक्षरम् । तपःस्वाध्यायेति । **शिरोमणिः** । वाल्मीकिरिति । “ऋक्षोभूद्भार्गवस्तस्माद्वाल्मीकिर्योऽभिधीयते” इति विष्णुपुराणवचनात् ऋक्षइतितस्यरूढंनाम । तस्यात्रानुक्तिस्तु “आत्मनामगुरोर्ना-

को न्वस्मिन्सांप्रतं लोके गुणवान्कश्च वीर्यवान् । धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥ २ ॥

भिवाद्यच" इतिवत् । अस्यश्रीरामायणस्यगायत्र्यक्षरसङ्ख्यानुसारेणचतुर्विंशतिसहस्रग्रन्थसङ्ख्यया प्रवृत्तत्वा त्प्रथमसहस्रोपक्रमेतकारःप्रयोक्तव्यइति सत्स्वपिब्रह्मवाचकेषुशब्दान्तरेषु तपश्शब्दस्यैवप्रयोगः । प्रबन्धादौतकारप्रयोगश्चावश्यकः । तस्यवक्तुर्वाचकस्यचसौख्यकरत्वात् । तथोक्तं "वस्तुलाभकरोणस्तुतकारःसौख्यदायकः" इति । साहित्यचूडामणौतु "तकारोविघ्ननाशकः" इत्युक्तम् । किंच तकारस्यजलंभूतंबृहस्पतिर्देवता । अतःशुभावहोऽनेनप्रबन्धारंभः । अतएवोक्तंचमत्कारचन्द्रिकायाम् "वर्णानामुद्भवःपश्चाद्व्यक्तिःसङ्ख्याततःपरम् । भूतबीजविचारश्चततोवर्णमहाअपि" इत्यारभ्य "एतत्सर्वमविज्ञाययदिपद्यंवदेत्कविः । केतकारूढकपिवद्धवेत्कण्टकपीडितः" इति । "कारणात्पञ्चभूतानामुद्भूतामातृकायतः । अतोभूतात्मकावर्णाःपञ्चपञ्चविभागतः । वाय्वग्निभूजलाकाशाःपञ्चाशल्लिपयःक्रमात् । पञ्चह्रस्वाःपञ्चदीर्घाबिन्द्वन्ताःसन्धयस्तथा । तत्रस्वरेशःसूर्योयंकवर्गेशस्तुलोहितः । चवर्गप्रभवःकाव्यष्टवर्गाद्बुधसंभवः । तवर्गोत्थःसुरगुरुःपवर्गोत्थःशनैश्चरः । यवर्गजोयंशीतांशुरितिसप्तग्रहाःक्रमात्" इति । अत्रतपस्स्वाइतियगणः आदिलघुत्वात् । तदुक्तं "आदिमध्यावसानेषुयरतायान्तिलाघवम् । भजसागौरवंयान्तिमनौतुगुरुलाघवम्" इति । यगणप्रयोगश्चार्थकरइत्युक्तंचमत्कारचन्द्रिकायाम् "करोत्यर्थानादिलघुर्यगणोवायुदैवतः" इति । ननुतपस्तापः सुतरामाधिःस्वाधिः तयोरायेनिरतमितिमन्थारंभेअश्लीलवचनमनुचितम् । तदुक्तं "अश्लीलंयदमाङ्गल्यजुगुप्साव्रीडभीकरम्" इति । मैवम् । प्रसिद्धिविशेषेणतपोवेदयोरेवप्रथमतरंबुद्ध्यारोहेणाश्लीलत्वप्रसङ्गाभावात् । यथाभगिनीलिङ्गादिप्रयोगेषु । अत्रसर्वत्रप्रायेणपथ्यावक्त्रंवृत्तम् । तदुक्तंवृत्तरत्नाकरे "युजोर्जेनसरिद्भर्तुःपथ्यावक्त्रंप्रकीर्तितम्" इति । वृत्तविशेषास्तुतत्रतत्रवक्ष्यन्ते । अत्रवृत्त्यनुप्रासःशब्दालंकारः तकारादीनामावृत्तेः । तदुक्तंकाव्यप्रकाशे "वर्णसाम्यमनुप्रासः" इति । विशेषणानांसाभिप्रायत्वात्परिकरोनामार्थालंकारः । उक्तमलंकारसर्वस्वे "विशेषणानांसाभिप्रायत्वेपरिकरः" इति । तपस्स्वाध्यायनिरतत्वादीनांगुरूपसत्तिहेतुज्ञानानुष्ठानप्रतिपादकत्वात् पदार्थहेतुकंकाव्यलिङ्गमलंकारः "हेतोर्वाक्यपदार्थत्वेकाव्यलिङ्गमलंकृतिः" इतिलक्षणात् । अत्रवाल्मीकिनारदयोःस्वरूपकथनेन शिष्याचार्याभ्यामेवंभवितव्यमितिद्योतनात् वाक्यगतवस्तुनावस्तुध्वनिः ॥ १ ॥

॥ कथंपरिपप्रच्छेत्याकाङ्क्षायांप्रश्नप्रकारंदर्शयति–को न्वित्यादिश्लोकत्रयेण । "नुपृच्छायांविकल्पेच"इत्यमरः । अस्मिन्लोके भूलोके सांप्रतं अस्मिन्काले । "अस्मिन्कालेधुनेदानींसंप्रत्येतर्हिसांप्रतम्" इतिबाणः । लोकान्तरेविष्णोर्विदितत्वात् अत्रैवकालान्तरेनृसिंहादेःप्रसिद्धत्वात्तद्व्यावृत्त्यर्थमेवमुक्तम् । गुणाअस्यसन्तीति गुणवान् । भूमादयोमत्वर्थाः । अस्मिँल्लोकेअस्मिन्कालेकोवासकलकल्याणगुणसंपन्नइत्यर्थः । एवंसामान्येन गुणसमुदायं पृष्ट्वा विशिष्यतत्तद्गुणाश्रयंपृच्छति–कश्च वीर्यवानित्यादिना । यद्वा गुण्यतेआवर्त्यते पुनःपुनराश्रितैरनुसन्धीयतइतिगुणः सौशील्यम् । "गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु"इतिविश्वः । सुशीलं हिनाम महतोमन्दैःसहनीरन्ध्रेणसंश्लेषः । तस्याधिक्यं सौशील्यं तद्वान् । सौशील्येगुणशब्दोभियुक्तैःप्रयुक्तः । "वशीवदान्योगुणवानृजुःशुचिः" इति । कोवासौशील्यवानित्यर्थः । सर्वत्र प्रश्ने नु इति किंशब्दोपियत्रनप्रयुक्तस्तत्रानुषञ्जनीयः । एकेनैवकिंशब्देनोपपत्तावप्यादरातिशयात् पुनःपुनस्तत्प्रयोगः । "प्रदानवद्देवतदुक्तं" इतिन्यायेन प्रतिगुणंगुण्यावृत्त्यभिप्रायेणवा लोके गुण संबन्धाद्गुण्यतिशयः इहतुगुणिसंबन्धाद्गुणातिशय इतिद्योतनाय गुणिनःप्रथमंनिर्देशः । "गुणास्सत्यज्ञान—"इत्युक्तेः । कश्चवीर्यवान् चकारउक्तसमुच्चये । सत्स्वपिविकारहेतुष्वविकृतत्वंवीर्यं औषधंवीर्यवदित्यादौतथादर्शनात् तद्वान् । धर्मः अलौकिकश्रेयस्साधनं तंसामान्यरूपंविशेषरूपंचजानातीतिधर्मज्ञः । चका-

---

म—"इतिस्मृत्याआत्मनामग्रहणस्यनिषिद्धत्वात् । निषेधस्यचस्वडनामविषयत्वात् । वस्तुतस्तु स्मृतौग्रह उच्चारणमर्थः ज्ञानाद्यर्थत्वे निषेधस्यासंभवापत्तिः । यदि लेखनमात्रेचनोच्चारणमित्यङ्गीकारः तदा रामचरितस्यदुर्लभत्वबोधनफलकस्वतपःप्रख्यापनार्थंयौगिकनामोक्तिरितिबोध्यम् ॥१॥ **तनिश्लोकी** ॥ हेमारविन्दवदाश्रयवैलक्षण्येन निस्सीमाभ्यधिकत्वंवक्तुं कोन्वितिप्रथमंधर्मिनिर्देशः । स्वस्याविकृतत्वेसतिपरविकारकारित्वंवीर्यंतद्वान् वीर्यवान् ॥ २ ॥

चारित्रेण च को युक्तः सर्वभूतेषु को हितः । विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ॥ ३ ॥
आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः । कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥४॥
एतदिच्छाम्यहं श्रोतुं परं कौतूहलंहि मे । महर्षे त्वं समर्थोसि ज्ञातुमेवंविधं नरम् ॥ ५ ॥

रोऽनुक्तसमुच्चयार्थः परिहार्याधर्मज्ञश्चेत्यर्थः । कृतमुपकारंस्वल्पंप्रासङ्गिकमपिबहुतयाजानातीतिकृतज्ञः अपकारास्मरणंचशब्दार्थः । वक्ष्यति "नस्मरत्यपकाराणां शतमप्यात्मवत्तया । कथंचिदुपकारेणकृतेनैकेनतुष्यति"इति । सत्यं कृच्छ्रेष्वप्यनृतशून्यं वाक्यं वचनं यस्यसः सत्यवाक्यः । तथावक्ष्यति "अनृतंनोक्तपूर्वं मेनचवक्ष्ये कदाचन"इति । दृढव्रतः निश्चलसंकल्पः "अप्यहंजीवितंजह्यांत्वांवासीतेसलक्ष्मणाम् । नहिप्रतिज्ञांसंश्रुत्यब्राह्मणेभ्योविशेषतः"इति ॥ २ ॥ चरित्रमाचारःतदेवचारित्रं वायसराक्षसादिवत्स्वार्थेऽणप्रत्ययः तेनयुक्तःसर्वदाप्यनुल्लङ्घितकुलाचारइत्यर्थः । सर्वभूतेषु सर्वप्राणिषुविषये "भूतंक्ष्मादौचजन्तौचनस्त्रियां गुणसत्त्वयोः"इतिबाणः । हितःहितकरः । हितशब्दात् "तत्करोति"इतिणिच् पचाद्यच् णिलोपेपूर्वरूपेचरूपम् । भूतशब्देनस्वपरतारतम्याभावउक्तः । सर्वशब्देनसापराधेष्वपिहितकरत्वमुक्तम् । वेत्तीतिविद्वान् सर्वशास्त्रज्ञः "विदेःशतुर्वसुः" । समर्थः सर्वकार्यधुरंधरः । प्रियंदर्शनंयस्यासौप्रियदर्शनः एकश्चासौप्रियदर्शनश्चएकप्रियदर्शनः । अयमिवनान्योलोकेप्रियदर्शनोस्तीत्यर्थः । यद्वा एकप्रियदर्शनः एकरूपप्रियदर्शनः । लोकेहिकस्यचिद्दर्शनं कदाचित्प्रियंभवति कदाचिदप्रियंचभवति "तस्मादुःखात्मकंनास्तिनचकिंचित्सुखात्मकम्"इतिवचनात् । अयंतुनतथा । किंतु "क्षणेक्षणेयन्नवतामुपैतितदेवरूपंरमणीयतायाः"इत्युक्तरीत्यासदानुभवेप्यपूर्ववद्विस्मयमादधानइत्यर्थः । तथैवोत्तरयिष्यति—सदैकप्रियदर्शनइति । "एकेमुख्यान्यकेवलाः"इत्युभयत्राप्यमरः ॥ ३ ॥ आत्मवान् धैर्यवान् "आत्माजीवेधृतौदेहेस्वभावेपरमात्मनि"इत्यमरः । अप्रकंप्यधैर्यइत्यर्थः । जितक्रोधः विधेयकोपः । दण्डार्हेष्वेवाहितकोपइत्यर्थः । "क्रोधमाहारयत्तीव्रम्" इति हिवक्ष्यति । द्युतिमान् कान्तिमान् । "रूपसंहननंलक्ष्मीं सौकुमार्यंसुवेषतां । ददृशुर्विस्मिताकारारामस्यवनवासिनः"इतिहिवक्ष्यति । गुणेषुदोषाविष्करणमसूया "असूयातुदोषारोपोगुणेष्वपि"इत्यमरः । अविद्यमानाऽसूयायस्यासावनसूयकः । "शेषाद्विभाषा"इतिकपि "आपोन्यतरस्यां" इतिह्रस्वः । यद्वा असूयकःअसूञ् कण्ड्वादौपठितः । तस्मात् "कण्ड्वादिभ्योयक्"इतियक्प्रत्ययः । "अकृत्सार्वधातुकयोः"इतिदीर्घः । ततो "निन्दहिंस–"इत्यादिनावुञ् सनभवतीत्यनसूयकः । देवाश्चेतिचकारेणासुरादयःसमुच्चीयन्ते । जातरोषस्य कस्यसंयुगे देवादयःसर्वेबिभ्यतीत्यन्वयः । अतोन "भीत्रार्थानां–" इतिकिंशब्दात्पञ्चमी । शत्रुविषयःकोपोमित्राणामपिभयमावहतीत्यर्थः । यद्वा चकारोप्यर्थः । अनुकूलाअपिबिभ्यति किंपुनःप्रतिकूलाइत्यर्थः । यद्वा संयुगेजातरोषस्यकस्यबिभ्यतीत्येवान्वयः । शेषेषष्ठी । "संज्ञापूर्वकोविधिरनित्यः" इत्यपादानसंज्ञापूर्वकपञ्चम्यभावः ॥ अत्रश्लोकत्रयेसमृद्धिमद्वस्तुवर्णनादुदात्तालंकारः ॥ ४ ॥ अथायंप्रश्नोविजिगीषामूलमितिनारदोमन्येतापीतिमन्वानः स्वप्रश्नोजिज्ञासाहेतुकइतिदर्शयन्प्रश्नमुपसंहरति—एतदिति । एतत्पूर्वोक्तगुणाश्रयभूतंवस्तु अहं जिज्ञासुः नविजिगीषुः श्रोतुं नतुक्षेप्तुं इच्छामि नतुब्रूहिइतिनिर्बध्नामि । अहंतावदिच्छामिमयिभवतःप्रसादोस्तिचेद्वक्तुमर्हसीतिभावः । तत्रहेतुमाह—परमिति । हिर्हेतौ "हिर्हेताववधारणे" इतिबाणः । यस्मात्कारणान्मेपरमुत्कृष्टंकौतूहलंविस्मयोस्तितस्मादिच्छामि । यद्वा हिःप्रसिद्धौ । मुखविकासाद्यनुभावैर्ममहर्षेस्त्वस्पष्टइत्यर्थः । स्वप्रश्नोत्तरदानेदेशिकालाभान्निर्विण्णः संप्रतिभवद्दर्शनेनसंजाताभिलाषोस्मि ब्रूहिमत्पृष्टमितिभावः । "आचार्यस्यज्ञानवत्तामनुमायशिष्येणोपसत्तिःक्रियते"इतिन्यायेननारदस्यप्रष्टव्यविषयज्ञानसंभावनामाह—महर्षइति । ऋषिः ज्ञानस्यपारंगन्ता । ऋषगतावित्यस्माद्धातोः "इगुपधा-

तिलकं ॥ लौकिकव्यवहारे प्रजारञ्जनादौचातुर्यसामर्थ्यं तद्वान् समर्थः । एकप्रियदर्शनः । कन्दर्पाधिकसौन्दर्यवत्त्वेन नित्यसुखरूपत्वेनच एकप्रियं केवलप्रियं दुःखासंभिन्नप्रियत्ववद्दर्शनंयस्यसः ॥ ३ ॥ **तीर्था०** आत्मवान् वशीकृतान्तःकरणः । जितक्रोधः अत्रक्रोधशब्दःकामादीनामुपलक्षकः जितारिषड्वर्गइत्यर्थः ॥ ४ ॥ **तनि०** कथंममसामर्थ्यं तत्राह—महर्षे इति । ऋषयो ह्यलौकिकार्थद्रष्टारः तत्रमहर्षित्वात्त्वमत्तोपि वेदान्तरहस्यज्ञानमधिकमिति । एवंविधंनरं परमपुरुषम् ॥ ५ ॥

श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः । श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ॥ ६ ॥
बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः । मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ॥ ७ ॥

त्कित्'' इतीन् । गत्यर्थोज्ञानार्थः । महांश्चासौऋषिश्च महर्षिः । ''आन्महतः समानाधिकरणजातीययोः'' इत्यात्वं । हेतुगर्भविशेषणं । महर्षित्वात्त्वमेवंविधं नरं पुरुषं ज्ञातुमर्हसि । ब्रह्मणःसकाशाद्विदितसकलविशेषस्त्वंकथंमेजिज्ञासोर्नवदेरितिभावः । अत्रपूर्वार्धेकाव्यलिङ्गमलंकारः । उत्तरवाक्यार्थस्यपूर्ववाक्यार्थहेतुत्वात् । ''हेतोर्वाक्यपदार्थत्वेकाव्यलिङ्गमलंकृतिः'' इतिलक्षणात् । उत्तरार्धेपरिकरइत्यनयोःसंसृष्टिः । अन्तेचास्येतिकरणंबोध्यं । इतिपरिपप्रच्छेतिसंबन्धः । नन्वयंप्रश्नोवाल्मीकेर्नसंगच्छते तस्यविदितसकलरामवृत्तान्तत्वेननिश्चयेसंशयायोगात् । वक्ष्यतिह्ययोध्याकाण्डे । ''इतिसीताचरामश्चलक्ष्मणश्चकृताञ्जलिः । अभिगम्याश्रमंसर्वेवाल्मीकिमभिवादयन्''इति । कथंरामविषयमध्यवर्तीवाल्मीकिस्तद्गुणान्नविजानीयात् । वक्ष्यतिहि ''विषयेतेमहाराजरामव्यसनकर्शिताः । अपिवृक्षाःपरिम्लानाःसपुष्पाङ्कुरकोरकाः''इति । कथंवा ''रामोरामोरामइतिप्रजानामभवन्कथाः । रामभूतं जगदभूद्रामेराज्यंप्रशासति''इतिपृथग्जनैरपिविदितंरामवैभवंमुनिरेषनजानीयात् । कथंचैतावन्मात्रं सत्यलोकादागतोनारदःप्रष्टुमर्हति । यद्येवमुत्तरयति ''रामो नामजनैःश्रुतः'' इति । तत्रोच्यते । नायमापाततोभासमानःप्रश्नार्थः । नाप्युत्तरार्थः । अत्रकरतलामलकवद्विदितरामवृत्तान्तस्यवाल्मीकेःकुतूहलासंभवात् बुद्ध्वावक्ष्यामीत्युत्तरवाक्यानुपपत्तेश्च । किंतु वक्तृबोद्धानुगुण्यात् वेदान्तेषुनानाविद्यासुतत्तद्गुणविशिष्टतयाऽवगम्यमानंपरंतत्त्वं किंविष्णुरुतरुद्रादिष्वन्यतमइतिप्रश्नार्थः । तदिदंवाल्मीकेर्हृदयमाकलयन्भगवान्नारदोपि रामत्वेनावतीर्णोविष्णुरेववेदान्तवेद्यःपुरुषः ब्रह्मादयः सर्वेतद्भ्रुकुटीभटास्तत्परतन्त्राः । सद्ब्रह्मात्मादिशब्दाश्च पर्यवसानवृत्त्याऽवयववृत्त्याच विष्णुपराइत्येवमाशयेन सकलवेदान्तोदितगुणजातं रामेयोजयन्नुत्तरयतीति सर्वमनवद्यम् ॥ ५ ॥ एवं'' तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्''इत्युक्तं गुरूपसदनविधिमुपबृंह्य ''येनाक्षरंपुरुषंवेदसत्यंप्रोवाचतांतत्त्वतोब्रह्मविद्यां''इत्युक्तंप्रवचनविधिमुपबृंहयति–श्रुत्वेत्यादिना । तत्र ''नासंवत्सरवासिनेप्रब्रूयात्'' इतिनियमस्यज्येष्ठपुत्रव्यतिरिक्तविषयत्वात् वाल्मीकेश्चभृगुपुत्रतया भ्रातृपुत्रत्वात्शुश्रूषानिरपेक्षंप्रीत्योपदिदेशेत्याह—श्रुत्वाचेति । त्रयाणांलोकानांसमाहारस्त्रिलोकं । पात्रादित्वान्नङीप् । यद्वा त्रित्वविशिष्टोलोकस्त्रिलोकः । ''नवरसरुचिरां''इत्यत्रकाव्यप्रकाशेतथैवव्याख्यानात् । यद्वा त्रयोलोकायस्मिन् तत्त्रिलोकमितिब्रह्माण्डमुच्यते । तज्जानातीतित्रिलोकज्ञः । भूर्भुवःस्वरितित्रैलोक्यं । यद्वा विष्णुपुराणोक्तरीत्या कृतकमकृतकंकृतकाकृतकमिति त्रयोलोकाः । महर्लोकपर्यन्ताःकृतकाः । जनोलोकः कृतकाकृतकः । सत्यलोकोकृतकइति । यद्वा लोकाःजनाः । ''लोकस्तुभुवनेजने''इत्यमरः । बद्धनित्यमुक्तास्त्रयोलोकाः । नारदः ब्रह्मपुत्रतयातज्ज्ञानार्हः । एतत् पूर्वोक्तरीत्याव्यङ्ग्यार्थगर्भं वाल्मीकेःस्वाभिमतस्यपुत्रस्यवचःपरिपूर्णार्थवाक्यं श्रुत्वा निशम्य चकारेणतदूहित्वाचेत्यर्थः । प्रहृष्टः स्वेनोपदिदिक्षितस्यैवपृष्टत्वेनसंतुष्टः शतकोटिप्रविस्तररामायणेस्वावगतस्यैवानेनपृष्टत्वात् रामगुणस्मरणामृतपानलाभादपूर्वशिष्यलाभाद्वा ''सोहंमन्त्रविदेवास्मिनात्मवित्''इत्युक्तरीत्या सनत्कुमारंप्रति स्वस्योपसर्पणस्मारकत्वाद्वा प्रहृष्टःसन् । कर्तरिक्तः । रामगुणानुसन्धानजनितंनिजवैचित्त्यंव्याजेनपरिहर्तुं श्रूयतामित्यामन्त्र्य अभिमुखीकृत्य वाक्यमुत्तररूपंअब्रवीत् व्यक्तमुक्तवान् ॥ ६ ॥ वक्ष्यमाणस्यासदुत्तरत्वपरिहाराय आत्मनोवाल्मीकेराशयाभिज्ञत्वमाह बहवइति । यद्वा वेदान्तोदितगुणानां विष्णोरन्यत्रासंभवात् तेषांपुरुषशब्दवाच्यत्वासंभवात् चतुर्मुखसंप्रदायाच्च विष्णावेवपरतत्त्वतांपरिशेषयन्नाह— बहवइति । बहवो विपुलाः अनेकगुणविततिमूलभूताइत्यर्थः । अनेनापृष्टानामपिवक्ष्यमाणानांगुणानांनिदानमुपदर्शितम् । यद्वा बहवः अपरिच्छिन्नाइत्यर्थः । श्रूयते ह्यपरिच्छिन्नत्वंगुणानां । ''यतोवाचोनिवर्तन्ते

ती० प्रहृष्टः ''कस्यबिभ्यतिदेवाश्च'' इतिदृष्टदेवादिभीषकत्वगुणसंपत्तेः ब्रह्मादिष्वप्रसक्तोयंप्रश्नः सकलगुणविशिष्टसार्वभौमविषयकः इत्यवगम्यते । तत्रापि सार्वभौममात्रे पृष्टप्रशस्तसकलगुणसंपत्तेरसंभवात् सकलजगद्रक्षणार्थं नृरूपेणावतीर्णपरमपुरुषएवसंभवात् दिष्ट्यातद्गुणकीर्तनंलब्धमितिप्रहर्षः ॥ ६ ॥

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः । नियतात्मा महावीर्यो द्युतिमान्धृतिमान्वशी ॥ ८ ॥

अप्राप्यमनसासह । आनन्दंब्रह्मणोविद्वान् । नबिभेतिकुतश्चन''इति । अत्रानन्दस्यैकस्यापरिच्छिन्नत्वोक्तिः इतरेषामप्यपरिच्छिन्नत्वप्रदर्शनार्था । उक्तंहियामुनाचार्यैः "उपर्युपर्यब्जभुवोपिपूरुषान्''इत्यादिना । दुर्लभाः परमपुरुषादन्यत्रासंभाविताः । अन्येषां "न ब्रह्मानेशानः''इत्यादिनाऽसंभाव्यत्वादिवचनादितिभावः । अनेनप्रश्नस्यदेवताविशेषनिर्धारणपरत्वमात्मनाऽवगतमितिव्यञ्जितम् । चकारउक्तसमुच्चयार्थः अनुक्तसमुच्चयार्थोवा । तेन स्वाभाविकानवधिकातिशयाऽसङ्ख्येयकल्याणरूपाः इत्युक्तम् । एवकारः इतरत्रसर्वात्मनाऽसंभावितत्वमभिव्यनक्ति । यइतिवेदान्तप्रसिद्धिरुच्यते । गुणाःवीर्यादयः कीर्तिताइत्यनेनगुणानां प्रश्नकालेपिभोग्यतातिशयःसूच्यते । तैर्युक्तोनतुकल्पितइतिनिर्गुणवादनिरासः । नरः पुरुषः । "पुरुषाः पूरुषानराःइतिनिघण्टुः । "यएषोऽन्तरादित्येहिरण्मयःपुरुषोदृश्यते । पुरुषःपुण्डरीकाक्षः''इतिश्रुतिस्मृत्यनुगतः पुरुषशब्दोऽनेनप्रत्यभिज्ञाप्यते । श्रूयतां नतुयथाकथंचित्परिकल्प्यताम् । शृण्वित्यनभिधानात् विनयोक्तिरियम् । तात्कालिकंकिंचित्प्रकल्प्यतइतिभ्रमंवारयति—अहंबुद्ध्वावक्ष्यामीति । मत्पितुर्ब्रह्मणः सकाशात्शतकोटिप्रविस्तररामायणमुखेनविदित्वावक्ष्यामि । अनेनसंप्रदायाभिज्ञत्वमात्मनोदर्शितम् । यद्वा रामगुणानुसंधानवैचित्त्येन नमेकिंचित्प्रतिभाति क्षणात्बुद्ध्वावक्ष्यामीत्यर्थः । अतोमध्येवाक्यान्तरमलंकाराय । अन्यथा वाक्यगर्भितमितिकाव्यदोषःस्यात् । अहंवक्ष्यामि अहंभूत्वावक्ष्यामि नेदानींनारदोस्मि रामगुणश्रवणशिथिलत्वात् । रामगुणमग्नोयंनदीप्रवाहमग्नइवावलंबनयष्टिमपेक्षते—हेमुनइति । यद्वा प्रश्नकालेसमवधानविशेषमालक्ष्य श्लाघते—मुनइति । अथक्षणात्संधुक्षितोनारदोवाक्यशेषंपूरयति—तैरिति । नरइत्यनेन परतत्त्वनिर्धारणंप्रश्नफलितार्थंद्योतयति । बुद्ध्वा इत्यनेन श्रुतिस्थतत्तच्छब्दार्थोविवृतः ॥ ७ ॥ अथवेदान्तोदितगुणानांरामेप्रदर्शनमुखेन रामत्वेनावतीर्णोविष्णुरेव वेदान्तवेद्यंपरंतत्त्वमितिदर्शयति—इक्ष्वाकुवंशप्रभवइत्यादिनासर्गशेषेण । तत्रवेदान्तोदितगुणगणानांनिधीरामत्वेनावतीर्णोविष्णुरेवेतिमहावाक्यार्थः । "इक्ष्वाकुवंश" इत्यारभ्य "सत्येधर्मइवापरः" इत्यन्ता सार्धैकादशश्लोकी एकान्वया । इक्ष्वाकुर्नाम वैवस्वतमनोर्ज्येष्ठःपुत्रः तस्यवंशः पुत्रपौत्रादिपरंपरा । प्रभवत्यस्मादितिप्रभवः प्रादुर्भावस्थानम् । इक्ष्वाकुवंशःप्रभवोयस्यसः इक्ष्वाकुवंशप्रभवः । जनकादिमहाकुलेषुविद्यमानेषु कुतोत्रैवभगवानवतीर्णइत्यपेक्षायांइक्ष्वाकुपदंप्रयुक्तम् । इक्ष्वाकुर्हि चिरंहरिमाराध्य तन्मूर्तिविशेषं रङ्गनाथमलभतेति पौराणिकीगाथा । अतस्तत्पक्षपातेनतद्वंशेऽवतीर्णइतिसूचयितुमिक्ष्वाकुपदम् । वंशेत्यनेन गुणवान्कइतिपृष्टंसौशील्यमुक्तम् । रमयतिसर्वान्गुणैरितिरामः "रामोरमयतांवरः" इत्यार्षनिर्वचनबलात् कर्तर्यपिकारकेघञ्वर्ण्यते । यद्वा रमन्तेस्मिन्सर्वेजनागुणैरितिरामः । "अकर्तरिचकारके संज्ञायां"इतिघञ् । तथाचागस्त्यसंहितायामुक्तं "रमन्तेयोगिनोऽनन्तेसत्यानन्देचिदात्मनि । इतिरामपदेनासौपरंब्रह्माभिधीयते''इति । नामेतिप्रसिद्धौ । चित्रकूटवासिनात्वया विदितोहीत्यर्थः । नकेवलंभवता पामरैरपिविदितइत्याह—जनैःश्रुतइति । श्रुतः अवधृतः । "श्रुतंशास्त्रावधृतयोः" इत्यमरः । ताटकाताटकेयवधविश्वामित्राध्वरत्राणाहल्याशापविमोक्षहरधनुर्भङ्गपरशुरामनिग्रहसप्ततालवेधवालिवधसिन्धुबन्धमूलबलनिबर्हणादिभिरवधारितनारायणभावइत्यर्थः । यएवंभूतःसएवनियतात्मा सएवमहावीर्य इत्येवंप्रतिपदंवक्ष्यमाणंतत्पदमनुषज्यते । रामरूपेणावतीर्णोविष्णुरेव

तनि० बहवः पृष्टगुणानांबहुत्वेपिप्रत्येकमेकैकस्यानेकगुणवितततयाराशीकरणादसंख्याताः । दुर्लभाःअनीश्वरेईश्वरेपरमव्योमवासिन्यवतारांतरेचदुर्लभाःकीर्तिताः । वाचिकव्यापारप्रतिपन्नाअपिदुर्लभाः । एवंविधेप्रश्नेअन्यस्यनाधिकारइत्याह—मुनइति । मुनिर्मननशीलः । तेनशशश्रृङ्गप्रश्नवत्नरेउक्तगुणवैशिष्ट्यप्रश्नस्यदोषमूलत्वंव्युदस्तं । उत्तरेपिनान्यस्याधिकारइत्याह—अहमिति । ममापि सहसावक्तुंनशक्यमित्याह—बुद्ध्वेति । **तीर्था०** बुद्ध्वावक्ष्यामि महापुरुषंनिश्चित्यवक्ष्यामि । श्रूयतां प्राप्तकालेलोट् । तस्य श्रवणं ते प्राप्तकालमित्यर्थः ॥७॥ **तनि०** इक्ष्वाकुवंशप्रभवः तपस्समासादितश्रीरङ्गनाथाराधनफलतया तद्वंशएवावतीर्णइतिइक्ष्वाकुग्रहणम् । "वैष्णवो नः कुले जातः स नः संतारयिष्यति" इत्येकवैष्णवजनिमात्रेण तद्वंशस्यसर्वस्याप्युत्तारः । यत्रतुसर्वेगृहाराधनीकृतश्रीरङ्गनाथाः तस्यवंशस्यमहत्त्वे किंवक्तव्यमितिवंशपदाभिप्रायः । वशी गुणवशीकृतसर्वजनः । **तीर्था०** नियतात्मा शिक्षितमनाः । वशी जितेन्द्रियः ॥ ८ ॥

बुद्धिमान्नीतिमान्वाग्मी श्रीमाञ्शत्रुनिबर्हणः । विपुलांसो महाबाहुः कंबुग्रीवो महाहनुः ॥ ९ ॥
महोरस्को महेष्वासो गूढजत्रुररिंदमः । आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥ १० ॥

वेदान्तोदिततत्तद्गुणकइति सर्वत्रतात्पर्यार्थः । आदौ-स्वरूपनिरूपकधर्मानाह्—नियतात्मेत्यादिना । नियतात्मा नियतस्वभावः । निर्विकारइतियावत् । "नास्यजरयैतज्जीर्यते नवधेनास्यहन्यते अपहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोपिपासः" इत्यादिश्रुतेः । महावीर्यः अचिन्त्यविविधविचित्रशक्तिकः । "परास्यशक्तिर्विविधैवश्रूयते स्वाभाविकीज्ञानबलक्रियाच" इतिश्रुतेः । द्युतिमान् स्वाभाविकप्रकाशवान् स्वयंप्रकाशः ज्ञानस्वरूपइतियावत् । "विज्ञानघनएव प्रज्ञानघनः" इतिश्रुतेः । धृतिमान् निरतिशयानन्दः । "धृतिस्तुतुष्टिः संतोषः" इतिवैजयन्ती । "आनन्दोब्रह्म" इतिश्रुतेः । सर्वजगद्वशेऽस्यास्तीति वशी सर्वस्वामीत्यर्थः । "सर्वस्यवशी सर्वस्येशानः" इतिश्रुतेः ॥ ८ ॥ अथ सृष्ट्युपयोगिगुणानाह्—बुद्धिमानित्यादिना । बुद्धिमान् सर्वज्ञः । "यःसर्वज्ञः सर्ववित्" इतिश्रुतेः । नीतिमान् मर्यादावान् । श्रुतिरत्र "धातायथापूर्वमकल्पयत् । एषसेतुर्विधरणएषांलोकानामसंभेदाय" इति । शोभनावागस्यास्तीति वाग्मी । "वाचोग्मिनिः" इतिग्मिनिप्रत्ययः कुत्वेजश्त्वेचकृतेगकारलाभात् पुनर्गकार उक्तिशोभनत्वज्ञापनायेतिन्यासकारः । सर्ववेदप्रवर्तकइत्यर्थः । "योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै" इति श्रुतिः । श्रीमान् समृद्धोभयविभूत्यैश्वर्यः । "श्रीः कान्तिसंपदोर्लक्ष्म्यां" इतिबाणः । "सर्वमिदमभ्यात्तः" इतिश्रुतिः । शत्रून् तद्विरोधिनोनिबर्हयतिनाशयतीति शत्रुनिबर्हणः । बर्हहिंसायामित्यस्माद्धातोःकर्तरिल्युट् । "एषभूतपतिरेषभूतपालः" इतिश्रुतेः । "अथयएषोन्तरादित्येहिरण्मयःपुरुषोदृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः आप्रणखात्सर्वएवसुवर्णस्तस्ययथाकप्यासंपुण्डरीकमेवमक्षिणी तस्योदितिनाम सएषसर्वेभ्यःपाप्मभ्यउदित उदेतिहवैसर्वेभ्यःपाप्मभ्योयएवंवेद" इत्यन्तरादित्यविद्योदितंसर्वाङ्गसुन्दरविग्रहंदर्शयति—विपुलांसइत्यादिनासार्धश्लोकद्वयेन । विपुलांसः उन्नतस्कन्धः । उन्नतस्कन्धत्वंचमहापुरुषलक्षणमिति सामुद्रिकोक्तं—"कक्षःकुक्षिश्चवक्षश्चघ्राणःस्कन्धोललाटिका । सर्वभूतेषुनिर्दिष्टाउन्नतास्तुसुखप्रदाः" इति । महाबाहुः वृत्तपीवरबाहुः । आयतत्वंतुवक्ष्यति "आजानुबाहुः" इति । "आजानुलंबिनौबाहूवृत्तपीनौमहीश्वरः" इतिसामुद्रिकलक्षणम् । "कंबुग्रीवः शङ्खतुल्यकण्ठः । " इन्दुमुखीतिवत्शाकपार्थिवादित्वान्मध्यमपदलोपीसमासः । "कंबुग्रीवश्चनृपतिर्लंबकर्णोतिभूषणः" इतिलक्षणम् । "रेखात्रयान्विताग्रीवाकंबुग्रीवेतिकथ्यते" इतिहलायुधः । महत्यौहनूयस्यासौ महाहनुः । "स्त्रियाःपुंवत्—" इत्यादिनापुंवद्भावः । हनुःकपोलोपरिभागः । "अधस्ताच्चिबुकंगण्डौकपोलौतत्परोहनुः" इत्यमरः । "मांसलौतुहनूयस्यभवतस्त्वीषदुन्नतौ । सनरोमृष्टमश्नातियावदायुःसुखान्वितः" इतिलक्षणम् ॥ ९ ॥ महोरस्कइति । महद्विशालमुरोयस्यासौमहोरस्कः । "उरःप्रभृतिभ्यःकप्" इतिकप् । लक्षणंतु "स्थिरंविशालं कठिनमुन्नतंमांसलंसमम् । वक्षोयस्यमहीपालस्तत्समोवाभवेन्नरः" इति । मांसलत्वंतुवक्ष्यति पीनवक्षा इति । महानिष्वासोधनुर्यस्यासौमहेष्वासः । अनेन तदुचितसंहननविशेषोलक्ष्यते । अतोनप्रक्रमविरोधः । गूढे मांसलत्वेनाप्रकाशे जत्रुणी अंसद्वयसन्धिगतास्थिनी यस्यासौ गूढजत्रुः । "स्कन्धोभुजशिरोंसोस्त्री सन्धीतस्यैवजत्रुणी" इत्यमरः । "विषमैर्जत्रुभिर्निःस्वाअतिसूक्ष्मैश्चमानवाः । उन्नतैर्भोगिनोनिम्नैर्निःस्वाः पीनैर्नराधिपाः" इतिलक्षणम् । अरीन्दमयतिनिवर्तयतीत्यरिंदमः । "संज्ञायांभृतृवृजिधारिसहितपिदमः"

तीर्था० बुद्धिमान् प्रशस्तधीः । बुद्धेः प्राशस्त्यंनाम "शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । ऊहापोहार्थविज्ञानं तत्वज्ञानं च धीगुणाः" इत्युक्तगुणविशिष्टत्वम् । श्रीमान् सर्वातिशायिश्रीः । "ऋचःसामानियजूंषि साहिश्रीरमृतासताम्" इत्युक्तश्रौतश्रीरत्रविवक्षिता । **तिल०** नीतिमान् कामन्दकादिनीतिमान् । महाबाहुः अस्यसुलक्षणत्वमुक्तंब्राह्मे—"शिरोललाटश्रवणे ग्रीवा वक्षश्च हृत्तथा । उदरं पाणिपादं च पृष्ठं दश महत्सुखम्" इति । महाहनुःमांसलकपोलापरभागः । "पूर्णमांसलहनुस्तुभूपतिः" इतिसंहिता ॥ ९ ॥ **तीर्था०** अरीन्कामादीन्दमयतीति अरिंदमः । **तिल०** निजभक्तानां अरीन्कामादीन्दमयतीति अरिन्दमः ॥ १० ॥

समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् । पीनवक्षा विशालाक्षो लक्ष्मीवाञ्शुभलक्षणः ॥ ११ ॥
धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः । यशस्वी ज्ञानसंपन्नः शुचिर्वश्यः समाधिमान् ।
प्रजापतिसमः श्रीमान्धाता रिपुनिषूदनः ॥ १२ ॥

इतिखच् असंज्ञायामप्यार्षः । अरिशब्देनपाप्माविवक्षितः अपहतपाप्मेत्यर्थः । अनेनायंविग्रहपरिग्रहो नकर्ममूलः किन्त्वनुग्रहमूलः । " इच्छागृहीताभिमतोरुदेहः " इतिस्मृतेः । अतोनप्रक्रमभङ्गः । जानु ऊरुपर्व तत्पर्यन्तंविलंबिबाहुः आजानुबाहुः । सुष्ठुसमंवृत्तंछत्राकारंशिरोयस्यासौसुशिराः । " समवृत्तशिराश्चैवच्छत्राकारशिरास्तथा । एकच्छत्रांमहींभुङ्क्तेदीर्घमायुश्चजीवति " इतिलक्षणम् । सुललाटः । ललाटसौष्ठवंप्रोक्तम्—" अर्धचन्द्रनिभंतुङ्गंललाटंयस्यसप्रभुः " इति । शोभनःविक्रमःपदविक्षेपोयस्यासौसुविक्रमः । शोभनत्वंचगजादितुल्यत्वम् । तथोक्तंजगद्वल्लभायाम् " सिंहर्षभगजव्याघ्रगतयोमनुजामुने । सर्वत्रसुखमेधन्तेसर्वत्रजयिनःसदा " इति ॥ १० ॥ समः नातिदीर्घोनातिह्रस्वः । तथात्वंचतत्रैवोक्तम्— " षण्णवत्यङ्गुलोच्छ्रायःसार्वभौमोभवेन्नृपः " इति । समानिअन्यूनाधिकपरिमाणानि विभक्तानिअश्लिष्टानि अङ्गानिकरचरणाद्यवयवायस्यसः समविभक्ताङ्गः। तानिचोक्तानि सामुद्रिकैः—" भ्रुवौनासापुटेनेत्रेकर्णावोष्ठौचचूचुकौ । कूर्परौमणिबन्धौचजानुनीवृषणौ कटी । करौपादौस्फिचौ यस्यसमौज्ञेयःसभूपतिः " इति । स्निग्धः स्नेहयुक्तो वर्णोयस्यसः स्निग्धवर्णः । तत्रोक्तंवररुचिना—" नेत्रस्नेहेनसौभाग्यंदन्तस्नेहेनभोजनम् । त्वचःस्नेहेनशय्याचपादस्नेहेनवाहनम् " इति। प्रतापवान् तेजस्वी समुदायशोभासंपन्नइत्यर्थः। पीनवक्षाः मांसलवक्षाः। विशाले पद्मपत्रायते अक्षिणीयस्यसः विशालाक्षः । " बहुव्रीहौसक्थ्यक्ष्णोः स्वाङ्गात्—" इतिषच् । अत्रसामुद्रिकम् । "रक्तान्तैः पद्मपत्राभैर्लोचनैःसुखभोगिनः " इति । लक्ष्मीवान् अवयवशोभायुक्तः शुभलक्षणः अनुक्तसकललक्षणसंपन्नः ॥ ११ ॥ एवमाश्रितानुभाव्यदिव्यमङ्गलविग्रहशालित्वमुक्त्वाऽऽश्रितरक्षणोपयोगिगुणानाह— धर्मज्ञइत्यादिना स्वजनस्यचरक्षितेत्येतेन। धर्मंशरणागतरक्षणरूपं जानातीति धर्मज्ञः । वक्ष्यति " मित्रभावेनसंप्राप्तंनत्यजेयंकथंचन । दोषोयद्यपितस्यस्यात्सतामेतदगर्हितम् " इति । सत्या सन्धा प्रतिज्ञा यस्यस सत्यसन्धः । " प्रतिज्ञानेऽवधौसन्धा " इतिवैजयन्ती । " अप्यहंजीवितंजह्यांत्वांवासीतेसलक्ष्मणाम्। नहिप्रतिज्ञांसंश्रुत्यब्राह्मणेभ्योविशेषतः" इति। प्रजानां प्राणिनां हिते हितकरणे रतः तत्परः। यशस्वी आश्रितरक्षणैककीर्तिः। "तस्यनाममहद्यशः" इतिश्रुतेः । ज्ञानसंपन्नः " यःसर्वज्ञःसर्ववित् " इत्युक्तरीत्यास्वरूपतःस्वभावतश्चसर्वविषयज्ञानशीलः। शुचिः पावनः परिशुद्धोवा ऋजुरितियावत् । वश्यःवशंगतः। " वशंगतः " इतिनिपातनाद्यत् । आश्रितपरतन्त्रइत्यर्थः। समाधिमान् समाधिः आश्रितरक्षणचिन्ता तद्वान्। प्रजापतिसमः " मध्येविरिञ्चिगिरिशंप्रथमावतारः" इत्युक्तरीत्या जगद्रक्षणाय प्रजापतितुल्यतयाऽवतीर्णः। श्रीमान् पुरुषकारभूतया लक्ष्म्या अविनाभूतः। धाता पोषकः । डुधाञ्धारणपोषणयोरितिधातोस्तृच्। रिपून् शत्रून् निषूदयति निरस्यतीति रिपुनिषूदनः। " सूददीपदीक्षश्च " इति प्रतिषेधस्यानित्यत्वात् " अनुदात्तेतश्चहलादेः " इतियुच्

तीर्थी० प्रतापवान् श्रवणमात्रेणशत्रुहृदयविदारणेनप्रशस्तपौरुषः । **तिल०** स्निग्धवर्णः स्निग्धश्यामलवर्णइत्यर्थः । "स्निग्धेन्द्रनीलवर्णस्तुभोगंविन्दतिपुष्कलम्" इत्युक्तेः । लक्ष्मीवान् सीतारूपलक्ष्मीवान् ॥ ११ ॥ **तीर्थी०** शुचिः बाह्याभ्यन्तरशुद्धियुक्तः । वश्यः पित्राचार्यादिविनीतः । **तिल०** सत्यसन्धः सत्याअमोघासन्धा "सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददामीति व्रतं मम" इत्यादिरूपिणीप्रतिज्ञायस्यसः । ज्ञानसंपन्नः ब्रह्मज्ञानपरिपूर्णः । अतएवजटायुषंप्रति "मयात्वं समनुज्ञातो गच्छ लोकाननुत्तमान्" इत्युक्तिः संगच्छते । ब्रह्मज्ञस्यैव ब्रह्मोपदेशेऽधिकारात् । विना ब्रह्मोपदेशं अनुत्तमलोकावाप्त्यसंभवात् । नविद्यन्तेउत्तमायेभ्यस्ते अनुत्तमाः । "आत्मानंमानुषंमन्येरामंदशरथात्मजम्" इतिवचस्तु मायामात्रमित्यन्यत्र विस्तृतम् । **तीर्थी०** श्रीमान् अखण्डितैश्वर्यसंपन्नः । रिपुनिषूदनः आश्रितजनानांयेरिपवस्तेषां नाशकः । **तिल०** प्रजापतिसमः यद्यपिरामोब्रह्मैवतथापिमानुषधर्माणांशोकमोहादीनांमायिकानांतत्रदर्शनेन औपाधिकभेदमादायतत्समत्वोक्तिः । भार्गवलोकप्रतिबन्धरूपाज्जटायुषोमोक्षप्रदानरूपात् स्वेनसहसर्वायोध्यावासिजनस्यसशरीरस्यब्रह्मलोकनयनरूपाच्चकारणात् तत्समत्वम् । सर्वथास्वतन्त्रस्यैवेदशेषुयोग्यत्वात् ॥ १२ ॥

रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता । रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ॥ १३ ॥
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः । सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ॥ १४ ॥

नन्द्यादिपाठाद्वा ल्युः । सुषामादित्वात्षत्वं । आश्रितविरोधिनिरसनशीलइत्यर्थः ॥ १२ ॥ अथावतारैकान्तान्गुणानाह—रक्षितेति । लोकेसार्वभौमःस्वकीयजनरक्षणएवयतते । अयंतुनतथा किंतुसर्वस्यप्राणिजातस्य रक्षिता।ताच्छील्येतृच्।शेषेषष्ठी । ननु यदिसर्वेषांरक्षिता तर्हिदुष्कृतिनमपि सुखिनमापादयेदित्यत्राह्—धर्मस्यपरिरक्षितेति । आचरणप्रचारणाभ्यां सर्वधर्मस्य व्यवस्थापयिता। उच्छास्त्रप्रवर्तिनोपि चिकित्सकन्यायेन अनघयितेत्यर्थः । स्वस्य स्वकीयस्य शरणागतरक्षणरूपस्यधर्मस्य विशेषधर्मस्य विशिष्यरक्षिता । यद्वा धर्मस्य तत्तद्वर्णाश्रमधर्मस्य समन्ततोरक्षिता । लोकेसर्वधर्मप्रवर्तकोपि "धर्मोपदेशसमयेजनाःसर्वेपिपण्डिताः। तदनुष्ठानसमयेमुनयोपिनपण्डिताः" इतिन्यायेनस्वधर्मानुष्ठानेस्खलति नतथाऽयमित्याह् । स्वस्यधर्मस्यरक्षिता स्वासाधारणस्य क्षत्रियधर्मस्यरक्षितेत्यर्थः । लोकेसर्वरक्षकोपिकश्चित्स्वजनरक्षणंकर्तुंनप्रगल्भते । "दास्यमैश्वर्यभावेन ज्ञातीनांचकरोम्यहम् । अर्धभोक्ताच भोगानां वाग्दुरुक्तानिचक्षमे" इतिभगवताप्युक्तेः । तदपिकर्तुमीहतइत्याह—स्वजनस्यचरक्षितेति । स्वजनस्यच स्वजनस्यापीत्यर्थः । अनेनस्वजनरक्षणस्यदुर्घटत्वंसूचितं । यद्वा चस्त्वर्थः। स्वजनस्य शरणागतस्य विशेषेणरक्षिता । विशेषस्तु तदपराधसहिष्णुत्वं । वक्ष्यति "मित्रभावेनसंप्राप्तंनत्यजेयंकथंचन । दोषोयद्यपितस्यस्यात्सतामेतदगर्हितम्" इति । यद्वा लोकेकश्चित्सर्वान् रक्षन् स्वजनंपीडयति । असौतु स्वजनस्यापिरक्षितेत्यर्थः। अथवा स्वावतारप्रयोजनमाह्—रक्षितेति। गीतंहि "परित्राणायसाधूनांविनाशायचदुष्कृताम् । धर्मसंस्थापनार्थायसंभवामियुगेयुगे" इति । स्वजनस्य स्वशेषभूतस्येतिसर्वलोकविशेषणं रक्षणहेतुसंबन्धद्योतनार्थम् । रक्षिताइष्टप्रापकः । अनेन साधुपरित्राणमुक्तं । चशब्दोऽन्वाचये । रक्षिताच अनिष्टनिवर्तकः । अनेनानुषङ्गिकदुष्कृद्विनाशउक्तः । धर्मस्यसामान्यविशेषरूपस्य स्थापनमाहेतरवाक्यद्वयेन । रक्षितास्वस्यधर्मस्य सीतापरिणयमुखेन स्वाश्रमोचितधर्माणामनुष्ठाता । यद्वा स्वस्यधर्मःपरत्वं तस्य रक्षिता । हरधनुर्भङ्गपरशुरामजयादिनाहि परत्वं स्थापितम् । यद्वा धर्मोधनुः। "स्वाम्यस्वभावसुकृतेष्वस्त्रीधर्मंतुकार्मुके" इतिबाणः । सदाधनुर्धरः । स्वजनस्यचरक्षिता स्वभूतोजनः स्वजनः ज्ञानी । "ज्ञानीत्वात्मैवमेमतं" इतिगीतत्वात् । तस्यरक्षिता । आत्मनइवसर्वयोगक्षेमावहइत्यर्थः ॥ १३ ॥ अथास्याष्टादशविद्यास्थानाभिज्ञत्वमाह्—वेदेति । विदन्त्यनेनधर्मादिकमितिवेदः । करणेघञ् । सचतुर्विधः । ऋग्यजुस्सामाथर्वणभेदात् । वेदस्यकिंचित्कराणिवेदाङ्गानि । तानिचषट् । तथोक्तं "शिक्षाकल्पोव्याकरणंनिरुक्तंज्योतिषांगतिः । छन्दसांविचितिश्चेतिषडङ्गानिप्रचक्षते" इति । तत्रशिक्षानाम अकारादीनांवेदवर्णानां स्थानकरणप्रयत्नस्वरादिबोधिका । यागक्रियाक्रमोपदेशः कल्पः । साधुशब्दव्याख्यानं व्याकरणं । "वर्णागमो वर्णलोपोवर्णविपर्ययः" इत्यादिना निश्चयेनोक्तंनिरुक्तं । कर्मानुष्ठानकालादिप्रतिपादकंशास्त्रंज्यौतिषम् । छन्दसांपद्यानांशास्त्रंछन्दोविचितिः । वेदाश्चवेदाङ्गानिच वेदवेदाङ्गानि तेषांतत्त्वं तत्त्वार्थः तंजानातीतितथोक्तः । "इगुपधज्ञाप्रीकिरःकः" इतिकप्रत्ययः । धनुर्वेदोनामधनुर्हस्तमुष्टिस्थितिविशेषाकर्षणविमोक्षणदिव्यास्त्रादिप्रयोगप्रतिपादकोग्रन्थः। चकारः इतरोपवेदसमुच्चयार्थः । क्षत्रियोधनुर्वेदप्रधान इतितस्यनिर्देशः । तेचोपवेदाश्चत्वारः । तथाहि । "आयुर्वेदोधनुर्वेदोवेदोगान्धर्वएवच । अर्थशास्त्रमितिप्रोक्तमुपवेदचतुष्टयम्" इति । आयुर्वेदोबाहटं वैदिकधर्मानुष्ठानविरोधिरोगनिवर्तकौषधादिप्रतिपादकम् । गान्धर्ववेदोभरतशास्त्रं सामगानोपयोगि । अर्थशास्त्रं चाणक्यादिप्रणीतं नीतिशास्त्रं कर्मानुष्ठानेपूपयोग्यर्थसाधनं तेषुनिष्ठितः निष्ठावान् । सर्वशास्त्रार्थतत्त्वज्ञइति । सर्वशास्त्राणि उपात्तव्यतिरिक्तानिउपाङ्गानि गोबलीवर्दन्यायात् । "धर्मशास्त्रंपुराणंचमीमांसाऽऽन्वीक्षिकीतथा। चत्वार्येतान्युपाङ्गानिशास्त्रज्ञाःसंप्रचक्षते" इति ।

ति**ल०** स्वजनस्य स्वभक्तजनस्य । अवश्यभाविनोप्यनिष्टस्यनिरासपूर्वकंपरमेष्टमोक्षदानेनरक्षिता । तच्च अंबरीषप्रह्लादध्रुवादीनांरक्षणेनप्रसिद्धमेव ॥ १३ ॥

सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः । सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ॥ १५ ॥
आर्यः सर्वसमश्चैव सदैकप्रियदर्शनः । स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः ॥ १६ ॥

तत्रधर्मशास्त्रंपूर्वकाण्डोपबृंहणं पुराणंवेदान्तोपबृंहणम् । न्यायमीमांसे सर्ववेदसाधारण्यौ तेषामर्थतत्वं अर्थयाथात्म्यं निगूढाशयमित्यर्थः । तत्जानातीतितथा । अष्टादशविद्यास्थानतत्वज्ञइत्यर्थः । स्मृतिमान् ज्ञातार्थविषयेविस्मरणलेशरहितः । प्रतिभानवान् व्यवहारकाले श्रुतस्याश्रुतस्यवाझटितिस्फुरणंप्रतिभानं तद्वान् ॥ १४ ॥ अथसर्वदासदुपास्यत्वमाह—सर्वेति । सर्वेलोकाःप्रिया यस्यसः सर्वलोकप्रियः । सर्वेषांलोकानांप्रियः सर्वलोकप्रियः । सर्वलोकप्रियत्वात्सद्भिरभिगन्तव्यइत्यर्थः । साधुः तत्कार्यसाधकः। उण्प्रत्ययः। यद्वा साधुः उचितः सदभिगमनोचितइत्यर्थः। "साधुस्त्रिषूचितेसौम्येसज्जनेवार्धुषावपि " इतिवैजयन्ती । अदीनात्मा अकार्पण्यात्मा । अतिगंभीरप्रकृतिरिति यावत् । विचष्टइतिविचक्षणः । नन्द्यादित्वात्ल्युः " अस्युस्यनेचक्षिङःख्याञ्नेतिवाच्यं" इतिख्याञादेशाभावः । विविधंवक्तीत्यर्थः । अतएवसर्वदासदुपास्यमानत्वमाह—सर्वदेति । सर्वदा अस्त्राभ्यासकालादिष्वपि सद्भिः सत्पुरुषैः अभिगतःपरिगतः । परिवारितइत्यर्थः । कथमिव समुद्रःसिन्धुभिरिव नदीभिरिव । "स्त्रीनद्यांनानदेसिन्धुर्देशभेदेंबुधौगजे" इतिवैजयन्ती । सर्वदाभिगतः सद्भिः खुरलीकेलिश्रमविश्रान्तयेकांचिच्छायामवगाहमानेरामेसन्तःसर्वेतत्तदर्थविशेषश्रवणायपरिवृत्यस्थिताइत्यर्थः । तथाचवक्ष्यति । " ज्ञानवृद्धैर्वयोवृद्धैःशीलवृद्धैश्चसज्जनैः । कथयन्नास्तवैनित्यमस्त्रयोग्यान्तरेष्वपि " इति । अस्त्रयोग्यः अस्त्राभ्यासः । समुद्रइवसिन्धुभिः । एवंसद्भिरभिगमनंनरामस्याज्ञातज्ञापनाय तस्यस्वतएवपूर्णत्वात् । किंतुस्वेषामेवापूर्वार्थविशेषलाभाय गत्यन्तराभावादितिभावः । सिन्धवोहि स्वसत्तालाभायैवसमुद्रमभियान्ति । नतुतस्यातिशयापादनाय ॥ १५ ॥ एवमभिगमनहेतुभूतंसौलभ्यादिकंविशदयति—आर्यइति । आङ्पूर्वाद्गताविलस्माद्धातोःकर्मणिण्यत्प्रत्ययः । अभिगन्तुमर्हइत्यर्थः । किंसतामेव नेत्याह—सर्वसमः । जातिगुणवृत्त्यादितारतम्यंविनासर्वेषामाश्रयणीयत्वेतुल्यः । अस्यकादाचित्कत्वंवारयत्येवकारः । चकारउक्तसमुच्चयार्थः । किंचिदुपदेशाभावेऽपिसौन्दर्यादभिगन्तव्यत्वमाह— सदैकप्रियदर्शनइति । सदाऽनुभवेऽपि नवनवतयाभासमानइत्यर्थः । अथ " इषुक्षयान्निवर्तन्तेनान्तरिक्षक्षितिक्षयात् । मतिक्षयान्निवर्तन्तेनगोविन्दगुणक्षयात् " इतिभगवद्गुणानांवर्षायुतेनापिवर्णयितुमशक्यत्वेन संग्रहेणवदन्नुत्तरमुपसंहरति । सचेति । कोसलस्यराज्ञोपत्यंस्त्रीकौसल्या । " वृद्धेत्कोसलाजादाञ्ञ्यङ् " इति ञ्यङ्प्रत्ययः । " यङश्चाप् " इतिचाप् । तस्याआनन्दंवर्धयतीति कौसल्यानन्दवर्धनः । चशब्दएवकारार्थः । कौसल्यासुतत्वेनावतीर्णोविष्णुरेववेदान्तोदितसकलगुणसंपन्नः परमात्मा नतुब्रह्मादिष्वन्यतमइत्यर्थः । दशरथनन्दनइत्यनुक्तिः पुत्रलाभफलस्य कौसल्ययैवलाभात् । अतएववक्ष्यति "कौसल्या लोकभर्तारं सुषुवेयंमनस्विनी " इति ॥ १६ ॥

तीर्था० साधुः अपकारिष्वपिउपकारशीलः । अदीनात्मा अतिव्यसनपरंपरायामपिअक्षुभितान्तःकरणः । विचक्षणः तत्तत्कालकर्तव्यवैदिकलौकिकक्रियासुकुशलः । **तनि०** सिन्धुभिः अनर्गलप्रवाहाभिर्यथासमुद्रोक्षोभ्यः एवंजाबालिप्रभृतिभिः क्षोभितोपि अक्षोभ्यइतिव्यञ्जितम् । सर्वदेत्यनेन कालविशेषेएकदासिन्धुभिः परिगतः समुद्रः अयंतु सर्वदेति वैलक्षण्यंद्योत्यते । सर्वदाभिगतइत्यनेन लोकेप्रयोजनवशेनसतामभिगमनेतैःसहजल्पवितण्डादिकरणेतेचासत्यतयापुनर्नाभिगच्छेयुः रामस्तुनतथेतिध्वन्यते । वक्ष्यतिच "नविगृह्यकथारुचिः" इति । रत्नाकराभिगतसिन्धूनांतदभिगमनदेशएवकतिपयरत्नसंबन्धः । एवं गुणाकररामसंबन्धादेवकतिपयगुणाः प्रकाश्यन्तइतिअभिगतपदव्यङ्ग्यं । लोके राजकुमाराः कदाचिद्विनोदार्थेएकान्तगोष्ठ्यां शृङ्गारहास्यरसविद्भिः परिगताभवन्ति अयंतुनतथेतिसत्पदव्यङ्ग्यम् । सिन्धुभिः समुद्रइवेति सतांप्राप्यान्तरराहित्यंरामस्यसौलभ्यं चव्यज्यते । **तीर्था०** सर्वदेत्यनेन नदीनांसमुद्रसेवायामिवभक्तानांभगवत्सेवायांकालनियमोनास्तीत्युक्तंभवति । अभिगतइत्यनेन परमप्राप्यत्वं समुद्रइव सिन्धुभिरित्यनेन सतांप्राप्यान्तरराहित्यं प्राप्तानांच सतांतेनैक्यंच प्रतीयते ॥१५॥ **ती०** आर्यः पूज्यः । सर्वसमः शत्रुमित्रोदासीनेषुवैषम्यरहितः । **तिल०** सर्वेषु सुखदुःखोदर्केषु समः हर्षविषादरहितः । **ति० शि (पा०)** सदैवप्रियदर्शनः । सदैव सर्वावस्थासु । **तिल०** कौसल्यानन्दवर्धनइत्यनेन महाकुलप्रसूतत्वप्रधानमहिषीपुत्रत्वादिरूपस्यअभिषेकोचितधर्मस्यसत्तादर्शिता ॥ १६ ॥

समुद्र इव गांभीर्ये धैर्येण हिमवानिव । विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः ॥ १७ ॥
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः । धनदेन समस्त्यागे सत्ये धर्म इवापरः ॥ १८ ॥
तमेवंगुणसंपन्नं रामं सत्यपराक्रमम् । ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ॥ १९ ॥

अथास्य निस्समाभ्यधिकत्वंवक्तुं लोकेप्रकृष्टवस्तूनांतदेकैकगुणसाम्यमाह—समुद्रइवेत्यादिश्लोकद्वयेन । गांभीर्यंनाम स्वान्तर्गतपदार्थाप्रकाशकत्वं । यथासमुद्रः-स्वान्तर्गतंरत्नादिकमप्रकाशयन्नेववर्तते तथाऽयमपि स्वीयंपरत्वमप्रकटयन्नेवास्तइत्यर्थः । वक्ष्यति "आत्मानंमानुषंमन्ये" इति । धैर्यंनाम शोकहेतुसद्भावेपि निश्शोकत्वम् । तेन हिमवानिव हिमवत्सदृशः । "गिरयोवर्षधाराभिर्हन्यमानानविव्यथुः । अभिभूयमानाव्यसनैर्यथाऽधोक्षजचेतसः" इतिह्युक्तं । अत्रवस्तुतः समुद्रादेरुपमानत्वाभावेपिप्रतिपत्तॄणामुपमानत्वंसंभवतीत्येवमुक्तं । यथा "इषुवद्गच्छतिसविता" इत्यत्र । विष्णुनेति । वीर्येविषयेविष्णुनासदृशः । विष्णोरर्धत्वेन रामस्यविष्णुसादृश्यंसुवचमेव । "सउश्रेयान्भवति जायमानः" इत्युक्तत्वेनतदंशस्यापितत्सदृशत्वंयुक्तमेव । सोमवत्प्रियदर्शनः शोकनिवृत्तिपूर्वकमाह्लादकरः ॥ १७ ॥ क्रोधेकालाग्निसदृशः कालाग्निक्रोधसमक्रोध इत्यर्थः । स्वविषयापराधमेवस्वयंसहते । स्वाश्रितविषयापराधकरणेतु ज्वलज्ज्वलनइव शीतलतरेपिहृदये कोपमावहतीत्यर्थः । जलेहि कालाग्निर्ज्वलति । क्षमया क्षमारूपसदृशधर्मेण पृथिवीसमः पृथिवीतुल्यक्षमइत्यर्थः । स्वस्मिन्नपकारकरणेअचेतनवद्वर्ततइत्यर्थः । "नस्मरत्यपकाराणांशतमप्यात्मवत्तया" इतिवक्ष्यति । त्यागे त्यागविषये धनदेनकुबेरेणसमः तद्वद्दातेत्यर्थः । कुबेरस्यत्यागित्वं "त्यागेचधनदोयथा" इत्यादिवक्ष्यमाणवचनशतसिद्धं । नचतस्यलुब्धत्वंकुतश्चित्सिद्धं । त्यागेसत्यपिधनदवदाढ्यइतिव्याख्यानंतुप्रक्रमविरुद्धं । नह्याढ्यत्वंकश्चिद्गुणः । तथासति लुब्धत्वमेवास्यसिद्धंस्यात् । सत्येसत्यवचने अपरः उत्कृष्टवस्त्वन्तररहितः । धर्मः धर्मदेवतेवस्थितः । धर्मदेवतेवनिरपायसत्यवचनइत्यर्थः । सत्ये अपरोधर्मइवस्थितइतिव्याख्याने प्रकृतौपम्येविरोधः । तस्योत्प्रेक्षारूपत्वात् । कचिदुपमाकचिदुल्लेखः कचिदुत्प्रेक्षेतिविजातीयसंकरइत्यप्याहुः ॥ १८ ॥ एवंवेदान्तोदितजगत्कारणत्वसर्वज्ञत्वसर्वशक्तित्वसर्वान्तर्यामित्वप्रमुखसमस्तकल्याणगुणाकरंब्रह्म किंरामत्वेनावतीर्णोविष्णुरुतब्रह्मरुद्रादिष्वन्यतमइतिवाल्मीकिनावेदोपबृंहणायपृष्टे वेदान्तोदितगुणानांतदन्येष्वसंभवात्तस्यैवसंभवाच्च सएववेदान्तोदितंपरंतत्वमित्युपदिष्टं । तत्रतत्रजगत्कारणप्रकरणेषुप्रयुक्ताःस्वयंभूशिवादिशब्दाः सद्ब्रह्मादिसामान्यशब्दवदपर्यवसानवृत्त्यावयववृत्त्यावापरमात्मपराइत्यप्यर्थसिद्धम् । एवंवेदान्तसारार्थः संदर्शितः । ननु ब्रह्मस्वरूपमिवफलस्वरूपं तदुपायस्वरूपमपि वेदार्थत्वादुपबृंहणीयं तदुभयंकिमितिनपृष्टं नोपदिष्टंच । मैवं । परिपप्रच्छेत्यत्र परिणा तदुभयस्वरूपमपिपृष्टमेव । उत्तरेच "प्रजानांचहितेरतः" इत्यादिनोपायत्वं "सदैकप्रियदर्शनः" इत्यादिनोपेयत्वं चतस्यैवेत्युक्तं । ननु सिद्धस्यैवतस्योपायत्वे सर्वमुक्तिप्रसंगइतिचेन्न । यउपायोपेयाधिकारी तस्यैवफलंदिशति नानधिकारिणइतिव्यवस्थापनात् । अधिकारश्च तत्प्राप्त्यपेक्षासाधनान्तरपरित्यागश्चेत्युत्तरग्रन्थेसुव्यक्तं । ननु वेदोपबृंहणमिदंरामायणमित्युक्तं धर्मोपि वेदार्थः सकथं नोपबृंहितः । किंचेयताग्रन्थेनवेदान्तार्थउपबृंहितः किमतःपरेणग्रन्थेन । उच्यते । उक्तानुक्तांश्चकल्याणगुणांस्तच्चरित्रनिदर्शनमुखेनप्रतिपादयितुमुत्तरग्रन्थः पूर्वभागोपबृंहणंच रामायणपुरुषाचारमुखेनहि सामान्यधर्मो विशेषधर्मश्चोपबृंहितः । ननु तथापिकथंबालकाण्डकथानोपदर्शिता । मैवं । तत्रप्रदर्शनीयगुणविशेषाभावात् । नच साप्यत्यन्तमप्रदर्शिता । इक्ष्वाकुवंशप्रभवइत्यवतरणं महावीर्यइतिताटकाताटकेयादिवधः धनुर्वेदेचनिष्ठितइतिकौशिकाधिगतनिखिलदिव्यास्त्रवत्त्वं श्रीमानिति-

तीर्थी० यद्यपि अयमेवरामोविष्णुः । मानुषोपाधिभेदाद्विष्णुनेतिसादृश्यम् । यद्वा विष्णुनास्तेनैववीर्येसदृशः । उपमानान्तरराहित्यमनेनोक्तम् । **तिल०** सोमवत् व्यवहारनिरीक्षणकालेसौम्यदर्शनः ॥ १७ ॥ **तिल०** क्षमया प्रतीकारसामर्थ्येपि अपकारसहिष्णुतया । **विषमपदविवृतिः** । धनंददतीतिधनदाः धनदातारः तेषांइना अधिपतयः चिन्तामणिकल्पवृक्षप्रभृतयः तैः समः ॥ १८ ॥

प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया । यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः ॥ २० ॥
तस्याभिषेकसंभारान्दृष्ट्वा भार्याऽथ कैकयी । पूर्वं दत्तवरा देवी वरमेनमयाचत ।
विवासनं च रामस्य भरतस्याभिषेचनम् ॥ २१ ॥

वैदेहीलाभश्चेतिबालकाण्डकथासूचनात् । अथायोध्याकाण्डकथांप्रस्तौति—तमेवमित्यादिना । आद्यौश्लोकद्वयमेकान्वयं । दशसु दिक्षुरथोयस्यसदशरथः । अप्रतिहतरथत्वेन रामायराज्यंदत्तं । भीतिदत्तत्वाभावेन पुनरनादातव्यत्वमुक्तं । महीपतिः अस्वामिदत्तत्वाभावउच्यते । एवंदात्रदोषेण पुनरनाहरणीयत्वमुक्त्वा संप्रदानगुणेनाप्याह—तमित्यादिना । तं प्रसिद्धं । एवंगुणसंपन्नं पूर्वोक्तसर्वगुणसमृद्धं । सर्वस्वस्वामिभूतमितियावत्।सत्यपराक्रमं अमोघपराक्रमं। सर्वरक्षणशक्तमितियावत् । ज्येष्ठं जन्मक्रमेणापिराज्यार्हं । श्रेष्ठगुणैर्युक्तं नीतिशास्त्रोक्तषाड्गुण्ययुक्तं । सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाः षड्गुणाः कामन्दकोक्ताः। प्रियं प्रीतिविषयं । अनेन तात्कालिकप्रीतिदानव्यावृत्तिः । सुतं जन्मनैवराज्यार्हं ॥ १९ ॥ प्रकृतीनां प्रजानां हितैः हितकरणैर्युक्तं । अनेन सर्वानुकूल्यमुक्तं । एवंभूतं रामं प्रकृतिप्रियकाम्यया अमात्यादीनां प्रीतिकरणेच्छया । इच्छायांकाम्यच्प्रत्ययः । " अप्रत्ययात् " इत्यप्रत्ययः । " अजाद्यतष्टाप् " । प्रीत्या स्वप्रीत्याच। चकारोर्थसिद्धः । "गामश्वंपुरुषं जगत्" इतिवत् । मन्त्रिवृद्धैरालोचनपूर्वकंकृतत्वादप्रत्याख्येयत्वमुच्यते । "प्रकृतिःपञ्चभूतेषु स्वभावेमूलकारणे । छन्दःकारणगुह्येषुजन्मामात्यादिमातृषु " इत्युभयत्रवैजयन्ती । युवाचासौराजाचयुवराजः तस्यभावःकर्मवायौवराज्यं । ब्राह्मणादित्वात्ष्यञ् । तेन पितरिराज्यं निर्वहत्येव सर्वनिर्वाहकत्वेनाभिषिक्तःपुत्रोयुवराजः तस्यभावेनेत्यर्थः । संयोक्तुं घटयितुं ऐच्छत् तत्संभारान्समभरदित्यर्थः ॥ २० ॥ एवंपुनरादानायोग्यं रामायराज्यप्रदानमुक्त्वा अपरिहरणीयमनन्तरभावि कैकेय्यायाचनमाह—तस्येति । सार्धश्लोकएकान्वयः । अथ रामायराज्यप्रदानेच्छानन्तरं तस्य रामस्यअभिषेकःकर्मविशेषः । तस्यसंभारान् उपकरणानि—"औदुंबर्यासन्दी तस्यैप्रादेशमात्राःपादाःस्युः" इत्यादीनि" "दधिमधुसर्पिरातपवर्ष्याआपः" इत्यन्तानि ब्राह्मणोक्तानि दृष्ट्वा मन्थरामुखेनदर्शनइवज्ञात्वा। भार्या भर्तुयोग्या नतु स्वातन्त्र्यार्हा । पूर्वंपूर्वकाले । विभक्तिप्रतिरूपकमव्ययं । तेन दशरथेन दत्तवरा शंबरासुरविजयकाले सारथ्यकरणपारितोषिकतया दत्तवरा । याचनहेतुत्वेनेदमुक्तं । दीव्यतीतिदेवी । पचाद्यच् । देवडिति टित्त्वेनपाठात् ङीप् । भोगोपकरणभूतेति व्यामोहमूलोक्तिः । कैकयी केकयानां राजा केकयः । " क्षत्रियसमानशब्दाज्जनपदात्तस्यराजन्यपत्यवत् " इत्यञ् । "जनपदेलुप्" केकयस्यापत्यंस्त्रीकैकयी । "जनपदशब्दात्क्षत्रियादञ् " इत्यपत्यार्थेऽञ् " टिड्ढाणञ्—" इत्यादिनाङीप् । नन्वञ्प्रत्यये " केकयमित्रयुप्रलयानांयादेरियः " इतीयादेशःकिंनस्यात् । उच्यते । " जरायाजरसन्यतरस्याम् " इत्यतोऽन्यतरस्यामित्यनुवृत्तेस्तस्यवैकल्पिकत्वात् । नचेयादेशाभावआर्षइतिवाच्यं । कैकेयीकैकयीतिशब्दभेदप्रकाशिकायामुक्तेः । " प्राक्कैकयीतोभरतस्ततोभूत् " इतिभट्टिप्रयोगात् । केकयीतिपाठेतुकेकयान्जन्मभूमित्वेनाचष्ट इतिकेकयी । तदाचष्टइतिणिजन्तादौणादिकेस्त्रियामिकारप्रत्ययेटिलोपेणिलोपेचकृते " कृदिकारादक्तिनः " इतिङीषित्याहुः । " पुंयोगादाख्यायां " इतिवाङीष् तत्रयोगशब्देनाविशेषात् जन्यजनकभावोपिगृह्यते । केकयशब्दोमूलप्रकृतिरेवोपचारात्तस्यपत्येवर्तते।शार्ङ्गरवादिपाठात्ङीनितिन्यासकारः । कैकयी । एनंदश-

तिल० प्रकृतिप्रियकाम्यया प्रकृतीनां प्रियंकर्तुमिच्छया । युवराजेनहि प्रजाक्लेसंपादितेसति व्यवहारादिनिरीक्षणजन्यश्रमनिवृत्तिरूपंप्रियंस्वस्यापिभवति ॥ २० ॥ **तीर्थी०** पूर्वं पुरादत्तौवरौयस्यै इन्द्रसहायार्थं प्रवृत्तदशरथयुद्धकाले दशरथेपरप्रयुक्तामासुरींमायां धवलाङ्गाख्यमुनिदत्तविद्ययावारयन्त्यैकैकेय्यै तुष्टेनदशरथेनदत्तंवरद्वयमितिपौराणिकीप्रसिद्धिः । **तिल०** कैकयी राज्ञः कनीयसीभार्या । अत्रयद्यपिकेकयशब्दादञि "केकयमित्रयु-" इत्यादिनायादेरियादेशेगुणे आदिवृद्धौङीपियस्येतिलोपेकैकेयीत्येवसाधुः। तथापि "अपिमाषंमषं कुर्याच्छन्दोभङ्गंनकारयेत्" इतिन्यायेन कैकयीतिप्रयोगः। पुंयोगलक्षणेङीषि केकयीतिपाठइत्यन्ये । **शिरो० (पा०)** अथकेकयी । केकयस्य केकयजनपदाधिपतेः कन्या । "पुंयोगादाख्यायाम्" इतिङीष् । तत्रयोगशब्देन अविशेषाज्जन्यजनकभावोपिगृह्यते । कैकयीतिपाठे कंसुखमेव एकं केवलं कैकं तयाति देवादीन्प्रापयतीति कैकयी । गौरादित्वंप्रज्ञादित्वंवाकल्प्यमिति ॥ २१ ॥

स सत्यवचनाद्राजा धर्मपाशेन संयतः । विवासयामास सुतं रामं दशरथः प्रियम् ॥ २२ ॥
स जगाम वनं वीरः प्रतिज्ञामनुपालयन् । पितुर्वचननिर्देशात्कैकेय्याः प्रियकारणात् ॥ २३ ॥
तं व्रजन्तं प्रियो भ्राता लक्ष्मणोनुजगामह । स्नेहाद्विनयसंपन्नः सुमित्रानन्दवर्धनः ।
भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ॥ २४ ॥

रथं । " द्वितीयाटौस्स्वेनः " इत्यन्वादेशेएनादेशः । रामस्यविवासनं भरतस्याभिषेचनंच वरमयाचत अ-र्थितवती । याचिर्द्विकर्मकः ॥२१॥ सइति । राजास-र्वरञ्जकः । " राजाप्रकृतिरञ्जनात् " इतिप्रयोगात् । औणादिकःकनिन्प्रत्ययः । यद्यपि " रजकरजनरज-स्सूपसंख्यानं " इतिवचनादत्रनलोपप्रसक्तिर्नास्ति तथापिरजस्साहचर्यादौणादिकस्यतत्रग्रहणं । स पूर्वरा-मायदत्तराज्यः । मन्त्रिप्रमुखैरालोचनपूर्वकंप्रतिज्ञातरा-माभिषेकइत्यर्थः । दशरथः । धर्मः पाशइवधर्मपाशः । " उपमितंव्याघ्रादिभिः—" इतिसमासः । व्याघ्रादे-राकृतिगणत्वात् । तेनसंयतः बद्धः सन् सत्यवचनात् स्त्रीविषयवचनसिद्धिहेतोः । प्रियं सुतं विवासयामा-स । " रामोविग्रहवान्धर्मः " इत्युक्तरीत्याप्रथमंअ-ङ्गीकृतंपरमधर्मंपरित्यज्यानन्तरंप्रवृत्तंस्त्रीविषयंक्षुद्रधर्म-मवलंबितवानित्यर्थः । एतेन " सांकेत्यंपारिहास्यंवा स्तोभंहेलनमेववा । वैकुण्ठनामग्रहणमशेषाघविनाश-नं " "आक्रुश्यपुत्रमघवान्यदजामिलोपिनारायणेति-म्रियमाणउपैतिमुक्तिं । " " कामाद्गोप्योभयात्कंसः" इत्येवं यथाकथंचित्भगवन्नामवतांमुक्तिसिद्धौ सर्वदा-रामपरायणस्यदशरथस्य कथंनमुक्तिरितिशङ्कादूरो-त्सारिता । सिद्धसाधनत्यागात्काशकुशावलंबनात् धर्म-पाशप्रतिबन्धाच्चमुक्तिप्रसङ्गाभावात् । तथाच मुमुक्षु-णादशरथवन्नवर्तितव्यमित्युक्तंभवति ॥ २२ ॥ पितृ-वचनपरिपालनमवश्यंकर्तव्यमित्येतद्रामाचारमुखेनद-र्शयति—सजगामेति । सरामः वीरोपि राज्यपरिपा-लनसमर्थोपि कैकेय्याःप्रियकारणात् प्रीतिहेतुभूतात् स्त्रीपारवश्येनोक्तादपीत्यर्थः । पितुर्वचननिर्देशात् वचनमेवनिर्देशः आज्ञा । " आज्ञायामपिनिर्देशः " इतिबाणः । तस्माद्धेतोः प्रतिज्ञां कैकेयीसमक्षंकृतांप्र-तिज्ञां अनुपालयंश्च । " लक्षणहेत्वोः क्रियायाः " इतिहेत्वर्थे शतृप्रत्ययः । वक्ष्यति । " तद्ब्रूहिवचनं देविराज्ञोयदभिकाङ्क्षितं । करिष्येप्रतिजानेचरामो द्विर्नाभिभाषते " इति स्वप्रतिज्ञापालनार्थं पितृ-वचनपालनार्थंचेत्यर्थः । वनंदण्डकावनमुद्दिश्यज-गाम ॥ २३ ॥ " इक्ष्वाकुवंश— " इत्यादिना समस्तकल्याणगुणपरिपूर्णत्वोक्त्या परत्वमुक्तं "तमे-वम्—" इत्यादिनाऽभिषेकप्रवृत्तिनिवृत्तिकथनात् सौलभ्यमुक्तं । अथ परत्वसौलभ्यानुगुणं समा-श्रयणमाह—तंव्रजन्तमिति । यद्वा । अथसिद्धसाध-ननिष्ठैःलक्ष्मणवत्कैङ्कर्यपरैर्भवितव्यमितिव्यञ्जयन्ना-ह । तंव्रजन्तमिति सार्धश्लोकएकान्वयः । प्रीणातीति प्रियः । रामेप्रीतिमान् । "इगुपधज्ञाप्रीकिरःकः" इति कः । अनेनानुगतिहेतुर्भक्तिरुक्ता । भ्राता "भ्रातास्वा-मूर्तिरात्मनः" इति मूर्तिभूतः । विनयसंपन्नः कैङ्कर्यहे-तुविनययुक्तः । विनयः शेषत्वज्ञानं रामकैङ्कर्यरूपा-चारोवा । "विनयोधर्मविद्यादिशिक्षाचारप्रशान्तिषु" इति वैजयन्ती । सुमित्रायाःआनन्दंवर्धयतीति सुमि-त्रानन्दवर्धनः । "सृष्टस्त्वंवनवासाय" "रामंदशरथंवि-द्धिमांविद्धिजनकात्मजाम् । अयोध्यामटवींविद्धिगच्छ-तातयथासुखं" इति सुमित्रयैवोक्तत्वात् । दयितःराम-स्येष्टतमः । "यमेवैषवृणुतेतेनलभ्यः" इत्युक्तरीत्याप्रि-यतमत्वेनवरणीयइत्यर्थः । लक्ष्मणःकैङ्कर्यलक्ष्मीसंपन्नो भविष्यतीतिज्ञात्वा लक्ष्मणइति वसिष्ठेनकृतनामधेयः "सतुनागवरःश्रीमान्" " अन्तरिक्षगतःश्रीमान् " इत्युक्तेः । कैङ्कर्यलक्ष्मीवत्त्वं लक्ष्मणोलक्ष्मिसंपन्नइतिव-क्ष्यति । "लक्ष्म्याअच्च" इतिपामादिगणसूत्रान्मत्वर्थी-योनप्रत्ययः अकारश्चान्तादेशः । "लक्ष्मीवाँल्लक्ष्मणः श्रीमान्" इति पर्यायपाठश्च । सुभ्रातुर्भावः सौभ्रात्रं । भावे अण् अनुशतिकादित्वात् उभयपदवृद्धिः । रामं-विना क्षणमपिजीवनाक्षमत्वं सुभ्रातृत्वम् । वक्ष्य-

शिरो० धर्मस्यपः पालनं तस्याशोव्याप्तिः तेनसंयतः धार्मिकशिरोमणिरित्यर्थः ॥ २२ ॥ **शिरो०** कैकेय्याः प्रिये विवास-नेयत्कारणं ब्रह्मप्रार्थनास्वीकारसिद्ध्याभवितव्यं तस्माज्जातात्पितुर्वचननिर्देशाद्धेतोः प्रतिज्ञां स्वकृतप्रतिश्रवमनुपालयन्सवीरो रामोवनंजगाम ॥ २३ ॥

रामस्य दयिता भार्या नित्यं प्राणसमा हिता । जनकस्य कुले जाता देवमायेव निर्मिता ॥ २५ ॥
सर्वलक्षणसंपन्ना नारीणामुत्तमा वधूः । सीताप्यनुगता रामं शशिनं रोहिणी यथा ॥ २६ ॥
पौरैरनुगतो दूरं पित्रा दशरथेन च । शृङ्गिबेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।
गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥ २७ ॥

ति । " नचसीतात्वयाहीनानचाहमपिराघव । मुहूर्तमपिजीवावोजलान्मत्स्याविवोद्धृतौ" इति रामस्यलक्ष्मणविरहासहत्वंसुभ्रातृत्वं । तच्चवक्ष्यति । "नचतेनविनानिद्रांलभतेपुरुषोत्तमः।मृष्टमन्नमुपानीतमश्नाति नहि तंविना " इति । तदनुदर्शयन्सन् । यद्वा एवं सुभ्रातृभिर्वर्तितव्यमिति दर्शयन्निवेति गम्योत्प्रेक्षा । व्रजन्तं एकान्तेस्वाभिमतसकलकैङ्कर्यप्रधानप्रवृत्तं भ्रातरं उपलक्षणमिदं । "मातापिताचभ्राताचनिवासः शरणं सुहृत् । गतिर्नारायणः " इत्युक्तसकलविधबन्धुः । वक्ष्यति । " अहंतावन्महाराजेपितृत्वंनोपलक्षये । भ्राताभर्ताचबन्धुश्च पिताचममराघवः" इति स्नेहात् " बाल्यात्प्रभृतिसुस्निग्धोलक्ष्मणोलक्ष्मिवर्धनः " इत्युक्तरामभक्तेरेवहेतोः अनुजगाम । " येनयेनधातागच्छतितेनतेनसहगच्छति " इतिवदपूर्वोयंकश्चिद्वृत्तिविशेषइतिऋषिर्विस्मयते हेति । " हविस्मयेविषादे च " इतिबाणः । आशालेशमात्रेण स्वस्मिन्नेवाधिकप्रेमाणंभगवन्तंकुत्रचिदेकान्तस्थले स्वमनोरथानुरूपविशिष्टविषयसकलकैङ्कर्यलाभायानुसरन्नधिकारी अत्रध्वन्यते ॥ २४ ॥ अथसीतायाः साधनदशायांपुरुषकारतया फलदशायांप्राप्यतयाचान्वयात् तयानित्ययोगंदर्शयति—रामस्येत्यादिश्लोकद्वयेन । रामस्य अभिरामस्यापि दयिता अभिरामा नित्यंभार्या हृदिसंततंधार्या । बिभर्तेः " ऋहलोर्ण्यत् " इतिण्यत् । प्राणसमा उक्तार्थद्वयेहेतुरयं । हिता चेतनहितपरा । " मित्रमौपयिकंकर्तुं " इत्यादि वक्ष्यति । रामहितपरावा । वक्ष्यति " स्मारयेत्वांनशिक्षये " इति । जनकस्यकुलेजाता आचारप्रधानेत्यर्थः । देवमायेव निर्मिता अमृतमथनानन्तरमसुरमोहनार्थंनिर्मिताविष्णुमायेवस्थिता । "माययामोहयित्वातान्विष्णुःस्त्रीरूपमास्थितः " इत्युक्तेः । यद्वा निर्मिता कृतमूर्तिः । देवमाया विष्णोराश्चर्यशक्तिरिवस्थिता । अनेन सौन्दर्यस्यपराकाष्ठोक्ता । अथवा निर्मिता कृतावतारा देवमाया देवस्य विष्णोर्लक्ष्मीः । वक्ष्यति उत्तरकाण्डे "ऋतेमायांविशालाक्षींतवपूर्वपरिग्रहाम्" इति । इवशब्दोवाक्यालंकारे एवकारार्थेवा ॥ २५ ॥ सर्वलक्षणसंपन्ना सामुद्रिकोक्तैःसर्वैरुत्तमस्त्रीलक्षणैःसंपन्ना । नारीणामुत्तमा पूर्वोक्तसर्वप्रकारेणसर्वस्त्रीश्रेष्ठा । पुरुषोत्तमरामानुरूपनार्युत्तमेत्यर्थः । वधूः दशरथस्नुषा अचिरोढावा । " अचिरोढावधूः " इतिवैजयन्ती । सीता । " सीतालाङ्गलपद्धतिः " । तज्जन्यत्वात्तद्व्यपदेशः । अनेनायोनिजत्वोक्तेः दिव्यलोकवासकालिकसौन्दर्यान्यूनतोक्ता । अपिशब्देनलक्ष्मणानुगतिःसमुच्चीयते । राममनुगता निरवधिकसौन्दर्याकृष्टहृदयतयानुगतवती । रोहिणीयथा । यथाशब्दइवार्थः । " यथातथैवैवंसाम्ये " इत्यमरः । रोहिणीनामचन्द्रस्यासाधारणपत्नी । " वरिष्ठासर्वनारीणामेषाचदिवि देवता । रोहिणीनविनाचन्द्रंमुहूर्तमपिदृश्यते " इति । नकेवलंरामसौन्दर्याकृष्टानुगता किंतु कलङ्किनं रोहिणीव पातिव्रत्यस्वरूपप्रयुक्तागतेत्यर्थः । अयमर्थोऽनसूयासमक्षंव्यक्तीभविष्यति ॥ २६ ॥ रामभक्त्यविशेषाल्लक्ष्मणसीतावत्पौराणामप्यनुवृत्तिंदर्शयति—पौरैरिति । पुरेभवाः पौराः । अनेनस्त्रीबालवृद्धाविशेषउक्तः । दूरमनुगतइत्यनेन विरहासहिष्णुत्वोक्त्या पौराणांपरमाभक्तिरुक्ता । " पुनर्विश्लेषभीरुत्वंपरमाभक्तिरुच्यते " इतिवचनात् । पौरैरित्यनेन तद्देशवासएव रामभक्तिहेतुरित्युक्तं । पित्रादशरथेनच । चशब्दोऽन्वाचये अल्पमनुगतइत्यर्थः । आद्वारंहितेनानुगतं । पित्रेत्यनेन पुत्रकृतवात्सल्यादनुगतइत्युक्तं । एवंपरत्वसौलभ्ये दर्शिते । अथवात्सल्यसौशील्ये दर्शयति —शृङ्गिबेरपुरइति । धर्मौ आश्रितवात्सल्यसौशील्ये

तीर्थी० देवमायेव सुन्दोपसुन्दमोहनार्थं देवैरुत्पादिता सर्वोत्तमसौन्दर्यातिलोत्तमेव । तिल० जनकस्यकुले अन्वयेजाता । यद्यप्येषा अयोनिजैव तथापि सीरध्वजस्य देवयजनलाङ्गलपद्धतौ आविर्भूतत्वादेवमुक्तिः । अतएवाह—देवमायेवेति । सेव अचिन्त्योदयस्थितिलया देवैरेव स्वकार्यसिद्ध्याकाङ्क्षिभिः निर्मिता आविर्भाविता ॥ २५ ॥

गुहेन सहितो रामो लक्ष्मणेन च सीतया ॥ २८ ॥
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः । चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ॥ २९ ॥

आत्मास्वभावोयस्यसतथा । आश्रितवात्सल्यसौशील्यस्वभावोरामः । शृङ्गिबेरपुरे शृङ्गिणः कृष्णसारादयः तेषांबेराणि कृत्रिमशरीराणि । " प्रतिछन्दः प्रतिनिधिर्बेरंचप्रतिरूपकं " इतिवैजयन्ती । वञ्चनेनसजातीयमृगग्रहणार्थानियस्मिन् तत् शृङ्गिबेरं । तथात्वात् तदाख्येपुरेगङ्गाकूलेशृङ्गिबेरपुरसन्निहितगङ्गातीरइत्यर्थः । एतेन गङ्गातीरत्वमात्रेणनोद्देश्यत्वं किंतु भक्तसेवितत्वेनेत्युक्तं । " साकाशीतिनचाकशीति—" इतिवेदान्तदेशिकाद्यभियुक्तोक्तेः । निषादाः प्रतिलोमजातिविशेषाः । " निषादोमृगघातीस्यात् " इतिवैजयन्ती । तेषामधिपतिरितिजात्यपकर्षउक्तः । प्रीणातीतिप्रियःतं स्वस्मिन्प्रीतिमन्तमित्यर्थः । गूहति गोपयतिवञ्चयतिपरस्वमितिगुहः । इगुपधलक्षणः कप्रत्ययः । तं । जातितोवृत्तितोगुणतःकुलतश्चहीनमपि स्वस्मिन्नानुकूल्यमात्रेणादरणीयत्वमुक्तं । निषादाधिपतिमासाद्येत्यनेन सौशील्यमुक्तम् । महतोमन्दैस्सह नीरन्ध्रसंश्लेषोहि सौशील्यं । धर्मात्मेत्यनेन महत्त्वमुक्तं । आसाद्येत्यत्राभिविधिवाचिनाआङाअर्थान्नैरन्ध्यमुक्तं । शृङ्गिबेरपुरेगुहमासाद्येत्यनेन दोषेपि भोग्यत्वरूपंवात्सल्यमुक्तं । सूतं सुमन्त्रं । पारंपर्येणानुवर्तमानमपिव्यसर्जयत् व्यसृजत् । स्वार्थेणिच् । सद्यःप्रसूतवत्सवात्सल्यात् पूर्ववत्संपरिहरन्त्याधेनोरिव वात्सल्यातिशयउक्तः ॥ २७ ॥ स्वस्मिन्नाशालेशमात्रेणजनितंगुहविषयप्रेमातिशयंदर्शयति—गुहेनेति । रामः गुहेनसहितःसन् लक्ष्मणेनसीतयाच सहितः । गुहसन्धानानन्तरमेव लक्ष्मणसीताभ्यां नित्यानपायिभ्यांसाहित्यमासीत् । ततःपूर्वसिद्धमपि सदसत्प्रायमासीदित्यर्थः । यद्वा दृष्टान्तार्थंलक्ष्मणसीतासाहित्यकथनं तादृशसौहार्दंगुहेप्यासीदितिभावः । सहितःसंहितः । " समोवाहितततयोः " इतिमलोपः । सःरामः । लक्ष्मणेनसीतयाचसहगुहेनहितः प्रहितः गङ्गांतारितइत्यप्याहुः ॥ २८ ॥ तेवनेनेति श्लोकद्वयमेकान्वयं । ते रामादयस्त्रयइत्यनेन गुहनिवर्तनंद्योतितं । वनेनवनंगत्वा वनाद्वनंगत्वा । पञ्चम्यर्थेतृतीया हेतौतृतीयावा । अनेन नूतनवनावलोकनकुतूहलित्वं नगरप्रवेशस्यस्वाधिकारविरुद्धत्वंच द्योत्यते । यद्वा अवनेनवनंगत्वा अन्योन्यरक्षणेनवनंगत्वेत्यर्थः । वक्ष्यति " अग्रतोगच्छसौमित्रेसीतात्वामनुगच्छतु । पृष्ठतोऽहंगमिष्यामित्वांचसीतांचपालयन् । अन्योन्यस्येहनोरक्षाकर्तव्यापुरुषर्षभ " इति । यद्वा अवनेन पितृवचनपरिपालनेनहेतुना वनंगत्वा । अवनेन लोकरक्षणेनहेतुनावा । रावणादिदुष्टनिबर्हणमुखेन लोकरक्षणार्थंहि तेषां वनगमनं । यद्वा तेवृदेवनइतिधातोर्भावेल्युट् । तेवनेन देवनेन लीलया अनायासेनेत्यर्थः । मृगयाक्रीडनेनवा । अनयैवव्युत्पत्त्या तेवनंपादसंचारइतिलभ्यते । सूतविसर्जनानन्तरंरथादवरुह्यपादसंचारेणवनंगत्वेत्यर्थः । यद्वा अवनेनसहवनंगत्वा मध्येमध्येस्थलप्रदेशंवनंचगत्वेत्यर्थः । वनेन जलेन सहितंवनं नतु मरुकान्तारमितिवार्थः । " पयःकीलालममृतंजीवनंभुवनंवनं " इत्यमरः । बहूदकाः विपुलोदकाः अधिकोदकावा । " विपुलानेकयोर्बहुः " इतिवैजयन्ती । नौतार्याइत्यर्थः । नदीःगङ्गां । तीर्त्वा उत्तीर्य । "गङ्गानदीनां" इतिनदीमुख्यत्वात् निरुपपदनदीशब्देनगङ्गोच्यते । "जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां " इतिबहुवचनं पूजायांबहुवचनंवा । "अदितिःपाशान् " इतिवदवयवबहुत्वाभिप्रायेणवा बहुवचनं। अत्र "अग्निहोत्रंजुहोति" "यवागूंपचति" इतिवत् अर्थक्रमेण नदीस्तीर्त्वावनंगत्वेतियोजनीयं । यद्वा अपूर्वकालेपिक्त्वाप्रत्ययः । "आस्यंव्यादायस्वपिति" इतिवत् । यद्यपि " आस्यंव्यादायस्वपितिसंमील्यहसतिइत्युपसंख्यानं" इतिवार्तिकेस्थलद्वयमेवोपात्तं तथापिन्यासकृता " परावरयोगेच " इतिपूर्वसूत्रे चकारात् सर्वत्रायंप्रयोगःसंभवतीत्युक्तं। यद्वा तेवनेनेत्यनेन गङ्गातरणमर्थसिद्धम् । नदीशब्दो यमुनापरः । यद्वा नदीः गङ्गायमुनामन्दाकिनीः । मन्दाकिनीनाम चित्रकूटपरिसरेपरिसरन्तीस्रवन्ती । सौकर्याययुगपदुक्तं । यद्वा पूर्वार्धेसरामोलक्ष्मणेनसीतयाचसहगुहेनहितः प्रहितः । सीतालक्ष्मणरामाःगुहेनगङ्गांतारिताइत्यर्थः । अतः पादसंचारेणवनगमनमत्रोक्तम् ॥ २९ ॥ भरद्वाजस्यशासनात् चित्रकूटमनुप्राप्य । प्रजाभरणशीलोभरद्वाजः । इत्थंनिरुक्तमृगारण्यके । " एषएव-

रम्यमावसथं कृत्वा रममाणा वने त्रयः । देवगन्धर्वसंकाशास्तत्र ते न्यवसन्सुखम् ॥ ३० ॥
चित्रकूटं गते रामे पुत्रशोकातुरस्तथा । राजा दशरथः स्वर्गं जगाम विलपन्सुतम् ॥ ३१ ॥
मृते तु तस्मिन्भरतो वसिष्ठप्रमुखैर्द्विजैः । नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ॥ ३२ ॥

बिभ्रद्वाजःप्रजावैवाजःताएषबिभर्तियद्बिभर्तितस्माद्भरद्वाजइत्याचक्षते " इति । यद्वा वाजं रेतः वाजकरणमित्यादौ तथाप्रयोगात् । बिभ्रद्वाजं भरद्वाजः । नित्यब्रह्मचारीत्यर्थः । "भरद्वाजोहत्रिभिरायुर्भिर्ब्रह्मचर्यमुवास" इतिश्रुतेः । तस्यशासनात् नियमनात् चित्रकूटेभवद्भिःस्थातव्यंतस्यायमेवमार्गइत्येवंरूपात् । अनु सदृशं । "पश्चात्सादृश्ययोरनु" इत्यमरः । राजकुमाराणांत्वेषामुचितमित्यर्थः । "सुभगश्चित्रकूटोसौगिरिराजोपमोगिरिः । यस्मिन्वसतिकाकुत्स्थःकुबेरइव नन्दने" इतिवक्ष्यति । पश्चाद्भागेवा चित्राणि । आश्चर्यावहानि कूटानि शिखराणियस्यासौ चित्रकूटः तं । "आश्चर्यालेख्ययोश्चित्रं " इत्यमरः । प्राप्य गत्वा रम्यं रमणीयं जलरामणीयकस्थलरामणीयकादियुक्तं आवसथं पर्णशालारूपंगृहं । "धिष्ण्यमोकोनिवसनं स्थानावसथवास्तुच" इत्यमरः । कृत्वा निर्माय । अत्रपर्णशालानिर्माणेलक्ष्मणस्यसाक्षात्कर्तृत्वं । इतरयोस्तु उचितदेशप्रदर्शनादिनाप्रयोजककर्तृत्वं । "समानकर्तृकयोःपूर्वकाले" इत्यत्रसूत्रे गृहैकत्ववदुद्देश्यगतत्वेन द्वित्वस्याविवक्षितत्वादनेकक्रियास्वपि क्त्वाप्रत्ययस्संभवतीति न्यासकारोक्तेःक्त्वाप्रत्ययबाहुल्यं । तत्रवने चित्रकूटोपान्तवने । रममाणाः लीलारसमनुभवन्तः सन्तः । सीतारामयोःपुष्पापचयसलिलक्रीडादिकंरतिः । "वैदेहिरमसेकच्चिच्चित्रकूटेमयासह । पश्यन्तीविविधान्भावान्मनोवाक्कायसंयुतान्" इतिहिवक्ष्यति । लक्ष्मणस्यतुविशिष्टविषयकैङ्कर्यलाभजाप्रीतिः। वक्ष्यति "भवांस्तुसहवैदेह्यागिरिसानुषुरंस्यते । अहं सर्वंकरिष्यामिजाग्रतःस्वपतश्चते" इति । त्रयोरममाणाइत्यनेनानन्दहेतुभेदेऽपि आनन्दांशेतौल्यमुच्यते । "परमंसाम्यमुपैति" "भोगमात्रसाम्यलिङ्गाच्च" इतिवत् । रममाणाइति वर्तमाननिर्देशेन नैरन्तर्यमुक्तं । वर्तमानार्थकस्याप्यस्यन्यवसन्नितिभूतप्रत्ययान्तविशेषणत्वं "धातुसंबन्धेप्रत्ययाः" इत्यनुशासनात् "अग्निष्टोमयाजीपुत्रस्तेभविता" इतिवत्संभवति । अतएवदेवगन्धर्वसंकाशाःसन्तः । देवगन्धर्वामनुष्यगन्धर्वेभ्योऽधिकानन्दाः । यद्वा देवीचदेवश्चदेवौ लक्ष्मीनारायणौ । "पुमान्स्त्रिया" इत्येकशेषः । गानंधारयतीति गन्धर्वः । "एतत्सामगायन्नास्ते" इत्युक्तः सर्वदासामगानपरोमुक्तः । देवौचगन्धर्वश्चदेवगन्धर्वाः । तत्सदृशाः देवगन्धर्वसंकाशाः । निभादित्वादुत्तरपदभूताएवसन्तःसदृशवचनाः । तथाह्यमरः । "स्युरुत्तरपदेत्वमी । निभसंकाशनीकाशप्रतीकाशोपमादयः" इति । ते तएवसन्तः साकेतवासिन एवसन्तः । सुखंन्यवसन् । वक्ष्यति "सुरम्यमासाद्यतु चित्रकूटंनदींचतांमाल्यवतींसुतीर्थां । ननन्दरामोमृगपक्षिजुष्टांजहौचदुःखंपुरविप्रवासात्" इति । यद्वा तएवसन्तः वनवासिनएवसन्तः । नागरिकाअपि चिरंवनचराइवावसन्नित्यर्थः । सुखग्लान्यादिभिस्तेषां वैदेशिकत्वगन्धोपिनाज्ञायतेतिभावः । सुखंयथाभवतितथा न्यवसन् । कदाचिदपिदुःखलेशोपिनान्वभावीत्यर्थः । अत्र क्रियाभेदात्तच्छब्दद्वयप्रयोगइत्याहुः । तेतीर्त्वाजग्मुरिति क्रियापदमध्याहृत्यकेचियोजयन्ति । अत्र देवगन्धर्वसंकाशाइतिपदगतेनोपमालंकारेणकिंचिद्वस्तुध्वन्यते । यस्तावत्स्वरूपज्ञानपूर्वकंभगवत्यनुरक्तोभवति तं भगवान्देव्यासमागत्य दिव्यंविमानमारोप्यआतिवाहिकगणैःसत्कार्य विरजां तीर्त्वातिल्यकान्तारमासाद्यअमानवेनानुज्ञाप्यदिव्यलोकेमहामणिमण्टपमुपेत्यदिव्यसिंहासनारूढः श्रियासहमोदमानस्तद्रुचितसर्वदेशसर्वकालसर्वावस्थोचितसकलविधकैङ्कर्योस्मैस्वानन्दसममानन्दंदत्वातेनसह यावत्कालमास्तइति ॥ ३० ॥ एवंलक्ष्मणस्यभगवच्छेषत्ववृत्तिंप्रतिपाद्यभरतस्यपारतन्त्र्यवृत्तिंदर्शयति—मृते तुतस्मिन्नित्यादिना । तदुपोद्घातत्वेनाह—चित्रेति । रामेचित्रकूटं तथा उक्तप्रकारेणगतेसति । दशरथो राजा । पुत्रशोकेनपुत्रादर्शनजदुःखेनातुरः पीडितःसन् । सुतमुद्दिश्य हासुतेत्येवंविलपन् प्रलापंकुर्वन् । स्वर्गंजगाम ॥ ३१ ॥ तस्मिन्दशरथेमृतेसति । स्वर्गप्राप्तिरपिनश्वरत्वेनानुपादेयेतिमृतेइत्युक्तं । महाबलः राज्यभरणसमर्थः । अतएवभरतः "भरतइतिराज्य-

तिल० तथापुत्रशोकातुरः अनिर्वाच्यपुत्रवियोगजन्यशोकपीडितः । क० [पा०] पुत्रशोकातुरस्तदा ॥ ३१ ॥

स जगाम वनं वीरो रामपादप्रसादकः॥ ३३ ॥
गत्वा तु सुमहात्मानं रामं सत्यपराक्रमम् । अयाचद्भ्रातरं राममार्यभावपुरस्कृतः॥ ३४ ॥
त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् । रामोपि परमोदारः सुमुखः सुमहायशाः ।
न चैच्छत्पितुरादेशाद्राज्यं रामो महाबलः ॥ ३५ ॥
पादुके चास्य राज्याय न्यासं दत्त्वा पुनःपुनः । निवर्तयामास ततो भरतं भरताग्रजः ॥ ३६ ॥

स्वभरणात्" इत्युक्तरीत्या भावज्ञेनवसिष्ठेनभरतइतिकृतनामा । वसिष्ठप्रमुखैर्द्विजैः वसिष्ठादिभिर्ब्राह्मणैः । राज्याय राज्यंकर्तुंनियुज्यमानः । "क्रियार्थोपपदस्य चकर्मणिस्थानिनः" इतिचतुर्थी । राज्यं राजत्वं । "येचाभावकर्मणोः" इतिप्रतिषेधादनोनप्रकृतिभावः । नैच्छत् नाभ्यलषत् । महाबलइत्यनेन सत्यामेवशक्तौ स्वरूपविरुद्धत्वाद्राज्यंनाङ्गीचकारेत्यवगम्यते । अतएववक्ष्यति "राज्यं चाहंचरामस्यधर्मंवक्तुमिहार्हसि । विललापसभामध्येजगर्हेचपुरोहितं । कथंदशरथाज्जातोभवेद्राज्यापहारकः" इति ॥ ३२ ॥ सजगामेत्यर्धमेकंवाक्यं । वीर्येणयुक्तोवीरः । वीर्यमत्र शत्रुभूतरागादिजेतृत्वं विषयानाकृष्टचित्तइत्यर्थः । यद्वा "एभिश्चसचिवैःसार्धंशिरसायाचितोमया । भ्रातुःशिष्यस्यदासस्यप्रसादंकर्तुमर्हसि" इत्युक्तरीत्या चतुरङ्गबलसहितः सभरतः रामपादप्रसादकः । पादशब्दः पूज्यवाची । "पूज्येतुपादनामाङ्कः" इत्यमरशेषः । प्रसादकः "तुमुन्ण्वुलौक्रियायांक्रियार्थायां" इति ण्वुल् । पूज्यंरामंप्रसादयितुमित्यर्थः । यद्वा रामचरणयोःप्रसादकः रामस्यैवप्रसाद्यत्वेपिपादयोःप्रसाद्यत्वोक्तिः शेषभूतव्यवहारानुसारेण । राजानंद्रष्टुमितिवक्तव्येराजपादौद्रष्टुमितिहिभृत्यजनोव्यवहरति । वनंजगाम प्राप । वस्तुतोरामस्यकोपाभावेपि भरतायराज्यंदत्तमितिबुद्धिंनिवर्तयितुमित्यर्थः । "पूजिता मामिकामातादत्तंराज्यमिदंमम । तद्ददामिपुनस्तुभ्यं यथात्वमददामम" इत्युत्तरत्रापिवक्ष्यति ॥ ३३ ॥ अत्र सइत्यनुषज्यते । सआर्यभावपुरस्कृतः पुरस्कृतः आर्यभावःयेनसः । आहिताग्न्यादित्वात् परनिपातः । यद्वा आर्यभावेन स्वस्यार्यभावेन पुरस्कृतः पूजितः उचितमनेनक्रियतइतिश्लाघितइत्यर्थः । "पूजितःस्यात्पुरस्कृतः" इतिबाणः । तथाविधःसन् । सुमहान् आत्माअन्तःकरणंयस्यतं सुमहात्मानं स्वतःप्रसन्नहृदयमित्यर्थः । सत्यपराक्रमं सत्येपराक्रमोऽप्रच्युतत्वं यस्य तं रामं । गत्वातु प्राप्य तुविशेषोस्ति । तस्याग्रेस्थितिरेवालंयाचनमतिरिच्यतइतिभावः । भ्रातरं रामं । अयाचत् प्रार्थयामास । स्वाभीष्टमितिशेषः । याचेर्द्विकर्मकत्वात्स्वरितेत्त्वादुभयपदी । क्रियाभेदाद्रामशब्दस्य नपुनरुक्तता॥३४॥ स्वाभीष्टमेवाह—त्वमेवेति । धर्मज्ञः ज्येष्ठेविद्यमाने नकनिष्ठोराज्यमर्हतीतिधर्मं जानन् त्वमेवराजानान्यइतिरामंवचोब्रवीत् । "अकथितंच" इतिद्विकर्मकत्वं । ननुभरतकृताप्रपत्तिःकुतोनाफलत् अधिकारिवैगुण्याद्वा शरण्यवैगुण्याद्वा । नाद्यः । अपेक्षातिरिक्तस्याभावात् । नान्त्यः । तस्य सर्वगुणपरिपूर्णत्वादित्याशङ्क्यप्रबलप्रतिबन्धकस्यप्रारब्धस्यसद्भावान्नसाफलितेत्याह—रामोपीति । अपिशब्दः प्रतिविशेषणमन्वेति । रामोपि रमयतीतिव्युत्पत्त्या स्वरूपरूपगुणैराश्रितचित्तरञ्जनस्वभावोपि । परमोदारोपि स्वपर्यन्तापेक्षितार्थप्रदोपि । "यआत्मदाबलदा" इति श्रुतेः । सुमुखोपि अर्थिजनलाभेनप्रसन्नमुखोपि । सुमहायशाअपि "नह्यर्थिनःकार्यवशादुपेताःककुत्स्थवंशेविमुखाःप्रयान्ति" इतिविष्णुपुराणोक्तरीत्या महाकीर्तिरपि । महाबलोपि आश्रितमनोरथपूरणेनिपुणोपि । रामः पितुरादेशात् बलवत्प्रतिबन्धकात् । नैच्छत् । चकारात्तदवसानेत्वैच्छदित्यर्थः । आदेशोनियोगः ॥ ३५ ॥ सर्वथा प्रपत्तेर्वैफल्यमनुचितमिति यावत्प्रतिबन्धकानिवृत्ति फलप्रतिनिधिंदिशतिस्मेत्याह—पादुकेचेति । चस्त्वर्थः । किंतु भरताग्रजः फलप्रदानोचितसंबन्धशीलः । राज्याय राज्यंकर्तुं । "क्रियार्थोपपदस्यचकर्मणिस्थानिनः" इतिचतुर्थी । अस्य भरतस्य पादुके न्यासं स्वप्रतिनिधिं दत्वा रामपादुकेराज्यंकुरुतः अहंतयोःपरिचारकइतिभावयेति दत्वेत्यर्थः । पुनःपुनर्भरतंतस्मादेशान्निवर्तयामास । पुनःपुनरित्यनेन भरतस्य राम-

तीर्थी० रामं अभिरामम् ॥ ३४ ॥ कतकम् सुमहायशाः प्रतिज्ञापालनजन्ययशोभङ्गभियानैच्छत् ॥ ३५ ॥ तीर्थी० अहल्यादष्टवैभवपादस्पृष्टेपादुके न्यासरूपेणदत्त्वा । तिल० राज्याय राज्यलक्षणसामर्थ्यलंभयितुम् ॥ ३६ ॥

स काममनवाप्यैव रामपादावुपस्पृशन् । नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षया ॥ ३७ ॥
गते तु भरते श्रीमान्सत्यसन्धो जितेन्द्रियः । रामस्तु पुनरालक्ष्य नागरस्य जनस्य च
तत्रागमनमेकाग्रो दण्डकान्प्रविवेश ह ॥ ३८ ॥
प्रविश्य तु महारण्यं रामो राजीवलोचनः । विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ।
सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा ॥ ३९ ॥

विरहासहिष्णुत्वंद्योत्यते । स्वार्थत्वनिवृत्तिपूर्वकपरस्वत्वापादनरूपत्वाभावात् नचतुर्थी । किंतु संबन्धसामान्ये षष्ठी ॥ ३६ ॥ अथप्रपन्नस्य यावत्प्रारब्धनिवृत्ति शेषिणि वृत्तिंदर्शयन्नाह—स इति । सभरतःकामं रामकैङ्कर्यमनोरथमप्राप्यैव । रामपादौ रामस्यपादुके । पादशब्दः पादुकोपलक्षकः । उपस्पृशन् प्रत्यहंसेवमानःसन् । रामागमनकाङ्क्षया कदारामआगमिष्यतीतिप्रत्याशया । चतुर्दशवर्षरूपप्रतिबन्धकमुत्तीर्य कदारामकैङ्कर्यंलप्स्यइतिमनोरथमभिवर्धयन्नित्यर्थः । रामरहिततन्निवासस्यातिदुःखावहतयाऽयोध्यांविहाय । नन्दिग्रामे नन्दिग्रामाख्येअयोध्यासन्निहितेकुत्रचित्ग्रामे । राज्यमकरोत् तदाज्ञाकैङ्कर्यमकरोत् । परस्मैपदेन स्वस्यतस्मिन्फलत्वनिवृत्तिरवगम्यते॥३७॥ अयोध्याकाण्डप्रतिपाद्यपितृवचनपरिपालनसिद्धिंनिगमयन्नुत्तरकाण्डार्थंप्रस्तौति—गतेत्विति । अत्रार्धत्रयमेकंवाक्यं । भरते गतेतुविशेषोस्तीतितमेवाह । श्रीमान् प्रतिज्ञाभङ्गभयजनितविषादविगमादुत्पन्नकान्तिविशेषः । सत्यसन्धः भरतनिर्बन्धेनाप्यविचाल्यप्रतिज्ञः । "सन्धाप्रतिज्ञामर्यादा" इत्यमरः । जितेन्द्रियः मातृभरतादिप्रार्थनाव्याजेसत्यपिराज्यभोगलौल्यरहितः । रामः । नगरेभवोनागरः । "तत्रभवः" इत्यण् । तस्य जनस्य । तत्र चित्रकूटे । पुनरागमनमालक्ष्य आलोच्य । चकारादृषिविप्रकारदर्शनाच्च तत्प्रदेशंविहाय । एकाग्रः पितृवचनपालनेदत्तावधानः विरोधिभूयिष्ठदेशत्वेन सावधानोवा । दण्डकान्प्रविवेश । हेति विषादे । "एकसर्गोनन्यवृत्तिरेकाग्रैकायनावपि" इतिवैजयन्ती । सीतालक्ष्मणयोश्चप्रवेशोर्थसिद्धः । दण्डकस्यराज्ञोजनपदोदण्डकः "तस्यनिवासः" इत्यण् । जनपदेलुप्" इति लुप् । शुक्रशापेन वनतांप्राप्तः । कुत्सायांकन् । अवान्तरवनबहुत्वाद्बहुवचनं । वक्ष्यत्युत्तरकाण्डे । "शप्तोब्रह्मर्षिणातेनपुरावैदण्डकोहतः । ततःप्रभृतिकाकुत्स्थदण्डकारण्यमुच्यते । तपस्विनःस्थितायत्रजनस्थानमतोऽभवत्" इति । दण्डकामितिपाठे दण्डकोनामराजाऽस्यामटव्यामस्तीतिदण्डका "अर्शआदिभ्योच्" इत्यच्प्रत्ययः । ततष्टाप् क्षिपकादित्वान्नेत्वं ॥ ३८ ॥ एवमयोध्याकाण्डवृत्तान्तसंग्रहेण पितृवचनपरिपालनरूपसामान्यधर्मः शेषभूतस्यशेषिविषयकैङ्कर्यवृत्तिः प्रपन्नस्यभगवत्पारतन्त्र्यंचप्रदर्शितं । शत्रुघ्नवृत्तान्तप्रदर्शनेन तस्यभागवतपारतन्त्र्यंचसूचितं। अथब्राह्मणेषुविशिष्य सत्यप्रतिज्ञत्वप्रतिपादनपरं आरण्यकाण्डवृत्तान्तंसंगृह्णाति—प्रविश्येत्यादिना । रामोमहारण्यंदण्डकारण्यं । प्रविश्य । तुर्विशेषोस्ति तमाह । राजीवलोचनः अपूर्वसंस्थानविपिनविलोकनजनितकुतूहलेनविकसितनयनारविन्दःसन् । तेनैवोत्साहेन विराधंराक्षसंहत्वा "रिक्तहस्तेननोपेयाद्राजानंदैवतंगुरुं" इतिस्मरणात् तद्धननमुपहारीकृत्य शरभङ्गं ददर्श । हेत्यैतिह्ये । तदनुज्ञया सुतीक्ष्णं चापीत्येकनिपातः समुच्चयार्थकः । अगस्त्यमगस्त्यभ्रातरंचददर्श । तथेति समुच्चये । अगस्त्यभ्राता सुदर्शनाख्यः । तदुक्तं सनत्कुमारसंहितायामगस्त्येन । "यवीयानेषमेभ्राता सुदर्शनइतिस्मृतः" इति । कुंभसंभवस्यागस्त्यस्यभ्राता सहपोषणादिति बोध्यं । अगस्त्यंच अगस्त्यभ्रातरं इत्यत्रसन्धिकार्याभावोवाक्येसंहितायाअनित्यत्वात् । तथोक्तं । "संहितैकपदेनित्यानित्याधातूपसर्गयोः । नित्यासमासेवाक्येतुसाविवक्षामपेक्षते" इति ॥३९॥

तीर्थी० कामं अभिषेकार्थं रामप्रत्यानयनलक्षणमनोरथम् । **विषम०** एवंलक्षणस्य भरतस्य च क्रमेणश्रीरामकैङ्कर्यं तत्पारतन्त्र्यंचप्रदर्शितम् । शत्रुघ्नवृत्तान्ताप्रदर्शनेनतस्यभागवतपारतन्त्र्यंसूचितम् ॥ ३७ ॥ **तिल०** आलक्ष्य संभाव्य तेषां प्रतिनिवर्तनप्रयासात् वरमितोपिदूरगमनमितिसंचिन्त्येतियावत् । **शिरो०** एकां मुख्यां समाधिकरहितां अग्रं गतिं रातिददातीति एकाग्रः परमपुरुषार्थदाता ॥ ३८ ॥ **तीर्थी०** राजीवलोचनविशेषणं रामस्यमहावनप्रवेशसंभावितराक्षसयुद्धार्जितंहर्षंद्योतयति ॥ ३९ ॥

अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् । खङ्गं च परमप्रीतस्तूणी चाक्षयसायकौ ॥ ४० ॥
वसतस्तस्य रामस्य वने वनचरैः सह । ऋषयोऽभ्यागमन्सर्वे वधायासुररक्षसाम् ॥ ४१ ॥
स तेषां प्रतिशुश्राव राक्षसानां तथा वने ॥ ४२ ॥
प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम् । ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम् ॥ ४३ ॥

अगस्त्येति । अत्ररामइत्यनुषज्यते । रामः परमप्रीतःसन् जगदेकवीरस्यस्वस्यसदृशायुधजाललाभात्भृशंसंतुष्टःसन् । अगस्त्यवचनादेव नतुस्वाभ्यर्थनात् । ऐन्द्रं इन्द्रेणदत्तं । "तस्येदं" इति संबन्धसामान्येऽण् । "दत्तोममसहेन्द्रेण" इतिवक्ष्यमाणत्वात् । इदंशरासनादित्रयसाधारणंविशेषणं । शराअस्यन्ते क्षिप्यन्तेऽनेनेतिशरासनं धनुः । तच्च खङ्गंच । अक्षयसायकौ समरसीम्निसहस्रशोविनियोगेप्यक्षयशरौ । तूणी निषङ्गौ । जग्राह स्वीकृतवान् । वचनाज्जग्राहेत्यनेन खङ्गादिकमगस्त्योनस्पृष्टवान् किंतु निर्दिष्टवानित्युच्यते ॥ ४० ॥ एवं विरोधिनिरसनानुकूल्यदर्शनलब्धावसरमुनिजनाभ्यर्थनमाह—वसतइति । वने शरभङ्गवने । तस्यवसतः तस्मिन्वसतीत्यर्थः । "षष्ठीच" इति योगविभागात् "यस्यचभावेनभावलक्षणं" इत्यस्मिन्नर्थे षष्ठी । यद्वा षष्ठ्यर्थसंबन्धसामान्यस्य उक्तविशेषेपर्यवसानं । "शरभङ्गाश्रमेराममभिजग्मुश्च तापसाः" इतिवक्ष्यमाणत्वाच्छरभङ्गवनइतिसिद्धं । सर्वे वैखानसवालखिल्यादयः । ऋषयः शरभङ्गाश्रमवासिनः । वनचरैः चित्रकूटपंपावनप्रभृतिवनवासिभिःसह । वक्ष्यति "पंपावननिवासानामनुमन्दाकिनीमपि । चित्रकूटालयानांचक्रियतेकदनंमहत्" इति । यद्वा वनचरैःसह वनेवसतस्तस्य । "षष्ठीचानादरे" इत्यनादरेषष्ठी । "सविशेषणेहि—" इतिन्यायेन तस्यवनेवासमनादृत्येत्यर्थः । वक्ष्यतिहि "ते वयंभवतारक्ष्याभवद्विषयवासिनः । नगरस्थोवनस्थो वालंनोराजाजनेश्वरः" इति । यद्वा वनेवसतस्तस्य समीपमित्युपस्कार्यं । आसुराणि असुरप्रकृतीनिरक्षांसि । अनेन "विभीषणस्तुधर्मात्मानतुराक्षसचेष्टितः" इत्युक्तविभीषणव्यावृत्तिः । यद्वा असुराश्चरक्षांसिचेतिद्वन्द्वः । असुराः कबन्धादयः । तत्रदनुशब्दप्रयोगात् । यद्वा असून्प्राणान्रान्ति गृह्णन्तिइत्यसुराणि । असुराणिच तानिरक्षांसिचेतिकर्मधारयः । तेषां वधाय वधंकारयितुं । प्रार्थयितुंवा । "क्रियार्थोपपदस्यचकर्मणिस्थानिनः" इतिचतुर्थी । अभ्यागमन् अभिमुखतयाआगताः । नह्याभिमुख्यादन्यत् शरणागतिर्नामास्ति । "सत्सुकार्यवतांपुंसामलमेवाग्रतःस्थितिः" । यद्वा असुररक्षसांवनेवसतस्तस्य असुररक्षसांवधायाभ्यागमन्नित्युभयत्राप्यन्वयः काकाक्षिन्यायात् मध्यमणिन्यायाद्वा ॥ ४१ ॥ मुनीनांदुर्दशामालोक्यतद्विरोधिनिरसनंप्रतिज्ञातमित्याह—सइति । सरामः । राक्षसानांवने दण्डकारण्ये । तेषां ऋषीणां । तथाप्रतिशुश्राव यथातैरर्थितं तथाप्रतिजज्ञइत्यर्थः । "आश्रवसंगरसन्धाःप्रतिश्रवःसंश्रवःप्रतिज्ञाच" इतिहलायुधः ॥ ४२ ॥ मुनिभिरर्थितोरामेणप्रतिज्ञातश्चकोर्थ इत्यत्राह—प्रतिज्ञातश्चेति । रामेणप्रतिज्ञातोर्थस्तु । अग्निकल्पानां ईषन्न्यूनमग्निसादृश्यंप्राप्तानां । "ईषदसमाप्तौकल्पब्देश्यदेशीयरः" इतिकल्पप्प्रत्ययः । अतएवदण्डकारण्यवासिनामृषीणां।चतुर्थ्यर्थेषष्ठी । संयति युद्धे । "समुदायःस्त्रियांसंयत्समित्याजिसमिद्युधः" इत्यमरः । रक्षसांवधः । "कर्तृकर्मणोःकृति" इति कर्मण्यर्थेषष्ठी । प्रतिज्ञातंत्वितिपाठे सामान्येनपुंसकं ।

तीर्थी० इन्द्रः परमेश्वरोविष्णुः तस्येदमैन्द्रं । निजायुधलाभात्परमप्रीतः । **तिल०** पूर्वं भार्गवंजित्वा ततः प्राप्तंयद्वैष्णवंधनुर्भगवतारामेणवरुणेन्यस्तं ततइन्द्रेणवरुणादानीय अगस्त्येस्थापितमित्यग्रेआरण्यकाण्डेस्फुटीभविष्यति ॥ ४० ॥ **तीर्थी०** वनेवसतइत्यनादरेषष्ठी । हिंसानर्हरामस्यतापसरूपेणावस्थानंअनादृत्य । अभ्यागमन् सर्वेश्वरोयंदुष्टान्संहृत्यअस्मान्रक्षिष्यतीतिनिखिलराघवंशरणमागताइत्यर्थः ॥ ४१ ॥ **तीर्थी०** सः रामः । राक्षसानांवने राक्षसावासभूतेवने । तेषां ऋषीणां । तथा प्रार्थनावचनं । प्रतिशुश्राव अङ्गीचकारेत्यर्थः । **शिरो० (पा०)** राक्षसानांतदावने । तदा तस्मिन्काले । अवनेसर्वरक्षणेप्रवृत्तः सरघुनाथः । राक्षसानांसंबन्धि तेषामृषीणांप्रार्थनावचनं प्रतिशुश्राव अङ्गीचकार । यद्वा तेषामृषीणां प्रति प्रत्येतिप्रत्याययतिबोधयत्यर्थमिति वचनं। प्रतिपूर्वकेण्धातुप्रकृतिकक्विबन्तप्रयोगः । नपुंसकत्वाद्ध्रस्वत्वं । आगमशास्त्रस्यानित्यत्वात्तुगभावः । गत्यर्थकदीर्घप्रकृतिकक्विबन्तोवा । गत्यर्थानां ज्ञानार्थकत्वं प्रसिद्धमेव। अतएवानेनप्रतिज्ञातश्चेत्यस्यनपौनरुक्त्यम् । अन्यथा प्रतिपूर्वकश्रुधातोः प्रतिज्ञार्थकत्वेन तद्दुरुपपादंस्यात् ॥ ४२ ॥ **तिल०** अग्निकल्पानां ऋषीणां संनिधावितिशेषः । अपेक्षितइतिवा शेषः॥ ४३ ॥

तेन तत्रैव वसता जनस्थाननिवासिनी । विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥ ४४ ॥
ततः शूर्पणखावाक्यादुद्युक्तान्सर्वराक्षसान् । खरं त्रिशिरसं चैव दूषणं चैव राक्षसम् ।
निजघान रणे रामस्तेषां चैव पदानुगान् ॥ ४५ ॥
वने तस्मिन्निवसता जनस्थाननिवासिनाम् । रक्षसां निहतान्यासन्सहस्राणि चतुर्दश ॥ ४६ ॥
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः । सहायं वरयामास मारीचं नाम राक्षसम् ॥ ४७ ॥
वार्यमाणः सुबहुशो मारीचेन स रावणः । न विरोधो बलवता क्षमो रावण तेन ते ॥ ४८ ॥
अनादृत्य तु तद्वाक्यं रावणः कालचोदितः । जगाम सहमारीचस्तस्याश्रमपदं तदा ॥ ४९ ॥
तेन मायाविना दूरमपवाह्य नृपात्मजौ । जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम् ॥ ५० ॥

प्रतिज्ञातंवस्तु वधइत्यर्थः ॥ ४३ ॥ अथप्रतिज्ञानिर्वाहबीजमुपक्षिपति—तेनेति । तत्रैव जनस्थाने । वसता तेन रामेण । जनस्थानेनिवसतीति जनस्थाननिवासिनी । "सुप्यजातौणिनिस्ताच्छील्ये" इतिणिनिः । कामेनेच्छया रूपमस्याअस्तीति कामरूपिणी । शूर्पतुल्यानखायस्याःसा शूर्पणखा । "पूर्वपदात्संज्ञायामगः" इतिणत्वं । "नखमुखात्संज्ञायां" इतिङीष्प्रतिषेधः । शूर्पणखाख्याराक्षसी । विरूपिता कर्णनासिकाछेदेनवैरूप्यंप्रापिता । "रामस्यदक्षिणोबाहुः" इतिलक्ष्मणस्यरामबाहुत्वात् रामस्यविरूपकरणकर्तृत्वोक्तिः । शूर्पनखीतिपाठे नसासंज्ञा ॥ ४४ ॥ ततइत्यादिसार्धश्लोक एकंवाक्यम् । ततः शूर्पणखावैरूप्यकरणानन्तरं । शूर्पणखावाक्यातुद्युक्तान् युद्धार्थं संनद्धान् । सर्वराक्षसान् चतुर्दशसहस्रसंख्याकप्रधानराक्षसान् । तेष्वपिप्रधानं । खरं त्रिशिरसंचैव दूषणंचैव राक्षसम् । चैवेतिनिपातद्वयसमुदायः समुच्चयार्थः । तेषां पूर्वोक्तानांराक्षसानां खरादीनांच । पदानुगान् अनुचरांश्च । रणे युद्धे । निजघान हतवान् । यद्वा खरादीन् तेषांपदानुगानसर्वराक्षसांश्च निजघानेतियोजना ॥४५॥ हतान्राक्षसान्परिसंचष्टे—वनइति । तस्मिन्वनेनिवसतारामेणेत्यनेनासहायत्वंदर्शितं । जनस्थाननिवासिनामित्यनेनारण्यवर्तित्वेनातिघोरत्वमुक्तं । रक्षसांचतुर्दशसहस्राणीतियौगपद्यमुक्तं । निहतानीतिनिश्शेषत्वमुच्यते । सहस्राणीतिसंख्यासंख्येययोरभेदेननिर्देशः । चतुर्दशसहस्रसंख्याकानि सैन्यानिवा ॥ ४६ ॥ एवंरामस्यसत्यप्रतिज्ञत्वेदर्शिते सीतायाःपुरुषकारत्वंवक्तुंबीजमुपक्षिपति—ततइति । ततः खरादिवधानन्तरं । ज्ञातिवधं खरवधं । खरस्यज्ञातित्वं स्वमातृष्वसुर्विश्रवसोजातत्वादित्यारण्यपर्वणिव्यक्तम् । श्रुत्वा अकंपनशूर्पणखामुखेनज्ञात्वा । रावणः रौतिरावयतीति रावणः । वक्ष्यत्युत्तरकाण्डे । "यस्माल्लोकत्रयंह्येतद्रावितंभयमागतं । तस्मात्त्वंरावणोनाम नाम्नाराजन्भविष्यसि" इति । यद्वा विश्रवसोपत्यं रावणः । शिवादिगणे "विश्रवसो विश्रवणरवण" इतिपाठात् रवणादेशःअण्च । क्रोधमूर्च्छितः क्रोधेनमूर्च्छितःमूढः । "मूर्च्छितौमूढसोच्छ्रायौ" इतिवैजयन्ती । नचायंप्रत्ययोमूर्च्छतेर्निष्ठा मूर्तइतितद्रूपत्वात् । किंतुमूर्च्छास्यसंजातेतिमूर्च्छितः तारकादित्वादितच् । मारीचंनाम राक्षसं सहायं वरयामास ॥ ४७ ॥ अत्र अन्ते इतिकरणंद्रष्टव्यं । सरावणः । हेरावण । ते तेन बलवता खरादिषुदृष्टापदानवताबलीयसा । रामेण । विरोधोनक्षमः नयुक्तः । "क्षमश्शिषुहितेयोग्ये युक्तेशक्तेपटावपि" इतिशब्दरत्नाकरे । इति सुबहुशो मुहुर्मुहुःवार्यमाणोऽभूत् ॥ ४८ ॥ रावणःकालचोदितः कालेनमृत्युना प्रेरितःसन् । तद्वाक्यं मारीचवाक्यं अनादृत्य । सहमारीचः मारीचसहितः । "तेनसहेतितुल्ययोगे" इतिसमासः । "वोपसर्जनस्य" इतिसहशब्दस्य सभावाभावः । तदा तस्मिन्नेवकाले । तस्य खरदूषणादिहन्तृत्वेनप्रसिद्धस्य रामस्य । आश्रमपदं आश्रमस्थानं । "पदंव्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः । जगाम प्राप ॥ ४९ ॥ मायाविना प्रशस्तमृगमायावता । "अस्मायामेधास्रजोविनिः" इतिविनिप्रत्ययः । लोभनीयविचित्रकनकमृगवेषधारिणेत्यर्थः । तेन मारीचेन प्रयोज्येन । नृपात्म-

ती० जनस्थानंनाम दण्डकारण्येरावणस्यबलनिवेशस्थानम् ॥ ४४ ॥ शिरो० रक्षसामित्यत्रषष्ठी राह्वोःशिरइतिवद्बोध्य ॥ ४६ ॥ तिल० बलवता विश्वामित्राश्रमेमदनुभूतबलेन ॥ ४८ ॥

गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम् । राघवः शोकसंतप्तो विललापाकुलेन्द्रियः ॥ ५१ ॥

ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषम् ।
मार्गमाणो वने सीतां राक्षसं संददर्श ह । कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥ ५२ ॥

जौ दशरथपुत्रौ । दूरंयथाभवतितथा । अपवाह्य अपसार्य । दृश्यादृश्यतयारामं रामस्वरतुल्यस्वरेण लक्ष्मणंच दूरंनिस्सार्येत्यर्थः । मध्येसीताविमोचनाय प्राप्तं जटायुषं जटायुर्नामकंगृध्रं । हत्वा मरणपर्यवसायिनींहिंसांकृत्वा । रामस्यभार्यां नित्यानपायिनींसीतां । जहार हृतवान् । अत्र "आस्यंव्यादायस्वपिति" इतिवदपूर्वकालेक्त्वाप्रत्ययः । सीतांहृत्वाजटायुषंजघानेत्यर्थः । अत्रमायानिर्मितासीतैवापहृता स्वयमग्नावन्तर्हिता । अतएवमायासीतायामग्निप्रविष्टायांनिजसीतायाउत्थानं यथाकथंचिल्लोकापवादात्पुनःसंत्यागश्चोपपद्यतइत्याहुः ॥ ५० ॥ मृगरूपमारीचहननं पर्णशालायांसीतायाअदर्शनेनतदन्वेषणंच चकारेणसमुच्चीयते । निहतं मुमूर्षुं । गृध्रं जटायुषं । दृष्ट्वा । तद्वचनान्मैथिलीं सीतां । हृतां रावणेनापहृतां । श्रुत्वा राघवः । शोकेनसंतप्तः सम्यक्तप्तःसन् सीतायाअदर्शनेनतप्तः जटायुर्मरणेनसुतरांतप्तः । अतएव आकुलेन्द्रियः कलुषितसर्वेन्द्रियस्सन् । विललाप परिदेवनमकरोत् । "विलापःपरिदेवनं" इत्यमरः । "राज्याद्भ्रंशोवनेवासःसीतानष्टाहतोद्विजः । ईदृशीयंममालक्ष्मीर्निर्दहेदपिपावकं" इति । अत्र राघवमैथिलीशब्दाभ्यां कुलद्वयावद्यकरमिदमपहरणमिति शोकातिशयहेतुरुच्यते । ननु विष्णववतारभूतस्यास्यकथंशोकमोहौसंभवतइति । संभवतएवपुरुषधौरेयस्य । यदिहिलोकोत्तरगुणविशिष्टवस्तुविनाशेपितौनस्यातां तर्हि सकथंपुरुषधौरेयःस्यात् । तच्चकथमतिसुन्दरंस्यात् । तयोरुभयोर्नमस्कारएवस्यात् । वक्ष्यतिचमहापुरुषगुणमणिवर्णनप्रकरणे "व्यसनेषुमनुष्याणांभृशंभवतिदुःखितः" इति । मारुतिश्चवक्ष्यति "दुष्करंकृतवान् रामोहीनोयदनयाप्रभुः । धारयत्यात्मनोदेहंनशोकेनावसीदति" इति ॥ ५१ ॥ अर्धत्रयमेकंवाक्यं । तेनैवशोकेन गृध्रहननजनितेनैवशोकेन सीतापहरणजशोकादप्यधिकेनेत्यर्थः । ततः व्याप्तोरामः । गृध्रं तिर्यग्विशेषमपिजटायुषं । पितृसखत्वात् शेषिकार्येत्यक्तप्राणत्वाच्च दग्ध्वा ब्रह्ममेधेनसंस्कृत्य । "यत्तुप्रेतस्य मर्त्यस्यकथयन्तिद्विजातयः । तत्स्वर्गगमनंतस्यक्षिप्रं रामोजजापह" इति वक्ष्यमाणत्वात् मुक्तव्यक्तशरीरत्वाच्च इदंब्रह्ममेधमर्हतीति । तथोक्तंनृसिंहपुराणे "मत्कृतेनिधनंयस्मात्त्वयाप्राप्तंद्विजोत्तम । तस्मात्त्वं मत्प्रसादेनविष्णुलोकमवाप्स्यसि" इति । सामान्यतश्चोक्तं । यथाऽऽग्नेये "विष्णोःकार्यंसमुद्दिश्यदेहत्यागोयतःकृतः । ततोवैकुण्ठमासाद्यमुक्तोभवतिमानवः" इति । आश्वमेधिकेच "प्राणांस्त्यजतियोमर्त्योमां प्रपन्नोपिमत्कृते । बालसूर्यप्रकाशेनव्रजेद्यानेनमद्गृहं" इति । अत्रापिवक्ष्यति "यागतिर्यज्ञशीलानामाहिताग्नेश्चयागतिः । अपरावर्तिनांयाचयाचभूमिप्रदायिनां । मयात्वंसमनुज्ञातोगच्छलोकाननुत्तमान्" इति । अत्रापरावृत्तिः "नचपुनरावर्तते" इत्युक्ता मुक्तिरेव नतु युद्धे अपलायनं । तत्फलस्यस्वतःसिद्धत्वेन तदनुग्राह्यत्वाभावात् । नच संस्काराभावेसुकृतफलस्यानुत्पत्त्यातत्करणेनतदनुग्राह्यत्वमेवेतिवाच्यं । तिरश्चो यज्ञानधिकारेण तस्यतदभावेनतस्यतदननुग्राह्यत्वात् । अङ्गिफलस्यैवाङ्गफलत्वेन उपासनाङ्गानांयज्ञदानादीनामपि मुक्तिरेवफलमित्यभिप्रायेण "यागतिर्यज्ञशीलानां" इत्याद्युक्तम् । यद्वा "इमाँल्लोकान्कामान्नीकामरूप्यनुसंचरन्" इत्यादिश्रुत्युक्तरीत्या मुक्तस्यसर्वलोकसंचारसंभवात् यागतिरित्याद्युक्तंक्रममुक्तिपरमिदंवचनं । ननु "आत्मानंमानुषंमन्ये" इति मनुष्यत्वंभावयतः कथंपरत्वासाधारणचिह्नंमोक्षप्रदत्वमुच्यतइतिचेन्न । "सत्येनलोकाञ्जयति" इत्युक्तस्यसर्वलोकजयस्यमानुषत्वेप्यविरोधात् । एवं जटायुषंदग्ध्वा वने सीतां मार्गमाणः अन्वेषणंकुर्वन् । मृगअन्वेषणइत्यस्माद्धातोःशानच् । "आधृषाद्वा" इतिविकल्पाण्णिजभावः । रूपेण शरीरेण । विकृतं विकारयुक्तं । "येनाङ्गविकारः" इतितृतीया । कुक्षिनिक्षिप्तमस्तकमित्यर्थः । घोरदर्शनं भयंकरदर्शनं । कबन्धं कबन्धाकारत्वात्कबन्धनामकंराक्षसं । ददर्श । हेतिखेदे । अमृतमन्वेषता कालकूटमलंभीत्यर्थः । यद्यप्ययंदानवएव तथापिराक्षसप्र-

---

तीर्थी० ततः प्रलापानन्तरं शोकेन उपलक्षितः । **तिल०** तेनैवशोकेन निवृत्तिहेतुमप्राप्तेनअभिभूयमानएवसन् ॥ ५२ ॥

तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः ॥ ५३ ॥
स चाऽऽस्य कथयामास शबरीं धर्मचारिणीम् । श्रमणीं धर्मनिपुणामभिगच्छेति राघवम् ॥ ५४ ॥
सोऽभ्यगच्छन्महातेजाः शबरीं शत्रुसूदनः । शबर्या पूजितः सम्यग्रामो दशरथात्मजः ॥ ५५ ॥
पंपातीरे हनुमता संगतो वानरेण ह । हनुमद्वचनाच्चैव सुग्रीवेण समागतः ॥ ५६ ॥
सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः । आदितस्तद्यथावृत्तं सीतायाश्च विशेषतः ॥ ५७ ॥

कृतित्वात्तथोक्तमितिज्ञेयम् ॥५२॥ महाबाहुः कबन्धभुजनिकर्तनक्षमभुजोरामः। तं कबन्धंनिहत्य । तत्प्रार्थनया ददाह दग्धवान् । सच कबन्धो दाहेनहेतुना। स्वः स्वर्गगतः। इदमर्धमेकंवाक्यम् ॥५३॥ सः स्वर्गं गच्छन्कबन्धोपि । आस्य उपकारस्मृत्या क्षणमाकाशेस्थित्वा । धर्मचारिणीं गुरुशुश्रूषादिधर्माचरणशीलां आचार्याभिमानरूपचरमपर्वनिष्ठामित्यर्थः "पादमूलंगमिष्यामियानहंपर्यचारिषं" इतिवक्ष्यमाणत्वात् । धर्मे अतिथिसत्काररूपे । निपुणां समर्थां धर्मसूक्ष्मज्ञामित्यर्थः । रामः समागमिष्यतीति स्वादूनिफलान्यास्वाद्यास्वाद्य परीक्ष्य निक्षिप्तवतीतिप्रसिद्धिः। श्रमणीं परिव्राजिकां । "चतुर्थमाश्रमंप्राप्ताःश्रमणा नामतेस्मृताः" इतिस्मरणात् । शबरींप्रतिलोमस्त्रियं । तदुक्तंनारदीये । "नृपायांवैश्यतोजातःशबरःपरिकीर्तितः । मधूनिवृक्षादानीयविक्रीणीतेस्ववृत्तये" इति । "जातेरस्त्रीविषयात्—" इतिङीष् । अभिगच्छ आभिमुख्येनगच्छेति राघवंकथयामास । राघवइतिपाठे तस्योत्तरश्लोकेनान्वयः । यद्वा राघवेतिपाठेहेराघवशबरीमभिगच्छेतिअस्यरामस्यकथयामासेत्यर्थः । अत्रभागवतभक्तिमहिम्नाहीनजातेरप्यभिगन्तव्यत्वमुक्तम् ॥५४॥ महातेजाः चरमपर्वनिष्ठजनलिप्सयातिसंतुष्टः । सः राघवः । शत्रुसूदनः "गमिष्याम्यक्षयाँल्लोकांस्त्वत्प्रसादादरिंदम" इत्युक्तरीत्या तत्प्राप्तिप्रतिबन्धकनिवर्तकः । "सात्पदाद्योः" इति षत्वाभावः। शबरीं नीचत्वसीमाभूमिभूतां अभ्यगच्छदितिसौशील्यातिशयोक्तिः । दशरथात्मजः रामः। शबर्या सम्यक्पूजितः । षष्टिवर्षसहस्राणिवन्ध्यस्यदशरथस्यप्रसादे अत्यन्तादरकृतभोजनादप्यतिशयितं तत्कालमात्रसमागतशबरीसमर्पितमृष्टान्नमितिभावः । शरभङ्गादिभिरगस्त्यान्तैः कृतं पूजामात्रं शबर्याकृतं तुसम्यक्पूजा । तस्याश्चरमपर्वनिष्ठत्वादितिभावः । उक्तंहि "ममभक्तभक्तेषुप्रीतिरभ्यधिकाभवेत्" इति। यद्वा सम्यक्पूजनं परीक्षितरसैःफलैर्भोजनं । पूजितइत्यत्र "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्तमानेक्तः । तथाचशबर्येत्यत्र "क्तस्यचवर्तमाने" इति कथंनषष्ठीतिचेत् अत्रकेचिदाहुः । आर्षःषष्ठ्यभावइति । अन्येतु नायंवर्तमानेक्तः । किंतु भूते । तद्योगेच "नलोकाव्यय—" इत्यादिना षष्ठीप्रतिषेधात्तृतीयैवेति । वस्तुतः पूजास्यसंजातेतिपूजितः । तारकादित्वादितच्प्रत्ययः । अनेनतृतीयाभवत्येव ॥ ५५ ॥ एवं सत्यप्रतिज्ञत्वप्रधानमारण्यकाण्डचरितं संगृह्य मित्रकार्यनिर्वाहकत्वपरां किष्किन्धाकाण्डकथां संगृह्णाति—पंपेति। पंपानाम पद्मसरः तस्यास्तीरे तटकानने इत्युद्दीपकसंनिधानोक्तिः । हनुमता प्रशस्तहनुना वीरकिणाङ्कितमुखेनेत्यर्थः। वानरेणसंगतः संयुक्तोरामइतिशेषः । हेतिहर्षे । विरहिजनप्राणापहारिणिपंपोपवने स्वकामिनीघटकसमागमोऽयं चोरैर्वनेऽपहृतसर्वस्वस्य स्वजनमुखावलोकनवदतीवाश्वासनमितिमुनेर्हर्षः। हनुमता कागतिरिहेदानीमितिअतिमात्रपर्याकुलतादशायांविजयकिणाङ्कितवदनवतापुरुषेण संगमोयदृच्छयासंजातः। वानरेणेतिविशेषणेन रावणवत्संन्यासिवेषरहिततयास्ववेषेणसमागमाद्विश्वसनीयताद्योत्यते। हनुमद्वचनात्सुग्रीवेणसमागतः । चैवेतिनिपातसमुदायस्समुच्चयार्थः। अनुकूलपुरुषकारलाभादुचितमित्रलाभोजातइतिभावः ॥ ५६ ॥ अथसख्यहेतुंरहस्योद्भेदं दर्शयति—सुग्रीवायेति । महाबलइत्यनेन वृत्तस्मरणकालिककातर्यगोपनहेतुधैर्यमुच्यते । रामः आदितः जन्मनआरभ्य । तत्प्रसिद्धं । सर्ववृत्तं । सुग्रीवाय

तिल० स्वर्गतः स्वर्गगमनयोग्यंस्वकीयंगन्धर्वरूपंप्राप्तवानित्यर्थः ॥ ५३ ॥ **तिल०** **(पा०)** ततोऽस्यकथयामास । ततः तेनरूपेण । श्रमणीमित्यत्रकर्तरिल्युट तपसाश्राम्यतीत्यर्थात् ॥५४॥ **शिरो०** दशरथात्मजः दशरथनित्यसुतः दशरथस्यजन्मान्तरेपिरामएवसुतइतियावत् ॥ ५५ ॥ **तीर्थी०** महाबलइतिविशेषणसामर्थ्यात्सहायमन्तरेण सर्वनिर्वाहकत्वेपिलोकरीतिमनुसृत्यसुग्रीवसहायमुद्दिश्यसर्वमकथयदित्यवगम्यते ॥ ५७ ॥

सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः । चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ॥ ५८ ॥
ततो वानरराजेन वैरानुकथनं प्रति । रामायावेदितं सर्वं प्रणयादुःखितेन च ॥ ५९ ॥
प्रतिज्ञातं च रामेण तदा वालिवधं प्रति । वालिनश्च बलं तत्र कथयामास वानरः ॥ ६० ॥
सुग्रीवः शङ्कितश्चासीन्नित्यं वीर्येण राघवे ॥ ६१ ॥
राघवप्रत्ययार्थं तु दुन्दुभेः कायमुत्तमम् । दर्शयामास सुग्रीवो महापर्वतसन्निभम् ॥ ६२ ॥
उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः । पादाङ्गुष्ठेन चिक्षेप संपूर्णं दशयोजनम् ॥ ६३ ॥

शंसत् । अनित्यमागमशासनमित्यडभावः । अकथयदित्यर्थः । सीतायाः तद्वृत्तंच रावणहृतत्वादिकं । यथावृत्तं वृत्तमनतिक्रम्य । पदार्थाऽनतिवृत्तावव्ययीभावः । तदन्वेषणस्यावश्यकर्तव्यतया विशेषेणाशंसत् ॥ ५७ ॥ चापीतिनिपातसमुदायःसमुच्चयार्थः । वानरःसुग्रीवोपि । रामस्य संबन्धि तत्सर्वं पूर्वोक्तंवृत्तान्तं । श्रुत्वा प्रीतः रामस्यप्रयोजनापेक्षित्वान्मामकमपिप्रयोजनंनिर्वर्तयिष्यतीतिसंतुष्टःसन् । अग्निःसाक्षीसाक्षाद्द्रष्टायस्यतत् अग्निसाक्षिकं । "शेषाद्विभाषा" इतिकप्प्रत्ययः । रामेणसख्यं सखित्वं । "सख्युर्यः" इतिभावार्थेयप्रत्ययः । चकार कृतवान् । वानररामशब्दाभ्यां सख्यस्यासदृशत्वंव्यञ्जितं । तेनच रामस्यसौशील्यातिशयोव्यज्यते । गुहस्यहीनमनुष्यजातितया तत्सख्यंसौशील्यहेतुः । तत्रापि स्त्रीत्वेनशबर्यभिगमनं ततस्तरांसौशील्यं । सुग्रीवस्यतिर्यक्त्वेन ततस्तमांसौशील्यमितिभावः ॥ ५८ ॥ ततः सख्यकरणानन्तरं । दुःखितेन परमसुहृद्भूतरामसन्निधानादुद्बुद्धपूर्ववृत्तान्ततया बाष्पंमुञ्चतेत्यर्थः । वानरराजेन सुग्रीवेण । "कर्तृकरणयोस्तृतीया" इति कर्तरितृतीया । वैरस्य वालिविरोधस्यानुकथनं अनुकूलकथनं प्रश्नानुकूलमुत्तरमित्यर्थः । वालिनासहतवकुतोवैरमासीदित्येवंप्रश्नः । तंप्रतिवक्तव्यं सर्वं रहस्यप्रकाशरूपं । प्रणयात् स्नेहाद्विस्रंभाद्वा । "प्रणयास्त्वमी । विस्रंभयाच्ञाप्रेमाणः" इत्यमरः । रामायावेदितं आसमन्तादुक्तं कार्त्स्न्येनोक्तमित्यर्थः ॥५९॥ प्रतिज्ञातंचेतिचशब्दोभिन्नक्रमः । रामेणच तदा आवेदनानन्तरकाले । वालिवधंप्रति प्रतिज्ञातं वालिवधप्रतिज्ञाकृतेत्यर्थः । भावेक्तः । वानरः सुग्रीवश्च । तत्र ऋश्यमूके । वालिनोबलं "समुद्रात्पश्चिमात्पूर्वंदक्षिणादपिचोत्तरं । क्रामत्यनुदितेसूर्येवालीव्यपगतक्लमः" इत्यादिनावक्ष्यमाणंबलं । उत्साहवर्धनायकथयामास ॥ ६० ॥ सुग्रीवो राघवे विषये । वीर्येणहेतुना नित्यं दर्शनमारभ्यसालभेदनपर्यन्तं । मुहुर्मुहुः शङ्कितः आसीच्च । अयंवालितुल्यवीर्योनवेतिशङ्कितवानित्यर्थः । नित्यशब्दस्यवीप्सापरत्वंमहाभाष्ये "नित्यप्रहसितोनित्यप्रजल्पितः" इति । "मतिबुद्धि—" इत्यादिसूत्रेशङ्कितादयोप्यर्थसिद्धाइतिसूचनात्कर्तरिनिष्ठा ॥ ६१ ॥ तुशब्दो विशेषवाची । नकेवलंशङ्कितोऽभूत् । किंतु प्रत्ययार्थमन्यद्दर्शयामासचेत्यर्थः । राघवप्रत्ययार्थं रामविषयज्ञानार्थं रामबलविज्ञानार्थमित्यर्थः । रामविषयविश्वासजननार्थमितिवा । "प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु" इत्यमरः । दुन्दुभेः दुन्दुभ्याख्यस्यवालिहतस्यासुरस्य । उत्तमं अशिथिलम् । अतएव महापर्वतसन्निभं । उत्तमं उन्नतंवा । कायं कायाकारास्थि । दर्शयामास । रामायेतिशेषः । वालीएतदस्थिपादाग्रेन्यस्यऊर्ध्वंक्षिपतीत्युक्त्वा दर्शयामासेत्यर्थः ॥ ६२ ॥ महाबलः अपरिमेयबलः । महाबाहुः बलानुगुणकार्यकरणसमर्थभुजः रामः । अस्थिप्रेक्ष्य । स्मयित्वा कियन्मात्रमेतदित्यनादृत्यस्मित्वा । इडार्षः । पादाङ्गुष्ठेन । संपूर्णं अन्यूनं । दशयोजनं । पात्रादित्वात्समाहारे क्लीबभावः । अत्यन्तसंयोगे द्वितीया । उच्चिक्षेप उद्यम्यचिक्षेप । "व्यवहिताश्च" इति उपसर्गस्य व्यवहितप्रयोगः । वालिनापादेनक्षिप्तं रामेणतुपादांगुष्ठेनउत्क्षिप्यते । तेन द्वैधनुश्शते

तीर्थी० स्वसमानदुःखमहाबलसंबन्धलाभात् प्रीतःसन् ॥ ५८ ॥ **तिल०** वालिनोबलं अरुणोदयानन्तरंसूर्योदयात्प्रागेव रावणंगृहीत्वाचतुस्समुद्रलङ्घनादिरूपम् । **शिरो०** चोप्यर्थे । तत्रच तस्मिन्नपिसमये ॥ ६० ॥ **शिरो०** नित्यंशङ्कितश्चशङ्कितएवासीदित्यनेनबलवद्द्रोहस्यदुर्निवारत्वंसूचितम् ॥ ६१ ॥ **तीर्थी०** महाबाहुः बाह्वोर्महत्त्वंनाम अङ्गुल्येकदेशेनलोकविरोधिसकलदैत्यादिहननशक्तत्वम् । तथायुद्धकाण्डे "पिशाचान्दानवान्यक्षान्पृथिव्यांचैवराक्षसान् । अङ्गुल्यग्रेणतान्हन्यामिच्छन्हरिगणेश्वर" इति । ज्ञानिनोपिमुह्यन्ति किंवनकपिरित्युत्स्मयित्वा उदारमीषद्धासंकृत्वा ॥ ६३ ॥

विभेद च पुनस्सालान्सप्तैकेन महेषुणा । गिरिं रसातलं चैव जनयन्प्रत्ययं तदा ॥ ६४ ॥
ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः । किष्किन्धां रामसहितो जगाम च गुहां तदा ॥६५॥
ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः । तेन नादेन महता निर्जगाम हरीश्वरः ॥ ६६ ॥
अनुमान्य तदा तारां सुग्रीवेण समागतः । निजघान च तत्रैनं शरेणैकेन राघवः ॥ ६७ ॥
ततः सुग्रीववचनाद्धत्वा वालिनमाहवे । सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥ ६८ ॥
स च सर्वान्समानीय वानरान्वानरर्षभः । दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ॥ ६९ ॥
ततो गृध्रस्य वचनात्संपातेर्हनुमान्बली । शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम् ॥ ७० ॥

अनेन दशयोजनमितिविशेषः ॥ ६३ ॥ चिरंयुद्धपरिश्रान्तेनवालिनाआर्द्रशरीरंप्रक्षिप्तं त्वयातुस्वस्थेनशुष्कमित्यनाश्वसन्तंप्रतिप्रत्ययान्तरमकरोदित्याह्—विभेदेति । अत्र रामइत्यनुषज्यते । पुनश्चसप्तसालान् सर्जकतरून् । तत्समीपस्थंगिरिं । रसातलं अधोलोकेषु षष्ठलोकंच । प्रत्ययं विश्वासं । जनयन् प्रत्ययजननार्थं । "लक्षणहेत्वोः—" इतिशतृप्रत्ययः । एकेन महेषुणाविभेद । महेषुणेत्यनेन सुग्रीवकार्यसाधनायरामेणतप्तपरशुधारणंकृतमितिध्वन्यते ॥ ६४ ॥ ततः सालादिभेदनानन्तरं । तेन अतिमानुषचरित्रेण । विश्वस्तः अयमवश्यंवालिहननक्षमइतिविश्वासंप्राप्तः । प्रीतमनाः अचिरादेवराज्यंलप्स्यइतिसंतुष्टचित्तः । महाकपिः आत्मानंकपिराजंमन्यमानः सः सुग्रीवः । रामसहितःसन् । तदा तस्मिन्नेवकाले । किष्किन्धां किष्किन्धाख्यां । गुहां गुहावत्पर्वतमध्यवर्तिनींपुरीं । जगाम । चकारेण पुनर्गमनंसमुच्चीयते ॥ ६५ ॥ ततः किष्किन्धागमनानन्तरं । हरिवरः आत्मनःकपिवरत्वनिश्चयवान् । हेमपिङ्गलः स्वर्णवत्पिङ्गवर्णः । हर्षप्रकर्षेण निवृत्तवैवर्ण्यइत्यर्थः । सुग्रीवः गर्जितानुगुणकण्ठध्वनिः । अगर्जत् घोषंचकार । महता पूर्वगर्जितविलक्षणेन । तेन नादेनहेतुना । हरिवरः वाली । गृहान्निर्जगाम ॥ ६६ ॥ वाली । तदा निर्गमनकाले । तारां अद्यवनादागतेनाङ्गदेनसुग्रीवोरामसहायस्तिष्ठतीतिकथितं अद्यपराजितोनिर्गतःपुनरागतः अतस्त्वद्गमनमनुचितमितिवारयन्तींतारां । अनुमान्य धार्मिकाग्रेसरोरामःकथंमामनपराधिनंहन्यादितिपरिसान्त्व्य । सुग्रीवेण समागतः अयुध्यतेत्यर्थः । राघवः महाकुलप्रसूतत्वेनधर्मसूक्ष्मज्ञः । तत्र युद्धभूमौ । एनं परेणयुद्धकृतमपिवालिनं । तदा परेणयुद्धकाले । चोवधारणार्थः । एकेनशरेण निजघान । द्वितीयशरप्रयोगेतदाभिमुख्येनतद्वधोदुर्लभइतिभावः । युद्धेऽभिमुखस्यबलं वालिनमेवगच्छतीतिवरप्रसिद्धिः । सुग्रीववचनात् "वालिनंजहिकाकुत्स्थमयाबद्धोऽयमञ्जलिः" इतिसुग्रीवप्रार्थनावचनात् । आहवे सुग्रीवस्ययुद्धे । वालिनंहत्वा । ततः वालिवधानन्तरं राघवः । तद्राज्ये वालिराज्ये । सुग्रीवमेव । प्रत्यपादयत् स्थापयामासेत्यर्थः ॥६७॥६८॥ अथ सुग्रीवस्यप्रत्युपकारंदर्शयति—सचेति । वानरर्षभः वानरराजत्वेनाभिषिक्तः । सच सुग्रीवोपि । जनकात्मजांदिदृक्षुः द्रष्टुमिच्छुःसन् । सर्वान् नानादेशनिवासिनः । वानरान् समानीय आहूय । दिशश्चतस्रःप्रति । प्रस्थापयामास शीघ्रंसीतां दृष्ट्वाऽऽगच्छतेति आदिष्टवानित्यर्थः ॥ ६९ ॥ ततः सुन्दरकाण्डकथांसंगृह्णाति—ततइति । ततः प्रस्थानानन्तरं । बली अपरिच्छेद्यबलः । भूमार्थेमत्वर्थीयः । हनुमान् प्रशस्तहनुः । अन्वर्थसंज्ञेयं । तथाचेन्द्रोवक्ष्यति । "मत्करोत्सृष्टवज्रेणहनुरस्यतदाक्षतः । नाम्नैषहरिशार्दूलोभविताहनुमानिति" इति । आभ्यांपदाभ्यांपूर्वकथाप्रस्तावेन जांबवता कृतोत्साहत्वं तदुद्भूतनिरवधिकबलवत्त्वंचद्योत्यते । संपातेः संपातिनामकस्यजटायुर्ज्येष्ठस्यपक्षिणः । वचनात् इतःशतयोजनात्परे समुद्रमध्येलङ्कायांसीतावर्तते तर समुद्रं तांपश्यसीतिवचनात् । शतयोजनविस्तीर्णंलवणा-

---

तीर्थी० एकसालमात्रभेदनेअस्यवालिनासाम्यशङ्काजायतेतन्माभूदितितन्निवृत्त्यर्थं अचोदितानामपिअन्यसालप्रस्थादीनांभेदनमितिमन्तव्यम् । **शिरो०** जनयन् हेत्वर्थकःशतृप्रत्ययः ॥ ६४ ॥ **शिरो०** निजघान भक्तापकारजनितंवालिनोदोषंनिवर्तयामास । अतएवविशब्दप्रयोगः ॥ ६७ ॥ **तिल०** सुग्रीववचनादित्यनेनानपकारिवालिवधस्यायुक्तत्वेपिमित्रापकारित्वेनतदुक्त्याहननमितिध्वनितम् । **शिरो०** एवकारेणाङ्गदव्यवच्छेदः ॥ ६८ ॥ **तीर्थी०** चकारात् अशोकवनंचमर्दयामास ॥ ६९ ॥

[पा०] १. घ. समाहूय ।

तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् । ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम् ॥ ७१ ॥
निवेदयित्वाऽभिज्ञानं प्रवृत्तिं च निवेद्य च । समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥ ७२ ॥
पञ्च सेनाग्रगान्हत्वा सप्त मन्त्रिसुतानपि । शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥ ७३ ॥
अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात् । मर्षयन्राक्षसान्वीरो यन्त्रिणस्तान्यदृच्छया ॥ ७४ ॥
ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम् । रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ॥७५॥
सोभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् । न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥ ७६ ॥
ततः सुग्रीवसहितो गत्वा तीरं महोदधेः । समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ॥ ७७ ॥
दर्शयामास चात्मानं समुद्रः सरितांपतिः । समुद्रवचनाच्चैव नलं सेतुमकारयत् ॥ ७८ ॥

र्णवं । पुप्लुवे प्लुत्वाततारेत्यर्थः ॥ ७० ॥ हनुमान् । रावणपालितांलङ्कांपुरींसमासाद्य । तत्र लङ्कायां । अशोकवनिकां अन्तःपुरोद्यानं गतां । ध्यायन्तीं राममेव नैरन्तर्येणस्मरन्तीं । सीतां ददर्श ॥ ७१ ॥ ततोहनुमान् । अभिज्ञानं अङ्गुलीयकरूपंरामचिह्नं । निवेदयित्वा समर्प्य । अनित्यत्वात्समासेपिल्यबभावः । अतएवन्यासकारः "वाछन्दसीतिवक्तव्ये "क्त्वापिच्छन्दसि" इतिवचनमसमासेपिल्यबर्थं तेनार्च्यदेवानागतइतिसिद्धं"इति । अनेनव्यभिचारेण समासेल्यब्विधेरनित्यत्वंसिद्धमेव । प्रवृत्तिं सुग्रीवसख्यकरणसेनासमूहीकरणप्रभृतिरामागमनवृत्तान्तं । "वार्ताप्रवृत्तिर्वृत्तान्तः" इत्यमरः । चकारात् "नैवदंशान्नमशकान्नकीटान्नसरीसृपान् । राघवोपनयेद्गात्रात्त्वद्गतेनान्तरात्मना" इति रामस्यसीतैकपरायणत्वादिकंसमुच्चीयते । निवेद्य उक्त्वाच । वैदेहींसमाश्वास्य सद्यस्ते कान्तःसमागमिष्यतीतिसान्त्वयित्वा । तोरणं अशोकवनिकाबहिर्द्वारं । मर्दयामास । "तोरणोस्त्रीबहिर्द्वारं" इत्यमरः ॥७२॥ अग्रेगच्छन्तीत्यग्रगाः सेनायाअग्रगाः सेनाग्रगाः । अन्तादिष्वपाठेपि "अन्यत्रापिदृश्यते" इतिडप्रत्ययः । तान् पञ्च पिङ्गलनेत्रप्रमुखान् । जंबुमालिप्रमुखान्सप्तमन्त्रिसुतानपिहत्वा । शूरं अक्षं अक्षकुमारं रावणद्वितीयपुत्रं । निष्पिष्य चूर्णीकृत्य । ग्रहणं इन्द्रजित्प्रयुक्तब्रह्मास्त्रेणबन्धनं । समुपागमत् प्राप्तः ॥ ७३ ॥ अस्त्रेणेत्यादिश्लोकद्वयमेकान्वयं । वीरः सुरासुराप्रधृष्यरावणपालितलंकाप्रधर्षणादिना प्रख्यातवीर्यः । महाकपिः स्वयमक्षतएवानेकराक्षसहननक्षमइत्यर्थः । पैतामहात् पितामहदत्तात् वरात् । आत्मानं यदृच्छया प्रयत्नंविना । अस्त्रेण ब्रह्मास्त्रेण । उन्मुक्तं परित्यक्तं । ज्ञात्वा यन्त्रिणः आत्मानंरज्ज्वयन्त्रेणबद्धाइतस्ततःकृषतइत्यर्थः । राक्षसान् मर्षयन् तदपराधान्क्षममाणइत्यर्थः । मैथिलीं मिथिलराजसुतांसीतांऋते विना । कुलप्रभावात्तन्मात्रमदग्ध्वा । लङ्कांपुरींदग्ध्वा । रामाय प्रियं सीतादर्शनप्रियं । आख्यातुं वक्तुंपुनरायात् ॥ ७४ ॥ ७५ ॥ अमेयात्मा अपरिच्छेद्यबुद्धिः । सः हनुमान् । महात्मानं सीतावियोगज्वरेप्यवार्यधैर्यं । रामं । अभिगम्य आभिमुख्येनप्राप्य । अनेन हनुमतःकृतकार्यत्वंद्योतितं । प्रदक्षिणंचकृत्वा । सीता तत्त्वतो यथावत् । दृष्टेति । न्यवेदयत् अकथयत् । सीतादृष्टेतिवक्तुंशक्यत्वेपि दृष्टासीतेत्युक्तिः रामस्यसीतादर्शनजीवनादिविषयसंशयोमाभूदितीतिवदन्ति । अन्येतु अदृष्टेतिप्रतिभासेतेति दृष्टेत्युक्तभिति । अपरेतु संतोषातिशयप्रकटनाय प्रथमंकृतकार्यनिर्देशइति ॥ ७६ ॥ अथयुद्धकाण्डकथांसंगृह्णाति—ततइत्यादि । ततः हनुमद्वाक्यश्रवणानन्तरं । सुग्रीवसहितः सन् । महोदधेः शतयोजनविस्तीर्णसिन्धोः तीरंगत्वा । आदित्यसंनिभैः शरैः । समुद्रं मार्गदानेऽउदासीनं क्षोभयामास आपातालमाकुलीचकार ॥ ७७ ॥ सरितां नदीनांपतिः । अनेन रामकोपशान्तये कालीयइवसमुद्रःसपत्नीकःसमागतइतिध्वन्यते । समुद्रः आत्मानं निजरूपं । दर्शयामास । रामायेतिशेषः । समुद्रवचनादेव नलं सेतुमकारयच्च नलेनसेतुं कारयामास । "हृक्रोरन्यतरस्यां" इतिप्र-

तीर्थी० ब्रह्मास्त्रस्यअमोघतयाबन्धनमात्रंपञ्चघटिकानन्तरंतन्मोक्षश्चभवतीतिब्रह्मणाहनूमतेवरोदत्तः ॥ ७४ ॥ शिरो० चकारात्स्वापराधक्षमापनवचनंसमुच्चारयामासेत्यर्थः ॥ ७८ ॥

[पा०] १. झ. गृहीत्वाप्रत्यभिज्ञानंप्रवृत्तिंविनिवेद्यच ।

तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे । रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥ ७९ ॥
तामुवाच ततो रामः परुषं जनसंसदि । अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥ ८० ॥
ततोऽग्निवचनात्सीतां ज्ञात्वा विगतकल्मषाम् । बभौ रामः संप्रहृष्टः पूजितः सर्वदैवतैः ॥ ८१ ॥
कर्मणा तेन महता त्रैलोक्यं सचराचरम् । सदेवर्षिगणं तुष्टं राघवस्य महात्मनः ॥ ८२ ॥
अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् । कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ ८३ ॥

योज्यकर्तुःकर्मत्वं ॥ ७८ ॥ रामस्तेन सेतुना लङ्कांपुरीं गत्वा । आहवे युद्धे । रावणंहत्वा सीतांप्राप्य । अनु पश्चात् । परां अतिशयितां । व्रीडां लज्जां । उपागमत् । पौरुषनिर्वहणायरिपुहननपूर्वकंसीतापुनःप्राप्ता परगृहस्थितांकथंअङ्गीकरिष्यामीतिलोकापवादशङ्कया लज्जितोभूदित्यर्थः ॥ ७९ ॥ ततः व्रीडाप्राप्तेर्हेतोः । "यत्तद्यतस्ततोहेतौ"इत्यमरः । तां तादृशपातिव्रत्यां सीतां । जनसंसदि देवादिसभायां । परुषं वचनमुवाच । "अकथितंच" इति द्विकर्मकत्वं । जनसंसदीत्यनेन प्रत्ययोत्पादनार्थं शपथंकुर्वितिसूचितं । सती पतिव्रतासीता । अमृष्यमाणा रामोक्तपरुषवचनमसहमाना । ज्वलनं लक्ष्मणानीतमग्निं विवेश ॥ ८० ॥ "ततोऽग्निवचनात्सीतांज्ञात्वाविगतकल्मषां । बभौरामःसंप्रहृष्टःपूजितःसर्वदैवतैः"इत्येवक्रमः । अन्यस्तुलेखकप्रमादकृतः । ततः अग्निप्रवेशानन्तरं । अग्निवचनात्सीतां विगतकल्मषां करणत्रयेपिदोषगन्धरहितां । ज्ञात्वा रामः संप्रहृष्टःसन् । बभौ सर्वदैवतैःपूजितश्चबभूव । अहोरामस्यधर्मापेक्षितेतिस्तुतोऽभूदित्यर्थः ॥ ८१ ॥ महात्मनो महास्वभावस्यराघवस्य । तेनकर्मणा रावणवधेन । सचराचरं स्थावरजंगमसहितं सदेवर्षिगणं । त्रैलोक्यं त्रिलोकी । स्वार्थेष्यञ् । तुष्टं संतुष्टमासीत् । स्थावरस्यसंतोषः पल्लवोद्गमादिनाऽवगम्यते । "अन्तःसंज्ञाभवन्त्येते" इतिविष्णुपुराणं ॥ ८२ ॥ यद्यपि सीतासमागमात्पूर्वंविभीषणाभिषेकः तथाप्यत्रक्रमोनविवक्षितइतिज्ञेयं । रामः । विभीषयतीति विभीषणः । नन्द्यादित्वाल्ल्युः । शत्रुभयंकरइत्यर्थः । तं लङ्कायांचाभिषिच्य । समुद्रतीरेभिषेकःसमुच्चीयते । यद्वा चोऽवधारणार्थः । अभिषिच्यैवकृतकृत्यः नतुरावणंहत्वैव । लङ्कायांविभीषणमभिषिच्य स्नुहिवनंछित्त्वासहकारंस्थापयित्वेतिवत् । यद्वा चोऽन्वाचये । प्रधानतयाऽपवर्गमनुगृह्य आनुषङ्गिकतयाराज्येभिषिच्येत्यर्थः । "शरीरारोग्यमर्थांश्चभोगांश्चैवानुषङ्गिकान् । ददातिध्यायतांपुंसामपवर्गप्रदोहरिः" इतिवचनात् । अभिषिच्य तदा रामः । अभिषेकात्पूर्वंकथंस्यादितिविवर्णोऽभूत् । अथ रमणीयोभूत् तदारामोरामोऽभूत् । विज्वरः भरतोयथाराज्यंनस्वीकृतवान् तथाऽयमपिचेत् किंकुर्यामितिपूर्वंज्वरोऽभूत् । सइदानींनिवृत्तइत्यर्थः । यद्वा नागपाश-

शिरो० सती सतीभिःपतिव्रताभिःईयतेमनसाप्राप्यते स्वसतीत्वनिर्वाहार्थंनित्यंस्मर्यतइत्यर्थः ॥ ८० ॥ **तिल०** ततः अग्निवचनात् "विशुद्धभावांनिष्पापांप्रतिगृह्णीष्वराघव" इत्येवंरूपात् । विगतकल्मषां निष्पापां । स्वयं ज्ञात्वा लोकस्यचतथात्वं प्रत्याय्य सीतामङ्गीचकारेतिशेषः । क्वचित्तु "अग्रहीदमलांरामोवचनाद्बगुरोस्तदा" इतिपठ्यते । तत्रामलामितिपुनरुक्तमापद्यते । तेनकर्मणा सीताप्रत्यायनान्तेनकर्मणा । ऋषिदेवगणसहितंचराचरप्रजासहितंत्रैलोक्यंतुष्टंतुतोष । तत्संतोषेणचप्रहृष्टः संतोषवशादेवसर्वदैवतैः पूजितश्चरामोबभौ । अत्रकेचित् अचराणांवृक्षादीनांरावणकृतपीडापरिज्ञानाभावेनरावणवधजन्यसंतोषाभावात्एवंव्याचक्षते । देवऋषिगणं इतिपाठः "ऋत्यकः" इतिप्रकृतिभावः । तत्रदेवगणाइन्द्रादयः ऋषिगणाविश्वामित्रादयः एतद्रूपंयत्त्रैलोक्यंसचराचरं । अत्रचरप्रजाः गतिभक्षणमात्रप्रधानास्तिर्यक्स्रोतसः पशुपक्ष्यादयः ऐरावतादयः । अचरप्रजाः चरप्रजाभिन्नाः ज्ञानयुक्तप्रजाअवाक्स्रोतसोमनुष्याः । एवंचस्वस्वशेषतिर्यगवाक्स्रोतोयुतदेवऋषिगणरूपंत्रैलोक्यंतुष्टं । रावणस्यमर्त्यापेक्षित्वात्प्राधान्येनदेवर्षिग्रहणमिति । **शिरो०** विगतकल्मषां कल्मषसंबन्धशून्यांसीतां । ज्ञात्वा जनानूबोधयित्वा स्वीचकारेतिशेषः । श्लोकद्वयंसंमिलितान्वयि । विगतकल्मषांबोधयित्वेत्यनेन रामस्यलोकापवादभीरुत्वंबोधितं । तेनरघुनाथेसौशील्यगुणोव्यक्तः । सर्वदैवतैः पूजितइत्यनेन यदिसर्वदैवतैःपूजितस्तर्हिमनुष्यादिभिःपूजितइतिकिंवक्तव्यमितिकाव्यार्थापत्तिरलंकारोव्यक्तः । ज्ञात्वेत्यत्रान्तर्भावितोणिच् ॥ ८१ ॥ ॥ ८२ ॥ **तनि०** प्रधानाभिलषितकैङ्कर्यसाम्राज्यलाभेनयदिलङ्कैश्वर्यमनभ्युपगतंस्यात्तदा "अहंहत्वादशग्रीवंसप्रहस्तंसबान्धवम् । राजानंत्वांकरिष्यामिलङ्कायांराक्षसेश्वर ।" इतिकृताप्रतिज्ञाविफलास्यादितिमहाज्वरःप्रवृत्तः सइदानींनिवृत्तइतिप्रमुमोद ॥ ८३ ॥

[**पा०**] १. ङ. ट. कर्मणातेनमहतात्रैलोक्यंसचराचरम् । सदेवर्षिगणंतुष्टं राघवस्यमहात्मनः । बभौरामःसंप्रहृष्टःपूजितः सर्वदैवतैः ।

देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् । अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः ॥८४॥
भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः । भरतस्यान्तिकं रामो हनूमन्तं व्यसर्जयत् ॥ ८५ ॥
पुनराख्यायिकां जल्पन्सुग्रीवसहितस्तदा । पुष्पकं तत्समारुह्य नन्दिग्रामं ययौ तदा ॥ ८६ ॥
नन्दिग्रामे जटां हित्वा भ्रातृभिस्सहितोऽनघः । रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥८७॥
प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः । निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ॥ ८८ ॥

प्रभृतिषु " यन्मयानकृतोराजाराक्षसानांविभीषणः । तत्त्वमिथ्याप्रलप्तंमांप्रधक्ष्यतिनसंशयः" इति योयमन्तस्तापः सइदानींनिवृत्तइत्यर्थः । नकेवलंविज्वरः प्रमुमोदच प्रकर्षेणमोदंप्राप्तश्च । चक्षिङोङित्करणादनित्यमनुदात्तेतआत्मनेपदत्वं । अतोऽत्रपरस्मैपदप्रयोगः । अनेनरामस्यरावणवधसीताप्राप्ती आनुषङ्गिकफले । स्वाश्रितविभीषणाभिषेचनमेव परमपुरुषार्थइत्यवगम्यते । यद्वा । वौ पक्षिणिजटायुषि ज्वरोयस्यसः । यथालोकेकस्यचित्पुत्रस्योत्सवे कथंचिन्मोदमानोपिपिता पूर्वातीतपुत्रस्मरणात्संतप्तएवभवति । एवंसर्वलोकपितास्वामीच विभीषणाभिषेकसमये विनाभिषेकमतीतंजटायुषंस्मरन् किंचिदन्तस्तापोपपन्नएवमुमुदइत्यर्थः । यद्वा । विज्वरइत्यनिष्टनिवृत्तिरुक्ता । प्रमुमोदेतीष्टप्राप्तिः । हेति प्रसिद्धौ विस्मयेवा । हन्त रामस्यसत्यप्रतिज्ञत्वमित्यर्थः ॥ ८३ ॥ रामः । देवताभ्यः रामविजयश्लाघनायागताभ्यः । वरंप्राप्य तेनवरेण । वानरान् रणेमृतान् । समुत्थाप्य सुप्तानिवोत्थाप्य । सुहृद्भिः सुग्रीवविभीषणादिभिर्वृतःसन् । पुष्पकेण कुबेरंविजित्यरावणेनसमानीतेनपुष्पकाख्यविमानेन । अयोध्यांप्रति प्रस्थितः ॥८४॥ सत्यपराक्रमः सत्यविषयपराक्रमवान् । रामइति क्रियाभेदाद्द्विरुक्तिः । भरद्वाजाश्रमंगत्वा । भरतस्यान्तिकं समीपंप्रति । हनूमन्तं व्यसर्जयत् व्यसृजत् । हनूशब्दऊकारान्तोप्यस्ति । भरद्वाजेनात्र स्थातव्यमितिप्रार्थिते तद्दिवसेन चतुर्दशवर्षपूर्तेः पूर्णेचतुर्दशेवर्षेआगमिष्यामीतिभरतंप्रत्युक्तेःसत्यत्वरक्षणाय हनूमन्तंप्रेरितवानितिभावः ॥ ८५ ॥ रामस्तत्पुष्पकं समारुह्य सुग्रीवसहितःसन् । तदा गमनकाले । आख्यायिकां पूर्ववृत्तकथां । "आख्यायिकोपलब्धार्था" इत्यमरः । पुनःपुनःजल्पन् कथयन् । अर्थात्भरतविषयाख्यायिकां सुग्रीवेणजल्पन्नितिगम्यते । नन्दिग्रामं भरतस्थानं । तदा तस्मिन्नेवकाले शीघ्रमित्यर्थः । ययौ प्राप ॥ ८६ ॥ अनघः सम्यगनुष्ठितपितृवचनः । यद्वा "शिरसायाचतस्तस्यवचनंनकृतंमया" इत्युक्तपापरहितइत्यर्थः । यद्वा । निरस्तसमस्तव्यसनः । "दुःखैनोव्यसनेष्वघं" इतिवैजयन्ती । रामः भ्रातृभिःसहितः । "कदान्वहंसमेष्यामिभरतेनमहात्मना । शत्रुघ्नेनचवीरेणत्वयाचरघुनन्दन" इत्युक्तमनोरथपूर्णइत्यर्थः । नन्दिग्रामे जटा हित्वा शोधयित्वा । उपलक्षणमेतत् । "विशोधितजटःस्नातश्चित्रमाल्यानुलेपनः । महार्हवसनोरामस्तस्थौ तत्रश्रियाज्वलन्" इत्युक्तरूपः । सीतामनुप्राप्य समीपेप्राप्य । "रामंरत्नमयेपीठेसहसीतंन्यवेशयत्" इत्याद्युक्तरीत्यादिव्यसिंहासनेसीतयाभिषेकंप्राप्येत्यर्थः । राज्यंपुनरवाप्तवान् । पितुर्वचनात्पूर्वप्राप्तंविशिष्यपुनरप्यप्राप्तमित्यर्थः ॥ ८७ ॥ रामस्यराज्यप्राप्तिकृतं लोकस्यातिशयंदर्शयति—प्रहृष्टेति । लोकः जनः । प्रहृष्टमुदितः तदानीमासीदितिशेषः । एवमुत्तरत्रापि । प्रहृष्टः संजातरोमाञ्चः । "हृषेर्लोमसु" इति अनिट्त्वविधानात् । मुदितइतितन्मूलसंतुष्टान्तःकरणत्वमुच्यते । तुष्टः समस्तकामलाभजनितप्रीतियुक्तः । यद्वा । "इच्छामोहिमहाबाहुंरघुवीरंमहाबलं । गजेनमहतायान्तंरामंछत्रावृताननं" इत्यभिलषितलाभउच्यते । पुष्टः "विषयेतेमहाराजरामव्यसनकर्शिताः । अपिवृक्षाःपरिम्लानाःसपुष्पाङ्कुरकोरकाः" इत्युक्तरामविर-

तिल० महत्यावानरसेनयासहअकस्माद्गमनेभरतादेःशङ्कामाभूदितितद्विसर्जनम् । **शिरो०** सत्यपराक्रमः सत्योध्वंसाप्रतियोगीपराक्रमोयस्य । किंच सत्याअयोध्या साऽस्याधारत्वेनयेषांतेसत्याअयोध्यावासिनः तान्नित्यंपिपर्तीतिसत्यपरः अतएवनक्रमते अयोध्यांपरित्यज्यनक्वचिद्गच्छतीत्यक्रमः सचासौसचेतिउभयपदविशेषणकर्मधारयः ॥ ८५ ॥ **तिल०** पुनरिति । पुष्पकादवतीर्णत्वात्पुनस्तत्पुष्पकंसमारुह्य ॥ ८६ ॥ **तीर्थी०** सीतामनुप्राप्य सीतासादृश्यंप्राप्य । मुनिवेषत्यागेनसीतामनुरूपः प्राप्येतियावत् ॥ **शिरो०** अनघः दूरीकृतदैवव्यसनः ॥ ८७ ॥ **तीर्थी०** एतदन्तंचरितंवृत्तत्वेनोपदिश्यदेवर्षिरतःपरंउत्तरकाण्डविषयंभविष्यत्त्वेनोपदिशति—**प्रहृष्टेति** ॥ ८८ ॥

न पुत्रमरणं किंचिद्द्रक्ष्यन्ति पुरुषाः क्वचित् । नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ॥८९॥
न चाग्निजं भयं किंचिन्नाप्सु मज्जन्ति जन्तवः । न वातजं भयं किंचिन्नापि ज्वरकृतं तथा ।
न चापि क्षुद्भयं तत्र न तस्करभयं तथा ॥ ९० ॥
नगराणि च राष्ट्राणि धनधान्ययुतानि च । नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा ॥ ९१ ॥
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः । गवां कोट्ययुतं दत्त्वा ब्रह्मलोकं प्रयास्यति ।
असङ्ख्येयं धनं दत्त्वा ब्राह्मणेभ्यो महायशाः ॥ ९२ ॥

हृजकार्श्यत्यागात्पुष्टः । सुधार्मिकः सुधर्मःरामभक्तिपूर्वकंकर्म तच्चरतीतिसुधार्मिकः । "धर्मंचरति" इति ठक् । "स्त्रियोवृद्धास्तरुण्यश्च" इत्युक्तधर्मफलभागित्यर्थः । निरामयः शारीररोगरहितः । अरोगः मानसव्याधिरहितः । दुर्भिक्षभयवर्जितः । भिक्षाणांव्यृद्धिःदुर्भिक्षं । व्यृद्धावव्ययीभावः । दुर्भिक्षात्भयं दुर्भिक्षभयं तेनवर्जितः । अनेन पूर्वंसीताविशिष्टरामवियोगे प्रजानामामयादिकमासीत् । तदिदानीं निवृत्तमित्युच्यते । प्रहृष्टेत्यादि रामाभिषेकदर्शनसंतोषोनवर्णयितुंशक्यइत्याहकविः प्रहृष्टमुदितोलोकस्तुष्टःपुष्टः इति । अथ प्रीतिकारितकैङ्कर्यसिद्धिं दर्शयति—सुधार्मिकइति । शोभनोधर्मः विशिष्टविषयकैङ्कर्यमेव । अथकैङ्कर्यविरोधिनिवृत्तिमाह—निरामयोह्यरोगश्चेति । कैङ्कर्योपकरणसमृद्धिमाह—दुर्भिक्षेति ॥ ८८ ॥ अथ वर्णाश्रमधर्मपरिपालनप्रधानामुत्तरकाण्डकथां संगृह्णाति—नपुत्रेत्यादि । केचिदपि पुरुषाः क्वचित् कुत्रापिदेशे किंचित् कादाचित्कमपि । पुत्रमरणं नद्रक्ष्यन्ति । नद्रक्ष्यन्तीत्यनेन ब्राह्मणपुत्रइव कदाचित्प्राप्तमपिपरिहरिष्यतीतिभावः । नार्यश्चाविधवाः नित्यंपतिव्रताश्च भविष्यन्ति । यद्वा । विविधाधवायासांताः विधवाव्यभिचारिण्यः । अव्यभिचारित्वेपि पत्यावप्यननुरागःकासांचित्स्यात्सनेत्याह—पतिव्रताइति । कौसल्यादयस्तु पुत्रवत्तयावृद्धतयाचनविधवाइतिभावः ॥ ८९ ॥ तत्र राज्ये तापत्रयगन्धोपिनभविष्यतीत्याह—नचेत्यादर्धत्रयं । अग्निजंभयं नकिंचित् नभविष्यति । जन्तवःनाप्सुमज्जन्ति । मङ्क्त्वानमरिष्यन्तीत्यर्थः । एवमाधिदैविकनिवृत्तिरुक्ता अथाध्यात्मिकादिनिवृत्तिमाह—नापिज्वरकृतंतथानचापिक्षुद्भयमिति । नतस्करभयमित्याधिभौतिकोपलक्षणं ॥ ९० ॥ तत्ररामराज्येअनिष्टनिवृत्तिमुक्त्वेष्टसिद्धिमाह—नगराणीति । नगराणिधनयुतानि राष्ट्राणिधान्ययुतानिचभविष्यन्ति । अतएव सर्वेनागरिकाजानपदाश्च यथाकृतयुगे तथात्रेतायामपि नित्यंप्रमुदिताभविष्यन्ति । "गत्यर्थाकर्मक—" इत्यादिनाकर्तरिक्तः ॥ ९१ ॥ एवं क्षत्रियासाधारणं प्रजापालनरूपंधर्ममुक्त्वा द्विजातिधर्मानाह—अश्वमेधेति । अर्धत्रयमेकान्वयम् । महायशाः प्रजापालनलब्धमहाकीर्तिः । अनेनद्रव्यशुद्धिरुक्ता । अश्वमेधशतैः अनेकाश्वमेधैः । "दशवर्षसहस्राणिवाजिमेधमुपाकरोत्" इति वक्ष्यमाणत्वात् । तथा बहुसुवर्णकैः बहुसुवर्णकाख्यक्रतुविशेषैश्च । "सुबहूनिसुवर्णानियत्रोपकरणत्वतः । विन्दतेसक्रतुःसद्भिःस्मृतोबहुसुवर्णकः" इतिवचनात् । एवमुत्तरक्रत्वनुष्ठानप्रदर्शनेन पूर्वंक्रतवोग्निष्टोमादयोपिह्यनुष्ठिताइतिसिद्धम् । गवांकोट्ययुतंदत्त्वा दशसहस्रकोटिपरिमिताःगाःब्राह्मणेभ्योदत्त्वा। ब्रह्मलोकं ब्रह्मणःस्वस्य लोकं अप्राकृतस्थानं परमपदं प्रयास्यति । अत्रमहायशाइत्यनेन यत्किंचिदपवादश्रवणमात्रेणसीतात्यागःसूचितः । दशवर्षसहस्राणिअश्वमेधानुष्ठानकालइत्युक्त्या सीतांविनैव क्रत्वनुष्ठानस्यवक्ष्यमाणत्वाच्च अभिषेकात्परं स्वल्पएव-

तिल० अविधवाः भर्त्रनुगमनात् धवांशपुत्रसद्भावाद्वा ॥ ८९ ॥ **तीर्थी०** असङ्ख्येयंधनंदत्वाब्रह्मलोकंप्रयास्यतीतियोजना । ब्रह्मैवलोकः तंपरमात्मस्वरूपं सगुणस्वब्रह्मणोविष्णोः स्वस्यलोकंवैकुण्ठाख्यंचप्रयास्यतीत्यर्थः । **तिल०** इष्ट्वादत्वेत्यादिस्वरूपकथनं नतुतेषांरामस्यस्वलोकप्राप्तिंप्रतिहेतुतेतिबोध्यम् । यत्तुकतककृता अश्वमेधाद्यनुष्ठानस्यमानुषोपाधिप्रयुक्तावर्ज्याधशमनद्वाराब्रह्मलोकप्राप्तौहेतुत्वमित्युक्तं तन्न । भगवदवताराणांपुण्यपापसंबन्धस्यसर्वतन्त्रविरुद्धत्वात् । अश्वमेधाद्यनुष्ठानंतु लीलामात्रं लोकोपदेशार्थेत्यन्यत्रविस्तरः । **शिरो०** विद्वद्भ्योब्राह्मणेभ्यः । विधिपूर्वकं यथाविधि । गवांकोट्ययुतंदत्वा । **विषम०** गवांकोट्ययुतं दशसहस्रोत्तरकोटिपरिमितागाः विद्वद्भ्योब्राह्मणेभ्यःविधिपूर्वकंदत्वाब्रह्मलोकंप्रयास्यतीत्युत्तरेणान्वयः ॥ ९२ ॥

[पा०] १. झ. ञ. ट. विद्वद्भ्योविधिपूर्वकं ।

राजवंशाञ्शतगुणान्स्थापयिष्यति राघवः । चातुर्वर्ण्यं च लोकेऽस्मिन्स्वे स्वे धर्मे नियोक्ष्यति ॥ ९३ ॥
दशवर्षसहस्राणि दशवर्षशतानि च । रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति ॥ ९४ ॥
इदं पवित्रं पापघ्नं पुण्यं वेदैश्च संमितम् । यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥ ९५ ॥
एतदाख्यानमायुष्यं पठन्रामायणं नरः । सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥ ९६ ॥

वर्षसहस्रकाले सीतावियोगइत्यवसीयते । अश्वमेधारंभश्च रावणवधरूपपापनिबर्हणार्थतयाप्रसक्तइत्यविलंबितः । ततःपूर्वमेवसीतावियोगः प्रथमाश्वमेधेसीताप्रतिरूपकरणात् । प्रतिकूल्यापियज्ञानुष्ठानस्यप्रामाणिकत्वंवक्ष्यतिदर्भशयनप्रकरणादौ ॥ ९२ ॥ एवं धर्मानुष्ठातृत्वमुक्त्वा धर्मप्रवर्तकत्वमाह—राजेति । अस्मिन्लोके राघवः राजवंशान् क्षत्रियवंशान् शतगुणान् शतगुणितान् । स्थापयिष्यति । शतगुणंविवृद्धान्राजवंशान् प्रत्येकंराज्यप्रदानेनपालयिष्यतीत्यर्थः । चत्वारोवर्णाः चातुर्वर्ण्यं । स्वार्थेष्यञ् । स्वेस्वे स्वस्ववर्णाश्रमोचिते । धर्मे । पूर्वादित्वात्सर्वनामत्वविकल्पः । नियोक्ष्यति प्रवर्तयिष्यति ॥ ९३ ॥ धर्मसंस्थापनातिशयप्रदर्शनायराज्यपरिपालनकालबहुत्वंदर्शयति—दशेति । दशवर्षसहस्राणिदशवर्षशतानिच । एकादशसहस्रसंवत्सरानित्यर्थः । उपासित्वा उपास्य । वाछन्दसीतिवक्तव्ये "क्त्वापिच्छन्दसि" इतिप्रयोगादनित्योल्यबादेशः । सान्त्वपूर्वंजनानुवर्तनेनपरिपाल्येत्यर्थः । अत्यन्तसंयोगेद्वितीया । राज्यपालनेव्यासङ्गाभावोदर्शितः । ब्रह्मलोकं वैकुण्ठं । गमिष्यति ॥ ९४ ॥ अथैतत्पठनस्यमोक्षसाधनत्वमाह—इदमिति । पूयतेनेनेति पवित्रं । "कर्तरिचर्षिदेवतयोः" इतिकरणेइत्रप्रत्ययः । परिशुद्धिसाधनमित्यर्थः । नकेवलंशुद्ध्यापादकं किंतुपापघ्नं । "अमनुष्यकर्तृकेच" इतिटक्प्रत्ययः । पुण्यं लाङ्गलंजीवनमितिवत् पुण्यसाधनं । अनेनप्रायश्चित्तव्यावृत्तिरुक्ता । तद्धि पापमेवनिवर्तयति । उक्तार्थत्रयेहेतुमाह—वेदैश्चसंमितमिति । सर्ववेदसदृशमित्यर्थः । इदंरामचरितं संक्षेपरूपं । यःपठेत् वेदवत्सनियमंप्रतिदिनंपठेत् । ससर्वपापैः पूर्वोत्तराद्यैः । प्रमुच्यते । तदुक्तं रामोपनिषदि "ब्रह्महत्यासहस्राणिवीरहत्याशतानिच । स्वर्णस्तेयसुरापानगुरुतल्पायुतानिच । कोटिकोटिसहस्राणिउपपातकजान्यपि । सर्वाण्यपिप्रणश्यन्तिरामचन्द्रस्यकीर्तनात्" इति ॥ ९५ ॥ एवं रामचरितपाठस्यमोक्षंफलमुक्त्वा आनुषङ्गिकफलोक्तिपूर्वकं तस्यसंबन्धिसंबन्धपर्यन्ततामाह—एतदिति । आयुः प्रयोजनमस्य आयुष्यं । "स्वर्गादिभ्योयद्वक्तव्यः" इति यत्प्रत्ययः । आख्यानं आख्यायिकारूपं । एतद्रामायणं बालरामायणं । रामस्यायनं रामायणं । अयगतावितिधातोर्भावेल्युट् । रामचरितमित्यर्थः । रामः अय्यते प्राप्यतेअनेनइतिवा रामायणं । रामः अयनं प्रतिपाद्योयस्येतिवा रामायणं । "पूर्वपदात्संज्ञायामगः" इतिणत्वम् । पठन्नरः वर्णाश्रमादिनियमंविना योपिकोपि । सपुत्रपौत्रः दशपूर्वापरसहितइत्यर्थः । सगणः सभृत्यबन्धुः । प्रेत्य आत्यन्तिकशरीरनाशंप्राप्य । स्वर्गे परमपदे । "तस्याऽ हिरण्मयःकोशःस्वर्गोलोकोज्योतिषावृतः" इतितस्मिन्स्वर्गशब्दप्रयोगात् । विमुक्तसर्वपापंप्रति स्वर्गमात्रस्याफलत्वाच्च । महीयते पूज्यते । "तंपञ्चशतान्यप्सर-

तनि० राज्येनखलुरामःस्वयमुपास्यःस्वयमलन्तानुकूल्याचरणेनराज्योपासनंचकारेतिसौशील्यमुक्तं । **तिल०** अवतारत्यागकालमाह—**दशेति** । उपासित्वा नित्यवदनुष्ठायेत्यर्थः । ब्रह्मलोकं मायिकंवैकुण्ठादिलोकं । अनेननिजनित्यकर्मयोगोपेतस्यैवसाक्षात्परंपरयावाब्रह्मलोकप्राप्तिरितिध्वनिः । **शिरो०** दशवर्षसहस्राणिदशसङ्ख्यागुणितानिवर्षसहस्राणि त्रिसहस्रसङ्ख्यासङ्ख्यातवर्षाणि त्रिंशत्सहस्रवर्षाणीत्यर्थः । दशवर्षशतानिच दशसङ्ख्यागुणितानिवर्षशतानिशतत्रयवर्षाणि सहस्रत्रयवर्षाणीत्यर्थः । एवंचत्रयस्त्रिंशत्सहस्रवर्षाणिराज्यंरामोनित्यरमणशीलः उपासित्वाकृत्वेत्यर्थः । ल्यबभावआर्षः । आब्रह्मलोकं अः विष्णुः आः प्रजापतिः ब्रह्मशिवः त्रैलोक्यतेहृदिनित्यंस्मर्यतेतेतत् । किंच ब्रह्माभिन्नंलोकंआनन्दघनं अप्रकटायोध्यापुरंप्रयास्यतिप्राप्स्यति । अप्रकटतयातत्रैवस्थास्यतीत्यर्थः । अत्रप्रशब्दोपादानेनतत्परिकराणामपितादृक्स्थितिरितिव्यञ्जितम् । बहुवचनान्तसहस्रशब्देनबहुवचनान्तशतशब्देनच सहस्रत्रयशतत्रयलाभः कपिञ्जलाधिकरणन्यायेनावगन्तव्यः । एकसहस्रैकशतार्थकत्वंतुनोपपद्यते तयोर्बहुवचनान्तत्वात् । "विंशत्याद्याःसदैकत्वे" इत्यनुशासनेनैकशेषमन्तराबहुवचनान्तत्वस्यदुर्लभत्वात् । अतएव "त्रयोदशाब्दसाहस्रंब्रह्मचर्यमखण्डितं" इति ॥ ९४ ॥

[पा०] १- च—ट. प्रयास्यति ।

पठन्द्विजो वागृषभत्वमीयात्स्यात्क्षत्रियो भूमिपतित्वमीयात् । वणिग्जनः पण्यफलत्वमीयाज्जनश्च शूद्रोपि महत्त्वमीयात् ॥ ९७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे श्रीमद्रामायणकथासंक्षेपोनाम प्रथमः सर्गः ॥ १ ॥

सांप्रतिधावन्तिशतंमालाहस्ताःशतंचूर्णहस्ताः'' इतिश्रुतेः ॥ ९६ ॥ अथ चातुर्वर्ण्यव्यतिरिक्तस्यनाधिकारइतिसूचयन्वर्णविशेषनियतानिफलानिदर्शयति— पठन्निति । स्यादित्येतदव्ययंयद्यर्थे । इदंबालरामायणं पठन् द्विजोयदि । वागृषभत्वं वाचिश्रैष्ठ्यं वेदवेदाङ्गपारगत्वं । ईयात् प्राप्नुयात् । ईगताविल्यस्माद्धातोःलिङ् । पठन् क्षत्रियोयदि भूमिपतित्वं चक्रवर्तित्वमीयात् । पठन् वणिग्जनोयदि पण्यफलत्वमीयात् । पणंमूल्यंतदर्हतीतिपण्यं क्रयविक्रयार्हवस्तु तदेवफलं लाभोयस्य स पण्यफलः । तस्यभावः पण्यफलत्वं । ''पणोद्यूतादिषूत्सृष्टेभृतौमूल्येधनेपिच '' इत्यमरः । पणशब्दादर्हार्थेयत्प्रत्ययः । ''अवद्यपण्य—'' इत्यादिना पणतेर्यत्प्रत्ययान्तोनिपातोवा । पठन् शूद्रोपि जनोयदि महत्त्वं स्वजातिश्रेष्ठत्वमीयात् । यद्वा । स्यादित्येतदल्पार्थेऽव्ययं । स्यात्क्षत्रियः अल्पनृपतिः । भूमिपतित्वं अखण्डभूमण्डलेश्वरत्वमीयात् । एवमल्पब्राह्मणइत्यादि नेयम् । यद्वा स्याच्छब्दः कथंचिदर्थेनिपातः । ''स्यादस्तिस्यान्नास्ति—'' इत्यादिसप्तभङ्गीव्याख्याने तथोक्तत्वात् । तथाच कथंचित्पठन् शास्त्रोक्तनियमंविनापिपठन्नित्यर्थः । एकदेशंपठन्नितिवा । अथवा वागृषभत्वादिकमीयात् । स्याच सत्तांलभेतचेति सर्वसाधारणंसत्तालाभरूपंफलं । ''अस्तिब्रह्मेतिचेद्वेद । सन्तमेनंततोविदुः'' इतिश्रुतेः । कश्चित् ''स्यात्प्रबन्धेचिरातीते'' इतिवचनात् स्याच्छब्दःप्रबन्धपरइत्याह । तदज्ञानविजृंभितं । ''स्यात्प्रबन्धेचिरातीतेनिकटागामिकेपुरा'' इति वाक्यशेषात् पुराशब्दस्यनानार्थत्वंहितत्रोच्यतइति । यद्यपि ''श्रावयेच्चतुरोवर्णान्कृत्वाब्राह्मणमग्रतः'' इतिशूद्रस्येतिहासपुराणयोःश्रवणमात्रंस्मृतिभिरनुज्ञातं नतु पठनं । तथापि ''पठन्'' इत्यादिऋषिवचनप्रामाण्यात् ''वचनाद्रथकारस्य'' इतिन्यायेनास्मिन्संक्षेपपाठमात्रेधिकारोस्तीतिसिद्धं । तथा सहस्रनामाध्यायान्तेचदृश्यते ''यइदंशृणुयान्नित्यंयश्चापिपरिकीर्तयेत्'' इत्यारभ्य ''वेदान्तगोब्राह्मणःस्यात्क्षत्रियोविजयीभवेत् । वैश्योधनसमृद्धःस्याच्छूद्रःसुखमवाप्नुयात्'' इति । यद्वा वेदोपबृंहणेशूद्रस्यसर्वथाऽनधिकारात् शूद्रइत्यत्र पठन्नितिनानुषज्यते किंतु शृण्वन्नित्यध्याह्रियते । ''शृण्वन्रामायणंभक्त्या'' इतिश्रवणस्यापिमहाफलत्ववचनात् । अत्रसंक्षेपे तकारेणोपक्रम्य यादितिसमापनात् गायत्रीरूपत्वमस्यगम्यते । अत्रश्लोके उपजातिवृत्तं । ''स्यादिन्द्रवज्रातजास्ततोगौ'' । ''उपेन्द्रवज्राजतजास्ततोगौ'' । ''अनन्तरोदीरितलक्ष्मभाज :पादायदीयाउपजातयस्ताः'' इतिलक्षणात् ॥९७॥ प्रथमसर्गमुपसंहरति—इतीति । ऋषिणाप्रोक्तमार्षं ''तेनप्रोक्तं'' इत्यण् । श्रीमद्रामायणे श्रीमद्रामायणाख्ये । आदिकाव्ये प्रथमकाव्ये । बालकाण्डे संक्षेपोनाम प्रथमःसर्गः । समाप्तइतिशेषः । काव्यलक्षणंसर्गलक्षणंचोक्तंदण्डिनाकाव्यादर्शे ''नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः । उद्यानसलिलक्रीडामधुपानरतोत्सवैः । विप्रलंभैर्विवाहैश्चकुमारोदयवर्णनैः । मन्त्रद्यूतप्रयाणाजिनायकाभ्युदयैरपि । अलंकृतमसंक्षिप्तंरसभावनिरन्तरं । सर्गैरनतिविस्तीर्णैःश्राव्यवृत्तैः सुसन्धिभिः । सर्वत्रभिन्नवृत्तान्तैरुपेतं लोकरञ्जनं । काव्यंकल्पान्तरस्थायिजायतेसदलंकृति'' इति ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने प्रथमः सर्गः ॥१॥

द्वितीयः सर्गः ॥ २ ॥

वाल्मीकिना सादरपूजितेनारदे ब्रह्मलोकंप्रति प्रस्थिते शिष्येणभारद्वाजेनसह स्नानायतमसातीरंगतेनतेन तत्र क्रौञ्चमिथुनदर्शनम् । १ ॥ व्याधेन क्रौञ्चमिथुने पुंसोवधे वाल्मीकिना तंप्रति मानिषादेत्यादिशापवचनोक्तिः । २ ॥ तथा पश्चाद्विमर्शेन स्वोक्तशापवचनस्यानुष्टुप्छन्दोबद्धश्लोकरूपत्वावधारणम् । ३ ॥ तदनु सविस्मयं शिष्येतन्निवेद्य माध्याह्निकमज्जनादिकरणपूर्वकं पुनस्स्वाश्रमंप्रत्यागमनम् । ४ ॥ तदनु वाल्मीक्याश्रममुपागतेनब्रह्मणा तंप्रति रहस्यप्रकाशरूपश्रीरामादिनिखिलवृत्तान्तप्रतिभानरूपवरदानेन श्रीरामायणप्रणयनप्रेरणापूर्वकं स्वलोकगमनम् । ५ ॥

नारदस्य तु तद्वाक्यं श्रुत्वा वाक्यविशारदः ॥ पूजयामास धर्मात्मा सहशिष्यो महामुनिः ॥ १ ॥
यथावत्पूजितस्तेन देवर्षिर्नारदस्तदा ॥ आपृष्ट्वैवाभ्यनुज्ञातः स जगाम विहायसम् ॥ २ ॥
स मुहूर्तं गते तस्मिन्देवलोकं मुनिस्तदा ॥ जगाम तमसातीरं जाह्नव्यास्त्वविदूरतः ॥ ३ ॥

श्रीमच्छठारिगुरुणागुरुणोपदिष्टंरामायणस्यहृदयंसरसंगृहीत्वा ॥ श्रीकौशिकान्वयकुलेन्दुरशेषबन्धुर्गोविन्दराजविबुधोविशदीकरोति ॥ १ ॥ अथपरमकारुणिकोवाल्मीकिः "इष्टंहिविदुषांलोकेसमासव्यासधारणं" इत्युक्तरीत्यासंक्षेपेणोक्तंरामचरित्रंपुनर्विस्तरेणप्रतिपिपादयिषुः तत्रप्रेक्षावत्प्रवृत्त्यर्थं वक्तृवैलक्षण्यंप्रबन्धवैलक्षण्यंप्रतिपाद्यवैलक्षण्यंचेति वैलक्षण्यत्रयंनिदिदर्शयिषुः वक्तृवैलक्षण्यंतावदादौदर्शयति नारदस्येत्यादिनाद्वितीयसर्गेण । वक्तृवैलक्षण्यंतु परमाप्तत्वं । आप्तत्वंच यथार्थदर्शित्वेसति यथार्थवादित्वं । तस्यपरमत्वं तु पितामहवरप्रसादलब्धत्वं तदेतदुपदर्शयितुमुपोद्घातत्वेनाह—नारदस्येत्यादि । तुशब्दोवैलक्षण्यपरः । "तुःस्याद्भेदेऽवधारणे" इत्यमरः । सचकाकाक्षिन्यायेनोभयत्रान्वेति । त्रिलोकज्ञतयेतरविलक्षणस्यनारदस्य शब्दतोर्थतश्चेतरवाक्यविलक्षणोत्कर्षं । तत् पूर्वसंक्षेपरूपेणोक्तं । वाक्यं संपूर्णार्थप्रतिपादकपदसमूहं प्रश्नानुरूपोत्तरं । श्रुत्वा निशम्य । वाक्ये विशारदो विद्वान् । "विद्वत्सुप्रगल्भौविशारदौ" इत्यमरः । वाक्यविशेषज्ञइत्यर्थः । धर्मेआत्माबुद्धिर्यस्यासौ धर्मात्मा । धर्मस्वभावो वा । अत्र प्रकरणाद्गुर्वनुवर्तनधर्मज्ञइत्यर्थः । महामुनिः वेदान्तार्थनिर्णयसंपत्त्यासर्वोत्कृष्टमुनिर्वाल्मीकिः । सहशिष्यः शिष्यसहितःसन् । "वोपसर्जनस्य" इति पक्षे सहशब्दस्यसभावाभावः । पूजयामास अहोवाक्यवैखरीतितद्वाक्यंश्लाघयामासेतिवाक्यविशारदत्वोक्तिभङ्ग्याऽवगम्यते । महामुनिमितिपाठे वाल्मीकिपदाध्याहारः । तमितिप्रयोक्तव्ये अन्यत्वप्रतीतिकरमहामुनिपदप्रयोगास्वारस्यं ॥ १ ॥ देवश्चासौऋषिश्च देवर्षिः नारदः । "नारदाद्याःसुरर्षयः" इत्युक्तेः । तेन वाल्मीकिना । यथावत् यथार्हं । पूजितः प्रदक्षिणनमस्कारादिभिरर्चितःसन् । तदा पूजावसाने । आपृष्ट्वा आपृच्छ्य । "क्त्वापिछन्दसि" इतिल्यबभावः । अभ्यनुज्ञातः गच्छत्वमितिवाल्मीकिनाकृताभ्यनुज्ञानः । विहायसं आकाशं जगाम ॥ २ ॥ तस्मिन् नारदे । मुहूर्तं अल्पकालं । "मुहूर्तमल्पकालेस्यात्" इतिनिघण्टुः । अत्यन्तसंयोगेद्वितीया । देवलोकं ब्रह्मलोकं । गते वाल्मीकेरामभक्तिंब्रह्मणेकथयितुंप्राप्तेसति । समुनिः वाल्मीकिः । तदा नारदगमनोत्तरकाले । जाह्नव्याः गङ्गायाः । अविदूरतः समीपे । सप्तम्यर्थेतसिः । स्थितमितिशेषः । तु गङ्गातोपिविलक्षणं । तमसातीरं जगाम माध्याह्निकाभिषेकायप्राप्तः ॥ ३ ॥

तिल० वाक्यविशारदः विशिष्टा व्याकरणसंस्कारादिविशेषवतीविचित्रार्थाचशारदावाणीयस्यसःविशारदः । **शिरो०** धर्मात्मा धर्मेआत्मायत्नोयस्य परमधर्मोपदेष्टेत्यर्थः । तत् वाङ्मनसागोचरेश्वरेश्वरबोधकं । वाक्यं । **विषम०** महामुनिं शतकोटिविस्तररामायणमननशीलं । नारदंपूजयामास । १ ॥ **तिल०** मुहूर्तंस्वाश्रमेस्थित्वापश्चान्माध्याह्निकार्थं जाह्नव्याअविदूरतःसमीपेवर्तमानं तमसातीरंजगाम । यत्तु मुहूर्तमात्रेण देवलोकंगतइत्यन्वयइति तन्न । छान्दसत्वकल्पनेमानाभावात् अव्ययत्वकल्पनस्यागतिकगतिकत्वाच्च । ३ ॥

[पा०] १ घ. ङ. ध्यैर्मे. २ ङ. च. ज. मुनिम्. ३ ङ. च. छ. ज. झ. ञ. पृच्छ्यै. ४ ग. जगामच. ५ च. हूर्ते.

स तु तीरं समासाद्य तमसाया मुनिस्तदा ॥ शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम् ॥ ४ ॥
अकर्दममिदं तीर्थं भरद्वाज निशामय ॥ रमणीयं प्रसन्नांबु सन्मनुष्यमनो यथा ॥ ५ ॥
न्यस्यतां कलशस्तात दीयतां वल्कलं मम ॥ इदमेवावगाहिष्ये तमसातीर्थमुत्तमम् ॥ ६ ॥
एवमुक्तो भरद्वाजो वाल्मीकेन महात्मना ॥ प्रायच्छत मुनेस्तस्य वल्कलं नियतो गुरोः ॥ ७ ॥
स शिष्यहस्तादादाय वल्कलं नियतेन्द्रियः ॥ विचचार ह पश्यंस्तत्सर्वतो विपुलं वनम् ॥ ८ ॥
तस्याभ्याशे तु मिथुनं चरन्तमनपायिनम् ॥ ददर्श भगवांस्तत्र क्रौञ्चयोश्चारुनिस्स्वनम् ॥ ९ ॥
तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः ॥ जघान वैरनिलयो निषादस्तस्य पश्यतः ॥ १० ॥
तं शोणितपरीताङ्गं वेष्टमानं महीतले ॥ भार्या तु निहतं दृष्ट्वा रुराव करुणां गिरम् ॥ ११ ॥

समुनिः तमसायाविलक्षणंतीरमासाद्य । तदा आसादनकाले । अकर्दमं अपङ्कं । तीर्थं जलावतरणं । " तीर्थमन्त्राद्युपाध्यायशास्त्रेष्वंबुनिपावने । पात्रोपायावतारेषु " इतिवैजयन्ती । दृष्ट्वा पार्श्वेस्थितं शिष्यं आह ॥४॥ भरद्वाजइतिवाल्मीकेःप्रधानशिष्यस्यनाम । हेभरद्वाज । अकर्दमं अपङ्कं । अधःप्रदेशेपङ्करहितमित्यर्थः । अन्यत्र पापरहितं । प्रसन्नांबु प्रसन्नसलिलं । लोकेकिंचिदधःपङ्करहितत्वेपिजलंकलुषमेवभवति । किंचिन्निर्मलोदकत्वेप्यधःसपङ्कमेवदृश्यते नतथेदमितिभावः । अन्यत्रांबुवत्प्रसन्नं । अतएवरमणीयं । सन्मनुष्यमनोयथा सत्पुरुषहृदयसदृशमिदंतीर्थं । निशामय पश्य । " शमोऽदर्शने " इतिमित्वाभावाद्दर्शनार्थोऽयंशब्दः । सन्मनुष्यमनोवत्प्रसन्नांब्वितिवा योजना ॥ ५ ॥ हेतात वत्स । कलशः उदपात्रं । न्यस्यतां भूमौस्थाप्यतां । ममवल्कलं स्नानशाट्यर्थावृक्षत्वक् । दीयतां । किमर्थमित्यत्राह—इदमेवेति । उत्तमं अकर्दमत्वादिगुणयोगेनजाह्नवीतीर्थात्श्रेष्ठं इदमेवतमसातीर्थं अवगाहिष्ये अत्रैवस्नास्यामि । माध्याह्निककालातिक्रमादगत्वाजाह्नवीमितिशेषः । त्वमप्यत्रैव स्नाहीत्यर्थः ॥ ६ ॥ महात्मना महामनसा । वाल्मीकेन वाल्मीकिना । " तस्येदं " इतिसंबन्धमात्रेऽण् । संबन्धश्चात्रपुत्रत्वं । एवं पूर्वोक्तरीत्या । उक्तः । गुरोर्नियतः परतन्त्रः भरद्वाजः । मुनेस्तस्य वाल्मीकेः । वल्कलं । प्रायच्छत प्रादात् । दाणः यच्छादेशः । छन्दसिबहुलग्रहणादात्मनेपदं संबन्धसामान्येषष्ठी तस्मा इत्यर्थः ॥ ७ ॥ नियतेन्द्रियः निगृहीतेन्द्रियोपि । सः वाल्मीकिः । शिष्यहस्ताद्वल्कलमादाय । विपुलं विशालं । वनं । सर्वतःपश्यन्सन् । विचचार । हेतिविस्मये । निगृहीतेन्द्रियस्यविपुलवनावलोकनं दैवकृतत्वाद्विस्मयनीयमित्यर्थः ॥ ८ ॥ भगवान् माहात्म्यवान् । " भगःश्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु " इत्यमरः । शापानुग्रहसमर्थइत्यर्थः । वाल्मीकिः । तत्र वने । तस्य तीर्थस्य । अभ्याशे समीपे । चरन्तं वर्तमानं । अनपायिनं अविनाभूतं । क्षणविरहासहिष्णु क्रौञ्चमिथुनमितिप्रसिद्धं । चारुनिस्स्वनमितिरतिकालिकस्वरोक्त्या रतिर्द्योत्यते । क्रौञ्चयोर्मिथुनं द्वन्द्वं । पुँल्लिङ्गत्वमार्षं । ददर्श ॥ ९ ॥ पापनिश्चयः रतिसमयेपिहननकरणात्क्रूरनिश्चयः । वैरनिलयः सर्वजन्तुविषयसहजशात्रवयुक्तः । निषादः । तस्मान्मिथुनात् तन्मिथुनमासाद्य । ल्यब्लोपेपञ्चमी । पुमांसंएकं अवयवं । तस्यपश्यतः तंपश्यन्तंमुनिमनादृत्य "षष्ठीचानादरे " इत्यनादरेषष्ठी । जघान हतवान् ॥ १० ॥ भार्या क्रौञ्ची । निहतं व्याधहतं । अतएव । महीतले भूतले । वेष्टमानं घूर्णमानं । शोणितपरीताङ्गं रुधिरव्याप्तशरीरं । तं क्रौञ्चं । दृष्ट्वा । करुणां श्रोतुः कारुण्यावहां । गिरं । रुराव करुणशब्दमकरोत् । ओदनपाकंपचतीतिवत् । अरोदीत् ॥ ११ ॥

शिरो० तीर्थं ऋषिसेविततमसाजलं । "तीर्थंशास्त्राध्वरक्षेत्रमन्त्रोपाध्यायमन्त्रिषु । अवतारर्षिजुष्टांभस्स्त्रीरजस्सुचविश्रुतं" इतिविश्वकोशात्तीर्थशब्दस्यऋषिजुष्टांभःपरत्वं । ४ **शिरो०** प्रायच्छत । संज्ञापूर्वकविधेरनित्यत्वादात्मनेपदम् । ७ ॥

[पा०] १ छ. सन्नंतु. २ न्मानुष. ३ घ. स्तावदी. ४ ख. च. लानि.

वियुक्ता पतिना तेन द्विजेन सहचारिणा ॥ ताम्रशीर्षेण मत्तेन पत्रिणा सहितेन वै ॥ १२ ॥
तथा तु तं द्विजं दृष्ट्वा निषादेन निपातितम् ॥ ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत ॥ १३ ॥
ततः करुणवेदित्वादधर्मोऽयमिति द्विजः ॥ निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत् ॥ १४ ॥
मानिषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ॥ यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥१५॥

पतिना पत्या । नाभावआर्षः। सहचारिणा सहचारशीलेन । ताच्छील्येणिनिः । सहितेनेत्यनेन मनस्सङ्गतिरुच्यतइति नतेनपुनरुक्तिः । ताम्रशीर्षेण रक्तशिरसा । " उत्तमाङ्गंशिरःशीर्षं " इत्यमरः । मत्तेन रतिपरवशेनेत्यर्थः । पत्रिणा प्रशस्तपक्षेण । तेनद्विजेन पक्षिणा । " दन्तविप्राण्डजाद्विजाः " इत्यमरः । भार्या वियुक्ता विरहितासती । करुणांगिरं रुरावेतिपूर्वेणान्वयः । वै इतिपादपूरणे । " तुहिचस्महवैपादपूरणे " इत्यमरः । अत्रविशेषणानि भार्यायाःशोकातिरेकहेतुत्वेननिर्दिष्टानि ॥ १२ ॥ तथा शोणितपरीताङ्गमित्याद्युक्तरीत्या । निषादेन निपातितं हिंसितमित्यर्थः । तंद्विजंदृष्ट्वा स्थितस्य । धर्मात्मनः धर्मस्वभावस्य । ऋषेर्वाल्मीकेः । करुणैव कारुण्यं । स्वार्थेष्यञ् । दया । समपद्यत आसीत् ॥ १३ ॥ ततः क्रौञ्चीविषयकारुण्यसंपत्त्यनन्तरं । द्विजः सहजकारुण्यस्वभावोमुनिः । रुदन्तींक्रौञ्चीं । निशाम्य दृष्ट्वा। करुणवेदित्वात् कारुण्यभाक्त्वात् । विदुलाभइत्यस्मात्णिनिः । अयं रतिकालेहिंसनमधर्मइतिमत्वा इदं वक्ष्यमाणं । वचनमब्रवीत् ॥१४॥ तदेववचनमाह—

मानिषादेति । हेनिषाद त्वं शश्वदेव शाश्वत्यः । स्वार्थेअण्। ततोङीप् । ताः अनारताइत्यर्थः। समाः संवत्सरान् । "संवत्सरोवत्सरोब्दोहायनोस्त्रीशरत्समाः" इत्यमरः । अत्यन्तसंयोगेद्वितीया । प्रतिष्ठां कचित्स्थानं । "प्रतिष्ठास्थितिमाहात्म्य—" इतिवैजयन्ती । मागमः माप्राप्नुहि । "आशंसायांभूतवच्च" इतिलुङतिदेशात्लुङ् लृदित्वादङ् । नायंमाङ् अपितुमाशब्दइतिकाशिकाकारः तेनाडागमेपिनविरोधः । दुर्घटवृत्तिकारस्तु अमेतिपदच्छेदः हेअम हेअलक्ष्मीक इतिनिषादविशेषणं ततो "नमाङ्योगे" इत्यडभावइत्याह । एवंपूर्वार्धेनशापउक्तः तत्रहेतुरुत्तरार्धेनोच्यते। यद्यस्मात्कारणात् क्रौञ्चमिथुनात् क्रौञ्चमिथुनमासाद्य ल्यब्लोपेपञ्चमी । एकंकाममोहितं कामेनमोहंप्रापितं रतिक्रीडाविवशमित्यर्थः । एकमवयवमवधीः हिंसितवानसि । तस्मात्तद्वदेवप्रतिष्ठांमागमइतियोजना । चतुर्मुखप्रसादेनवाल्मीकिमुखात्प्रथमोदितोऽयंश्लोकः केवलंशापपरोनभवितुमर्हतीतिभगवन्मङ्गलाशासनपरतयामङ्गलाचरणपरोऽयंप्राथमिकश्लोकइतिपूर्वाचार्यावर्णयन्ति । तथाहि । निषीदन्त्यस्मिन्नितिनिषादो

तनि० हेनिषाद, त्वंशाश्वतीःसमाःप्रतिष्ठांमागमः । नगतोसीतिकाकुः । भार्यासहितएकत्रनिवासेस्थित्वासांसारिकसुखंनानुभूतवानित्यर्थः । यद्यस्मात् क्रौञ्चमिथुनादेकंकाममोहितमवधीः । एवंदुस्सहजीवनादपिस्वहननमेवश्रेयइतिभावः । **तिल०** ममतुप्रतिभाति । नारदात्स्वगुणश्रवणानन्तरंमुनेःस्ववर्णनेच्छांज्ञात्वा स्वचरित्रस्यचकरुणारसमयत्वेन तत्प्रधानकाव्येऽतिकरुणचित्तस्यैवाधिकारादृषेः करुणचित्तत्वजिज्ञासयेवपूर्वंभृगुदत्तशापस्यपुनरुक्तत्वकरणेनदार्ढ्यसंपादनायमुनेरीक्षणायचभगवान्रामएवनिषादरूपेणपश्यतोमुनेःपुरतस्तमनादृत्य क्रौञ्चंरक्षोविशेषरूपंजघान । ततस्तदिच्छावशादन्तर्यामितयातथाप्रेरणाच्चमहानधर्मोऽयमनेनकृतइतिरुषा पापमते निषाद यत्त्वंकाममोहितंक्रौञ्चमिथुनात् मिथुनीभूतात्क्रौञ्चयुगाद्विभक्तमेकमवधीः तत्त्वमपिशाश्वतीःसमाः आयुश्शेषभूतानिबहूनिवर्षाणि । प्रतिष्ठां स्वस्त्रीसाहित्येनस्थितिं । इहलोके मागमोमाप्राप्नुहि । किंतु अत्यल्पकालमेवतथावासः एकमिथुनीभावपर्यन्तमितियावत् । इतिशप्तवान्मुनिः । एकमवधीरित्युक्तेः यथासत्वयास्त्रीविरहितःकृतः, साचनायकहीनाकृता तथात्वमपि प्रियया स्वभार्ययाहीनोभव । साचत्वयाहीनाभवत्वितिपर्यवसानम् । अगमइत्यडागमस्तुमाङ्योगेप्यार्षत्वात् । तस्यरक्षोरूपत्वंत्वेतदुत्तरंब्रह्मणः सकाशात्सकलरामवृत्तान्तज्ञानवरलाभोत्तरकालकृतेतस्मात्तुमिथुनादेकमितिश्लोके वैरनिलयइतिविशेषणेनसूचितम् । रक्षस्त्वेवतस्य लोकदृष्ट्यावैरनिलयत्वप्रसिद्धेः । निषादस्यापिप्राणिषुनवैरं किंत्वाहाराद्यर्थमेवतद्धननमितिप्रसिद्धेश्च । अतएवारण्यकाण्डेमृगयाव्यसनमुपक्रम्य "विनावैरंचरौद्रः" इति "तृतीयंयदिदंरौद्रंपरप्राणाभिहिंसनं । निर्वैरंक्रियतेमोहात्तच्चतेसमुपस्थितम्" इतिचवक्ष्यति । "त्रीण्येवव्यसनान्यत्रकामजानिभवंतुते" इतिचोपक्रमेउक्तम् । नन्वीदृशोर्थस्त्वयाकेनमानेननिर्णीतइतिचेच्छृणु । ऋष्यक्षरस्वार-

[पा०] १ घ. तथागतं. ङ. च. छ. ञ. तथाविधं.

निवासः । अधिकरणेघञ् । मालक्ष्मीःतस्यानिषादो-मानिषादः श्रीनिवासः । तत्रसंबुद्धिः हेश्रीनिवास । त्वं शाश्वतीःसमाःसर्वकालंप्रतिष्ठांमाहात्म्यंअगमः गच्छ । लकारव्यत्ययः । यद्यस्मात्क्रौञ्चमिथुनात् राक्षसमिथुनाद्रावणमन्दोदरीरूपात् कामेनमन्मथेनमोहितंसीतापहर्तारमेकंरावणमवधीः रावणंहत्वाकृतत्रैलोक्यत्राणस्त्वंयावत्कालंविजयीभवेत्यर्थः । वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः । एवमनेनश्लोकेनेष्टदेवतास्मरणरूपंमङ्गलमाचरितं । "काव्यार्थसूचनंकैश्चिन्नान्द्यामेवनिरूप्यते" इतिवचनादस्मिन्नेवश्लोकेवक्ष्यमाणकाव्यार्थःसंक्षेपेणदर्शितः । तथाहि । मानिषादेत्यनेन सीतापरिणयपर्यवसायिनीबालकाण्डकथोद्बोधिता । प्रतिष्ठांत्वमगमइत्यनेन पितृवचनपरिपालनप्रतिष्ठाभिधायिन्ययोध्याकाण्डकथाऽऽवेदिता । शाश्वतीःसमा इत्यनेन ऋषिगणविषयप्रतिज्ञानिर्वहणेनरामस्यप्रतिष्ठानुवृत्तिमभिदधत्यारण्यकाण्डकथासूचिता । क्रुञ्चगतिकौटिल्याल्पीभावयोरित्यस्माद्धातोः "ऋत्विक्—"इत्यादिनाकिन्निपातनात् नलोपःसंयोगान्तलोपश्चनभवति । क्रुञ्चेवक्रौञ्चः स्वार्थेअण् । तथाचक्रौञ्चयोः कुटिलयोस्तिरश्चोस्तारावालिनोर्मिथुनादेकंकाममोहितंसुग्रीवभार्यापहर्तारंवालिनमवधीरितिकिष्किन्धाकाण्डकथाऽभिहिता । क्रौञ्चौ अल्पीभूतौ कृशावितियावत् । तयोरन्योन्यविरहक्लेशकृशीयसोःसीतारामयोरेकमवयवंसीतारूपंअवधीः भृशंपीडितवानसीति । सीताविरहदुःखातिशयवर्णनपरासुन्दरकाण्डकथाबोधिता । क्रौञ्चौकुटिलौराक्षसौतन्मिथुनादेकंकाममोहितंरावणमवधीरितियुद्धकाण्डकथासूचिता । दण्डकारण्यवासिऋषिपत्नीदर्शनाभिलाषमोहितसीतापीडाभिधानेनोत्तरकाण्डार्थोपिसंक्षिप्तः । ननुमृगपक्ष्यादिवधस्यव्याधकुलधर्मत्वात् कथमनपराधिनमेनंमुनिःशप्तुमर्हति । वक्ष्यति रामएववालिवधप्रस्तावे । "प्रमत्तानप्रमत्तान्वानरामांसार्थिनोभृशं । वध्यन्तिविमुखांश्चापिनचदोषोत्रविद्यते" इति । सत्यं । तथापि रतिपरवशतादशायां तद्वधोदोषएवेतिमुनेराशयः । सूचयतिहिरतिपरवशतांकाममोहितमितिपदेन । अतएवभारतेपाण्डुंप्रतिमुनिः । "अस्वर्ग्यमयशस्यंत्वमनुतिष्ठसिभारत ॥ कोहिविद्वान्मृगंहन्याच्चरन्तंमैथुनंवने" इति । नन्विदं मलयंगच्छतोमन्दरपथोपवर्णनं । यदयमासनोवैलक्षण्यंपरमाप्तत्वंवक्तुमारभ्य स्वचरित्रवर्णनंकरोति । ब्रह्मागमनवरप्रदानादेरेवतदर्थवक्तव्यत्वात् । उच्यते । श्रूयतामवधानेन । "अर्थतःशब्दतोवाऽपि मनाक्काव्यार्थसूचनं" इतिदर्शितरीत्याकाव्यार्थसूचनमियताग्रन्थसंदर्भेणक्रियते । तथाहि । अकर्दममित्यादिना पावनंसमुद्रसेतुस्थलमुच्यते । तस्याभ्याशइत्यादिना तत्तीरेमन्दोदर्यासहचरन्तंभोगान्भुञ्जानं अनपायिनं चतुर्मुखवरप्रदानेनलब्धचिरायुष्कं चारुनिस्वनंरम्यवीणादिविनोदं क्रौञ्चयोराक्षसयोर्मिथुनंददर्श धर्मबलेनालोकितवान् तस्मादित्यादिना पापनिश्चयो निश्चितरावणपापः । वैरनिलयः हिरण्यकशिपुरावणशिशुपालरूपजन्मत्रयानुसारित्वात्सहजशात्रवः । निषीदन्त्यत्रसर्वाणिजगन्तीतिनिषादोविष्णुः । पुमांसंरावणंजघानेत्युच्यते । भार्यात्वित्यादिना मन्दोदरीप्रलापः । द्विजेन पुलस्त्यवंशत्वात् ब्राह्मणेन । ताम्रशीर्षेण रत्नमुकुटधारित्वात् । पत्रिणा वाहनपरिच्छदादिमता ।

स्यात् । तच्चाग्रे स्फुटम् । तत्रसंदेहश्चेत्स्वान्तर्यामिणंपृच्छ । तदुक्तंपाद्मेशिवाशिवसंवादेरामवैभववर्णनेचतुर्विंशेध्याये । "ततोजानपदःकश्चित्पामरःकाष्ठविक्रयी । स्ववधूगर्हणद्वारारावणस्यगृहोषिताम् । गर्हयामासवैदेहींदुर्वृत्तोलोकनिन्दकः । तच्छ्रुत्वादेविचारेभ्योभीतोलोकापवादतः । आहूयलक्ष्मणंप्राहरामोराजीवलोचनः । शृणुमेवचनंगुह्यंसीतासंत्यागकारणम् । वाल्मीकिनाथभृगुणाशप्तोस्मिकिललक्ष्मण । तस्मादेनांत्यजाम्यद्यजनोनैवात्रकारणम्" इति । **कत०** प्रत्यक्षसंहन्तृनिषादशापरूपोऽर्थस्तु स्पष्टएव । किंचनितरां सदेवर्षिगणंत्रैलोक्यंसादयतिपीडयतीतिनिषादः तस्यसंबुद्धिर्हेनिषादरावण । यद्यस्मात् क्रौञ्चमिथुनात् । अल्पीभावार्थकक्रुञ्चेःपचाद्यच् । क्रुञ्चं । ततस्स्वार्थिकोऽण् । क्रौञ्चं राज्यक्षयवनवासादिदुःखेनात्यल्पीभूतं परमकार्श्यंगतंयन्मिथुनंसीतारामरूपं तस्मादेकं सीतारूपं यस्मादवधीः वधाभ्यधिकपीडांप्रापितवानसि तस्मात्त्वं प्रतिष्ठांयालङ्कापुरेपुत्रपौत्रभृत्यगणवैशिष्ट्येन ब्रह्मणा प्रतिष्ठादत्तातामतःपरं मागमइतिकाव्यार्थसूचनम् ॥ **शिरो०** त्वमेतिनिषादविशेषणं त्वेन आत्मभिन्नेनरागादिना मःबन्धनंयस्य अनात्मभूतरागादिवशइत्यर्थः । "माचमातरिमोमानेबन्धनेचप्रकीर्तितः" इतिमशब्दस्य बन्धनवाचकत्वं । त्वशब्दस्यान्यपरत्वंतु सर्वादिगणेप्रसिद्धम् । अत्रपक्षे अड्विरहः भविष्यत्कालबोधकलुङ्त्वसिद्धइतिबोध्यम् ॥ मानिषाद मानिनांगर्वविशिष्टानां षः श्रेष्ठः परशुरामः तं आसमन्ताद्भावेन द्यतिखण्डयति वैष्णवधनुस्सज्जीकरणादिनातद्गर्वं निवर्तयतीतिमानिषादः तत्संबुद्धिः । इति बाल-

तस्यैवं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः ॥ शोकार्तेनास्य शकुनेः किमिदं व्याहृतं मया ॥ १६ ॥
चिन्तयन्स महाप्राज्ञश्चकार मतिमान्मतिम् ॥ शिष्यं चैवाब्रवीद्वाक्यमिदं स मुनिपुङ्गवः ॥ १७ ॥
पादबद्धोक्षरसमस्तन्त्रीलयसमन्वितः ॥ शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥ १८ ॥
शिष्यस्तु तस्य ब्रुवतो मुनेर्वाक्यमनुत्तमम् ॥ प्रतिजग्राह संहृष्टस्तस्य तुष्टोऽभवद्गुरुः ॥ १९ ॥

सहितेन कुंभकर्णेन्द्रजिदादिसहायसंपन्नेन । कारुण्यं जुगुप्सा "जुगुप्साकरुणाघृणा" इतिनिघण्टुः । अधर्मोयमितिरावणकृतोयमधर्मइति एतत्सर्वंरावणवधवृत्तान्तमवलोक्यपौलस्त्यवधाभिधानं तद्विषयप्रबन्धंनिरमिमीतेतिमानिषादेत्यस्यरामायणार्थसंग्रहपरत्वंचोक्तं । अथवा । अकर्दममित्यादिना गोदावरीतीर्थमुच्यते । तत्तीरे पञ्चवट्यांरामस्यसीतयासहवर्तनं तयोरेकस्याःसीतायारावणेनदुरात्मनाहिंसनंपीडनमित्येतत्सर्वंसाक्षात्कृत्य विधिचोदितोमुनिःसीतायाश्चरितमितितद्विषयंप्रबन्धमकरोदित्यर्थः । तस्मिन्पक्षेअनपायिनमाद्यन्तशून्यं । चारुनिस्स्वनंसर्ववेदान्तप्रवर्तकं । क्रौञ्चयोःकृशयोःतपस्विनोःसीतारामयोःपापनिश्चयोवैरनिलयः निषादोलोकहिंसको रावणःसीतामपजहार साचरुरोद । द्विजेनक्षत्रियेणताम्रशीर्षेणरत्नमुकुटारुणेन पत्रिणाशरेणोपलक्षितेन सहितेनलोकहितपरेण । अन्यत्सर्वंसमानं । मानिषादेत्याद्यर्थःशापार्थेनदर्शितः ॥ १५ ॥ वीक्षतः तन्मिथुनंवीक्षमाणस्य । "संज्ञापूर्वकोविधिरनित्यः" इतिवा चक्षिङोनुदात्तस्यङित्करणज्ञापितानित्यत्वेनवा परस्मैपदं । एवं मानिषादेत्येवं । ब्रुवतः क्रौञ्चींदृष्ट्वामानिषादेत्येवंवदतइत्यर्थः । तस्य वाल्मीकेः हृदि । अस्यशकुनेः एतत्पक्षिनिमित्तंशोकार्तेनमया । व्याहृतमिदंवाक्यं किं किंरूपमितिचिन्ताबभूव ॥ १६ ॥ प्रकर्षेणजानातीतिप्रज्ञःऊहापोहसमर्थः प्रज्ञएवप्राज्ञः । "प्रज्ञादिभ्यश्च" इतिस्वार्थेऽण् । यद्वा । प्रज्ञाधीः "धीः प्रज्ञाशेमुषीमतिः इत्यमरः" । साऽस्यास्तीतिप्राज्ञः । "प्रज्ञाश्रद्धार्चाभ्योणः" इतिमत्वर्थीयोणः । महांश्चासौ प्राज्ञश्चेतिमहाप्राज्ञः । मतिमान् शास्त्रज्ञानवान् । सः वाल्मीकिः । मतिं उत्तरश्लोकेवक्ष्यमाणंनिश्चयं । चकार । समुनिपुङ्गवः । शिष्यमिदंवाक्यमब्रवीच्च । "ब्रूशासि" इत्यादिनाद्विकर्मकत्वं । अयोगव्यवच्छेदकएवकारः ॥ १७ ॥ शोकार्तस्य क्रौञ्चीशोकेनार्तस्य । मेप्रवृत्तः मत्तः प्रवृत्तः अयंसंदर्भइत्यर्थः । पादबद्धः । चतुर्भिःपादैर्युक्तः । अक्षरसमः प्रतिपादंसमाक्षरः । तन्त्री वीणागुणः । लयः तौर्यत्रिकस्यैककालविरामः । "नाशेसंश्लेषणेतौर्यत्रिकसाम्येभवेल्लयः" इतिरत्नमाला । ताभ्यांसमन्वितः तन्त्र्यामारोप्यवाद्यैःसहगातुंशक्यइत्यर्थः । श्लोकोभवतु श्लोकलक्षणलक्षितत्वात् श्लोकशब्दवाच्योभवतु । नान्यथा श्लोकादन्यः केवलपदसंदर्भोनभवति । इतिमतिंचकारेतिपूर्वेणान्वयः ॥ १८ ॥ शिष्यः भरद्वाजः । तस्यमुनेर्ब्रुवतः तस्मिन्मुनौब्रुवतिसति । "यस्यचभावेनभावलक्षणं" इत्यस्मिन्नर्थेषष्ठी । अनुत्तमं सर्वरामायणार्थसंग्रहरूपत्वेन

काण्डकथासूचिता ॥ १५ ॥ **तिल०** मयामुनिनाशान्तेनतपस्विनाशकुनिशोकपीडितेनइदं ईदृशं क्रूरं तपोनाशकरं किंव्याहृतमितिवीक्षतोऽन्तर्यामिप्रेरणयानिषादेसर्वतोमहत्त्वसंभावनया दृश्यमानक्रौञ्चेतद्वैपरीत्यसंभावनयाऽतिनिन्द्यमयशस्करंमहापातकेभ्योप्यधिकंपापंवृत्तमितिचिन्ताबभूव । यद्यप्येतत्सर्ववाल्मीकिकृतमेव तथापि कुशलवगेयतयाअस्यकाव्यस्यकरणात् तदुक्तितयैवमुक्तिः । अन्यथा स्वचिन्तायाःस्वापरोक्षत्वात् बभूवेतिलिडसंगतिःस्यात् । यद्वा सर्गचतुष्टयमाद्यमुपोद्घातरूपंकस्यचिच्छिष्यस्य । वाल्मीकीयोपोद्घातत्वाच्च वाल्मीकीयोक्तिः । पारोक्ष्यमारोप्यस्वयमपि तथोक्तिरुपोद्घातत्वद्योतनायेत्यन्ये । **विष०** इदंवाक्यं किं किंरूपं गद्यंपद्यंवेतिचिन्ताबभूवेतिसंबन्धः ॥ १६ ॥ **तिल०** अतःशोकार्तस्यशापरूपतयाऽनौचित्येनप्रवृत्तोपिमेममश्लोकोयशोरूपोभवतु अन्यथा अयशोरूपोमाभूदित्यर्थः । "श्लोकोयशसिपद्येच" इतिनिघण्टुः ॥ **शिरो०** तन्त्रीलयसमन्वितः तन्त्रिणांशास्त्राभिज्ञानां इत्वंप्रतिष्ठांतत्कृतमहत्त्वंतस्य यः प्राप्तिः तेनसमन्वितःयुक्तः । पादबद्धोक्षरसमः पादेबद्धोयउक्षरः उक्षावृषभश्चासौ रश्चेति वृषभश्रेष्ठइत्यर्थः । तत्समःतत्सदृशःशोकार्तस्यमेप्रवृत्तःश्लोकः अन्यथा अन्यपरकः नभवतु । यथाबद्धोवृषभःस्वस्थानादन्यत्रगन्तुंनशक्नोति तथाऽयंश्लोकः तात्पर्यविषयीभूतरघुनाथादन्यत्रनगच्छत्वितिफलितोऽर्थः । "रश्चभूपेप्रकीर्तितः" इतिकोशात् रशब्दः श्रेष्ठपरः ॥ १८ ॥

[पा०] १ ङ. झ. ञ. स्येत्थं. २ घ. यन्मनसा प्रा. ३ ग. त्तोयं. ४ ङ. च. झ, वन्मुनिः ।

सोऽभिषेकं ततः कृत्वा तीर्थे तस्मिन्यथाविधि ॥ तमेव[1] चिन्तयन्नर्थमुपावर्तत वै मुनिः ॥ २० ॥
भरद्वाजस्ततः शिष्यो विनीतः श्रुतवान्मुनिः[2] ॥ कलशं पूर्णमादाय पृष्ठतोऽनुजगाम ह ॥ २१ ॥
स प्रविश्याश्रमपदं शिष्येण सह धर्मवित् ॥ उपविष्टः कथाश्चान्याश्चकार ध्यानमास्थितः ॥ २२ ॥
आजगाम ततो ब्रह्मा लोककर्ता स्वयं प्रभुः ॥ चतुर्मुखो महातेजा द्रष्टुं[3] तं मुनिपुङ्गवम् ॥ २३ ॥
वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः ॥ प्राञ्जलिः प्रयतो[4] भूत्वा तस्थौ परमविस्मितः ॥२४॥

स्वापेक्षयोत्तमान्तररहितं । वाक्यं मानिषादेत्यादिकं । संहृष्टःसन् । प्रतिजग्राह वाग्विधेयंचकारेत्यर्थः । गुरुः । वाल्मीकिः तस्य तुष्टोऽभवत् स्वश्लोकधारणात्तस्मिन्प्रीतोभवदित्यर्थः ॥ १९ ॥ ततः शिष्यविषयसंतोषानन्तरं । सः मुनिः । तस्मिन्तीर्थे अकर्दममिदंतीर्थमित्यादिनावर्णितेतीर्थे । यथाविधि विधिमनतिक्रम्य । अभिषेकं माध्याह्निकस्नानं । कृत्वा । तमेवार्थं अवशात्श्लोकोत्पत्तिरूपमेवार्थं । चिन्तयन्सन् । उपावर्तत आश्रममागच्छत् । अभिषेकविधिस्तुव्यासस्मृतौविशेषतोदर्शितः । "ततोमध्याह्नसमयेस्नानार्थंमृदमाहरेत् । पुष्पाक्षतान्कुशतिलान्गोमयंगन्धमेवच । नदीषुदेवखातेषुतटाकेषुसरस्सुच । स्नानंसमाचरेन्नित्यंनदीप्रस्रवणेषुच । मृदैकयाशिरःक्षाल्यद्वाभ्यांनाभेस्तथोपरि । अधश्चतसृभिःक्षाल्यंपादौषड्भिस्तथैवच । मृत्तिकाचसमादिष्टात्वाद्रामलकमात्रतः । गोमयस्यप्रमाणंतत्तेनाङ्गंलेपयेत्ततः । लेपयेदथतीरस्थस्तल्लिङ्गैनैवमन्त्रतः । प्रक्षाल्याचम्यविधिवत्ततःस्नायात्समाहितः । अभिमन्त्र्यजलंमन्त्रैरब्लिङ्गैर्वारुणैःशुभैः ॥ आपोनारायणोद्भूतास्ताएवास्यायनंपुनः । तस्मान्नारायणंदेवंस्नानकालेस्मरेद्बुधः । प्रेक्ष्यसोङ्कारमादित्यंत्रिर्निमज्जेज्जलाशये । अथोपतिष्ठेदादित्यमूर्ध्वंपुष्पंजलान्वितं । प्रक्षिप्यालोकयेद्देवमृग्यजुःसामरूपिणं" इत्यादि॥२०॥ ततः मुनेरुपावर्तनानन्तरं । विनीतः विनयसंपन्नः । श्रुतवान् शास्त्रवान् अवधृतवान्वा । "श्रुतंशास्त्रावधृतयोः" इत्यमरः । धृतगुरुश्लोकइत्यर्थः । मुनिः मननवान् । भरद्वाजः भरद्वाजाख्यःशिष्यः । पूर्णं जलपूर्णं । कलशमादाय । पृष्ठतः पश्चात् । अनुजगाम । अनुगमनोक्तौपृष्ठतइत्युक्तिरव्यवधानसूचनार्था॥२१॥ सः वाल्मीकिः । शिष्येणसह । आश्रमपदं आश्रमस्थानं । प्रविश्य । धर्मवित् कृतदेवपूजादिधर्मः । उपविष्टः कृतसुखासनःसन् । ध्यानं अवशोत्पन्नश्लोकविषयचिन्तां । आस्थितः प्राप्तएवसन् । अन्याःकथाः पुराणपारायणानि । चकार ॥ २२ ॥ लोककर्ता लोकस्रष्टा । प्रभुः स्वामी । चतुर्मुखः वेदचतुष्टयोच्चारणोपयोगिमुखचतुष्कः । महातेजाः महाप्रभावः । ब्रह्मा । मुनिपुङ्गवं नारदोक्तवैभवंवाल्मीकिं । द्रष्टुंकुतूहलात्स्वयमाजगाम स्वस्थानस्थितएवरामायणप्रवर्तनसमर्थोप्यादरातिशयेनस्वयमेवाजगामेत्यर्थः ॥ २३ ॥ अथ ब्रह्मागमनानन्तरं । तं ब्रह्माणं दृष्ट्वा सहसाउत्थाय "ऊर्ध्वंप्राणाह्युत्क्रमन्तेयूनःस्थविरआगते । प्रत्युत्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यते " इतिवचनात् स्वप्राणाउत्क्रामेयुरितिसहसोत्थायेत्यर्थः । परमविस्मितः सन् । वाग्यतः यतवाक् । आहिताग्न्यादित्वात्परनिपातः । प्रयतः नियतमनस्कः । प्रकृष्टःअञ्जलिर्यस्यासौप्राञ्जलिः सचभूत्वा । तस्थौ स्थितवान् ॥ २४ ॥

तनि० तमेवार्थंशापापदेशेनप्रवृत्तस्ववाक्यस्यव्यञ्जितंलोकोत्तरचमत्कारंलक्ष्मीपतिप्रतिष्ठारूपं ॥ २० ॥ **तिल०** मुखतोऽन्याः कथाश्चकार मनसातुशापार्थकश्लोकविषयंध्यानमास्थितः ॥ २२ ॥ **तिल०** अथतच्चिन्तांनिवर्तयितुंब्रह्मागमनमाह—आजगामेति । स्वयंप्रभुः अनन्यमुखनिरीक्षकतया सर्वलोकस्रष्ट्युपयोगिज्ञानैश्वर्यादिशक्तिमान् अतएव भूरादिलोकनिर्माता तं चिन्ताक्रान्तं ॥ २३ ॥ **तनि०** परमविस्मितः । प्रथममतर्कितंनारदागमनं । ततोलोकोत्तरविषयप्रश्नः । तदनुरूपमुत्तरं । अतर्कितमेवशकुनिमिथुनदर्शनं । तत्रच करुणरसोदयः । एतत्सर्वं दैवतन्त्रमितिविस्मितः । अनन्तरं अतर्कितचतुर्मुखागमनेनपरमविस्मितः ॥ **तिल०** प्रयतः अतिनम्रः ॥ २४ ॥

[**पा०**] १ ख. ज. तमेवं. २ ग. वान्मुनेः. ङ. झ. ञ. वान्गुरोः. ३ च. प्रष्टुं तं. ख. दृष्टवान्मुनि. ४ ग. प्रणतो.

पूजयामास तं देवं पाद्यार्घ्यासनवन्दनैः ॥ प्रणम्य विधिवच्चैनं पृष्ट्वाऽनामयमव्ययम् ॥ २५ ॥
अथोपविश्य भगवानासने परमार्चिते ॥ वाल्मीकये महर्षये संदिदेशासनं ततः ॥
ब्रह्मणा समनुज्ञातः सोप्युपाविशदासने ॥ २६ ॥
उपविष्टे तदा तस्मिन्साक्षाल्लोकपितामहे ॥ तद्गतेनैव मनसा वाल्मीकिर्ध्यानमास्थितः ॥ २७ ॥
पापात्मना कृतं कष्टं वैरग्रहणबुद्धिना ॥ यस्तादृशं चारुरवं क्रौञ्चं हन्यादकारणात् ॥ २८ ॥
शोचन्नेव मुहुः क्रौञ्चीमुप श्लोकमिमं पुनः ॥ जगावन्तर्गतमना भूत्वा शोकपरायणः ॥ २९ ॥
तमुवाच ततो ब्रह्मा प्रहसन्मुनिपुङ्गवम् ॥ श्लोक एवं त्वया बद्धो नात्र कार्या विचारणा ॥ ३० ॥

मुनिः तंदेवं ब्रह्माणं । पाद्यार्घ्यासनवन्दनैः पाद्यं पादोदकप्रदानं अर्घ्यं अर्घजलसमर्पणं वन्दनं स्तुतिः एतैरुपचारैःपूजयामास । एनं ब्रह्माणं । अन्वादेशेइदमएनादेशः । विधिवत् शास्त्रोक्तरीत्या । प्रणम्य । अव्ययं अविच्छिन्नं । अनामयं कुशलं । पृष्ट्वा च पूजयामासेतियोजना । प्रणामशास्त्रंतु "मनोबुद्ध्यभिमानेनसहन्यस्यधरातले । कूर्मवच्चतुरःपादाञ्शिरस्तत्रैवपञ्चमं । प्रदक्षिणसमेतेनह्येवंरूपेणसर्वदा । अष्टाङ्गेननमस्कृत्यह्युपविश्याग्रतःप्रभोः" इति । यद्वा तमेनंदेवंविधिवत्प्रणम्यानामयंपृष्ट्वाचपाद्यार्घ्यासनवन्दनैः पूजयामास । वदिअभिवादनस्तुत्योरितिधातुः ॥२५॥ अथेतिसार्धश्लोकएकः । अथ पूजानन्तरं । भगवान् ब्रह्मा । परमार्चिते परमंयथाभवतितथावाल्मीकिनार्चिते । ब्रह्मोपवेशार्थपूजिते । आसने विष्टरे । उपविश्य स्थित्वा । महर्षये वाल्मीकये । आसनं उपवेशनं। संदिदेश आज्ञापयामास । सोपि ब्रह्मणासमनुज्ञातः-सन् । आसने उचितनीचासने । उपाविशत् । आसनानुज्ञानं लोकहितार्थमनेनकाव्यंकारयितुं । वाल्मीकयेमहर्षयइत्यत्रायुजिपादेपथ्यावक्त्रस्यगणनियमाभावात्तथोक्तं । नन्वर्धत्रयकरणमीदृशैः करवाण्यहमित्यनेन विरुध्यते । मैवं । लेखकदोषेणार्धान्तरपतनसंभवात् ॥ २६ ॥ लोकपितामहे तस्मिन् साक्षात् प्रत्यक्षतया। उपविष्टेपि तदा तद्गतेन क्रौञ्चहननगतेन मनसा ध्यानमास्थितः तद्विषयचिन्तामकरोत् ॥ २७ ॥ वैरग्रहणबुद्धिना वैरेणक्रौञ्चग्रहणबुद्धिना । पापात्मना पापस्वरूपेणव्याधेन । कष्टं कुत्सितं कर्म । कृतं । कथमित्यत्राह—यइति । योव्याधः । तादृशं रतिलालसमित्यग्राह्यत्वोक्तिः । चारुरवं रम्यरतिकूजितं । क्रौञ्चं । अकारणात् निष्कारणं । "निमित्तकारणहेतूनांप्रयोगेसर्वासांप्रायदर्शनं" इत्युक्तेःपञ्चमी । हन्यात् हन्तुंशक्नुयात् । शकिलिङ् ॥ २८ ॥ शोकपरायणः क्रौञ्चवधदर्शनेनदुःखपरवशः । पुनः क्रौञ्चींगतमनाभूत्वा क्रौञ्चींविचिन्त्येत्यर्थः । मुहुःशोचन्नेव वाल्मीकिः इमं मानिषादेत्यादिंश्लोकं । अन्तः मनसि । उपजगावित्यन्वयः । "व्यवहिताश्च" इत्युपसर्गस्यव्यवहितप्रयोगः ॥ २९ ॥ ततः मनसिश्लोकपाठश्रवणानन्तरं । मुनिपुङ्गवंप्रहसन् मन्नियोगेनस्वजिह्वाग्रेऽवतीर्णासरस्वतीमयंनजानातीतिप्रहसन् । उवाच । मानिषादेत्यस्यश्लोकत्वनिश्चयंद्रढयति—श्लोकइति । त्वया बद्धः मानिषादेत्यादिः । श्लोकएव । अत्र श्लोकविषये ।

तिल० एनमित्याद्युत्तरान्वयि । अनामयं आमयःपीडातद्रहितं । अव्ययं व्ययहीनं। तपइतिशेषः । एतेन "ब्राह्मणंकुशलंपृच्छेत्क्षत्रबन्धुमनामयम्" इत्युक्तेः ब्राह्मणंप्रत्ययंप्रश्नः स्मार्ताचारविरुद्धः तंदेवमित्यनेनैवसिद्धे एनमित्यस्यवैयर्थ्यापत्तिश्चेत्यपास्तम् । **विषम०** अनामयं अनामयोपलक्षितं अव्ययं नित्यसिद्धं कुशलं ॥२५॥ **शिरो०** तद्गतेन रघुनाथचरिताविष्टेनैव ॥२७॥ **तिल०** हन्यात्हतवानित्यर्थेछान्दसम् । पापात्मनेति । मयेतिशेषः । तपोनाशसंपादकशापनिःसारणेनकष्टंकृतमितिवार्थः ॥ **शिरो०** यः व्याधः चारुरवंमनोहरशब्दं तादृशंपूर्वोक्तविशेषणविशिष्टं क्रौञ्चंअकारणाद्धन्यात् अहन् तस्य उपसमीपेइतिउत्तरेणान्वयः ॥२८॥ **शिरो०** उप व्याधस्यसमीपे क्रौञ्चींशोचन्नेवअहं इमं व्यर्थकंमानिषादेतिश्लोकं जगौ अवदम्, "बहुजगदपुरस्तात्तस्यमत्ताकिलाहम्" इतिवत् लिट्प्रयोगः । अन्तर्गतमनाः अन्तः अन्तरङ्गार्थेगतंनिविष्टंमनोयस्यतादृक् शोकपरायणः शोकात्परः सकारणशोकसंबन्धशून्यः नारदोपदिष्टरघुनाथः तस्मिन् अयनंस्थितिर्यस्यसः आसमितिशेषः ॥ २९ ॥ **तनि०** श्लोकएवयशोभिव्यञ्जकंपद्यमेवनतुकेवलपदसमुदायः नापिकेवलनिषादशापरूपार्थश्च ॥ ३० ॥

[पा०] १ घ. विधिवच्चैनमामन्त्र्य. २. ङ. झ. पृष्ट्वाचैवनिरामयं. ३ ख. पविष्टो. ४ झ. कये च ऋषये. ५ ख. ग. नं तदा. ६ घ. कृतमिदं. ७ ङ. झ. एवास्त्वयं.

मच्छन्दादेव ते ब्रह्मन्प्रवृत्तेयं सरस्वती ॥ रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम ॥ ३१ ॥
धर्मात्मनो गुणवतो लोके रामस्य धीमतः ॥ वृत्तं कथय धीरस्य यथा ते नारदाच्छ्रुतम् ॥ ३२ ॥
रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः ॥ रामस्य सहसौमित्रे राक्षसानां च सर्वशः ॥ ३३ ॥
वैदेह्याश्चैव यद्वृत्तं प्रकाशं यदि वा रहः ॥ तच्चाप्यविदितं सर्वं विदितं ते भविष्यति ॥ ३४ ॥
न ते वागनृता काव्ये काचिदत्र भविष्यति ॥ कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम् ॥३५॥
यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ॥ तावद्रामायणकथा लोकेषु प्रचरिष्यति ॥ ३६ ॥

विचारणा चिन्ता । नकार्या ॥ ३० ॥ अकारणकार्योत्पत्तिकृतविस्मयंवारयति—मदिति । हेब्रह्मन्, ते इयंसरस्वती मानिषादेत्यादिरूपा । मच्छन्दादेव मदभिप्रायादेव । नतुकारणान्तरात् प्रवृत्ता । प्रवर्तनप्रयोजनमाह—रामस्येति । हेऋषिसत्तम "नानृषिःकुरुतेकाव्यं" इत्युक्तरीत्याप्रतिलब्धकाव्यनिर्माणशक्तिक । सर्वं रामस्यचरितं रामचरितविषयप्रबन्धं । कुरु । ईदृशैःश्लोकैरितिशेषः । ईदृशैःकरवाण्यहमित्यनुवादात् ॥ ३१ ॥ एवंसामान्येनरामचरितविषयप्रबन्धनिर्माणमनुज्ञायसंक्षेपकरणमादिशति—धर्मेति । अत्र विशेषणैःप्रबन्धनायकस्यरामस्य नायकगुणादर्शिताः । नायकगुणवर्णनेनहिकाव्यंप्रथते । उक्तंहिभोजेन "कवेरल्पापिवाग्वृत्तिर्विद्वत्कर्णावतंसति । नायकोयदिवर्ण्येतलोकोत्तरगुणोत्तरः" इति । नायकगुणास्तु "महाकुलीनतौज्ज्वल्यंमहाभाग्यमुदारता । तेजस्वितावि-दग्धत्वंधार्मिकत्वादयोगुणाः" इत्युक्ताः । तत्रधर्मात्मनइत्यनेन धार्मिकत्वमुक्तं । लोके लोकमध्ये । गुणवतः बहुगुणकस्य । अनेनउदारतोक्ता । रामस्येत्यनेन तेजस्वित्वमौज्ज्वल्यंच । धीमतइत्यनेन पण्डितत्वं । धीरस्येत्यनेन वसुंधराधुरंधरत्वरूपंमहाभाग्यं । अन्यद्गुणशब्देनज्ञेयं । एवंभूतस्यरामस्य वृत्तं चरित्रं । "वृत्तं पद्येचरित्रे" इत्यमरः । यथा येनप्रकारेण । नारदात् ते त्वया । श्रुतं । तेनप्रकारेण । कथय संक्षेपेणकथयेत्यर्थः ॥३२॥ पुनर्विस्तरेणरामचरित्रवर्णनंनियोक्ष्यमाणस्तद्विषयज्ञानलाभमनुगृह्णाति—रहस्यमित्यादिना । श्लोकद्वयमेकवाक्यं । धीमतइतिरहस्यवृत्तसंभवहेतुतयोक्तं । सुमित्रायाअपत्यंपुमान्सौमित्रिः । बाह्वादित्वादिञ् । सहसौमित्रेः सौमित्रिसहितस्य । धीमतस्तस्य रामस्य । रहस्यं अनितरविदितंच । प्रकाशं सर्वविदितंच । यद्वृत्तं । राक्षसानां रावणादीनांच । सर्वशः सर्वप्रकारं रहस्यप्रकाशरूपंयद्वृत्तंतत् । वैदेह्याः सीतायाश्च । अपिशब्दाद्भरतादीनांच । प्रकाशं । यदिवा रहो रहस्यंवा । यद्वृत्तं तच्चसर्वमविदितमपिनारदमुखेनाज्ञातमपि । तेविदितंभविष्यतीतियोजना ॥ ३३ ॥ ॥ ३४ ॥ एवंयथार्थदर्शित्वमनुगृह्ययथार्थवादित्वमनुगृह्णाति—नेति । अत्र करिष्यमाणेकाव्ये ते वाक्काचिदपि किंचिदपिवाक्यमित्यर्थः । अनृता बाधितार्था । नभविष्यति । यद्वा । वाक् पदं । कदाचिदपि । अनृता दुष्टा । नभविष्यति । तेन काव्यदोषत्वेनोक्तपदवाक्यतदर्थदोषशून्यत्वमुक्तं । अतः रामकथां रामविषयप्रबन्धकल्पनां । कुरु । काव्यनिर्माणप्रयोजनमाह । पुण्यां पापहरां । प्रयोजनान्तरमाह । मनोरमां शब्दश्रवणसमनंतरमेवविगलितवेद्यान्तरमानन्दंजनयन्तीमित्यर्थः । श्लोकबद्धामित्यनेन गद्यप्रबन्धेभ्योहर्षचरितजातीयेभ्योमिश्रप्रबन्धेभ्योनाटकादिभ्यश्चव्यावृत्तिरुक्ता ॥३५॥ यशोपिकाव्यनिर्माणप्रयोजनमित्याह—

तनि० मच्छन्दात् भगवच्छन्दानुवृत्तमत्संकल्पादेव नतु घुणाक्षरन्यायात् । प्रवृत्ता "स्वयमेवागतावरा" इतिस्वारसिकतया प्रवृत्ता । इयं रसभावालंकारवस्तुभेदभिन्नध्वनिसमुदायाश्रयतयाप्रवृत्ता । सरस्वती सृगताविति धातोरुत्पन्नःसरश्शब्दःप्रवाहेवर्तते । सरोस्यास्तीतिसरस्वती । तेनानर्गलप्रवाहतयासर्वतोमुखत्वमुक्तं । रूढ्यादेवताविशेषोक्तिः । वागधिष्ठानदेवतैवजिह्वाग्रेवर्ततइति भावः । सरस्वतीत्यन्तर्वाहिनीत्वप्रतीत्याकाव्यस्यानेकध्वनिगर्भितत्वंद्योत्यते । रामस्य रमतइति रमन्तेऽत्रेतिच स्वयमानन्दपूर्णतयास्वेतररमयितृत्वेनप्रसिद्धस्य । एतेन "नायकोयदिवर्ण्येतलोकोत्तरगुणोत्तरः" इतिप्रसिद्धलोकोत्तरनायकत्वंद्योत्यते । कृत्स्नं चरितं रहस्यप्रकाशात्मकं सर्वंचरितंत्वंकुरु राममन्त्रानुसंधानजनितजन्मपरिशुद्धिस्त्वमेवकुर्वित्यर्थः । ऋषिसत्तम जन्मान्तरसहस्रतपोध्यानादिपरिपक्वकषायतयानिष्पन्नभगवद्भक्तिपरीवाहप्रवृत्तरामावताररहस्यज्ञानेन चिकीर्षितप्रबन्धेसामर्थ्यं तवैवास्तीतिभावः ॥ ३१ ॥ **शिरो०** यद्वा अलोकेषुप्राकृतलोकविलक्षणेषुवैकुण्ठादिषुगीयमाना रामायणकथा, यावत्कालं गिरयःपर्वताः सरितो नद्यश्चस्थास्यन्ति तावत्कालंमहीतलेप्रचरिष्यतित्वन्नाम्नाप्रचारंप्राप्स्यति अतएवमहीतलेइत्यस्यनवैयर्थ्यम् ॥ ३६ ॥

[**पा०**] १ ख. श्रीरामचरितं. २ ज. लोकनाथस्य. ३ ख. वीरस्य. घ. तत्त्वेन. ङ. रामस्य. ४ घ. ह्याश्चापि.

यावद्रामस्य च कथा त्वत्कृता प्रचरिष्यति ॥ तावदूर्ध्वमधश्च त्वं मल्लोकेषु निवत्स्यसि ॥ ३७ ॥
इत्युक्त्वा भगवान्ब्रह्मा तत्रैवान्तरधीयत ॥ ततः सशिष्यो वाल्मीकिर्मुनिर्विस्मयमाययौ ॥ ३८ ॥
तस्य शिष्यास्ततः सर्वे जगुः श्लोकमिमं पुनः ॥ मुहुर्मुहुः प्रीयमाणाः प्राहुश्च भृशविस्मिताः ॥३९॥
समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा ॥ सोनुव्याहरणाद्भूयः श्लोकः श्लोकत्वमागतः ॥ ४० ॥
तस्य बुद्धिरियं जाता वाल्मीकेर्भावितात्मनः ॥ कृत्स्नं रामायणं काव्यमीदृशैः करवाण्यहम् ॥४१॥
उदारवृत्तार्थपदैर्मनोरमैस्तदास्य रामस्य चकार कीर्तिमान् ॥
समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदारधीर्मुनिः ॥ ४२ ॥

यावदिति । गिरयः सरितश्च । महीतले भूतले । यावत्स्थास्यन्ति । तावत् । रामायणकथा रामायणरूपा कथा । लोकेषु सप्तसु । प्रचरिष्यति । यावत्त्वत्प्रबन्धप्रचारस्तावत्तव यशो भविष्यतीतिहृदयं ॥३६॥ यशसःस्वतोऽपुरुषार्थत्वात्तत्फलमाह—यावद्रामेति । किंच त्वत्कृता रामस्यकथा । यावत्प्रचरिष्यति तावत् । मल्लोकेषुमध्ये यावच्छरीरपातं अधः भूमौ । तदुपरि ऊर्ध्वंच । निवत्स्यसि ॥ ३७ ॥ तत्रैव आसनएव ॥ ३८ ॥ ततः मुनिविस्मयानन्तरं । सर्वे तस्य वाल्मीकेः । शिष्याः । मुहुर्मुहुःप्रीयमाणाःसन्तः । इमं मानिषादेतिश्लोकं । पुनर्जगुः । भृशंविस्मिताः अत्यन्तंविस्मिताःसन्तः । "अव्ययमात्रस्यसमासेतुलोपः" इतिमलोपः । प्राहुश्च अन्योन्यमिदमद्भुतमितिप्राहुश्चेत्यर्थः । आश्रमएवस्थिताभ्यांकुशलवाभ्यांभरद्वाजेनचात्रबहुवचनं ॥ ३९ ॥ यः । समाक्षरैरिति विषमवृत्तव्यावृत्तिः । चतुर्भिरित्यर्धसमवृत्तव्यावृत्तिः । पादैश्चतुर्थांशैः । महर्षिणा गीतः उक्तः । सः श्लोकः । अनुव्याहरणात् शिष्यैःपुनःपुनर्व्यवह्रियमाणत्वात् । भूयः श्लोकत्वमागत इति । पूर्वंश्लोकलक्षणलक्षितत्वात् श्लोकत्वंगतः संप्रतिश्लोक्यमानत्वात् पुनःश्लोकत्वंगतइत्यर्थः । शोकःश्लोकत्वमागत इतिपाठे शोककृतश्लोकएवशोकइत्युच्यतइतिज्ञेयं । यःश्लोकः महर्षिणासमाक्षरैश्चतुर्भिःपादैर्बद्धःश्लोकःक्रौञ्चीविषयः तादृशश्लोकत्वमागतः सशोकवेगादुत्पन्नइत्यर्थः । कथमवगम्यते । अनुव्याहरणात् । अनु पश्चात् शोकानन्तरं उच्चारणात् शोकेसतिजातत्वादित्यर्थः ॥४०॥ अथमुनेःकृतिप्रणयनविषयसंकल्पमाह—तस्येति । भावितात्मनः चिन्तितपरमात्मनः । अनेनारंभकर्तव्यं विघ्नविघातकंमङ्गलंमुनिनाआचरितमित्युक्तं । तस्य वाल्मीकेः । इयंबुद्धिर्जाता ॥ इदंशब्दार्थमाह—कृत्स्नमित्यादिना । सर्वंरामायणाख्यंकाव्यं । ईदृशैः मानिषादेतिश्लोकप्रकारैःश्लोकैः । करवाणि इतिइयंबुद्धिरित्यन्वयः । ईदृशैरिति प्रायिकाभिप्रायमेतत् । वृत्तान्तराणामपितत्रतत्रप्रयोगात् ॥ ४१ ॥ अथयथासंकल्पं काव्यरचनामाह—उदारेति । कीर्तिरस्यास्तीतिकीर्तिमान् । अनेन "काव्यंयशसेऽर्थकृतेव्यवहारविदेशिवेतरक्षतये । सद्यःपरनिर्वृतयेकान्तासंमिततयोपदेशयुजे" इत्यालंकारिकोक्तकाव्यप्रयोजनेष्वस्ययशएवप्रधानंप्रयोजनमितिदर्शितं । काव्यनिर्माणानन्तरंभाविनो यशसःपूर्वभावोक्त्याऽतिशयोक्तिरुक्ता । उदारामहती

शिरो० मल्लोकेषु ममलोकोदर्शनं येषुतेषुस्थानेषु निवत्स्यसि । मत्समीपएव त्वां निवासयिष्यामीत्यर्थः । एतेनवाल्मीकिमुखनिस्सृतरामायणकथातिशुश्रूषा ब्रह्मणोस्तीति ध्वनितम् ॥ ३७ ॥ **तिल०** अनु अतिशयितशोकोत्पत्त्यनन्तरंव्याहरणात्भूयः शोकोविपुलः शोकएवश्लोकत्वंप्राप्तइति वयंमन्यामहेइतिप्राहुरितिपूर्वेणसंबन्धः । उत्प्रेक्षाचेयं । तेनास्य श्लोकस्य करुणरसमयत्वं ध्वनितम् । अत्र नष्टक्रौञ्चालंबनकःक्रौञ्चीविरावानुदीपितः निषादविषयक्रोधव्यभिचारिकः "मानिषाद" इत्यादिवाक्यानुभाविकः करुणोरसइतिबोध्यम् ॥ ४० ॥ **तिल०** ईदृशैः "मानिषाद" इतिवत् करुणरसप्रधानैरित्यर्थः । अनेनान्येरसाः अत्रगुणीभूता इतिध्वनितम् । **शिरो०** ईदृशैः "मानिषाद" इतिवद्गानयोग्यैः पद्यैः ॥ ४१ ॥ **तिल०** उदारस्ययद्वृत्तं चरितं उदारंवायच्चरितं तद्रूपार्थबोधकैः पदैः । मनोरमैः श्रुतिकटुत्वादिदोषरहितैः अस्य यशस्विनोरामस्यदाशरथेरामस्यनारदोपदिष्टस्य । श्लोकशतैरितिशतशब्दोऽनन्तवाची । **शिरो०** उदारवृत्तार्थपदैः उदाराः अभीष्टार्थदातारः वृत्तार्थाः रघुनाथचरितरूपार्थाःयेषु तान्येव पदानितैः "उदारोदातृमहतोः" इतिकोशः ॥ ४२ ॥

[पा०] १ घ. मम लोके. २ क.—झ. भगवान्मुनिः. ३ क.—झ. शोकः श्लोकत्वं. ४ ङ. च. ज. झ. महर्षेर्भा. ५ घ. च. छ. तदस्य. ६ ङ. झ. मुदारदर्शनः.

तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम् ॥
रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्वितीयः सर्गः ॥ २ ॥

धीर्यस्यासौ उदारधीः । "उदारोदातृमहतोः" इत्यमरः । तेन कवित्वबीजभूता निपुणतोक्ता । तदुक्तंकाव्यप्रकाशे "शक्तिर्निपुणतालोककाव्यशास्त्राद्यवेक्षणात् । काव्यज्ञशिक्षयाभ्यासइतिहेतुस्तदुद्भवे" इति । मुनिः मननशीलः । अनेन विविक्तसेवित्वमरोचकित्वंचोक्तं । तदुक्तंवामनेन "द्वयेहिकवयःअरोचकिनःसतृणाऽभ्यवहारिणश्च" इत्यादि । तदा ब्रह्मवरप्रदानानन्तरकाले । अनेनकवित्वहेतुभूताशक्तिरुक्ता । यशस्विनोपिरामस्य यशस्करं । तदुक्तंदण्डिना "आदिराजयशोबिंबमादर्शंप्राप्यवाङ्मयं । तेषामसन्निधानेपिनस्वयंपश्यनश्यति" इति । इतरकीर्त्यपेक्षयाकाव्यनायकत्वकृताकीर्तिरनुपमेत्यर्थः । काव्यं । कविर्लोकोत्तरवर्णननिपुणः । कवेःकर्मकाव्यं शब्दार्थयुगलं । तथोक्तं "सगुणौसालंकारौशब्दार्थौदोषवर्जितौकाव्यं" इति । अत्रकाव्यशब्देनकाव्यसंदर्भरूपंमहाकाव्यमुच्यते । तल्लक्षणमुक्तंकाव्यादर्शे "सर्गबन्धो महाकाव्यमुच्यतेतस्यलक्षणं । आशीर्नमस्क्रियावस्तुनिर्देशोवाऽपितन्मुखं । इतिहासकथोद्भूतमितरद्वासदाश्रयं । चतुर्वर्गफलायत्तंचतुरोदात्तनायकं । नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः । उद्यानसलिलक्रीडामधुपानरतोत्सवैः । विप्रलंभैर्विवाहैश्चकुमारोदयवर्णनैः । मन्त्रद्यूतप्रयाणाजिनायकाभ्युदयैरपि । अलंकृतमसंक्षिप्तंरसभावनिरन्तरं । सर्गैरनतिविस्तीर्णैःश्राव्यवृत्तैःसुसन्धिभिः । सर्वत्रभिन्नसर्गान्तैरुपेतंलोकरञ्जनं । काव्यंकल्पान्तरस्थायिजायतेसदलंकृति" इति । एवंभूतंकाव्यंश्लोकशतैरवयवैश्चकार । श्लोकशब्देनगद्यपद्यमिश्रप्रबन्धेषुस्वग्रन्थस्यपद्यरूपतादर्शिता । शतैरित्यनेन शतकादिक्षुद्रप्रबन्धव्यावृत्तिरुक्ता । बहुवचनार्थंच स्वयमेवविवरिष्यति "चतुर्विंशत्सहस्राणि" इति । कीदृशैःश्लोकशतैः । उदारवृत्तार्थपदैः उदाराणिमहान्ति वृत्तार्थपदानियेषांतैः । वृत्तानिपथ्यावक्त्रोपजातिवंशस्थवसन्ततिलकादीनि । तेषामुदारत्वंनामतत्तद्रसाभिव्यञ्जकत्वं । अर्थाः वाच्यलक्ष्यव्यङ्ग्याः । तेषामुदारत्वंद्राक्षापाकनारिकेलपाकरसालपाकेषुद्राक्षापाकवत्त्वं । एतल्लक्षणमुक्तंरुद्रटेन "द्राक्षापाकःसकथितोबहिरंतःस्फुरद्रसः" इति । पदानि वाचकलक्षकव्यञ्जकानि । तेषामुदारत्वं "यापदानांपरान्योन्यंमैत्रीशय्येतिकथ्यते" इत्युक्तलक्षणशय्यावत्त्वं । पुनःकीदृशैः । मनोरमैः रमणीयैः । अनेन वैदर्भीगौडीपाञ्चालीचेत्युक्तासुरीतिषुवैदर्भीरीतिमत्त्वमुक्तं । तल्लक्षणंचोक्तं "बन्धपारुष्यरहिताशब्दकाठिन्यवर्जिता । नातिदीर्घसमासाचवैदर्भीरीतिरिष्यते" इति । समाक्षरैः प्रतिपादंसमानाक्षरैः । अनेन विषमवृत्तादिरूपताव्यावृत्ता ॥ ४२ ॥ एवंप्रबन्धनिर्माणमभिधायकुशलवादिभ्यस्तत्प्रतिपादनंसंग्रहेणदर्शयति—तदिति । स्वग्रन्थस्योत्तमकाव्यत्वप्रदर्शनायनिर्दोषत्वमाह—उपगतसमाससन्धियोगमिति । समासास्तत्पुरुषादयः । सन्धयःसंहिताः । योगःपदव्युत्पत्तिः । उपगताः शास्त्रानुरूपेणप्राप्ताः समाससन्धियोगायस्मिन्तत्तथोक्तं । अनेन समासदोषसन्धिदोषपददोषशून्यत्वमुक्तं । प्रधानमल्लनिबर्हणन्यायेनैतत्सर्वदोषराहित्यस्योपलक्षणं । अथकाव्यगुणान्प्राधान्येनदर्शयति—समेति । समैर्मधुरैरुपनतार्थैर्वाक्यैर्बद्धंरचितं । तत्रसमतालक्षणमुक्तंदण्डिना "समंबन्धेष्वविषमंतेमृदुस्फुटमध्यमाः" इति । माधुर्यलक्षणंचतेनैवोक्तं । "मधुरंरसवद्वाचिवस्तुन्यपिरसस्थितिः । येनमाद्यन्तिधीमन्तोमधुनेवमधुव्रताः" इति । उपनतार्थत्वं अर्थव्यक्तिः । तत्स्वरूपंचतेनैवोक्तं "अर्थव्यक्तिरमेयत्वमर्थ-

तीर्था० सममधुरोपनतार्थवाक्यबद्धं समः सर्वोपादानत्वेनसर्वानुरागः मधुरः आनन्दैकरसः उपनतः नित्यापरोक्षतया प्राप्तः । यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुतेः । अर्थः श्रीरामब्रह्मरूपार्थो येषांतैर्वाक्यैर्बद्धम् ॥ **तिल०** एवंकाव्यनिर्माणमुक्त्वातत्रश्रोतॄनभिमुखीकरोति—तदिति ॥ ईदृशस्यापिमिथ्यार्थकत्वेऽनुपादेयत्वंस्यादतआह । मुनिप्रणीतं ब्रह्मानुग्रहप्राप्तसत्यवागृषिप्रणीतम् । पुरुषार्थस्वर्गमोक्षादिसाधनत्वंतु रघुवरचरितमित्यनेनोक्तप्रायमेव । दशशिरसश्चवधमित्यनेन वनान्तमिदं श्रोतव्यमितिसूचितम् । तेनैवसूचितफललाभात् । उत्तरकाण्डंत्वस्यखिलं भारतस्यहरिवंशवत् । अतएवाग्रिमसर्गे वनसंचरणपर्यन्तवृत्तान्वेषणमेवसमाधिनाकृषेर्वक्ष्यतीतिप्राञ्चः । परेतुदशशिरसोवधंचेत्यन्वयः । चेनसीतात्यागादिरूपोत्तरकाण्डीयवृत्तान्तसंग्रहइत्याहुः ॥

तृतीयः सर्गः ॥ ३ ॥

वाल्मीकिना ब्रह्मप्रसादाद्योगेन यावदर्थापरोक्षीकरणपूर्वकं काण्डसप्तकात्मकश्रीरामायणप्रणयनम् ॥ १ ॥

श्रुत्वा वस्तु समग्रं तद्धर्मात्मा धर्मसंहितम् ॥ व्यक्तमन्वेषते भूयो यद्वृत्तं तस्य धीमतः ॥ १ ॥
उपस्पृश्योदकं सम्यङ्मुनिः स्थित्वा कृताञ्जलिः ॥ प्राचीनाग्रेषु दर्भेषु धर्मेणान्वेषते गतिम् ॥ २ ॥
रामलक्ष्मणसीताभी राज्ञा दशरथेन च ॥ सभार्येण सराष्ट्रेण यत्प्राप्तं तत्र तत्वतः ॥ ३ ॥
हसितं भाषितं चैव गतिर्या यच्च चेष्टितम् ॥ तत्सर्वं धर्मवीर्येण यथावत्संप्रपश्यति ॥ ४ ॥

स्य " इति । रघुवंश्यारघवस्तेषुवरोरामस्तच्चरितं तच्चरितविषयकं । मुनिनावाल्मीकिनामयाप्रणीतं । मुनिनानारदेनवाप्रणीतं । दशशिरसः रावणस्य वधमधिकृत्यकृतंग्रन्थं । " अधिकृत्यकृतेग्रन्थे " इतिविहितस्याणोलुप् । निशामयध्वं निशामयध्वंनिशामयध्वमिति न्यशामयतेत्यर्थः । " क्रियासमभिहारेलोट्लोटोहिस्वौवाचतध्वमोः " इतितध्वमोर्हिस्वादेशस्यवैकल्पिकत्वात्ध्वमःपाक्षिकस्वादेशाभावः । " मितांह्रस्वः " इतिविहितस्यह्रस्वस्य " संज्ञापूर्वकोविधिरनित्यः " इतिअनित्यत्वात् तदभावः । किंतुणिचिदीर्घएव । अश्रावयदित्यर्थः । शिष्यानितिशेषः । " णिचश्च " इत्यात्मनेपदं । यद्वा । मुनिःरघुवरचरितंचकार । तन्निशामयध्वमितिशिष्यान्प्रतिपरोक्षतयोच्यते । श्रवणेपिचरितस्यदर्शनसमतयाभानान्निशामयध्वमित्युच्यते। "चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिवदर्शितं" इतिहि वक्ष्यते । पूर्वश्लोकेवंशस्थवृत्तं । "जतौतुवंशस्थमुदीरितंजरौ " इतिलक्षणात् । अत्रपुष्पिताग्रावृत्तं । "अयुजिनयुगरेफतोयकारोयुजिचनजौजरगाश्चपुष्पिताग्रा" इतिलक्षणात् ॥४३॥ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

पूर्वस्मिन्सर्गेस्वग्रन्थस्यात्यन्तादरणीयत्वद्योतनायपरमाप्तत्वरूपंवक्तृवैलक्षण्यंप्राधान्येनोक्तं । संप्रतितदर्थमेवविषयवैलक्षण्यंदर्शयति । विषयस्यवैलक्षण्यंनाम सम्यग्ज्ञानावधृतत्वं लोकोत्तरनायकगुणपरिष्कृतत्वं च । तत्रप्रथमंसम्यग्ज्ञानावधृतत्वंविवक्षुस्तद्धेत्वन्वेषणमाह—श्रुत्वेति । धर्मआत्मास्वभावोयस्यासौधर्मात्मा इत्यन्वेषणहेतूक्तिः । धर्मसंहितं धर्मसहितं "समोवाहितततयोः" इतिविकल्पितत्वान्मकारलोपाभावः । समग्रं कृत्स्नं । तत् नारदोक्तं । वस्तु कथाशरीरं । श्रुत्वा भूयः ततोधिकं । धीमतोरामस्य यद्वृत्तं चरित्रमस्ति तद्व्यक्तंयथाभवतितथा । अन्वेषते पर्यालोचयतिस्म । "वर्तमानसामीप्येवर्तमानवद्वा" इति लट् ॥ १ ॥ धर्मात्मेत्यनेनसूचितमन्वेषणप्रकारमाह—उपेति । मुनिः सम्यक्यथाशास्त्रं उदकं उपस्पृश्य आचम्येत्यर्थः । " उपस्पर्शस्त्वाचमनं " इत्यमरः । प्राचीनाग्रेषु दर्भेषु स्थित्वा निजगुरुमुद्दिश्यकृताञ्जलिःसन् । धर्मेण ब्रह्मप्रसादरूपश्रेयस्साधनेन । गतिं रामादिवृत्तं । अन्वेषते ।।२।। गतिशब्दार्थंविवृण्वन्धर्मेणअन्वेषणफलमाह—रामेति । रामादिभिर्यत्प्राप्तं तत्र विषये । तत्वतः तत्वेन । संप्रपश्यति समन्तात्प्रकर्षेणपश्यति । तत्सर्वंविशदतरंपश्यतीत्यनुषज्यते ॥ ३॥ किंप्राप्तंतत्राह—हसितमिति । पूर्वोक्तरामादीनांयत् हसितं हासः । यच्चभाषितं भाषणं भावोक्तः । याच गतिः गमनं । यच्चचेष्टितं चेष्टा युद्धादिकमितियावत् । तत्सर्वं । धर्मवीर्येण ब्रह्मवरप्रसादशक्त्या । यथावत् तत्वेन । संप्रपश्यति । अत्रयोगजधर्मस्थानीयत्वात् ब्रह्मप्रसादोधर्मशब्देनोच्यते । सचसाक्षात्कारहेतुश्च-

---

विषम० अत्ररघेर्गत्यर्थान्निष्पन्नरघुवरशब्देनतस्यसर्वान्तर्यामित्वंध्वनितं तेनतच्चरितस्य स्वर्गमोक्षादिसर्वपुरुषार्थसाधनत्वमुक्तं भवति ॥ ४३ ॥ इतिद्वितीयःसर्गः ॥ २ ॥

तिल० धर्मार्थसहितं धर्मार्थेतित्रिवर्गोपलक्षणम् फलत्वेनतत्सहितम् । हितंमोक्षफलकम् अन्वेषतेस्मेतिशेषः ॥ १ ॥ **तिल०** धर्मेणयोगजेन । अन्वेषतेअतियत्नेनपश्यतिस्म । **शिरो०** कृताञ्जलिः प्रार्थनासूचकबद्धकरयुगलः ॥ २ ॥ **तीर्थी०** तत्र राष्ट्रे । **तिल०** तत्रसमाधौ पश्यतिस्म ॥ ३ ॥ **शिरो०** धर्मवीर्येण रघुनाथस्मरणरूपबलेन ॥ ४ ॥

[पा०] १ क. ङ. छ. झ. मार्थसहितं हितं. घ. ज. मार्थसमसम्मितं. २ ख. सभार्येणचयत्प्राप्तंतत्रतत्रचतत्वतः ३ घ. ङ. च. छ. झ. यांवच.

स्त्रीतृतीयेन च तथा यत्प्राप्तं चरता वने ॥ सत्यसन्धेन रामेण तत्सर्वं चान्ववेक्षितम् ॥ ५ ॥
ततः पश्यति धर्मात्मा तत्सर्वं योगमास्थितः ॥ पुरा यत्तत्र निर्वृत्तं पाणावामलकं यथा ॥ ६ ॥
तत्सर्वं तत्वतो दृष्ट्वा धर्मेण स महाद्युतिः ॥ अभिरामस्य रामस्य चरितं कर्तुमुद्यतः ॥ ७ ॥
कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरम् ॥ समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरम् ॥ ८ ॥
स यथा कथितं पूर्वं नारदेन महर्षिणा ॥ रघुवंशस्य चरितं चकार भगवानृषिः ॥ ९ ॥
जन्म रामस्य सुमहद्वीर्यं सर्वानुकूलताम् ॥ लोकस्य प्रियतां क्षान्तिं सौम्यतां सत्यशीलताम् ॥१०॥
नानाचित्रकथाश्चान्या विश्वामित्रसमागमे ॥ जानक्याश्च विवाहं च धनुषश्च विभेदनम् ॥ ११ ॥

क्षुरादिवदितिप्रमाणतोऽध्यवसीयते ॥ ४ ॥ नगरनिवासकालिकचरितावलोकनमभिधायवनवासकालिकवृत्तान्तनिरीक्षणमाचष्टे—स्त्रीति । स्त्रीतृतीयायस्यतेन सीतालक्ष्मणसहितेनेत्यर्थः । वने दण्डकारण्ये । चरता । सत्यसन्धेन सत्यप्रतिज्ञेन । रामेण । यत्प्राप्तं तत्सर्वंच । अन्ववेक्षितं साक्षात्कृतं । वाल्मीकेनेतिशेषः । धर्मवीर्येणेतिसिद्धं ॥ ५ ॥ एवंरामादिवृत्तान्तदर्शनस्यविशदतमत्वमाह—ततइति । ततः अवेक्षणानन्तरं । धर्मात्मा वाल्मीकिः । योगं ब्रह्मप्रसादरूपोपायं । आस्थितःसन् । "योगःसन्नहनोपायध्यानसंगतियुक्तिषु" इत्यमरः । तत्र रामादौ । पुरा यन्निर्वृत्तं निष्पन्नं । तत्सर्ववृत्तं पाणौ आमलकमिवपश्यतिस्म ॥ ६ ॥ अथदर्शनफलग्रन्थनिर्माणोद्योगमाह—तदित्यादि । श्लोकद्वयमेकान्वयं । महाद्युतिः रामगुणानुभवजनितहर्षप्रकर्षकृतद्युतियुक्तः । सः वाल्मीकिः । तत्सर्वं रामवृत्तान्तं । तत्वतोधर्मेण पूर्वोक्तेन दृष्ट्वा । अभिरामस्य निरवधिकभोग्यस्य । चरितं चरितविषयप्रबन्धं । कर्तुमुद्यतः उद्युक्तोऽभूत् । कीदृशंचरित्रमित्यत्राह—कामार्थेति । कामश्चार्थश्चकामार्थौ गुणशब्देनाप्राधान्यमुच्यते । अप्रधानाभ्यामर्थकामाभ्यांसंयुक्तं त्याज्यताप्रदर्शनार्थंतत्रतत्रार्थकामप्रतिपादकमित्यर्थः । धर्मार्थयोर्धर्ममोक्षयोर्गुणोतिशयस्तंविस्तृणातीति धर्मार्थगुणविस्तरं । पचाद्यच् । प्राधान्येनधर्मापवर्गप्रतिपादकमित्यर्थः । "अर्थःस्याद्विषयेमोक्षेशब्दवाच्येप्रयोजने" इतिवैजयन्ती । अतएव रत्नाढ्यंसमुद्रमिवस्थितं । समुद्रोयथाशङ्खशुक्त्यादियुक्तोपि प्राधान्येनरत्नानिवहतितथास्थितमित्यर्थः । सर्वेषांजनानां । श्रुतिमनसीश्रोत्रहृदये हरतीति सर्वश्रुतिमनोहरं । शब्दमाधुर्याच्छ्रोत्राकर्षकं अर्थसौष्ठवाच्चित्ताकर्षकमित्यर्थः ॥ ७ ॥ ८ ॥ यथोद्योगंप्रबन्धनिर्माणमाह—सइति । भगवान्सऋषिः । रघुवंशस्य रघुवंशोद्भवस्यरामस्य । चरितं । पूर्वंनारदेनमहर्षिणा । यथा कथितं येनप्रकारेणोक्तं । तथा चकार ॥ ९ ॥ अथ विस्तरेणब्रह्मोपदिष्टरीत्यारामचरितनिर्माणंदर्शयति—जन्मेत्यादिनासर्गशेषेण । द्वितीयान्तानांतत्प्रतिपादकपरत्वंबोध्यं । वाल्मीकिर्भगवानृषिश्चकारेतिवक्ष्यमाणेकर्तृक्रिये अनुषञ्जनीये । जन्मनःसुमहत्त्वं दशरथमहातपोबललभ्यत्वं विष्णोरवतारत्वंच । वीर्यं ताटकाताटकेयादिहननक्षमंबलं । सर्वानुकूलतां सर्वानुवर्तित्वं आर्जवमितियावत् । लोकस्यप्रियतां प्रेमास्पदत्वं । क्षान्तिं अपराधसहिष्णुतां । सौम्यतां रम्यतामनुमतांवा । "सौम्यःपुमान्बुधेविप्रेत्रिषुस्यात्सोमदैवते । रम्येनुग्रेच" इतिरत्नमाला । सत्यशीलतां सत्यस्वभावतां "शीलंस्वभावेसद्वृत्ते" इत्यमरः ॥ १० ॥ विश्वामित्रसमागमे विश्वामित्रेणरामलक्ष्मणयोःसंयोगेसति । अन्याः रामचरितादन्याः । नाना नानाप्र-

तिल० तत्सर्वंचेतिचस्यतदुत्तरकालिकमुत्तरकाण्डस्थचेत्यर्थइत्यपरे ॥ ५ ॥ **तीर्थी०** रत्नाढ्यं रत्नतुल्यैःपदैरर्थैः आढ्यं संपूर्णम् । सर्वश्रुतिमनोहरम् सर्वाभिः षड्जादिसर्वसंबन्धिनीभिः कान्ताप्रभावतीप्रभृतिभिः द्वाविंशतिश्रुतिभिः मनोहरम् । श्रुतिशब्देन नाडीसमुद्भवःसुखहेतुर्ध्वनिविशेषउच्यते ॥ यद्वा सर्वासांश्रुतीनामुपनिषदांमनोहृदयंतात्पर्यंहरतिगृह्णातिप्रतिपादयतीतितथा । **तिल०** रत्नाढ्यंरत्नैः काव्यगुणालंकारव्यङ्ग्यैः आढ्यंपूर्णम् ॥ ८ ॥ **तिल०** विश्वामित्रसहायनेविश्वामित्रेण सहगमने

[पा०] १ क. ख. ग. घ. च. छ. तदा. २ ङ. ज. झ. चान्ववैक्षत. ३ क. ग. ङ. झ. महामतिः. ज. महामुनिः. ४ क. ग. ङ. च. छ. झ. तत्सर्वंकर्तुं. ५ ख. संपन्नं. ६ घ. तद्यथा. ७ ङ—झ. महात्मना. ख. सुरर्षिणा. ८ क. ख. रघुनाथस्य. ९ ङ. च. छ. झ. वान्मुनिः. ख. सुमहानृषिः. १० ग—छ. झ. चित्राः कथाः. क. विधाः कथाः. ११ ङ. च. छ.झ. सहायने. ज. समागमं.

रामरामविवादं च गुणान्दाशरथेस्तथा ॥ तथाभिषेकं रामस्य कैकेय्या दुष्टभावताम् ॥ १२ ॥
विघातं चाभिषेकस्य रामस्य च विवासनम् ॥ राज्ञः शोकंविलापं च परलोकस्य चाश्रयम् ॥ १३ ॥
प्रकृतीनां विषादं च प्रकृतीनां विसर्जनम् ॥ निषादाधिपसंवादं सूतोपावर्तनं तथा ॥ १४ ॥
गङ्गायाश्चापि संतारं भरद्वाजस्य दर्शनम् ॥ भरद्वाजाभ्यनुज्ञानाच्चित्रकूटस्य दर्शनम् ॥ १५ ॥
वास्तुकर्म विवेशं च भरतागमनं तथा ॥ प्रसादनं च रामस्य पितुश्च सलिलक्रियाम् ॥ १६ ॥
पादुकाग्र्याभिषेकं च नन्दिग्रामनिवासनम् ॥ दण्डकारण्यगमनं विराधस्य वधं तथा ॥ १७ ॥
दर्शनं शरभङ्गस्य सुतीक्ष्णेनाभिसंगमम् ॥ अनसूयासहास्यामप्यङ्गरागस्य चार्पणम् ॥ १८ ॥
अगस्त्यदर्शनंचैवजटायोरभिसंगमम् ॥ पञ्चवट्याश्च गमनं शूर्पणख्याश्च दर्शनम् ॥ १९ ॥
शूर्पणख्याश्च संवादं विरूपकरणं तथा ॥ वधं खरत्रिशिरसोरुत्थानं रावणस्य च ॥ २० ॥
मारीचस्य वधं चैव वैदेह्या हरणं तथा ॥ राघवस्य विलापं च गृध्रराजनिबर्हणम् ॥ २१ ॥
कबन्धदर्शनं चापि पंपायाश्चापि दर्शनम् ॥ शबर्यां दर्शनं चैव हनूमद्दर्शनं तथा ॥
विलापं चैव पंपायां राघवस्य महात्मनः ॥ २२ ॥

कारा: चित्रकथा: आश्चर्यावहकथाश्च । जानक्याश्चेतिचकारेणोर्मिलादयः समुच्चीयन्ते । धनुषः हरचापस्य । विभेदनं भङ्गंच ॥११॥ रामेण परशुरामेण । रामस्य राघवस्यविवादं । रामेणरामविवादमित्यत्रतृतीयेतियोगविभागात्समासः । अतोनैकशेषप्रसक्तिः । दाशरथेर्गुणान् अयोध्याकाण्डादौवक्ष्यमाणान् । तथेति समुच्चयार्थःसर्वत्रद्रष्टव्यः । रामस्यअभिषेकं अभिषेकोद्योगं कैकेय्यादुष्टभावतां दुष्टहृदयत्वंच ॥ १२ ॥ अभिषेकस्य रामाभिषेकस्य । विघातं कैकेयीदुष्टहृदयत्वकृतंविघ्नंच । रामस्यविवासनंच राज्ञः दशरथस्य । शोकेनविलापं प्रलापंच । राज्ञः परलोकस्य स्वर्गस्य । आश्रयं आश्रयणं च ॥ १३ ॥ प्रकृतीनां प्रजानां । विषादं दुःखं । प्रकृतीनांविसर्जनं वञ्चनेननिर्यापणंच । निषादाधिपसंवादं गुहेनसहसंभाषणं । सूतस्योपावर्तनं पुनरागमनंच ॥ १४ ॥ १५ ॥ वास्तुकर्म शास्त्रोक्तप्रकारेणयथोचितमन्दिरनिर्माणं । विवेशं शास्त्रोक्तवास्तुपूजादिपूर्वकंगृहेप्रविश्यावस्थानं । रामस्यप्रसादनं भरतेनेतिशेषः । सलिलक्रियां सलिलदानं ॥ १६ ॥ पादुकाग्र्ययोःपादुकाश्रेष्ठयोः । श्रेष्ठ्यंधृतत्वात् । अभिषेकं राज्यनियंतृतयास्थापनं । नन्दिग्रामे निवासनं निवसनं । स्वार्थेण् । पादुकयोःस्थापनं वा ॥ १७ ॥ अनसूयया अत्रिपत्न्या । सहास्यां सहासनं । सीतायाइतिशेषः । "आस्यात्वासनमासीनं—" इत्यमरः । यद्यप्येतद्विराधवधात्पूर्वमेवतथापि अत्रसर्वत्रक्रमोनविवक्षितः । रामायणप्रतिपाद्यसंक्षेपमात्रेतात्पर्यात् । अङ्गरागस्य चन्दनस्य ॥ १८ ॥ शूर्पणख्याइतिङीबत्रार्षः ॥ १९ ॥ खरत्रिशिरसोरितिदूषणादीनामुपलक्षणं । उत्थानं निर्गमनं ॥ २० ॥ एवकारःपादपूरणार्थः । एवमुत्तरत्रसर्वत्रद्रष्टव्यं ॥ २१ ॥ चापीत्येकनिपातःसमुच्चयार्थः

तदुपस्थितिकालेसभायां मार्गेगमनकालेच । चित्रानानाकथाः अन्याश्चकथाः योगवासिष्ठोक्ताःब्रह्मप्रतिपादिकाःकथाः अत्रमंथेउक्तागङ्गादिकथाश्चेत्यर्थः । एतेनात्र श्लोके नानेति अन्याइतिचव्यर्थमित्यपास्तम ॥११॥ **शिरो०** दुष्टभावतां प्रातिभासिकदुष्टस्वभावत्वं ॥ १२ ॥ **शिरो०** शोकं प्रकटीभूतरामवियोगजनितशोचनम् । विलापं तच्छोकजनितहारामेत्याद्युच्चारणंच । परलोकस्य अप्रकटायोध्यापुरस्य आश्रयंस्थितिंच ॥ १३ ॥ **तिल०** अभ्युज्ञानात् संमतेः ॥ १५ ॥ **तीर्थी०** निवेशं तत्रगृहेऽवस्थानम् ॥ १६ ॥ **तिल०** नन्दिग्रामनिवासनं नन्दिग्रामस्य नितरां अतिशयेनवासनम् । भरते तत्रगते सर्वप्रजास्तत्रैव वासंकृतवत्यइत्यर्थः ॥ १७ ॥ **तिल०** धनुषोग्रहणं अगस्त्यसकाशादितिशेषः ॥ १९ ॥ **विषम०** उत्थानं जानकीहरणोद्योगम् ॥ २० ॥

[पा०] १ ख. तथारामाभिषेकंच. २ ख. ग. घ. ज. व्याघातं. ३ ङ—झ. ट. शोकंविलापं. ४ प्रकृतेः सामवादंच. ५ ख. सूतस्यपरिवर्तनं. ६ क—झ. निवेशं. ७ क—झ. क्षणेनसमागमं. ८ क. ग—छ. झ. समास्यां च अङ्ग. ख. सपर्यांच. ९ क. ख. छ. झ. दर्शनं चाप्यगस्त्यस्यधनुषोग्रहणंतथा. १० घ—छ. झ. शबरीदर्शनं. ङ. झ. शबरीदर्शनंचैवफलमूलाशनंतथा. प्रलापंचैवपम्पायांहनूमद्दर्शनंतथा. ऋश्य०.

ऋश्यमूकस्य गमनं सुग्रीवेण समागमम् ॥ प्रत्ययोत्पादनं सख्यं वालिसुग्रीवविग्रहम् ॥ २३ ॥
वालिप्रमथनं चैव सुग्रीवप्रतिपादनम् ॥ ताराविलापं समयं वर्षरात्रनिवासनम् ॥ २४ ॥
कोपं राघवसिंहस्य बलानामुपसंग्रहम् ॥ दिशः प्रस्थापनं चैव पृथिव्याश्च निवेदनम् ॥ २५ ॥
अङ्गुलीयकदानं च ऋक्षस्य बिलदर्शनम् ॥ प्रायोपवेशनं चैव संपातेश्चैव दर्शनम् ॥ २६ ॥
पर्वतारोहणं चैव सागरस्य च लङ्घनम् ॥ समुद्रवचनाच्चैव मैनाकस्य च दर्शनम् ॥ २७ ॥
राक्षसीतर्जनं चैव छायाग्राहस्य दर्शनम् ॥ सिंहिकायाश्च निधनं लङ्कामलयदर्शनम् ॥
रात्रौ लङ्काप्रवेशं च एकस्य च विचिन्तनम् ॥ २८ ॥
आपानभूमिगमनमवरोधस्य दर्शनम् ॥ दर्शनं रावणस्यापि पुष्पकस्य च दर्शनम् ॥ २९ ॥
अशोकवनिकायानं सीतायाश्चैव दर्शनम् ॥ अभिज्ञानप्रदानं च सीतायाश्चाभिभाषणम् ॥ ३० ॥
राक्षसीतर्जनं चैव त्रिजटास्वप्नदर्शनम् ॥ मणिप्रदानं सीताया वृक्षभङ्गं तथैव च ॥ ३१ ॥
राक्षसीविद्रवं चैव किङ्कराणां निबर्हणम् ॥ पञ्चसेनाग्र्यनिधनं सप्तमन्त्रिनिबर्हणम्॥ ३२ ॥
तथाऽक्षस्यापि निधनं तोरणस्य विभञ्जनं ॥ ग्रहणं वायुसूनोश्च लङ्कादाहाभिगर्जनम् ॥ ३३ ॥
प्रतिप्लवनमेवाथ मधूनां हरणं तथा ॥ राघवाश्वासनं चैव मणिनिर्यातनं तथा ॥ ३४ ॥
संगमं च समुद्रेण नलसेतोश्च बन्धनम् ॥ प्रतारं च समुद्रस्य रात्रौ लङ्कावरोधनम् ॥ ३५ ॥
विभीषणेन संसर्गं वधोपायनिवेदनम् ॥ कुंभकर्णस्य निधनं मेघनादनिबर्हणम् ॥ ३६ ॥

॥ २२ ॥ ऋश्यमूकस्येतिकर्मणिषष्ठी । प्रत्ययोत्पादनं सालभेदनादिभिःसुग्रीवस्यविश्वासजननं । वालिसुग्रीवविग्रहं वालिसुग्रीवयुद्धं । वालिसुग्रीवयोर्वैरानुकथनं-वा ॥ २३ ॥ वालिप्रमथनं वालिवधं । सुग्रीवप्रतिपादनं सुग्रीवायराज्यप्रदानमित्यर्थः । ताराविलापं ताराप्रलापं । समयं शरदिसीतान्वेष्टव्येतिरामसुग्रीवयोः-संकेतं । " समयःकालसिद्धान्तप्रतिज्ञाशपथेषुच । संकेताचारयोश्च " इतिरत्नमाला । ताराविलापसमयमितिपाठे " सर्वोद्वन्द्वोविभाषयैकवद्भवति" इत्येकवद्भावः । वर्षरात्रनिवासनं वर्षवृष्टिः तद्युक्तारात्रयोवर्षरात्राः " रात्राह्नाहाःपुंसि " इतिपुँल्लिङ्गत्वं । तेषुनिवासनंनिवसनं । स्वार्थेण् । वर्षदिनेष्वित्यर्थः । रात्रिशब्दस्यदिवसपरत्वं त्रिरात्रादौदृष्टं ॥ २४ ॥ राघवसिंहस्य राघवाणांश्रेष्ठस्य । कोपं सुग्रीवविषयक्रोधं । बलानां सेनानां । उपसंग्रहं संमेलनं । दिशः प्रति वानराणांप्रस्थापनं । पृथिव्याश्चनिवेदनं पृथिव्याः द्वीपसमुद्रादिसंनिवेशकथनं ॥ २५ ॥ अङ्गुलीयकदानं हनुमतइतिशेषः । ऋक्षस्य बिलं स्वयंप्रभाबिलं । तस्य-तथासंज्ञा । प्रायोपवेशनं प्रायायमरणाय उपवेशनं शयनं । संपातेः जटाय्वग्रजस्य ॥ २६ ॥ पर्वतारोहणं समुद्रलङ्घनायमहेन्द्रपर्वतारोहणं । समुद्रवचनाच्चेतिचकारेण देवानुज्ञासमुच्चीयते । मैनाकस्य हिमवत्पुत्रस्यगिरेः ॥ २७ ॥ सिंहिकायाः असुरस्त्रियः । लङ्कामलयस्य लङ्काधारपर्वतैकदेशस्य । "मलयःपर्वतान्तरे । पर्वतांशेप्रियोद्याने " इतिरत्नमाला । एकस्य हनुमतः ॥ २८ ॥ आपानभूमिः मद्यपानभूमिः । अवरोधस्य अन्तःपुरस्य ॥ २९ ॥ अशोकवनिकायानं हनुमतोशोकवनिकागमनं । अभिज्ञानप्रदानं सीतायैअङ्गुलीयकदानं ॥ ३० ॥ राक्षसीनांतर्जनं सीतांप्रतीतिशेषः। त्रिजटाविभीषणपुत्री । तस्याःस्वप्रदर्शनं रामश्रेयोविषयस्वप्नदर्शनं । मणिप्रदानं हनुमतेचूडामणिप्रदानं । वृक्षभङ्गं अशोकवनिकावृक्षभङ्गं ॥ ३१ ॥ राक्षसीविद्रवं एकाक्ष्येककर्णीप्रभृतिराक्षसीनांपलायनं हनुमद्भयादितिशेषः । किङ्कराणां रावणभटानां ॥३२॥ वायुसूनोः हनुमतः । ग्रहणं इन्द्रजितेतिशेषः । लङ्कादाहेनाभिगर्जनं राक्षसानामित्यर्थः ॥३३॥ प्रतिप्लवनं पुनःसमुद्रलङ्घनं । मधूनां मधुवनस्थमधूनां हरणं ग्रहणं । वानरैरितिशेषः । मणिनिर्यातनं रामायचूडामणिप्रदानं ॥ ३४ ॥ नलसेतोः नलेनबन्धनीयसेतोः । प्रतारं प्रतरणं ॥३५॥ वधोपायनिवेदनं इन्द्रजिदादि-

विषम० प्रायोपवेशनं प्रायेण अनशनेन वानराणां उपवेशनंसमुद्रसमीपेवासः ॥ २६ ॥ तिल० लङ्कादाहाभिगर्जनं लङ्कादाहे हनुमद्गर्जनमित्यर्थोवा । अभिमर्दनमितिपाठे लङ्कायादाहेनाभितोमर्दनमित्यर्थः ॥ ३२ ॥

रावणस्य विनाशं च सीतावाप्तिमरेः पुरे ॥ विभीषणाभिषेकं च पुष्पकस्य च दर्शनम् ॥ ३७ ॥
अयोध्यायाश्च गमनं भरतेन समागमम् ॥ रामाभिषेकाभ्युदयं सर्वसैन्यविसर्जनम् ॥
स्वराष्ट्ररञ्जनं चैव वैदेह्याश्च विसर्जनम् ॥ ३८ ॥
अनागतं च यत्किंचिद्रामस्य वसुधातले ॥ तच्चकारोत्तरे काव्ये वाल्मीकिर्भगवानृषिः ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

रामायणषट्ककाण्डसर्गश्लोकसङ्ख्यानिर्धारणम् ॥ १ ॥ वाल्मीकिनास्वप्रणीतरामायणप्रचारणाय समुचितशिष्यलाभचिन्तने कुशलवाभ्यां शिष्यतयास्वपरिग्रहणाय तत्पादाभिवादनम् ॥ २ ॥ कुशलवाभ्यां कदाचनमुनिमण्डलमध्ये वाल्मीकिनोपदिष्टरामायणस्य गान्धर्वशास्त्रानुसारेण तन्त्रीस्वनसाहित्येनगानम् ॥ ३ ॥ मुनिभिस्ताभ्यांपारितोषिकदानम् ॥ ४ ॥ भरतमुखेनकुशलवौदृष्टवता श्रीरामेण तयोः स्वावासानयनेन सत्कारपूर्वकं रामायणगानचोदना ॥ ५ ॥ ततस्ताभ्यांसपरिवारं श्रोतुकामेरामे रामायणगानोपक्रमः ॥ ६ ॥

प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः ॥ चकार चरितं कृत्स्नं विचित्रपदमात्मवान् ॥ १ ॥

वधोपायदर्शनं ॥ ३६ ॥ अरेःपुरइतिशौर्यातिशयोक्तिः उत्तरत्रचान्वयः ॥३७॥ रामाभिषेकाभ्युदयं रामाभिषेकमहोत्सवं। स्वराष्ट्रेत्यर्धमधिकं । वैदेह्याश्चविसर्जनमित्यन्तं “चकारभगवानृषिः” इतिपूर्वेणसम्बन्धनीयं ॥३८॥ सीताभूप्रवेशप्रभृत्युत्तरकाण्डकथामाह—अनागतंचेति। वाल्मीकिनामाभगवान्ऋषिः रामस्यवसुधातले। अनागतं भावियत्किंचिच्चरितमस्ति ब्राह्मणपुत्रजीवनाश्वमेधादिकं । तत् उत्तरेकाव्ये उत्तरकाण्डे । चकार प्रतिपादितवान्। यत्किंचिदित्यनेन सीताविसर्जनात्पूर्वकालस्यभूयस्त्वं अनन्तरकालस्याल्पत्वंचद्योत्यतइत्याहुः । एतदुत्तरकाण्डे विचारयिष्यते ॥३९॥ ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने तृतीयःसर्गः।

पूर्वस्मिन्सर्गेप्रतिपाद्यवैलक्षण्यमुक्तं । संप्रतिप्रबन्धवैलक्षण्यंकथ्यते । प्रबन्धस्यवैलक्षण्यंनाम परमाप्तप्रणीतत्वं । पुण्यश्लोकविषयत्वं महाजनपरिगृहीतत्वं प्रबन्धनायकश्लाघितत्वमित्यादि । परमाप्तप्रणीतत्वं पुण्यश्लोकविषयत्वंचानेनोच्यते ॥ प्राप्तराज्यस्य स्वीकृतराजभावस्य । पुरोहितादित्वाद्यक्प्रत्ययः । लोकरक्षणायरघुकुलेवतीर्णस्येत्यर्थः । रामस्य सकलगुणाभिरामस्य । अनेनप्रतिपाद्यमहिम्ना काव्यस्यआदरणीयतातिशयउक्तः । तदुक्तंवामनेन “उपश्लोक्यस्यमाहात्म्यादुज्ज्वलाःकाव्यसंपदः”इति । विचित्रपदं आश्चर्यपदसंनिवेशं । अनेन काव्यस्यात्मभूतारीतिरुक्ता । तदुक्तंवामनेन “ रीतिरात्माकाव्यस्य विशिष्टपदरचनारीतिः । समग्रैरोजःप्रसादप्रभृतिभिर्गुणैरुदिता वैदर्भीनामरीतिः ” इत्यादिना । यद्वा। विविधानांविचित्राणां शब्दार्थालंकाराणां पदंस्थानं। कृत्स्नंचरितं प्रतिपादकग्रन्थसंदर्भम् । अनेन विज्ञानाद्यनेकफलसुपुरुषचरित्रत्वमुक्तं ॥ तथोक्तं [प्राकृतं] “ परिवड्ढइ विण्णाणं संभाविज्जइ जसो विसप्पन्दि गुणा । सुव्वइसुपुरिसचरिअं किंतज्जेण णहरन्ति कव्वालावा ” ॥ [छा०] “ परिवर्धतेविज्ञानंसंभाव्यतेयशोविसर्पन्तिगुणाः ॥ श्रूयतेसुपुरुषचरितंकिंतद्येननहरंतिकाव्यालापाः” इति ॥ भगवान् ब्रह्मप्रसादलब्धदिव्यज्ञानवान् । आत्मवान् प्रबन्धरचनानुकूलयत्नवान् । ऋषिः “ नानृषिःकुरुतेकाव्यं ” इत्युक्तरीत्या काव्यनिर्माणपटुःवाल्मीकिः । चकार परोपकारायकृतवान् । उदारधीरितिपूर्वमुक्तं । प्राप्तराज्य-

---

तिल० अयोध्यायाश्चगमनं तदुद्देश्यकंगमनम् ॥ **शिरो०** भरतेनसमागमं हनुमद्द्वारासाक्षाच्चभरतसंमेलनम् ॥ ३८ ॥ इतितृतीयःसर्गः ॥ ३ ॥ **तीर्था०** “तेवयंभवतारक्ष्याभवद्विषयवासिनः” इतिऋभिरेवोक्तत्वात् रामस्यविषयेवसन्वाल्मीकिरित्यर्थाल्लभ्यते । चरितं चरित्रप्रतिपादकंकाव्यं ॥ **तिल०** अर्थवत् ध्वन्यलंकारादिप्रशस्तार्थं । आत्मवानितिपाठे अवहितान्तःकरणः । प्राशस्त्येमतुप् । आत्मशब्दश्चान्तःकरणवाची ॥ १ ॥

[पा०] १ ङ. झ. ट. अयोध्यायाश्चगमनंभरद्वाजसमागमं. प्रेषणंवायुपुत्रस्यभरतेनसमागमं. २ ङ. पदमर्थवत्.

चतुर्विंशत्सहस्राणि श्लोकानामुक्तवानृषिः ॥ तथा सर्गशतान्पञ्च षट्काण्डानि तथोत्तरम् ॥ २ ॥

स्येत्यनेन रामराज्यकरणकालेरामायणकरणमितिगम्यते । एतज्ज्ञापनायैवपुनरारंभः ॥ १ ॥ अथप्रक्षेपभ्रंशसंभावनापरिहाराय नातिसंकोचविस्तरश्लोकसर्गकाण्डवत्तयाऽत्यन्तादरणीयत्वायचाह—चतुर्विंशदिति । ऋषिः वाल्मीकिः । "तपःस्वाध्याय—" इत्यारभ्य "तद्ब्रह्माप्यन्वमन्यत" इत्यन्तेन चिकीर्षिते रामायणाख्येप्रबन्धे श्लोकानांचतुर्विंशत्सहस्राण्युक्तवान् । इकारलोपश्छान्दसः । "पङ्क्तिविंशति—" इतिसूत्रे विंशतीत्येवनिपातनात् । "आदशतःसङ्ख्याःसङ्ख्येयेवर्तन्ते । ततःपरंसंख्यानेसंख्येयेचवर्तन्ते"इति नियमात्सहस्रशब्दोत्रसंख्यापरः । चतुर्विंशतिसहस्रसङ्ख्याकश्लोकांश्चकारेत्यर्थः।तथेतिसमुच्चये। पञ्चसर्गशतांश्चकृतवान् । "शतायुतप्रयुताःपुंसिच" इतिलिङ्गानुशासनवचनात्पुँल्लिङ्गत्वं । सर्गशतंपञ्चेतिपाठे शतमित्येतत्पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतं" इतिसूत्रेशतमितिबहुत्वेनिपातनात्साधु । षट्काण्डानि उत्तरं च षड्भ्यःउत्तरं । सप्तमकाण्डंचकृतवान् । परत्वमोक्षप्रदत्वादीनांव्यक्ततयाप्रतिपादनेन सर्वोत्तरत्वादुत्तरमितिपृथगुक्तिः । यद्यप्याधुनिकेपाठेश्लोकानांसर्गाणांचविपर्यासोदृश्यते तथापि बहुचतुर्युगान्तरितत्वेनविप्लवोयुक्तः । यद्वा । संकल्पमात्रपरोयंश्लोकः । कृतवान् कर्तुमुद्युक्तइत्यर्थः । ग्रन्थसमाप्तिदशायां कापिवृद्धिरुपजातेतिनकोपिविरोधः । यद्वा । अन्यूनाभिप्रायमिदंवचनं । पञ्चशतसर्गेषुचतुर्विंशतिसहस्रश्लोकेषुचनन्यूनतेत्यर्थः । यद्वा । अल्पीयसीमधिकसंख्यामनादृत्य प्रकृष्टसंख्ययाव्यपदेशोयं।यथा "मन्वन्तरंतुदिव्यानांयुगानामेकसप्ततिः" इत्यमरः । "चतुर्युगसहस्राणिब्रह्मणोदिनमुच्यते" इत्युक्तब्रह्मदिनस्य चतुर्दशमन्वनुसारेणचतुर्दशधाविभागेमन्वन्तरस्य एकसप्तत्याधिक्यात् । वर्तमानसंख्यातु "बालकाण्डेतुसर्गाणांसप्तसप्ततिरीरिता । अयोध्याकाण्डगास्सर्गाश्शतंचैकोनविंशतिः ।आरण्य काण्डे सर्गाणांपञ्चसप्ततिरीरिता । किष्किन्धाकाण्डगास्सर्गास्सप्तषष्टिरुदीरिताः। सर्गाणांसुन्दरेकाण्डेत्वष्टषष्टिरुदीरिता । एकत्रिंशच्छतंसर्गादृश्यन्तेयुद्धकाण्डगाः । दशोत्तरशतंसर्गाउत्तरेकाण्डईरिताः [६४७] ॥ अत्रसर्गशतान्पञ्चेत्येतत् षट्काण्डानामेव नतुसोत्तराणां । षट्काण्डानीत्येतत्प्रत्यासत्तेः । चतुर्विंशतिसहस्रश्लोकात्मकतातु सप्तकाण्डापेक्षयेत्यप्याहुः । बालकाण्डगताःश्लोकाश्चमरारिप्रकीर्तिताः [२२५६] । अयोध्याकाण्डगाःश्लोकाश्शुकभावाःप्रभाषिताः [४४१५] आरण्यकाण्डगाःश्लोकाःखगसाराःप्रदर्शिताः [२७३२] । किष्किन्धाकाण्डगाःश्लोकानीरचाराःप्रकीर्तिताः [२६२०] श्लोकास्तुसुन्दरेकाण्डेताननागाः प्रभाषिताः [३००६] युद्धकाण्डगताःश्लोकानिधिधीशाःप्रवेदिताः [५९९०] । श्लोकाःस्युरुत्तरेकाण्डेवलरागाःप्रभाषिताः [३२३४] । श्लोकाः २४२५३ तत्रैवमवधातव्यं । बालकाण्डेत्रिंशेसर्गे "सतेनपरमास्त्रेणमानवेनसमाहतः" इत्यतःपूर्वमेकंसहस्रं । त्रिषष्टितमे "विश्वामित्रोमहातेजाभूयस्तेपे महत्तपः" इत्यतःपूर्वंद्वेसहस्रे । अयोध्याकाण्डेचतुर्दशे "चतुरश्वोरथःश्रीमान्निस्त्रिंशोधनुरुत्तमं" इत्यतः पूर्वं त्रीणिसहस्राणि । चतुश्चत्वारिंशे "वर्ततेचोत्तमांवृत्तिंलक्ष्मणोस्यसदानघः "इत्यतःपूर्वं चत्वारिसहस्राणि । एकसप्ततितमे "द्वारेणवैजयन्तेनप्राविशच्छ्रान्तवाहनः "इत्यतःपूर्वं पञ्चसहस्राणि । एकोनशततमे "उटजेराममासीनंजटामण्डलधारिणं "इत्यतःपूर्वं षट्सहस्राणि । आरण्यकाण्डेद्वादशे "तेवयंवनमत्युग्रंप्रविष्टाःपितृशासनात्" इत्यतःपूर्वं सप्तसहस्राणि । सप्तचत्वारिंशे "ममभर्तामहातेजावयसा-

तीर्था० । श्रीमद्बालकाण्डेद्विसहस्रादुपरिद्विशतंचाशीतिर्ग्रन्थाः [२२८०] । श्रीमदयोध्याकाण्डेचतुस्सहस्राणिचतुश्शतानिपञ्चदशग्रन्थाः [४४१५] । श्रीमदारण्यकाण्डेद्विसहस्रादुपरिसप्तशतानिद्वात्रिंशद्ग्रन्थाः [२७३२] । श्रीमत्किष्किन्धाकाण्डेद्विसहस्रादुपरिषट्शतानिविंशतिर्ग्रन्थाः [२६२०] । श्रीमत्सुन्दरकाण्डेत्रिसहस्रादुपरिषड्ग्रन्थाः [३००६] । श्रीमद्युद्धकाण्डेपञ्चसहस्राणिनवशतानिनवतिश्चग्रन्थाः [५९९०] । श्रीमदुत्तरकाण्डेत्रिसहस्राणिद्विशतंसप्तसप्ततिश्चग्रन्थाः [३२७७] । अत्रयदेतदधिकंसप्तसप्तत्युत्तरद्विशतं तत्त्रिष्टुब्जगत्यादिच्छन्दोवृत्तानामक्षराधिक्येनजनितं । उत्तरकाण्डस्यकाण्डैस्सहाकथनमादरातिशयेन । तथाहि । यद्यप्यत्रकाण्डेषुरामस्यपरत्वानुसन्धानं । तथाप्युत्तरकाण्डेप्राचुर्येणपरत्वाभिव्यक्तिः । कोसलानांसर्वेषामपिभगवतासहतल्लोकप्राप्तिश्चापरोतिशयोगम्यते । अतएवसर्वोत्तरत्वात्तस्योत्तरकाण्डत्वसंज्ञा । **कतक०** । उक्तसङ्ख्यापेक्षयाषट्त्रिंशत्सर्गसङ्ख्याधिक्यदर्शनात्चतुर्विंशत्सहस्रापेक्षयाश्लोकसङ्ख्यायाअप्याधिक्यदर्शनाचउत्तरकाण्डीयसर्गसङ्ख्यानुक्तेश्चप्रक्षिप्तोयंश्लोकःनत्वार्षः ॥ २ ॥

कृत्वापि तन्महाप्राज्ञः सभविष्यं सहोत्तरम् ॥ चिन्तयामास को न्वेतत्प्रयुञ्जीयादिति प्रभुः ॥ ३ ॥
तस्य चिन्तयमानस्य महर्षेर्भावितात्मनः ॥ अगृह्णीतां ततः पादौ मुनिवेषौ कुशीलवौ ॥ ४ ॥
कुशीलवौ तु धर्मज्ञौ राजपुत्रौ यशस्विनौ ॥ भ्रातरौ स्वरसंपन्नौ ददर्शाश्रमवासिनौ ॥ ५ ॥
स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ॥ वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ॥ ६ ॥

पञ्चविंशकः" इत्यतःपूर्वं चाष्टौसहस्राणि। किष्किन्धाकाण्डेचतुर्थे "ततःपरमसंहृष्टोहनूमान्प्लवगर्षभः" इत्यतः पूर्वं नवसहस्राणि । एकत्रिंशे "नरेन्द्रसूनुर्नरदेवपुत्रंरामानुजःपूर्वजमित्युवाच" इत्यतःपूर्वं दशसहस्राणि। किष्किन्धाकाण्डसमाप्तावेकादशसहस्राणि । सुन्दरकाण्डेसप्तविंशे "ततस्तस्यनगस्याग्रे" इत्यतः पूर्वं द्वादशसहस्राणि। षट्चत्वारिंशे "नावमान्योभवद्भिश्चहरिर्धीरपराक्रमः" इत्यतःपूर्वं त्रयोदशसहस्राणि । सुन्दरकाण्डसमाप्तौचतुर्दशसहस्राणि । युद्धकाण्डेअष्टाविंशे "रक्षोगणपरिक्षिप्तोराजाह्येषविभीषणः" इत्यतःप्राक् पञ्चदशसहस्राणि । पञ्चाशे "प्रदर्शनंचबुद्धिश्चस्मृतिश्चद्विगुणंतयोः" इत्यतः प्राक् षोडशसहस्राणि । उत्तरभागारंभे "कुंभकर्णहतंदृष्ट्वाराघवेणमहात्मना" इत्यतः प्राक् सप्तदशसहस्राणि । अशीत्यन्तेन अष्टादशसहस्राणि । द्वादशशततमे "मरणान्तानिवैराणि" इत्यतःप्राक् एकोनविंशतिस्सहस्राणि । युद्धकाण्डसमाप्तौ विंशतिस्सहस्राणि । उत्तरकाण्डेद्वाविंशे "ततःप्राचोदयत्सूतस्तान्हयान्रुचिरप्रभान्" इत्यतःपूर्वं एकविंशतिस्सहस्राणि। चत्वारिंशत्समाप्त्या द्वाविंशतिस्सहस्राणि । षट्सप्ततितमे "ब्राह्मणस्यचधर्मेणत्वयावैरक्षितस्सुतः" इत्यतःपूर्वं त्रयोविंशतिस्सहस्राणि । ततःप्रबन्धसमाप्त्याचतुर्विंशतिस्सहस्राणीत्याहुः ॥ २ ॥ अथास्यकाव्यस्यमहाजनपरिग्रहंवक्तुं पीठिकामारचयति—कृत्वेति। महाप्राज्ञः प्रकर्षेणजानातीतिप्रज्ञः प्रज्ञएवप्राज्ञः। "प्रज्ञादिभ्यश्च" इतिस्वार्थेऽण्प्रत्ययः । यद्वा । प्रज्ञा धीः । "धीःप्रज्ञाशेमुषीमतिः" इत्यमरः । साऽस्यास्तीति प्राज्ञः । "प्रज्ञाश्रद्धार्चाभ्योणः" इतिमत्वर्थीयोणप्रत्ययः । महांश्चासौप्राज्ञश्चेतिमहाप्राज्ञः । निरतिशयज्ञानसंयुतो वाल्मीकिः । सहोत्तरं रामाभिषेकादुत्तरेणवृत्तान्तेन सहितं विकल्पात्सहशब्दस्यसभावाभावः । सभविष्यं अश्वमेधोत्तरभाविवृत्तान्तसहितं । अश्वमेधपूर्वकालेअस्यकाव्यस्यप्रवृत्तत्वात् । तत् काव्यं कृत्वापि । एतत् काव्यं । प्रभुः समर्थः । "प्रभुःशक्ताधिपौ" इतिभास्करः । कः पुरुषः । प्रयुञ्जीयात् वाग्विधेयं कुर्यात् इतिचिन्तयामास । प्रयुञ्जीयादित्यत्रात्मनेपदाभावोऽनित्यत्वात् । सभविष्यमित्यत्र औणादिकेस्यप्रत्यये इण्निमित्तंषत्वं ॥ ३ ॥ ततः वाल्मीकिचिन्तानन्तरं । मुनिवेषौ वस्तुतोराजकुमारौ । कुशीलवौ कुशलवौ । ईकारश्छान्दसः । चिन्तयमानस्य । भावितात्मनः चिन्तितपरमात्मनः । तदनुकूलशिष्यलाभायकृतपरमात्मनमस्कारस्येत्यर्थः । तस्य महर्षेः । पादौ अगृह्णीतां रामायणग्रहणार्थमन्ववर्तेतामित्यर्थः ॥ ४ ॥ धर्मज्ञौ गुरुशुश्रूषाधर्मज्ञौ राजपुत्रौ आसमाप्तेः वीर्यवन्तौ । यशस्विनौ विद्यान्तराभ्यासजकीर्तियुक्तौ भ्रातरौ तुल्यस्वरौ स्वरसंपन्नौ शारीरवन्तौ । आश्रमवासिनौ स्वाश्रमवासित्वेनस्नेहविषयभूतौ । कुशीलवौ कुशलवौ ददर्श उपदेशयोग्यावाकलयांचकारेत्यर्थः । अनेनरामाभिषेकानन्तरकालेरामायणकरणं "प्राप्तराज्यस्यरामस्य" इतिसर्गादावुक्तं । अनन्तरंकुशलवोत्पत्तिरितिसूचितं । एतज्ज्ञात्वेववाल्मीक्याश्रमे सीतात्यक्तारामेण ॥ ५ ॥ वेदेषु ऋग्यजुःसामाथर्वणलक्षणेषु चतुर्षुविषये मेधाविनौ मेधाधारणक्षमाबुद्धिः "मेधाधीर्धारणक्षमा" इतियादवः । तद्वन्तौ "अ-

तिल० सहोत्तरमित्यत्र उत्तरपदार्थस्य स भविष्यमितिसविशेषणत्वेपि आर्षःसमासः । भविष्यंचसीताविसर्जनमारभ्येत्येके । तस्याभूप्रवेशोत्तरकालिकमित्यपरे । प्रयुञ्जीयादितिच्छान्दसं । चि० भविष्येणसहितंयदुत्तरं तेनसहितं ॥ ३ ॥ तिल० अगृह्णीतामितिच्छान्दसं । कुशीलवौ कुशलवौ । कुशशब्दस्यकुशीभावःपृषोदरादित्वात् ॥ ४ ॥ तनि० तुशब्देनइतरवैलक्षण्यमुक्तं। वेदेषुपरिनिष्ठितौ एतेनस्वरानुगुणार्थज्ञानवत्त्वंसामगानवेदित्वं तदादरेणैवगान्धर्वशास्त्राभ्यासश्चावगम्यते । वेदोपबृंहणंवेदार्थव्यक्तीकरणं । तिल० उपबृंहणं वेदस्यतत्तदर्थेतात्पर्यग्रहणं । तद्रूपायार्थायप्रयोजनाय । अनेनश्रुतितात्पर्यविषयीभूतार्थप्रतिपादकतयाप्रामाण्यमस्योपादेयत्वंचसूचितं ॥ शिरो० प्रभुः दुर्बोधवस्तुबोधनसमर्थः ॥ ६ ॥

[पा०] १ घ. ङ. झ. कृत्वातु. २ झ. सभविष्यसहोत्तरं. ३ झ. अगृह्णीतां.

काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत् ॥ पौलस्त्यवधमित्येवं चकार चरितव्रतः ॥ ७ ॥

स्मायामेधास्रजोविनिः "इतिमत्वर्थीयोविनिप्रत्ययः । अनेनाक्षरराशिग्रहणफलमध्ययनमुक्तं । परितोनिष्ठा-परिनिष्ठा साङ्गाध्ययनं साऽनयोःसंजातेतिपरिनिष्ठितौ । तारकादित्वादितच् । अनेनविशेषणद्वयेनाधीत-साङ्गवेदत्वादापातप्रतिपन्नवेदार्थत्वाच्च तदुपबृंहणापेक्षित्वमुक्तं । तौ कुशलवौ । प्रभुः स्वतन्त्रोवाल्मीकिः । वेदोपबृंहणार्थाय वेदोपबृंहणरूपप्रयोजनाय वेदोपबृंहणरूपस्वग्रन्थपठनायेत्यर्थः । उपबृंहणंनाम नानाशास्त्रानुसारेणनिर्णीतवेदार्थप्रतिपादकोग्रन्थः । अग्राह्यत अगृह्णात् । स्वार्थेणिच् ॥ ६ ॥ चरितव्रतः चरितव्रतत्वेननिरतिशयज्ञानोवाल्मीकिः । काव्यं कवेःकर्म । कवयतेवर्णयतीतिकविः । कविवर्णनइत्यस्माद्धातोरौणादिकइप्रत्ययः । लोकोत्तरवर्णननिपुणइत्यर्थः । यद्यपि "इगन्ताच्चलघुपूर्वात् "इतिअणाभवितव्यं तथापिब्राह्मणादित्वात्ष्यञ्इतिकाशिकाकारः । यद्वा तस्मादेवधातोः" ऋहलोर्ण्यत् "इतिण्यत्प्रत्ययेआदिवृद्धौचकाव्यमितिरूपं । दोषवर्जितं गुणालंकारसहितंशब्दार्थयुगलमित्यर्थः । तदुक्तंकाव्यप्रकाशे "तददोषौशब्दार्थौसगुणावनलंकृतीपुनःक्वापि " इति । वेदोपबृंहणत्वेपिकान्तासंमितत्वादस्यकाव्यत्वव्यपदेशः । तथाहि । त्रिविधःसंदर्भः प्रभुसंमितः सुहृत्संमितः कान्तासंमितश्चेति । शब्दप्रधानोवेदः प्रभुसंमितः । अर्थप्रधानइतिहासादिः सुहृत्संमितः । व्यङ्ग्यप्रधानंकाव्यं कान्तासंमितं । महदितिकाव्यविशेषणं । तस्यमहत्त्वमुत्तमकाव्यत्वं । तदप्युक्तंतत्रैव "इदमुत्तममतिशयिनिव्यङ्ग्येवाच्याद्ध्वनिर्बुधैःकथितः " इति । यद्वा महत्काव्यं महाकाव्यं । तल्लक्षणमुक्तंदण्डिना । "सर्गबन्धोमहाकाव्यमुच्यतेतस्यलक्षणं " इत्यादिना । ननुकाव्यंनारंभणीयं काव्यालापांश्चवर्जयेदितिनिषेधादित्याशङ्क्याह—रामायणमिति । रमयतीतिरामः । "रामोरमयतांवरः "इत्यार्षनिर्वचनात् । यद्वा । रमन्तेस्मिन्सर्वेजना इतिरामः । "अकर्तरिचकारकेसंज्ञायां "इति घञ् । सःअय्यतेप्रतिपाद्यतेऽनेनेतिरामायणं । अयगतावितिधातोः कर्मणिल्युट् । "पूर्वपदात्संज्ञायामगः " इतिणत्वं । समस्तगुणसंपन्नरामविषयत्वान्नास्यनिषिद्धत्वं किंतूपादेयत्वमेवेत्यर्थः । तदुक्तंभामहेन । "उपश्लोक्यस्यमाहात्म्यादुत्तमाः काव्यसंपदः "इति । प्रतिपादितंचोद्भटेन "गुणालङ्कारचारुत्वयुक्तमप्यधिकोज्ज्वलं । काव्यमाश्रयसंपत्त्यामेरुणेवामरद्रुमः "इति । रुद्रटेनाप्युक्तं "उदारचरितनिबन्धनात्प्रबन्धप्रतिष्ठा " इति । निषेधस्त्वसत्काव्यविषयइतिभावः । इदंचरामचरितप्रतिपादनमप्राधान्येन प्राधान्येनतु सीताचरितमेवप्रतिपाद्यतइत्याह । कृत्स्नंसीतायाश्चरितमिति कृत्स्नंरामायणंसीताचरितपरं । अतएवोक्तं श्रीगुणरत्नकोशे "श्रीमद्रामायणमपिपरंप्राणितित्वच्चरित्रे "इति । आभाणकश्च । "प्रातर्द्यूतप्रसङ्गेनमध्याह्नेस्त्रीप्रसङ्गतः । रात्रौचोरप्रसङ्गेनकालोगच्छतिधीमतां" इति । "उपायपुरुषकारयोर्मध्येउपायस्वरूपंभारतेदर्शितं । पुरुषकारस्वरूपं श्रीरामायण " इतिरहस्यपदवी । अतएव "कृपावानविकत्थनः "इत्याद्युक्तलक्षणधीरोदात्तरूपोरामः कुशलवाभ्यांरामायणंश्रुतवान् । रामायणस्यरामैकपरत्वेस्वेनैवसदसिश्रवणंनसंगच्छते सीतापरत्वेतुसंगच्छते । विरहिणः कामिनीकथाचरितश्रवणस्यस्वाभाव्यात् । एवंव्यञ्जनावृत्त्यासीतारामयोःप्रतिपादनमुक्त्वाशब्दवृत्त्यासिद्धमितिवृत्तमाह—पौलस्त्येति । पु-

तनि० कृत्स्नंसीतायाश्चरितमितिसीतायाःप्रबन्धनायिकात्वमुक्तं । तस्यैवोपपादकं रामायणमिति । कृत्स्नस्यसीताचरितत्वेपिरामायणव्यपदेशः रामचरितस्यतदुपयुक्तार्थत्वज्ञापनार्थः । रमायाइदंचरितंरामं तस्यायनमितिवाव्युत्पत्तिः । रामशब्दस्यलक्ष्मीपत्यादिशब्दवत्स्त्रीपुरस्सरनिर्देशःप्रबन्धस्यलक्ष्मीप्राधान्यज्ञापनार्थः । तेनसीतायाश्चरितमितिसुष्ठूक्तं । हारिद्रमाक्षिकादिशब्दवदण्प्रत्ययोपपत्तिर्द्रष्टव्या । "हारिद्रभङ्गायवितीर्णभङ्गं" इतिश्रीहर्षः । महत् नारायणकथापेक्षयामहत् । सापराधेष्वपिरक्षणप्रवणत्वप्रतिपादनान्महत्त्वं । "मातर्मैथिलिराक्षसीस्त्वयितदैवार्द्रापराधास्त्वयारक्षन्त्यापवनात्मजाल्लघुतरारामस्यगोष्ठीकृता । काकंतंचविभीषणंशरणमित्युक्तक्षमौरक्षतःसानःसान्द्रमहागसःसुखयतुक्षान्तिस्तवाकस्मिकी" इत्यभियुक्तोक्तेः । अनेनशरणागतिमन्त्रोपबृंहणत्वमस्यप्रबन्धस्यव्यञ्जितम् । अष्टाक्षरोपबृंहकश्रीभागवतादिषुहिभगवत्प्राधान्यं । अतएव "नारायणकथामिमां" इति तत्रोक्तं । **शिरो०** चरितव्रतः चरितं आचरितं व्रतं रघुनाथोपासनं येन स मुनिः । कृत्स्नं कृतां सुकृतिनां स्नः स्नानं सादरावलोकनादि यस्मिन् सुकृद्भिरादृतमित्यर्थः ॥ ७ ॥

[पा०] १ क. ङ. झ. लेवं.

पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम् ॥ जातिभिः सप्तभिर्बद्धं तन्त्रीलयसमन्वितम् ॥ ८ ॥
रसैः शृङ्गारकारुण्यहास्यवीरभयानकैः ॥ रौद्रादिभिश्च संयुक्तं काव्यमेतदगायताम् ॥ ९ ॥

लस्त्यस्यगोत्रापत्यं पौलस्त्यः । गर्गादिलाद्यञ् । तस्य वधः । वधस्यफलत्वात्तेनव्यपदेशः । पौलस्त्यवधमधिकृत्यकृतोग्रन्थः पौलस्त्यवधः "अधिकृत्यकृतेग्रन्थे" इत्यण् । "लुबाख्यायिकाभ्यःप्रत्ययस्यबहुलं" इतितस्य लुप् । यद्वा अणिपुनरादिवृद्धौतदेवरूपं । वधप्रधानत्वादितिवृत्तस्यफलेनव्यपदेशः । तथाहि । पञ्चकाव्यप्रतिपाद्यानि । तदुक्तं "बीजबिन्दुपताकाख्याःप्रकरीकार्यमित्यपि । अर्थप्रकृतयःपञ्चपञ्चावस्थासमन्विताः" इति । "आरंभयत्नप्राप्त्याशानियताप्तिःफलागमः" इतिपञ्चावस्थाः । तत्र "स्वल्पोद्दिष्टःकार्यहेतुर्बीजंविस्तार्यतेतथा" । तच्चबालकाण्डोक्तंविष्णववतरणसीतापरिणयादि । "वस्तुनःसतिविच्छेदेबिन्दुरच्छेदकारणं" इति । यथाऽयोध्याकाण्डे अभिषेकवृत्तान्तेन रावणवधरूपकार्यविच्छेदेप्राप्तेवनवासकरणमच्छेदकारणं । "यदन्तरानुवृत्तंस्यात्सापताकेतिकीर्त्यते" । यथासुग्रीववृत्तान्तः । कथान्तरप्रसङ्गेनप्रकरीस्यात्प्रदेशभाक् । यथाविभीषणादिवृत्तान्तः । "समग्रफलसंपत्तिःफलयोगोयथोचितः" । यथारावणवधः । एवंफलत्वात्पौलस्त्यवधमितिनिर्देशः । इत्येवेत्यस्यायमर्थः पौलस्त्यवधव्याजेनाप्रधानरामचरितंप्रधानसीताचरितं कृतवानिति । यच्चकारतद्ग्राहयामासेतियोजना उत्तरश्लोकेऽगायतामित्यनुवादात् ॥ ७ ॥ यथोपदेशमगायतामित्याह—पाठ्ये इत्यादिश्लोकद्वयेन । पाठ्यं पाठः भावेण्यत् । केवलोच्चारणविशेषः । तदुक्तंभरतेन "षडलङ्कारसंयुक्तंकलाकालसमन्वितं । यत्पठ्यतेनाटकादौतत्पाठ्यमभिधीयते" इति । गेयं स्वरविशेषसमन्वितंगानं । भावेयत् । तत्रोभयत्र मधुरं श्राव्यं । लोकेकानिचित्पद्यानिपाठदशायांमधुराणि नगानदशायां अपराणिपुनर्गानदशायामेव नपाठदशायां इदंतूभयत्रापीत्यर्थः । इतःपरंत्रीणिक्रियाविशेषणानि । त्रिभिःप्रमाणैः गानध्वनिपरिच्छेदकैः त्र्यश्रचतुरश्रमिश्रसंज्ञकैः द्रुतमध्यविलंबितैर्वा । अन्वितं विशिष्टं । सप्तभिर्जातिभिर्बद्धं शुद्धविकृतसंकीर्णादिष्वष्टादशसुजातिषुप्रधानभूताभिःसप्तभिर्बद्धं । तदुक्तंशाण्डिल्येन "सर्वगीतसमाधारोजातिरित्यभिधीयते । षाड्जीचैवार्षभीमता" इति । तन्त्रीलयसमन्वितं । तन्त्रीशब्देनतन्त्रीयुक्तवीणालक्ष्यते । लयशब्देनतालवेणुमृदङ्गादीनामेककालविरामउच्यते । ताभ्यांसमन्वितम् ॥ ८ ॥ पुनःकाव्यविशेषणमाह—रसैरिति । आदिशब्देनबीभत्साद्भुतशान्तागृह्यन्ते । रसोनाम स्थायिभावरूपचित्तवृत्त्यभिव्यक्तिः । स्थायिभावश्चनवविधः । तदुक्तं "रतिर्हासश्चशोकश्चक्रोधोत्साहौभयंतथा । जुगुप्साविस्मयशमाःस्थायिभावाःप्रकीर्तिताः" इति । तदभिव्यक्तिश्चविभावादिभिः । तदुक्तं "विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः । आनीयमानःस्वादुत्वंस्थायीभावोरसःस्मृतः" इति । विभावादिस्वरूपंसंग्रहेणोक्तम् । "कारणान्यथकार्याणिसहकारीणियानिच । रत्यादेःस्थायिनोलोकेतानिचेन्नाट्यकाव्ययोः । विभावाअनुभावाश्चकथ्यन्तेव्यभिचारिणः । व्यक्तःशतैर्विभावाद्यैःस्थायीभावोरसःस्मृतः" इति । तत्र शृङ्गारो द्विविधः संभोगोविप्रलंभश्चेति । "संयुक्तयोस्तुसंभोगोविप्रलंभोवियुक्तयोः" इत्युक्तेः । अस्यशृङ्गारादिसर्वरससंयुक्तत्वंप्रदर्श्यते । तत्र "रामस्तुसीतयासार्धं" इत्यारभ्यसीतापहरणवृत्तान्तपर्यन्तेनसंभोगोदर्शितः । ततःपरेणविप्रलंभः । विकृताचारवाक्याङ्गविकारवेषैर्धूर्तप्रलापैश्चहास्यरसोव्यज्यते । सच शूर्पणखादिवृत्तान्तेन सुगमः । इष्टवियोगादनिष्टसंबन्धाद्वाकरुणः । सचदशरथादिवृत्तान्तेन । व्यवसायाऽविषादाऽसंमोहादिभिर्वीरः । यथालक्ष्मणादिवृत्तान्ते । पाटनताडनादिभीरौद्रः । यथारावणादिवृत्तान्ते । विकृतक्रूरदर्शनादिभिर्भयानकः । यथामारीचवृत्तान्ते । कुत्सितदर्शनादिभिर्बीभत्सः । यथाविराधकबन्धादिवृत्तान्ते । विचित्रशिल्पवाक्यादिभिरद्भुतः । यथारामरावणयुद्धादिषु । शान्तरसः श्रमणादिवृत्तान्तादौ । अलंविस्तरेण । अत्रकेचित् "शोकःश्लोकत्वमागतः" इत्युक्त्याऽस्मिन्प्रबन्धेशोकरसएवप्राधान्येनोच्यते अन्ये तदङ्गतयेत्याहुः । अन्येतु वीरएवप्रधानभूतः । पौल-

तीर्थी० पाठ्येगेयेचेत्यारभ्य रामदेहात्तथापराविलन्तंकुलकं ॥ ८ ॥

[पा०] १ घ. ङ. झ. भिर्युक्तं. २ ङ. झ. करुण.

तौ तु गान्धर्वतत्त्वज्ञौ मूर्छनास्थानकोविदौ ॥ भ्रातरौ स्वरसंपन्नौ गन्धर्वाविव रूपिणौ ॥ १० ॥
रूपलक्षणसंपन्नौ मधुरस्वरभाषिणौ ॥ बिंबादिवोत्थितौ बिंबौ रामदेहात्तथाऽपरौ ॥ ११ ॥
तौ राजपुत्रौ कार्त्स्न्येन धर्म्यमाख्यानमुत्तमम् ॥ वाचोविधेयं तत्सर्वं कृत्वा काव्यमनिन्दितौ ॥१२॥
ऋषीणां च द्विजातीनां साधूनां च समागमे ॥ यथोपदेशं तत्त्वज्ञौ जगतुस्तौ समाहितौ ॥
महात्मानौ महाभागौ सर्वलक्षणलक्षितौ ॥ १३ ॥

स्यवधइतिकाव्यनामकरणादित्याहुः । वयंतुब्रूमः शृ-ङ्गारएवप्रधानरसः "सीतायाश्चरितंमहत्" इत्युक्तेः । तथोक्तं "एकोरसोभवेदङ्गीवीरश्शृङ्गारयोर्द्वयोः । अ-ङ्गान्यन्येरसाःसर्वेतस्यनिर्वहणोद्यताः" इति ॥ ९ ॥ अथकुशलवयोर्गानसामर्थ्यमाह—तौत्वित्यादिश्लोक-द्वयेन । अस्यागायतामितिपूर्वेणसंबन्धः । गान्धर्वं गानशास्त्रम् "गान्धर्वंगानशासनं" इतिवैजयन्ती । तस्यतत्त्वंतात्पर्यार्थः । तत्जानीतइतिगान्धर्वतत्त्वज्ञौ । मूर्छना वीणादिवादनं । "वादनेमूर्छनानना" इति वैजयन्ती । स्थानानि मन्द्रमध्यताररूपस्वरत्रयोत्पत्ति-स्थानानि । यथोक्तंशाण्डिल्येन "यदूर्ध्वंहृदयग्रन्थेः कपालफलकादधः । प्राणसंचरणस्थानंस्थानमित्यभि-धीयते । उरःकण्ठशिरश्चेतितत्स्वरास्त्रिविधाःस्मृताः । मन्द्रंमध्यंचतारंचनामतेषांयथाक्रमम्" इति । तेषुको-विदौ तद्विषयसमीचीनज्ञानयुक्तौ । एतेन गानशास्त्र-ज्ञानतदनुगुणवीणादिवादनतदनुगुणोच्चारणनिपुणा-वितिदर्शितं । भ्रातरावित्यनेन श्राव्यताहेतुसमस्वर-त्वमुक्तं । स्वरसंपन्नौ शारीरयुक्तौ । अतएव रूपिणौ मनुष्यवेषधारिणौ । गन्धर्वाविवस्थितौ । रूपलक्षणसं-पन्नौ नाटकलक्षणज्ञौ । गत्यर्थाज्ञानार्थाः । "रूपंस्व-भावेशुक्लादौसौन्दर्येनाटकेपशौ" इतिभास्करः । गान-कालिकाभिनयप्रकारज्ञावित्यर्थः । मधुरस्वरंयथाभव-तितथाभाषितुंशीलमनयोरिति मधुरस्वरभाषिणौ । ताच्छील्येणिनिः । केवलभाषणकालेपिमधुरस्वरौ कि-मुतगानकालइतिभावः । उक्तसकलगुणसंपत्तिमूलंरा-मपुत्रत्वमाह—बिंबादिति । रामदेहरूपाद्बिंबात् तथा उत्थितौ उद्भूतौ । बिंबौ प्रतिबिंबाविवस्थितौ । यद्वा प्रतिमानिर्माणार्थचातुर्येणनिर्मिताप्रतिकृतिर्बिंबः राम-देहाख्यात्तस्मात्तथाउत्थितौउत्कीर्णौ । अपरौ बिंबा-विवस्थितौ । "प्रतिबिंबेतत्कृतौचप्रतिकृत्यांचमण्डले । लाञ्छनेपिचबिंबोस्त्री"इतिभास्करः । एवंभूतौकुशल-वावेतत्काव्यमगायतामितिसंबन्धः ॥ १० ॥ ११ ॥ नकेवलंतस्याध्ययनं धारणंप्रकाशनंचकृतमित्याह—तावित्यादि । सार्धश्लोकद्वयमेकान्वयं । क्रियाभेदात्त-च्छब्दावृत्तिः । यद्वा राजपुत्रौसन्तौ । तौ मुनिपुत्रौ मुनिपुत्रवेषधरावित्यर्थः । अनिन्दितौ यथोपदेशंगाने-ननिन्दानर्हौ । यथोपदेशं गुरूपदेशमनतिक्रम्य तत्त्व-ज्ञौ पाठशुद्धिज्ञौ । समाहितौ सावधानौ । कुत्राप्यं-शेविस्मृतिरहितावित्यर्थः । महात्मानौ महाबुद्धी । महाभागौ एतादृशगुणहेतुभूतमहाभाग्यौ । "भागा-भाग्यांशतुल्यांशाः" इतिवैजयन्ती । सर्वलक्षणलक्षितौ लक्षितसर्वलक्षणौ ज्ञातसर्वशब्दलक्षणावित्यर्थः । तौ कुशलवौ । कार्त्स्न्येन धर्म्यं धर्मादनपेतं । उत्तममा-ख्यानं पुरावृत्तकथनरूपं । तद्रामायणाख्यंसर्वंकाव्यं । वाचोविधेयं आवृत्तिबाहुल्येनवाग्वशवर्ति कृत्वा । ऋषीणांच साधूनां द्विजातीनांच समागमे सदसि ।

तिल० स्थानं च मूर्छनाचतयोस्समाहारः स्थानमूर्छनं तत्रकोविदौ ॥ **तीर्थी०** गान्धर्वतत्त्वज्ञौ गान्धर्वंनाम पदावस्थितताता-लपरिच्छेदयुक्तावधानेन प्रयुक्तषड्जादिस्वरसमुच्चयः । तदाह दत्तिलः । "पदस्थस्वरसंघातस्तालेनसुमितस्तथा । प्रयुक्तश्चावधाने-नगान्धर्वमभिधीयते" इति । मूर्छनास्थानकोविदाविति । मूर्छनाषड्जादिस्वरसंपूर्णता । तदुक्तंशाण्डिल्येन "यत्रैवस्युःस्वराःपूर्णा मूर्च्छनासेत्युदाहृता ।" इति ॥ १० ॥ **तिल०** बिम्बात्सूर्यादेरुत्थितौबिंबाविवप्रतिबिम्बाविव तथारामदेहादुत्थितौ परौरामदे-हावित्यर्थः ॥ ११ ॥ **तिल०** लक्ष्यलक्षणेतिपाठेसामुद्रिकविद्भिः लक्ष्यंपरीक्ष्यंलक्षणंसुलक्षणं तेन लक्षितौयुतौ । अतएवमहात्मा नौ महाभागौ च । ऋषीणांद्विजातीनामितिगोबलीवर्दन्यायेन । साधूनांद्विजेतराणामपि यथोपदेशं जगतुः **शिरो०** तौ अमृत-वदास्वादनीयगानविशिष्टौ । "तश्चोरामृतपुच्छेषु" इति मेदिनी ॥ १३ ॥

[पा०] १ झ. स्थानमूर्छनकोविदौ. २ ञ. त्रावश्विनाविव. ३ क. घ. वोद्धृतौ. ४ क. च. छ. धर्माख्यानमनुत्तमम्. ५ झ. स्तुसमाहितौ.

तौ कदाचित्समेतानामृषीणां भावितात्मनाम् ॥ आसीनानां समीपस्थाविदं काव्यमगायताम् ॥१४॥
तच्छ्रुत्वा मुनयः सर्वे बाष्पपर्याकुलेक्षणाः ॥ साधुसाध्विति तावूचुः परं विस्मयमागताः ॥ १५ ॥
ते प्रीतमनसः सर्वे मुनयो धर्मवत्सलाः ॥ प्रशशंसुः प्रशस्तव्यौ गायमानौ कुशीलवौ ॥ १६ ॥
अहो गीतस्य माधुर्यं श्लोकानां च विशेषतः ॥ चिरंनिर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितम् ॥ १७ ॥
प्रविश्य तावुभौ सुष्ठु तदा भावमगायताम् ॥ सहितौ मधुरं रक्तं संपन्नं स्वरसंपदा ॥ १८ ॥
एवं प्रशस्यमानौ तौ तपःश्लाघ्यैर्महात्मभिः ॥ संरक्ततरमत्यर्थं मधुरं तावगायताम् ॥ १९ ॥
प्रीतः कश्चिन्मुनिस्ताभ्यां संस्थितः कलशं ददौ ॥ प्रसन्नो वल्कले कश्चिद्ददौ ताभ्यां महायशाः॥२०॥
[अन्यः कृष्णाजिनं प्रादाद्यज्ञसूत्रमथापरः ॥ कश्चित्कमण्डलुं प्रादान्मौञ्जीमन्यो महामुनिः ॥२१॥
बृसीमन्यस्तदा प्रादात्कौपीनमपरो मुनिः ॥ ताभ्यां ददौ तदा हृष्टः कुठारमपरो मुनिः ॥ २२ ॥
काषायमपरो वस्त्रं चीरमन्यो ददौ मुनिः ॥ जटाबन्धनमन्यस्तु काष्ठरज्जुं मुदाऽन्वितः ॥ २३ ॥
यज्ञभाण्डमृषिः कश्चित्काष्ठभारं तथाऽपरः ॥ औदुंबरीं बृसीमन्ये स्वस्ति केचित्तदाऽवदन् ॥ २४ ॥
आयुष्यमपरे प्राहुर्मुदा तत्र महर्षयः ॥ ददुश्चैव वरान्सर्वे मुनयः सत्यवादिनः ॥ २५ ॥]
आश्चर्यमिदमाख्यानं मुनिना संप्रकीर्तितम् ॥ परं कवीनामाधारं समाप्तं च यथाक्रमम् ॥ २६ ॥

जगतुः ॥ १२ ॥ १३ ॥ अथतस्यकाव्यस्यमहाजनपरिगृहीतत्वंदर्शयितुमाह—तावित्यादि । तौ कुशीलवौ । कदाचित् रामाश्वमेधकाले । भावितात्मनां निश्चितधियां । समेतानां अश्वमेधेसंमिलितानां । आसीनानां क्रियाकलापावसानेसुखमासीनानां । ऋषीणां । समीपस्थौसन्तौ । इदंकाव्यं अगायताम् ॥ १४ ॥ सामान्यतः काव्यप्रशंसामाह—तदिति । तत् काव्यं । श्रुत्वा । परं विस्मयं आगताः बाष्पपर्याकुलेक्षणाः सर्वेमुनयः । तौ साधुसाध्विति । ऊचुः प्रशशंसुरित्यर्थः ॥ १५ ॥ गातृप्रशंसामाह—तइति । धर्मवत्सलाः निर्मत्सराइत्यर्थः । तेसर्वेमुनयः प्रीतमनसःसन्तः । गायमानौ अतएवप्रशस्तव्यौ प्रशंसितुमर्हौ । कुशलवौ प्रशशंसुः ॥१६॥ काव्यप्रशंसाप्रकारमाह—अहोइति । गीतस्य गानस्य । माधुर्यं अहो आश्चर्यं । श्लोकानांतु माधुर्यं विशेषतः अहोआश्चर्यं । गानतोपिश्लोकमाधुर्यं अतिशयितमित्यर्थः । तमेवविशेषमाह—चिरेति । एतत् काव्यप्रतिपाद्यंकथाशरीरं । चिरनिर्वृत्तमपि बहुकालान्निष्पन्नमपि । प्रत्यक्षमिव प्रत्यक्षतयानुभूयमानमिव । दर्शितं अनेनकाव्येनबोधितं । पाकविशेषात्सद्यःसर्वार्थविशदतरंअवगमयतीदंकाव्यमित्यर्थः ॥ १७ ॥ गातृप्रशंसाप्रकारमाह—प्रविश्येति । सहितौ समलयादियुक्तावित्यर्थः । तावुभौ कुशीलवौ । तदा मुनिजनश्रवणकाले । भावं सुष्ठुप्रविश्य रतिहासादिभावोयथाप्रकाशितोभवति तथावगाह्येत्यर्थः । स्वरसंपदा षड्जादिस्वरसंपदा । संपन्नं । अतएवमधुरंरमणीयं । रक्तं रागयुक्तं च यथाभवतितथा । अगायताम् ॥१८॥ प्रशंसाजनितोत्साहौपुनरतिशयेनागायतामित्याह—एवमिति । तपःश्लाघ्यैः श्लाघ्यतपस्कैः । अनसूयकैरितियावत् । महात्मभिः महाबुद्धिभिः । विशेषज्ञैरितिभावः । तादृशैरेवमुक्तरीत्या । प्रशस्यमानौ । श्लाघ्यमानौ तौ । संरक्ततरं अतिशयेनसमीचीनरागयुक्तं । अत्यर्थं भृशं । मधुरंच यथाभवतितथा तावगायतां । क्रियाभेदात्तच्छब्दावृत्तिः ॥ १९॥ अथप्रीतिकारितयथोचितपारितोषिकप्रदानमाह—प्रीतइति। संस्थितः उत्थितः । "संस्थास्थितौव्यवस्थायां" इतिभास्करः। कलशं जलाहरणपात्रं प्रीत्यतिशयेनोत्थाय ददावित्यर्थः। महायशाः गानशास्त्रविषयकीर्तिमान् गीतितारतम्यज्ञइत्यर्थः ॥ २०॥ ॥२१॥२२॥२३ ॥ २४ ॥ २५ ॥ एवंमुनिजनप्रशंसा-

शिरो० भावितात्मनां परिशीलितपरमात्मनां ॥ १४ ॥ **तीर्थी०** तत् गानम् ॥ १५ ॥ **तिल०** प्रशस्तव्याविति इडभावनलोपौ छान्दसौ । **शिरो०** धर्मवत्सलाः धर्माः धर्मस्वरूपाः वत्सलाः वात्सल्यरसवन्तः ॥ १६ ॥ **तीर्थी०** भावंप्रविश्यसुष्ठ्वगायतामितिसंबन्धः । भावपुरस्कारेण काव्यकर्तुरभिप्रायंहृदिनिधायशृङ्गारादिरसाविर्भावोयथाभवतितथा अगायतामित्यर्थः । मधुरं पाठतोगानतश्च ॥ १८ ॥ **शिरो०** तपःश्लाघ्यैः ज्ञानजनितप्रशंसाविशिष्टैः ॥ १९ ॥

[**पा०**] १ ङ. च. छ. मध्येसभंसमीपस्थौ. २ ग. गायन्तौतौकुशीलवौ. ३ क. ख. ङ. चिरंनिर्वृत्त. ४ ङ. झ. तथा. ५ क. ग. ङ. च. छ. ज. झ. अन्यःकृष्णाजिनमित्यादिपञ्चश्लोकाः. ६ ग. ज. औदुंबरींबृसीमन्योजपमालांतथाऽपरः.

अभिगीतमिदं गीतं सर्वगीतेषु कोविदौ ॥ आयुष्यं पुष्टिजनकं सर्वश्रुतिमनोहरम् ॥ २७ ॥
प्रशस्यमानौ सर्वत्र कदाचित्तत्र गायकौ ॥ रथ्यासु राजमार्गेषु ददर्श भरताग्रजः ॥ २८ ॥
स्ववेश्म चानीय ततो भ्रातरौ स कुशीलवौ ॥ पूजयामास पूजार्हौ रामः शत्रुनिबर्हणः ॥ २९ ॥
आसीनः काञ्चने दिव्ये स च सिंहासने प्रभुः ॥ उपोपविष्टः सचिवैर्भ्रातृभिश्च समन्वितः ॥ ३० ॥
दृष्ट्वा तु रूपसंपन्नौ तावुभौ नियतस्तदा ॥ उवाच लक्ष्मणं रामः शत्रुघ्नं भरतं तथा ॥ ३१ ॥
श्रूयतामिदमाख्यानमनयोर्देववर्चसोः ॥ विचित्रार्थपदं सम्यग्गायिनौ तावचोदयत् ॥ ३२ ॥
तौ चापि मधुरं रक्तं स्वञ्चितायतनिःस्वनम् ॥ तन्त्रीलयवदत्यर्थं विश्रुतार्थमगायताम् ॥ ३३ ॥
ह्लादयत्सर्वगात्राणि मनांसि हृदयानि च ॥ श्रोत्राश्रयसुखं गेयं तद्बभौ जनसंसदि ॥ ३४ ॥

मुक्त्वातदितरसकलजनप्रशंसामाह—आश्चर्यमित्यादिना। श्लोकत्रयमेकंवाक्यं । आख्यानंप्रबन्धविशेषः। "कथात्वाख्यायिकाख्यानं" इतियादवः। इतिहासइत्यर्थः । मुनिना वाल्मीकिना । संप्रकीर्तितं सम्यक्लक्षणवत्तयाप्रकर्षेणविस्तरेणकीर्तितं कथितं । कवीनांपरं आधारं। "काव्यंकाव्यस्यलक्षणं" इत्युक्तरीत्याकवीनां काव्यनिर्माणमूलमित्यर्थः । यथाक्रमं क्रममनतिक्रम्य समाप्तं मध्ये अविच्छिन्नमित्यर्थः । यथाकृतमितिपाठे यथाकर्तुमारब्धं तथासमाप्तमित्यर्थः । इदमाश्चर्यं आश्चर्यावहमित्यर्थः ॥ २६ ॥ प्रबन्धंप्रशस्यगातारौ प्रशंसति—अभिगीतमिति। हेसर्वगीतेषुकोविदौ समर्थौ । युवाभ्यां । आयुष्यं आयुर्वर्धकं । पुष्टिजनकं सत्यपिआयुषिकार्श्येतस्याकिंचित्करत्वात्पुष्टिकरं । सर्वाभिःश्रुतिभिः स्वरारंभकावयवैर्मनोहरं । तदुक्तं "प्रथमश्रवणाच्छब्दःश्रूयतेयःस्वमात्रतः । साश्रुतिः संपरिज्ञेयास्वरावयवलक्षणा"इति । इदंगीतं अभिगीतं शोभनंगीतं । अभिःपूजायां । यद्वा इदंगीतं सर्वगीतेषुअभिगीतमित्यन्वयः ॥ २७ ॥ प्रशस्यमानाविति । अस्यादावितिशब्दोऽध्याहार्यः। तत्र यज्ञवाटे । रथ्यासुराजमार्गेषुच सर्वत्रेत्थंप्रशस्यमानौतौ । कदाचित् । भरताग्रजः रामः । ददर्श भरतमुखेनददर्शेत्यर्थः ॥ २८ ॥ ततः दर्शनानन्तरं शत्रुनिबर्हणोरामः । पूजार्हौ स्वप्रबन्धगातृत्वेनश्लाघार्हौ । भ्रातरौकुशीलवौ । तुल्यवयोरूपादिमत्त्वेनाश्चर्यकरौ । स्ववेश्म स्वशालागृहं आनीय । नयतिर्द्विकर्मकः । पूजयामास श्लाघयामास ॥ २९ ॥ अथास्यप्रबन्धस्यप्रबन्धनायकभूतमहापुरुषपरिग्रहमाह—आसीनइत्यादिना । द्वयोरेकान्वयः । प्रभुः स्वामी । तदनुरूपतया काञ्चने सौवर्णे । दिव्ये स्वर्गाद्दशरथेनानीते । सिंहासने आसीनः सचिवैर्मन्त्रिभिर्भ्रातृभिश्च उपोपविष्टः परिवृतइत्यर्थः । "प्रसमुपोदःपादपूरणे" इतिद्विरुक्तिः । परंशत्रुंतापयतीतिपरंतपः । "द्विषत्परयोस्तापेः" इति खच् "खचिह्रस्वः" इत्युपधाह्रस्वः । "अरुर्द्विषदजन्तस्यमुम्" इतिमुमागमः । अनेनव्यासङ्गरहितत्वंसूचितं । नियतः अश्वमेधेदीक्षितः । स रामः । रूपसंपन्नौ भ्रातरौ दृष्ट्वा। लक्ष्मणादीनुवाच ॥ ३० ॥ ३१ ॥ देववर्चसोः देवतुल्यतेजसोः । रूपसंपत्तिरपि गीतिरस्यतासामग्रीतिभावः । अनयोः कुशीलवयोः संबन्धि । विचित्रार्थपदं इदमाख्यानं । श्रूयतां इत्युक्त्वेत्युपस्कार्यं । सम्यग्गायिनौ । अचोदयत् गानायप्रेरयामासेत्यर्थः ॥३२॥ सर्वाणिक्रियाविशेषणानि । मधुरं पाठतोगानतश्चमनोहरं । रक्तं रागवत् । स्वञ्चितः सुतरांपूजितः आयतोदीर्घः निस्वन आलापोयस्मिन् । तन्त्रीलयवत् तन्त्र्यारोपलयाभ्यांयुक्तं । अत्यर्थं भृशं । विश्रुतार्थं विस्पष्टार्थं ॥ ३३ ॥ गात्राणि सर्वावयवान् । हृदयानि गात्रान्तरवर्तीनिमनोधिष्ठानानि । मनांसिच ह्लादयत् सुखयत् । श्रोत्राश्रयसुखं श्रोत्रंकर्णशष्कुली तदाश्रयं श्रोत्रेन्द्रियं तत्सुखंतत्सुखकरं । तत् कुशलवकृतं । गेयं गानं । भावेयत् । जनसंसदि सभायां । जनशब्दोमण्डपव्यावृत्त्यर्थः । बभौ प्रच-

तिल० अविगीतमितिपाठे अनवद्यं यथातथा गीतमित्यर्थः ॥ २७ ॥ तिल० "उपोपविष्टसचिवः" इति पाठे उपसमीपे उपविष्टाःसचिवायस्येत्यर्थः । "उपोपविष्टैः सचिवैः" इति पाठे समीपस्थैः मन्त्रिभिर्भ्रातृभिश्चसमन्वितइत्यर्थः ॥ ३० ॥ तीर्था० आत्मरूपसंपन्नौ आत्मसदृशौ । तिल० दृष्ट्वातुरूपसंपन्नावितिप्रचुरःपाठः ॥ ३१ ॥

[पा०] १ गायनौ. २ ग. ङ. उपोपविष्टैः. क. सुखोपविष्टः. ३ ज. दृष्ट्वात्म-. ४ घ-झ. पन्नौविनीतौभ्रातरावुभौ. ५ झ. ग्गायन्तौ समचोद-. ङ. झ. ग्गायकौ सम-. ६ ज. व्यक्तं. ७ ख. ङ-. झ. स्वचित्तायत. ८ घ. श्रोतुः सुखकरं.

इमौ मुनी पार्थिवलक्षणान्वितौ कुशीलवौ चैव महातपस्विनौ ॥
ममापि तद्भूतिकरं प्रवक्ष्यते महानुभावं चरितं निबोधत ॥ ३५ ॥
ततस्तु तौ रामवचःप्रचोदितावगायतां मार्गविधानसंपदा ॥
स चापि रामः परिषद्गतः शनैर्बुभूषया सक्तमना बभूव ह ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुर्थः सर्गः ॥ ४ ॥

काशे अजृंभतेत्यर्थः ॥ ३४ ॥ उक्तमेवार्थंवृत्तान्तरेणसर्गान्तेसंगृह्णाति—इमावित्यादिश्लोकद्वयेन । इमौ मुनिवेषावपि पार्थिवलक्षणान्वितौ । कुशीलवावपि गायकावपि महातपस्विनौ महान्तौतपस्विनौ भवतः । तत् तस्मात् । ममापि प्रियाविरहक्लेशस्यापि । भूतिकरं श्रेयस्करं धारकमित्यर्थः । महाननुभावोयस्यतत् महानुभावं । चरितं सीताचरित्रमित्यर्थः । प्रवक्ष्यते आभ्यांव्यक्तं पठिष्यते । तन्निबोधत तच्छृणुतेत्यर्थः । अत्रपौराणिकाः । वक्तारौमहात्मानौवक्ष्यमाणंचमच्चरितंमहानुभावं । अतस्तन्निबोधतेत्याहुः । एवंह्यात्मप्रशंसास्वात्साचनयुक्ता अयंहिरामोधीरोदात्तः तस्यचाविकत्थनइतिलक्षणं । तस्यचस्वविषयप्रबन्धश्रवणंमहानुभावत्वोक्तिश्चनकथमप्युपपन्नं । लोकेहिक्षुद्रोपिकश्चित्स्वविषयप्रबन्धश्रवणेलज्जते । अतोऽन्यथायोजयन्त्याचार्याः । नायंप्रबन्धोरामचरित्रपरः किंतुसीताचरित्रपरः "सीतायाश्चरितंमहत्" इतिपूर्वमुक्तत्वात् । "श्रीमद्रामायणमपिपरंप्राणितित्वचरित्रे" इत्यभियुक्तवचनात् स्त्रीप्रसङ्गइत्याभाणकश्च । तद्विषयस्तुप्रबन्धोरामेणश्राव्यएव । विरहिणोहिकान्ताचरित्रगाथाःशृण्वन्तिश्रावयन्तिच । अतएव ममापिभूतिकरमित्युक्तं । विरहिणोपिमेसत्ताप्रदमित्यर्थः । यद्वा "अप्रमेयंहितत्तेजो यस्यसाजनकात्मजा" इत्युक्तरीत्याममाप्यतिशयावहमित्यर्थः । महानुभावमित्यस्यचप्रणयिन्यसन्निधानदशायामपिधारकमित्यर्थः । यद्वा । महानुभावं । "लघुतरारामस्यगोष्ठीकृता" इत्युक्तरीत्यास्वविषयेनिरवधिकापराधकारिराक्षसीरक्षणेन स्वस्मादप्यतिशयितवैभवमित्यर्थः । यद्वा । "दोषोयद्यपितस्यस्यात्सतामेतदगर्हितं" इतिमयोक्तं । अनयातु नकश्चिन्नापराध्यति" इति । अतोमत्तोप्युत्कृष्टचरितमित्यर्थः । यद्वा । स्वचरणेनिगडंबद्ध्वादेवस्त्रीचरणनिगडविच्छेदकारितयामत्तोप्याश्रितरक्षणेऽतिशयितत्वरायुक्तमित्यर्थः । यद्वा पितृत्वप्रयुक्तहितपरतयामयिसापराधविषयेकलुषधियि मातृत्वप्रयुक्तवात्सल्येन मामपिक्षमापयन्त्याश्चरितत्वेन महानुभावमित्यर्थः ॥ ३५ ॥ ततः श्रोतृप्रोत्साहनानन्तरं । रामस्यवचसाप्रचोदितौ नतुचेष्टयेत्यादरातिशयोक्तिः । तौ कुशीलवौ । मार्गविधानसंपदा देशी मार्गश्चेतिद्वौगानप्रकारौ । तत्रमार्गः सार्वत्रिकः । देशीकाचित्कः । तयोर्मध्ये मार्गनिर्वाहसामर्थ्या । अगायतां । स रामोपि । शनैः परिषद्गतः झटित्युत्थायगमनेपरिषदोप्युत्थानाद्रसभंगोभविष्यतीति मन्दंमन्दंसिंहासनादवतीर्य परिषदंप्राप्तः । "एकःस्वादुनभुञ्जीत"इतिन्यायादुन्नतसिंहासनावस्थानेनस्वात्मानमेकाकिनंमन्यमानःसभामध्यगतः । बुभूषया अनुबुभूषया श्रोत्रसुखानुभवेच्छयेत्यर्थः । यद्वा । बुभूषया भवितुमिच्छया कान्ताकथाश्रवणेनस्वसत्तालाभेच्छयेत्यर्थः । सक्तमनाः गानश्रवणासक्तचित्तः । बभूवह स्वशिष्योक्तप्रबन्धश्रवणेरामः स्वयमेवसादरंप्रसक्तइति मुनिस्तुष्यति । अत्रश्लोकद्वयेवंशस्थवृत्तं । "जतौतुवंशस्थमुदीरितं जरौ" इति लक्षणात् ॥ ३६ ॥ इति श्रीगोविन्दविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुर्थःसर्गः ॥ ४ ॥

तनि० मुनीमननशीलौ । पृथिव्याःपतिःपार्थिवः । तस्य लक्षणानि असाधारणावयवसंस्थानविशेषाः तैरन्वितौ । कुशीलवौ गायकौ । इमौअतिबालौ । क्वमुनित्वं क्वराज्यार्हता क्वमहातपस्वित्वं क्वगायकत्वं क्वेमेगुणाः क्वातिबालाविमाविति विरोधालंकारध्वनिः । गायमानौ चापि महातपस्विनावित्याश्चर्यालंकारध्वनिश्च । तपस्विनौ कुशीलवावित्यनेन गानस्य वंशपरंपरागतत्वाभावेन तत्प्रयुक्ताहंकाराद्यभावः केवलेश्वरप्रसादसिद्धत्वंचव्यञ्जितम् । ममापिभूतिकरं उभयविभूतिनायकस्यापि भूतिकरं संपत्करं किमुतान्येषां । यद्वा तदभावेममापिसत्तानिर्वहतीत्यर्थः । महानुभावं महामहिमवत् ममापि महानुभावमिति "सोअङ्गवेदयदिवानवेद" इत्युक्तरीत्यादुर्विज्ञेयमहिमयुक्तमित्यर्थः ॥ ३५ ॥ **विषम०** प्राकृतावलंबिगानं देशी संस्कृतावलंबितु मार्गः । स्वयं श्रवणेचोत्तरोत्तरं लोकानामुपादेयत्वबुद्ध्या श्रवणेप्रवृत्तौतस्यस्थिरत्वंभवतीतितदाशयः ॥ ३६ ॥ **इति चतुर्थः सर्गः ॥ ४ ॥**

[पा०] १ ङ. ज. ञ. प्रचक्ष्यते.

इदंच तपस्स्वाध्यायेत्यारभ्यसर्गचतुष्टयंमहत्परिग्रहसिद्धयेउक्तवैलक्षण्यत्रयप्रतिपादनपरत्वेनप्रबन्धोपोद्घातत्वात् श्रीरामायणान्तर्गतं कथाशरीरानुप्रविष्टप्रस्तावनाग्रन्थवत् । ननु रामायणनिर्माणानन्तरभाविनः कथाशरीरस्यास्य कथंतत्पूर्वभावइतिचेन्न । अनन्तरभावित्वेपित्रिकालज्ञेनमहर्षिणाप्रथमंतन्निर्माणसंभवात् । नन्वात्मप्रशंसापरमिदंसर्गत्रयंकथमृषिः स्वयमेषवक्तुमर्हतीतिचेन्न । अन्यापरिज्ञातस्यैतस्यवृत्तान्तस्यप्रेक्षावत्प्रवृत्त्यर्थमादाववश्यंवक्तव्यत्वात् । यद्वा । सर्गत्रयमिदंकेनचिद्वाल्मीकिशिष्येणरामायणनिर्वृत्त्यनन्तरंनिर्मायवैभवप्रकटनायसंगमितं । यथायाज्ञवल्क्यस्मृत्यादौ तथैवतत्रविज्ञानेश्वरेणव्याकृतं । नन्वेतस्यसर्गत्रयस्यरामायणादित्वेकुशलवाभ्यांएतद्गानेप्रथमंक्रियमाणेतौरामेणादावेवस्वपुत्राविवितिपरिज्ञातौस्यातां । तथाच । तदैवसीतानयनापत्तिः । "बिंबादिवोत्थितौबिंबौरामदेहात्तथापरौ । तौराजपुत्रौ" इत्यादिनाहिरामपुत्रत्वमनयोःसूच्यते तस्मादिदमसंगतमितिचेन्न । सीतापुत्रत्वादेरत्राकथनात् । रामसादृश्यमात्रस्यराजपुत्रान्तरेष्वपिसंभवात् । अयंचप्रबन्धोवेदोपबृंहणरूपोवेदान्तार्थमुपबृंहयति । "प्रायेणपूर्वभागार्थोधर्मशास्त्रेणकथ्यते । इतिहासपुराणाभ्यांवेदान्तार्थःप्रकाश्यते" इति वचनात् । तत्र "यतोवाइमानिभूतानिजायन्तेयेनजातानिजीवन्तियत्प्रयन्त्यभिसंविशन्तितद्विजिज्ञासस्वतद्ब्रह्म" इति श्रुतं । तत्किंजगज्जन्मादिकारणंब्रह्मविष्णुरुतब्रह्मरुद्रादिष्वन्यतमइत्यपेक्षायांरामत्वेनावतीर्णोविष्णुरेववेदान्तवेद्यंपरब्रह्मेत्युच्यते । "उपक्रमोपसंहारावभ्यासोपूर्वताफलं । अर्थवादोपपत्तीचलिङ्गंतात्पर्यनिर्णये" इत्युक्तषड्विधतात्पर्यलिङ्गसंभवात् । तथाहि । उपक्रमेतावत् "कोन्वस्मिन्—"इत्यादिनावेदान्तोदितसकलगुणसंपन्नःकिंविष्णुरुतान्योब्रह्मादिष्वन्यतमइतिवाल्मीकिनापृष्टे "इक्ष्वाकुवंशप्रभवोरामः—" इत्यादिनारामत्वेनावतीर्णो विष्णुरेवेतिनारदेनोक्तं । उपसंहारेचचतुर्मुखःप्राह । "तवाहंपूर्वकेभावेपुत्रःपरपुरंजय । संक्षिप्यचपुरालोकान्माययास्वयमेवहि । महार्णवेशयानोप्सुमांत्वंपूर्वमजीजनः । पद्मेदिव्येर्कसंकाशेनाभ्यामुत्पाद्यमामपि । प्राजापत्यंत्वयाकर्ममयिसर्वंनिवेशितं" इत्यादिनासर्वजगत्कारणप्रजापतिजनकत्वेनसकलजगत्कारणंब्रह्मविष्णुरेवेत्युक्तं । अभ्यासश्चतस्यैवदृश्यते बालकाण्डे । "एतस्मिन्नन्तरेविष्णुरुपजातोमहाद्युतिः । शङ्खचक्रगदापाणिःपीतवासाजगत्पतिः" इति जगत्कारणत्वमुक्तं । ततउत्तरत्रदेवाः । "त्वंगतिःपरमादेवसर्वेषांनः परंतप"इत्याहुः । तेनपरत्वासाधारणं सर्वशरण्यत्वमुक्तं । ततउत्तरत्र । "ततोदेवर्षिगन्धर्वाःसरुद्राःसाप्सरोगणाः । स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनं" इति सर्वस्तुत्यत्वमुक्तं । ततोविश्वामित्रः "अहंवेद्मिमहात्मानंरामंसत्यपराक्रमं । वसिष्ठश्चमहातेजायेचान्ये तपसिस्थिताः" इति । "वेदाहमेतंपुरुषंमहांतं तमेतंवेदानुवचनेनब्राह्मणाविविदिषन्तियज्ञेनदानेनतपसानाशकेन"इतिश्रुत्युक्तरीत्या महापुरुषत्वं तपोबलंविनातस्यदुर्ज्ञेयत्वंचाह । सीताविवाहेवसिष्ठोपि "अव्यक्तप्रभवोब्रह्माशाश्वतोनित्यअव्ययः । तस्मान्मरीचिःसंजज्ञेमरीचेःकाश्यपःसुतः" इति सर्वमूलकारणत्वंप्राचीकशत् । परशुरामोपि "अधिकंमेनिरेविष्णुंदेवाःसर्षिगणास्तदा" इतिसर्वाधिकत्वंनिदर्शितवान् । अयोध्याकाण्डे । "सहिदेवैरुदीर्णस्यरावणस्यवधार्थिभिः । अर्थितोमानुषेलोकेजज्ञेविष्णुःसनातनः" इति सनातनत्वमुक्तं । उत्तरत्र "आकाशप्रभवोब्रह्माशाश्वतोनित्यअव्ययः" इत्याकाशशब्देनस्वयंप्रकाशत्वं व्यापकत्वं चाह । आरण्यकाण्डे मारीचेन "अप्रमेयंहितत्तेजोयस्यसाजनकात्मजा" इतिपरिच्छेदातीतमहिमत्वमुक्तं । किष्किन्धाकाण्डेताराववचनं । "निवासवृक्षः साधूनामापन्नानांपरागतिः । आर्तानांसंश्रयश्चैवयशसश्चैकभाजनं । ज्ञानविज्ञानसंपन्नोनिदेशेनिरतःपितुः । धातूनामिवशैलेन्द्रोगुणानामाकरोमहान्" इति । "त्वमप्रमेयश्चदुरासदश्चजितेन्द्रियश्चोत्तमधार्मिकश्च । अक्षय्यकीर्तिश्चविचक्षणश्चक्षितिक्षमावान्क्षतजोपमाक्ष" इतिच । अनेनचज्ञानानन्दादिसमस्तकल्याणगुणाकरत्वमुक्तं । सुन्दरकाण्डे "ब्रह्मास्वयंभूश्चतुराननोवारुद्रस्त्रिनेत्रस्त्रिपुरान्तकोवा । इन्द्रोमहेन्द्रःसुरनायकोवा त्रातुंनशक्तायुधिरामवध्यं" इतिसर्वसंहर्तृत्वंद्योतितं । उत्तरत्र । "किंवैष्णवंवाकपिरूपमेत्यरक्षोविनाशायपरं सुतेजः । अनन्तमव्यक्तमचिन्त्यरूपंस्वमाययासांप्रतमागतंवा । द्वितीयो वाकारोऽवधारणार्थः । अनेनानन्तरूपत्वमुक्तं । युद्धकाण्डे विष्णुरेवकथंजगत्कारणं अन्येषामपि "हिरण्यगर्भस्समवर्तताग्रे" "यदातमस्तन्नदिवानरात्रिर्नसन्नचासच्छिवएवकेवलः" । "इन्द्रोमायाभिःपुरुरूपईयते" इत्यादिनातत्त्वश्रवणादि-

त्याशङ्क्य तेभ्यःसर्वेभ्यःश्रेष्ठत्वप्रतिपादनाद्धिरण्यगर्भ-शिवेन्द्रादिशब्दाःसद्ब्रह्मात्मशब्दवद्विष्णुपराएवेत्याशयेनोच्यते । "व्यक्तमेषमहायोगीपरमात्मासनातनः । अनादिमध्यनिधनोमहतःपरमोमहान् । तमसःपरमोधाताशङ्खचक्रगदाधरः । श्रीवत्सवक्षानित्यश्रीरजय्यःशाश्वतोध्रुवः" इति । अनेनचपरमात्मत्वश्रीपतित्वादिकमुक्तं । उत्तरत्र "भवान्नारायणोदेवःश्रीमांश्चक्रायुधोविभुः । एकशृङ्गोवराहस्त्वंभूतभव्यसपत्नजित्" इत्यादि । अनेनतस्यनारायणशब्दवाच्यत्वमुक्तं । अपूर्वताचप्रमाणान्तराप्राप्तिः । नहि परतत्त्वस्यविष्णुत्वं प्रमाणान्तरादवगन्तुंशक्यं । फलंच भगवत्सालोक्यादिकमित्यन्तेसुव्यक्तं । अर्थवादोपपत्तीच बालकाण्डेदर्शिते । "इमेद्वेधनुषीश्रेष्ठे" इत्यादिनाऽर्थवादमुक्त्वा जृंभितंतद्धनुर्दृष्ट्वाशैवंविष्णुपराक्रमैः । अधिकंमेनिरेविष्णुंदेवाःसर्षिगणास्तदा" इत्यादिनाब्रह्मप्रमुखैस्सर्षिगणैर्देवैर्मीमांसापूर्वकंविष्णुरुद्रयोर्मध्येविष्णोराधिक्यनिर्णयोक्तेरुपपत्तिरुक्ता । नचवाच्यं मेनिरइतिवचनात् "महाशूरतरस्तथा" इतिवरदानकृतमिदमाधिक्यमिति । तथात्वे तस्यरोषानुपपत्तेः । "धनूरुद्रस्यसंक्रुद्धः" इतिह्युक्तं । किंचागस्त्याश्रमे "सतत्रब्रह्मणःस्थानंविष्णोःस्थानंतथैवच । अग्नेःस्थानंमहेन्द्रस्यस्थानंचैवविवस्वतः । सोमस्थानंभगस्थानंस्थानंकौबेरमेवच" इत्यादिनाब्रह्मादीनांअगस्त्योपास्यत्वमुक्त्वा रुद्रस्यतदकथनादपूज्यत्वमुच्यते । नचेमान्यगस्त्यपूजकब्रह्मादिस्थानानीतिवाच्यं । असंभवात् । "अत्रदेवाःसगन्धर्वास्सिद्धाश्चपरमर्षयः । अगस्त्यंनियताहारंसततंपर्युपासते" इतिवचनंब्रह्मादिव्यतिरिक्तकेवलदेवविषयं । किंच । यथा गृहस्थस्वगृहेदेवगृहसत्त्वेगृहस्थस्यैवपूजकत्वंस्वरसतःप्रतीयते । एवमेवात्रापि नापलापावकाशः । किंच । दक्षयज्ञवधे "यस्माद्भागार्थिनोभागःकल्पितो नैवमेसुराः । वराङ्गानिमहार्हाणिधनुषाशातयामिवः" इतिरुद्रस्ययज्ञभागाकल्पनादपूज्यत्वादत्रतस्यस्थानानिर्देशः । ननु यदिविष्णुःपरादेवता कथं तर्हितस्यरामत्वेनजन्मेतिचेन्न । "अजायमानोबहुधाविजायते" इत्युक्तरीत्या लोकानुजिघृक्षाकृतंतदितिचोद्यानवकाशात् । मोक्षप्रदत्वंचपरदेवताऽसाधारणमत्रोच्यते । "यागतिर्यज्ञशीलानामाहिताग्नेश्चयागतिः । अपरावर्तिनांयाचयाचभूमिप्रदायिनां । मयात्वंसमनुज्ञातो गच्छलोकाननुत्तमान्" इति । अत्रापरावर्तित्वंपुनरावृत्तिशून्यत्वं । मुक्तिरितियावत् । "नचपुनरावर्तते" इतिश्रुतेः । नच रणादपलायनमुच्यतइतिवक्तुंशक्यते तस्यस्वतस्सिद्धत्वेनतत्फलस्याननुग्राह्यत्वात् । तथाच यज्ञादिफलावधिभूतांमुक्तिंप्राप्नुहीत्यर्थः । अतएवनृसिंहपुराणे "मत्कृतेनिधनंयस्मात्त्वयाप्राप्तंद्विजोत्तम । तस्मात्त्वंमत्प्रसादेनविष्णुलोकमवाप्स्यसि" इति । एवमुपक्रमादिषड्विधतात्पर्यलिङ्गैर्वेदान्तवेद्यंपरतत्त्वं विष्णुरेवेतिश्रीरामायणेनोपबृंह्यते । एवमेवान्तेब्रह्माप्याह "अस्याःपरिषदोमध्येयद्ब्रवीमिनिबोधतत् । एतदेवहिकाव्यंतेकाव्यानामुत्तमंश्रुतं । सर्वविस्तरतोराजन्व्याख्यास्यतिनसंशयः । आदिकाव्यमिदंरामत्वयिसर्वंप्रतिष्ठितं । नह्यन्योऽर्हतिकाव्यानांयशोभाग्राघवादृते" इति । एवंस्थितेयत्केनचिन्नवीनेनजल्पितं व्यञ्जनावृत्त्याशिवपरंरामायणमितितदपहास्यमेव । नह्यन्योर्हतीतिप्रतिषिद्धरुद्रस्यप्रतिपाद्यकोट्यन्तर्भाववचनस्यकेवलबालिशप्रलपितत्वात् । यच्चरामेणादित्योपस्थानादिकंकृतंतत्सर्वंविश्वामित्राद्युपासनवन्मनुष्यभावनानुसारेणेतिविज्ञेयं । विशेषतश्चतत्रतत्रवक्ष्यामः । "श्रीविष्णोःप्रथमेकाण्डेजगज्जननहेतुता । द्वितीयेस्थितिहेतुत्वंतृतीयेमोक्षदायिता । चतुर्थेगुणसंपत्तिःपञ्चमेसर्वहन्तृता । षष्ठेवेदान्तवेद्यत्वंसप्तमेस्रष्टृहेतुता । एवंविष्णुःपरंतत्त्वंरामात्मेतिसुनिश्चितम् । श्रीशैलपूर्णाद्यतिशेखरेणश्रुतान्पुराष्टादशधाप्रभिन्नान् । रामायणार्थान्क्रमशःकरोमिव्यक्ताञ्छठारातिगुरूपदिष्टान्" । गतएकोर्थः । द्वितीयस्तु एवंभूतंपरतत्त्वंकेनप्राप्यतइत्याकाङ्क्षायांतत्प्राप्त्युपायभूतांशरणागतिं "योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै । तंहदेवमात्मबुद्धिप्रसादंमुमुक्षुर्वैशरणमहंप्रपद्ये" इतिश्रुतिमुपबृंहयन् वाल्मीकिर्ह्यस्मिन्रामायणे उपक्रमप्रभृत्युपसंहारान्तमनेकाधिकारिफलविशेषादिप्रदर्शनमुखेनाखिलफलसाधनतयाप्रतिपादयति । तथाहि । उपक्रमेतावत् "एतस्मिन्नन्तरेविष्णुरुपयातोमहाद्युतिः । शङ्खचक्रगदापाणिःपीतवासाजगत्पतिः" इति सर्वेशेषीसर्वेश्वरोरक्षापेक्षाप्रतीक्षोरक्षणसमयोलब्धइतिसमुद्भूतौज्ज्वल्योरक्षणोपकरणैःसहसन्नद्धोभ्येत्यतस्थौ । तदा । "देवगन्धर्वयक्षाश्चततस्त्वांशरणंगताः" इति रावणवधरूपफलार्थंब्रह्मरुद्रादिदेवगणशरणागतिरुक्ता । ततस्त्रिशंकुशुनःशेफादिवृत्तान्तेषुविश्वामित्रादिव्यापारविशेषानुदीर्य शरणागतरक्षणंपरमोधर्मः सम-

र्थकारुणिकविषयाशरणागतिः फलाविनाभूतेतिप्रदर्शितं। ततश्च "सभ्रातुश्चरणौगाढंनिपीड्यरघुनन्दनः। सीतामुवाचातियशाराघवंचमहाव्रतं"इति पुरुषकारपुरस्करणपुरस्सराशरणागतिःकार्येत्युदीरितं । ततोभरतः "शेष्येपुरस्ताच्छालायायावन्मेनप्रसीदति"इतिरामाभिषेकफलायशरणवरणमकरोत् । अत्र रावणवधायकृतदेवगणप्रपत्तिफलदानायनिर्गमनात् तदानींरामस्स्वप्रतिनिधिभूतपादुकाप्रदानेन तत्सफलंकृत्वापश्चाद्देवगणमनोरथपूरणानन्तरमात्मानंअभ्यषिञ्चत् । अतोनशरणागतिवैफल्यंचोद्यं । अथदण्डकारण्यवासिभिर्विरोधिनिरसनायशरणागतिरनुष्ठिता । "तेवयंभवतारक्ष्याभवद्विषयवासिनः । नगरस्थोवनस्थोवात्वंनोराजाजनेश्वर"इति । अत्रकोसलजनपदवासिनामिवभगवद्विषयवासएवशरणागतिः । तदनन्तरं"सपित्राचपरित्यक्तःसुरैश्चसमहर्षिभिः । त्रींल्लोकान्संपरिक्रम्यतमेवशरणंगतः । सतंनिपतितंभूमौशरण्यःशरणागतं । वधार्हमपिकाकुत्स्थःकृपयापर्यपालयत्"इति काकवृत्तान्तेनाग्रतःपतनमेवशरणागतिरित्यदर्शि । तदनुसुग्रीववृत्तान्तेन "कृतापराधस्यहितेनान्यत्पश्याम्यहंक्षमं । अन्तरेणाञ्जलिंबद्धालक्ष्मणस्यप्रसादनात्" इतिशरणागतिरञ्जलिरूपोक्ता । अथसीतावचनेन "मित्रमौपयिकंकर्तुरामःस्थानंपरीप्सता । वधंचानिच्छताघोरंत्वयासौपुरुषर्षभः । विदितःसहिधर्मज्ञःशरणागतवत्सलः । तेनमैत्रीभवतुतेयदिजीवितुमिच्छसि"इत्यनेनानुकूल्यमेवशरणागतिरित्यबोधि । उपरि "सोहंपरुषितस्तेनदासवच्चावमानितः। त्यक्त्वापुत्रांश्चदाराश्चराघवंशरणंगतः" इति विभीषणशरणागत्याविरोधिपरित्यागपूर्वकत्वमुक्तं । "ततःसागरवेलायांदर्भानास्तीर्यराघवः । अञ्जलिंप्राङ्मुखःकृत्वाप्रतिशिश्येमहोदधेः" इतिरामशरणागत्यायोग्यस्यनायोग्यताऽन्वेष्टव्या । अयोग्यस्यचनयोग्यतेत्युक्तं । अशुचिभूतलङ्कानिर्गतमात्रएवहिविभीषणश्शरणमवृणोत् । रामशरणागतेःफलाभावः समर्थकारुणिकविषयत्वाभावादित्याहुः । उत्तरत्र "अभियाचामवैदेहीमेतद्धिममरोचते । राघवाद्धिभयंघोरं राक्षसानामुपस्थितं" इतित्रिजटावचनानुमतिमात्रेणहनुमद्भयात् सर्वासांरक्षितत्वकथनादन्यविषयेऽन्येनापिकृताशरणागतिः फलवतीतिनिदर्शितं । विभीषणशरणागत्यैवतत्सचिवानांरक्षणात् शरणागतसंबन्धिनोपिभगवत्कटाक्षपात्रभूताएवेतिनिरणायि । एवमन्यत्रापिद्रष्टव्यं । एवमुपक्रमप्रभृत्योपसंहारात् प्रतिपादिताशरणागतिरेवसर्वफलप्रदा सैवमुक्तेरपिहेतुरित्युक्तं । विशेषस्तुतत्रप्रकरणेप्रपञ्चयिष्यते ॥ २ ॥

अस्यचोपायस्यप्राप्यंभगवत्प्राप्तिपूर्वकंतत्कैङ्कर्यमेवेतिरामायणेनप्रतिपाद्यते । तथाहि । उपक्रमेदेवजातीयशरणागतेरामकैङ्कर्यप्रधानफलमित्युच्यते । अप्सरःप्रभृतिष्ववतीर्यतैस्तदनुवर्तनोपदेशात् । रावणवधस्त्वानुषङ्गिकः । लक्ष्मणोपिप्रपद्याह "अहंसर्वंकरिष्यामि जाग्रतःस्वपतश्चते । भवांस्तुसहवैदेह्यागिरिसानुषुरंस्यते"इति । तेनसर्वदेशसर्वकालसर्वावस्थोचितसर्वकैङ्कर्यफलमितिव्यञ्जितं । भरतोपिरामकैङ्कर्यायैवतदभिषेकंप्राथ्र्यपादुकाविषयकैङ्कर्यक्रमेणमनीषितमलभत । दण्डकारण्यवासिनांशरणागतेरपिवाचिकादिरूपमेवकैङ्कर्यफलमित्यवगम्यते । "तेतंसोममिवोद्यन्तंदृष्ट्वावैधर्मचारिणः । मङ्गलानिप्रयुञ्जानाःप्रत्यगृह्णन्दृढव्रताः" इत्युक्तेः । सुग्रीवविभीषणादिप्रपत्तेरपिमुख्यं फलंकैङ्कर्यमन्यदानुषङ्गिकमितिस्पष्टं । "अथहरिवरनाथःप्राप्यसंग्रामकीर्तिंनिशिचरपतिमाजौयोजयित्वाश्रमेण । गगनमतिविशालंलङ्घयित्वाऽर्कसूनुर्हरिवरगणमध्येरामपार्श्वंजगाम । परित्यक्तामयालङ्कामित्राणिचधनानिच । भवद्गतंमेराज्यंचजीवितंचसुखानिच" इत्यादिना । एवंप्राणार्थिनःकाकस्यप्राणप्रदानेनतत्प्रपत्तिःसफला । असत्प्रकृतेरस्यपुनरप्येवंदुरितप्रवृत्तिर्माभूदितिशिक्षणरूपानुग्रहायैकाक्षिनिरसनेनास्त्रंनिवर्तयामास । यथा परशुरामंप्रतिप्रयुक्तमस्त्रं तस्मिन्प्रातिकूल्यान्निवृत्तेतन्मनीषितविरोधिसुकृतेषुप्रायुङ्क्त । यथाच समुद्रंप्रत्युपात्तमस्त्रम् तस्मिन्सानुतापेशरणागते द्विषत्सु आश्रितानांपापकृत्याप्रवेशनन्यायेनतद्विरोध्यसुरेषुप्रयुयुजे । रामप्रपत्तिस्त्वाकिञ्चन्यानन्यगतित्वरूपाधिकाररहितेनकृतत्वादल्पज्ञाल्पशक्तिकविषयत्वाच्चविफलेतिध्येयम् । "समुद्रंराघवोराजाशरणं गन्तुमर्हति" इतिविभीषणोक्तिस्तुस्वप्रपत्तेःफलदर्शनकृता । तस्मादनेनप्रकारेणशरणागतेर्देशकालाधिकारिफलनियमाभावेपि विषयनियमोस्तीत्युक्तं । इयंचप्रपत्तिरस्मिन्प्रबन्धेप्रधानतयाप्रतिपाद्यते । अतएव "श्रीरामायणमृदीर्घशरणागतिः" इत्याभाणकः । तदुपयुक्ततयेतरेषामर्थानांप्रतिपादनम् । तथाहि । समर्थकारुणिकसुशीलविषयिणीशरणागतिःफलदा-

यिनी । तत्र रौद्रधनुर्भङ्गपरशुरामजयसालभेदनसमुद्रबन्धनादिभिरुक्तपरत्वप्रतिपादनैश्चसामर्थ्यं सर्वज्ञत्वादिकंचोक्तम् । सीतावियोगकालिकवृत्तान्तविशेषैः परमकारुणिकत्वम् । गुहशबरीसुग्रीवादिभिर्नीरन्ध्रसंश्लेषेणसौशील्यम् । विश्वामित्राध्वरत्राणदण्डकारण्यवासिमुनिजनरक्षणरावणबाधितेन्द्रादिसकलदेवगणपरिपालनैः निजजनपदजनानामात्मसौन्दर्यशीलादिभिःप्रीतिमुत्पाद्यस्वपदप्राप्तिरूपसाक्षादवतारप्रयोजनभूतमोक्षप्रदानैश्चसर्वरक्षकत्वम् । अतःसमर्थपरमकारुणिकसुशीलभगवत्प्रपत्तेःसकलफलसाधनत्वेपि अधिकारिविशेषानुष्ठितायास्तस्याभगवत्प्राप्तिपूर्वकतत्कैङ्कर्यरूपमोक्षएवमुख्यंफलम् । आनुषङ्गिकंफलान्तरमितिसुस्पष्टम् । एवंसर्वत्रद्रष्टव्यं ॥ ३ ॥ इयंचप्रपत्तिःपुरुषकारेणविनानफलायभवतीत्यर्थोस्मिन्प्रबन्धे प्रधानतयाप्रतिपाद्यते । "सीतायाश्चरितंमहत्"इतिह्युक्तं। तस्याश्चविश्लेषत्रयेणकृपापारतन्त्र्यानन्यार्हत्वरूपपुरुषकारधर्मप्रतिपादनात् । तत्संनिधानेनकाकःशिरोलेभेतदभावान्नरावणः । विभीषणोपि "निवेदयतमांक्षिप्रंविभीषणमुपस्थितं" इतिघटकमुखेनैवरामंशरणमवृणुत । रामोपि । "आनयैनंहरिश्रेष्ठ" इतिघटकमुखेनैवविभीषणंविषयीचकार । एवंसुग्रीवोपि रामभक्तहनुमन्मुखेनरामंशरणंययौइत्येवंज्ञातव्यं॥४॥ एवंभूतोपायाधिकारिस्वरूपंशेषत्वंपारतन्त्र्यंच । तत्रशेषत्वंलक्ष्मणाचारेणप्राचीकशत् । "अहमस्यावरो भ्रातागुणैर्दास्यमुपागतः । कुरुष्वमामनुचरंवैधर्म्यंनेहविद्यते । कृतार्थोऽहंभविष्यामितवचार्थःप्रकल्पते" इत्यादिना ॥ ५ ॥ भरतमुखेनपारतन्त्र्यंप्रकटीकृतं "विललापसभामध्येजगर्हेचपुरोहितं । राज्यंचाहंच रामस्यधर्मंवक्तुमिहार्हसि"इत्यादिना "सर्वात्मनापर्युनुनीयमानोयदानसौमित्रिरुपैतियोगं । नियुज्यमानो भुवियौवराज्येततोभ्यषिञ्चद्भरतंमहात्मा" इत्यन्तेन ॥ ६ ॥ श्रीशत्रुघ्नव्यापारेणभागवतपारतन्त्र्यंप्राचीकशत् । "गच्छतामातुलकुलंभरतेनतदानघः । शत्रुघ्नो नित्यशत्रुघ्नोनीतःप्रीतिपुरस्कृतः" इत्यादिना ॥ ७ ॥ अस्यचाधिकारिणोज्ञातव्यमर्थपञ्चकमत्रोच्यते । तथोक्तं । "प्राप्यस्यब्रह्मणोरूपंप्राप्तुश्चप्रत्यगात्मनः । प्राप्त्युपायंफलंप्राप्तेस्तथाप्राप्तिविरोधिच । वदन्तिसकलावेदाःसेतिहासपुराणकाः । मुनयश्चमहात्मानोवेदवेदाङ्गपारगाः" इति । तत्र रामप्रस्तावेनपरस्वरूपं । लक्ष्मणादिवृत्तान्तेनप्रत्यगात्मस्वरूपं । शरणागतिवर्णनेनोपायस्वरूपं । विभीषणादिकथयाफलस्वरूपं भगवत्कैङ्कर्यरूपम् । रावणादिवृत्तान्तेनविरोधिस्वरूपंचोक्तमितिज्ञेयं ॥ ८ ॥ अस्याधिकारिणआकिञ्चन्यंअनन्यगतित्वंचापेक्षितमितिवक्तुंब्रह्मरुद्रादिदत्तवरस्यरावणस्यवधेनब्रह्मरुद्रादिदेवतान्तराणां । दशरथचरितेनपितुः । कैकेय्यादिवृत्तान्तेनमात्रादेः । विभीषणमेघनादादिवृत्तान्तेनभ्रातृपुत्रादेश्चारक्षकत्वोक्तिः ॥ ९ ॥ अस्यचभगवज्ज्ञानलाभआचार्यमूलइतिहनुमच्चरितेनदर्शितं । तदेवसुन्दरकाण्डेवक्ष्यामः ॥ १० ॥ अनेनचाधिकारिणा "कृतकृत्याःप्रतीक्षन्तेमृत्युंप्रियमिवातिथिम्" इत्युक्तरीत्याशरीरपातावधिकालःप्रतीक्षणीयइतिसीताध्यवसायेनोच्यते । "शरैस्तुसंकुलांकृत्वालङ्कांपरबलार्दनः । मांनयेद्यदिकाकुत्स्थस्तत्तस्यसदृशंभवेत्"इतिह्युक्तं । लङ्कानामशरीरं । रावणकुंभकर्णावहंकारममकारौ । इन्द्रजिदादयःकामक्रोधादयः । विभीषणोविवेकः । तत्ररुद्धासीताचेतनः । तस्यचभगवज्ज्ञानंहनुमताऽऽचार्येण । तादृशशरीरध्वंसपूर्वकं तदन्तर्निरुद्धचेतनोद्धरणम् भगवतैवेतिविस्तरोभविष्यति ॥ ११ ॥ अस्यचयावच्छरीरंकर्तव्यविषयेरामादिवद्वर्तितव्यं नरावणादिवदित्युपदेशश्चयथायोगंक्रियते ॥ १२ ॥ अस्यचवासयोग्योदेशोभगवत्संनिधिमान्देशएवेतिकोसलजनपदस्थजनवृत्तान्तेनोक्तं ॥ १३ ॥ अस्यचकालक्षेपोपिरामायणेनैव । द्वयविवरणरूपत्वात् । अतएव "रामायणंदीर्घशरणागतिः" इत्यभियुक्तैरुक्तं । "द्वयमर्थानुसंधानेनसहसदैवंवक्ता" इतिचभाष्यकारः । तत्रबालकाण्डेन श्रीमच्छब्दार्थउक्तः । अयोध्याकाण्डेन नारायणशब्दार्थः । कल्याणगुणानामुपवर्णनात् । आरण्यकाण्डेन "तेतंसोममिवोद्यन्तं" इत्यादिनादिव्यमङ्गलविग्रहवर्णनात् । चरणशब्दार्थः । किष्किन्धाकाण्डसुन्दरकाण्डाभ्यां शरणशब्दार्थः । युद्धकाण्डेन प्रपद्यइत्यस्यार्थः । उत्तरकाण्डेन मुक्तिफलकीर्तनादुत्तरखण्डार्थः ॥ १४ ॥ अस्यचाधिकारिणःसदाजप्यंरामायणमेवेतिदर्शयितुं गायत्र्यर्थोत्रप्रतिपाद्यते । तथाहि । बालकाण्डेवेदप्रसिद्धजगत्प्रसूतिहेतुभूतभगवत्स्वरूपवर्णनात् तत्सवितृशब्दार्थः । अयोध्याकाण्डकिष्किन्धाकाण्डयोःगुणगणवर्णनात् वरेण्यशब्दार्थः । आरण्यकाण्डेतेजोमयशरीरवर्णनात् भर्गश्शब्दार्थः । सुन्दरकाण्डेदिव्यम-

पञ्चमः सर्गः ॥ ५ ॥

अयोध्यावर्णनम् ॥ १ ॥

सर्वापूर्वमियं येषामासीत्कृत्स्ना वसुंधरा ॥ प्रजापतिमुपादाय नृपाणां जयशालिनाम् ॥ १ ॥
येषां स सगरो नाम सागरो येन खानितः ॥ षष्टिः पुत्रसहस्राणि यं यान्तं पर्यवारयन् ॥ २ ॥
इक्ष्वाकूणामिदं तेषां राज्ञां वंशे महात्मनाम् ॥ महदुत्पन्नमाख्यानं रामायणमिति श्रुतम् ॥ ३ ॥

ङ्गलविग्रहलक्षणवर्णनात् देवशब्दार्थः । युद्धकाण्डे धीमहिशब्दार्थः । शरणागत्युक्तेः । उत्तरकाण्डे मुक्तिफलकीर्तनात्तृतीयपादार्थइति ॥ १५ ॥ एतेनचाधिकारिणा चार्वाकबौद्धादिदर्शनाद्यसच्छास्त्रस्पर्शोपि नकार्यइतिजाबालिलक्ष्मणवचनतत्प्रत्यादेशादिना निर्णीयते ॥ १६ ॥ महतामपिव्यसनंभवति । अतःसंसारेजिहासाकार्येतिवैराग्यसंपत्तये नागपाशब्रह्मास्त्रबन्धसीतापहरणराज्यभ्रंशादिना व्यक्तमुक्तं । विस्तरस्तुतत्रतत्र प्रदर्शयिष्यते । दिङ्मात्रमत्रप्रदर्शितं ॥ १७ ॥ लोकव्यवहाराय चतुष्षष्टिकलार्थोपि संग्रहेणात्रप्रतिपाद्यते । "यदिहास्तितदन्यत्रयन्नेहास्तिनतत्कचित्" इतिन्यायात् । तथाहि । प्रतिपादितयादिशावेदार्थोदर्शितः । हनुमद्वचनश्लाघायां "अनयाचित्रयावाचात्रिस्थानव्यञ्जनस्थया" इत्यादौ शीक्षार्थः । अश्वमेधादिप्रकरणे कल्पसूत्रार्थः । "नूनंव्याकरणंकृत्स्नमनेन बहुधाश्रुतं" इत्यादौव्याकरणार्थः । एवमन्यत्सर्वंअत्र सूक्ष्मबुद्ध्याज्ञातव्यं । एवमेतेष्टादशार्थाआचार्योपदिष्टाः ॥ १८ ॥ तत्र प्रथमंरावणनिबर्हणफलांगीर्वाणगणशरणागतिंदर्शयितुंपीठिकामारचयति । वाजिमेधपर्यन्तवृत्तान्तेन । अग्निपुरुषोत्थानमारभ्यरावणवधपर्यन्तोवृत्तान्तस्तत्फलम् । उत्तरकाण्डेस्वावतारप्रयोजनम् धर्मस्थापनंमुक्तिप्रदानंच । "वक्तव्यमन्यत्तात्पर्यंतत्रतत्राभिधीयते ॥ सन्तोत्युक्तमनुक्तंचसमाधातुमिहार्हथ । नमःशठारिगुरवेनमोवल्मीकजन्मने । नमोनारायणायेदंनमोरामायविष्णवे" ॥

इत्थंसंक्षेपेण "आचार्यवान् पुरुषोवेद । आचार्याद्धैवविद्याविदितासाधिष्ठंप्रापत्" इतिश्रुत्युक्तरीत्याऽऽचार्योदेवविद्याप्राप्तव्येत्यमुमर्थमभिव्यञ्जयन्स्वेननारदाद्विदितमर्थंप्राचीकशत् । अथसर्गत्रयेणाचार्यप्रसादकार्यं सर्ववस्तुसाक्षात्कारस्तद्विषयप्रबन्धनिर्माणचातुर्यंचाभिहितं । अथपरमकारुणिकोभगवान्वाल्मीकिः रामायणाख्यंकाव्यमारभमाणः प्रारिप्सितप्रबन्धस्यनिर्विघ्नपरिसमाप्त्यर्थंप्रचयगमनार्थं च "आशीर्नमस्क्रियावस्तुनिर्देशोवापितन्मुखं" इत्युक्तरीत्याकाव्यमुखत्वेनादौकर्तव्यंवस्तुनिर्देशंकुर्वन् अर्थाद्विषयप्रयोजनेचदर्शयन् कर्तव्यंप्रतिजानानः सत्परिग्रहमर्थयते—सर्वापूर्वमित्यादिश्लोकचतुष्टयेन । कृत्स्ना सप्तद्वीपालिका इयंवसुंधरा भूमिः । जयेनशालन्ते भासन्तइति जयशालिनः तेषां येषांनृपाणां प्रजापतिं मनुं "मनुःप्रजापतिःपूर्वमिक्ष्वाकुस्तुमनोःसुतः" इतिवक्ष्यमाणत्वात् । उपादाय आरभ्य सर्वापूर्वं सर्वेषामितरेषांराज्ञांअपूर्वंदुर्लभं यथाभवतितथा आसीत् स्वमासीदित्यर्थः ॥१॥ जयशालित्वंकुत्रचिदुदाहृत्यदर्शयति—येषामिति । येषां नृपाणांमध्ये सः प्रसिद्धः सगरः । प्रसिद्धिमेवाह—सागरः समुद्रः स्वनामाङ्कितः येन सगरेण खानितः षष्ट्यापुत्रसहस्रैरवदारितः । नामप्रसिद्धौ । किंच यान्तं दण्डयात्रयागच्छन्तं यं षष्टिःपुत्रसहस्राणि पर्यवारयन् परितोऽगच्छन् । इक्ष्वाकुप्रभृतिषुविद्यमानेषुसगरमात्रकीर्तनं तेनाखिलायाःभूमेः पुनरुद्धृतत्वात् । षष्टिरिति पङ्क्तिसूत्रेनिपातितः । अतएकवचनस्यापिबहुवचनविशेषणत्वं ॥२॥ महात्मनां महाप्रभावानां । इक्ष्वाकूणांइक्ष्वाकुवंश्यानां । "तद्राजस्यबहुषुतेनैवास्त्रियां" इतितद्राज-

तीर्था० अविद्यमानःपूर्वो यस्मादपूर्वंसर्वेषांराज्ञां अपूर्वंप्रथममितियावत् । क्रियाविशेषणमेतत् । **तिल०** सर्वापूर्वंऐहिकामुष्मिकसर्वापूर्वसाधनं यथाभवतितथाआसीत् । सर्वापूर्वशब्दोलुप्तादेयपरोनियतनपुंसकलिङ्गइतिकेचित् ॥ १ ॥ **तिल०** येषांवंशे ससगरोनामाभूत् । षष्टिगुणितानिपुत्रसहस्राणिषष्टिपुत्रसहस्राणि । अनेनतदुद्धारार्थं तद्वंश्येनजगत्पवित्रीकरणसमर्थागङ्गायद्वंशेऽवतारितेतिव्यज्यते । तेनचातिशयितंतद्वंशमाहात्म्यंसूचितं । तद्वंशस्यगङ्गापरनामकभगवदवतारयोग्यताचतेनसूचिता ॥ २ ॥ **शिरो०** इक्ष्वाकूणांवंशेरामायणमुत्पन्नमित्यनेन रामरामायणयोस्तादात्म्यंसूचितम् । प्रसिद्धंचप्रतिपाद्यप्रतिपादकयोस्तादात्म्यं "रामेतिद्व्यक्षरंनाम" इत्यादौ ॥ ३ ॥

[पा०] १ च यशस्विनां. २ ङ. षष्टिपुत्रसहस्राणि.

तदिदं [1]वर्तयिष्यामि सर्वं निखिलमादितः ॥ धर्मकामार्थसहितं श्रोतव्य[2]मनसूयया ॥ ४ ॥
कोसलो नाम मुदितः स्फीतो जनपदो महान् ॥ निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ॥ ५ ॥
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता ॥ मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम् ॥ ६ ॥
आयता दश च द्वे च योजनानि महापुरी ॥ श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा ॥ ७ ॥
राजमार्गेण महता सुविभक्तेन शोभिता ॥ मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः ॥ ८ ॥
तां तु राजा दशरथो महाराष्ट्रविवर्धनः ॥ पुरीमावासयामास [3]दिवं देवपतिर्यथा ॥ ९ ॥

प्रत्ययस्यबह्वर्थत्वाल्लुक् । तेषांराज्ञां वंशे वंश्येरामेविषये रामायणमिति श्रुतं प्रसिद्धं महत् पूजनीयं इदमाख्यानं कथाप्रबन्धः । उत्पन्नं ब्रह्मणःप्रसादादितिशेषः । तत्रनिमित्तमात्रमहमितिविनयोक्तिः । अत्रवर्णनीयस्य नायकस्यसर्वापूर्वमित्यनेनमहाभाग्यत्वंनामगुणउक्तः । येषामित्यादिश्लोकद्वयेनमहाकुलीनत्वम् ॥३॥ब्रह्मप्रसादादेवोत्पन्नत्वेतवकिंकृत्यं तत्राह—तदिति । तत् ब्रह्मप्रसादोत्पन्नं इदं रामायणं वर्तयिष्यामि प्रवर्तयिष्यामि । धर्मकामार्थसहितं तत्प्रतिपादकं तत्फलकंवा सर्वं रामायणं आदितः तदवतारदेशात्प्रभृति निखिलं अन्यूनंयथाभवतितथा अनसूयया असूयाभिन्नया श्रद्धयेत्यर्थः । श्रोतव्यं नतुस्वयंलिखितपाठेननिरीक्षितव्यं ब्रह्मणएवोत्पन्नमिदं ममतुतत्प्रवर्तनएवाधिकारः । अतः प्रेक्षावद्भिरत्रासूयानकर्तव्या किंतुभक्त्यैवश्रोतव्यमिति भावः । अत्रतेषांवंशइत्यनेन विषयउक्तः । धर्मकामार्थसहितमित्यनेन प्रयोजनमुक्तं । अनसूययेत्यनेन अनसूयवोऽधिकारिणः । कार्यकारणभावः संबन्धइत्यादिबोध्यं । अत्रमोक्षस्यापिप्रयोजनत्वंसिद्धं "सर्वपापैः प्रमुच्यते"इत्युक्तत्वात् ॥ ४ ॥ अथरामचरित्रंप्रतिज्ञातंवक्तुंतदवतरणयोग्यदेशवैभवंदर्शयति—कोसलइति । मुदितः संतुष्टजनः । "मञ्चाःक्रोशन्ति"इतिवल्लक्षणा । स्फीतःसमृद्धः "स्फायःस्फीनिष्ठायां"इतिस्फीभावः । प्रभूतानिबहूनिचतानिधनधान्यानिचतद्वान् । कर्मधारयादपिमत्वर्थीयोदृष्टः । यथा"कोकप्रीतिचकोरपारणपटुज्योतिष्मतीलोचने"इत्यादि । प्रभूतधनश्चासौधान्यवांश्चेतिकर्मधारयोवा। अत्र धनधान्यसमृद्धेरुक्तत्वात्स्फीतइतिजनसमृद्धिरुच्यते । कोसलोनाम कोसलइतिप्रसिद्धः । महान् विस्तीर्णः जनपदो देशः । "नीवृज्जनपदोदेशविषयौ"इत्यमरः । सरयूतीरे सरयूनामकनद्याउभयतीरे । निविष्टः स्थितः ॥५॥ तत्रावतारयोग्यनगरंवर्णयति—अयोध्येति । श्लोकत्रयमेकंवाक्यं । अयोध्येतिनगरी तत्र कोसले आसीत् अस्ति । लकारव्यत्ययः । लोके विश्रुता प्रसिद्धा । यापुरी मानवानां मनुष्याणां इन्द्रेणस्वामिना मनुना स्वयं स्वसंकल्पेन निर्मितानाम ॥ ६ ॥ दशचद्वेचयोजनानि द्वादशयोजनानि । अत्यन्तसंयोगेद्वितीया । आयता दीर्घा । मण्डलप्रमाणमिदं । महापुरी मूलनगरं । उपनगरसाहित्येत्वनेकयोजनाऽस्तीतिभावः । श्रीमती कान्तिमती । त्रीणियोजनानिविस्तीर्णा योजनत्रयवैपुल्यवती। सुष्ठुविभक्ताःउभयपार्श्ववृक्षावलीमत्तयाक्लृप्ताः महापथाः नानाजनपदगामिमार्गाःयस्यास्सा ॥ ७ ॥ महता आनगरान्तेन सुविभक्तेन ऋजुतयाक्लृप्तेन मुक्तपुष्पावकीर्णेन । मुक्तैःअसूत्रग्रथितैःपुष्पैरवकीर्णेन नित्यशः सर्वकालेपि । सप्तम्यर्थेशस्प्रत्ययः । जलसिक्तेन वर्षासुस्वतएव अन्यदामनुष्यैः । राजमार्गेण राजगृहद्वारात् प्रवृत्तेनमार्गेण शोभिता ॥ ८ ॥ अथनगर्यांमहाराजाधिष्ठितत्वरूपं

तीर्था० धर्मकामार्थसहितं धर्मकामार्थप्रतिपादकं । इदंत्ववान्तरफलाभिप्रायेणोक्तं । वस्तुतोमोक्षएवपरमफलं । सर्वंनिखिलंकाव्यंप्रतिपाद्यार्थेषुएकार्थानुक्तावपिसर्वशब्दप्रयोगसंभवात्निखिलमित्युक्तं । वर्तयिष्यामि । श्रोतव्यमितितव्यप्रत्ययेनरामायणस्यश्रवणविधिः । श्रूयमाणत्वेनाश्रवणेप्रत्यवायसंभवात् । धर्मकामार्थसहितं धर्मकामार्थप्रदमित्यनेनास्यैवसर्वपुरुषार्थसाधनत्वाच्चान्यत्सर्वंपरित्यज्येदमेवात्यादरेणश्रोतव्यमितितात्पर्यम् । **विषम०** तदिदंबुद्धिस्थं । आदितआदिमारभ्यनिखिलं उत्तरकाण्डान्तं । सर्ववर्णपदच्युतिरहितं । धर्मकामार्थाःसहितायस्मात्तत् । सहिताइत्यत्रकेनेत्याकाङ्क्षायां मोक्षेणेतिगम्यते । तेनपुरुषार्थचतुष्टयसाधनं वर्तयिष्यावःगास्यावः । तत् अनसूयता असूयतीत्यसूयन्नअसूयन्अनसूयन्स्वस्यान्यस्यचोपतापमकुर्वन् तेनानसूयता श्रोतव्यमित्यर्थः । असुउपतापेइतिकण्ड्वादियगन्तस्यशतरिरूपम् ॥ ४ ॥ **शिरो०** कोसलस्यमुदितत्वोक्त्यातद्देशस्यचेतनत्वंसूचितं तेनतस्याप्राकृतत्वंध्वनितम् ॥ ५ ॥ **तिल०** पुरी "अयोध्यामथुरा" इत्याद्युक्तसप्तपुर्यन्तर्गता ॥ ६ ॥ **विष०** स्वर्गेअमरावतीमिन्द्रइव ॥ ९ ॥

[पा०] १ ङ. झ. ञ. वर्तयिष्यावः. २ ङ. झ. ञ. मनसूयता. ३ क, ङ. झ. ञ. दिविदेवपतिः.

कवाटतोरणवतीं सुविभक्तान्तरापणाम् ॥ सर्वयन्त्रायुधवतीमुपेतां सर्वशिल्पिभिः ॥ १० ॥
सूतमागधसंबाधां श्रीमतीमतुलप्रभाम् ॥ उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलाम् ॥ ११ ॥
वधूनाटकसङ्घैश्च संयुक्तां सर्वतः पुरीम् ॥ उद्यानाम्रवणोपेतां महतीं सालमेखलाम् ॥ १२ ॥
दुर्गगंभीरपरिघां दुर्गामन्यैर्दुरासदाम् ॥ वाजिवारणसंपूर्णां गोभिरुष्ट्रैः खरैस्तथा ॥ १३ ॥
सामन्तराजसङ्घैश्च बलिकर्मभिरावृताम् ॥ नानादेशनिवासैश्च वणिग्भिरुपशोभिताम् ॥ १४ ॥
प्रासादै रत्नविकृतैः पर्वतैरुपशोभिताम् ॥ कूटागारैश्च संपूर्णामिन्द्रस्येवामरावतीम् ॥ १५ ॥
चित्रामष्टापदाकारां वरनारीगणैर्युताम् ॥ सर्वरत्नसमाकीर्णां विमानगृहशोभिताम् ॥ १६ ॥

गुणमाह—तांत्विति। महच्चतद्राष्ट्रंचमहाराष्ट्रं "आन्महतः–" इत्यात्वं। तद्विवर्धयति धर्मेणपालयतीतिमहाराष्ट्रविवर्धनः। कर्तरिल्युट्। महांश्चासौराष्ट्रविवर्धनश्चेतिवा। पूर्वराजेभ्योधिकइत्यर्थः। दशरथाख्योराजा दिवं स्वर्गं अमरावतीं देवपतिर्यथा इन्द्रइव तांपुरीं तु पूर्वनृपवैलक्षण्येन आवासयामास स्थापयामास। "हेतुमतिच" इतिणिच् ॥ ९ ॥ वैलक्षण्यमेवदर्शयन्नयोध्यांवर्णयति सर्गशेषेण। तोरणोबहिर्द्वारालंकारदारुबन्धः। प्रशस्तकवाटतोरणयुक्तां। प्रशंसायांमतुप्। सुविभक्तंपरस्परासंश्लिष्टं अन्तरंमध्यप्रदेशोयेषांतादृशाःआपणाःनिषद्याः यस्यांसा तां। "आपणस्तुनिषद्यायां" इत्यमरः। सर्वाणिसर्वविधानि यन्त्राणिशिलाक्षेपणीप्रभृतीनि आयुधानिबाणादयः लोकेयानियानियन्त्रायुधानिसन्तितद्वतीमित्यर्थः। शिल्पिभिश्चित्रकारप्रभृतिभिः उपेतां युक्तां ॥१०॥ सूताःवन्दिनः "सूतोनातक्ष्णिसारथौ। क्षत्राद्विप्रासुतेव्यासशिष्यपारदवन्दिनोः" इतिभास्करः। मागधाः राजप्रबोधकाः "मागधःस्याद्वाग्मीराजप्रबोधकः" इतियादवः। तैःसंबाधांनिरन्तरां श्रीमतीं धनधान्यसमृद्धिमतीं। अतुलप्रभां निरुपमकान्तिं अट्टाट्टालशब्दौपर्यायौ। "स्यादट्टःक्षौममस्त्रियां" इत्यमरः। मण्टपोपरिनिर्मितगृहाणीत्यर्थः। उन्नतैरट्टालध्वजैर्युतां। शतघ्नी प्राकारस्थयन्त्रविशेषः "शतघ्नीतुचतुस्तालालोहकण्टकसंचिता" इतियादवः। शतशब्दोऽनन्तवचनः "शतंसहस्रमयुतंसर्वमानन्त्यवाचकं" इत्युक्तेः। अनेकशतघ्नीसंवृताम् ॥ ११ ॥ सर्वतःपुरीमिति "उभसर्वतसोः–" इतिद्वितीया। सर्वत्रपुर्यां वधूनांयेनाटकाःनर्तयितारस्तत्सङ्घैःसंयुक्तां। आम्राणांचूतानांवनमाम्रवणं। "प्रनिरन्तः —" इत्यादिनाणत्वं। आहिताग्न्यादित्वात्परनिपातः। आम्रवणरूपोद्यानोपेतां। सालःप्राकारः मेखला मेखलावदावरणभूतायस्यास्तां। "प्राकारोवरणःसालः" इत्यमरः। महतीमितिसालद्वारानगरविशेषणम् ॥ १२ ॥ अत्र दुर्गशब्देनविशालतोच्यते। विशालागाधपरिघां दुर्गां स्थलदुर्गभूतां अतएव अन्यैः शत्रुभिः दुरासदां दुराक्रमां वाजिभिर्वारणैश्च संपन्नां समृद्धां गोभिरुष्ट्रैः खरैः खरविशेषैश्च तथा संपन्नामित्यर्थः ॥ १३ ॥ समन्ताद्भवाःसामन्ताः "सामन्താराज्यसन्धिस्थाः" इतिवैजयन्ती। तादृशराजसङ्घैः। कीदृशैः बलिकर्मभिः। बलिःकरः "भागधेयःकरोबलिः" इत्यमरः। बलिशब्देन बलिप्रदानमुच्यते तत्कर्मयेषांतैः नानादेशनिवासैः क्रयविक्रयार्थमागतैः वणिग्भिश्च उपशोभिताम् ॥ १४ ॥ रत्नविकृतैः रत्नैःविकृतैःविशेषेणकृतैः प्रासादैः राजगृहैः पर्वतैः क्रीडापर्वतैः कूटागारैः वलभिभिः "कूटागारंतुवलभिः" इत्यमरः। संपूर्णां अतएव इन्द्रस्येवामरावतीं इन्द्रपालिताममरावतीमिव स्थितामित्यर्थः ॥ १५ ॥ चित्रां नानाराजगृहवतीं। अष्टौपदानिस्थानानियस्यतदष्टापदं। "अष्टनःसंज्ञायां" इतिदीर्घः। "अष्टापदंशारिफलं" इत्यमरः। तदाकारां

तिल०। सर्वयन्त्रायुधवतीं। प्राकारोपरीतिशेषः। उषितां कृतवासां ॥ १० ॥ तीर्थी० उद्यानाम्रवणोपेतां क्रीडार्थमसाधारणत्वेननिर्मितान्युद्यानानि। आम्रवणानितुसर्वजनोपभोग्यत्वेनकल्पितानि। तिल० वधूनांनाटकशालासमुदायैः। शिरो० सर्वतश्चतुर्दिक्षुपुर्यः वाराणस्यादयोयस्यास्सासर्वतःपुरी तां। तथाचस्मृतिः "साकेतपश्चिमद्वारिवृन्दावनमदूरतः" इत्यादि। समासान्तविधेरनित्यत्वात्कबभावः ॥ १२ ॥ तिल० कूटाख्यैरगारैर्गृहैःस्त्रीणांक्रीडागृहैरितियावत् ॥ १५ ॥ तिल० वरनारीगणैः आयुतांव्याप्तां। अष्टापदंसुवर्णंतज्जलेनकृतआकारोऽलंकारोयस्यास्सा ॥ १६ ॥

[पा०] १ ङ. झ. वतीमुषितां. २ घ. सर्वतश्चोपशोभितां. ङ. च. छ. ज. झ. पर्वतैरिवशोभितां. ३ घ. नरनारी. ४ ङ. च. छ. झ. ट. गणायुताम्. ५ घ. विमानवरशोभितां.

गृहगाढामविच्छिद्रां समभूमौ निवेशिताम् ॥ शालितण्डुलसंपूर्णामिक्षुकाण्डरसोदकाम् ॥ १७ ॥
दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा ॥ नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम् ॥ १८ ॥
विमानमिव सिद्धानां तपसाऽधिगतं दिवि ॥ सुनिवेशितवेश्मान्तां नरोत्तमसमावृताम् ॥ १९ ॥
ये च बाणैर्न विध्यन्ति विविक्तमपरापरम् ॥ शब्दवेध्यं च विततं लघुहस्ता विशारदाः ॥ २० ॥
सिंहव्याघ्रवराहाणां मत्तानां नर्दतां वने ॥ हन्तारो निशितैः शस्त्रैर्बलाद्बाहुबलैरपि ॥ २१ ॥
तादृशानां सहस्रैस्तामभिपूर्णां महारथैः ॥ पुरीमावासयामास राजा दशरथस्तदा ॥ २२ ॥
तामग्निमद्भिर्गुणवद्भिरावृतां द्विजोत्तमैर्वेदषडङ्गपारगैः ॥
सहस्रदैः सत्यरतैर्महात्मभिर्महर्षिकल्पैर्ऋषिभिश्च केवलैः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चमः सर्गः ॥ ५ ॥

तत्सदृशसंस्थानामित्यर्थः । मध्येराजगृहंचतुर्दिक्षुराजवीथयः तन्मध्येष्ववकाशाश्चेत्येवंविधसंस्थानामित्यर्थः । वरनारीगणैः सुन्दरस्त्रीगणैः । युतां युक्तां । सर्वरत्नैःसमाकीर्णां व्याप्तां । तानितु "गारुत्मतंमरकतमश्मगर्भोहरिन्मणिः । शोणरत्नंरोहितकंपद्मरागोरुणोपलः । विद्रुमोनाप्रवालोस्त्रीवज्रोस्त्रीहीरकःपुमान् । इन्द्रनीलंमहानीलंवैडूर्यंवालवायजं । कुरुविन्दास्तुकल्माषारत्नभेदास्तुमौक्तिकं । माणिक्यंपौष्पकंशङ्खः–"इत्यादिनिघण्टुपर्यायोक्तानि । विमानाख्यगृहैःशोभितां । "विमानोस्त्रीदेवयानेसार्वभौमिकसद्मनि"इतिभास्करः॥१६॥ गृहैःकुटुंबिगृहैः गाढांनिबिडां । अविच्छिद्रां निर्दूषणां । "छिद्रंरन्ध्रेदूषणेपि"इतिभास्करः । समभूमौ अनिम्नोन्नतप्रदेशे । निवेशितां निर्मितां ।शालयः श्वेततण्डुलाव्रीहयः । "शालयःश्वेततण्डुलाः"इतिवैजयन्ती । तेषां तण्डुलैःसंपूर्णां । इक्षुकाण्डस्य इक्षुदण्डस्य योरसःतत्तुल्यमुदकंयस्यांताम् ॥ १७ ॥ दुन्दुभीभिः भेरीभिः । ईकारान्तत्वमार्षं । मृदङ्गैः मृत्अङ्गंयेषांतैः । पणवैः मर्दलैः । तथेतिसमुच्चये । भृशंनादितां । पृथिव्यां अत्यर्थमनुत्तमां श्रेष्ठां । तां प्रसिद्धाम् ॥ १८ ॥ सिद्धानां तपस्सिद्धानां पुरुषाणां । दिवि स्वर्गे । तपसाऽधिगतं लब्धं विमानमिव देवयानसमूहमिवस्थितां । जातावेकवचनं । सुनिवेशिताः सुष्ठुनिर्मिताः वेश्मान्ताःगृहप्रान्तायस्यां सा । सर्वतःसम्यक्निर्मितगृहामित्यर्थः । नरोत्तमैः विद्वद्भिः समावृतां॥ १९ ॥ श्लोकत्रयमेकान्वयं । लघुहस्ताः शिक्षितास्त्राः । "लघुहस्तःसुहस्तश्चकृतास्त्रःकृतपुङ्खकः"इतिवैजयन्ती । विशारदाः समर्थाः उपायज्ञाइतियावत् । तथाभूताअपि ये राजानः । विविक्तं विजनमसहायमितियावत् । "विविक्तौपूतविजनौ"इत्यमरः । अपरापरं अविद्यमानपरापरं परे पित्रादयः अपरे पुत्रादयः तैर्हीनं । वंशस्यैकतन्तुमितियावत् । शब्दवेध्यं शब्देनलक्ष्येणवेध्यं । एतेन प्रच्छन्नवेधनमुपलक्ष्यते । विततं पलायितंच बाणैश्च नविध्यन्ति नप्रहरन्ति । किंपुनर्यन्त्रादिभिरितिभावः ॥ २० ॥ मत्तानां वने स्वदेशे नर्दतां गर्वेणगर्जतां । सिंहव्याघ्रवराहाणां बलात् मनोबलेन । बाहुबलैरपिसहकारिभिः । निशितैः तीक्ष्णैः । शस्त्रैः आयुधैः करणैः हन्तारः । "शस्त्रमायुधलोहयोः"इत्यमरः ॥ २१ ॥ महारथैः "आत्मानंसारथिंचाश्वान्रक्षन्युद्ध्येतयोनरः । समहारथसंज्ञःस्यात्"इत्युक्तलक्षणैः । तादृशानां तेषां सहस्रैः अभिपूर्णां । तां तथात्वेनप्रसिद्धां पुरीं आवासयामास ॥ २२ ॥ अग्निमद्भिः आहिताग्निभिः । गुणवद्भिः शमदमादिगुणवद्भिः । वेदानांषडङ्गानांच पारमन्तमध्ययनेनगच्छन्तीतितथा । "अन्तात्यन्त–"इत्यादिना डप्रत्ययः । सहस्रदैः बहुप्रदैः । सत्येसत्यवचने रतैः निरतैः । महात्मभिः महामतिभिः । केवलैःऋषिभिरपि महर्षिकल्पैः वसिष्ठादिमहर्षितुल्यैः । ईषदसमाप्तौ कल्पप्प्रत्ययः । द्विजोत्तमैःआवृतांतामावासयामासेत्यनुषज्यते । अत्रवंशस्थवृत्तेप्रथमचरणेजगणाभावेनोपजा-

शिरो० गृहगाढामविच्छिद्रांगृहगाढांकुटुंबिगृहनिबिडां अमां अपरिमितप्रभावां विच्छिद्रांदोषरहितां ज्योतिश्शास्त्रानुकूलामित्यर्थः । त्रयाणांकर्मधारयः ॥ १७ ॥ **तिल०** शब्दवेध्यंशब्दमात्रानुमितसत्तयावेधयोग्यं । प्रच्छन्नमितियावत् । **शिरो०** विततं विगतःततः युद्धविस्तारोयस्य । नष्टसामर्थ्यादिनाभ्रष्टयुद्धकमित्यर्थः ॥ २० ॥ **इतिपञ्चमःसर्गः** ॥ ५ ॥

[**पा०**] १ ग. मवरावरम्. घ. मपरावरम्. २ ख. ङ. छ. ञ. नदतां.

षष्ठः सर्गः ॥ ६ ॥

अयोध्यायादशरथेनपरिपालनसमयेस्थितिप्रकारकथनम् ॥ १ ॥

तस्यां पुर्यामयोध्यायां वेदवित्सर्वसंग्रहः ॥ दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥ १ ॥
इक्ष्वाकूणामतिरथो यज्वा धर्मरतो वशी ॥ महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥ २ ॥
बलवान्निहतामित्रो मित्रवान्विजितेन्द्रियः ॥ धनैश्च संग्रहैश्चान्यैः शक्रवैश्रवणोपमः ॥ ३ ॥
यथा मनुर्महातेजा लोकस्य परिरक्षिता ॥ तथा दशरथो राजा वसञ्जगदपालयत् ॥ ४ ॥
तेन सत्याभिसन्धेन त्रिवर्गमनुतिष्ठता ॥ पालिता सा पुरी श्रेष्ठा इन्द्रेणेवामरावती ॥ ५ ॥
तस्मिन्पुरवरे हृष्टा धर्मात्मानो बहुश्रुताः ॥ नरास्तुष्टा धनैः स्वैःस्वैरलुब्धाः सत्यवादिनः ॥ ६ ॥

तिवृत्तमितिबोध्यं । आचार्याःप्राहुः "तमेतंवेदानुवचनेनब्राह्मणाविविदिषन्ति यज्ञेनदानेनतपसानाशकेन" इतिश्रुतिरनेनोपबृंह्यते । द्विजोत्तमैः"अष्टवर्षंब्राह्मणमुपनयीत" इत्युक्तरीत्याकृतोपनयनैः । वेदषडङ्गपारगैः अधीतसाङ्गसशिरस्कवेदैः । अग्निमद्भिः अनुष्ठितयज्ञैः । सहस्रदैः यथाशक्तिब्राह्मणसात्कृतद्रव्यैः । महात्मभिः महायत्नैः कृततपस्कैरित्यर्थः । गुणवद्भिः "शमदमाद्युपेतःस्यात् । शान्तोदान्तउपरतस्तितिक्षुस्समाहितो भूत्वा"इत्युक्तशमादिमद्भिः । सत्यरतैः "सत्यस्यसत्यं" इत्युक्तेब्रह्मणिभक्तिरूपापन्नज्ञानवद्भिः । केवलैः "तस्माद्ब्राह्मणःपाण्डित्यंनिर्विद्यबाल्येनतिष्ठासेत्" इत्युक्तरीत्याअनाविष्कृतस्वरूपैः । ऋषिभिः "बाल्यंचपाण्डित्यंचनिर्विद्याथमुनिः"इत्युक्तस्वरूपैः । महर्षिकल्पैः "यत्रर्षयःप्रथमजायेपुराणाः" इत्युक्तरीत्यासूरिसदृशैः । आवृतां अवतरिष्यतिभगवानत्रेतिसमागम्यसंसेवितां । तामावासयामास । यद्वा हेकेवल परिशुद्धचित्त ऐः त्वमपिवासायगच्छेति कविराह "तदुपगत"इतिवत् ॥२३॥ इति श्रीगोविन्दराजवि० श्रीमद्रामायभू० मणिमञ्जीराख्याने बाल०पञ्चमःसर्गः ५

एवंभगवदवतारयोग्यदेशोदर्शितः अथतद्योग्यंपुरुषंदर्शयति सर्गेषष्ठे। तस्यामित्यादिश्लोकचतुष्टयमेकान्वयं। दशरथःतस्यांवसन्सन्जगत्अपालयत्। सकीदृशः। वेदंवेदार्थं वेत्तीति वेदवित् । संगृह्णातिधनप्रदानादिना स्वीकरोतीतिसंग्रहः पचाद्यच् । सर्वेषांशूराणांविदुषांच संग्रहः सर्वसंग्रहः । दीर्घदर्शी दीर्घंचिरकालभाविपदार्थंद्रष्टुंशीलमस्यास्तीतितथा । ताच्छील्येणिनिः । महातेजाः महाप्रतापः "तेजःपराक्रमेप्राणेवर्चस्यर्चिषिरेतसि"इति रत्नमाला । पुरेभवाजनाःपौराः । जनपदेभवाजानपदाः । तेप्रियायस्यसतथा ॥ १ ॥ इक्ष्वाकूणां मध्ये अतिरथः बहुभिर्महारथैरेकोयोद्धारथी । यज्वा विधिनेष्टवान् । धर्मेषु तटाकखननारामप्रवर्तनादिषु रतः । वशी स्वाधीनसर्वजनः । "त्रिष्वधीनेवशोवाञ्छाप्रभुत्वाधीनतासुना"इतिभास्करः । महर्षिकल्पः महर्षितुल्यः । राजर्षिः राजरूपऋषिः । त्रिषुलोकेषु भूर्भुवस्स्वर्लोकेषु विश्रुतः प्रसिद्धः ॥ २ ॥ बलवान् चतुरङ्गसेनायुक्तः । अतएव निहतामित्रः निहतशात्रवः । मित्रवान् प्रशस्तमित्रयुक्तः । विजितेन्द्रियः निषिद्धेषुशब्दादिष्वप्रवर्तितेन्द्रियः । धनैः हिरण्यरत्नदिव्यांबराभरणादिभिः । अन्यैः तदपेक्षयान्यैः । संग्रहैः संचयैः । निधिभिरिति यावत् । शक्रवैश्रवणोपमः यथाक्रमं इन्द्रकुबेरोपमः ॥ ३ ॥ यथा मनुः वैवस्वतमनुः लोकस्यपरिरक्षिता तथा दशरथो राजा तस्यांवसन् जगत् भूलोकं अपालयत् ॥ ४ ॥ एवंराजगुणाउक्ताः लोकपालनंचोक्तं संप्रतिपुरपरिपालनमाह—तेनेति। सत्ये अभिसन्धा अभिप्रायोयस्य तेन त्रिवर्गं धर्मार्थकामान् अनुतिष्ठता अनुसरता । पालिता सत्यादिपुरस्सरंत्रिवर्गार्थंपालितेत्यर्थः ॥ ५ ॥ पालनफलंदर्शयति—"तस्मिन्" इत्यादिना "मानवेन्द्रेणधीमता" इत्यन्तेन । हृष्टाः वाससौख्येनप्रीताः । धर्मात्मानः । बहु श्रुतंशास्त्रश्रवणं येषांते बहुश्रुताः । स्वैःस्वैः धनैस्तुष्टाः परधनानभिलाषिणइत्यर्थः । वी-

---

तिल० अतिरथःदशसहस्रमहारथैःअसहायेनयोद्धा ॥ २ ॥

[पा०] १ ङ. च. छ. झ. धर्मपरो. २ क.ख. ग. ङ. च. छ. झ. संचयैश्चान्यैः. ३ ङ.च. छ. झ. राजालोकस्यपरिरक्षिता.

नाल्पसन्निचयः कश्चिदासीत्तस्मिन्पुरोत्तमे ॥ कुटुंबी यो ह्यसिद्धार्थोऽगवाश्वधनधान्यवान् ॥ ७ ॥
कामी वा न कदर्यो वा नृशंसः पुरुषः कचित् ॥ द्रष्टुं शक्यमयोध्यायां नाविद्वान्न च नास्तिकः ॥८॥
सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः ॥ उंदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥ ९ ॥
नाकुण्डली नामकुटी नास्रग्वी नाल्पभोगवान् ॥ नामृष्टो नानुलिप्ताङ्गो नासुगन्धश्च विद्यते ॥१०॥
नामृष्टभोजी नादाता नाप्यनङ्गदनिष्कधृक् ॥ नाहस्ताभरणो वाऽपि दृश्यते नाप्यनात्मवान् ॥११॥
नानाहिताग्निर्नायज्वा नँ क्षुद्रो वा न तस्करः ॥ कश्चिदासीदयोध्यायां नै च निर्वृत्तसंकरः ॥१२॥
स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ॥ दानाध्ययनशीलाश्च संयताश्च प्रैतिग्रहे ॥ १३ ॥
न नास्तिको नानृतको न कश्चिदबहुश्रुतः ॥ नासूयको न वाऽशक्तो नाविद्वान्विद्यते तदा ॥१४॥
नाषडङ्गविदत्रासीन्नाव्रतो नाँसहस्रदः ॥ नँ दीनः क्षिप्तचित्तो वा व्यँथितो वापि कश्चन ॥ १५ ॥

प्सया स्ववर्णस्वाश्रमोचितधनमात्रपरिग्रहः सूच्यते । अलुब्धाः दानेप्राप्तेलोभरहिताः । सत्यवादिनः सत्यवचनशीलाः । आसन्निति शेषः ॥ ६ ॥ तस्मिन्पुरोत्तमे पुरश्रेष्ठे । अल्पसन्निचयः अल्पकोशवान् । अगवाश्वधनधान्यवान् असिद्धार्थः धनादिभिरप्राप्तधर्मार्थकामरूपपुरुषार्थः । यः कुटुंबी सकश्चिन्नासीत् । "मातापितास्नुषेपुत्रौपुत्रीपत्न्यतिथिःस्वयं । दशसङ्ख्यः कुटुंबीति विष्णुनोक्तंद्विजोत्तम" ॥ ७ ॥ कामी कामैकपरः । पुरुषः अयोध्यायां कचित् कोणेपि द्रष्टुंनशक्यं । शक्यमितिनिपातः "शक्यमरविन्दसुरभिः" इतिकालिदासेनापिप्रयुक्तः । कदर्योवा द्रष्टुंनशक्यं । "आत्मानंधर्मकृत्यंचपुत्रदारांश्चपीडयेत् । लोभाद्यःपितरौभ्रातॄन्सकदर्यइतिस्मृतः" । नृशंसः क्रूरोपि नद्रष्टुंशक्यं । "नृशंसोघातुकःक्रूरः" इत्यमरः । अविद्वान् विद्यारहितः । परलोकोनास्तीतियोमन्यते सनास्तिकः । "अस्तिनास्तिदिष्टंमतिः" इतिठक् ॥ ८ ॥ अयोध्यायां सर्वे नराः सर्वा नार्यश्च धर्मशीलत्वादिविशिष्टाभवन्ति । सुसंयताः सुष्ठुनियतेन्द्रियाः । शीलवृत्ताभ्यां उदिताः उत्पन्नाः । सहजशीलवृत्ताइत्यर्थः । शीलं सत्स्वभावः । वृत्तं आचारः । "शीलंस्वभावेसद्वृत्ते" "वृत्तंपद्येचरित्रे"इत्युभयत्राप्यमरः । अमलाः निर्मलमनस्काः ॥ ९ ॥ अकुण्डली अयोध्यायां नविद्यते एवंमुत्तरत्राप्यन्वयः । अल्पभोगवान् अल्पसुखवान् । "भोगःसुखेस्त्र्यादिभृतावहेश्चफणकाययोः" इत्यमरः । मृष्टः अभ्यङ्गस्नानशुद्धः । नानुलिप्ताङ्गइत्यत्रसुप्सुपेति समासः । चन्दनाद्यननुलिप्ताङ्गइत्यर्थः । अत्रापिनञनुषज्यते । सुगन्धशब्देनकुङ्कुमकस्तूर्यादिकमुच्यते॥१०॥ मृष्टंपूर्णं अन्नाभावप्रयुक्ताल्पभोजनवानयोध्यायांनदृश्यते । एवमुत्तरत्रापियोज्यं । दाता प्रकरणादन्नदाता । अङ्गदं बाहुभूषणं । निष्कं उरोभूषणं । "साष्टेशतेसुवर्णानांहेम्न्युरोभूषणेपले । दीनारेपिचनिष्कोऽस्त्री"इत्यमरः । तेधरतीतिअङ्गदनिष्कधृक् । धृगित्येवपाठः । हस्ताभरणं कटकाङ्गुलीयकादि । अनात्मवान् अजितान्तःकरणः ॥ ११ ॥ आहिताग्निः अजस्राग्निहोत्री । यज्वापिहि कश्चिद्विच्छिन्नाग्निर्भवति । अयज्वा सोमयागरहितः । क्षुद्रः अल्पविद्यैश्वर्यवान् । तिरस्काराईइतियावत् । निर्वृत्तः अनुष्ठितः संकरः परक्षेत्रेबीजावापादिर्येनसः ॥ १२ ॥ अध्ययनं जपरूपाध्ययनं । संयताः संकुचिताः ॥ १३ ॥ अनृतं असत्यं कायति वक्तीत्यनृतकः । कैशब्दइत्यस्माद्धात्वे "आतोनुपसर्गेकः"इतिकप्रत्ययः । श्रुतं श्रवणं भावेनिष्ठा । बहुप्रकारशास्त्रश्रवणरहितइत्यर्थः । असूयतीत्यसूयकः । "कण्ड्वादिभ्योयक्"इतियक् । धातुसंज्ञायांवुञ् । अशक्तः ऐहिकामुष्मिककार्यसाधनाशक्तः । तदा दशरथराज्यपालनकाले । अनेनायंश्लोकोजानपदविषयइतिगम्यते । तेनात्रनपौनरुक्त्यांशङ्का ॥ १४ ॥ षडङ्गानि शिक्षाक-

तीर्था० सतामुत्कृष्टधनानां निचयस्सन्निचयः । अल्पस्सन्निचयोयस्मात्तथासनास्ति ॥ ७ ॥ **तीर्था०** शक्यमितिवस्तुसामान्येननपुंसकलिङ्गनिर्देशः ॥ ८ ॥ नलिप्ताङ्गइतिसुप्सुपेतिसमासः । शोभनोगन्धः स्वाभाविकशरीरामोदोयस्य ॥ १० ॥ **तिल०** अवृत्तः सदाचाररहितः । संकरः कुण्डगोलकादिः ॥ १२ ॥ परिग्रहेस्वभार्यायां संयताःनियताः ॥ १३ ॥

[पा०] १ क—झ. ट. मुदिताः. २ झ. ननलिप्ताङ्गः. ३ ट. नासुगन्धिश्च. ४ घ. ज. विप्रोवाप्यसहस्रदः. ५ झ. नचावृत्तोनसंकरः. ६ च. परिग्रहे. ७ ङ. ज. झ. नाबहुश्रुतः. च. छ. नासहस्रवान्. ८ च. छ. निन्दितः, ९ ज. व्याधितोवापि ख. व्याधितोवानकश्चन.

कश्चिन्नरो वा नारी वा नाश्रीमान्नाप्यरूपवान् ॥ द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ॥१६॥
वर्णेष्वग्र्यचतुर्थेषु देवतातिथिपूजकाः ॥ कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ॥ १७ ॥
दीर्घायुषो नराः सर्वे धर्मं सत्यं च संश्रिताः ॥ सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥१८॥
क्षत्रं ब्रह्ममुखं चासीद्वैश्याः क्षत्रमनुव्रताः ॥ शूद्राः स्वधर्मनिरतास्त्रीन्वर्णानुपचारिणः ॥ १९ ॥
सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता ॥ यथा पुरस्तान्मनुना मानवेन्द्रेण धीमता ॥ २० ॥
योधानामग्निकल्पानां पेशलानाममर्षिणाम् ॥ संपूर्णा कृतविद्यानां गुहा केसरिणामिव ॥ २१ ॥
कांभोजविषये जातैर्बाह्लीकैश्च हयोत्तमैः ॥ वनायुजैर्नदीजैश्च पूर्णा हरिहयोत्तमैः ॥ २२ ॥
विन्ध्यपर्वतजैर्मत्तैः पूर्णा हैमवतैरपि ॥ मदान्वितैरतिबलैर्मातङ्गैः पर्वतोपमैः ॥ २३ ॥
ऐरावतकुलीनैश्च महापद्मकुलैस्तथा ॥ अञ्जनादपि निष्पन्नैर्वामनादपि च द्विपैः ॥ २४ ॥
भद्रैर्मन्द्रैर्मृगैश्चैव भद्रमन्द्रमृगैस्तथा ॥ भद्रमन्द्रैर्भद्रमृगैर्मृगमन्द्रैश्च सा पुरी ।
नित्यमत्तैः सदा पूर्णा नागैरचलसन्निभैः ॥ २५ ॥

ल्पोव्याकरणंनिरुक्तिश्छन्दोविचितिर्ज्योतिषामयनंच । अव्रतः चान्द्रायणादिव्रतरहितः । असहस्रदः अबहुप्रदः । दानाध्ययनेत्यत्रविद्यादानमुक्तं । अत्रहिरण्यादिदानं । क्षिप्तचित्तः व्याकुलमनस्कः । व्यथितः व्याध्यादिनापीडितः ॥ १५ ॥ अश्रीमान् कान्तिरहितः । अरूपवान् सौन्दर्यरहितः । नारीपक्षे अश्रीमती अरूपवती अभक्तिमती चेत्यूह्यं । राजनि दशरथे अभक्तिमान् भक्तिरहितः । भक्तिः अधिकमान्यविषयस्नेहः ॥ १६ ॥ अग्रेभवोग्र्यः "अग्राद्यत्" । ब्राह्मणः । सचतुर्थोयेषांतेषु वर्णेषु वर्तमानाःनराः । देवतातिथिपूजकाः । शूद्राणांदेवतापूजा तान्त्रिकमन्त्रेण । अतिथिपूजनं हिरण्यादिदानेन । कृतज्ञाः उपकारज्ञाः । वदान्याः दानशौण्डाः । "वदान्योदानशौण्डःस्यात्" इतिविश्वः । शूराः ब्राह्मणेष्वध्ययनशूरत्वं । विक्रमसंयुताः पराक्रमसंयुताः । ब्राह्मणानांपराक्रमोवादकथासु । आसन्निति शेषः ॥ १७ ॥ तस्मिन्पुरोत्तमे सर्वेनराः धर्मं सत्यंच संश्रिताः । अतएवहेतोः दीर्घायुषः । स्त्रीभिः पुत्रपौत्रैश्च संयुताः । आसन् ॥ १८ ॥ क्षत्रं क्षत्रियजातिः । ब्रह्ममुखं ब्राह्मणप्रधानं आसीत् । तदाज्ञानुवर्तीति यावत् । "मुखंनिस्सरणेवक्त्रेद्वार्युपायप्रधानयोः"इतियादवः । वैश्याः क्षत्रमनुव्रताः क्षत्रस्यानुवर्तिनः । शूद्रास्त्रीन्वर्णानुपचारिणः त्रयाणां वर्णानामुपचारशीलाःसन्तः स्वधर्मनिरताआसन् ॥ १९ ॥ एतत्सर्वंदशरथपालनकृतमित्याह—सेति ॥ २० ॥ अग्निकल्पानां शौर्यातिशयादग्नितुल्यानां पेशलानां अकुटिलानां । अमर्षिणां पराभिभवासहिष्णूनां । कृतविद्यानां शिक्षितशस्त्रास्त्रादिविद्यानां । योधानां भटानां । "पूरणगुण—"इत्यादिनाषष्ठी । सा पुरी । योधैःसंपूर्णा । गुहा केसरिभिः सिंहैरिव । तथादुर्धर्षाभूदित्यर्थः ॥ २१ ॥ एवं चतुरङ्गसंपत्तिषु पदातिसंपत्तिमुक्त्वा तुरङ्गसंपत्तिमाह—कांभोजेति । कांभोजविषये कांभोजाख्यदेशे जातैः । बाह्लीकैः बाह्लीकदेशभवैः । "तत्रभवः"इत्यण् । वनायुजैः वनायुदेशजातैः । नदीजैः सिन्धुदेशोद्भवैः । हरेरिन्द्रस्य हयोहरिहयः उच्चैश्श्रवाः तद्वदुत्तमैः हरिहयोत्तमैरश्वश्रेष्ठैः । सा पूर्णाऽभवत् ॥२२॥ गजसंपत्तिमाह—विन्ध्येत्यादिना । श्लोकद्वयमेकान्वयं । मत्तैर्विन्ध्यपर्वतजैर्मातङ्गैः । हैमवतैः हिमवतिजातैः । "तत्रजातः"इतिशैषिकोण् । मदान्वितैः अतिबलैः मातङ्गैः गजैरपि पर्वतोपमैः ॥ २३ ॥ ऐरावतकुलीनैः ऐरावतकुलोद्भवैः । "कुलात्खः" । द्विपैश्च महापद्मः पुण्डरीकाख्योदिग्गजः तस्यकुलंयेषांतैः । द्विपैश्च अञ्जनात् वरुणदिग्गजात् निष्पन्नैर्द्विपैरपि वामनात् यमदिग्गजात् निष्पन्नैःद्विपैरपि सा पूर्णाऽऽसीत् ॥ २४ ॥ भद्रैरित्यादिसार्धश्लोकएकान्वयः । भद्राः मन्द्राः मृगाश्चेतिगजजातित्रयं । "भद्रोमन्द्रो-

मुनिभा० "भद्रोमन्द्रोमृगश्चेतिविज्ञेयास्त्रिविधागजाः" । तल्लक्षणं"पञ्चोन्नतंसप्तमृगस्यदैर्घ्यमष्टौचहस्ताःपरिणाहमानं । एकद्वि-

[पा०] १ घ. छ. झ. स्वकर्म. ख. स्वधर्म. २ ख. नन्नुयायिनः. ३ ग. च. नांम्बुवर्चसाम्. ज. नांमनीषिणाम्. ४ ख, घ. संघैः पूर्णा सुशूराणां. ५ घ. हयोपमैः, ६ ङ. च. छ. झ. निष्कान्तैः.

सा योजने च द्वे भूयः सत्यनामा प्रकाशते ॥ यस्यां दशरथो राजा वसञ्जगदपालयत् ॥ २६ ॥
तां पुरीं स महातेजा राजा दशरथो महान् ॥ शशास शमितामित्रो नक्षत्राणीव चन्द्रमाः ॥ २७ ॥
तां सत्यनामां दृढतोरणार्गलां गृहैर्विचित्रैरुपशोभितां शिवाम् ॥
पुरीमयोध्यां नृसहस्रसंकुलां शशास वै शक्रसमो महीपतिः ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ॥ ७ ॥

दशरथस्य प्रधानामात्यानां प्रधानर्त्विजोश्चनामधेयनिर्देशः ॥ १ ॥ तथाऽन्येषाममात्यानांसामर्थ्यकथनम् ॥ २ ॥

तस्यामात्या गुणैरासन्निक्ष्वाकोस्तु महात्मनः ॥ मन्त्रज्ञाश्चेङ्गितज्ञाश्च नित्यं प्रियहिते रताः ॥ १ ॥
अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः ॥ शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः ॥ २ ॥
धृष्टिर्जयन्तो विजयः सिद्धार्थो ह्यर्थसाधकः ॥ अशोको मन्त्रपालश्च सुमन्त्रश्चाष्टमोऽभवत् ॥ ३ ॥

मृगश्चेतिविज्ञेयास्त्रिविधागजाः ''इतिहलायुधः । भद्रमन्द्रोभद्रमृगोमृगमन्द्रश्चेतिद्विप्रकृतिकाःसंकीर्णजातयस्तिस्रः । भद्रमन्द्रमृगास्त्रिप्रकृतिकाःसंकीर्णगजाः । तल्लक्षणमुक्तंवैजयन्त्यां "अङ्गप्रत्यङ्गभद्रत्वंसंक्षिप्तंभद्रलक्षणं । पृथुत्वंश्लथतास्थौल्यंसंक्षिप्तंमन्द्रलक्षणं । तनुप्रत्यङ्गदीर्घश्चप्रायोमृगगुणोमतः । भद्रमन्द्रोभद्रमृगो भद्रमन्द्रमृगोपिच । मृगमन्द्रादयोप्येवमितिसंकरजातयः'' इति । एवंभूतैर्नित्यमत्तैरचलसंनिभैः नागैः । सासदापूर्णाऽभवत् ॥२५॥ अतिरथमहारथादिशब्दैः रथसंपत्तिरपिसूचिता । एवं चतुरङ्गबलसंपत्त्या ननगरमात्रमप्रधृष्यं किंतु अभितोद्वेयोजनेदुर्गमेइत्याह—सेति । सा नगरी भूयः नगराद्बहिरपि द्वेयोजने द्वयोर्योजनयोः । अत्यन्तसंयोगेद्वितीया । सत्यनामा यथार्थनामा अयोध्यानामा । "डाबुभाभ्यामन्यतरस्यां'' इतिडाप् । अत्रहेतुमाह—यस्यामिति । योजनत्रयविस्तारवत्यांतस्यां मध्येयोजनद्वयमत्यन्तंयोद्धुमशक्येत्यर्थ इत्यप्याहुः ॥ २६ ॥ पालनंचाह्लादनपूर्वकमित्याशयेनाह— तामिति ॥ २७ ॥ सर्गोक्तमर्थसंक्षेपेण सर्गान्ते पुनर्दर्शयति—तामिति । अर्गलंनाम कवाटनिश्चलत्वायतिर्यङ्निबद्धोदारुविशेषः । "तद्विष्कंभोर्गलंनना ''इत्यमरः । शिवां मङ्गलवतीं । वंशस्थोपजातिवृत्तं ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

अथोक्तगुणसंपन्नस्यदशरथस्यधर्मानुष्ठानसहायसाधिष्ठसचिवसंपत्तिंदर्शयति सप्तमे—तस्येत्यादि । महात्मनः महामतेः । तस्य इक्ष्वाकोः । दशरथस्य तद्वंशजत्वात्तच्छब्दः । मन्त्रज्ञाः कार्यविचारज्ञाः । इङ्गितं पराभिप्रायः तं मुखविकाससंकोचव्यङ्ग्यवचनादिभिर्जानन्तीति इङ्गितज्ञाः । अमात्याः अमा राज्ञःसर्वराज्यव्यापारेषुसहभवन्तीत्यमात्याः । "अव्ययात्त्यप्'' गुणैः वक्ष्यमाणमन्त्रिगुणैः । उपेताआसन् ॥ १ ॥ "मन्त्रिणःसप्तवाष्टौवाप्रकुर्वीतपरीक्षितान्''इतिमनुनोक्तरीत्याह—अष्टाविति । शुचयः सर्वात्मनास्वामिद्रोहचिन्तारहिताः । नित्यशः राजकृत्येषु तदनुष्ठानेषु । अनुरक्ताः तत्पराः । अष्टावमात्याः बभूवुः ॥ २ ॥ तेषांनामानिदर्शयति—धृष्टिरिति । धृष्टिः प्रथमोऽभ-

---

वृद्धावथमन्द्रभद्रौसंकीर्णनागोऽनियतप्रमाणः'' । अत्रपूर्वार्धेमृगाख्यगजस्यलक्षणमुक्तं । मृगाख्यगजप्रमाणादेकहस्तमात्रवृद्धौमन्द्राख्यगजइत्युच्यते । मन्द्राख्यगजात् द्विहस्तवृद्धौभद्राख्यगजइत्युच्यते । भद्राख्यगजात् त्रिहस्तवृद्धौभद्रमन्द्रमृगाख्यगजइत्युच्यते । भद्रमन्द्रैःभद्राख्यगजस्यऔन्नत्यदैर्घ्यपरिणाहादिप्रमाणैःमन्द्राख्यगजस्यऔन्नत्यदैर्घ्यपरिणाहादिप्रमाणैश्चयुक्तागजाःभद्रमन्द्रास्तैः । भद्रमृगैःभद्राख्यमृगाख्ययोर्गजयोःप्रमाणयुक्ताभद्रमृगास्तैः । मृगमन्द्रैः मृगाख्यमन्द्राख्ययोर्गजयोःप्रमाणयुक्तागजामृगमन्द्रास्तैः । संकीर्णनागाःइतरगजाअनियतप्रमाणाः ॥ २५ ॥ इतिषष्ठस्सर्गः ॥ ६ ॥

शिरो॰ तुशब्दइवार्थे । किंचइक्ष्वाकोरेवामात्यास्तस्यदशरथस्यामात्याआसन्नित्यन्वयः । अत्रार्थेतुरेवार्थे ॥ १ ॥

[पा॰] १ ङ.झ. इदमर्धंनदृश्यते. २ ट. नृपसिंहसंकुलां. ३ ङ. झ. सुराष्ट्रोराष्ट्रवर्धनः. अकोपोधर्मपालश्चसुमन्त्रश्चाष्टमोऽर्थवित्.

ऋत्विजौ द्वावभिमतौ तस्यास्तामृषिसत्तमौ ॥ वसिष्ठो वामदेवश्च मन्त्रिणश्च तथाऽपरे ॥ ४ ॥
[सुयज्ञोप्यथ जाबालिः काश्यपोप्यथ गौतमः ॥ मार्कण्डेयस्तु दीर्घायुस्तथा कात्यायनो द्विजः ।
एतैर्ब्रह्मर्षिभिर्नित्यमृत्विजस्तस्य पौर्वकाः ॥ ५ ॥]
विद्याविनीता ह्रीमन्तः कुशला नियतेन्द्रियाः ॥ [परस्परानुरक्ताश्च नीतिमन्तो बहुश्रुताः ॥]
श्रीमन्तश्च महात्मानः शास्त्रज्ञा दृढविक्रमाः ॥ ६ ॥
कीर्तिमन्तः प्रणिहिता यथावचनकारिणः ॥ तेजःक्षमायशःप्राप्ताः स्मितपूर्वाभिभाषिणः ॥ ७ ॥
क्रोधात्कामार्थहेतोर्वा न ब्रूयुरनृतं वचः ॥ ८ ॥
तेषामविदितं किंचित्स्वेषु नास्ति परेषु वा ॥ क्रियमाणं कृतं वाऽपि चारेणापि चिकीर्षितम् ॥ ९ ॥
कुशला व्यवहारेषु सौहृदेषु परीक्षिताः ॥ प्राप्तकालं तु ते दण्डं धारयेयुः सुतेष्वपि ॥ १० ॥
कोशसंग्रहणे युक्ता बलस्य च परिग्रहे ॥ अहितं वाऽपि पुरुषं न विहिंस्युरदूषकम् ॥ ११ ॥
वीराश्च नियतोत्साहा राजशास्त्रमनुष्ठिताः ॥ शुचीनां रक्षितारश्च नित्यं विषयवासिनाम् ॥ १२ ॥

वत् । जयन्तोद्वितीयोऽभूत् । इति क्रमेणयोजयित्वा सुमन्त्रोष्टमोऽभवदिति योज्यं ॥ ३ ॥ वसिष्ठः वामदेवश्च द्वौ ऋषिसत्तमौ ऋत्विजौ पुरोहितौ । अभिमतौ प्रधानौआस्तां । तथा अभिमताः अपरेमन्त्रिणः । ऋत्विजः जाबालिप्रभृतयश्चासन् ॥४-५॥ अथमन्त्रिगुणान् प्रपञ्चयति सर्गशेषेण । विद्यासुआन्वीक्षिकीप्रभृतिषु विनीताःशिक्षिताः । ह्रीमन्तः अकृत्यकरणेषु लज्जावन्तः । कुशलाः नीतौसमर्थाः । नियतेन्द्रियाः अविहितविषयेभ्योनिवृत्ताः ।श्रीमन्तः लक्ष्मीसमृद्धाः । महात्मानः महाबुद्धयः । शास्त्रज्ञाः नीतिशास्त्रज्ञाः । दृढविक्रमाः अप्रतिहतपराक्रमाः ॥ ६ ॥ प्रणिहिताः राजकृत्येष्वप्रमत्ताः । यथावचनकारिणः यथोक्तवन्तस्तथैवकुर्वन्ति । नतु "मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यत्" इतिन्यायतइतिभावः । तेजःक्षमायशांसिप्राप्ताः । "द्वितीयाश्रित—"इत्यादिनासमासः ।अत्रयशः प्रतापक्षमाजन्याप्रथा । कीर्तिमन्तइत्यत्र कीर्तिस्तु मन्त्रज्ञताकृताप्रथा । स्मितपूर्वाभिभाषिणइत्यनेन निर्मत्सरत्वमुच्यते । आसन्मन्त्रिणइति श्लोकद्वयशेषः ॥ ७ ॥ अर्धमेकान्वयं । क्रोधाद्वा कामहेतोरर्थहेतोर्वा अनृतंअसत्यं वचोनब्रूयुः ॥ ८ ॥ तेषां मन्त्रिणां । स्वेषु स्वराष्ट्रीयवृत्तान्तेषु । परेषु परराष्ट्रीयवृत्तान्तेषुच । कृतं क्रियमाणं चिकीर्षितं कर्तुमिष्टं । करिष्यमाणमितियावत् । यत्किंचिदपिवावृत्तं । चारेण चारमुखेन । अविदितंनास्ति । सर्वोपिस्वराष्ट्रपरराष्ट्रवृत्तान्तभेदस्तैर्ज्ञातइत्यर्थः ॥ ९॥ व्यवहारेषु निश्चितार्थप्रतिपादनेषु । कुशलाः समर्थाः । सौहृदेषुविषयेषु । परीक्षिताः राज्ञाबहुधापरीक्षिताः । ते मन्त्रिणः । सुतेष्वपि । प्राप्तकालं प्राप्तसापराधत्वलक्षणकालं । दण्डं । धारयेयुः प्रवर्तयेयुः ॥१०॥ कोशस्य अर्थनिचयस्य । संग्रहणे संपादने । बलस्य चतुर्विधसैन्यस्य । परिग्रहे अर्थप्रदानेनसंरक्षणेच । युक्ताः अवहिताः सन्तः ।अहितं शत्रुमपि । अदूषकं अनपराधिनं । नविहिंस्युः नपीडयेयुः । शकिलिङ् ॥ ११ ॥ वीराः शत्रुनिवारणक्षमाः । नियतोत्साहाः शत्रुजयेनित्योत्साहाः । राजशास्त्रं नीतिशास्त्रं । अनुष्ठिताः अनुष्ठितवन्तः । अतएव विषयवासिनां स्वराज्यवासिनां । शुचीनां साधूनां । नित्यंरक्षितारः ।अशुचीनांतुनिहन्तारइतिचसि-

तीर्थी० प्रधानर्त्विजोर्वसिष्ठवामदेवयोरपिमन्त्रिमध्येपाठान्मन्त्रपर्यालोचनायामप्यन्तर्भावोद्योत्यते । **तिल०** अमात्याः देशादिकार्यनिर्वाहकाः । मन्त्रिणोव्यवहारद्रष्टारइतिभेदः ॥ ४ ॥ **तिल०** परानेवाह—सुयज्ञइत्यादि । सुयज्ञःऋषिविशेषः । एतैर्ब्रह्मर्षिभिर्नित्यंसहितास्तस्यऋत्विजइत्यनेनसर्वथाकर्मसाद्गुण्यंदर्शितं । पौर्वकाःपरंपरागताइत्यर्थकममात्यर्त्विजांविशेषणम् ॥ ५ ॥ **तिल०** शस्त्रज्ञाःशस्त्रप्रतिपादकधनुर्वेदविदः ॥ ६ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. सार्धश्लोकोधिकोदृश्यते. २ घ. कुलीनाविजितेन्द्रियाः. ३ ग. इदमर्धमधिकं दृश्यते. ४ घ. शास्त्रेष्वकुहबुद्धयः. ङ. झ. शस्त्रज्ञादृढविक्रमाः. ५ छ. पुच. ६ ख. घ. नीतिज्ञाः सत्यवादिनः. ७ क. ख. घ. ज. कालंचयेदण्डं. च. छ. कालेयथादण्डं. ङ. झ. ट. कालंयथादण्डं. ८ ख. साधयेयुः. ९ ख. संरक्षणे. क. ग्रहणसंयुक्ताः. १० ख. सपरिसंग्रहे. ११ ङ-झ. नहिंस्युरविदूषकं. १२ ख. रक्षितारश्चवर्णानां.

ब्रह्मक्षत्रमहिंसन्तस्ते कोशं समपूरयन् ॥ सुतीक्ष्णदण्डाः संप्रेक्ष्य पुरुषस्य बलाबलम् ॥ १३ ॥
शुचीनामेकबुद्धीनां सर्वेषां संप्रजानताम् ॥ नासीत्पुरे वा राष्ट्रे वा मृषावादी नरः कचित् ॥१४॥
कश्चिन्न दुष्टस्तत्रासीत्परदाररतो नरः ॥ प्रशान्तं सर्वमेवासीद्राष्ट्रं पुरवरं च तत् ॥ १५ ॥
सुवाससः सुवेषाश्च ते च सर्वे सुशीलिनः ॥ हितार्थं च नरेन्द्रस्य जाग्रतो नयचक्षुषा ॥ १६ ॥
गुरौ गुणगृहीताश्च प्रख्याताश्च पराक्रमे ॥ विदेशेष्वपि विज्ञाताः सर्वतो बुद्धिनिश्चयात् ॥ १७ ॥
[अभितो गुणवन्तश्च न चासन्गुणवर्जिताः ॥]
सन्धिविग्रहतत्त्वज्ञाः प्रकृत्या संपदाऽन्विताः ॥ मन्त्रसंवरणे शक्ताः श्लक्ष्णास्सूक्ष्मासु बुद्धिषु ॥१८॥

द्धं । ते आसन्नित्यनुषज्यते ॥ १२ ॥ ब्रह्म ब्राह्मणान् । क्षत्रं क्षत्रियांश्च । अहिंसन्तः विनाऽपराधंतत्स्वमनपहरन्तः । सत्यप्यपराधे । पुरुषस्य अपराधिनः । बलाबलं अपराधतारतम्यं शक्तितारतम्यंवा । संप्रेक्ष्य । अपराधगुरुत्वे सुतीक्ष्णदण्डाः । अपराधाल्पत्वे मृदुदण्डाश्च । शक्तत्वे सुतीक्ष्णदण्डाः । अशक्तत्वे मृदुदण्डाश्च । कोशं समपूरयन् ॥ १३ ॥ अथमन्त्रिगुणसंपत्तिफलंदर्शयति—शुचीनामित्यादिश्लोकद्वयेन । शुचीनां एकरूपकरणत्रयवतां । एकबुद्धीनां एककण्ठानां सर्वेषां । मन्त्रिणां । संप्रजानतां राज्यतन्त्रंविचारयतां । भावलक्षणसप्तम्यर्थेषष्ठी । "षष्ठीचानादरे" इत्यत्रयोगविभागेन । सर्वेषुमन्त्रिषुराज्यतन्त्रंविचारयत्स्वित्यर्थः । पुरेवा राष्ट्रेवा । कचित्कोणेपि । मृषावादी असत्यवादी । नरः नासीत् ॥ १४ ॥ किंच तत्र पुरराष्ट्रेषु । कश्चिन्नरः । दुष्टः कुटिलः । परदाररतश्च नासीत् । प्रत्युत यद्राष्ट्रं पुरवरंच तत्सर्वं प्रशान्तमेव आसीत् । नगरजनपदवासिनःसर्वेप्यन्यायाधर्मरहिताएवासन्नित्यर्थः ॥ १५ ॥ पुनस्तान्विशेषयति—सुवाससःइत्यादिनासार्धश्लोकत्रयेण । सुवाससः शुभ्रवाससः । सुवेषाः शोभनालंकाराः । सुशीलिनः सुसद्वृत्ताः । नरेन्द्रस्य स्वामिनः । हितार्थं नयचक्षुषा जाग्रतः जागरूकाः । सर्वदानीतिषुदत्तावधानाइत्यर्थः ॥ १६ ॥ गुरौ गुरुषु । जात्येकवचनं । गुणगृहीताः गृहीतगुणाः । गुणमात्रग्राहिणोदोषमपश्यन्तइत्यर्थः । पराक्रमेविषये प्रख्याताः । विदेशेषु देशान्तरेष्वपि । सर्वतः सर्वत्रातीतानागतविषयेषु । बुद्धिनिश्चयात् निश्चयरूपबुद्धेर्हेतोः । विज्ञाताः विख्याताः ॥ १७ ॥ सन्धिः सामन्तैःसमाधानं विग्रहः तैः कलहः तयोस्तत्त्वं देशकालाद्युचितत्वं । तज्जानन्तीतितथा । उक्तंचमनुना "यदात्वेवाल्पिकापीडातदासन्धिसमाश्रयेत । अभ्युच्छ्रयोयदात्मानंतदा मन्येतविग्रहं" इति । प्रकृत्या स्वभावेन । संपदा ऐश्वर्येण । अन्विताः । संपदभावे तच्चापलेनान्यथाकुर्युरिति भावः । मन्त्रोराष्ट्रकार्यचिन्ता तस्यसंवरणे . बहिरप्रकटने शक्ताः । संपत्कार्यमिदं । सूक्ष्मासुबुद्धिषु सूक्ष्मार्थविशेषविचारेषु । श्लक्ष्णाः अपरुषाः । सद्यःप्रतिभावन्तइत्यर्थः । नीतिशास्त्रविशेषज्ञाः नीत्याशासनविशेषज्ञाः । "ग्रन्थशासनयोःशास्त्रं" इतिभास्करः । सततं राज्ञःप्रियवादिनः । हितवचनस्यैवराज्ञःप्रिय-

तिल० । अभिपूरयन्निति पाठेअडभावआर्षः । शिरो० ब्रह्मक्षत्रं ब्रह्मणोवेदस्यक्षत् अप्रामाण्यप्रतिपादकत्वेनहिंसनंयेषांतेनास्तिकास्तेभ्यस्त्रायतेवेदाप्रामाण्यवादनिवर्तनपूर्वकं वेदप्रामाण्यव्यवस्थापकत्वेनजनान्रक्षतीतिब्रह्मक्षत्रं ब्राह्मणकुलमित्यर्थः ॥ १३ ॥ तिल० हितार्थाः हितप्रयोजनाः ॥ १६ ॥ ती० गुणागुणगृहीताः गृहीतगुणदोषाः । अयंगुणवानयंदोषवानितिज्ञानवन्तः । आहिताग्न्यादित्वात्परनिपातोनिष्ठान्तस्य । ति० गुरोः संबन्धसामान्येषष्ठी । गुरुणा स्वाचार्येणराज्ञाच । अर्शआद्यजन्तगुणशब्देनगुणवत्तयागृहीताइत्यर्थः । तेनगुर्वनुग्रहप्राप्तसर्वैश्वर्यत्वंसूचितं । विदेशेष्वपिसर्वतोविज्ञातत्वेहेतुः बुद्धिनिश्चयाः बुद्धिसंपन्नाः ॥ १७ ॥ तिल० अभितोगुणवन्तः सर्वदेशेसर्वकालेचगुणवन्तः । प्रकृत्या त्रिगुणयासंपदाऽन्विताः । तत्रसात्त्विक्यासंपदाशिष्टपालने । तामस्यासंपदादुष्टनिग्रहकाले । भोगकालेराजस्यासंपदाधनधान्यदासीदासशिबिकाश्वगजादिरूपया ॥ १८ ॥

[पा०] १ ग. तेकोशंसमवर्धयन्. घ. तेचकोशमपूरयन्. २ ग. नमन्दः. ३ ख. ङ.—झ. रतिर्नरः. ४ ङ. च.—झ. शुचिव्रताः. ५ ग. घ. ङ. झ. हितार्थाश्च. ६ घ. चक्षुषः. ७ ङ. च. झ. गुरोर्गुण. ख. छ. ज. गुणागुण. ८ ङ. च. छ. झ. पराक्रमैः. ९ ख. ग. विख्याताः. १० ङ. निश्चिताः. ज. झ. निश्चयाः. घ. निश्चये. ११ ङ. झ. इदमर्धंदृश्यते. १२ ट. संग्रहणे. १३ ग. घ. च. युक्ताः. १४ ग. घ. च. शाक्ताः. ङ. सक्ताः. क. छ. ज. झ. शाक्ताः.

नीतिशास्त्रविशेषज्ञाः सततं प्रियवादिनः ॥ ईदृशैस्तैरमात्यैश्च राजा दशरथोऽनघः ॥
उपपन्नो गुणोपेतैरन्वशासद्वसुंधराम् ॥ १९ ॥
अवेक्षमाणश्चारेण प्रजा धर्मेण रञ्जयन् ॥ प्रजानां पालनं कुर्वन्नधर्मं परिवर्जयन् ॥ २० ॥
विश्रुतस्त्रिषु लोकेषु वदान्यः सत्यसङ्गरः ॥ स तत्र पुरुषव्याघ्रः शशास पृथिवीमिमाम् ॥ २१ ॥
नाध्यगच्छद्विशिष्टं वा तुल्यं वा शत्रुमात्मनः ॥ मित्रवान्नतसामन्तः प्रतापहतकण्टकः ॥ २२ ॥
स शशास जगद्राजा दिवं देवपतिर्यथा ॥ २३ ॥
तैर्मन्त्रिभिर्मन्त्रहिते नियुक्तैर्वृतोऽनुरक्तैः कुशलैः समर्थैः ॥
स पार्थिवो दीप्तिमवाप युक्तस्तेजोमयैर्गोभिरिवोदितोऽर्कः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ॥ ८ ॥

पुत्राभावात्परिखिन्नतादशरथेनतदर्थमश्वमेधयजननिर्धारणेन सुमन्त्रमुखादाहूतेषुवसिष्ठादिषुस्वाभिप्रायनिवेदनम् ॥ १ ॥ तैस्तदनुमोदनेनसरयूत्तरतीरेयज्ञशालानिर्माणविधानपूर्वकं भूसंचारणायाश्वमोचनचोदना ॥ २ ॥ दशरथेनमन्त्रिषुयज्ञसंभारसंभरणादिनियोजनपूर्वकं पत्नीनांतन्निवेदनेनदीक्षाविधानम् ॥ ३ ॥

तस्य त्वेवंप्रभावस्य धर्मज्ञस्य महात्मनः ॥ सुतार्थं तप्यमानस्य नासीद्वंशकरः सुतः ॥ १ ॥

त्वात् । आसन्निति पूरणीयं ॥ १८ ॥ ईदृशैः उक्तगुणविशिष्टैः । गुणोपेतैः उक्तगुणातिरिक्तगुणोपेतैः । तैः अमात्यैः । उपपन्नः । अनघः व्यसनरहितः । उक्तं मनुना "दशकामसमुत्थानितथाष्टौक्रोधजानिच । व्यसनानिदुरन्तानिप्रयत्नेनविवर्जयेत्"इति । व्यसनस्वरूपंचोक्तं "मृगयाक्षोदिवास्वापःपरिवादःस्त्रियोमदः । तौर्यत्रिकंवृथाट्याचकामजोदशकोगुणः । पैशुन्यंसाहसंद्रोहईर्ष्यासूयार्थदूषणे । वाग्दण्डनंचपारुष्यंक्रोधजोपिगुणोष्टकः" इति । दशरथोराजा । वसुंधरां भूमिं । अन्वशासदितिलुङ् । "सर्तिशास्त्यर्तिभ्यश्च"इत्यङ् ॥ १९ ॥ श्लोकद्वयमेकान्वयम् । चारेण चक्षुःस्थानीयेन । अवेक्षमाणः स्वपरराष्ट्रवृत्तान्तान्पश्यन् । जात्येकवचनमिदं । अनेकचारैर्ज्ञेयत्ववचनात् । यथाहमनुः "वनेवनचराःकार्याःश्रमणाटविकादयः ॥ परप्रवृत्तिज्ञानार्थंशीघ्राश्चारपरंपराः" इति । धर्मेण दण्ड्यदण्डनादिना । प्रजाः । रञ्जयन् आह्लादयन् । पालनमनिष्टनिवृत्तिपूर्वकेष्टप्रापणं । अधर्मं अदण्ड्यदण्डनादि । विश्रुतः दानविक्रमादिभिः प्रसिद्धः । वदान्यः दानशीलः । सत्यसंगरः सत्यप्रतिज्ञः । "संगरोनाक्रियाकालेप्रतिज्ञाविपदोर्युधि" इति यादवः । सः । पुरुषव्याघ्रः पुरुषश्रेष्ठः । तत्र अयोध्यायां । वसन्निति शेषः ॥ २० ॥ २१ ॥ विशिष्टं अधिकं । तुल्यंवा । आत्मनः शत्रुं नाध्यगच्छत् नज्ञातवान् । तत्रहेतुमाह । मित्रवान् । नतसामन्तः पादानतसमानसीमाधिपतिकः । प्रतापेनहृताः कण्टकाः शत्रवोयस्यसतथा "वेणौद्रुमाङ्गेरोमाञ्चेक्षुद्रशत्रौचकण्टकः"इतियादवः । सइतिशेषः ॥ २२ ॥ उक्तमर्थंसदृष्टान्तमाह—सइति । अर्धमेकं ॥२३॥ सर्गार्थंसंग्रहेणदर्शयति—तैरिति । मन्त्रहिते मन्त्रे हितेच । नियुक्तैः । कुशलैः बुद्धिकुशलैः । समर्थैः कार्यकरणसमर्थैः । मन्त्रिभिः । वृतः नृपः । तेजोमयैः । स्वार्थेमयट् । गोभिः किरणैः । युक्तः । उदितोऽर्कः बालसूर्यइव । दीप्तिमवाप । त्रिष्टुबुपजातिवृत्तम् ॥२४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तमः सर्गः ॥७॥

एवंधार्मिकत्वेनदशरथस्यभगवदवतारयोग्यत्वमुक्त्वा अथतदुपयुक्ततदाराधनोपक्रमंदर्शयत्यष्टमे—

ति० प्रजाः धर्मेणयुक्तायथाभवन्तितथा पुरुषैः रक्षयन् । सर्वत्रहेतौ शता ॥ २० ॥ ती० प्रतापाहतकण्टकइति पाठे प्रतापेन समन्तान्निहतकण्टकइत्यर्थः ॥ २२ ॥ इतिसप्तमःसर्गः ॥ ७ ॥

ति० एवंसमग्रगुणस्याप्यपुत्रत्वेनाजितपितृलोकत्वात्पुत्रार्थमश्वमेधप्रस्तावः ॥ १ ॥

[पा०] १ ङ. नीतिशास्त्रे. २ च. छ. उपपन्न. ३ ङ. छ. झ. रक्षयन्. ४ ख. ङ. झ. दिवि. ५ क. झ. निविष्टैः. ६ ख. घ. समतैः. ७ च. छ. मयोगोभि.

चिन्तयानस्य तस्यैवं बुद्धिरासीन्महात्मनः ॥ सुतार्थी वाजिमेधेन किमर्थं न यजाम्यहम् ॥ २ ॥
स निश्चितां मतिं कृत्वा यष्टव्यमिति बुद्धिमान् ॥ मन्त्रिभिः सह धर्मात्मा सर्वैरेव कृतात्मभिः ॥३॥
ततोऽब्रवीदिदं राजा सुमन्त्रं मन्त्रिसत्तमम् ॥ शीघ्रमानय मे सर्वान्गुरूंस्तान्सपुरोहितान् ॥ ४ ॥
ततः सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः ॥ समानयत्स तान्सर्वान्समस्तान्वेदपारगान् ॥ ५ ॥
सुयज्ञं वामदेवं च जावालिमथ काश्यपम् ॥ पुरोहितं वसिष्ठं च ये चान्ये द्विजसत्तमाः ॥ ६ ॥
तान्पूजयित्वा धर्मात्मा राजा दशरथस्तदा ॥ इदं धर्मार्थसहितं वाक्यं श्लक्ष्णमथाऽब्रवीत् ॥ ७ ॥
मम लालप्यमानस्य पुत्रार्थं नास्ति वै सुखम् ॥ तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम ॥ ८ ॥
तदहं यष्टुमिच्छामि शास्त्रदृष्टेन कर्मणा ॥ कथं प्राप्स्याम्यहं कामं बुद्धिरत्र विचार्यताम् ॥ ९ ॥
ततः साध्विति तद्वाक्यं ब्राह्मणाः प्रत्यपूजयन् ॥ वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखाच्च्युतम् ॥
ऊचुश्च परमप्रीताः सर्वे दशरथं वचः ॥ १० ॥
संभाराः संभ्रियन्तां ते तुरङ्गश्च विमुच्यताम् ॥ [सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्] ॥११॥

तस्येति । उत्तरश्लोकवक्ष्यमाणचिन्ता युक्तेतिसूचयितुं राज्ञोविशेषणानि । तप्यमानस्य तपश्चरतः । यद्वा । पुत्रोत्पादनानुगुणदृष्टसामग्रीसत्त्वेपि पुत्राभावात् परितप्यमानस्य ॥ १ ॥ चिन्तयानस्य पुत्रोत्पत्त्युपायंमार्गमाणस्य । मुगभावआर्षः । एवं वक्ष्यमाणरीत्या । नयजामि नायाक्षिषं ॥ २ ॥ सइत्यादिश्लोकद्वयमेकान्वयं । कृतात्मभिः पर्याप्तबुद्धिभिः । "क्लीबेकृतंयुगेपिस्यात्फलपर्याप्तयोरपि"इतिभास्करः ॥ ३ ॥ तान् प्रसिद्धान् ॥ ४ ॥ त्वरितं तत्क्षणएव । त्वरितविक्रमः त्वरितगमनः । समस्तान् संमिलितान् । समानयत् । राजगृहमितिशेषः ॥ ५ ॥ गुरूनेवाह—सुयज्ञमिति । समानयदितिपूर्वेणान्वयः । सुयज्ञादीनांगुरुत्वमार्त्विज्यकरणात् ॥ ६ ॥ अथ गुर्वागमनानन्तरं । श्लक्ष्णं मधुरम् ॥ ७ ॥ लालप्यमानस्य भृशंविलपतः । लापेर्यङन्ताच्छानच् ॥ ८ ॥ तत् पुत्रेच्छुत्वात् । यष्टुं दीक्षितुं । शास्त्रदृष्टेनकर्मणा विधिना । प्रकारेणेतियावत् । कर्मणा क्रियाकलापेनेतिवा । कामं काम्यमानं यज्ञं । कथंप्राप्स्यामि विघ्नभूयस्त्वादितिभावः । अत्र निर्विघ्नयागकरणे । बुद्धिः उपायः । विचार्यताम् ॥९॥ प्रत्यपूजयन् तुष्टुवुः । पार्थिवस्यमुखाच्च्युतं साक्षाद्राज्ञोक्तमित्यर्थः ॥ १० ॥ ऊचुरित्यर्धमेकं । दशरथं वच ऊचुः । "ब्रूशासि"इत्यादिनाद्विकर्मकत्वम् । ते प्रसिद्धाः । संभाराः यज्ञोपकरणानि यूपपात्रादीनि । संभ्रियन्तां संपाद्यन्तां । तुरङ्गः अश्वमेधीयोऽश्वः ॥११॥

शिरो० बुद्धिमान् परमबुद्धिविशिष्टः । धर्मात्मा वेदोक्तकर्मप्रवृत्तिविषयकयत्नवान् । कृतात्मभिः सकलकर्मफलीभूतरघुनाथविषयकबुद्धिभिः ॥ ३ ॥ **शिरो०** पुरोहितशब्दस्यवृत्तिघटकीभूतत्वेपि नित्यसापेक्षत्वात्तत्रमेशब्दान्वयः ॥ ४ ॥ **शि०** तान् राजबोधितान् ॥ ५ ॥ **तिल०** सुयज्ञादयोविद्यागुरवः । वसिष्ठस्यैवपुरोहितत्वेनोपनेतृतयाउपनेतुरेवाध्यापकतयागुरुत्वेपि स्वसमशिष्याणांस्वतपोव्याक्षेपभियातेनाध्यापनेनियोगात्तेषामपिविद्यागुरुत्वमक्षतं । अन्ये अश्वमेधार्त्विज्याद्युपयुक्ताः ॥ ६ ॥ **तिल०** तातप्यमानस्येतिपाठे पुनःपुनर्भृशंचतपःकुर्वतइत्यर्थः ॥ ८ ॥ **शिरो०** बुद्धिरत्र बुद्धिरतः विचाररतान् त्रायतेनिश्चितवस्तूपदेशेनरक्षतीतितत्संबोधनंहेवसिष्ठेत्यर्थः । तत् वाङ्मनसगोचरातीतंवस्तु । यष्टुं प्रत्यक्षतःमेलयितुमिच्छामि । तत् शास्त्रदृष्टेन वेदबोधितेन । कर्मणाअहं कथं किंप्राप्स्यामि वाङ्मनसगोचरातीतं वस्तुप्रत्यक्षतः किंलब्धास्मीत्यर्थः । इतिकामंनितरांविचार्यतां । एतेन "नकर्मणानप्रजयाधनेन" इतिश्रुत्याकर्मणांतत्प्रापकत्वाभावनिश्चयात् वाङ्मनसगोचरातीतवस्तुनःप्रत्यक्षत्वेसर्वप्रमाणविरुद्धत्वाच्च तत्प्राप्तिर्दुर्घटेतिप्रश्नकर्तुराशयोध्वनितः ॥ ९ ॥ **शि०** परमप्रीताः । राजकृतगूढप्रश्नस्यसूत्तरप्रस्फूर्त्यापरमहर्षंप्राप्ताएव सर्वे वसिष्ठप्रमुखाः । दशरथं । वचःसूत्तरवचनमूचुः । एतेन प्राकृतवाङ्मनसगोचरातीतत्वंतस्य । भवन्तस्त्वप्राकृतकरणाइतिभवत्करणविषयत्वंतस्यसिद्धमेव । एतावत्कालंभवत्करणाविषयत्वंतुवात्सल्यरसप्रभूतये "नकर्मणानप्रजयाधनेन—"इत्यादीनिप्राकृतजनपराणि । तत्रापिकाम्यकर्मजनिततल्लाभाभावप्रतिपादकानीतिकाम्यनिषिद्धवर्जितानिकर्माण्यनुष्ठेयान्येवेत्युत्तरंसूचितं ॥ १० ॥

[पा०] १ क. ख. घ.—झ. सुतार्थं. २ क. च. छ. ज. सुनि. ३ ङ. च. झ. सर्वैरपि. ४ ङ. झ. ब्रवीन्महातेजाः. ५ क. घ. छ. सर्वान्गुरूंस्तान्सपुरोहितान्. ६ झ. श्लक्ष्णंवचनमब्रवीत्. ७ क. झ. मुखेरितं. ८ इदमर्धं क.—ट. पुस्तकेष्वधिकंदृश्यते.

सर्वथा प्राप्स्यसे पुत्रानभिप्रेतांश्च पार्थिव ॥ यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता ॥ १२ ॥
ततः प्रीतोऽभवद्राजा श्रुत्वैतद्द्विजभाषितम् ॥ अमात्यांश्चाब्रवीद्राजा हर्षपर्याकुलेक्षणः ॥ १३ ॥
संभाराः संभ्रियन्तां मे गुरूणां वचनादिह ॥ समर्थाधिष्ठितश्चाश्वः सोपाध्यायो विमुच्यताम् ॥१४॥
सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् ॥ शान्तयश्चाभिवर्धन्तां यथाकल्पं यथाविधि ॥ १५ ॥
शक्यः प्राप्तुमयं यज्ञः सर्वेणापि महीक्षिता ॥ नापराधो भवेत्कष्टो यद्यस्मिन्क्रतुसत्तमे ॥ १६ ॥
छिद्रं हि मृगयन्तेऽत्र विद्वांसो ब्रह्मराक्षसाः ॥ निहतस्य च यज्ञस्य सद्यः कर्ता विनश्यति ॥ १७ ॥
तद्यथा विधिपूर्वं मे क्रतुरेष समाप्यते ॥ तथा विधानं क्रियतां समर्थाः करणेष्विह ॥ १८ ॥
तथेति चाब्रुवन्सर्वे मन्त्रिणः प्रत्यपूजयन् ॥ पार्थिवेन्द्रस्य तद्वाक्यं यथाज्ञप्तं निशम्य ते ॥ १९ ॥
तथा द्विजास्ते धर्मज्ञा वर्धयन्तो नृपोत्तमम् ॥ अनुज्ञातास्ततः सर्वे पुनर्जग्मुर्यथागतम् ॥ २० ॥
विसर्जयित्वा तान्विप्रान्सचिवानिदमब्रवीत् ॥ ऋत्विग्भिरुपदिष्टोऽयं यथावत्क्रतुराप्यताम् ॥२१॥
इत्युक्त्वा नृपशार्दूलः सचिवान्समुपस्थितान् ॥ विसर्जयित्वा स्वं वेश्म प्रविवेश महाद्युतिः ॥२२॥
ततः स गत्वा ताः पत्नीर्नरेन्द्रो हृदयप्रियाः ॥ उवाच दीक्षां विशत यक्ष्येऽहं सुतकारणात् ॥२३॥

एकपुत्रस्यापुत्रप्रायत्वात् । "एष्टव्याबहवःपुत्राः"इति वचनाच्च पुत्रानितिबहुवचनं । प्राप्स्यसइति कर्मकर्तर्यात्मनेपदं । धार्मिकी "धर्मंचरति"इतिठक् । धर्माचरणविषयिणीत्यर्थः ॥ १२ ॥ हर्षेण हर्षाश्रुणा पर्याकुलेव्याप्तेईक्षणेयस्यसः हर्षेणव्याकुलदृष्टिमान् । क्रियाभेदाद्राजपदद्वयमितिनविरोधः ॥ १३ ॥ मे गुरूणामित्यन्वयः । इह इदानीं । समर्थैः । "चतुःशतारक्षन्ति यज्ञस्याघाताय"इत्युक्तरीत्यारक्षणसमर्थैः अधिष्ठितः रक्षितः । सोपाध्यायः अध्वर्युप्रभृतिऋत्विक्सहितः ॥ १४ ॥ सरय्वाइति । अनेन सरयूदक्षिणतीरे अयोध्येतिगम्यते । शान्तयः विघ्ननिवारकाणिकर्माणि । अभिवर्धन्तां अभिवर्धयन्तां । अन्तर्भावितण्यन्तोयंशब्दः । यथाकल्पं यथाक्रमं । "क्रमस्तुकथ्यतेकल्पे" इतिभागुरिः । यथाविधि यथाशास्त्रं ॥ १५ ॥ अयंयज्ञः अश्वमेधः । सर्वेणापि राजमात्रेणापि । महींक्षयतीतिमहीक्षित् । क्षि निवासगत्योरित्यस्मात्क्विप् । तेन । प्राप्तुंशक्यः । कष्टः क्लेशकरः अनर्थकरोवा । अपराधः अपचारः । यदि नभवेत् प्रमादेसत्यनर्थःसिद्धएवेतिभीत्याक्षुद्राराजानोनकुर्वन्तीत्यर्थः ॥ १६ ॥ विद्वांसः अश्वमेधस्वरूपाभिज्ञाः । ब्रह्मराक्षसाः अकृतप्रायश्चित्ताप्रतिग्राह्यप्रतिग्रहायाज्ययाजनादिपापैःराक्षसत्वंप्राप्ताःब्राह्मणाः । यज्ञस्वरूपतदपराधज्ञत्वात् अत्र अश्वमेधे । छिद्रं अपराधं । मृगयन्ते अन्वेषयन्ते । मृगअन्वेषण इतिधातुः । "छिद्रंरन्ध्रापराधयोः"इतिवैजयन्ती । अपराधदर्शने यज्ञमात्मसात्कृत्यनाशयन्तीतिभावः । किंततइत्यतआह—निहतस्यचेति ॥ १७ ॥ फलितमाह—तदिति । विधिपूर्वं अनपराधंयथाभवतितथा यथासमाप्यते । तथा विधानं यत्नः । क्रियतां । इहकरणेषु यज्ञानुष्ठानेषु । समर्थाः । यूयमितिशेषः । यूयंसमर्थाःखल्वितिस्तुतिः ॥ १८ ॥ ते सर्वे मन्त्रिणः । पार्थिवेन्द्रस्य तद्वाक्यं निशम्य । यथा आज्ञप्तं आज्ञापितं । "वादान्त—"इत्यादिना वैकल्पिकइडभावो निपातितः । तथा कुर्मइत्यब्रुवन् । समीचीनोमहाराजस्याध्यवसायइति प्रत्यपूजयंश्च ॥ १९ ॥ वर्धयन्तः आशीर्भिरितिशेषः । द्विजाः ऋत्विजः । भाविन्यां चैत्रपौर्णमास्यांतथैवकरिष्यामइत्युक्त्वाजग्मुरित्यर्थः ॥ २० ॥ क्रतुः क्रतुसंभारः । आप्यतां संपाद्यतां ॥ २१ ॥ महाद्युतिरितिप्रीत्यतिशयद्योतनं ॥ २२ ॥ ताः प्रसिद्धाःकौसल्याद्याः । पत्नीः यज्ञार्हाः । "पत्युर्नोयज्ञसंयोगे" इतिपतिशब्दस्ययज्ञफलभोक्तृत्वरूप-

शि० सोपाध्यायः मुख्यऋत्विक्सहितः । उपाध्यायप्रयोजनंतु "पदेपदेजुहोति" इतिश्रुतिबोधितकर्मनिर्वहणं ॥ १४ ॥ तीर्था० यज्ञादिषुमन्त्रलोपक्रियालोपादिनाराक्षसत्वंप्राप्ताब्राह्मणा ब्रह्मराक्षसाइत्युच्यन्ते । तिल० उप सं दिष्ट इति त्रिपदं । समित्यस्यआप्यतामित्यनेनान्वयः । व्यवहितप्रयोगआर्षः ॥ २१ ॥ इत्यष्टमस्सर्गः ॥ ८ ॥

[पा०] १ झ. स्तुष्टो. २ झ. व्याकुललोचनः. ३ ङ. छ. झ. विधिहीनस्य. ४ झ. साधनेष्विति. ५ च. छ. ष्विति. ६ ङ. झ. प्रतिपूजिताः. ७ झ, यथापूर्वं. ८ ख. तान्सर्वान्. ९ क. ङ. च. झ. रुपसंदिष्टो. १० ङ.—झ. महामतिः. ११ ङ. च. छ. झ. हृदयंगमाः.

तासां तेनातिक्रान्तेन वचनेन सुवर्चसाम् ॥ मुखपद्मान्यशोभन्त पद्मानीव हिमात्यये ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

सुमन्त्रेणदशरथंप्रतितस्य अङ्गराजेनअनावृष्टिनिवारणार्थमानीतस्यऋश्यशृङ्गस्यानुग्रहेणपुत्रोत्पत्तिप्रतिपादकसनत्कुमारवचसो रहसिसंग्रहेणविनिवेदनम् ॥ १ ॥

एतच्छ्रुत्वा रहः सूतो राजानमिदमब्रवीत् ॥ [श्रूयतां तत्पुरावृत्तं पुराणे च मया श्रुतम् ।]
ऋत्विग्भिरुपदिष्टोऽयं पुरावृत्तो मया श्रुतः ॥ १ ॥
सनत्कुमारो भगवान्पूर्वं कथितवान्कथाम् ॥ ऋषीणां संनिधौ राजंस्तव पुत्रागमं प्रति ॥ २ ॥
कश्यपस्य तु पुत्रोस्ति विभण्डक इति श्रुतः ॥ ऋश्यशृङ्ग इति ख्यातस्तस्य पुत्रो भविष्यति ॥ ३ ॥
स वने नित्यसंवृद्धो मुनिर्वनचरः सदा ॥ नान्यं जानाति विप्रेन्द्रो नित्यं पित्रनुवर्तनात् ॥ ४ ॥
द्वैविध्यं ब्रह्मचर्यस्य भविष्यति महात्मनः ॥ लोकेषु प्रथितं राजन्विप्रैश्च कथितं सदा ॥ ५ ॥
तस्यैवं वर्तमानस्य कालःसमभिवर्तत ॥ अग्निं शुश्रूषमाणस्य पितरं च यशस्विनम् ॥ ६ ॥
एतस्मिन्नेव काले तु रोमपादः प्रतापवान् ॥ अङ्गेषु प्रथितो राजा भविष्यति महाबलः ॥ ७ ॥
तस्य व्यतिक्रमाद्राज्ञो भविष्यति सुदारुणा ॥ अनावृष्टिः सुघोरा वै सर्वभूतभयावहा ॥ ८ ॥

यज्ञसंयोगे नकारादेशविधानात्। दीक्षां दीक्षाध्यवसायं। विशत गच्छतेत्यर्थः । सुतकारणात् सुतार्थं । "निमित्तकारणहेतूनांप्रयोगेसर्वासामिष्टिः" इतिपञ्चमी॥ २३ ॥ अतिक्रान्तेन अत्यन्तमिष्टेन। मुखपद्मानि सुन्दराणिमुखानीत्यर्थः ॥ २४ ॥ इति श्रीगोविन्दराजविरचितेश्रीमद्रामायणभूषणेमणिमञ्जीराख्याने बालकाण्डव्याख्यानेअष्टमस्सर्गः ॥ ८ ॥

अथभगवदवतारासाधारणकारणंपुत्रेष्टिमुपक्षिपति-सर्गत्रयेण । सूतः सारथित्वेनमन्त्रित्वेनचस्थितःसुमन्त्रः । रहः एकान्ते । इदमब्रवीत् अन्तःपुरमागत्योक्तवानित्यर्थः । अयं अश्वमेधप्रवृत्तिरूपःपुत्रार्थोपायः । ऋत्विग्भिः वसिष्ठादिभिः । उपदिष्टः । मयातु पुरावृत्तः इतिहासरूपः यः श्रुतः ॥ १ ॥ कथमित्यत्राह—सनत्कुमारइत्यादि । भगवान् भविष्यज्ज्ञानवत्त्वरूपमाहात्म्यवान् । कथां भविष्यद्विषयिणीं ॥ २ ॥ ख्यातोभविष्यतीत्यत्र "धातुसंबन्धेप्रत्ययाः" इति-भूतभविष्यतोःसाधुत्वं ॥ ३ ॥ अन्यं ग्रामग्रामीणादिकं । नजानाति नज्ञास्यति ॥ ४ ॥ द्वैविध्यं द्वैधीभावः । स्त्रीसङ्गकृतोभङ्गइत्यर्थः । लोकेषुप्रथितमित्यत्रब्रह्मचर्यमित्यनुषङ्गः । यद्वा । मेखलाजिनदण्डादिना लोकेषुप्रथितं । विप्रैः स्मर्तृभिः । कथितं ऋतुगमनलक्षणंच । ब्रह्मचर्यस्यद्वैविध्यंभविष्यति । आह्याज्ञवल्क्यः । "षोडशर्तुर्निशःस्त्रीणांतस्मिन्युग्मासुसंविशेत्।ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्चवर्जयेत्" इति ॥ ५ ॥ तथाविधस्य द्वितीयब्रह्मचर्यस्य प्रसक्तिंदर्शयति—तस्येत्यादिना । तस्य । अग्निं । यशस्विनंपितरं । चाद्गुरूंच । शुश्रूषमाणस्य । प्रथमेब्रह्मचर्येवर्तमानस्येत्यर्थः । कालः कतिपयकालः । समभिवर्तत । भविष्यदर्थेलङ् । "छन्दसिलुङ्लङ्लिटः" इतिसर्वलकारापवादत्वेनलङोपिविधानात् । अडभावश्चार्षः ॥ ६ ॥ एतस्मिन्काले तस्यब्रह्मचर्यदशायां । अङ्गेषु अङ्गदेशेषु ॥ ७ ॥ व्यतिक्रमात् धर्मातिक्रमात् । सुदारुणा बहुकालव्यापिनी । सुघोरा तदीयसर्वराष्ट्रव्यापिनी ।

ति० पितुः नकापिलयागन्तव्यमित्याज्ञानुवर्तनाद्वनचरत्वं ॥ ४ ॥

[पा०] १ च.-ज. यत्पुरा. ख. ङ.—ञ. इदमर्थमधिकं. २ ख. ग. ङ. विभाण्डक. ३ ढ. वैचनरैः सह. ४ ग. ज. मत्वं. ५ ख. समतिवर्तत. ग. समभिवर्तते. ६ ख. घ. ङ. ञ. सर्वलोक.

अनावृष्ट्यां तु वृत्तायां राजा दुःखसमन्वितः ॥ ब्राह्मणाञ्श्रुतवृद्धांश्च समानीय प्रवक्ष्यति ॥ ९ ॥
भवन्तः श्रुतधर्माणो लोकचारित्रवेदिनः ॥ समादिशन्तु नियमं प्रायश्चित्तं यथा भवेत् ॥
[इत्युक्तास्ते ततो राज्ञा सर्वे ब्राह्मणसत्तमाः] ॥ १० ॥
वक्ष्यन्ति ते महीपालं ब्राह्मणा वेदपारगाः ॥ विभण्डकसुतं राजन्सर्वोपायैरिहानय ॥ ११ ॥
आनाय्य च महीपाल ऋश्यशृङ्गं सुसत्कृतम् ॥ [विभण्डकसुतं राजन्ब्राह्मणं वेदपारगम् ॥]
प्रयच्छ कन्यां शान्तां वै विधिना सुसमाहितः ॥ १२ ॥
तेषां तु वचनं श्रुत्वा राजा चिन्तां प्रपत्स्यते ॥ केनोपायेन वै शक्यमिहानेतुं स वीर्यवान् ॥ १३ ॥
ततो राजा विनिश्चित्य सह मन्त्रिभिरात्मवान् ॥ पुरोहितममात्यांश्च ततः प्रेष्यति सत्कृतान् ॥१४॥
ते तु राज्ञो वचः श्रुत्वा व्यथिता विनताननाः ॥ न गच्छेम ऋषेर्भीता अनुनेष्यन्ति तं नृपम् ॥१५॥
वक्ष्यन्ति चिन्तयित्वा ते तस्योपायांश्च तत्क्षमान् ॥ आनेष्यामो वयं विप्रं न च दोषो भविष्यति ॥१६॥
एवमङ्गाधिपेनैव गणिकाभिर्ऋषेः सुतः ॥ आनीतोऽवर्षयद्देवः शान्ता चास्मै प्रदीयते ॥ १७ ॥
ऋश्यशृङ्गस्तु जामाता पुत्रांस्तव विधास्यति ॥ सनत्कुमारकथितमेतावद्व्याहृतं मया ॥ १८ ॥

अतएवसर्वभूतभयावहा ॥८॥ श्रुतेनवृद्धाःश्रुतवृद्धाः । बहुभ्योबहुधाश्रुतशास्त्राइत्यर्थः । प्रवक्ष्यतिचेत्यन्वयः ॥ ९ ॥ श्रुतधर्माणः । "धर्मादनिच्केवलात्"इत्यनिच् । लोकचारित्रवेदिनः लोकाचारज्ञाः । अतः अनावृष्टिमूलस्यमत्पापस्य प्रायश्चित्तं यथाभवेत् तादृशं नियमं अनुष्ठेयधर्मं आदिशन्तु ॥ १० ॥ शुद्धब्रह्मचारिणेकन्याप्रदानमेवपरमंप्रायश्चित्तमितिवक्ष्यन्तीत्याह्—वक्ष्यन्तीत्यादिना । सर्वोपायैः नानाविधोपायैः ॥ ११ ॥ ऋश्यशृङ्गंइत्यत्र "ऋत्यकः" इतिप्रकृतिभावः । आनाय्येति आङुपसृष्टाण्णीञ्प्रापणइत्यस्माद्धेतुमण्ण्यन्ताल्ल्यप् । प्रयच्छ देहि । ऋश्यशृङ्गायेतिशेषः । सुसत्कृतमित्यानयनक्रियाविशेषणं । सुसमाहितः निर्विचारइतियावत् ॥१२॥ चिन्ताप्रकारमाह्—केनेति । वीर्यवान् नियतब्रह्मचर्यः ॥ १३ ॥ विनिश्चित्य ब्राह्मणंब्राह्मणाएवानेष्यन्तीतिनिश्चित्य । ततः तस्माद्देशात् । प्रेष्यति प्रेषयिष्यति । भविष्यदर्थेलट् । "कालसामान्येलड्वक्तव्यः" इतिवचनात् ॥ १४ ॥ व्यथिताः खिन्नाः । अतएव विनताननाः नम्रमुखाः । ऋषेःविभण्डकात् । भीताइत्यनन्तरमितिकरणंबोध्यं । अनुनेष्यन्ति नवयंगन्तुंशक्ताः । किंतु तदानयनउपायंविचिन्त्यवक्ष्यामइति सान्त्वयिष्यन्ति ॥ १५ ॥ तत्क्षमान् ऋश्यशृङ्गानयनोचितान् उपायांश्चिन्तयित्वा । तान् तस्य राज्ञोवक्ष्यन्ति । एतैरुपायैर्वयंविप्रमानेष्यामः । नचदोषोभविष्यति । ऋश्यशृङ्गस्यब्रह्मचर्यवैकल्यदोषश्चनभविष्यति । तत्रभवतानशङ्कनीयं । यथागणिकासंपर्कोनभवेत्तथाऽऽनेष्यामइत्यर्थः । ऋषिशापदोषोनभविष्यतीतिवार्थः । अनावृष्टिदोषोनभविष्यतीतिवा । इतिवक्ष्यन्तीतिपूर्वेणान्वयः ॥ १६ ॥ सनत्कुमारोक्तंसमाप्य स्वयमाह्—एवमिति । यथाआनयिष्यामइत्युक्तं एवमानीतः । देवः पर्जन्यश्च अवर्षयत् । शान्ता रोमपादकन्याच । अस्मै ऋश्यशृङ्गाय । प्रदीयते प्रादीयत । कालसामान्येलट् ॥ १७ ॥ जामाता रोमपादस्यदशरथस्यापिवा । दशरथस्यौरसी । शान्ता दत्तारोमपादस्य । सनत्कुमारकथितमेतावत् । एवमङ्गाधिपेनेत्यादितु मयाव्याहृतमित्यर्थः । यद्वा सर्वंसनत्कुमारवचनमेव । अवर्षयत्

ति० श्रुतकर्माणः अनावृष्टिकरश्रुतमत्कर्माणः ॥ १० ॥ **ति०** वीर्यं जितेन्द्रियत्वं विद्यावृत्ततपोवीर्यंच ॥ १३ ॥ **तिल०** वनताननाः नम्रमुखाः । अवस्यआदेर्लोपः ॥ १५ ॥

[पा०] १ च. छ. श्रुतसंपन्नान्. ङ. झ. श्रुतसंवृद्धान्. क. श्रुतवृत्तांश्च. २ ङ. झ. श्रुतकर्माणो. ३ क. ख. ग. लोकेचारित्र. ४ ङ. च. छ. झ. ञ. इदमर्धमधिकंदृश्यते. ५ ख. ग. ज. आनीयच. क. च. छ. आनयित्वा. घ. आनाय्यत्वं. ६ ङ. झ. इदमर्धमधिकंदृश्यते. ७ क. ख. ग. ज. शक्यइहा. ८ झ. ञ. त्वांश्चप्रेषयिष्यति. ट. ततःप्रेष्यतिधर्मवित्. ९ क. ङ. च. छ. झ. वनताननाः ।

अथ हृष्टो दशरथः सुमन्त्रं प्रत्यभाषत ॥ यथर्श्यशृङ्गस्त्वानीतो विस्तरेण त्वयोच्यताम् ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे नमवः सर्गः ॥ ९ ॥

दशमः सर्गः ॥ १० ॥

सुमन्त्रेणदशरथंप्रतिऋश्यशृङ्गस्यरोमपादेनस्वनगरंप्रत्यानयनप्रकारादेर्विस्तरेणप्रतिपादनम् ॥ १ ॥ तथासनत्कुमारोक्तकथाशेषस्यविस्तरेणकथनपूर्वकं अङ्गदेशादृश्यशृङ्गानयनचोदना ॥ २ ॥

सुमन्त्रश्चोदितो राज्ञा प्रोवाचेदं वचस्तथा ॥ यथर्श्यशृङ्गस्त्वानीतः शृणु मे मन्त्रिभिः सह ॥
[तन्मे निगदितं सर्वं विस्तरेण शृणुष्वह] ॥ १ ॥
रोमपादमुवाचेदं सहामात्यपुरोहितः ॥ उपायो निरपायोऽयमस्माभिरभिचिन्तितः ॥ २ ॥
ऋश्यशृङ्गो वनचरस्तपस्स्वाध्यायने रतः ॥ अनभिज्ञः सुनारीणां विषयाणां सुखस्य च ॥ ३ ॥
इन्द्रियार्थैरभिमतैर्नरचित्तप्रमाथिभिः ॥ पुरमानाययिष्यामः क्षिप्रं चाध्यवसीयताम् ॥ ४ ॥
गणिकास्तत्र गच्छन्तु रूपवत्यः स्वलंकृताः ॥ प्रलोभ्य विविधोपायैरानयिष्यन्ति सत्कृताः ॥ ५ ॥
श्रुत्वा तथेति राजा च प्रत्युवाच पुरोहितम् ॥ पुरोहितो मन्त्रिणश्च तथा चक्रुश्च ते तदा ॥
वारमुख्यास्तु तच्छ्रुत्वा वनं प्रविविशुर्महत् ॥ ६ ॥

वर्षयिष्यति । प्रदीयते प्रदास्यते ॥ १८ ॥ अथेत्युत्तरशेषः श्लोकः । अत्र सर्गविच्छेदोलेखकदोषकृतइतिप्रतिभाति ॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्यानेनवमःसर्गः ॥ ९ ॥

मे मत्तः । सः ऋश्यशृङ्गः । यथामन्त्रिभिरानीतः तथा शृणु । हेतिप्रसिद्धौ ॥ १ ॥ निरपायः अव्यभिचारिफलः ॥ २ ॥ तपस्स्वाध्यायने तपस्स्वाध्याययोः "सर्वोद्वन्द्वोविभाषयैकवद्भवति" इत्येकवद्भावः । "अन्येषामपिदृश्यते" इतिदीर्घः । तेन पुराणेतिहासादिमुखेनापिनस्त्रीस्वरूपंजानातीतिभावः । नारीणामनभिज्ञइतिकर्मणिषष्ठी । विषयाणां शब्दस्पर्शरूपरसगन्धानांसंबन्धिनः सुखस्यचानभिज्ञश्च भवति ॥ ३ ॥ नरचित्तप्रमाथिभिः नरचित्ताकर्षकैः । तमितिशेषः । क्षिप्रं शीघ्रंआनाययिष्यामः । अध्यवसीयतां निश्चीयतां । अस्मदुक्तप्रकारइतिशेषः ॥ ४ ॥ केइन्द्रियार्थाःकथंतैरानयनंतत्राह—गणिकाइति । गणिकाः वेश्याः । प्रलोभ्य वञ्चयित्वा । सत्कृताः अस्माभिः कृतबहुमानाःऋश्यशृङ्गेणवा ॥ ५ ॥ राजापुरोहितंतथेतिप्रत्युवाच । पुरोहितोपि मन्त्रिणस्तथेतिप्रत्युवाच । तेच मन्त्रिणस्तथाचक्रुः । तेषामेवाधिकारात् । वारमुख्याःप्रेषयामासुरित्यर्थः । वारेति अर्धमेकं । वारशब्देन वारस्त्रियउच्यन्ते नामैकदेशे-

---

ति० सोच्यतां सः उच्यतामित्यर्थः । सन्धिरार्षः । यद्वा सा तद्विषयकाकथा उच्यतामित्यर्थः ॥१९॥ इतिनवमःसर्गः ॥९॥
ति० मन्त्रिभिस्सहसंमन्त्र्य रोमपादेन यथा ऋश्यशृङ्गआनीतः येनचोपायेनानीतः तन्मयानिगदितं सर्वप्रकारं मे मत्तः मन्त्रिभिस्सहशृण्वितियोजना ॥ १ ॥ शिरो० तपस्स्वाध्यायतत्परः तपस्स्वाध्याययोर्निरतः ॥ ३ ॥ ति० अध्यवसीयतां अस्मदुक्तकरणाययत्यतां ॥ ४ ॥ ति० राजा पुरोहितं । तथेति । त्वयैवतथाकर्तव्यमित्युवाच । अल्पविषयत्वाद्राज्ञएवंवादः । अथपुरोहितस्यविप्रत्वाद्गणिकाभिस्सहसंवादोऽनुचितइतिसोपिमन्त्रिणःप्रत्युवाच ॥ ६ ॥

[पा०] १ ङ. च. झ. येनोपायेनसोच्यताम्. २ क—झ. स्तदा. ३ ख. ङ. झ. स्त्वानीतोयेनोपायेनमन्त्रिभिः । तन्मेनिगदितंसर्वंशृणुमे. ४ इदमर्धं क. ख. ङ. झ. दृश्यते. ५ क. च. सहामात्यं. ६ ङ. च. झ. स्स्वाध्यायसंयुतः. घ. ट. स्वाध्यायतत्परः. ७ ङ. झ. सुनारीणां. ८ च. साध्ववसीयताम्. ९ क—ङ. ज. झ. रानेष्यन्तीहसत्कृताः. १०. च. हसत्कृतम्. ११ ख. श्रुतेमतिम्.

आश्रमस्याविदूरेऽस्मिन्यत्नं कुर्वन्ति दर्शने ॥ ऋषिपुत्रस्य धीरस्य नित्यमाश्रमवासिनः ॥ ७ ॥
पितुः स नित्यसंतुष्टो नातिचक्राम चाश्रमात् ॥ ८ ॥
न तेन जन्मप्रभृति दृष्टपूर्वं तपस्विना ॥ स्त्री वा पुमान्वा यच्चान्यत्सर्वं नगरराष्ट्रजम् ॥ ९ ॥
ततः कदाचित्तं देशमाजगाम यदृच्छया ॥ विभण्डकसुतस्तत्र ताश्चापश्यद्वराङ्गनाः ॥ १० ॥
ताश्चित्रवेषाः प्रमदा गायन्त्यो मधुरस्वरैः ॥ ऋषिपुत्रमुपागम्य सर्वा वचनमब्रुवन् ॥ ११ ॥
कस्त्वं किं वर्तसे ब्रह्मञ्ज्ञातुमिच्छामहे वयम् ॥ एकस्त्वं विजने घोरे वने चरसि शंस नः॥१२॥
अदृष्टरूपास्तास्तेन काम्यरूपा वने स्त्रियः ॥ हार्दात्तस्य मतिर्जाता ह्याख्यातुं पितरं स्वकम् ॥१३॥
पिता विभण्डकोस्माकं तस्याहं सुत औरसः ॥ ऋश्यशृङ्ग इति ख्यातं नाम कर्म च मे भुवि ॥१४॥
इहाश्रमपदोस्माकं समीपे शुभदर्शनाः ॥ करिष्ये वोत्र पूजां वै सर्वेषां विधिपूर्वकम् ॥ १५ ॥
ऋषिपुत्रवचः श्रुत्वा सर्वासां मतिरास वै ॥ तदाश्रमपदं द्रष्टुं जग्मुः सर्वाश्च तेन ताः ॥ १६ ॥
आगतानां ततः पूजामृषिपुत्रश्चकारह ॥ इदमर्घ्यमिदं पाद्यमिदं मूलमिदं फलम् ॥ १७ ॥
प्रतिगृह्य तु तां पूजां सर्वा एव समुत्सुकाः ॥ ऋषेर्भीतास्तु शीघ्रं ता गमनाय मतिं दधुः ॥१८॥

नामग्रहणात् ॥ ६ ॥ अस्मिन् वने आश्रमस्याविदूरे । दर्शने ऋष्यशृङ्गदर्शने । यत्नं अवधानं । कुर्वन्ति अकुर्वन् । ऋषिपुत्रस्येत्यादिविशेषणत्रयं यत्नस्य कर्तव्यत्वेहेतुः ॥ ७ ॥ उक्तहेतुंविवृणोति—पितुरित्यर्धेन । पितुःसकाशात् । नित्यसंतुष्टः पितृशुश्रूषणैकरतइत्यर्थः ॥ ८ ॥ हेत्वन्तरमाह—नतेनेति । जन्मप्रभृति जन्मारभ्य । नगरजं अश्वादि । राष्ट्रजं कुकुटादि ॥९॥ यदृच्छया दैववशात् ॥ १० ॥ चित्रवेषाः नानालंकाराः ॥११॥ कस्त्वं किंजातिः कस्यपुत्रइत्यर्थः । किं किमर्थं । वर्तसे । इच्छामहइत्यात्मनेपदमार्षं । भवान् किंजातिः किंनामधेयः कस्यपुत्रः त्वं घोरेस्मिन्वने किमर्थं वर्तसे । किमर्थमेकश्चरसीति योजना ॥ १२॥ यस्मात्कारणात् । काम्यरूपाः काम्यमानरूपाः ताः स्त्रियः । वने तेन अदृष्टरूपाः तस्मात् । हार्दात् दर्शनजस्नेहात् । स्वकंपितरं पित्रादिकं । आख्यातुं मतिर्जाता ॥ १३ ॥ अस्माकमिति मृगाद्यपेक्षयाबहुवचनं । किंतद्वद्द्रौणःपुत्रोसि । नेत्याह—औरसइति । पुराकिल महाभूततटाकाख्येसरसि उपस्पृशतोविभण्डकस्यउर्वशींदृष्ट्वारेतोस्खलत् । तन्मृगी जलेनसहपीत्वागर्भिण्यासीत् । तस्यांजातः ऋश्यमृगतुल्यशृङ्गत्वात् ऋश्यशृङ्गाख्योऽभूदिति पौराणिकीकथा । मे ऋश्यशृङ्गेति नाम ख्यातं । मे तपोरूपं कर्मच । भुवि वनभुवि । ख्यातं ॥ १४ ॥ इह वनसमीपेप्रदेशे । अस्माकं आश्रमपदः । पुंस्त्वमार्षं । अत्र वःपूजां करिष्ये । आगन्तव्यमितिभावः । सर्वेषामितिपुंल्लिङ्गनिर्देशः स्त्रीस्वरूपाऽपरिज्ञानकृतः ॥ १५ ॥ द्रष्टुंमतिः । आस अभूत् । अस्तेर्भूभावाभावआर्षः । तेनसह । तदाश्रमपदं जग्मुश्च ॥ १६ ॥ आगतानां आश्रमपदंआगतानां । अन्तेइतिकरणंद्रष्टव्यं ॥ १७ ॥ समुत्सुकाः तत्संलापसाभिलाषाः । ताःसर्वाः । तांपूजां ऋषिपुत्रदत्तांपूजाम् । प्रतिगृह्य । ऋषेः विभण्डकात् । भीतास्सत्यः । शीघ्रंगमनाय मतिंदधुः

तीर्थी० अस्मिन् दर्शने । ऋश्यशृङ्गदर्शनस्वबुद्धिस्थत्वादस्मिन्निति निर्देशः ॥ ७ ॥ **ति०** रूपादिकंजन्मप्रभृतिदृष्टपूर्वंनभवति यथातथाव्यवह्रियते इतिशेषः ॥ ९ ॥ **ति०** कस्त्वं किंजातिः कस्यपुत्रः किंनामाच किंवर्तसे किंकर्मासि । अपि च । एकस्त्वं विजनेदूरे जनवासरूपग्रामादिभ्योदूरे वने किमर्थं चरसीति प्रश्नत्रयं ॥ १२ ॥ **ति०** स्त्रियइत्यस्यदृष्टाइतिशेषः । अनेनहार्दमूलभूता "चलस्यचेतसोयास्यादुदासीनेषुवस्तुषु । अवारणीयावृत्तिस्साद्दष्टिशब्देनकथ्यते" इत्युक्तलक्षणादृष्टिरुक्ता । ततस्सर्वांशेऽनुपेक्षात्मकज्ञानरूपःपरिचयोपिमध्येज्ञेयः । अतस्तासु हार्दात् दर्शनजस्नेहात् । "दोषानालोकिनीप्रीत्याख्यचित्तवृत्तिर्हार्दं" इत्युक्तेः ॥१३॥ **ति०** नामेत्यन्तं आद्यप्रश्नोत्तरं । द्वितीयप्रश्नोत्तरमाह । कर्मचमदीयं भुविप्रसिद्धं ॥१४॥ **ति०** तृतीयप्रश्नस्योत्तरमाह । इहेति ॥ १५ ॥ **ति०** नः अस्माकं भक्ष्यमितिशेषः ॥ १७ ॥

[पा०] १ ख. स्याविदूरस्य. २ ङ. च. झ. ऋषेःपुत्रस्य. ३ क—च. झ. त्सत्वंनगर. ४ ङ. मधुरस्वरम्. ख. मधुरस्वनम्. ग. स्वनैः. ५ ङ. झ. दूरेवने. ६ घ. तासांप्रीतिरजायत. ७ क. च. सर्वाश्चतेनहि. ङ. ज. झ. सर्वास्ततोङ्गनाः. ८ क. ख. घ. ङ. ज. झ. गतानांतुततः. ९ क. ख. ङ. च. छ. झ. मूलंफलंचनः. १० ङ. झ. ऋषेर्भीताश्चशीघ्रंतु.

अस्माकमपि मुख्यानि फलानीमानि [1]वै द्विज ॥ [2]गृहाण प्रति भद्रं ते भक्षयस्व च माचिरम् ॥१९॥
ततस्तास्तं समालिङ्ग्य सर्वा हर्षसमन्विताः ॥ मोदकान्प्रददुस्तस्मै [3]भक्षांश्च विविधाञ्शुभान् ॥ २० ॥
तानि चास्वाद्य तेजस्वी फलानीति स्म मन्यते ॥ अनास्वादितपूर्वाणि वने नित्यनिर्[4]वासिनाम् ॥२१॥
आपृच्छय तु [5]तदा विप्रं व्रतचर्यां निवेद्य च ॥ गच्छन्ति स्मापदेशात्ताः भीतास्तस्य पितुः स्त्रियः ॥२२॥
गतासु तासु सर्वासु काश्यपस्यात्मजो द्विजः ॥ अस्व[6]स्थहृदयश्चासीद्दुः[7]खं स परिवर्तते ॥ २३ ॥
[8]ततो परेद्युस्तं देशमाजगाम स वीर्यवान् ॥ [वि[9]भण्डकसुतः श्रीमान्मनसा चिन्तयन्मुहुः ॥]
मनोज्ञा यत्र ता दृष्टा वारमुख्याः स्वलङ्कृताः ॥ २४ ॥
दृष्ट्वैव च [10]तदा विप्रमायान्तं हृष्टमानसाः ॥ उपसृत्य ततः सर्वास्तास्तमूचुरिदं वचः ॥ २५ ॥
एह्याश्रमपदं सौम्य ह्यस्माकमिति चाब्रुवन् ॥ [चि[11]त्राण्यत्र बहूनि स्युर्मूलानि च फलानि च ।]
[12]तत्राप्येष विधिः श्रीमान्विशेषेण भविष्यति ॥ २६ ॥
श्रुत्वा तु वचनं तासां सर्वासां हृदयंगमम् ॥ गमनाय मतिं चक्रे तं च निन्युस्तदा स्त्रियः ॥२७॥
तत्र चानीयमाने तु विप्रे तस्मिन्महात्मनि ॥ ववर्ष सहसा देवो जगत्प्रह्लादयंस्तदा ॥ २८ ॥
हर्षेणैवागतं विप्रं वि[13]षयं स्वं नराधिपः ॥ प्रत्युद्गम्य मुनिं प्रह्वः शिरसा च महीं गतः ॥ २९ ॥
अर्घ्यं च प्रददौ तस्मै न्यायतः सुसमाहितः ॥ वव्रे प्रसादं विप्रेन्द्रान्मा विप्रं [14]मन्युराविशत् ॥३०॥

॥ १८ ॥ प्रतिगृहाणेत्यन्वयः । "छन्दसिपरेपि"इति प्रतीत्यस्योपसर्गस्यधातोरुपरिष्टात्प्रयोगः । "छन्दोवत्पुराणानिभवन्ति" इतिन्यायात् । माचिरं विलंबंमाकुरु ॥ १९ ॥ अत्र आदावित्युक्त्वेत्युपस्कार्यं । स्नेहिजनवद्वशीकारार्थमालिङ्ग्य ॥ २० ॥ वनेनित्यनिवासिनांअनास्वादितपूर्वाणि । तैःपूर्वमनास्वादितानि फलानीमानीति मन्यतेस्म । अपूर्वरसत्वात् । "पूरणगुण—"इतिसमासप्रतिषेधादेवज्ञापकात्तृतीयार्थेषष्ठी ॥ २१ ॥ व्रतचर्यांनिवेद्य अस्माभिःकिंचिद्व्रतमनुष्ठेयमस्तीति व्रतानुष्ठानंनिवेद्य । तस्मादपदेशात् व्याजात् । तस्यपितुर्भीतास्सत्योगच्छन्तिस्म ॥ २२ ॥ काश्यपस्य कश्यपपुत्रस्यविभण्डकस्य । अस्वस्थहृदयः कर्षितचित्तः । दुःखंयथाभवतितथा परिवर्ततेस्म संचरतिस्म ॥ २३ ॥ ततः अस्वस्थचित्तत्वाद्धेतोः ॥ २४ ॥ अस्माकमाश्रमपदमेहीतिपूर्वेणान्वयः । तत्रापि श्रीमान् समृद्धिमान् । एषविधिः सत्कारः । स्वदेशत्वाद्विशेषेणभविष्यति । इतिचाब्रुवन्नितियोजना ॥ २५ ॥ २६ ॥ हृदयंगमं मनोज्ञं । "खश्प्रकरणेगमेःसुप्युपसंख्यानं"इतिखश् । निन्युः नावमारोप्यगङ्गाप्रवाहेणेतिशेषः । तथैवभारतेप्रतिपादनात् ॥ २७ ॥ तत्र अङ्गदेशइत्यर्थः ॥ २८ ॥ स्वंविषयं स्वदेशं । प्रह्वः विनीतः ॥ २९ ॥ अर्घः पूजा तदर्थमुदकमर्घ्यं । "पादार्घाभ्यांच" इति यत्प्रत्ययः । न्यायतः शास्त्रक्रमेण । विप्रेन्द्रात् ऋश्यशृङ्गात् । प्रसादं गणिकाभिःप्रलोभ्यानयनकृतकोपनिवृत्तिं । वव्रे । कथंवव्रे । विप्रं त्वां मन्युः कोपो मा-

ति० माचिरं । ऋषेरागमनात्पूर्वमेवभक्षणीयमित्याशयः ॥ १९ ॥ **ति०** हर्षसमन्विताः बालब्रह्मचारितोगाढतरालिङ्गनप्राप्त्या । स्वकार्यानुकूलस्पर्शप्राप्त्या च । **शिरो०** भक्ष्यान् भक्षयितुंयोग्यान्मोदकान् ॥ २० ॥ **ति०** अस्वस्थहृदयः अप्रसन्नचित्तआसीत् । दुःखात् तादृशचाक्षुषादिविषयसुखविश्लेषजात् । परिवर्तनं एकदेशानवस्थितिः ॥ २३ ॥ **ति०** ततः अस्वस्थचित्तत्वाद्धेतोः । मनसाचिन्तयन् । तासां दर्शनस्पर्शनगमनादिप्रकारान्स्मरन्नित्यर्थः । तत्रगमनमेतद्वारकमवश्यंभावीति चिन्तयन्नित्यर्थश्च ॥ २४ ॥ **ति०** यद्यत्रैवचित्राणिमूलानिफलानिचभवेयुः । अतस्तत्रगमनंव्यर्थमितिचेत्तत्रापि । एषविधिः विचित्रफलमूलभक्षणविधिः । विशेषेण इतोप्याधिक्येन भविष्यति ॥ २६ ॥

[पा०] १ ङ. झ. हेद्विज. २ ङ. ज. झ. गृहाणविप्र. ३. ट. भक्ष्यांश्च. ४ क. ख. घ. च. ज. निवासिना. ५ च. तदाक्षिप्रं. ६ ज. अस्वस्थहृदयस्तत्रनलेभेधृतिमात्मनः. ७ ग. ङ. च. छ. झ. दुःखाच्चपरिवर्तते–कः घ. दुःखात्संपरि. ८ ज. ततः प्रभातेतंदेशं. ९ इदमर्धं ख. ङ—झ. दृश्यते. १० ङ. च. छ. झ. ततोविप्रं. ११ इदमर्धं ङ—झ. दृश्यते. १२ ङ. झ. तत्राप्येष विशेषेणविधिर्हिंभविताध्रुवं. १३ ङ. झ. तापसंसनराधिपः. क. ग. च. छ. ज. विषयंसनराधिपः. १४ क—घ. च. झ राविशेत्

अन्तःपुरं प्रविश्यास्मै कन्यां दत्त्वा यथाविधि ॥ शान्तां शान्तेन मनसा राजा हर्षमवाप सः ॥३१॥
एवं स न्यवसत्तत्र सर्वकामैः सुपूजितः ॥ [ऋश्यशृङ्गो महातेजाः शान्तया सह भार्यया] ॥३२॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

दशरथेनाङ्गदेशमेत्य रोमपादमुखादृश्यशृङ्गस्य भार्यया सह शान्तयाऽयोध्यांप्रत्यानयनम् ॥ १ ॥

भूय एव च राजेन्द्र शृणु मे वचनं हितम् ॥ यथा स देवप्रवरः कथायामेवमब्रवीत् ॥ १ ॥
इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः ॥ राजा दशरथो नाम श्रीमान्सत्यप्रतिश्रवः ॥ २ ॥
अङ्गराजेन सख्यं च तस्य राज्ञो भविष्यति ॥ कन्या चास्य महाभागा शान्ता नाम भविष्यति ॥३॥
पुत्रस्त्वङ्गस्य राज्ञस्तु रोमपाद इति श्रुतः ॥ अङ्गराजं दशरथो गमिष्यति महायशाः ॥ ४ ॥
अनपत्योसि धर्मात्मञ्शान्ताभर्ता मम क्रतुम् ॥ आहरेत त्वयाज्ञप्तः संतानार्थं कुलस्य च ॥ ५ ॥

विशेदिति । माविशत्विलर्थः । लकारव्यत्ययः । यद्वा विप्रं विभण्डकं । मन्युः पुत्रविश्लेषणकृतःकोपः माविशेदिति । एवंप्रसादनादेवविभण्डको नचुकोप । पुत्रप्रसादवरणादेवपितात्रिलोकज्ञस्तुष्यतीति पूर्वमेवमन्त्रिभिर्निर्णीतंचेतिबोध्यं । कथमन्यथा उपायंचिन्तयन्तः प्राज्ञाः अपायमपिनचिन्तयेयुः ॥ ३० ॥ प्रविश्यतेनसहेतिसिद्धं । शान्तेन निर्दुःखेन । मनसा उपलक्षितः । प्रसादकार्योपदर्शनात् प्रसन्नत्वंसिद्धम् ॥ ३१ ॥ एवंसर्वकामैः सुपूजितः । तत्र रोमपादान्तःपुरे ॥३२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

एवं दशरथप्रश्नस्योत्तरमुक्त्वा कथाशेषंसुमन्त्रः प्रस्तौति—भूयइत्यादि । देवप्रवरः सनत्कुमारः । कथायां कथाप्रसङ्गे । एवं वक्ष्यमाणरीत्या । यथा उक्तवान् । तथा शृणु ॥ १ ॥ धार्मिकोभविष्यतीत्यन्वयः । सत्यप्रतिश्रवः सत्यप्रतिज्ञः ॥ २ ॥ अस्य अङ्गराजस्य ॥ ३ ॥ अङ्गस्य राज्ञः अङ्गराजस्य ॥ ४ ॥ अहमनपत्योस्मि । तस्मात् ममकुलस्य । संतानार्थं

तीर्थी० प्रविश्य प्रवेश्य । **ति०** तदनुज्ञयान्तःपुरंप्रवेश्य । हर्षं वृष्टिजं ऋषिसंबन्धजंच ॥३१॥ **ति०** ननुगणिकास्पर्शतत्स्पृष्टफलभक्षणादिभिरस्यतपोहानौ कथंतद्गमनमात्रेणवृष्टिः । नच स्त्रीत्वाद्यज्ञानान्नतपोहानिः । ईषद्दोषस्तुतपसैवदग्धइतिवाच्यं । निर्मलब्रह्मचर्येण विदितवेदशास्त्रतत्त्वस्य शास्त्रतःस्त्रीस्वरूपज्ञानस्य ब्रह्मचर्येतत्परिहारज्ञानस्यच दुर्निवारत्वात् । वनेवनचरस्त्रीणामनुभवाच्च । सर्वथाऽज्ञत्वेऽनुग्रहशक्त्यभावापत्तेश्चेतिचेन्न । निर्मलब्रह्मचर्येणब्रह्मज्ञतया सर्वत्रब्रह्मदृष्ट्याचदोषलेशस्याप्यस्पर्शात् । प्रारब्धवशात्क्षत्रियस्त्रीसंबन्धंभाविनंतद्द्वारकंजानन्नेवगणिकाभिस्तथाव्यवजहेतासांभयानुत्पत्तये । अतएव नतेनेतिनवमश्लोके तथाव्यवह्रियतइतिशेषःपूरितोस्माभिःप्राक् । एतत्सर्वंजानन्पितापितमनुयाय नशप्तवान्राजानमित्येवात्रतत्वं । अनेनतत्त्वज्ञस्यसर्वदोषासंबन्धोध्वनितः । ब्रह्मक्षेदानसंकल्पमात्रेणफलसिद्धिरित्यादिचसूचितं । यत्तु कश्चिद्विभाण्डकस्यपुत्रान्वेषणंक्रोधेन ततोमार्गे-ऋष्यशृङ्गायशान्तादानादिवृत्तान्तलाभेनपुनराश्रमं परावृत्यागमनं तदपितत्त्वज्ञलएवोपपद्यते । अन्यथा स्वपुत्रस्यगणिकाद्वारकब्रह्मचर्यविलोपकृतोरोषोऽज्ञस्यतस्यकेनाप्युपायेनवारयितुमशक्यइत्यलम् ॥ ३२ ॥ इतिदशमस्सर्गः ॥ १० ॥

ती० कथायां पूर्वकथायांसमाप्तायांसत्यां । यथेति यदित्यर्थे । **शि०** कथायां नानेतिहासवर्णनावसरे । यथा येनप्रकारेणाब्रवीत् । एवं तेनप्रकारेणैव । मे मत्तः । शृणु ॥ १ ॥ **ति०** अङ्गराजः रोमपादः । तस्य दशरथस्य । अस्य रोमपादस्य ॥ ३ ॥ तं रोमपादं । गमिष्यति ऋश्यशृङ्गानयनार्थमितिशेषः ॥ ४ ॥ चकारेणधर्माद्यर्थंच ॥ ५ ॥

[पा०] १ ङ. ज. झ. प्रवेश्यास्मै. २ इदमर्धं ख. घ. दृश्यते. ३ घ. सहतत्पुरे. ख. सहसत्कृतः. ४ ख. ङ. झ. कथयामासबुद्धिमान्. ५ क. ग. घ. ज. नाम्नादशरथोनाम. ङ. च. छ. झ. नाम्नादशरथोराजा. ६ ख. घ. ङ. छ. प्रतिश्रवाः. ग. प्रतिश्रयः. ७ ख. ग. पुत्रस्त्वङ्गाधिराजस्य. क. सपुत्रस्त्वंगराजस्य. ८ ख. इतिस्मृतः. ९ क.—छ. तंसराजादशरथो. १० ख. घ. झ. महारथः. ११ क. ग. घ. छ. धर्मात्मा. १२ घ. महाक्रतुम्.

श्रुत्वा राज्ञोथ तद्वाक्यं मनसा स विचिन्त्य च ॥ प्रदास्यते पुत्रवन्तं शान्ताभर्तारमात्मवान् ॥ ६ ॥
प्रतिगृह्य च तं विप्रं स राजा विगतज्वरः ॥ आहरिष्यति तं यज्ञं प्रहृष्टेनान्तरात्मना ॥ ७ ॥
तं[1] च राजा दशरथो य[2]ष्टुकामः कृताञ्जलिः ॥ ऋश्यशृङ्गं द्विजश्रेष्ठं वरयिष्यति धर्मवित् ॥ ८ ॥
यज्ञार्थं प्रसवार्थं च स्वर्गार्थं च [3]जनेश्वरः ॥ लभते च स तं कामं वि[4]प्रमुख्याद्विशांपतिः ॥ ९ ॥
पुत्राश्चास्य भविष्यन्ति चत्वारोऽमितविक्रमाः ॥ वंशप्रतिष्ठानकराः स[5]र्वलोकेषु विश्रुताः ॥ १० ॥
एवं स देवप्रवरः पूर्वं कथितवान्कथाम् ॥ सनत्कुमारो भगवान्पुरा देवयुगे प्रभुः ॥ ११ ॥
स त्वं पुरुषशार्दूल [6]तमानय सुसत्कृतम् ॥ स्वयमेव [7]च राजेन्द्र गत्वा सबलवाहनः ॥ १२ ॥
[सु[8]मन्त्रस्य वचः श्रुत्वा हृष्टो दशरथोऽभवत् ।] ॥ १३ ॥
अनुमान्य [9]वसिष्ठं च सूतवाक्यं नि[10]शम्य च ॥ [[11]वसिष्ठेनाभ्यनुज्ञातो राजा संपूर्णमानसः] ॥
सान्तःपुरः सहामात्यः प्रययौ यत्र स द्विजः ॥ १४ ॥
वनानि सरितश्चैव व्यतिक्रम्य शनैः शनैः ॥ अभिचक्राम तं देशं यत्र वै मुनिपुंगवः ॥ १५ ॥
आसाद्य तं द्विजश्रेष्ठं रोमपाद[12]समीपगम् ॥ [13]ऋषिपुत्रं द[14]दर्शादौ दीप्यमानमिवानलम् ॥ १६ ॥
ततो राजा यथान्यायं पूजां चक्रे विशेषतः ॥ सखित्वात्तस्य वै राज्ञः प्रहृष्टेनान्तरात्मना ॥ १७ ॥

अविच्छेदार्थं । शान्ताभर्ता । क्रतुं आहरेत अनुतिष्ठतु । इति वक्ष्यतीतिशेषः ॥ ५ ॥ सः रोमपादः । मनसा विचिन्त्य । नतुमन्त्रिभिः । पुत्रवन्तं पुत्रप्रदानसमर्थं पुत्रयुक्तंवा ॥ ६ ॥ आहरिष्यति करिष्यतीत्यर्थः । अन्तरात्मना मनसा । उपलक्षितः ॥ ७ ॥ तस्मिन्यज्ञेतमेवऋत्विजंकरिष्यतीत्याह—तंचेति श्लोकद्वयमेकवाक्यं । यष्टुंकामोयस्यसयष्टुकामः । “लुंपेदवश्यमः कृत्येतुंकाममनसोरपि” इतिमकारलोपः । एवंभूतो राजा तंवरयिष्यति । वरोवरणं “तत्करोति”इतिणिच् । अल्लोपस्यस्थानिवत्त्वाद्वृद्ध्यभावः ॥ ८ ॥ किमर्थं यज्ञार्थं पुत्रकामेष्ट्यर्थं तद्वारा प्रसवार्थं पुत्रार्थं तद्वारा स्वर्गार्थं । “नापुत्रस्य लोकोस्ति” इतिश्रुतेः । कामं काम्यक्रतुं ॥९॥ अमितविक्रमाः अपरिच्छिन्नपराक्रमाः ॥ १० ॥ पूर्वं पूर्वकाले । विभक्तिप्रतिरूपकमव्ययं । पुरा पुराणः । देवयुगे कृतयुगे । यद्वा हेदेव पुरायुगे कृतयुगइत्यर्थः ॥११॥ स त्वं पुत्रार्थी त्वं । सुसत्कृतं सुसत्कारार्हं स्वयमेव नतुपुरोहितादिद्वारा ॥ १२ ॥ १३ ॥ अनुमान्य कृतानुमतिकं कृत्वा । अन्यथा मयिस्थितेकथमयमन्यमाह्वयतीतिवसिष्ठःकुप्येत् । अतः सुमन्त्रोक्तकथोक्तिपूर्वकमनुमान्येत्यर्थः । “ अनुमान्यवसिष्ठंचसूतवाक्यंनिशम्यचेतिवचनभङ्ग्या पुनर्वसिष्ठसन्निधौसाकथाप्रस्ताविता सुमन्त्रमुखेनैवेतिगम्यते । अतोवसिष्ठेनानुमतिःकृतेतिमन्तव्यं । सान्तःपुरतयागमनं जामातुरुपलालनरीत्याशान्तयासहानयनार्थं । यत्र रोमपादनगरे ॥ १४ ॥ वनादिविलोकनकुतुकित्वं शनैःशनैरित्यनेनद्योत्यते ॥ १५ ॥ तंदेशमासाद्य तमृषिपुत्रं । आदौ रोमपाददर्शनात्पूर्वं । ददर्श । तस्मिन्भक्त्यतिशयद्योतनार्थं ॥ १६ ॥ राजा रोमपादः । राज्ञः

ति० पुत्रवन्तमित्यनेन । “जातपुत्रःकृष्णकेशोऽग्नीनादधीत” इतिविध्युक्ताग्न्याधानादिकारित्वंसूचितं । तेनाहिताग्नित्वेनार्त्विज्याधिकारस्तस्यसूचितः । शान्ताभर्तारमित्यनेन शान्तासाहित्यमपिसूचितं ॥ ६ ॥ **शि०** स्वर्गार्थं रावणोपद्रुतस्वर्गादिस्वास्थ्यार्थंच वरयिष्यति ॥ ९ ॥ **ति०** पुरादेवयुगे एतच्चतुर्युगीप्राक्तनचतुर्युग्याद्ये सत्ययुगइत्यर्थः ॥ ११ ॥ **ति०** अनुमतौहेतुः सूतवाक्यंनिशाम्येति । श्रावयित्वेत्यर्थः ॥ १४ ॥ **शि०** वैशब्दः यथायोग्यावान्तरदेशनिवाससूचकः ॥ १५ ॥

[पा०] १ ख. सचराजा. २ क. ग—झ. यशस्कामः. ३ क. ख. ग. ङ—झ. नरेश्वरः. ४ क—झ. द्विजमुख्याद्वि. ५ ङ. झ. सर्वभूतेषु. ६ क. ङ. च. छ. झ. समानय. ७ क—छ. झ. महाराज. ८ इदमर्धं ङ. च. छ. झ. ञ. दृश्यते. ९ ङ. वरिष्ठंच. १० झ. निशाम्यच. ११ इदमर्धं ञ. दृश्यते. १२ ख. समन्वितम्. १३ ञ. ऋषेःपुत्रं. १४ ङ. च. छ. झ. ददर्शाथो.

रोमपादेन चाख्यातमृषिपुत्राय धीमते ॥ सख्यं संबन्धकं चैव तदा तं प्रत्यपूजयत् ॥ १८ ॥
एवं सुसत्कृतस्तेन सहोषित्वा नरर्षभः ॥ सप्ताष्टदिवसान्राजा राजानमिदमब्रवीत् ॥ १९ ॥
शान्ता तव सुता राजन्सह भर्त्रा विशां पते ॥ मदीयं नगरं यातु कार्यं हि महदुद्यतम् ॥ २० ॥
तथेति राजा संश्रुत्य गमनं तस्य धीमतः ॥ उवाच वचनं विप्रं गच्छ त्वं सह भार्यया ॥ २१ ॥
ऋषिपुत्रः प्रतिश्रुत्य तथेत्याह नृपं तदा ॥ स नृपेणाभ्यनुज्ञातः प्रययौ सह भार्यया ॥ २२ ॥
तावन्योन्याञ्जलिं कृत्वा स्नेहात्संश्लिष्य चोरसा ॥ ननन्दतुर्दशरथो रोमपादश्च वीर्यवान् ॥ २३ ॥
ततः सुहृदमापृच्छ्य प्रस्थितो रघुनन्दनः ॥ पौरेभ्यः प्रेषयामास दूतान्वै शीघ्रगामिनः ॥ २४ ॥
क्रियतां नगरं सर्वं क्षिप्रमेव स्वलंकृतम् ॥ धूपितं सिक्तसंमृष्टं पताकाभिरलंकृतम् ॥ २५ ॥
ततः प्रहृष्टाः पौरास्ते श्रुत्वा राजानमागतम् ॥ तथा प्रचक्रुस्तत्सर्वं राज्ञा यत्प्रेषितं तदा ॥ २६ ॥
ततः स्वलंकृतं राजा नगरं प्रविवेश ह ॥ शङ्खदुन्दुभिनिर्घोषैः पुरस्कृत्य द्विजर्षभम् ॥ २७ ॥
ततः प्रमुदिताः सर्वे दृष्ट्वा तं नागरा द्विजम् ॥ प्रवेश्यमानं सत्कृत्य नरेन्द्रेणेन्द्रकर्मणा ॥
[यथा दिवि सुरेन्द्रेण सहस्राक्षेण काश्यपम्] ॥ २८ ॥
अन्तःपुरं प्रवेश्यैनं पूजां कृत्वा विधानतः ॥ कृतकृत्यं तदाऽऽत्मानं मेने तस्योपवाहनात् ॥ २९ ॥
अन्तःपुरस्त्रियः सर्वाः शान्तां दृष्ट्वा तथाऽऽगताम् ॥ सह भर्त्रा विशालाक्षीं प्रीत्यानन्दमुपागमन् ॥ ३० ॥
पूज्यमाना च ताभिः सा राज्ञा चैव विशेषतः ॥ उवास तत्र सुखिता कंचित्कालं सहर्त्विजा ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकादशः सर्गः ॥ ११ ॥

दशरथस्य ॥ १७ ॥ संबन्धकं शान्तायाजनकपितृत्वरूपसंबन्धं । प्रत्यपूजयत् ऋश्यशृङ्गइतिशेषः ॥ १८ ॥ तेन रोमपादेन । सप्ताष्टेति लोकवचनपरिपाटी संख्यानियमोपेक्षाकृता ॥ १९ ॥ उद्यतं उद्युक्तं ॥ २० ॥ तस्य ऋश्यशृङ्गस्य । गमनं संश्रुत्य प्रतिज्ञाय ॥ २१ ॥ प्रतिश्रुत्य आकर्ण्य । नृपं रोमपादं ॥ २२ ॥ अन्योन्यमञ्जलिमित्यर्थः ॥ २३ ॥ सुहृदं रोमपादं ॥ २४ ॥ सिक्तंचसंमृष्टंचसिक्तसंमृष्टं । "पूर्वकाल–" इत्यादिनासमासः । स्वलंकृतं पुष्पकदलीकाण्डादिभिः ॥ २५ ॥ आगतं आगतप्रायं । राज्ञा यद्यथाप्रेषितं तत्तथा । तदा श्रवणकालएव चक्रुः ॥ २६ ॥ द्विजर्षभंपुरस्कृत्य शङ्खदुन्दुभिनिर्घोषैःसह प्रविवेश ॥ २७ ॥ नागराः नगरवासिनः । नरेन्द्रेण दशरथेन । सत्कृत्य नगरालङ्कारादिभिःसंमान्य । प्रवेश्यमानंतंद्विजंदृष्ट्वा । प्रमुदिताः संतुष्टाः । आसन् । इन्द्रस्येव कर्म पराक्रमादिकं यस्यसः इन्द्रकर्मा तेन ॥ २८ ॥ उपवाहनात् आनयनात् ॥ २९ ॥ भर्त्रासहागतां । अनेन पूर्वंकन्यात्वदशायामपिकदाचिदागमनं व्यज्यते ॥ ३० ॥ विशेषतः जनकत्वसंबन्धात् । ऋत्विजा ऋश्यशृङ्गेण । पितृगृहत्वात् शान्तायाःप्राधान्यं ॥ ३१ ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकादशःसर्गः ॥ ११ ॥

शि० संबन्धकं शान्ताजनकत्वेनतच्छ्वशुरत्वं । "अनेनमेऽनपत्यायदत्तेयंवरवर्णिनी । याचतेपुत्रतुल्यैषाशान्ताप्रियतरात्मजा । सोयंतेश्वशुरोब्रह्मन्यथैवाहंतथानृपः" इतिपौराणिकीगाथा ॥ १८ ॥ ति० सहद्विजा सभर्तृपुत्रकेतियावत् ॥ ३१ ॥ इत्येकादशस्सर्गः ॥ ११ ॥

[पा०] १ ख. ततस्तं. २ ङ. झ. पौरेषु. ३ ङ. झ. चक्रुश्चतत्सर्वं. ४ ख. यत्प्रेरितं. ५ ङ. झ. निर्ह्रादैः. ६ ङ. झ. दृष्ट्वैवं. ७ इदमर्धं ज. दृश्यते. ८ ख—झ. कृताचशान्ततः. ९ क—झ. अन्तःपुराणिसर्वाणि. १० क—झ. सहद्विजा.

द्वादशः सर्गः ॥ १२ ॥

दशरथेनशिरसाप्रसादनपूर्वकमृश्यशृङ्गस्ययज्ञार्थंवरणम् ॥ १ ॥ तथासुमन्त्रेणसुयज्ञाद्यानयनपूर्वकंतदनुमत्यामन्त्रिणांसंभारसंभरणाश्वमोचनादिचोदना ॥ २ ॥ मन्त्रिभिरश्वमोचनपूर्वकंसंभारसंभरणाद्युद्यमनम् ॥ ३ ॥

ततः काले बहुतिथे कस्मिंश्चित्सुमनोहरे ॥ वसन्ते समनुप्राप्ते राज्ञो यष्टुं मनोऽभवत् ॥ १ ॥
ततः प्रसाद्य शिरसा तं विप्रं देववर्णिनम् ॥ यज्ञाय वरयामास सन्तानार्थं कुलस्य वै ॥ २ ॥
तथेति च स राजानमुवाच च सुसत्कृतः ॥ संभाराः संभ्रियन्तां ते तुरगश्च विमुच्यताम् ॥
[सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्] ॥ ३ ॥
ततो राजाऽब्रवीद्वाक्यं सुमन्त्रं मन्त्रिसत्तमम् ॥ सुमन्त्रावाहय क्षिप्रमृत्विजो ब्रह्मवादिनः ॥ ४ ॥
सुयज्ञं वामदेवं च जाबालिमथ काश्यपम् ॥ पुरोहितं वसिष्ठं च येचाप्यन्ये द्विजातयः ॥ ५ ॥
ततः सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः ॥ समानयत्स तान्सर्वान्समर्थान्वेदपारगान् ॥ ६ ॥
तान्पूजयित्वा धर्मात्मा राजा दशरथस्तदा ॥ धर्मार्थसहितं युक्तं श्लक्ष्णं वचनमब्रवीत् ॥ ७ ॥

एवंदशरथःसर्वकामसमृद्धोपिपुत्रालाभसंतप्तस्तन्मूलानिपापानिस्वाधिकारानुरूपेणाश्वमेधेनविनानविनश्यन्तीतिमन्वानः "सर्वंपाप्मानंतरति तरतिब्रह्महत्यांयोश्वमेधेनयजते" इतिश्रुत्या "राजसार्वभौमोश्वमेधेनयजेत" इतिस्मृत्याच विहितमश्वमेधं यष्टुंसंकल्प्य तदानीमुद्बुद्धसंस्कारेणसुमन्त्रेणोदीरितवचनाज्जामात्रुपलालनव्याजेन शान्तयासहऋश्यशृङ्गमानीय प्राप्तकालेपूर्वसंकल्पितमश्वमेधंकर्तुमारभतेत्याह—ततःकालइत्यादि । ततः ऋश्यशृङ्गानयनानन्तरं । बहुतिथे अनल्पे । काले । गते । संख्यासंज्ञाद्बहुशब्दात् पूरणार्थेडटि "बहुपूगगणसंघस्यतिथुक्" इति तिथुगागमः । कस्मिंश्चित् मलिम्लुचत्वादिदोषरहिततया विलक्षणे । सुमनोहरे पौर्णमास्याःकालत्वेनातिमनोज्ञे । वसन्ते । समनुप्राप्ते प्रारब्धे । चैत्र्यांपौर्णमास्यामित्यर्थः । राज्ञः दशरथस्य । यष्टुं सांग्रहणीमिष्टिंकर्तुं । मनः मनोरथः । अभूत् । "चैत्र्यांपौर्णमास्यांप्रातरश्वमेधेनयक्ष्येइतिसंकल्प्यसांग्रहण्येष्ट्यायजत" इतिस्मरणात् ॥ १ ॥ अथसांग्रहणीमिष्टिंकर्तुमृत्विग्वरणेप्राप्ते प्रथममृश्यशृङ्गंब्रह्मत्वेन वृतवानित्याह—ततइति । देववर्णिनं देववर्चसं ॥ २ ॥ सच ऋश्यशृङ्गश्च ॥३॥ अथ "अपदातीनृत्विजःसमावहन्त्यासुब्रह्मण्यायाः" इतिविहितमध्वर्युप्रभृतिवरणमाह—ततइत्यादिना । अस्याःश्रुतेरयमर्थः । तस्यतस्यगृहेगत्वासोमप्रवाकवृतानध्वर्युब्रह्महोतॄनाग्नीध्रंच हस्त्यश्वादिकमारोप्य राजगृहमानयन्तिराजपुरुषाः । अनन्तरायाममावास्यायां पूर्ववृताएवते संज्ञानेष्ट्यर्थंपुनर्व्रियन्ते । अथवैशाख्यांपौर्णमास्यांप्राजापत्यर्षभपश्वर्थंपूर्ववत्सोमप्रवाकवृतौमैत्रावरुणप्रतिप्रस्थातारौहस्त्यादिकमारोप्यानयन्तिराजपुरुषाः । अनन्तरायाममावास्यायांतथैववृतमुद्गातारंहस्त्यादिभिरानयन्ति । अथागामिनिवसन्तेपश्चदश्यांहस्त्यादिभिःप्रस्तोतारमानयन्ति । त्रैधातवीयार्थंयत्रदीक्षारंभस्तद्दिवसादूर्ध्वंतृतीयादिष्वहस्स्वन्वहमितरानष्टावृत्विजोहस्त्यादिकमारोप्यानयन्ति । ब्राह्मणाच्छंसिनमच्छावाकंनेष्टारंप्रतिहर्तारंग्रावस्तुतंपोतारंउन्नेतारंसुब्रह्मण्यमितिसोमार्थं । एवमासुब्रह्मण्याह्वानादपदातीनृत्विजआवहन्तीति । एवं क्रमेणकर्तव्यानिऋत्विग्वरणानि कार्यकरत्वात्संग्रहेणदर्शयति—सुमन्त्रावाहयेति । आवाहय आनय । ऋतौयजन्तीतिऋत्विजः । ब्रह्मवादिनः वेदपाठकान् ॥ ४ ॥ ऋत्विजःपरिगणयति—सुयज्ञमिति ॥ ५ ॥ त्वरितविक्रमः त्वरितपदन्यासः ॥ ६ ॥ धर्मार्थसहितं धर्मार्थरूपप्रयोजनसहितं... वि॰ युक्तंयथार्थं ॥ ७ ॥

[पा॰] १ ख. ज. मनोगतम्. २ ङ. च. छ. झ. प्रणम्य. ३ ज. यज्ञार्थं. ४ ख. ङ. झ. कुलस्यच. ५ ज. मुवाचेदं. ६ ङ. च. छ. झ. वसुधाधिपम्. ख. ग. ज. चसुसत्कृतम्. ७ इदमर्धं क—ट. दृश्यते. ८ ङ. ततोब्रवीन्नृपोवाक्यं. झ. नृपोवाक्यंब्राह्मणान्वेदपारगान्. ख. घ. ततोराजाब्रवीत्सूतंब्राह्मणान्वेदपारगान. ९ ख. ग. ङ. च. झ. येचान्येद्विजसत्तमाः. ज. येचान्येच. १० घ. ज. स्त्वरितो. ११ क—झ. समस्तान्वेद. ज. सतान्विप्रान्समस्तान्वै. १२ ख. दशरथोबली.

मम लालप्यमानस्य पुत्रार्थं नास्ति वै सुखम् ॥ तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम ॥ ८ ॥
तदहं यष्टुमिच्छामि शास्त्रदृष्टेन कर्मणा ॥ ऋषिपुत्रप्रभावेन कामान्प्राप्स्यामि चाप्यहम् ॥ ९ ॥
ततः साध्विति तद्वाक्यं ब्राह्मणाः प्रत्यपूजयन् ॥ वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखाच्च्युतम् ॥१०॥
ऋश्यशृङ्गपुरोगाश्च प्रत्यूचुर्नृपतिं तदा ॥ संभाराः संभ्रियन्तां ते तुरगश्च विमुच्यताम् ॥
[सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्] ॥ ११ ॥
सर्वथा प्राप्स्यसे पुत्रांश्चतुरोऽमितविक्रमान् ॥ यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता ॥ १२ ॥
ततः प्रीतोऽभवद्राजा श्रुत्वा तु द्विजभाषितम् ॥ अमात्यांश्चाब्रवीद्राजा हर्षेणेदं शुभाक्षरम् ॥१३॥
गुरूणां वचनाच्छीघ्रं संभारास्संभ्रियन्तु मे ॥ समर्थाधिष्ठितश्चाश्वस्सोपाध्यायो विमुच्यताम् ॥१४॥
सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् ॥ शान्तयश्चाभिवर्धन्तां यथाकल्पं यथाविधि ॥ १५ ॥
शक्यः कर्तुमयं यज्ञस्सर्वेणापि महीक्षिता ॥ नापराधो भवेत्कष्टो यद्यस्मिन्क्रतुसत्तमे ॥ १६ ॥
छिद्रं हि मृगयन्तेऽत्र विद्वांसो ब्रह्मराक्षसाः ॥ [13]विघ्नितस्य हि यज्ञस्य सद्यः कर्ता विनश्यति॥१७॥
तद्यथा विधिपूर्वं मे क्रतुरेष समाप्यते ॥ तथा विधानं क्रियतां समर्थाः करणेष्विह ॥ १८ ॥
तथेति च ततः सर्वे मन्त्रिणः प्रत्यपूजयन् ॥ पार्थिवेन्द्रस्य तद्वाक्यं यथाज्ञप्तमकुर्वत ॥ १९ ॥
ततो द्विजास्ते धर्मज्ञमस्तुवन्पार्थिवर्षभम् ॥ अनुज्ञातास्ततः सर्वे पुनर्जग्मुर्यथागतम् ॥ २० ॥

योजनयुक्तं । श्लक्ष्णं मधुरं ॥ ७ ॥ ८ ॥ यष्टुमिच्छामि प्रतिबन्धकदुरितशान्त्यर्थं । ऋषिपुत्रप्रभावेन ऋश्यशृङ्गकृतयज्ञप्रभावेन । पश्चात् कामान् पुत्रान् प्राप्स्यामिच ॥ ९ ॥ ऋश्यशृङ्गश्लाघागर्भत्वाद्वसिष्ठप्रमुखाइत्युक्तं ॥ १०॥ ११ ॥ सनत्कुमारवचश्रवणाच्चतुरइत्युक्तं ॥ १२ ॥ क्रियाभेदान्नराजपदपुनरुक्तिः ॥ १३ ॥ संभ्रियन्तु संभ्रियन्तां । आर्षपरस्मैपदं । अत्रसंभाराः यज्ञीयाश्वमोचनोपकरणानि । "द्वादशारत्नीरशनाभवति"इत्युक्त्या द्वादशारत्निपरिमिता मुञ्जाख्यतृणविशेषनिर्मितारशना "चतुष्टय्यआपोभवन्ति"इत्यनुवाकोक्ताः आतपतिवर्ष्याःकूप्याःस्थावरावहन्त्यश्चेतिचतुर्विधाआपइत्यादीनि । समर्थैः "चतुःशतारक्षन्ति"इतिश्रूयमाणैराजपुत्राद्यैः । अधिष्ठितः रक्षितः । सोपाध्यायः उपाध्यायैश्चतुर्भिःऋत्विग्भिः सहितः । अश्वोविमुच्यतां । "चत्वारऋत्विजःसमुक्षन्तीत्यारभ्य शतेनराजपुत्रैःसहअध्वर्युः शतेनाराजभिरुग्रैःसहब्रह्माशतेनसूतग्रामणीभिःसहहोताशतेनक्षत्रसंग्रहीतृभिःसहोद्गाता"इतिश्रुतेः । संगृहीतंचभट्टभास्करैः । "सन्नाहवन्तःक्षितिपालपुत्राःसन्नद्धसूताःशतमस्यतल्प्याः । गोपायितारःशतमेवमुग्राःसन्नाहिनस्ताद्दशसूनुयुक्ताः । वैश्याःशतंप्रान्तचराःपथिस्युर्वरूथिनस्तैःशतमेवशूद्राः"इति ॥ १४ ॥ अथ "पुण्यनामदेवयजनमध्यवस्यति"इत्युक्तरीत्या यागार्हपुण्यस्थलपरिग्रहंदर्शयति—सरय्वाइति । उत्तरं विविक्तमितितत्परिग्रहः । शान्तयः शान्तिकर्माणि । अभिवर्धन्तां प्रवर्तन्तां । यथाकल्पं यथाक्रमं । यथाविधि यथाशास्त्रं ॥ १५ ॥ कष्टः क्लेशकरः ॥ १६ ॥ छिद्रं अपराधमित्यर्थः ॥ १७॥ यथेतिच्छेदः ॥ १८ ॥ अकुर्वत साङ्ग्रहणेष्टिप्रभृत्यश्वविमोचनान्तमकुर्वन्नित्यर्थः ॥ १९ ॥ अनुज्ञाताः तेनेतिशेषः ॥ २० ॥

वि० अनुष्ठानारंभायपुनरुपन्यस्यति । ममलालप्यमानस्येति ॥ ८ ॥ शि० ऋषिपुत्रस्य ऋश्यशृङ्गस्य प्रभावेण । रामसाक्षात्कारजनिततेजसा अहंकामान्प्राप्स्याम्येव । अपिना देवकार्यसिद्धिश्चभविष्यति । चशब्दएवार्थे ॥ ९ ॥ शि० धार्मिकी प्रजासंरक्षणरूपधर्मप्रयोजना ॥ १२ ॥

[पा०] १ ङ. झ. तातप्यमानस्य. २ ज. सुतार्थं. ३ क. ग. ङ. झ. पुत्रार्थंहय. ४ क. ख. घ. ङ—झ. हयमेधेनकर्मणा- ५ इदमर्धं क—ट. दृश्यते. ६ क—घ. तद्विजभाषितम्. ७ ङ—झ. त्यानब्रवी. ज. श्चाब्रवीत्तत्र. ८ ग. घ. छ. शान्तयश्चापि. ९ घ. यथाशास्त्रं. १० ग. घ. शक्यंकर्तुमयं. ख. शक्यःप्राप्तु. ११ ख. सर्वेणैव. १२ ङ. झ. मृगयन्त्येते. १३ ङ. च. छ. विधिहीनस्ययज्ञस्य. ख. निहतस्य. ग. विहतस्य. १४ छ. पूर्वंवै. १५ ग. करणेष्वपि. १६ ङ. द्विजास्तं.

गतेष्वथ द्विजाग्र्येषु मन्त्रिणस्तान्नराधिपः ॥ विसर्जयित्वा स्वं वेश्म प्रविवेश महाद्युतिः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ॥ १३ ॥

दशरथेनसप्रार्थनंवसिष्ठेयागीयसकलकार्यभारसमारोपणम् ॥१॥ वसिष्ठेनयागीयसकलकार्येषुसमुचितजननियोजनपूर्वकंसुमन्त्रंप्रतिनानादेशीयराजानयनादिनियोजनम् ॥२॥ दशरथेनवसिष्ठऋश्यशृङ्गानुज्ञयासर्वैःसहशुभमुहूर्तेयज्ञशालाप्रवेशः ॥३॥

पुनः प्राप्ते वसन्ते तु पूर्णः संवत्सरोऽभवत् ॥ प्रसवार्थं गतो यष्टुं हयमेधेन वीर्यवान् ॥ १ ॥
अभिवाद्य वसिष्ठं च न्यायतः प्रतिपूज्य च ॥ अब्रवीत्प्रश्रितं वाक्यं प्रसवार्थं द्विजोत्तमम् ॥
यज्ञो मे क्रियतां विप्र यथोक्तं मुनिपुङ्गव ॥ २ ॥
यथा न विघ्नः क्रियते यज्ञाङ्गेषु विधीयताम् ॥ ३ ॥
भवान्स्निग्धः सुहृन्मह्यं गुरुश्च परमो महान् ॥ वोढव्यो भवता चैव भारो यज्ञस्य चोद्यतः ॥ ४ ॥

स्वंवेश्म । अग्निगृहादन्तःपुरमित्यर्थः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्वादशःसर्गः॥१२॥

एवंप्रथमवसन्तेचैत्रपौर्णमास्यांसांग्रहणेष्टिंविधाय द्वितीयेह्नित्रह्मौदनमेध्याश्वबन्धनस्नापनप्रोक्षणविमोचनादिकं "चत्वारऋत्विजःसमुक्षन्ति" इत्युक्तरीत्याकृत्वा "सावित्रमष्टाकपालंप्रातर्निर्वपति"इत्युक्तरीत्याप्रतिदिनंसावित्रादिषुकर्मस्वनुष्ठीयमानेषु संवत्सरेपूर्णे देवयजनंप्रतिप्रस्थानं दर्शयतित्रयोदशे—पुनःप्राप्तइत्यादि । पुनर्वसन्ते द्वितीयवसन्ते । प्राप्ते । संवत्सरः पूर्णोऽभवत् । अमावास्याप्राप्तेत्यर्थः । तत्र भाविन्यां पौर्णमास्यां प्रसवार्थं । हयमेधेनयष्टुं हयमेधाख्यंयज्ञंकर्तुं । गतः देवयजनमितिशेषः । प्रथमसंवत्सरान्तिमावास्यायांउखासंभरणत्रैधातवीयदीक्षणीयादिकं देवयजनएवह्निकर्तव्यं । यथोक्तंभास्करैः "संवत्सरस्यास्यतुयाऽन्तिमामावास्याविधेयामिहदीक्षणीयां।त्रैधातवीयांप्रवदन्तिसप्तदिनानिदीक्षाहुतयस्तथाष्टौ" इति ॥ १ ॥ एवमेतत्सर्गप्रतिपाद्यंदेवयजनगमनंसंग्रहेणोक्त्वा पुनस्तद्विस्तरेणवक्तुमुपक्रमते सर्गशेषेण। तत्रब्रह्मौदनमारभ्य यावदश्वमेधसमाप्ति यजमानस्यस्वातन्त्र्यप्रतिषेधेन स्वयंयज्ञोपकरणसंपादनाद्ययोगादध्वर्युणैवतस्यसर्वस्यकर्तव्यत्वादध्वर्युत्वेनवृतंवसिष्ठंप्रतिप्रार्थयते—अभिवाद्येत्यादिना । तदुक्तंभट्टभास्करैः "रशनाञ्जनतःपश्चादध्वर्युःपरिवीयते । राज्यायसचराजास्याद्यावत्सन्तिष्ठतेक्रतुः" इति । येयं "द्वादशारत्नीरशनाभवतिमौञ्जीभवति" इत्यश्वबन्धनरज्जुर्विहिता तस्याः "यदाज्यमुच्छिष्यतेतस्मिन्रशनान्युनक्ति" इतियद्ब्रह्मौदनशिष्टाज्येनाभ्यञ्जनंविहितं ततःपश्चादित्यर्थः । अर्धत्रयमेकान्वयं । वसिष्ठंअभिवाद्यच । न्यायतः शास्त्रतः । प्रतिपूज्यच । प्रश्रितं विनययुक्तं । वाक्यं अब्रवीत् । कथं।प्रसवार्थं पुत्रार्थं । आरब्धोमेयज्ञः । यथोक्तं शास्त्रोक्तमनतिक्रम्य। क्रियताम्॥२॥ यज्ञाङ्गेषु द्रव्यदेवताकर्मादिरूपेषु । यथाविघ्नोनक्रियते राक्षसैरितिशेषः । तथा क्रियतामित्यर्थः ॥ ३ ॥ भवान् मह्यं स्निग्धः अविच्छिन्नस्नेहः । सुहृत् । परमः

ति० सप्तम्यर्थेषष्ठी । गतेषुद्विजातिष्वित्यर्थः । विसर्जयित्वा संप्रेष्य । संवत्सरान्तेयागार्थमितिशेषः । ल्यबभावआर्षः ॥२१॥ इतिद्वादशस्सर्गः ॥ १२ ॥

ती० प्रसवार्थं प्रसवफलंभावयितुं । गतः गन्तुमुपक्रान्तः । ति० "संवत्सरान्तेदीक्षेत"इतिसूत्रात्पूर्ववसन्तविसृष्टाश्वस्यपुनस्संवत्सरान्तेवसन्तेप्राप्तेदीक्षाप्रवृत्तिरुपदिश्यते । पुनरिति । प्रसवरूपफलंहयमेधेनभावयितुंगतः । वसिष्ठान्तिकमितिशेषः ॥ १ ॥ ति० वसिष्ठंच चादरुन्धतीं ॥ २ ॥ शि० चशब्दएवार्थे । अपरौचकारौहेत्वर्थे । स्निग्धःस्नेहविशिष्टःअतएवसुहृत् मह्यं ममपरमउत्कृष्टःगुरुः । अतएवमहान् सर्वपूज्यःभवानेव । अतोयज्ञस्यभारोभवतैववोढव्यइत्यर्थः ॥ ४ ॥

१ ख. घ. ङ. गतेषुतेषुविप्रेषु. क. ग. च. छ. ज. गतानांतुद्विजातीनां. झ. गतानांतेषुविप्रेषु. २ ङ. च. छ. झ. महामतिः. ३ ख. ग. ङ. च. छ. झ. क्रियतांब्रह्मन्. ४ ङ. झ. विघ्नाःक्रियन्ते. ५ क. घ. ङ. भवान्.

तथेति च स राजानमब्रवीद्द्विजसत्तमः ॥ करिष्ये सर्वमेवैतद्भवता यत्समर्थितम् ॥ ५ ॥
ततोऽब्रवीद्द्विजान्वृद्धान्यज्ञकर्मसु निष्ठितान् ॥ स्थापत्ये निष्ठितांश्चैव वृद्धान्परमधार्मिकान् ॥ ६ ॥
कर्मान्तिकाञ्शिल्पकरान्वर्धकीन्खनकानपि ॥ गणकाञ्शिल्पिनश्चैव तथैव नटनर्तकान् ॥
तथा शुचीञ्शास्त्रविदः पुरुषान्सुबहुश्रुतान् ॥ ७ ॥
यज्ञकर्म समीहन्तां भवन्तो राजशासनात् ॥ इष्टका बहुसाहस्री शीघ्रमानीयतामिति ॥ ८ ॥
औपकार्याः क्रियन्तां च राज्ञां बहुगुणान्विताः ॥ ब्राह्मणावसथाश्चैव कर्तव्याः शतशः शुभाः ॥९॥
भक्ष्यान्नपानैर्बहुभिः समुपेताः सुनिष्ठिताः ॥ तथा पौरजनस्यापि कर्तव्या बहुविस्तराः ॥ १० ॥
[आगतानां सुदूराच्च पार्थिवानां पृथक्पृथक् ॥ वाजिवारणशालाश्च तथा शय्यागृहाणि च ॥
भटानां महदावासा वैदेशिकनिवासिनाम्] ॥ ११ ॥
आवासा बहुभक्ष्या वै सर्वकामैरुपस्थिताः ॥ तथा जानपदस्यापि जनस्य बहु शोभनम् ॥ १२ ॥
दातव्यमन्नं विधिवत्सत्कृत्य न तु लीलया ॥ १३ ॥
सर्वेवर्णा यथा पूजां प्राप्नुवन्ति सुसत्कृताः ॥ न चावज्ञा प्रयोक्तव्या कामक्रोधवशादपि ॥ १४ ॥
यज्ञकर्मणि ये व्यग्राः पुरुषाः शिल्पिनस्तथा ॥ तेषामपि विशेषेण पूजा कार्या यथाक्रमम् ॥
ते च स्युः संभृताः सर्वे वसुभिर्भोजनेन च ॥ १५ ॥

वामदेवादिभ्यउत्कृष्टः । महान् वस्तुतोनिरुपमः । गुरुः । अतः उद्यतः उपक्रान्तः । यज्ञस्यभारोभवतैवबोढव्यः । चकारेणार्त्विज्यंचकर्तव्यंइत्युच्यते ॥४॥ समर्थितं सम्यक्प्रार्थितं ॥ ५ ॥ ततइतिसार्धश्लोकत्रयमेकान्वयं । यज्ञकर्मसु यज्ञप्रयोगेषु । स्थापत्ये तद्द्रव्यानयनस्वाम्ये । निष्ठितान् पूर्वंराज्ञानियुक्तान् ॥६॥ कर्मणामन्तःसमाप्तिः सएषामस्तीतिकर्मान्तिकाः।"अतइनिठनौ" इतिठन् भृतकानित्यर्थः । शिल्पकरान् इष्टकादिनिर्मातॄन् । वर्धकीन् तक्ष्णः । स्रुक्स्रुवचमसग्रहयूपादिनिर्मातॄन् । खनकान् वापीकूपादिकृतः । गणकान् लेखकान् । शिल्पिनः चित्रादिकरान् । नटाः रसाभिनयकृतः । नर्तकाः भावाभिनयकृतः । शास्त्रविदः प्रयोगशास्त्रविदः ॥ ७ ॥ अथाज्ञापनप्रकारमाहअष्टभिः—यज्ञकर्मेत्यादि । ऋत्विजःप्रत्याह यज्ञकर्मेति । समीहन्तां व्याप्रियन्तां । शिल्पकरान्प्रत्याह इष्टकेति । जात्येकवचनं । इत्यब्रवीदितिपूर्वेणान्वयः ॥ ८ ॥ औपकार्याः राजसदनानि । स्वार्थेष्यञ् । "राजसदनमुपकार्योपकारिका"इत्यमरः । बहुगुणान्विताः औन्नत्यविशालत्वादिबहुगुणान्विताः । ब्राह्मणावसथाइति आर्षोलिङ्गव्यत्ययः ॥ ९ ॥ कठिनफलादि भक्ष्यं । सुनिष्ठिताः वातवर्षादिभिरप्रकंप्याः ॥ १० ॥ सर्वकामैः स्रक्चन्दनादिभिः । उपस्थिताः संयुक्ताः । बहु अधिकं ॥ ११ ॥ विधिवत् यथाविधि । सत्कृत्य गन्धादिभिरभ्यर्च्य । लीलया अनादरेणेत्यर्थः ॥ १२ ॥ यथा पूजांप्राप्नुवन्ति तथाकर्तव्यमित्यर्थः ॥ १३ ॥ कामक्रोधवशात् स्नेहद्वेषवशात् । अपिशब्देन लीला समुच्चीयते ॥ १४ ॥ विशेषेण अत्यादरेणेत्यर्थः । यथाक्रमं यथावृद्धं । तेचेत्यत्र चश-

---

वि॰ स्थापत्यं स्थपतेःरथकारस्यकर्म । तत्रनिष्ठितान् प्रवीणान् ॥ ६ ॥ **ति॰** गणकान् ज्योतिर्विदः ॥ ७ ॥ **ती॰** बहुसाहस्राः बहुसहस्रसङ्ख्याकाः । आनीयतामितिव्यत्ययेनैकवचनम् ॥ ८ ॥ **शि॰** बहुगुणान्विताः अनेकविधान्नपानादियुक्ताएव ॥९॥ **ति॰** महदावासाइत्यत्रालाभावआर्षः । वैदेशिकनिवासिनां वैदेशिकानांस्वदेशनिवासिनांचेत्यर्थः ॥ ११ ॥ **ति॰** जनस्य इतरक्षुद्रजनस्यापि ॥ १२ ॥ **शि॰** तेषामपि । अपिशब्देनातिथ्यभ्यागतादिसंग्रहः ॥ १५ ॥

१ घ. पुरुषांश्च. २ क—घ. बहुसाहस्रा. च. छ. ज. बहुसाहस्राः. ३ झ. उपकार्याः. ४ ङ. ज. झ. राज्ञोबहु. ५ ख. समवेताः. ६ ङ. च. छ. कर्तव्याश्चसुविस्तराः. ७ घ. ङ. बहुशोभनाः. ८ इदमर्धत्रयं च. छ. झ. ञ. दृश्यते. ९ च. छ. झ. ञ. तथापौरजनस्यापि. १० ख. ग. ङ. ज. झ. सर्वेवर्णाः. ११ क—झ. यज्ञकर्मसु. १२ ङ. च. छ. झ. येस्युःसंपूजितास्सर्वे. क. तेस्युः. ग. घ. झ. तेचस्युःसुहृदः.

यथा सर्वं सुविहितं न किंचित्परिहीयते ॥ तथा भवन्तः कुर्वन्तु [1]प्रीतिस्निग्धेन चेतसा ॥ १६ ॥
ततः सर्वे समागम्य वसिष्ठमिदमब्रुवन् ॥ [2]यथोक्तं तत्सुविहितं न किंचित्परिहीयते ॥ १७ ॥
यथोक्तं तत्करिष्यामो न किंचित्परिहास्यते ॥ १८ ॥
ततः सुमन्त्र[3]मानीय वसिष्ठो वाक्यमब्रवीत् ॥ निमन्त्रयस्व नृपतीन्पृथिव्यां ये च धार्मिकाः ॥ १९ ॥
ब्राह्मणान्क्षत्रियान्वैश्याञ्शूद्रांश्चैव सहस्रशः ॥ [4]समानयस्व सत्कृत्य सर्वदेशेषु मानवान् ॥ २० ॥
मिथिलाधिपतिं [5]शूरं जनकं [6]सत्यविक्रमम् ॥ निष्ठितं सर्वशास्त्रेषु तथा वेदेषु निष्ठितम् ॥ २१ ॥
तमानय महाभागं स्वयमेव सुसत्कृतम् ॥ [7]पूर्वसंबन्धिनं ज्ञात्वा ततः पूर्वं ब्रवीमि ते ॥ २२ ॥
तथा काशीपतिं स्निग्धं सततं प्रियवादिनम् ॥ [8]वयस्यं राजसिंहस्य स्वयमेवानयस्व ह ॥ २३ ॥
तथा केकयराजानं वृद्धं परमधार्मिकम् ॥ श्वशुरं राजसिंहस्य सपुत्रं [9]त्वमिहानय ॥ २४ ॥
अङ्गेश्[10]वरं महाभागं रोमपादं सुसत्कृ[11]तम् ॥ वयस्यं राजसिंहस्य [12]समानय [13]यशस्विनम् ॥ २५ ॥
[[14]तथा कोसलराजानं भानुमन्तं सुसत्कृतम् ॥ मगधाधिपतिं शूरं सर्वशास्त्रविशारदम् ॥ २६ ॥
प्राप्तिज्ञं परमोदारं सत्कृतं पुरुषर्षभम् ॥ राज्ञश्शासन[15]मादाय चोदयस्व नृपर्षभान्] ॥ २७ ॥
प्राचीनान्सिन्धुसौवीरान्सौराष्ट्रेयांश्च पार्थिवान् ॥ दाक्षिणात्यान्नरेन्द्रांश्च समस्तानानयस्व ह ॥२८॥
सन्ति स्निग्धाश्च ये चान्ये राजानः पृथिवीतले ॥ तानानय यथाक्षिप्रं सानुगान्सहबान्धवान् ॥
[[16]एतान्दूतैर्महाभागैरानयस्व नृपाज्ञया] ॥ २९ ॥
वसिष्ठवाक्यं तच्छ्रुत्वा सुमन्त्रस्त्व[17]रितस्तदा ॥ व्यादिशत्पुरुषांस्तत्र राज्ञामानयने शुभान् ॥ ३० ॥
स्वयमेव हि धर्मा[18]त्मा प्रययौ मुनिशासनात् ॥ सुमन्त्रस्त्वरितो भूत्वा समानेतुं [19]महीक्षितः ॥३१॥

व्दोभिन्नक्रमः । ते भोजनेन वसुभिः धनैश्च । संभृताः तृप्ताश्चस्युः ॥ १५ ॥ सर्वमपि यथा सुविहितं सुष्ठुअनुष्ठितंस्यात् । किंचिदपि नपरिहीयते नत्यक्ष्यते । प्रीतिस्निग्धेन स्नेहार्द्रेण ॥ १६ ॥ यथोक्तप्रवृत्तिंदर्शयति—ततइति । तत् पूर्वोक्तकार्यजातं ॥१७॥ १८॥ एवमुपकरणनिष्पत्त्यनन्तरंराजाह्वानमाज्ञापयति—ततइत्यादिना । निमन्त्रयस्व आह्वय ॥ १९ ॥ सर्वदेशेषु स्थितानितिशेषः ॥२०॥ श्लोकद्वयमेकंवाक्यं । तं प्रसिद्धं । स्वयमेव नतुदूतमुखेन । पूर्वसंबन्धिनं चिरंतनसुहृदं । ततः पूर्वोक्तेभ्योनृपतिभ्यः ॥ २१ ॥ ॥ २२ ॥ स्वयमेवगमनेहेतवोविशेषणानि ॥ २३ ॥ केकयराजानमिति । समासान्तविधेरनित्यत्वाट्टजभावः ॥ २४ ॥ समानय त्वमेवेतिशेषः ॥ २५ ॥ २६- ॥ २७ ॥ प्राचीनान् प्राग्देशवर्तिनः । सिन्धुदेशेसौवीरदेशेचभवाः सिन्धुसौवीराः । सौराष्ट्रेयान् सुराष्ट्रदेशभवान् । दाक्षिणात्यान् दक्षिणदेशभवान् । आनयस्व दूतमुखेनेतिशेषः ॥ २८ ॥ यथाक्षिप्रं शैघ्र्यमनतिक्रम्य ॥२९॥ शुभान् अन्तरङ्गान् ॥३०॥ मही-

---

शि० सुविहितं वेदबोधितं । अतःकिंचिद्भवदुक्तंनपरिहीयते । **ति०** यत्त्वयोक्तंतद्यथोक्तं त्वदुक्तानतिक्रमेणसुविहितं । नकिंचित्तत्रलुप्यतइतिशेषः ॥१७॥ किंच उक्तं । भावेक्तः । वचनं यथाकथयिष्यसितत्तथैवकरिष्यामः । तत्रापिनकिंचिद्धीनंभविष्यति ॥ १८ ॥ **वि०** मानवान् चतुर्वर्णातिरिक्तान्संकरजातीयान् ॥ २० ॥ **ति०** मिथिलाधिपंस्वयमेवानयेतिसंबन्धः । नतुदूतमात्रप्रेषणेन । कुतएवंविशेषः कुतश्चतदानयनस्यप्रथममुपदेशस्तत्राह । पूर्वसंबन्धिनं पूर्वस्मिन्नेवकालेभाविनंसंबन्धिनं । तंयोगबलेनज्ञात्वा । ततोहेतोः भाविसंबन्धित्वाद्धेतोः । सर्वेभ्यः पूर्वं पूर्वकाले । तदानयनंब्रवीमीत्यर्थः ॥ २१ ॥ २२ ॥ **ति०** वसिष्ठेनविशिष्योक्तानितिशेषः ॥ ३१ ॥

[पा०] १ ङ. झ. प्रीतियुक्तेन. २ क. ङ. च. छ. झ. यथेष्टंतत्सुविहितं. ३ ख. ग. ङ. च. छ. झ. सुमन्त्रमाहूय. ४ क. ख. च. छ. समानयसुसत्कृत्य. ५ क. वीरं. ६ ग. ङ—झ. सत्यवादिनं. ७ झ. पूर्वसंबन्धिनं. ८ क—झ. सद्वृत्तंदेवसंकाशं. ९ क. ङ. च. ज. झ. तमिहानय. १० ङ. झ. श्वरंमहेष्वासं. च. छ. ज. श्वरंचराजानं. ११ च. ठ. समीपगम्. घ. सुधार्मिकम्. १२ ङ. झ. सपुत्रंतमिहानय. क—घ. तमानय. १३ घ. सुसत्कृतम्. १४ एतच्छ्लोकद्वयं ङ. च. छ. झ. ञ. दृश्यते. १५ ख. माज्ञाय. १६ इदमर्धं ङ. च. झ. दृश्यते. १७ ङ. च. छ. झ. स्त्वरितंतदा. १८ ख. ङ. ज. प्रयातो. १९ ङ. झ. महामतिः.

ते च कर्मान्तिकाः सर्वे वसिष्ठाय च धीमते ॥ सर्वं निवेदयन्ति स्म यज्ञे यदुपकल्पितम् ॥ ३२ ॥
ततः प्रीतो द्विजश्रेष्ठस्तान्सर्वान्पुनरब्रवीत् ॥ ३३ ॥
[भवद्भिर्न तथा यज्ञे परिहासेत कश्चन] ॥ अवज्ञया न दातव्यं कस्यचिल्लीलयापि वा ॥
अवज्ञया कृतं हन्याद्दातारं नात्र संशयः ॥ ३४ ॥
ततः कैश्चिदहोरात्रैरुपयाता महीक्षितः ॥ बहूनि रत्नान्यादाय राज्ञो दशरथस्य हि ॥ ३५ ॥
ततो वसिष्ठः सुप्रीतो राजानमिदमब्रवीत् ॥ उपयाता नरव्याघ्र राजानस्तव शासनात् ॥ ३६ ॥
मया च सत्कृताः सर्वे यथार्हं राजसत्तमाः ॥ यज्ञियं च कृतं राजन्पुरुषैः सुसमाहितैः ॥ ३७ ॥
निर्यातु च भवान्यष्टुं यज्ञायतनमन्तिकात् ॥ सर्वकामैरुपहृतैरुपेतं वै समन्ततः ॥ ३८ ॥
द्रष्टुमर्हसि राजेन्द्र मनसेव विनिर्मितम् ॥ ३९ ॥
तथा वसिष्ठवचनादृश्यशृङ्गस्य चोभयोः ॥ शुभे दिवसनक्षत्रे निर्यातो जगतीपतिः ॥ ४० ॥
ततो वसिष्ठप्रमुखाः सर्वएव द्विजोत्तमाः ॥ ऋश्यशृङ्गं पुरस्कृत्य यज्ञकर्मारभंस्तदा ॥
यज्ञवाटगताः सर्वे यथाशास्त्रं यथाविधि ॥ ४१ ॥
[श्रीमांश्च सह पत्नीभी राजा दीक्षामुपाविशत्] ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

क्षितः वसिष्ठेनविशिष्योक्तान् ॥ ३१ ॥ तेचेति । उपलक्षणमेतच्छिल्पकरादीनां । यज्ञे यज्ञनिमित्तं । यत् उपकल्पितं निर्मितं । तत्सर्वंनिवेदयन्तिस्म ॥३२॥ अवश्यंशिक्षणीयांशंपुनःशिक्षयति—ततःप्रीतइति । अर्धमेकान्वयम् ॥ ३३ ॥ लीलया विनोदेन ॥३४॥ ततः दशरथनिर्गमनानन्तरं । रत्नानि श्रेष्ठवस्तूनि मणिमुक्ताप्रवालवस्त्राभरणचन्दनादीनि ॥ ३५ ॥ ३६ ॥ यज्ञमर्हतिइति यज्ञियम् । "यज्ञर्त्विग्भ्यांघखञौ"इतिघः । यज्ञाययत्संपाद्यं तत्सर्वंसंपादितमित्यर्थः ॥ ३७ ॥ अन्तिकात् समीपे । "दूरान्तिकार्थेभ्योद्वितीयाच"इतिचकारेणपञ्चमी । समीपे उपहृतैः । सर्वकामैः सर्वोपकरणैः । उपेतं ॥ ३८ ॥ द्रष्टुमित्यर्धमेकान्वयम् । मनसेवेतिक्षिप्रसिद्धत्वेदृष्टान्तः ॥ ३९ ॥ वसिष्ठेत्यविभक्तिकोनिर्देशः । वसिष्ठस्य ऋश्यशृङ्गस्यचोभयोरित्यर्थः । ऋश्यशृङ्गस्यब्रह्मत्वेनवृतत्वात् तद्वचनमप्यपेक्षितं । शुभेदिवसे सोमसौम्यवारादौ । शुभेनक्षत्रे रोहिण्यादौ । निर्यातः गृहात् । यज्ञशालांप्रतिइत्यर्थसिद्धं । अत्राहुः "शङ्खदुन्दुभिमृदङ्गवादनैर्मङ्गलैःपटहकाहलादिभिः । स्वस्तिवादमुखरैर्मखक्षितिं ब्राह्मणैश्चसहसंप्रपद्यते"इति ॥ ४० ॥ ततइतिसार्धश्लोकः । आरभन्निितिछान्दसः । यज्ञवाटगताः सर्वे यजमानर्त्विगादयः । यथाविधि यथाक्रमं । यथाशास्त्रं । सर्वेयज्ञकर्मारभन् स्वस्वकर्मारभन्तेत्यर्थः ॥ ४१ ॥ ४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

ती० अन्तिकं अन्तिकेस्थितं ॥ ३८ ॥ ति० मनसेवेति । क्षिप्रसिद्धत्वोपकरणसौष्ठवज्ञापनायोत्प्रेक्षेयं ॥ ३९ ॥ ती० यथाशास्त्रं वेदोक्तमनतिक्रम्य । यथाविधि कल्पसूत्रानुसारेण ॥ ४१ ॥ इतित्रयोदशस्सर्गः ॥ १३ ॥

[पा०] १ ङ. झ. महर्षये. २ ङ. झ. मुनिरब्रवीत्. ख. ग. घ. निदमब्र. ३ इदमर्धं ज. दृश्यते. ४ ङ. कदाचिल्लीलया. ५ ङ. झ. राजसत्तम. ६ च. छ. यज्ञियश्चकृतोराजन्. क—घ. ज. याज्ञियं च. ७ ङ. ज. झ. कृतंसर्वं. ८ च.छ. ज. मन्तिकम्. ९ ख. ज. मनसैव. १० ज. ततोवसिष्ठ. ११ ङ—झ. दिवसेशुभनक्षत्रे. १२ घ. जगतःप्रभुः. १३ घ—छ. झ. यज्ञवाटंगताः. १४ क. ख. ङ. च. छ. झ. ञ. इदमर्धमधिकंदृश्यते.

चतुर्दशः सर्गः ॥ १४ ॥

ऋश्यशृङ्गपुरस्कारेणवसिष्ठादिभिर्दशरथस्याश्वमेधयाजनम् ॥ १ ॥ विस्तरेणयागवैभववर्णनम् ॥ २ ॥ दशरथेनाश्वमेधान्ते दक्षिणादिभिर्ऋत्विगादिसंमाननपूर्वकं ऋश्यशृङ्गंप्रतिपुत्रेष्टियाजनप्रार्थना ॥ ३ ॥

अथ संवत्सरे पूर्णे तस्मिन्प्राप्ते तुरङ्गमे ॥ सरय्वाश्चोत्तरे तीरे राज्ञो यज्ञोऽभ्यवर्तत ॥ १ ॥
ऋश्यशृङ्गं पुरस्कृत्य कर्म चक्रुर्द्विजर्षभाः ॥ अश्वमेधे महायज्ञे राज्ञोऽस्य सुमहात्मनः ॥ २ ॥
कर्म कुर्वन्ति विधिवद्याजका वेदपारगाः ॥ यथाविधि यथान्यायं परिक्रामन्ति शास्त्रतः ॥ ३ ॥
प्रवर्ग्यं शास्त्रतः कृत्वा तथैवोपसदं द्विजाः ॥ चक्रुश्च विधिवत्सर्वमधिकं कर्म शास्त्रतः ॥ ४ ॥
अभिपूज्य ततो हृष्टाः सर्वे चक्रुर्यथाविधि ॥ प्रातस्सवनपूर्वाणि कर्माणि मुनिपुङ्गवाः ॥ ५ ॥
ऐन्द्रश्च विधिवद्दत्तो राजा चाभिष्टुतोऽनघः ॥ माध्यन्दिनं च सवनं प्रावर्तत यथाक्रमम् ॥ ६ ॥

पूर्वसर्गान्तेशालाप्रवेशानन्तरमश्वमेधारंभस्संग्रहेणदर्शितः । तदनुष्ठानंविस्तरेणदर्शयिष्यन् तस्याश्वागमनपूर्वकत्वात्तदनुवादपूर्वकं यज्ञानुष्ठानंदर्शयतिचतुर्दशे—अथेत्यादि । अथ अश्वविमोचनानन्तरं । तुरङ्गमेप्राप्ते क्रमेणप्राप्ते । तस्मिन्संवत्सरेपूर्णे । राज्ञोयज्ञः । अभ्यवर्तत प्रावर्तत । अश्वागमनक्रमस्तु । विमुक्तमश्वंस्वैरंचरन्तं राजपुत्रराजोग्रसूतग्रामणिक्षत्रसंग्रहितारश्चतुश्शताः परिपालयन्तोनावर्तयन्तोनुचरन्ति । ब्रह्माध्वर्युहोतृद्गातारश्चत्वारऋत्विजः तं रथकारगृहेसमानीयबध्वा तस्यचतुर्षुपदेषु "इहधृतिस्स्वाहा" इत्याद्याहुतिचतुष्टयंजुह्वति । तथाहुः । " रथकारगृहेश्वस्यवसतःसायमस्यतु । चतुर्षुपत्सुहोतव्याश्चतस्रोधृतयःक्रमात्" इति । अथैकादशमासादूर्ध्वं तंसदस्याः समानीयआश्वत्थेव्रजेबध्नन्ति । तथाहआपस्तंबः । "ऊर्ध्वमेकादशान्मासादाश्वत्थेव्रजेश्वंबध्नीयात्" इति । ततोद्वादशेमासे शालानिर्माणादिसकलसंभारान्संभृत्य फाल्गुनामावास्यायामृत्विग्भिःशालांप्रविश्य प्रतिपदमारभ्याश्वमेधंप्रारभन्ते ॥ १ ॥ ऋश्यशृङ्गमिति । अनेनप्रधानार्त्विज्यं ब्रह्मत्वंतस्येतिगम्यते ॥ २ ॥ प्रतिपदमारभ्यसप्तसुदिनेषुकर्तव्यान् " त्रीणित्रीणिवैश्वदेवानिजुहोति" इतिविहितानेकविंशतिहोमान् "पूर्णाहुतिमुत्तमांजुहोति" इतिविहितंकर्मविशेषंच अभिप्रेत्याह—कर्मेति । याजकाः ऋत्विजः । वेदपारं तदर्थावबोधः तद्गच्छन्तीतिवेदपारगाः । कर्म पूर्वोक्तं । विधिवत्कुर्वन्तिस्म । यथाविधि यथावेदोक्तं । यथान्यायं यथामीमांसं । शास्त्रतः कल्पसूत्रानुसारेण । परिक्रामन्ति । "नासंस्थितेसोमेध्वर्युःप्रत्यङ्सदोतीयात् " इत्याद्युक्तक्रममतिलङ्घ्यऋत्विजोनविहरन्तीत्यर्थः ॥ ३ ॥ अथसोमक्रयानन्तरंसोमराजाप्यायनकर्मविशेषान्दर्शयति—प्रवर्ग्यमिति । द्विजा ऋत्विजः। प्रवर्ग्यं "देवावैसत्रमासत" इत्यादिप्रवर्ग्यब्राह्मणोक्तंकर्मविशेषं । शास्त्रतः विधिमीमांसाकल्पसूत्रानुसारेण। कृत्वा। उपसदं इष्टिविशेषं। तथैव शास्त्रतएव। कृत्वा । शास्त्रतः उपदेशशास्त्रात् । अधिकं अतिदेशतःप्राप्तं। सर्वकर्मच चक्रुः । "तिस्रएवसाह्नस्योपसदोद्वादशाहीनस्य" इतिप्राप्ताः द्वादशप्रवर्ग्योपसदश्चक्रुरित्यर्थः ॥ ४ ॥ अथसोमप्रयोगंदर्शयति—अभिपूज्येति । बहिष्पवमानादिभिस्तात्तत्कर्मदेवताः । अभिपूज्य ततः प्रवर्ग्योपसदनावसाने । प्रातस्सवनपूर्वाणि-प्रातस्सवनमाध्यंदिनसवनतृतीयसवनानि । कर्माणि चक्रुः ॥ ५ ॥ ऐन्द्रः इन्द्रग्रहनिष्ठःसोमांशः । सः विधिवत् इन्द्रायदत्तः । अनघः पापनिवर्तकः । राजा सोमराजः । अभिष्टुतः स्तोत्रशस्त्रैस्स्तुतः । यद्वा । ऐन्द्रः इन्द्रदेवताकोहविर्भागः । धानाःकरंभःपरिवापः पुरोडाशःपयस्येति प्रातःसवनहवींषि । इन्द्रायहरिवतेधानाः । इन्द्रायपूषण्वतेकरंभः । सरस्वतेपरिवापः ।

ति० अत्र त्रिंशद्दिनात्मकसावनमासपरिच्छिन्नोवत्सरः ॥ १ ॥ ति० अग्रेपुत्रेष्टौ । "इष्टिंतेऽहंकरिष्यामि" इतिऋश्यशृङ्गोक्तेः "जुहावाग्नौचतेजस्वी" इतिऋष्यशृङ्गंप्रक्रम्यवाल्मीक्युक्तेश्चाऽऽध्वर्यवमस्येतियुक्तं ॥ २ ॥ ती० प्रवर्ग्यं आरादुपकारककर्मविशेषं ॥ ४ ॥

[पा०] १ ख. घ. राज्ञस्तस्य. २ ख. तथैवोपसदो. ३ ङ. झ. तदाहृष्टाः. ४ ग. ङ. झ. चाभिषुतो. ५ ङ. झ. मध्यंदिनंच. ६ घ. यथाविधि.

तृतीयसवनं चैव राज्ञोस्य सुमहात्मनः ॥ चक्रुस्ते शास्त्रतो दृष्ट्वा तथा ब्राह्मणपुङ्गवाः ॥ ७ ॥
[आह्वयाञ्चक्रिरे तत्र शक्रादीन्विबुधोत्तमान् ॥ ऋश्यशृङ्गादयो मन्त्रैः शिक्षाक्षरसमन्वितैः ॥ ८ ॥
गीतिभिर्मधुरैः स्निग्धैर्मन्त्राह्वानैर्यथार्हतः ॥ होतारो ददुरावाह्य हविर्भागान्दिवौकसाम्] ॥ ९ ॥
न चाहुतमभूत्तत्र स्खलितं वाऽपि किंचन ॥ दृश्यते ब्रह्मवत्सर्वं क्षेमयुक्तं हि चक्रिरे ॥ १० ॥
न तेष्वहस्सु श्रान्तो वा क्षुधितो वाऽपि दृश्यते ॥ नाविद्वान्ब्राह्मणस्तत्र नाशतानुचरस्तथा ॥ ११ ॥
ब्राह्मणा भुञ्जते नित्यं नाथवन्तश्च भुञ्जते ॥ तापसा भुञ्जते चापि श्रमणा भुञ्जते तथा ॥ १२ ॥
वृद्धाश्च व्याधिताश्चैव स्त्रियो बालास्तथैव च ॥ अनिशं भुञ्जमानानां न तृप्तिरुपलभ्यते ॥ १३ ॥
दीयतांदीयतामन्नं वासांसि विविधानि च ॥ इति संचोदितास्तत्र तथा चक्रुरनेकशः ॥ १४ ॥
अन्नकूटाश्च बहवो दृश्यन्ते पर्वतोपमाः ॥ दिवसेदिवसे तत्र सिद्धस्य विधिवत्तदा ॥ १५ ॥

इन्द्रायपुरोडाशः । मित्रावरुणाभ्यांपयस्येतिहोतव्यानीन्द्रमुद्दिश्यैव "अथकस्मादेतेषांहविषामिन्द्रमेवयजन्ति" इत्यादिश्रुतेः । माध्यंदिनसायंतनसवनयोःपयस्यावर्जमन्यत्सर्वसमानं । अभिषुतइतिपाठे चतसृषुदिक्षुचतुर्भिःऋत्विग्भिःपाषाणैरभिहत्यनिःसारितसारा सोमलताऽभूदित्यर्थः । तथाहिसूत्रं "सोमंराजानंदृषदिनिधायदक्षिणतोब्रह्मापश्चादध्वर्युरुत्तरतोहोताप्रागुद्गातास्थित्वादृषद्भिरभिहन्यात्" इति । अनघः अंशुस्कन्दनरहितः ॥ ६ ॥ तथा शास्त्रप्रकारेण । "प्रातस्सवनपूर्वाणि" इत्युक्तस्यैवायंप्रपञ्चः ॥ ७ ॥८॥९ ॥ अहुतं स्खलितं अन्यथाहुतंवा । किंचन नाभूत् । सर्वं होमादिकं । ब्रह्मवत् मन्त्रवत् । दृश्यतेस्म । हि यस्मात् । क्षेमयुक्तं निर्विघ्नम् । चक्रिरे । अत्रान्नहोमादिकमश्वमेधीयंसूचितं । तेषांबहुत्वेनस्खालित्यादिसंभावनयातत्परिहारस्यवक्तव्यत्वात् । तथाहुर्याज्ञिकाः "पत्नीसंयजनान्तेहन्यग्निष्टोमेतुसंस्थिते ॥ प्रजापतिसमेगीतेवीणागणिकिभिर्नृपे ॥ अस्तंगतेसहस्रांशावारुद्याश्वत्थनिर्मिताः ॥ षट्त्रिंशतमथासन्दीस्तावन्तोऽध्वर्यवोवृताः ॥ अप्राकृतैःस्रुवैर्दीर्घदण्डैःखदिरसंभवैः ॥ सर्वातांरात्रिमन्नानिदशाज्यादीनिजुह्वति ॥ संख्याहुतीस्ताःसकृदेवहुत्वापरार्धपर्यन्तमथक्रमेण ॥ हुत्वाऽश्वनामप्रभृतीनिरात्रेश्शेषोक्थ्यसङ्ख्याहुतिभिःसमाप्यः" इति ॥ १० ॥ अथतत्रान्नदानसमृद्धिंदर्शयत्यष्टभिः— नतेष्वित्यादि । यद्यपिक्रीतेसोमेयज्ञान्नंनभोज्यं तथापि सर्वद्रव्यस्यवसिष्ठसात्कृतत्वेननदोषः। तेष्वहस्सु यज्ञीयदिनेषु । श्रान्तः पिपासितः । क्षुधितः बुभुक्षितः । नदृश्यते नादृश्यत । अशतानुचरः शतशिष्यरहितः ॥ ११ ॥ नाथवन्तः दासाः । शूद्रादयइतियावत् । श्रमणाः दिगंबराः । "श्रमणावातवसनाः" इतिनिघण्टुः । यद्वा "चतुर्थमाश्रमंप्राप्ताःश्रमणानामतेस्मृताः" इतिस्मृतिः ॥ १२ ॥ व्याधिताः संजातव्याधयः। अनिशंभुञ्जमानानां भुञ्जानेष्वपि । यजमानस्य तृप्तिः अलंबुद्धिः । नासीदित्यर्थः । यद्वा रस्यतातिशयाद्भुक्त्यनन्तरमपिभोजनेच्छाजायतइत्यर्थः ॥ १३ ॥ तथा चक्रुः ददुरित्यर्थः ॥ १४ ॥ विधिवत् पाकविध्युक्तक्रमेण । सिद्धस्य पक्वस्य । अन्नेति लुप्तषष्ठीविभ-

---

ति० यथेत्यस्ययथाविधीत्यर्थः ॥ ७ ॥ ती० तत्र यागे । स्खलितं स्कन्नं । पात्रादितिशेषः ॥ १० ॥ ति० श्रान्तः स्वस्वार्लिज्याशक्तः ॥ ११ ॥ ति० ब्राह्मणाइतित्रैवर्णिकोपलक्षणं । द्विजत्वात् । शि० । नाथवन्तः ब्राह्मणस्वामिकाः क्षत्रियविट्शूद्राश्च । तापसाः ब्रह्मचारिप्रभृतयः । वाशब्देनवर्णाश्रमबहिर्भूतपरिग्रहः । तुशब्देनयथेच्छलाभः ॥ १२ ॥ ति० भोज्यसौष्ठवात्उदरपूर्तावपिरसातिशयलोभेनमानसीतृप्तिर्नोपलभ्यतइत्यर्थः । शि० भुज्यमानानां भोज्यमानानांजनानां तृप्तिर्नोपलभ्यते । एतेनभोज्यानामतिस्वादुत्वंध्वनितं । किंच अमानानां गर्वरहितानांभोजनदातॄणां अनिशं निरन्तरं भुजि भोजनायां । भोजनदानेइत्यर्थः । अन्तर्भावितणिजर्थकभुजेर्भावेक्विप् ॥ १३ ॥

[पा०] १ ङ.—झ. यथाब्राह्मण. २ ङ. च. छ. झ. ञ. ट. इदंश्लोकद्वयमधिकंदृश्यते. ३ ख. चापिकिंचन ङ—झ. वानकिंचन. ४ ख. वानकश्चन. ङ. झ. वानदृश्यते. ५ ङ. च. छ. झ. ब्राह्मणःकश्चित्. ६ ग. नावादकुशलस्तथा. घ. नानाचाररतस्तथा. ७ ट. नाथवन्तस्तु. ८ ट. वापि. क. नित्यं. ९ ङ. झ. श्रमणाश्चैवभुञ्जते. १० क. घ—झ. स्त्रीबालाश्चतथैवच. ११ ट. भुज्यमानानां.

नानादेशादनुप्राप्ताः पुरुषाः स्त्रीगणास्तथा ॥ अन्नपानैः सुविहितास्तस्मिन्यज्ञे महात्मनः ॥ १६ ॥
अन्नं हि विधिवत्स्वादु प्रशंसन्ति द्विजर्षभाः ॥ अहो तृप्ताः स्म भद्रं त इति शुश्राव राघवः ॥१७॥
स्वलंकृताश्च पुरुषा ब्राह्मणान्पर्यवेषयन् ॥ उपासंते च तानन्ये सुमृष्टमणिकुण्डलाः ॥ १८ ॥
कर्मान्तरे तदा विप्रा हेतुवादान्बहूनपि ॥ प्राहुः स्म वाग्मिनो धीराः परस्परजिगीषया ॥ १९ ॥
दिवसेदिवसे तत्र संस्तरे कुशला द्विजाः ॥ सर्वकर्माणि चक्रुस्ते यथाशास्त्रं प्रचोदिताः ॥ २० ॥
नाषडङ्गविदत्रासीन्नाव्रतो नाबहुश्रुतः ॥ सदस्यास्तस्य वै राज्ञो नावादकुशला द्विजाः ॥ २१ ॥
प्राप्ते यूपोच्छ्रये तस्मिन्षड् बैल्वाः खादिरास्तथा ॥ तावन्तो बिल्वसहिताः पर्णिनश्च तथाऽपरे ॥२२॥
श्लेष्मातकमयस्त्वेको देवदारुमयस्तथा ॥ द्वावेव तत्र विहितौ बाहुव्यस्तपरिग्रहौ ॥ २३ ॥

क्तिकंपदं । अन्नस्यखाद्यभक्ष्यलेह्यचोष्यभेदभिन्नस्य । कूटाः राशयः ॥ १५ ॥ सुविहिताः सुतर्पिताः ॥१६॥ अन्नं विधिवत् उपचारवत् । स्वादुच । अनेनतृप्ताः स्म । अहो इदंवर्णितुंनशक्यं । इति द्विजर्षभाः प्रशंसन्ति प्राशंसन् । तद्राघवःशुश्राव । "नतेष्वहस्सु" इत्यारभ्यप्रशंसाप्रकारोनतुकविवाक्यं । अनेन "ब्राह्मणौ वीणागाथिनौगायतः" इत्यारभ्य "इत्यददाइत्ययजथाइत्यपचइतिब्राह्मणोगायेत्" इत्युक्तस्तुतिश्रवणमुक्तम् ॥ १७ ॥ ब्राह्मणान् ब्राह्मणेभ्यः । पर्यवेषयन् भक्ष्यान्नपानादीनितिशेषः । सुमृष्टमणिकुण्डलाः उत्तेजितरत्नकुण्डलाः । अन्येपुरुषाःसाहाय्यार्थंतानसेवन्तेत्यर्थः ॥ १८ ॥ कर्मान्तरे सवनयोरन्तरालकाले । धीराः धीमन्तः । वाग्मिनः पटुवाचः । विप्राः ऋत्विजः । परस्परजिगीषया बहूनहेतुवादान् प्राहुःस्म । अनेन ब्रह्मोद्यमुक्तं । यथा "किंस्विदासीत्पूर्वचित्तिः" इत्यादि होतृब्रह्मणोःप्रश्नप्रतिवचनानि ॥१९॥ अथ "ऊमोर्व्यकाव्याधिदैवत्यानि द्विनाराशंसनंप्रातःसवनं द्विनाराशंसनंमाध्यंदिनंसवनं सकृन्नाराशंसनं तृतीयसवनं" इतिविहितानित्रिकालकर्माणिदर्शयति—दिवसेदिवसइति । दिवसेदिवसे अश्वमेधाहेषुप्रत्यहं । संस्तरे आस्तीर्णबर्हिषि । "संस्तरौप्रस्तराध्वरौ" इत्यमरः । सर्वकर्माणि ऊमादिदैवत्यकर्माणि । यथाशास्त्रं । वृद्धैः प्रचोदिताःसन्तः । चक्रुः । "ऊमाऊर्व्याश्चका व्याश्चपितरः सवनत्रये" ॥ नाराशंसनंनाम सकृद्भक्षिताप्यायितासादितचमसं ॥ २० ॥ अत्र यज्ञे । अषडङ्गवित्कश्चिन्नासीत् । अव्रतश्च कश्चिन्नासीत् । अबहुश्रुतश्चकश्चिन्नासीत् । तस्य राज्ञः । सदस्याः सदसिसमवेताः । द्विजाः । अवादकुशलाः नासन् ॥ २१ ॥ अथौपवसथ्यदिनकृत्यंपश्वालंभंवक्तुंयूपोच्छ्रयणप्रकारमाह—प्राप्तइति । श्लोकद्वयमेकान्वयं । यस्मिन् अश्वमेधे । यूपानामुच्छ्रयोयूपोच्छ्रयः । उच्छ्रयः उत्क्षेपणं । उद्धृत्यस्थापनमितियावत् । तत्कालोत्र लक्ष्यते । "यूपायोच्छ्रीयमाणायानुब्रूहि" इतिप्रैषेप्राप्तइत्यर्थः । बिल्वस्यविकाराबैल्वाः । "बिल्वादिभ्योऽण्" इत्यण् । बैल्वायूपाष्षट् उच्छ्रिताइतिशेषः । खदिरस्यविकाराःखादिराः । तथेतिसमुच्चये । खादिरायूपाश्च । तावन्तःषडेव । बिल्वसहिताइति खादिराणांबिल्वसमीपवर्तित्वं नतुपर्णिसमीपवर्तित्वमित्युच्यते । षट्खादिरायथाबिल्वसहिताभवन्ति तथोच्छ्रिताइत्यर्थः । अपरे उक्तेभ्योऽन्ये । पर्णिनः पर्णीपलाशः "पलाशे किंशुकःपर्णी" इत्यमरः । तत्प्रकृतिकाः पर्णिन इत्युच्यन्ते । पर्णिनोयूपाः । तथा षट्उच्छ्रिताइत्यर्थः ॥ २२ ॥ श्लेष्मातकमयः राज्जुदालविकारः । एकोयूपः उच्छ्रितः । देवदारुमयस्तथा देवदारुविकारश्चयूपउच्छ्रितः । अत्रैकत्वमविवक्षितं । द्वयोः श्रुत्याचोदितत्वात् । "राज्जुदालमग्निष्ठंमिनोतिपौतुद्रवावभितोभवतः" इतिश्रुतिः । राज्जुदालः श्लेष्मातकः । पौतुद्रवौ देवदारू । अयमत्रविन्यासक्रमः । राज्जुदालो-

शि० विधिवत् पाकशास्त्रोक्तविधिनिर्मितम् ॥ १७ ॥ ति० स्वलंकृताइति । अनेन राजकृतोयज्ञपरिचारकसत्कारोध्वनितः ॥ १८ ॥ शि० प्रचोदिताः प्रेष्य ब्रूहीत्यादिवैदिकशब्दैःप्रेरिताः । ते प्रसिद्धाः ॥ २० ॥ ति० श्लेष्मातकः रज्जुदालः । तन्मय एकोयूपः । अश्वमेधेदिष्टः उपदिष्टइत्यर्थः । शि० अग्निष्ठः अग्निसंमुखवर्ती ॥ २३ ॥

[पा०] १ ज. उपासतेतथान्येच. २ क—झ. प्राहुःसुवाग्मिनो. क. ख. प्राहुःस्वेदकुशलाः. ३ क. ग—छ. झ. मयोदिष्टो. ट. मयोऽग्निष्ठो. ज. मयश्चैव.

कारिताः सर्वे एवैते शास्त्रज्ञैर्यज्ञकोविदैः ॥ शोभार्थं तस्य यज्ञस्य काञ्चनालंकृता भवन् ॥ २४ ॥
एकविंशतियूपास्ते एकविंशत्यरत्नयः ॥ वासोभिरेकविंशद्भिरेकैकं समलंकृताः ॥ २५ ॥
विन्यस्ता विधिवत्सर्वे शिल्पिभिः सुकृता दृढाः ॥ अष्टाश्रयः सर्वे एव श्लक्ष्णरूपसमन्विताः ॥२६॥
आच्छादितास्ते वासोभिः पुष्पैर्गन्धैश्च पूजिताः ॥ सप्तर्षयो दीप्तिमन्तो विराजन्ते यथा दिवि ॥२७॥
इष्टकाश्च यथान्यायं कारिताश्च प्रमाणतः ॥ चितोऽग्निर्ब्राह्मणैस्तत्र कुशलैः शुल्बकर्मणि ॥ २८ ॥

ग्निष्ठः अग्नौतिष्ठतीत्यग्निष्ठः।अग्निशब्देनाग्निस्थानवेदिरुच्यते । "अर्धमन्तर्वेदिमिनुयादर्धबहिर्वेदि"इतिश्रुतेः । सोग्निष्ठःप्रथमयूपः "तानग्निष्ठप्रथमान्मन्त्रेणछिनत्ति" इतिसूत्रात्।तस्यदक्षिणोत्तरपार्श्वयोर्देवदारुयूपौ तेषांत्रयाणांदक्षिणतस्त्रयोबैल्वाः उत्तरतस्त्रयः । तेषांनवानांदक्षिणतस्त्रयः खादिराउत्तरतस्त्रयः । तेषांपञ्चदशानां दक्षिणतस्त्रयः पालाशाःउत्तरतस्त्रयः । प्रथमंपालाशषट्कमन्तेबिल्वषट्कंवा । सर्वथाखादिराएवबिल्वसहिताः नपुनःपालाशाः । तमिममर्थंग्रन्थकारोबिल्वसहिताइत्यसूचयत् । आपस्तंबश्चासूत्रयत् । "रज्जुदालमेकविंशत्यरत्निंसंमिनोति पौतुद्रवावभितस्त्रयोबैल्वादक्षिणतस्त्रयउत्तरतस्त्रयः खादिरादक्षिणतस्त्रयउत्तरतस्त्रयः पालाशादक्षिणतस्त्रयउत्तरतः" इति । एवंयूपानामुच्छ्रयणक्रममुक्त्वातेषामन्तरालप्रदेशविस्तारंदर्शयति—द्वाविति। तत्र यूपेषु । द्वौद्वौबाहुव्यस्तपरिग्रहौ विहितौ कृतौ । व्यस्तौबाहू बाहुव्यस्तौ ताभ्यांपरिग्रहःस्पर्शोययोस्तौ । द्वौद्वौयूपौ व्यस्तबाहुस्पृश्यौविहितौ । व्याममात्रान्तरप्रदेशावित्यर्थः । तथाहधर्मनिर्णयकारः । "षण्णवत्यङ्गुलंबाहुदण्डमष्टोत्तरंतुवा । यूपान्तरालंतन्मात्रमश्वमेधेमहाक्रतौ" इति ॥ २३ ॥ यूपनिर्माणमाह—कारिताइति। एतेसर्वेयूपाः शास्त्रज्ञैः यज्ञशास्त्रज्ञैः । यज्ञकोविदैः यज्ञप्रयोगकुशलैः । कारिताः काञ्चनैःकाञ्चनपट्टैश्चालंकृताः । भवन् "बहुलंछन्दस्यमाङ्योगेपि" इत्यडभावः । अलंकारोपिकिंशास्त्रीयःनेत्याह—तस्ययज्ञस्यशोभार्थमिति। यज्ञभूमेः शोभार्थमित्यर्थः ॥२४॥ तेषांसङ्ख्याप्रमाणेदर्शयति—एकविंशतीति । ते यूपाः । एकविंशति "सुपांसुलुक्" इत्यादिनासुलोपः । एकविंशत्यरत्नयश्च एकविंशत्यरत्न्युन्नताइत्यर्थः । "एकविंशत्यरत्निरश्वमेधस्य" इतिश्रुतेः । "चतुर्विंशत्यङ्गुलयोरत्निः" इतिसूत्रं । एकविंशद्भिरितीकारलोपबहुवचनेआर्षे । एकैकमितिसामान्येनपुंसकं । एकोयूपएकेनवाससेतिक्रमेणसर्वेपिवासोभिरलंकृताइत्यर्थः ॥ २५ ॥ यूपस्थापनविशेषमुक्तानुवादपूर्वमाह—विन्यस्ताइति । शिल्पिभिः सुकृताः सुष्ठुकृताः अन्यूनातिरिक्ततयाकृताः । दृढाः सुषिरादिदोषरहिताः । अष्टाश्रयः अष्टकोटयः । "स्त्रियःपाल्यश्रिकोटयः" इत्यमरः । श्लक्ष्णरूपसमन्विताः यूपाभ्यञ्जनेनस्निग्धरूपयुक्ताः । सर्वएव विन्यस्ताः स्थापिताः । यद्वा । "प्राप्तेयूपोच्छ्रये" इत्यादिश्लोकत्रयमेकान्वयं । शास्त्रज्ञैःकारिताबैल्वादयः सर्वेएतेकाञ्चनालंकृताः भवन्नितियूपनिर्माणमुक्तं । एकविंशतीत्यनेन संख्याप्रमाणेदर्शिते । विन्यस्ताइत्यनेन स्थापनमुच्यते ॥ २६ ॥ यूपान्वर्णयति—आच्छादिताइति । दिविसप्तर्षयइव तेयूपाविराजन्तेस्म । दीप्तिमात्रेदृष्टान्तः । सप्तानांसप्तानांवा ॥ २७ ॥ यूपोच्छ्रयपूर्वभाविचयनमाह—इष्टकाइति । शुल्बकर्मणि यज्ञकर्मणि । "शुल्बंताम्रेयज्ञकर्मण्याचारेजलसन्निधौ" इतिवैजयन्ती । प्रकृतेचयनंविवक्षितं । शुल्बमेकसरारज्जुः । शुल्बसाध्यंकर्म शुल्बंचयनं । अतएवाहरुद्रदत्तः । "रज्जूनांविहरणसाधनत्वादेतत्कर्मशुल्बमाचष्टआचार्यः" इति । तत्रकुशलैः ब्राह्मणैः। यथान्यायं यथाशास्त्रं । प्रमाणतः प्रमाणेन । विशिष्टाइष्टकाःकारिताः । अत्रसूत्रं "पादमात्रोर्धमात्रोणुकमात्रऋजुरेखादक्षिणावृतासव्यावृतारूयालिखिताश्च" इति । अग्निः अग्न्याधारवेदिः । चितः ताभिरिष्टकाभिः कृतचयनः ।

ति० शास्त्रज्ञैः शास्त्रंशिल्पशास्त्रं शुल्बशास्त्रंच ॥ २४ ॥ ति० महोच्छ्रयपरीणाहोयूपोन्यःसर्वकाञ्चनः । यज्ञेसमभवत्तत्रशोभार्थमुपकल्पितः । इतिक्वचित्पाठः ॥ २५ ॥

[पा०] १ शोभनार्थंचयज्ञ. २ घ. ङ. श्लक्ष्णारूप. ३ ग. घ. ज. गन्धैश्चभूषिताः. ४ क. ङ. झ. कुशलैःशिल्पकर्मणि. च. छ. कुशलैर्यज्ञकर्मणि.

स चित्यो राजसिंहस्य सञ्चितः कुशलैर्द्विजैः ॥ गरुडो रुक्मपक्षो वै त्रिगुणोऽष्टादशात्मकः ॥२९॥
नियुक्तास्तत्र पशवस्तत्तदुद्दिश्य दैवतम् ॥ उरगाः पक्षिणश्चैव यथाशास्त्रं प्रचोदिताः ॥ ३० ॥
शामित्रे तु हयस्तत्र तथा जलचराश्च ये ॥ ऋत्विग्भिः सर्वमेवैतन्नियुक्तं शास्त्रतस्तदा ॥ ३१ ॥
पशूनां त्रिशतं तत्र यूपेषु नियतं तदा ॥ अश्वरत्नोत्तमं तत्र राज्ञो दशरथस्य च ॥ ३२ ॥
कौसल्या तं हयं तत्र परिचर्य समन्ततः ॥ कृपाणैर्विशशासैनं त्रिभिः परमया मुदा ॥ ३३ ॥

अभूत् ॥ २८ ॥ चयनसंस्थानमाह—सचित्यइति । सः चित्यः चयननिर्वर्त्योऽग्निः । राजसिंहस्य राजश्रेष्ठस्य । अनेन पूर्वमनेकधानुष्ठितक्रतुत्वंसूच्यते । कुशलैः रीतिभेदंविनाचयननिर्माणसमर्थैः । द्विजैः ब्राह्मणैःऋत्विग्भिः । संचितः सम्यग्यथाशास्त्रंचितः । कथंचितइत्यत्राह—गरुडइति । गरुडः गरुडाकारः । पक्षौपुच्छंचप्रसार्याधोवीक्षमाणःप्राङ्मुखंतिष्ठन्गरुडइवस्थितः । "श्येनचितंचिन्वीत" इतिश्रुतौश्येनशब्दोगरुडपरएव । "सुपर्णोसिगरुत्मान्" इति मन्त्रलिङ्गात् । यद्वा । गरुडः गरुडप्रतिकृतिः । "जीविकार्थेचापण्ये" इतिवासुदेवादिवत्प्रतिकृतौविहितस्यकनोलुप् । रुक्मपक्षः स्वर्णगर्भपक्षः । "सहस्रंहिरण्यशकलैःप्रतिदिशमग्निंप्रोक्षति" इतिसूत्रात् । त्रिगुणः त्रिगुणप्रस्तारः । प्रकृतौषट्प्रस्तारात्मकस्यचित्याग्नेरश्वमेधेत्रैगुण्यविधानात् । "षट्चितयोभवन्ति" इतिश्रुतेः । "त्रिस्तावोग्निर्भवतीत्यश्वमेधेविज्ञायते" इतिसूत्राच्च । अतएवअष्टादशात्मकः अष्टादशप्रस्तारात्मकः । ननु षट्प्रस्तारात्मकस्यचित्यस्यत्रैगुण्यविधानेनैव अष्टादशप्रस्तारात्मकत्वंसिद्धं किं पुनस्तदुपदेशेन । उच्यते । त्रिगुणइत्युक्तेपञ्चदशात्मकत्वंप्रतीयते । तैत्तिरीयके "पञ्चचितयोभवन्ति" इतिविधानात् । तदिदंवाजसनेयकपक्षावलंबनंद्योतयितुमष्टादशात्मकत्वोक्तिः । एवंभूतश्चितइत्यन्वयः ॥ २९ ॥ अथपूर्वोक्तेषुयूपेषुपशुनियोजनमाह—नियुक्ताइति । यथाशास्त्रं शास्त्रमनतिक्रम्य । प्रचोदिताः विहिताः । पशवउरगाःपक्षिणश्च । तत्तद्दैवतंइन्द्रादिदेवतांउद्दिश्यतत्र यूपेषु नियुक्ताबद्धाः । यूपेष्वित्यारोकाणामुपलक्षणं । "यूपेषुग्राम्यान्पशून्नियुञ्जन्ति । आरोकेष्वारण्यान्धारयन्ति" इतिश्रुतेः । अत्राशक्यानामुरगादीनांनियोजनंपञ्जरद्वारा । एतेचपशवस्तत्तद्देवताश्च "इन्द्रायराज्ञेसूकरः" इत्याद्यनुवाकेषुप्रतिपाद्यन्ते ॥ ३० ॥ तत्र "पर्यग्निकृतानारण्यानुत्सृजन्त्यहिंसायै" इतिश्रुतेरारण्यान्पशून्पर्यग्निकृतानुत्सृज्य ग्राम्याणांपशूनां शामित्रेनियोजनमाह—शामित्रेत्विति । तुशब्देनारण्येभ्योवैलक्षण्यमुच्यते । हयःअश्वमेधीयः । येजलचराःकूर्मादयः तेच तदन्यत्सर्वंच ग्राम्यपशुजातं तत्र यज्ञे तदा विशसनकाले । ऋत्विग्भिः शामित्रे विशसनकर्मणि । शास्त्रतोनियुक्तं ॥३१॥ यूपनियुक्तानांपशूनांसंख्यामाह—पशूनामिति । तत्र यूपेषु । पशूनांत्रिशतं नियतंबद्धं । तदाराज्ञोदशरथस्य अश्वरत्नोत्तमं अश्वश्रेष्ठोत्तमंचनियतं । त्रिशतमितिप्रधानापेक्षया । अधिकानामपिश्रवणात् । तथाह भास्करः "अश्वमेधपशुसङ्ख्यातुपञ्चशतमेकोनविंशतिश्च" इति । अश्वरत्नोत्तरइतिपाठे रत्नोत्तरोरत्नप्रधानोश्वइतिपरनिपातेनयोजना । तथाहभास्करः "सौवर्णान्महिषी मणीन्दशशतानस्यावयत्यावहाद्वावाता वयते मणीन्दशशतान्प्रत्यग्वहाद्राजतान् ॥ प्रत्यक्श्रोणिसहस्रमेवपरिवृत्त्यस्यावयेन्मौक्तिकान्सख्यःशङ्खमणीनथैषुसमुपग्रश्नन्त्यविस्रस्तयः" इति । आवयति उतान्करोति ॥३२॥ मृताश्वोपचारमाह—कौसल्येति । कौसल्या महिषी । तत्र शामित्रप्रदेशे । तं मृतंहयं । समन्ततः परिचर्य प्रदक्षिणाप्रदक्षिणंसंचार्य । अत्रसूत्रं "दक्षिणान्केशपक्षानुद्ग्रथ्यसव्यान्प्रग्रथ्य दक्षिणानूरूनाघ्नाना इदंमध्विदंमध्वितिजपन्त्यः स्त्रियोमहिष्यश्चाश्वतूबरगोमृगाणांपरिक्रम्य सव्यानुद्ग्रथ्य दक्षिणान्प्रग्रथ्य सव्यानू-

ति० सचित्यः अग्निः । संचितः स्थापितः । कथंसंचितइत्यत्राह । गरुडः गरुडसंस्थानः । रुक्मपक्षः "सहस्रंहिरण्यंशल्कैः प्रतिदिशमग्निंप्रोक्षति" इतिसूत्राद्रुक्मपक्षत्वमितिकेचित् । अन्नपक्षे "त्रिगुणोष्टादशात्मकः" इत्यस्यासामञ्जस्यंमत्वा चितदेशविशेषणानीमानि । स्वर्णेष्टकाभिःपक्षनिर्माणाद्रुक्मपक्षत्वमित्यन्ये । **शि०** रुक्मपक्षः सुवर्णमयपक्षविशिष्टः ॥ २९ ॥ **ती०** परिचर्येप्रोक्षणादिभिःसंस्कृत्य । एनं कृपाणैर्विशशासेति असिभिर्वधंचकारेत्यर्थः । **मुनिभावप्रकाशिका** कृपाणैः आयुधैः । त्रिभिः मन्त्रैः ॥ ३३ ॥

[**पा०**] १ घ. ङ. ज. झ. ऋषिभिस्सर्वे. २ ज. शास्त्रतस्ततः. ३ ज. यूपेषुविनियोजितम्.

पतत्रिणा तदा सार्धं सुस्थितेन च चेतसा ॥ अवसद्रजनीमेकां कौसल्या धर्मकाम्यया ॥ ३४ ॥
होताऽध्वर्युस्तथोद्गाता हस्तेन समयोजयन् ॥ महिष्या परिवृत्त्या च वावातामपरां तथा ॥ ३५ ॥
पतत्रिणस्तस्य वपामुद्धृत्य नियतेन्द्रियः ॥ ऋत्विक् परमसंपन्नः श्रपयामास शास्त्रतः ॥ ३६ ॥
धूमगन्धं वपायास्तु जिघ्रति स नराधिपः ॥ यथाकालं यथान्यायं निर्णुदन्पापमात्मनः ॥ ३७ ॥
हयस्य यानि चाङ्गानि तानि सर्वाणि ब्राह्मणाः ॥ अग्नौ प्रास्यन्ति विधिवत्समन्त्राः षोडशर्त्विजः ॥ ३८ ॥

रूनान्नाना सक्थीरवधून्वन्त्यस्त्वप्रदक्षिणंपरिक्रम्य प्रदक्षिणमन्त्रतोयथापुरस्तान्नवकृत्वः संपादयन्ति" इति । कृपाणैस्त्रिभिस्तिसृभिः सौवर्णीभिःसूचीभिः एनं परमयामुदा निरवधिकश्रद्धया । विशशास असिपथान्कल्पयामास । कौसल्येति इतरासामुपलक्षणं । "सौवर्णीभिः सूचीभिः पत्नयोश्वस्यासिपथान्कल्पयन्ति प्राक्रोडात्प्रत्यश्चीभिः" इति सूत्रात् । क्रोडं वक्षः ॥ ३३ ॥ महिष्याःकर्तव्यांतरमाह—पतत्रिणेति । तदा विशसनोत्तरकाले । कौसल्या । धर्मकाम्यया धर्मसिद्धीच्छया । काम्यजन्तादकारप्रत्ययेटाप् । सुस्थितेन सुस्थिरेण । चेतसा उपलक्षितासती । शवस्पर्शकुत्सारहितासतीत्यर्थः । पतत्रिणा अश्वेन । सार्धएकांरजनीमवसत् । अत्रसूत्रं "अंबेअंबाल्यंबिकेइतिजपन्तीमहिषी अश्वमुपसंगम्य गणानांत्वागणपतिंहवामहइत्यभिमन्त्र्य । उत्सक्थ्योर्गृदंधेहीतिप्रजननेप्रजननंसंनिधायोपविशति । सुभगेकांपीलवासिनीतिक्षौमेनवाससाध्वर्युर्महिषीमश्वंचप्रच्छाद्य वृषावांरेतोधा रेतोदधात्विति जपत्याग्नीध्रएतांरात्रिमृत्विजोयजमानंजागरयन्ति" इति ॥ ३४ तादात्विकदक्षिणामाह—होतेति । तथेत्यनुक्तसमुच्चयार्थः । ब्रह्माचेत्यर्थः । एतेब्रह्मादयश्चत्वारःप्रधानर्त्विजोमहिषीपरिवृत्तिभ्यांसह वावातामपरां पालाकलीं च । राज्ञोदक्षिणार्थं परिगृह्य । हस्तेनसमयोजयन् । रमणवद्धस्तेनागृह्णन्नित्यर्थः । अत्रश्रुतिः "अंबेअंबाल्यंबिकेइतिपत्नीमुदानयति" इत्यादि । उदानयति हस्तेनगृह्णातीत्यर्थइतिभास्करः । सूत्रंच "महिषींब्रह्मणेददातिवावातांहोत्रेपरिवृत्तिमुद्गात्रेपालाकलीमध्वर्यवे" इति । पश्चात्प्रतिनिधिद्रव्यदानेन निवर्तयेरन् । "कृताभिषेकामहिषीपरिवृत्तिरुपेक्षिता । वावाताभोगिनीपात्रप्रदापालाकलीमता" इतिवैजयन्ती ॥ ३५ ॥ तस्यपतत्रिणः अश्वस्य । "पतत्रीपक्षितुरगौ" इत्यमरः । वपां वपास्थानीयां तेजनीं । "नाश्वस्यवपाविद्यते" इतिसूत्रात् । "नान्येषां पशूनांतेजन्या अवद्यन्त्यवद्यन्त्यश्वस्य" इतिश्रुतेश्च । उद्धृत्य आदाय । नियतेन्द्रियः एकाग्रः । परमसंपन्नः परमेणप्रयोगचातुर्येणसंपन्नः । ऋत्विक् अध्वर्युः । शास्त्रतः श्रपयामास पपाच । श्रापाके । शास्त्रंचस्वयमेववक्ष्यतिप्लक्षेति ॥ ३६ ॥ अथवपाहोमंसूचयन्नाह—धूमेति । नराधिपः दशरथः । यथाकालं होमकालमनतिक्रम्य । यथान्यायं यथाशास्त्रं । आत्मनः पापं निर्णुदन् निवर्तयन्सन् । वपायाधूमगन्धंजिघ्रतिस्म ॥ ३७ ॥ वपाहोममुक्त्वा

ति० पतत्रिणेति । पुराअश्वानांपक्षाःसन्तीतिप्रसिद्ध्यैवंवादः ॥ ३४ ॥ **ति०** अथहोत्रादयः । महिष्या कृताभिषेकया । परिवृत्त्या राज्ञोभोगाद्बहिष्कृतयादास्याचसह । वावातां राज्ञोवल्लभांभुजिष्यां । अश्वेनसमयोजयन्निति संबन्धइतिकेचित् । अपरे तु वावाताशब्दोराज्ञोमध्यमजातीयद्वितीयभार्यावाची । तदुक्तमैतरेयब्राह्मणभाष्ये तृतीयपञ्चिकास्थद्वाविंशखण्डस्थवावातेतिप्रतीकव्याख्यानावसरे । राज्ञांहित्रिविधाःस्त्रियः । उत्तममध्यमाधमजातीयाः । तासांमध्ये उत्तमजातेःक्षत्रियायामहिषीतिनाम । मध्यमजातेर्वैश्यायाःवावातेति । अधमजातेःशूद्रायाःपरिवृत्तिरिति । अतएवाश्वलायनसूत्रे दशमाध्याये अष्टमखण्डस्थवावातेतिप्रतीकंगृहीत्वा द्वितीयाभार्येतिव्याख्यातं नारायणवृत्तिकृता । **शि०** रात्रिवासोत्तरकालिकंहोत्रादिकृत्यमाहहोतेति । होत्रादयस्त्रयः । तथाशब्देनब्रह्माच । महिष्या कृताभिषेकया । परिवृत्त्या उपेक्षितयाच सहितांवावातां भोगिनीं । अपरां पालाकलींच । हयेनाश्वेनसमयोजयन् । अश्वाङ्गसंयोजनरूपबिधिंकारयामासुरित्यर्थः । तथाशब्दश्चार्थे । एतेन "महिषींब्रह्मणेददाति वावातांहोत्रे परिवृत्तिमुद्गात्रे पालाकलीमध्वर्यवे" इतिसूत्राण्युपन्यस्य पत्नीदानपरत्वेनव्याख्यानंप्रत्युक्तं । दानस्यात्रानुक्तेः । अध्याहारे गौरवाच्च । हस्तेनसमयोजयन्नितिपाठेतु हयहस्तेनेत्यर्थः । पशूनामग्रिमपादयोर्हस्तत्वात् । अतएव हयेनसमयोजयन्नितिपाठेन न विरोधः ॥ ३५ ॥ **शि०** पापं प्रकटपुत्रवियोगहेतुत्वेनप्रतीयमानविघ्नविशेषं ॥ ३७ ॥ **शि०** समस्ताः मिलिताः ॥ ३८ ॥

[पा०]१ ज. सत्कृतेन च. २ क.—ङ. छ. ज. हयेन. ३ ख. ङ. छ. ज. झ- परिवृत्त्याथ. ४ ख. ग. च. जिघ्रन्तिस-नराधिपाः. ५ ख. घ.—झ. ट. विधिवत्समस्ताः.

प्लक्षशाखासु यज्ञानामन्येषां क्रियते हविः ॥ अश्वमेधस्य यज्ञस्य वैतसो भाग इष्यते ॥ ३९ ॥
त्र्यहोऽश्वमेधः संख्यातः कल्पसूत्रेण ब्राह्मणैः ॥ चतुष्टोममहस्तस्य प्रथमं परिकल्पितम् ॥
उक्थ्यं द्वितीयं संख्यातमतिरात्रं तथोत्तरम् ॥ ४० ॥
कारितास्तत्र बहवो विहिताः शास्त्रदर्शनात् ॥ ४१ ॥
ज्योतिष्टोमायुषी चैवमतिरात्रौ विनिर्मितौ ॥ अभिजिद्विश्वजिच्चैवमाप्तोर्यामो महाक्रतुः ॥ ४२ ॥
प्राचीं होत्रे ददौ राजा दिशं स्वकुलवर्धनः ॥ अध्वर्यवे प्रतीचीं तु ब्रह्मणे दक्षिणां दिशम् ॥४३॥
उद्गात्रे वै तथोदीचीं दक्षिणैषा विनिर्मिता ॥ हयमेधे महायज्ञे स्वयंभूविहिते पुरा ॥ ४४ ॥

अङ्गहोममाह—हयस्येति । सर्वाणि ब्राह्मणाइत्यत्रगुर्वक्षरमार्षं । सर्वाणीत्यनेन सर्वस्यहुतत्वेनशेषभक्षणं नास्तीत्युक्तं । अङ्गहोमफलंश्रूयते । "अङ्गेअङ्गेवैपुरुषस्यपाप्मोपश्लिष्टः । अङ्गादङ्गादेवैनंपाप्मनस्तेनमुञ्चति" इति । यजमानस्यसर्वपापंनिवर्ततइत्यर्थः ॥३८॥ पूर्वंशास्त्रतःश्रपयामासेत्युक्तं तदवदानमाह—प्लक्षेति । अन्येषांयज्ञानां संबन्धिहविः वपा । प्लक्षशाखासु क्रियते अवदीयते । अश्वमेधस्ययज्ञस्य भागः हविर्भागः । वैतसः वैतसेकटेअवदातव्योभवति । शैषिकोण् । अत्रयज्ञशब्देनपशवोलक्ष्यन्ते । तथाचश्रुतिः "प्लक्षशाखायामन्येषांपशूनामवद्यन्ति वेतसशाखायामश्वस्य" इति । अत्रवेतसशाखाशब्दोवैतसकटपरः । यद्वा वेतसस्यशाखावैतसी वैतस्यांसंस्कृतोवैतसः । "यस्येतिच" इतीकारलोपः । वैतसकटस्तु पश्वासादनार्थः । "वैतसःकटोभवतिअप्सुयोनिर्वाअश्वः अप्सुजोवेतसः स्वएवैनंयोनौप्रतिष्ठापयति" इतिश्रुतेः । "वैतसकटेऽश्वंप्राञ्चमासादयति" इतिसूत्राच्च । अतोवैतसकटेवपावदानमितिव्याख्यानंचिन्त्यं ॥३९॥ अत्रसवनीयदिनानिकतीत्याकाङ्क्षायामाह—त्र्यहइति । "अश्वमेधस्यत्रीणिसवनीयान्यहानि" इतिकल्पसूत्रेण ब्राह्मणैः तन्मूलभूतब्राह्मणवाक्यैश्च । अश्वमेधः त्र्यहःसङ्ख्यातः । अश्वमेधस्यानेकाहसाध्यत्वेपिसवनीयाहानांप्राधान्यात्तद्ग्रहः । त्रीणिअहानियस्यसत्र्यहः । "अच्प्रत्यन्वव" इत्यत्रयोगविभागादच् । इदमर्धमेकंवाक्यं । तान्यहानिपरिगणयति–चतुष्टोममिति । त्रिवृत्पञ्चदशसप्तदशएकविंशइतिस्तोमचतुष्टययुक्तत्वादग्निष्टोमश्चतुष्टोमइत्युच्यते । तदनुष्ठानयुक्तत्वात्तद्व्यपदेशः । एकविंशोक्थ्ययुक्तत्वादुक्थ्यमितिज्योतिष्टोमस्यद्वितीयासंस्था तद्युक्तंद्वितीयमहः । सर्वस्तोमोतिरात्रः तद्युक्तमुत्तरमहः । द्वितीयादुत्तरंतृतीयमहइत्यर्थः ॥४०॥ एवमश्वमेधस्यत्र्यहत्वेनत्रयाणांकर्तव्यत्वेपिप्रकृतेऽश्वमेधेशास्त्रान्तरदर्शनात् विहिताअन्येपिबहवःक्रतवोराज्ञाकारिताइत्याह कारिताइत्यर्धेन ॥४१॥ केतेक्रतवइत्यपेक्षायामाह—ज्योतिष्टोमेति । अतिरात्रावितिद्विवचनेनतस्यावृत्तिरुच्यते । विनिर्मितौ अनुष्ठितौ । अन्यत्रापिविभक्तिविपरिणामेनायंशब्दअनुषज्यताम् । उक्तदिनत्रयादुत्तरेष्वहस्सुज्योतिष्टोमादयःषट्क्रतवःकारिताइत्यर्थः । शास्त्रान्तरेज्योतिष्टोमादीनामपिविहितत्वेनषोडशिग्रहणवत्तेषामप्यनुष्ठानेमहानभ्युदयइतिमन्वानेनराज्ञा तेपिकारिताइत्यर्थः । अत्र चयनयूपोच्छ्रयपशुनियोजनवपाहोमचतुष्टोमसवनानिक्रमेणवक्तव्यानीतितत्क्रमेणश्लोकाःपठितव्याः व्युत्क्रमपाठोलेखकप्रमादकृतः । ऋषिरेववा क्रममविवक्षन्प्रणिनाय ॥ ४२ ॥ अथदक्षिणादानमाह—प्राचीमिति । द्वयमेकं । स्वकुलस्य इक्ष्वाकुकुलस्य वर्धनः । बहुदक्षिणादानं ह्युचितमिक्ष्वाकुकुलस्येतिभावः ॥ ४३ ॥ एतावद्दक्षिणादानेकिं प्रमाणंतत्राह—एषादक्षिणा । विनिर्मिता विहिता । "प्रतिदिशंदक्षिणांददातिप्राचीदिग्घोतुर्दक्षिणाब्रह्मणःप्रतीच्यध्वर्योरुदीच्युद्गातुः" इत्यादिसूत्रेणेतिशेषः । स्वयंभूविहिते ब्रह्मनिर्मिते । "प्रजापतिरश्वमेधमसृज-

शि० तानेवगणयन्नाह ज्योतिष्टोमेति । ज्योतिष्टोमायुषी अग्निष्टोमायुष्टोमौप्रथमद्वितीयौ । अतिरात्रावितिद्विवचनात्तेनातिरात्रद्वयलाभः । तृतीयचतुर्थौचेत्यर्थः । निर्मितौ विधिनासंपादितौ । पञ्चमोऽभिजिच्च । षष्ठोविश्वजिच्च । आप्तोर्यामौसप्तमाष्टमौच । महाक्रतुः जातावेकवचनं । एतेमहाक्रतवइत्यर्थः ॥ ४२ ॥

[पा०] १ ख. ग. घ. छ. झ. अश्वमेधस्यचैकस्य. २ ख. घ. च. अग्निष्टोम. ३ ज. रात्रंचनिर्मितम्. ४ ग. ज. मप्तोर्यामो. ट. मप्तोर्यामौ. ५ क.–झ. अश्वमेधे. ६ क.–घ. च. छ. ज. स्वयंभुविहिते.

क्रतुं समाप्य तु तथा न्यायतः पुरुषर्षभः ॥ ऋत्विग्भ्यो हि ददौ राजा धरां तां क्रतुवर्धनः ॥४५॥
[एवं दत्त्वा प्रहृष्टोऽभूच्छ्रीमानिक्ष्वाकुनन्दनः ॥] ॥ ४६ ॥

ऋत्विजश्चाब्रुवन्सर्वे राजानं गतकल्मषम् ॥ भवानेव महीं कृत्स्नामेको रक्षितुमर्हति ॥ ४७ ॥
न भूम्या कार्यमस्माकं न हि शक्ताः स पालने ॥ रताः स्वाध्यायकरणे वयं नित्यं हि भूमिप ॥
निष्क्रयं किंचिदेवेह प्रयच्छतु भवानिति ॥ ४८ ॥

मणिरत्नं सुवर्णं वा गावो यद्वा समुद्यतम् ॥ तत्प्रयच्छ नरश्रेष्ठ धरण्या न प्रयोजनम् ॥ ४९ ॥
एवमुक्तो नरपतिर्ब्राह्मणैर्वेदपारगैः ॥ गवां शतसहस्राणि दश तेभ्यो ददौ नृपः ॥ ५० ॥
दश कोटीस्सुवर्णस्य रजतस्य चतुर्गुणम् ॥ ५१ ॥

ऋत्विजस्तु ततः सर्वे प्रददुः सहिता वसु ॥ ऋश्यशृङ्गाय मुनये वसिष्ठाय च धीमते ॥ ५२ ॥
ततस्ते न्यायतः कृत्वा प्रविभागं द्विजोत्तमाः ॥ सुप्रीतमनसस्सर्वे प्रत्यूचुर्मुदिता भृशम् ॥ ५३ ॥
ततः प्रसर्पकेभ्यस्तु हिरण्यं सुसमाहितः ॥ जांबूनदं कोटिसङ्ख्यं ब्राह्मणेभ्यो ददौ तदा ॥ ५४ ॥
दरिद्राय द्विजायाथ हस्ताभरणमुत्तमम् ॥ [काञ्चनानां शतोपेतं नवरत्नैः समाहितम् ॥]
कस्मैचिद्याचमानाय ददौ राघवनन्दनः ॥ ५५ ॥

ततः प्रीतेषु नृपतिर्द्विजेषु द्विजवत्सलः ॥ प्रणाममकरोत्तेषां हर्षपर्याकुलेक्षणः ॥ ५६ ॥
तस्याशिषोथ विधिवद्ब्राह्मणैः समुदाहृताः ॥ उदारस्य नृवीरस्य धरण्यां प्रणतस्य च ॥ ५७ ॥
ततः प्रीतमना राजा प्राप्य यज्ञमनुत्तमम् ॥ पापापहं स्वर्नयनं दुष्करं पार्थिवर्षभैः ॥ ५८ ॥

त" इतिश्रुतेः ॥ ४४ ॥ क्रतुमित्यादिश्लोकद्वयमेकान्वयं । न्यायतः शास्त्रतः । हि यस्माद्राजाददौ तस्मादृत्विजोऽब्रुवन्नित्यन्वयः । यद्यपि "महापृथिवीनदेया" इतिइदंनिषिद्धं तथाप्यत्रप्रदेशविशेषएवदत्तइति ज्ञेयं । प्रतिषेधवदत्रविधेरपिदर्शनात् केसरिदानवद्विकल्पोवा ॥ ४५–४७ ॥ नभूम्येतिसार्धश्लोकः । अशक्तौहेतुः—रताइति । स्वाध्यायकरणे स्वाध्यायाध्ययने । कथंदत्तस्यपुनरपहारस्तत्राह—निष्क्रयमिति । निष्क्रयं मूल्यं । कृत्स्नपृथिव्यामूल्यंकुतोलभ्यतेतत्राह—किंचिदिति । यथोपपन्नमित्यर्थः ॥ ४८ ॥ किंचिदित्यस्यप्रपञ्चः—मणीति । मणिरत्नं मणिश्रेष्ठं । समुद्यतं समुपस्थितं ॥४९॥ नरपतिरेवमुक्तःसन् । दश शतसहस्राणि दशलक्षमितियावत् । ददौ ॥ ५० ॥ दशेत्यर्धमेकंवाक्यं । नृपइत्यस्यपूर्वश्लोकस्थस्यात्रान्वयः । चतुर्गुणं चतुर्दशकोटीरित्यर्थः । अत्ररजतानिप्रतिनिधित्वेनदत्तानि नतुदक्षिणात्वेन । अतः "तस्माद्धिरजतमदक्षिण्यं" इतिश्रुत्यानविरोधः ॥ ५१ ॥ सर्वे ऋत्विजः सहिताःसन्तः । वसु दक्षिणाप्राप्तंधनं । अंशीकृत्यदानाय ऋश्यशृङ्गाय वसिष्ठायचददुः॥५२॥ न्यायतः शास्त्रतः । "यावदध्वर्यवेददातितदर्धंप्रतिप्रस्थात्रे तृतीयंनेष्ट्रे चतुर्थमुन्नेत्रे एतेनेतरेषांदानमुक्तंभवति" इत्युक्तक्रमेण । ततः ऋष्यशृङ्गवसिष्ठमुखेनप्रविभागंकृत्वा सुप्रीतमनसः प्रत्यूचुः । सुप्रीतमनसइतिविशेषणेन सर्वेवयंप्रीताःस्मइतिप्रतिवचनप्रकारोवगम्यते ॥ ५३ ॥ प्रसर्पकेभ्यः यज्ञदर्शनार्थमागतेभ्यः । "यावन्तोवैसदस्यास्तेसर्वेदक्षिण्याः" इतिश्रुतेः । जांबूनदं जंबूनदीप्रभवमितिहिरण्यविशेषणम् ॥ ५४ ॥ हस्ताभरणंयाचमानायकस्मैचिद्दरिद्राय तदेवददावित्यर्थः॥ ५५ ॥ ततः। यथेष्टदक्षिणादानेनेत्यर्थः ॥५६॥ तस्य तस्मै ॥ ५७ ॥ पापं पुत्रोत्पत्तिप्रतिबन्धकदुरि-

---

वि० सुवर्णं षोडशमाषकं । चतुर्गुणं चत्वारिंशत्कोटिं ॥ ५१ ॥ **ति०** अथ सर्वदक्षिणादानानन्तरं । याचमानायदरिद्राय कस्मैचित् दातव्यवस्त्वन्तराभावात् हस्ताभरणमेवददौ ॥ ५५ ॥ **ति०** दुस्तरं प्राकृतैराजभिःअप्राप्तसमाप्तिकं ॥ ५८ ॥

[पा०]१ ङ. च. ज. झ. समाप्यतुतदा. २ घ–झ. तांकुलवर्धनः. ३ ख. ङ. च. छ. झ. इदमर्धमधिकंदृश्यते. ४ ख. सुवर्णंवायद्वास्समुपकल्पितम्. ५ ख. ऋत्विग्भागं. ६ ज. इदमर्धमधिकंदृश्यते. ७ क. ङ. च. छ. झ. प्रीतेषुविधिवद्विजेषु. ८ ङ. च. झ. हर्षव्याकुलितेन्द्रियः. छ. हर्षव्याकुलितेक्षणः. ९ क–छ. झ. विविधान्ब्राह्मणैः. १० ङ.च.झ. पतितस्यच. ११ क. ङ.च. छ.झ. दुस्तरं.

ततोऽब्रवीदृश्यशृङ्गं राजा दशरथस्तदा ॥ कुलस्य वर्धनं त्वं तु कर्तुमर्हसि सुव्रत ॥ ५९ ॥
तथेति च स राजानमुवाच द्विजसत्तमः ॥ भविष्यन्ति सुता राजंश्चत्वारस्ते कुलोद्वहाः ॥ ६० ॥
[स तस्य वाक्यं मधुरं निशम्य प्रणम्य तस्मै प्रयतो नृपेन्द्रः ॥
जगाम हर्षं परमं महात्मा तमृश्यशृङ्गं पुनरप्युवाच] ॥ ६१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ॥ १५ ॥

ऋश्यशृङ्गेणदशरथस्यपुत्रेष्टिप्रारंभः ॥ १ ॥ अत्रान्तरेदेवैर्ब्रह्माणंप्रतिरावणकृतलोकपीडाप्रकारवर्णनपूर्वकंतद्वधोपायकल्पनाप्रार्थना ॥ २ ॥ अत्रान्तरेयदृच्छासमागतं विष्णुंप्रतिब्रह्मादिभिर्दशरथगृहेऽवतारप्रार्थनापूर्वकंरावणवधप्रार्थना ॥ ३ ॥ विष्णुनातान्प्रतिरावणवधप्रतिज्ञानपूर्वकंसमाश्वासनम् ॥ ४ ॥

मेधावी तु ततो ध्यात्वा स किंचिदिदमुत्तरम् ॥ लब्धसंज्ञस्ततस्तं तु वेदज्ञो नृपमब्रवीत् ॥ १ ॥
इष्टिं तेऽहं करिष्यामि पुत्रीयां पुत्रकारणात् ॥ अथर्वशिरसि प्रोक्तैर्मन्त्रैः सिद्धां विधानतः ॥ २ ॥
ततः प्रारब्धवानिष्टिं पुत्रीयां पुत्रकारणात् ॥ जुहाव चाग्नौ तेजस्वी मन्त्रदृष्टेन कर्मणा ॥ ३ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ भागप्रतिग्रहार्थं वै समवेता यथाविधि ॥ ४ ॥

तंअपहन्तीतिपापापहम् । "अपेक्लेशतमसोः" इतिहन्तेर्डप्रत्ययः । तमःपर्यायोत्र पापशब्दः । स्वर्नयनं पुत्रप्रापणद्वारास्वर्गप्रापकं । इतरैः पार्थिवर्षभैः दुष्करं । नविद्यते उत्तममस्मादित्यनुत्तमं सर्वोत्तमं । यज्ञं अश्वमेधं । प्राप्य प्रीतमनाः बभूवेतिशेषः ॥ ५८ ॥ एवंपुत्रोत्पत्तिप्रतिबन्धकसकलदुरितनिवारणक्षमेभगवदङ्गभूतब्रह्मादिदेवताराधनरूपेऽश्वमेधेनिर्वृत्ते साक्षाद्भगवदाराधनंपुत्रप्राप्तिकारणं क्रतुंसुमन्त्रोक्तंमनसिनिधाय ऋश्यशृङ्गमर्थयते—ततइति । कुलस्यवर्धनं पुत्रोत्पत्तिहेतुभूतंकर्मेत्यर्थः । त्वंतुकर्तुमर्हसीत्यन्तेइतिरध्याहार्यः ॥ ५९ ॥ पुत्रीयंकर्मकरिष्ये सुताश्चभविष्यन्तीत्युवाचेत्यन्वयः ॥ ६० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

अथदशरथाराधनव्याजेनसाधुलोकरक्षणायभूमाववतितीर्षुर्भगवानानुषङ्गिकदुष्कृद्विनाशायदेवैरभ्यर्थ्यतेपञ्चदशे—मेधावीत्यादि । ततः प्रतिज्ञानन्तरं । मेधावी मेधा धारणक्षमाधीः तद्वान् । "अस्मायामेधास्रजोविनिः" इतिविनिप्रत्ययः । वेदज्ञः अथर्वणवेदज्ञः । सः ऋश्यशृङ्गः । किंचिद्ध्यात्वा किंकर्मकर्तुमत्रोचितमितिक्षणंविचिन्त्य । मेधावितया । ततः तदुत्तरक्षणएव । लब्धसंज्ञः प्राप्तस्मृतिःसन् । तंनृपं । इदमुत्तरमब्रवीत् । द्विकर्मकोब्रुविः ॥ १ ॥ पुत्रीयां पुत्रोत्पत्तिनिमित्तभूतां । "पुत्राच्छच" इतिछप्रत्ययः । इष्टिं यागविशेषं । ते पुत्रकारणात् पुत्रनिमित्तं । "निमित्तकारणहेतुषुसर्वासांप्रायदर्शनं" इतिपञ्चमी । करिष्यामि इत्युक्तवान् ॥ २ ॥ मन्त्रदृष्टेन वेदावगतेन । कर्मणा । अग्नौजुहावच । शास्त्रदृष्टक्रमेणएकामाहुतिमकरोदित्यर्थः ॥ ३ ॥ एतच्छेषं "ततोवैयजमा-

---

ति० पुनरप्युवाच पुत्रजनककर्मणे पुनरपिप्रेरयामासेत्यर्थः ॥ ६१ ॥ इतिचतुर्दशस्सर्गः ॥ १४ ॥

शि० ततः सकलयागविस्तारकर्ता ॥ १ ॥ शि० प्रोक्तैः पुत्रेष्टिसाधकत्वेननिर्णीतैः ॥ २ ॥ शि० ततः स्वांशभूतसत्यलोकादिस्थब्रह्मादिद्वाराजगत्सृष्ट्यादिविस्तारकर्तारः साकेतस्थब्रह्मविष्णुमहेश्वराः । सगन्धर्वाः गन्धर्वसहितादेवाश्च । सिद्धाः सिद्धगणाश्च । परमर्षयश्च भागप्रतिग्रहार्थंयथाविधिसमवेताः प्रकटीभूययागेस्थिताः । वैशब्दश्चार्थे । सचहीनेप्यन्वेति । इमेसर्वेसाकेतस्थाएवेत्यत्रबीजं "त्वांनियोक्ष्यामहे" इत्यादौवक्ष्यामः । वि० चकारेणब्रह्मापिसमुच्चीयते ॥ ४ ॥

[पा०] १ क. रथोबली. २ ङ. छ. झ. ततु. ३ ख. घ. मब्रवीद्विज. ४ ख. ङ. च. छ. झ. ञ. ट. अयंश्लोकोऽधिकोदृश्यते. ५ क. ग. घ. ङ. झ. ततःप्राकामदिष्टिंतां. ६ क. च. छ. ज. भागप्रतिग्रहार्थंवैपूर्वमेवसमागताः.

ताः समेत्य यथान्यायं तस्मिन्सदसि देवताः ॥ अब्रुवँल्लोककर्तारं ब्रह्माणं वचनं महत् ॥ ५ ॥
भगवंस्त्वत्प्रसादेन रावणो नाम राक्षसः ॥ सर्वान्नो बाधते वीर्याच्छासितुं तं न शक्नुमः ॥ ६ ॥
त्वया तस्मै वरो दत्तः प्रीतेन भगवन्पुरा ॥ मानयन्तश्च तं नित्यं सर्वं तस्य क्षमामहे ॥ ७ ॥
उद्वेजयति लोकांस्त्रीनुच्छ्रितान्द्वेष्टि दुर्मतिः ॥ शक्रं त्रिदशराजानं प्रधर्षयितुमिच्छति ॥ ८ ॥
ऋषीन्यक्षान्सगन्धर्वानसुरान्ब्राह्मणांस्तथा ॥ अतिक्रामति दुर्धर्षो वरदानेन मोहितः ॥ ९ ॥
नैनं सूर्यः प्रतपति पार्श्वे वाति न मारुतः ॥ चलोर्मिमाली तं दृष्ट्वा समुद्रोपि न कंपते ॥ १० ॥
तन्महन्नो भयं तस्माद्राक्षसाद्धोरदर्शनात् ॥ वधार्थं तस्य भगवन्नुपायं कर्तुमर्हसि ॥ ११ ॥
एवमुक्तः सुरैः सर्वैश्चिन्तयित्वा ततोऽब्रवीत् ॥ हन्तायं विदितस्तस्य वधोपायो दुरात्मनः ॥ १२ ॥
तेन गन्धर्वयक्षाणां देवदानवरक्षसाम् ॥ अवध्योस्मीति वागुक्ता तथेत्युक्तं च तन्मया ॥ १३ ॥
नाकीर्तयदवज्ञानात्तद्रक्षो मानुषांस्तदा ॥ तस्मात्स मानुषाद्वध्यो मृत्युर्नान्योस्य विद्यते ॥ १४ ॥

नस्य" इत्यादिनावक्ष्यति । मध्येभगवदवतरणस्यनिमित्तान्तरंदेवताभ्यर्थनंदर्शयति—ततइत्यादिना । ततः तत्राश्वमेधे देवादयः । यथाविधि यथाक्रमं । भागप्रतिग्रहार्थं स्वस्वहविर्भागस्वीकारार्थं । समवेताः संमिलिताः । यज्ञसदसीतिशेषः । अनुक्तसमुच्चयार्थेनचकारेण ब्रह्मापिसमुच्चीयते ॥ ४ ॥ ताः देवताः । तस्मिन् प्रकृते । सदसि अश्वमेधसदसि । यथान्यायं यथाक्रमं । समेत्य लोककर्तारं स्वस्वामिनं ब्रह्माणं । महत् फलद्वारागुरुतरं । वचनं ब्रुवन् ॥ ५ ॥ त्वत्प्रसादेन जनिताद्वीर्यादित्यन्वयः ॥ ६ ॥ कोमत्प्रसादः कथंभवतांतत्प्रतीकाराशक्तिस्तत्राहुः—त्वयेति । वरः अस्माभिरवध्यत्वरूपः । तं वरं । मानयन्तः पूजयन्तः । सर्वं पीडनं ॥ ७ ॥ बाधनमेवोपपादयन्ति—उद्वेजयतीत्यादिना । उद्वेजयति भीषयति । उच्छ्रितान् उन्नतान्लोकपालान् । त्रिदशराजानं । समासान्तस्यानित्यत्वाट्टजभावः । प्रधर्षयितुं तिरस्कर्तुं । स्थानात्प्रच्यावयितुमित्यर्थः ॥ ८ ॥ असुरान् राहुप्रभृतीन् । अतिक्रामति पीडयतीतियावत् ॥ ९ ॥ एनं रावणंप्रति नप्रतपति मन्द्रकिरणोभवति । क्रीडापर्वतसञ्चारादिदशायामितिभावः । पार्श्वे अस्येतिशेषः । नवाति पुष्पवाटिकादिषु पुष्पपतनादिभयादितिभावः । चलोर्मिमाली सदाचञ्चलस्वभावतरङ्गपङ्क्तिमान् नकंपते गर्वितोऽयमुल्ललतीतिशोषणभयादितिभावः ॥ १० ॥ तदिति भयादितिभावः । भयं उत्पन्नमितिशेषः । कर्तुं चिन्तयितुं ॥ ११ ॥ उक्तः ब्रह्मेतिशेषः । चिन्तयित्वा उपायमितिशेषः । हन्तेत्युपायस्मरणजहर्षे ॥१२॥ अयंशब्दार्थमाह—तेनेति । तत् तथोक्तमित्यन्वयः ॥ १३ ॥ तदा अवध्यत्ववरणावसरे । अवज्ञा-

---

वि० समेत्य अन्तर्धानशक्त्याइतरानवलोकमितिशेषः । **शि०** लोकनं लोकः दृष्टिः । तत्कर्तारं यज्ञद्रष्टृत्वेनाहूतम् ॥ ५ ॥ **शि०** हेभगवन् त्वत्प्रसादेन त्वत्कृपया । प्राप्तं यद्वीर्यं साकेताधीशातिरिक्तसर्वावध्यत्वंतस्माद्वीर्यात् नोस्माकं विहारास्पदीभूतान्ये सर्वलोकास्तान् रावणोनामराक्षसोबाधते । तं रघुनाथेच्छयासाकेतादवतीर्णंरावणं शासितुं स्वांशभूतदेवादिद्वारासाक्षाद्वानशक्नुमः । एतेन साकेतपुरवासिनांयथाकामंसर्वत्रगमनमितिव्यज्यते । यथाच साकेताद्रावणावतारः तथातज्जन्मप्रतिपादकग्रन्थेवक्ष्यामः ॥६॥ **ति०** प्रधर्षयितुमिच्छतीत्युक्तेः एतदुत्तरकालमिन्द्रजित्कृतइन्द्रबन्धइतिज्ञायते ॥ ८ ॥ **शि०** अवात् ईश्वरस्यापिरक्षकात्रामात्प्राप्तंयज्ज्ञानंनियोगःआज्ञा इतःप्रभृतिप्राप्तरक्षश्शरीरेमांनज्ञास्यसीतिसंकुचितबोधोवा इतःप्रभृतिमदतिरिक्तमेवज्ञास्यसीतिवा । तस्मात् । तद्रक्षो रावणः । तदा वरयाचनसमये । मानुषान् " परमात्मानराकृतिः " इत्यागमगम्यंसाकेताधीशंनित्यद्विभुजं नाकीर्तयत् । तस्माद्धेतोः सः मानुषात् नराकृतिपरमात्मनोरामात् वध्यः । अन्यः तस्माद्भिन्नः अस्य मृत्युः विघातकोनविद्यते । बहुत्वमादरार्थं । तेनसाकेताधीशरघुनाथस्यविष्ण्वादिवैलक्षण्यंईश्वरेश्वरत्वंचव्यक्तं । एतेन "नाकीर्तयदवज्ञानात्" इत्यस्य अवज्ञानादनादरात्मानुषान्नाकीर्तयदित्यर्थःप्रत्युक्तः । दशरथनहुषादीनांदेवसाहाय्यकर्तृत्वस्यप्रसिद्धत्वान्मानुषानादरस्यासंभवात् । किंचरावणस्य सुराद्यवध्यत्वे वरदानमेवकारणंवा रावणबलवत्त्वंवा उभयंवा । नप्रथमं । तात्कालिकमानुषैरेवतस्यवध्यत्वेसिद्धे तद्वधार्थंपरमात्मप्रार्थनाव्यर्थास्यात् । नद्वितीयं । वाल्यादिभिःकृततत्पराभवस्यासंभवापत्तेः । अतएवनतृतीयं । किंचविष्ण्ववध्यत्वंस्वस्यरावणेनप्रार्थितंवानवा । नप्रथमं । तन्मतेरामस्यापिविष्णवभिन्नत्वेनतेनाप्यवध्यत्वापत्तेः । नान्त्यं । मानुषानादरोक्ते-

[पा०] १ ङ. झ. वचनंततः. २ ङ. झ. भगवंस्तदा. ३ घ. तस्यसहामहे. ४ ख. ग. विहितस्तस्य. ५ घ. मानुषान्प्रति.

एतच्छ्रुत्वा प्रियं वाक्यं ब्रह्मणा समुदाहृतम् ॥ सर्वे महर्षयो देवा प्रहृष्टास्तेऽभवंस्तदा ॥ १५ ॥
एतस्मिन्नन्तरे विष्णुरुपयातो महाद्युतिः ॥ शङ्खचक्रगदापाणिः पीतवासा जगत्पतिः ॥ १६ ॥

नात् अवमानात् । मानुषात् मानुषेण । मृत्युः मारकः ॥ १४ ॥ प्रहृष्टाः यथाकथंचिद्वधोपायसंभावनयेतिभावः ॥ १५ ॥ अथपरमकारुणिकोभगवान् "परित्राणायसाधूनांविनाशायचदुष्कृताम् ॥ धर्मसंस्थापनार्थायसंभवामियुगेयुगे" इत्युक्तरीत्या धर्मसंस्थापनादित्रयकृते स्वाराधकदशरथमनोरथपरिपूरणायचावतितीर्षुराजगामेत्याह—एतस्मिन्निति। एतस्मिन्नन्तरे रक्षापेक्षासमये । अनेनचिरमस्यावसरप्रतीक्षत्वंगम्यते । "सर्वज्ञोपिहिदेवेशस्सदाकारुणिकोपिसन् । संसारतन्त्रवाहित्वाद्रक्षापेक्षांप्रतीक्षते" इतिह्युक्तं । विष्णुः सर्वान्तर्यामितयाव्याप्यवर्तमानः भोगादप्यासेधनमेववरमितिस्थितइत्यर्थः । "त्वंमेऽहंमे" इत्यादि । महाद्युतिः रक्षणावकाशलाभसमुदितहर्षप्रकर्षकृतकान्तिविशेषयुक्तः । अनेनइतःपूर्वंसंसारिजनदुर्दशावलोकनेनदूयमानमानसत्वमुक्तं । "सएकाकीनरमेत" इतिश्रुतेः । शङ्खचक्रगदापाणिः आश्रितानांरक्षणापेक्षायां रक्षणोपकरणग्रहणायविलंबो माभूदिति सर्वदातैरुपेतः । "पातुप्रणतरक्षायांविलंबमसहन्निव ॥ सदापञ्चायुधीं बिभ्रत्स नः श्रीरङ्गनायकः" इत्यभियुक्तोक्तं । पीतवासाः आश्रितरक्षणत्वरयाबद्धकक्षः । जगत्पतिः उक्तसकलविशेषहेतुभूतस्वस्वामिभावसंबन्धवान् । उपयातः वैकुण्ठाद्दशरथयज्ञवाटमाजगाम ॥१६॥

निष्प्रयोजनत्वापत्तेरित्यतोस्मदुक्तएवार्थोग्रन्थकृदभिमतः । अतएवविष्णुप्रहृतचक्रेणनरावणमृतिः । वक्ष्यतिचक्रव्रणवत्त्वंरावणस्येतीतिदिक् । रघुनाथाज्ञयारावणावतारेप्रमाणं " प्रतापीराघवसखोभ्रात्रावैसहरावणः " इत्यादि ॥ १४ ॥ **तनि०** एतस्मिन्नन्तरे तेषांरक्षापेक्षावसरे । एतस्मिन्नन्तरे क्षणंविलंबितंचेत्तएवागच्छन्ति ततःपूर्वमेवगन्तव्यमिति । एतस्मिन्नन्तरे देवगोष्ठ्यांयदारक्षाप्रसङ्गोजातस्तदैवज्ञातमिति सर्वज्ञस्यास्याश्रितरक्षानुकूल्यमार्जवंचव्यञ्जितं । एतस्मिन्नन्तरे अन्यस्यचेद्रक्षणमनुमतंस्वस्यरक्ष्यलाभोनस्यादिति "अतन्त्रितचमूपतिप्रहितहस्तं" इत्यादिवत् त्वराधिक्यंगम्यते । उपयातः देवानामपित्वरातिशयेनमध्येमार्गेमेलनंयथानस्यात् तथोपयातः । यस्यफलापेक्षासएवफलप्राप्त्यर्थंस्वयमेवागच्छतीत्युपेक्षामकृत्वाउपयातः । रक्षणप्रसङ्गविच्छेदभयेनयावदासनमपरिज्ञातएवोपयातः "सचापिरामःपरिषद्गतःशनैः" इत्यादिवत् । विष्णुरुपयातः पूर्वमेवतत्र स्थितोपिइदानींविग्रहेणाभिव्यक्तःसन्उपयातः । सर्वेश्वरोप्युपयातइतिसौलभ्यमुक्तं । एतस्मिन्नन्तरेविष्णुरुपयातइति देवाःविधिशिवादिषुकंचनरावणहननेप्रार्थयेयुः तदातेतद्धननाशक्त्यानोत्तरंब्रूयुः । तदातेषामवमतिःशरणागतारक्षणजन्यमानसखेदश्च स्यातामिति तेषामवमानमानसखेदौमाभूतामिति अविलंबितमुपयातः । महाद्युतिरुपयातइति "दिविसूर्यसहस्रस्यभवेद्युगपदुत्थिता । यदिभाःसदृशीसास्याद्भासस्तस्यमहात्मनः"इत्याद्युक्तदुस्सहाप्रमेयतेजोवत्त्वेपितादृशतेजसःसर्वजनाह्लादकत्वंव्यज्यते । विष्णुर्महाद्युतिरिति स्वरूपवत्द्युतेरप्यपरिमेयत्वंध्वनितम् । विष्णुरुपयातइति उपगमनसमकालमेवशिवादीनामवमानभयमिन्द्रादीनांरावणभयंचनिवृत्तमितिध्वनितम् । शङ्खचक्रगदापाणिः "नैनंसूर्यःप्रतपति"इत्याद्युक्तरीत्यास्वस्वव्यापारेष्वपिसंकोचवन्तःस्वपदभ्रंशशङ्किनोदेवाःसभासुनिश्शङ्कंकिलरावणवधोपायमालोचयन्ति । तदानीमेवचेद्रावणस्तत्रागच्छतितदासकलदेवशिरश्छेदकःस्यात् । सकललोकशरण्यत्वहानिःस्वस्यभवेदिति ततःपूर्वमेवायुधादिसकलयुद्धपरिकरयुक्तएवागतः नतुभोजनपरिकरयुक्तइति । भागप्रतिग्रहार्थत्वंत्वानुषङ्गिकं । पीतवासाः "तस्यमहारजतंवासः" इत्याद्युक्तपीतांबरयुक्तः । जगत्पतिः जगत्पोषकः । जगतःपोषणंनाम अन्येभ्यःपरिभवनिवारणम् । एवंविधस्योपास्यत्वंशरणागतिमन्त्रोक्तचरणपदोपलक्षितप्रपत्तव्यविग्रहवैशिष्ट्यंचव्यञ्जितम् । **शिरो०** एतस्मिन्नन्तरे देवब्रह्मसंवादानन्तरकाले । महाद्युतिः समाधिकरहितप्रकाशविशिष्टः । शङ्खचक्रगदापाणिः शङ्खचक्रगदाभिःपातिलोकमितिशङ्खचक्रगदापोविष्णुस्तेनअण्यतेप्रार्थनावचनमुच्चार्यतेअसौसः । किंच शङ्खचक्रसहितागदायस्यसशङ्खचक्रगदोविष्णुस्तेनआसमन्तात्पाण्यतेस्तूयतइतिपाणिः । किंच शङ्खादयोरेखारूपेणपाणावस्यसः । पीतवासाः । पीतवस्त्रधारी जगत्पतिः सर्वलोकस्वामी अविष्णुः अस्यवासुदेवस्यविष्णुर्व्यापकःविष्णोर्विष्णुरित्यर्थः । किंच विष्णुःब्रह्मविष्णुमहेशव्यापकःरामइत्यर्थः । किंच आसमन्तादेतिसर्वंव्याप्नोतीतिएःविष्णुःतस्यविष्णुर्व्यापकः । अन्तर् अन्तःबन्धकः प्रापकइत्यर्थः । र्रकाराक्षरोयस्यसरामइत्यर्थः । किंच अन्तः प्रापकः रः रकाराक्षरोयस्यसः अन्तरः । आसमन्तादेतिसर्वंव्याप्नोतीति एर्विष्णुः तस्यविष्णुर्व्यापकः सएवसइतिकर्मधारयः । उपयातः प्राप्तः । अन्तरइत्यादिपक्षद्वये एतस्मिन् देवब्रह्मसंवादानन्तरकालेइत्यर्थोबोध्यः । अस्मिन्प्रकरणे विष्णुशब्दः ब्रह्मादित्रिदेवव्यापकपरएव नतुचतुर्भुजेरूढः । अतएव "ततोनारायणोविष्णुः" इतिवक्ष्यमाणपद्ये न नारायणपदवैयर्थ्यं । अन्यथा द्वयोस्तत्रैवरूढत्वेनान्यतरवैयर्थ्यंदुर्निवारंस्यात् । अतएव "प्रभोःप्रभुः" इतिवक्ष्यमाणंसानुकूलं ॥ १६ ॥

[वैनतेयं समारुह्य भास्करस्तोयदं यथा ॥ तप्तहाटककेयूरो वन्द्यमानस्सुरोत्तमैः ॥] ॥ १७ ॥
ब्रह्मणा च समागम्य तत्र तस्थौ समाहितः ॥ तमब्रुवन्सुराः सर्वे समभिष्टूय संनताः ॥ १८ ॥
त्वां नियोक्ष्यामहे विष्णो लोकानां हितकाम्यया ॥ १९ ॥
राज्ञो दशरथस्य त्वं अयोध्याधिपतेर्विभोः ॥ धर्मज्ञस्य वदान्यस्य महर्षिसमतेजसः ॥ २० ॥
तस्य भार्यासु तिसृषु ह्रीश्रीकीर्त्युपमासु च ॥ विष्णो पुत्रत्वमागच्छ कृत्वाऽऽत्मानं चतुर्विधम् ॥ २१ ॥
तत्र त्वं मानुषो भूत्वा प्रवृद्धं लोककण्टकम् ॥ अवध्यं दैवतैर्विष्णो समरे जहि रावणम् ॥ २२ ॥
स हि देवान्सगन्धर्वान् सिद्धांश्च ऋषिसत्तमान् ॥ राक्षसो रावणो मूर्खो वीर्योत्सेकेन बाधते ॥ २३ ॥
ऋषयस्तु ततस्तेन गन्धर्वाप्सरसस्तथा ॥ क्रीडन्तो नन्दनवने क्रूरेण किल हिंसिताः ॥ २४ ॥
वधार्थं वयमायातास्तस्य वै मुनिभिः सह ॥ सिद्धगन्धर्वयक्षाश्च ततस्त्वां शरणं गताः ॥ २५ ॥
त्वं गतिः परमा देव सर्वेषां नः परन्तप ॥ वधाय देवशत्रूणां नृणां लोके मनः कुरु ॥ २६ ॥
एवमुक्तस्तु देवेशो विष्णुस्त्रिदशपुङ्गवः ॥ पितामहपुरोगांस्तान्सर्वलोकनमस्कृतः ॥
अब्रवीत्त्रिदशान्सर्वान्समेतान्धर्मसंहितान् ॥ २७ ॥

॥१७॥ तत्र सदसि । ब्रह्मणा समागम्य । समाहितः करिष्यमाणरक्षणकृत्येएकाग्रः । तस्थौ । तं आश्रितरक्षणसन्नद्धं । सर्वेसुराः ब्रह्मादयः । पितामहपुरोगमानित्युपसंहारात् । समभिष्टूय सम्यक्स्तुत्वा । संनताः सम्यक्नताः प्रणताःसन्तः । अब्रुवन् ॥ १८ ॥ अर्धमेकंवाक्यं । हेविष्णो लोकानां हितकाम्यया हितेच्छया । त्वां नियोक्ष्यामहे उत्साहयिष्यामहे । "योगः सन्नहनोपायध्यानसंगतियक्तिषु" इत्यमरः । "स्मारयेत्वांनशिक्षये" इतिवत् । केवलंत्वांप्रोत्साहयिष्यामः । स्वयमेवस्वकीयरक्षणेप्रवृत्तत्वादितिभावः । यदिनियोजनमेवार्थःस्यात् तदापूर्वश्लोकोक्तंअभिष्टूयसंनताइत्येतद्विरुद्ध्येत । किंच नियोजनमत्रप्रार्थनमेव । एवमुत्तरत्रभगीरथवचने "हरस्तत्रनियुज्यतां" इतिवक्ष्यति ॥ १९ ॥ किंनियोज्यमित्यत्राहद्वाभ्यां—राज्ञइत्यादि । पितृभावयोग्यत्वपराणिविशेषणानि ॥ २० ॥ तस्येति यजमानोहस्तेननिर्दिश्यते । ह्रीश्रीकीर्तयोदक्षकन्याः ताउपमायासांतास्तथा । चातुर्विध्यविधानं रावणरावणिलवणगन्धर्वविनाशाय ॥ २१ ॥ ममपुत्रभावेनभवतांकिंप्रयोजनंतत्राहुः—तत्रेति । तत्र दशरथभार्यासु । प्रवृद्धं वरबलभुजबलैरभिवृद्धम् । मानुषभावःकिमर्थं भजनीयस्तत्राहुः—अवध्यंदैवतैरिति । "कृत्यानांकर्तरिवा" इतिपक्षेतृतीया ॥ २२ ॥ सकिमर्थंहन्तव्यस्तत्राहुः—सहीति । वीर्योत्सेकेन वीर्यकृतगर्वेण ॥ २३ ॥ ततः वीर्योत्सेकात् । क्रूरेण तेन रावणेन । ऋषयो हिंसिताः । क्रीडन्तः क्रीडन्त्यः । लिङ्गविपर्ययआर्षः । मिथुनतयाचरतांहिंसनात्क्रूरेणेत्युक्तं । किलेत्यैतिह्ये ॥ २४ ॥ तस्य वधार्थं वयं मुनिभिःसहायाताः । त्वत्समीपमितिशेषः । सिद्धादयश्चायाताः । ततः रावणवधार्थं । त्वां शरणं उपायंगताः ॥ २५ ॥ रुद्रादिषुविद्यमानेष्वहमेवकिमर्थमर्थ्यइत्यत्राहुः—त्वमिति । हेदेव त्वं नः परमागतिः उपायः । नान्ये । परान्शत्रून्तापयतीतिपरंतपः । "द्विषत्परयोस्तापेः" इतिखच् । अनेनशत्रुवधसामर्थ्यमुक्तं । मनःकुरु । अवतरितुमितिशेषः । देवशत्रूणामितिबहुवचनेन रावणरावणिलवणगन्धर्वादीनामपिवधोऽर्थितः । अनेनाभिप्रायेणपूर्वं "कृत्वात्मानंचतुर्विधं" इत्युक्तम् ॥ २६ ॥ एवमित्यादिसार्धश्लोकएकान्वयः । पितामहपुरोगान् ब्रह्मप्रधानान् । धर्मसंहितान् शरणागतिरूपधर्मसंयु-

---

तिल० आत्मानं सोपकरणमात्मानं । " अन्येद्युःपाञ्चजन्यात्माकैकेय्यांभरतोऽभवत् । तदन्येद्युस्सुमित्रायामनन्तात्माच लक्ष्मणः । सुदर्शनात्माशत्रुघ्नोद्वौजातौयुगपत्प्रिये " इतिपाद्मोक्तेः । अत्रात्मानमित्युक्त्या शङ्खचक्रानन्तानामपिभगवद्रूपतासूचिता । हुंकारेणभगवानिव पाञ्चजन्यश्शब्दमात्रेणसकलभुवनक्षोभकत्वाद्विष्णुतुल्यएवेतिबोध्यं ॥ २१ ॥

[पा०] १ अयंश्लोकः ख. ङ. च. छ. झ. पुस्तकेष्वेवदृश्यते. २ ङ. च. ज. झ. अयोध्याधिपतेर्विभो. ३ ङ. झ. अस्य भार्यासु. ४ घ. ह्रीश्रीकीर्तिसमासुच. ५ ङ. च. छ. झ, वीर्योद्रेकेणबाधते. ६ ङ. च. छ. झ. नन्दनवनेरौद्रेणविनिपातिताः. क. ख. घ. ज. नन्दनवनेरौद्रेणकिल.

भयं त्यजत भद्रं वो हितार्थं युधि रावणम् ॥ सपुत्रपौत्रं सामात्यं समित्रज्ञातिबान्धवम् ॥ २८ ॥
हत्वा क्रूरं दुरात्मानं देवर्षीणां भयावहम् ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥
वत्स्यामि मानुषे लोके पालयन्पृथिवीमिमाम् ॥ २९ ॥
एवं दत्त्वा वरं देवो देवानां विष्णुरात्मवान् ॥ मानुषे चिन्तयामास जन्मभूमिमथात्मनः ॥ ३० ॥
ततः पद्मपलाशाक्षः कृत्वाऽऽत्मानं चतुर्विधम् ॥ पितरं रोचयामास तदा दशरथं नृपम् ॥ ३१ ॥
ततो देवर्षिगन्धर्वाः सरुद्राः साप्सरोगणाः ॥ स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनम् ॥ ३२ ॥

तमुद्धतं रावणमुग्रतेजसं प्रवृद्धदर्पं त्रिदशेश्वरद्विषम् ॥
विरावणं साधु तपस्विकण्टकं तपस्विनामुद्धरतं भयावहम् ॥ ३३ ॥
तमेव हत्वा सबलं सबान्धवं विरावणं रावणमुग्रपौरुषम् ॥
स्वर्लोकमागच्छ गतज्वरश्चिरं सुरेन्द्रगुप्तं गतदोषकल्मषम् ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

तान् ॥ २७ ॥ भयमित्यादिसार्धश्लोकद्वयमेकान्वयम् । भयंत्यजत । वः युष्माकं । भद्रं अस्तु । यस्मादहं सर्वेषांहितार्थं । रावणंहत्वा धर्मसंस्थापनायदशवर्षसहस्राणिवत्स्यामीतियोजना । शङ्खचक्रगदापाणिरुपयातइतिहिपूर्वमुक्तं ॥ २८ ॥ २९ ॥ आत्मवान् सर्वांशेषी । मानुषे मनुष्येषु । जात्येकवचनं । चिन्तयामास यथादेवैराज्ञप्तंतथेतिशेषः । जन्मभूमिं जन्मस्थानं ॥ ३० ॥ ततः चिन्तानन्तरं । पद्मपलाशाक्षः दशरथगुणस्मरणकृतनयनविकासोक्तिः । यद्वा । पद्मपलाशाक्षः सर्वैःस्पृहणीयनयनयुगलः । तथाच सर्वस्पृहणीयःस्वयमन्यंस्पृहयामास । यद्वा । "तस्ययथाकप्यासंपुण्डरीकमेवमक्षिणी" इत्युक्तरीत्यापरत्वचिह्नपुण्डरीकाक्षत्वयुक्तः । एवंच सर्वस्मात्परोपिजन्मरोचयामास । यथाजनिमतोजन्महानिरभिलषिता तथाजनिरहितस्यापिजनिरभिलषितेत्यर्थः । दुर्लभंह्यभिलषितं भवति । कृत्वात्मानंचतुर्विधं जन्माभिलाषेपिदशरथगुणातिरेकेणचतुर्विधशरीरपरिग्रहमभिलषितवान् । आत्मानं स्वशरीरं । चतुर्विधं पायसविभागक्रमेण । पितरं "पितापुत्रेणपितृमान्योनियोनौ" इत्युक्तरीत्या सर्वपिता स्वपुत्रंकंचित् पितरमभिललाष । रोचयामास ऐच्छत् । तदा रक्षणोद्योगसमये । दशरथंनृपं "गुणैर्दशरथोपमं" इत्युक्तरीत्या जनित्वार्जितैःस्वाभाविकैश्चगुणैःस्वसदृशंदेवोक्तंदशरथमेवस्वजन्मभूमित्वेन निश्चितवानित्यर्थः ॥ ३१ ॥ ततः भगवदिच्छानन्तरं । सरुद्राइत्यनुवादात् पूर्वंरुद्रोपिशरणागतइतिसिद्धं । दिव्यरूपाभिः दिव्यात्मस्वरूपविषयिणीभिः । स्तुतिभिः स्तुतिरूपप्रबन्धैः । तुष्टुवुः श्लाघयामासुः । मधुसूदनमिति मधुवदयमपिनिरसनीयइत्याशयेनोक्तं ॥ ३२ ॥ उक्तमर्थंसर्गान्तेपुनःसंगृह्णाति—तमिति । उद्धतं जन्मतएवोद्धतं । तं प्रसिद्धं । उग्रतेजसं उग्रप्रतापं वरदानेनप्रवृद्धदर्पं । लोकान्विरावयतीतिविरावणं । सर्वलोकानामाक्रन्दयितारं । तपस्विनांकण्टकं शत्रुं । "क्षुद्रेशत्रौचकंटकः" इतिवैजयन्ती । अतएव तपस्विनांभयावहं तं रावणं । साधु निश्शेषं । उद्धर उन्मूलय ॥ ३३ ॥ एवकारेणविभीषणव्यवच्छेदः । स्वर्लोकं वैकुण्ठं । कचित्स्वलोकमितिपाठः । चिरं चिरकालस्थायी । अनेन ब्रह्मलोकादिव्यावृत्तिः । सुरेन्द्रेतिसंबोधनं । गुप्तं अस्मदादिभिःदुरधिगमं । "अत्यर्कानलदीप्तंतत्स्थानंविष्णोर्महात्मनः । स्वयैवप्रभया राजन्दुष्प्रेक्षंदेवदानवैः" इतिमहाभारतोक्तेः । गतदोषकल्मषं दोषाः रागद्वेषादयः । गतानि तद्रूपकल्मषाणियस्मात्तत्तथा । अनेनेन्द्रलोकादिव्यावृत्तिः । गतज्वरः आश्रितसंरक्षणेनगतव्यथः । अनेन पुनःप्राप्तिपर्यन्तं संसारिविषये कदैतेनिस्तरिष्यन्तीति चिन्ताकुलत्वमुक्तं । आगच्छेत्यनेन वैकुण्ठादवतीर्णत्वंगम्यते । अत्रस्वर्लोकपदस्येन्द्रलोकपरत्वे गुप्तत्वगतदोषकल्मष-

---

ति० चिन्तयामास योग्यत्वेनविचारयामास ॥ ३० ॥ इतिपञ्चदशस्सर्गः ॥ १५ ॥

[पा०] १ घ. ङ. च. छ. झ. समन्त्रिज्ञातिबान्धवम्. २ ङ. च. छ. झ. क्रूरंदुराधर्षं. ३ घ. तदादेवर्षिगन्धर्वाः.

षोडशः सर्गः ॥ १६ ॥

देवैर्विष्णुंप्रतिरावणस्यब्रह्मवरान्मनुष्येतरावध्यत्वनिवेदनपूर्वकंमानुषभावेनावतारस्यतदुपायत्वनिवेदनम् ॥ १ ॥ ततोविष्णुनाभुव्यवतारादिप्रतिज्ञानपूर्वकमन्तर्धानम् ॥ २ ॥ तथादशरथस्ययज्ञाग्निमध्यात्प्रादुर्भूतेनदिव्यभूतेनदशरथहस्तेदिव्यपायसपूर्णस्वर्णपात्रसमर्पणम् ॥ ३ ॥ तथातत्पायसस्यपुत्रहेतुत्वकथनेनपत्नीभ्योदानचोदनपूर्वकमन्तर्धानम् ॥ ४ ॥ कौसल्यादिभिर्दशरथदत्तदिव्यपायसप्राशनाद्गर्भधारणम् ॥ ५ ॥

ततो नारायणो विष्णुर्नियुक्तः सुरसत्तमैः ॥ जानन्नपि सुरानेवं श्लक्ष्णं वचनमब्रवीत् ॥ १ ॥
उपायः को वधे तस्य राक्षसाधिपतेः सुराः ॥ यमहं तं समास्थाय निहन्यामृषिकण्टकम् ॥ २ ॥
एवमुक्ताः सुराः सर्वे प्रत्यूचुर्विष्णुमव्ययम् ॥ मानुषीं तनुमास्थाय रावणं जहि संयुगे ॥ ३ ॥
स हि तेपे तपस्तीव्रं दीर्घकालमरिन्दम ॥ येन तुष्टोऽभवद्ब्रह्मा लोककृल्लोकपूर्वजः ॥ ४ ॥
संतुष्टः प्रददौ तस्मै राक्षसाय वरं प्रभुः ॥ नानाविधेभ्यो भूतेभ्यो भयं नान्यत्र मानुषात् ॥ ५ ॥
अवज्ञाताः पुरा तेन वरदाने हि मानवाः ॥ ६ ॥
एवं पितामहात्तस्माद्वरं प्राप्य स दर्पितः ॥ उत्सादयति लोकांस्त्रीन्स्त्रियश्चाप्यपकर्षति ॥
तस्मात्तस्य वधो दृष्टो मानुषेभ्यः परन्तप ॥ ७ ॥
इत्येतद्वचनं श्रुत्वा सुराणां विष्णुरात्मवान् ॥ पितरं रोचयामास तदा दशरथं नृपम् ॥ ८ ॥
स चाप्यपुत्रो नृपतिस्तस्मिन्काले महाद्युतिः ॥ अयजत्पुत्रियामिष्टिं पुत्रेप्सुररिसूदनः ॥ ९ ॥
स कृत्वा निश्चयं विष्णुरामन्त्र्य च पितामहम् ॥ अन्तर्धानं गतो देवैः पूज्यमानो महर्षिभिः ॥१०॥

त्वादिविरोधः । अन्तरिक्षादुपरितनलोकमात्रस्य स्वर्गपदवाच्यत्वात् । अतएवहि कचिद्ब्रह्मलोकादावपिस्वर्गपदप्रयोगः । "ब्रह्मलोकंप्रयास्यति" इत्यत्रापि ब्रह्मणःस्वस्य लोकं अप्राकृतस्थानं परमपदमिति व्याख्यातं । स्वलोकमितिसम्यक्पाठः । सुरेन्द्रः विष्वक्सेनः ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चदशःसर्गः ॥ १५ ॥

एवंमनुष्यलोकेदशरथपुत्रत्वेनावतीर्यरावणवधःकर्तव्यइत्युक्तं तत्र किंमयाउपेन्द्रादिवत्स्वस्वरूपेणस्थातव्यं उतप्रकारान्तरेणेति भगवान्बहुमानार्थंपृच्छति—ततइत्यादि । नरिष्यन्ति ननश्यन्तीतिनराः नित्यवस्तूनि "अन्येभ्योपिदृश्यते" इतिडप्रत्ययः । "सुप्सुपा" इतिनगनैकादिवत्समासः । नराणांसमूहोनारं "तस्यसमूहः" इत्यण् । नारं अयनं वासस्थानं यस्यासौनारायणः "पूर्वपदात्संज्ञायामगः" इतिणत्वं । सर्वान्तर्यामीत्यर्थः । यद्वा नाराणामयनंनारायणः इध्मव्रश्चनःपलाशशातनइत्यादिवल्ल्युडन्तस्यापिपुंल्लिङ्गत्वं । एवंसर्वस्मात्परोपि सुरसत्तमैर्नियुक्तइत्याश्रितपारतन्त्र्यमुच्यते । तादृशोविष्णुः । जानन्नपि उत्तरनिश्चयज्ञोपि । सन्मानार्थं श्लक्ष्णं मधुरं । वचनं अब्रवीत् ॥ १ ॥ आस्थाय स्वीकृत्य । यमुपायमास्थाय तंनिहन्यां सउपायः कइत्यन्वयः ॥ २ ॥ मानुषीं नतुदैवीम् ॥ ३ ॥तत्रहेतुमाह—सहीति । लोककृत्त्वेहेतुः लोकपूर्वजइति । लोकशब्दोत्र देवादिजनपरः ॥४॥ मानुषादन्यत्र मानुषंविना । नानाविधेभ्योभूतेभ्योभयंनेतिवरंप्रददावित्यन्वयः ॥ ५ ॥ अभयंकुतोनदत्तंमानुषेभ्यइत्यत्राह—अवज्ञाताइति ॥ ६ ॥ दर्पितः संजातदर्पः । प्रकृतमुपसंहरति—तस्मादिति ॥ ७ ॥ पितरमिति मनुष्यरूपेणावतरितुमितिशेषः ॥ ८ ॥ तस्मिन्काले भगवदवतितीर्षाकाले । पुत्रियामित्यत्रह्रस्वआर्षः ॥ ९ ॥ निश्चयं मनुष्यभूतएवावतरिष्यामीति

ति० लोकपूर्वजः सर्वलोकसमष्टित्वात् " हिरण्यगर्भस्समवर्तताग्रे " इतिश्रुतेश्च ॥ ४ ॥ **ती०** दृष्टः निश्चितः ॥ ७ ॥

[पा०] १ ख. ग. नारायणोदेवोनियुक्तः. २ घ. सुरांश्चैवं. ३ घ. ङ. च. छ. झ. मानुषंरूपमास्थाय. ४. क. घ. ङ. छ. ज. झ. दीर्घकालमरिंदमः. ५ ख. ग. घ. ज. लोककृल्लोकपूजितः. ६ क. ग. घ. ज. वरदानेनमानवाः. ७ ङ. झ. द्वरदानेनगर्वितः. च. छ. द्वरंप्राप्यसगर्वितः. ८ क.—च. ज. प्यपकर्षति. झ. प्युपकर्षति. ९ ख. घ. ज. महात्मभिः. क. महाद्युतिः.

ततो वै यजमानस्य पावकादतुलप्रभम् ॥ प्रादुर्भूतं महद्भूतं महावीर्यं महाबलम् ॥ ११ ॥
कृष्णरक्तांबरधरं रक्ताक्षं दुन्दुभिस्वनम् ॥ स्निग्धहर्यक्षतनुजश्मश्रुप्रवरमूर्धजम् ॥ १२ ॥
शुभलक्षणसंपन्नं दिव्याभरणभूषितम् ॥ शैलशृङ्गसमुत्सेधं दृप्तशार्दूलविक्रमम् ॥ १३ ॥
दिवाकरसमाकारं दीप्तानलशिखोपमम् ॥ [सिंहस्कन्धं महाबाहुमङ्गदद्वयशोभितम् ॥ १४ ॥
ताराविकृतकल्पेन हारेणोरसि राजितम् ॥ ताराधिपतिकल्पैश्च दन्तैः परमशोभितम् ॥ १५ ॥
ज्वलन्निव च तेजोभिर्दीपयन्निव च श्रिया ॥ तप्तजांबूनदमयैर्भूषणैर्भूषितं च यत्] ॥ १६ ॥
तप्तजांबूनदमयीं राजतान्तपरिच्छदाम् ॥ दिव्यपायससंपूर्णां पात्रीं पत्नीमिव प्रियाम् ॥
प्रगृह्य विपुलां दोर्भ्यां स्वयं मायामयीमिव ॥ १७ ॥
समवेक्ष्याब्रवीद्वाक्यमिदं दशरथं नृपम् ॥ प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप ॥ १८ ॥
ततः परं तदा राजा प्रत्युवाच कृताञ्जलिः ॥ भगवन्स्वागतं तेऽस्तु किमहं करवाणि ते ॥ १९ ॥
अथो पुनरिदं वाक्यं प्राजापत्यो नरोऽब्रवीत् ॥ राजन्नर्चयता देवानद्य प्राप्तमिदं त्वया ॥ २० ॥
इदं तु नरशार्दूल पायसं देवनिर्मितम् ॥ प्रजाकरं गृहाण त्वं धन्यमारोग्यवर्धनम् ॥ २१ ॥
भार्याणामनुरूपाणामश्नीतेति प्रयच्छ वै ॥ तासु त्वं लप्स्यसे पुत्रान्यदर्थं यजसे नृप ॥ २२ ॥
तथेति नृपतिः प्रीतः शिरसा प्रतिगृह्य ताम् ॥ पात्रीं देवान्नसंपूर्णां देवदत्तां हिरण्मयीम् ॥ २३ ॥
अभिवाद्य च तद्भूतमद्भुतं प्रियदर्शनम् ॥ मुदा परमया युक्तश्चकाराभिप्रदक्षिणम् ॥ २४ ॥
ततो दशरथः प्राप्य पायसं देवनिर्मितम् ॥ बभूव परमप्रीतः प्राप्य वित्तमिवाधनः ॥ २५ ॥

निश्चयं आमन्त्र्य साधयामीत्युक्त्वा ॥ १० ॥ अथपुत्रकामेष्टिफलं भगवतश्चतुर्धाऽवतारंसूचयन् प्रजापतिप्रेरितपुरुषेणपायसप्रदानंदर्शयति—ततोवाइति । श्लोकपञ्चकमेकान्वयम् । ततः विष्णोरंतर्धानानंतरं । यजमानस्येतिवर्तमाननिर्देशेन द्रव्यत्यागकालएवप्रादुर्भावःसूचितः । पावकात् आहवनीयात् । भूतं पुरुषविशेषः ॥ ११ ॥ स्निग्धाः चिक्कणाः हर्यक्षस्येव तनुजाः लोमानि श्मश्रुप्रवरा मूर्धजाःकेशाश्च यस्यतत्तथा॥१२॥ समुत्सेधः उन्नतिः । दृप्तशार्दूलविक्रमं तद्वद्भयंकरं ॥ १३ ॥ प्रभामण्डलवत्तया दिवाकरसमाकारं । तैक्ष्ण्यातिशयेन दीप्तानलशिखोपमं ॥ १४–१६ ॥ तप्तजांबूनदमयीं द्रुतकनकमयीं । राजतः रजतविकारः अन्ते उपरि परिच्छदः पिधानपात्रं यस्यास्तां । पात्र्यास्स्त्रीलिङ्गत्वेनपत्नीसाम्यं । मायामयीमिव । असंभावितत्वेनाश्चर्यावहामित्यर्थः । स्वयंप्रगृह्यप्रादुर्भूतमीत्यन्वयः । विपुलतरत्वेन हस्तमात्रेणग्रहीतुमशक्यत्वाद्बाहुभ्यामित्युक्तं ॥ १७ ॥ दशरथंसमवेक्ष्येदमब्रवीत् । कथं इहागतंमां प्राजापत्यं प्रजापतेरागतं । “दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः”इति प्राग्दीव्यतीयोण्यप्रत्ययः । नरंविद्धि ॥१८॥ ततःपरं तदनन्तरमितियावत् । “प्राजापत्यंचमांविद्धि”इत्युक्त्यनन्तरमित्यर्थः । तदा तदैव ॥ १९ ॥ अथोअथेतिपर्यायौ । अर्चयता अश्वमेधपुत्रकामेष्टिभ्यामितिशेषः ॥२०॥ इदंशब्दार्थमाह—इदंत्विति । देवनिर्मितं देवेनविष्णुनानिर्मितं । धन्यं धनकरं । स्वर्गादित्वाद्यत् ॥ २१ ॥ अनुरूपाणां सवर्णानामित्यर्थः । चतुर्थ्यर्थेषष्ठी ॥२२॥ देवान्नं देवनिर्मितान्नं । देवदत्तां देवप्रेरिताम् ॥ २३ ॥ अभितःप्रदक्षिणं अभिप्रदक्षिणम् ॥ २४ ॥ प्राप्य

ति० । अन्तर्धायभगवानेवस्वतेजस्संभृतपायसमादायहुताग्नेस्सकाशात्प्रादुर्भवतिस्म । नह्यन्यस्यभगवत्तेजोधारणेशक्तिरस्ति । तदेवाह महद्भूतमिति । “ एकोविष्णुर्महद्भूतं ” इत्युक्तेः । अतुलप्रभं विद्युदादिवत्दृष्टिप्रतिघातकतेजोवत् । भूतं प्राणी ॥ ११ ॥ **ति०** । मायामयीमिव इवशब्दएवार्थे । भगवतोमाययैवेत्यर्थः ॥ १६ ॥ **ति०** । पूर्वंक्लृप्तत्वातइवभीतएवतदा नरवचनश्रवणानन्तरकाले । अतः तदुक्तिश्रवणाद्धेतोः । परं तृप्तिकरंवचः । तद्वचनश्रवणोत्तरंनिर्भयउवाचेत्यर्थः ॥ १९ ॥

[पा०] १ च. ज. कृष्णरक्तांबरधरं. २ क.–झ. रक्तास्यं. ३ च. छ. दिशागजसमाकारं. ४ च. छ. सान्तःपुरस्तदाराजा. ट. अतःपरंतदाराजा. ख. ग. तमद्भुतंतदाराजा. ५ ख.–झ. इदंतुनृपशार्दूल. ६ ख. तासुत्वंप्राप्स्यसे.

ततस्तदद्भुतप्रख्यं भूतं परमभास्वरम् ॥ संवर्तयित्वा तत्कर्म तत्रैवान्तरधीयत ॥ २६ ॥
हर्षरश्मिभिरुद्योतं तस्यान्तःपुरमाबभौ ॥ शारदस्याभिरामस्य चन्द्रस्येव नभोंऽशुभिः ॥ २७ ॥
सोन्तःपुरं प्रविश्यैव कौसल्यामिदमब्रवीत् ॥ पायसं प्रतिगृह्णीष्व पुत्रीयं त्विदमात्मनः ॥ २८ ॥
कौसल्यायै नरपतिः पायसार्धं ददौ तदा ॥ अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः ॥
कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् ॥ २९ ॥
प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् ॥ अनुचिन्त्य सुमित्रायै पुनरेव महीपतिः[1] ॥ ३० ॥

लब्ध्वा ॥२५॥ अद्भुतप्रख्यं अद्भुताकारं । संवर्तयित्वा समाप्य । तत्कर्म पायसप्रदानरूपंकर्म । तत्र अग्नौ ॥२६॥ हर्षरश्मिभिः हर्षकृतकान्तिभिः । उद्योतं उद्भूतप्रकाशं । अन्तःपुरं अन्तःपुरस्त्रियः । शारदस्य शरदिभवस्य । अभिरामस्य निष्कलङ्कस्य । अयंहर्षः पायसप्रदानकृतः ॥ २७ ॥ पुत्रीयं पुत्रोत्पत्तिनिमित्तम् ॥ २८ ॥ अथराज्ञःपत्नीभ्योविभज्यपायसप्रदानमाहत्रिभिः—कौसल्यायाइत्यादि । पायसस्यार्धं पायसार्धं । अर्धशब्दोत्रसमांशवचनः "अर्धंसमेंशके"इत्यमरः । ददौ ज्येष्ठपत्नीत्वादितिभावः । अर्धात्पृथक्कृत्य अर्धं सुमित्रायै द्वितीयमहिष्यै । ददौ । चतुर्थांशमित्यर्थः । अवशिष्टस्यपायसस्यार्धंअवशिष्टार्धं अष्टमांशमित्यर्थः । कैकेय्यै तृतीयमहिष्यै । ददौ । पुत्रार्थकारणात् पुत्ररूपप्रयोजननिमित्तात् । इदं त्रिष्वपिदानेष्वन्वेति ॥२९॥ अनुचिन्त्य कैकेय्यपेक्षया सुमित्रायाअधिकांशभाक्त्वं भवेदितिविचार्येत्यर्थः । तस्यापिहिकैकेय्यैदा-

शि० । तस्यराज्ञः हर्षरश्मिभिः हर्षवर्धिताङ्गकान्तिभिः उद्योतं अतिप्रकाशितं अन्तःपुरं अभिरामस्य परमानन्ददातुः पूर्णस्येत्यर्थः । शारदस्यचन्द्रस्यांशुभिरुद्योतं नभइव आबभौ ॥ २७ ॥ ति० । अनुचिन्त्य कैकेय्यपेक्षयाज्येष्ठत्वंकौसल्यापेक्षयाकनिष्ठत्वंचसुमित्रायाविचार्य पादोनांशार्धदानंतस्यै । कनिष्ठत्वाच्चकैकेय्यै अष्टमांशदानं । एवंचभरतशत्रुघ्नौपादस्यार्धमर्धमित्याहुः । अपरेतु रामभरतौप्रत्येकंत्र्यंशौ । लक्ष्मणशत्रुघ्नौचाष्टमांशौ । तथाहि । कौसल्यायैदत्तार्धस्यार्धादर्धंचतुर्थांशरूपंसुमित्रायैदत्तवान् । कौसल्ययादापितवानित्यर्थः । एवंकैकेय्यैकौसल्यादत्तार्धावशिष्टमर्धंददौ । ततः कौसल्यादत्तावशिष्टस्यकैकेय्यैदत्तस्ययदर्धं तदर्धंविचार्यपुनरपिसुमित्रायैददौ तयादापयामासेत्यर्थः । अत्रार्धण्दावृत्तिर्बोध्या । तदुक्तंकालिदासेन " सतेजोवैष्णवंपत्न्योर्विभेजेचरुसंज्ञितम् । द्यावापृथिव्योःप्रत्यग्रमहर्पतिरिवातपम् । अर्चितातस्यकौसल्याप्रियाकेकयवंशजा । अतस्संभावितांताभ्यांसुमित्रामैच्छदीश्वरः । तेबहुज्ञस्यचित्तज्ञेपत्न्यौपत्युर्महीक्षितः । चरोरर्धार्धभागाभ्यांतामयोजयतामुभे । साहिप्रणयवत्यासीत्सपत्न्योरुभयोरपि " इति । अर्धार्धभागाभ्यामित्यस्यस्वस्वलब्धांशसंबंध्यर्धार्धभागाभ्यामित्यर्थः । पृथगिति विभज्येतिशेषः । अतएवलक्ष्मणस्यरामानुवर्तित्वंशत्रुघ्नस्यभरतानुवर्तित्वंच । उक्तंचपाद्मे " युगंबभूवतुस्तत्रसुस्निग्धौरामलक्ष्मणौ । तथाभरतशत्रुघ्नौपायसांशवशात्स्वतः" इतीत्याहुः । कतकस्याप्येषैवरीतिस्संमतेतिदिक् । शि० । तदा पायसप्राप्तिकाले । नरपतिःअमृतोपमंपायसार्धंपायसस्यार्धमंशं । महाभागमितिवक्ष्यमाणरामविशेषणात् ज्येष्ठपत्नीत्वाच्च कंचिदधिकमंशंपुत्रार्थकारणात्कौसल्यायैददौ । ततोनुचिन्त्य अप्रकटितसाकेतेएकस्सुमित्रापुत्रःकौसल्यापुत्रानुयायी द्वितीयस्सुमित्रापुत्रःकैकेयीपुत्रानुयायीति विचार्यैव अर्धात् कौसल्याभागतः अर्धं किंचिन्न्यूनमंशं नराधिपस्सुमित्रायैददौ कौसल्ययादापयामासेत्यर्थः । अन्तर्भावितणिजर्थः । कौसल्याभागादवशिष्टभागंअर्धंकृत्वासुमित्रायैददावित्यर्थस्तुनयुक्तः । अत्रावशिष्टपदाभावात् उत्तरत्रावशिष्टपदस्यविद्यमानत्वाच्चयुक्तितोरामानुयायित्वानुपपत्तेश्च । ततोवशिष्टार्धमवशिष्टमर्धं कौसल्याभागतःकिंचिन्न्यूनांशं कैकेय्यैमहीपतिर्ददौ दापयामासेत्यर्थः । पुनरेव पुनरपि । एवोप्यर्थे । अवशिष्टार्धं अवशिष्टस्यदत्तकैकयीभागस्यार्धमंशं सुमित्रायैप्रददौ कैकेय्याप्रदापयामासेत्यर्थः । अयभावः । पायसेऽष्टावंशाः कृताः । तत्रपञ्चांशान्कौसल्यायैदत्तवान् । कौसल्याभागतःसार्धमेकमंशंसुमित्रायैदापयामास । कौसल्याभागतःउर्वरितांस्त्रीनंशान्कैकेय्यैदापयामास । कैकेयीभागात्सार्धमेकमंशंसुमित्रायैदापयामासेति । सार्धत्रीन्स्वांशानेकीकृत्यकौसल्याबुभुजे तदेवरामप्रादुर्भावेनिमित्तीभूतं । सार्धमेकंस्वांशमेकीकृत्यकेकयाबुभुजे तदेवभरतप्रादुर्भावेनिमित्तीभूतं । कौसल्यादत्तंसार्धमंशमेकीकृत्यसुमित्रापूर्वंबुभुजे तदेवलक्ष्मणप्रादुर्भावेनित्तीभूतं । ततःकेकयीदत्तंसार्धमंशंबुभुजे तदेवशत्रुघ्नप्रादुर्भावेनिमित्तीभूतं । भरतलक्ष्मणप्रादुर्भावनिमित्तीभूतपायसयोस्समत्वेपि रामोद्देश्यकभागांशप्रभावाल्लक्ष्मणेऽधिकप्रभावप्रतीतिः । अनुचिन्त्येत्युक्तेर्महाराजाधिराजदशरथस्यसर्वज्ञत्वंसूचितं । तदेवोपसंहरन्नाह । एवमनेनप्रकारेणभार्याणांपायसंपृथक्पृथग्विभज्यराजाददौ । कौसल्यायैइत्यारभ्यश्लोकत्रयमेकान्वयि । अपिशब्दएवार्थे । चशब्दावनन्तरार्थकौ ॥ ३० ॥

[पा०] १ ङ. झ. पुनरेवमहामतिः.

एवं तासां ददौ राजा भार्याणां पायसं पृथक् ॥ ३१ ॥

तास्त्वेतत्पायसं प्राप्य नरेन्द्रस्योत्तमाः स्त्रियः ॥ संमानं मेनिरे सर्वाः प्रहर्षोदितचेतसः ॥ ३२ ॥

ततस्तु ताः प्राश्य तदुत्तमस्त्रियो महीपतेरुत्तमपायसं पृथक् ॥
हुताशनादित्यसमानतेजसोचिरेण गर्भान्प्रतिपेदिरे तदा ॥ ३३ ॥

ततस्तु राजा प्रतिवीक्ष्य ताः स्त्रियः प्ररूढगर्भाः प्रतिलब्धमानसः ॥
बभूव हृष्टस्त्रिदिवे यथा हरिस्सुरेन्द्रसिद्धर्षिगणाभिपूजितः ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ॥ १७ ॥

देवगन्धर्वादिभिर्ब्रह्माज्ञयारामसाहाय्यार्थंऋक्षवानरादिभावेनभुव्यवतरणम् ॥ १ ॥

पुत्रत्वं तु गते विष्णौ राज्ञस्तस्य महात्मनः ॥ उवाच देवताः सर्वाः स्वयंभूर्भगवानिदम् ॥ १ ॥

नेकैकेयीसुमित्रयोःसमांशतास्यात्तन्नयुक्तं । अन्यथा ज्येष्ठाकनिष्ठावैषम्यंनस्यात् । कैकेयीहिकनिष्ठा । "नतेंबामध्यमातातगर्हितव्याकथंचन" इतीतरपत्न्यपेक्षयामध्यमात्वमुक्तं । वल्लभायामपिकैकेय्यांसंभोगविषयेपक्षपातः नतुधर्म्यसंविभागे । अतोबहुमानायज्यैष्ठ्यक्रमाद्भागतारतम्यंकृतं। अतएव "समानंमेनिरे" इतिवक्ष्यति। ततोनेनभागेनरामोविष्णोरर्धांशः लक्ष्मणःपादांशः भरतशत्रुघ्नौपादस्यार्धांशौ । नन्वेवंसति कथमुत्तरत्र भरतःसाक्षाद्विष्णोश्चतुर्भागः लक्ष्मणशत्रुघ्नौविष्णोरर्धसमन्वितावित्युच्यते। सत्यं "साक्षाद्विष्णोश्चतुर्भागः" इत्यत्रसाक्षाद्विष्णोःविष्णोरर्धस्यरामांशस्यचतुर्थोभागइत्यर्थः । यद्वा चतुर्थस्यभागश्चतुर्भागः अष्टमांशइत्यर्थः। "अर्धसमन्वितौ" इत्यत्राप्यर्धशब्दएकदेशवाची। "भित्तंशकलखण्डेवापुंस्यर्धोर्धंसमेंशके" इत्येकदेशेपिपुँल्लिङ्गार्धशब्दस्यानुशासनात्। अत्रप्राशनादिक्रमवशात् भरतस्यलक्ष्मणशत्रुघ्नाभ्यांज्यैष्ठ्यं । ननु लक्ष्मणस्यभरताज्ज्यैष्ठ्यं अंशाधिक्यात्प्रथमप्राशनाच्च । अतएववक्ष्यति"ततोलक्ष्मणमासाद्यवैदेहींचपरंतपः ॥ अभ्यवादयतप्रीतोभरतोनामचाब्रवीत्"इति। मैवं कैकेय्याएवप्रथमप्राशनं।सुमित्रायाद्वितीयांशग्रहणविलंबेनप्राशनविलंबात्। उत्पत्तिक्रमेतथोक्तेः। "नसङ्ख्येभरतानुजः"इत्युक्तत्वात्। अभिवादनंतु सीतायामेवान्वेति। लक्ष्मणमासाद्य आलिङ्ग्येत्यर्थः। रामानुजत्वव्यवहारआसत्त्याधिक्यात्। एवंसति कचिद्भरतस्यलक्ष्मणानुजत्वोक्तिः बहुव्रीहिसमासेनसमाधेया । भरतानुजइतिलक्ष्मणस्याभिधानात्सर्वप्राशनानन्तरमेवसुमित्रयाभुक्तमिति । पुराणांतरविरोधःकल्पभेदेनपरिहार्यः । रामादिमूर्तयश्चपायसपरिणामाः नतुशुक्रशोणितपरिणामाः । तत्प्राशनानन्तरंगर्भधारणवचनात्। "नतस्यप्राकृतामूर्तिः" "नभूतसङ्घसंस्थानोदेहोस्यपरमात्मनः" इत्यादिस्मरणात्। पायसंचभगवतःषाड्गुण्यविग्रहएव । तद्वृद्धिश्चनान्नपानादिकृता किंत्विच्छाकृतेत्यादिकंसर्वमवसेयम् ॥ ३० ॥ उपसंहरति—एवमिति ॥३१॥ संमानंराजकृतपायसप्रदानक्रमरूपंबहुमानं । मेनिरे अनुमेनिरे । प्रहर्षोदितचेतसः उदितप्रहर्षमनसः। तारतम्येनदानंपौर्वापर्यंच ज्यैष्ठ्यानुक्रमकृतत्वेनसर्वासांसंमतमेवासीदितिभावः॥ ३२ ॥ वक्तव्येपियज्ञवृत्तान्तशेषे प्रसङ्गात्सौकर्यायनगरप्रवेशानन्तरभाविकथाशेषंसंग्रहेणदर्शयति—ततइति । तत्पायसमित्यन्वयः । हुताशनादित्यशब्दौतत्तेजःपरौ ॥३३॥ प्रतिलब्धमानसः स्वस्थचित्तः ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षोडशःसर्गः ॥१६॥

विष्णोरन्तर्धानानन्तरंकार्यद्वयंप्रवृत्तं पायसहस्तस्याग्निपुरुषस्योत्थानं देवान्प्रतिब्रह्मनियोगश्च । तत्र

ति० । हुताशनादित्यसमानतेजसइतिगर्भाणांस्त्रीणांचतन्त्रेणविशेषणं ॥ ३३ ॥ इतिषोडशस्सर्गः ॥ १६ ॥

[पा०] १ ङ. च. छ. ताश्चैवंपायसं. घ. ताश्चैतत्पायसं. २ ग. ङ. छ. ज. झ, नरेन्द्रस्योत्तमस्त्रियः. ३ च. छ. संतानंमेनिरे. ४ ख. समानवर्चसो. ५ क, ख. ग, च. छ. ज. प्रसमीक्ष्य.

सत्यसन्धस्य वीरस्य सर्वेषां नो हितैषिणः ॥ विष्णोः सहायान्बलिनः सृजध्वं कामरूपिणः ॥ २ ॥
मायाविदश्च शूरांश्च वायुवेगसमाञ्जवे ॥ नयज्ञान्बुद्धिसंपन्नान्विष्णुतुल्यपराक्रमान् ॥ ३ ॥
असंहार्यानुपायज्ञान्सिंहसंहननान्वितान् ॥ सर्वास्त्रगुणसंपन्नानमृतप्राशनानिव ॥ ४ ॥
अप्सरस्सु च मुख्यासु गन्धर्वीणां तनूषु च ॥ यक्षपन्नगकन्यासु ऋक्षविद्याधरीषु च ॥ ५ ॥
किन्नरीणां च गात्रेषु वानरीणां तनूषु च ॥ सृजध्वं हरिरूपेण पुत्रांस्तुल्यपराक्रमान् ॥ ६ ॥
पूर्वमेव मया सृष्टो जांबवानृक्षपुङ्गवः ॥ जृंभमाणस्य सहसा मम .क्त्रादजायत ॥ ७ ॥
ते तथोक्ता भगवता तत्प्रतिश्रुत्य शासनम् ॥ जनयामासुरेवं ते पुत्रान्वानररूपिणः ॥ ८ ॥
ऋषयश्च महात्मानः सिद्धविद्याधरोरगाः ॥ चारणाश्च सुतान्वीरान्ससृजुर्वनचारिणः ॥ ९ ॥
वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमूर्जितम् ॥ सुग्रीवं जनयामास तपनस्तपतां वरः ॥ १० ॥
बृहस्पतिस्त्वजनयत्तारं नाम महाहरिम् ॥ सर्ववानरमुख्यानां बुद्धिमन्तमनुत्तमम् ॥ ११ ॥
धनदस्य सुतः श्रीमान्वानरो गन्धमादनः ॥ विश्वकर्मा त्वजनयन्नलं नाम महाहरिम् ॥ १२ ॥
पावकस्य सुतः श्रीमान्नीलोऽग्निसदृशप्रभः ॥ तेजसा यशसा वीर्यादत्यरिच्यत वानरान् ॥ १३ ॥
रूपद्रविणसंपन्नावश्विनौ रूपसंमतौ ॥ मैन्दं च द्विविदं चैव जनयामासतुः स्वयम् ॥ १४ ॥

वाचःक्रमवर्तित्वेन प्रथमोपस्थितमग्निपुरुषोत्थानं तत्प्रसक्तंचसर्वमुक्त्वा अथब्रह्मनियोगतत्फलेदर्शयतिसप्तदशे—पुत्रत्वमित्यादि। गतेगन्तुंप्रवृत्ते । भगवान् भाविकार्यज्ञः ॥ १ ॥ सह अप्राधान्येन अयन्तइतिसहायाःकिंकराः । तान् । कामरूपिणः कपटराक्षसयुद्धक्षमशरीरिणः ॥२॥ उक्तसहायान्विशेषयतित्रिभिः—मायेत्यादि। माया आश्चर्यशक्तिः । तद्विदः । जवे वेगेविषये । नयज्ञान् नीतिज्ञान् ॥ ३ ॥ असंहार्यान् परैरितिशेषः । उपायज्ञान् अनागतविधानज्ञान् । यद्वा नयज्ञान् युक्तिशालिनः । उपायज्ञान् सामाद्युपायज्ञान् । सिंहसंहननान्वितान् सिंहतुल्यसंस्थानैर्युक्तान् । सर्वास्त्राणांयोगुणःशक्तिस्तेनसंपन्नान् । अमृतंप्राश्नन्तीत्यमृतप्राशनाः कर्तरिल्युट् । पीतामृतानिवमृत्युरहितानित्यर्थः ॥ ४ ॥ ५ ॥ हरिरूपेण वानररूपेणोपलक्षितान् प्रायिकाभिप्रायमिदं तुल्यपराक्रमान् आत्मसदृशपराक्रमान् ॥ ६ ॥ देवत्वाविशेषात्भवतापिपुत्रोत्पादनंकार्यमिति मावोचध्वमित्याह—पूर्वमिति । सृष्टः भाविरामसहायबुद्ध्येतिशेषः । सृष्टिप्रकारमाह—जृंभमाणस्येति। सइतिशेषः। अत्र पार्वतीशापेनस्वक्षेत्रेपुत्रोत्पादनासंभवादप्सरःप्रभृतयःक्षेत्रतयोक्ताः। गुणवत्पुत्रलाभायमुख्यास्वित्युक्तं । अयोनिजत्वेनसद्यःप्रवृद्धत्वसिद्धयेतनूष्वित्युक्तं । नन्दिकेश्वरशापानुसारेणहरिरूपेणेत्युक्तं । वक्ष्यतिहिदिग्विजयेरावणंप्रतिनन्दी "तस्मान्मद्रूपसंयुक्तामद्वीर्यसमतेजसः ॥ उत्पत्स्यन्तिवधार्थंहिकुलस्यतववानराः" इति ॥ ७ ॥ प्रतिश्रुत्य अङ्गीकृत्य । एवं वक्ष्यमाणरीत्या ॥८॥ वनचारिणः वानरान् ॥ ९ ॥ महेन्द्राभं महेन्द्रपर्वताभं। ननु वालिनःकथंरामसहायार्थत्वं रामवध्यत्वात् । उच्यते । अङ्गदोत्पादनद्वारातस्यसाहाय्यकरणात् । किंच यदिवालीनोत्पद्येत तदा सर्वेषांवानराणांसहायत्वंनस्यात् । सतिचवालिनि सुग्रीवविरोधिनि सुग्रीवमैत्र्यावानरसहायसिद्धिः। वालिमैत्र्यांतु रावणः क्षणादेवसीतांदद्यात् । अतःसुग्रीवसख्यनिमित्तत्वाद्वालिनो रामसहायत्वमिति । तपनः सूर्यः ॥ १० ॥ सर्ववानरमुख्यानामिति निर्धारणेषष्ठी। बृहस्पतिपुत्रत्वादनुत्तमंबुद्धिमन्तं ॥ ११ ॥ कुबेरपुत्रत्वात्श्रीमानित्युक्तं । महाहरिं सर्वकार्यनिर्माणदक्षं ॥ १२ ॥ अत्यरिच्यत अतिशयितोभूत् ॥ १३ ॥ रूपमेवद्रविणंधनं तेनसंप-

---

ती० दिव्यसंहननान्वितान् दिव्यदेहयुक्तान् ॥ ४ ॥ ति० पूर्वमेव पूर्वेयुगइत्यर्थः ॥ ७ ॥ ती० पूर्वमेवमयासृष्टइतिश्लोकस्थं पूर्वमितिपदमत्राप्यनुषञ्जनीयं । यथाश्रुतेभगवदवतारसमयेवालिसुग्रीवयोरनुत्पत्तेरिति ॥ १० ॥

[पा०] १ क. ग. घ. विष्णोस्तुल्य. २ क–छ. झ. ञ. ज्ञान्दिव्यसंहननान्वितान्. ३ इदमर्धं घ–ट. दृश्यते. ४ क. ऋक्षीविद्याधरीषु. ५ इदमर्धं घ–ट. दृश्यते. ६ ग. महाभागं. ७ ङ. च. छ. झ. ञ. ट. वालिनमात्मजं. ८ ङ. च. छ. झ. ञ. ट. महाकपिं. ९ ख. बुद्धिमान्संमतःप्रियः. १० क. ख. च. छ. ञ. पावकं. ङ. झ. ट. वीर्यवान्. ११ च. छ. रूपसंपदा.

वरुणो जनयामास सुषेणं नाम वानरम् ॥ शरभं जनयामास पर्जन्यस्तु [1]महाबलम् ॥ १५ ॥
मारुत[2]स्यात्मजः श्रीमान्हनुमान्नाम वानरः ॥ वज्रसंहननोपेतो वैनतेयसमो जवे ॥
[[3]सर्ववानरमुख्येषु बुद्धिमान्बलवानपि] ॥ १६ ॥
ते सृष्टा बहुसाहस्रा दशग्रीव[4]वधे रताः ॥ अप्रमेयबला वीरा विक्रान्ताः कामरूपिणः ॥ १७ ॥
[5]मेरुमन्दरसंकाशा वपुष्मन्तो महाबलाः ॥ ऋक्षवानरगोपुच्छाः क्षिप्रमेवाभिजज्ञिरे ॥ १८ ॥
यस्य देवस्य यद्रूपं वेषो यश्च पराक्रमः ॥ अजायत [6]समस्तेन तस्यतस्य [7]सुतः पृथक् ॥ १९ ॥
[8]गोलाङ्गूलीषु चोत्पन्नाः [9]केचित्संमतविक्रमाः ॥ [10]ऋक्षीषु च तथा जाता वानराः [11]किंनरीषु च ॥२०॥
देवा महर्षिगन्धर्वा[12]स्तार्क्ष्या यक्षा यशस्विनः ॥ नागाः किंपुरुषाश्चैव सिद्धविद्याधरोरगाः ॥ २१ ॥
बहवो जनयामासुर्हृष्टास्तत्र सहस्रशः ॥ [[13]चारणाश्च सुतान्वीरान्ससृजुर्वनचारिणः ॥]
वानरान्सुमहाकायान्सर्वान्वै वनचारिणः ॥ २२ ॥
अप्सरस्सु च मुख्यासु तथा विद्याधरीषु च ॥ नागकन्यासु च तथा गन्धर्वीणां तनूषु च ॥२३॥
कामरूपबलोपेता [14]यथाकामं विचारिणः ॥ सिंहशार्दूलसदृशा दर्पेण च बलेन च ॥ २४ ॥
शिलाप्रहरणाः सर्वे सर्वे [15]पादपयोधिनः ॥ नखदंष्ट्रायुधाः सर्वे सर्वे सर्वास्त्रकोविदाः ॥ २५ ॥
विचालयेयुः शैलेन्द्रान्भेदयेयुः [16]स्थिरान्द्रुमान् ॥ क्षोभयेयुश्च वेगेन समुद्रं सरितां पतिम् ॥ २६ ॥
दारयेयुः क्षितिं पद्भ्यामाप्लवेयुर्महार्णवम् ॥ नभस्थलं विशेयुश्च गृह्णीयुरपि तोयदान् ॥ २७ ॥

न्नौ अतएवरूपसंमतौ रूपेणप्रख्यातौ । स्वयमित्यनेन मानससृष्टिर्द्योत्यते ॥ १४ ॥ पर्जन्यो वर्षाभिमानिदेवता ॥ १५ ॥ वज्रसंहननोपेतः वज्रवदभेद्यशरीरयुक्तः । रुद्रोब्रह्मणानियुक्तोपि रक्षःपक्षपातित्वान्नकंचनसृष्टवान् ॥ १६ ॥ एवंप्रधानवानरसृष्टिमुक्त्वाक्षुद्रवानरसृष्टिंसंग्रहेणाह—तेइति । रताः आसक्ताः ॥ १७ ॥ एवंवानरसृष्टिमुक्त्वाऋक्षादिसृष्टिंप्राधान्येनाह—मेर्विति । वपुष्मन्तः दृढवपुष्काः । अतएवमेरुमन्दरसंकाशाः । ऋक्षाः भल्लूकाः । गोपुच्छाः गोलाङ्गूलाः । अभिजज्ञिरे जाताः । क्षिप्रमित्यनेनमानससृष्टिरुच्यते ॥ १८ ॥ रूपं सौन्दर्यं । वेषः संस्थानविशेषः । तस्यतस्य देवस्य । तेन रूपादिना समःसुतः । पृथक् अन्योन्यविलक्षणः । अजायत मुखमात्रेवानराकारत्वेपिसंस्थानादौसर्वेपितृतुल्याएवासन्नित्यर्थः ॥ १९ ॥ विजातीयास्वपिवानरोत्पत्तिमाह—गोलाङ्गूलीष्विति । संमतविक्रमाः प्रसिद्धविक्रमाः । केचिद्वानरागोलाङ्गूलीषूत्पन्नाः । केचिद्वानराऋक्षीषूत्पन्नाः । केचिद्वानराः किन्नरीषुचोत्पन्नाइतियोजना ॥ २० ॥ उत्पादकक्षेत्रवैविध्यमाह—देवाइत्यादि । श्लोकत्रयमेकान्वयं । तार्क्ष्याः गरुडादयः । नागाः दिग्गजाः । उरगाः वासुक्यादयः । तत्र विष्ण्ववतारकाले ॥२१॥ ॥ २२ ॥ २३ ॥ तेषांप्रभावमाहपञ्चभिः । सर्वत्र सर्वेइत्यनुषञ्जनीयं । सर्वेकामरूपबलोपेताअभवन्नित्येवंयोजनीयं ॥ २४ ॥ सर्वास्त्रकोविदाः देवांशत्वेनस्वयंप्रतिभातास्त्रप्रहारपरिहारोपायाः नत्वस्त्रप्रयोक्तारः शिलाप्रहरणाइत्युक्तेः ॥ २५ ॥ विचालयेयुरित्यादिषु "शकिलिङ्च"इतिलिङ् । "कंपनेचलिः" इतिमित्वेपिह्रस्वाभावश्छान्दसः ॥२६॥ आप्लवेयुः संतरेयुः ॥२७॥

ति० धर्मपुत्रोपरस्सुषेणइतियुद्धकाण्डेवक्ष्यति अत्रतुवरुणपुत्रउक्तः ॥ १५ ॥ ति० किंचिदुन्नतविक्रमाः देवावस्थातोपिकिंचिदधिकपराक्रमाइत्यर्थः ॥ २० ॥ ति० आप्लवेयुः संतरेयुः । ती० आप्लवेयुःशोषयेयुः ॥ २७ ॥ इतिसप्तदशस्सर्गः ॥ १७ ॥

[पा०] १ क. ख. घ. छ. झ. ञ. ट. महाबलः. २ घ—छ. झ. ञ. ट. सौरसः. ३ इदमर्धं. क. ङ—ट. दृश्यते. ४ ङ. च. छ. झ. ञ. वधोद्यताः. क—घ. वधेधृताः. ५ क. ग—ञ. तेगजाचलसंकाशाः. ६ क. ख. ङ—ञ. समंतेन. ७ घ—ञ. पृथक्पृथक्. ८ क. घ—ट. गोलाङ्गुलेषु. ९ ङ—झ. किंचिदुन्नत. १० क. ट. ऋक्षेषु. ११ ख. वानरीषु. १२ ख. घ. झ. ट. स्तार्क्ष्ययक्षाः. १३ इदमर्धं च. छ. झ. ञ. ट. दृश्यते. १४ ग. घ. ङ. ज. झ. यथाकामविचारिणः. १५ ङ. छ. झ. पर्वतयोधिनः. १६ क—घ. स्थितान्द्रुमान्.

गृह्णीयुरपि मातङ्गान्मत्तान्प्रव्रजतो वने ॥ नर्दमानाश्च नादेन पातयेयुर्विहङ्गमान् ॥ २८ ॥
ईदृशानां प्रसूतानि हरीणां कामरूपिणाम् ॥ शतं शतसहस्राणि यूथपानां महात्मनाम् ॥ २९ ॥
ते प्रधानेषु यूथेषु हरीणां हरियूथपाः ॥ बभूवुर्यूथपश्रेष्ठा वीरांश्चाजनयन्हरीन् ॥ ३० ॥
अन्ये ऋक्षवतः प्रस्थानुपतस्थुः सहस्रशः ॥ अन्ये नानाविधाञ्शैलान्काननानि च भेजिरे ॥३१॥
सूर्यपुत्रं च सुग्रीवं शक्रपुत्रं च वालिनम् ॥ भ्रातरावुपतस्थुस्ते सर्वे एव हरीश्वराः ॥
नलं नीलं हनूमन्तमन्यांश्च हरियूथपान् ॥ ३२ ॥
ते तार्क्ष्यबलसंपन्नाः सर्वे युद्धविशारदाः ॥ विचरन्तोऽर्दयन्दर्पात्सिंहव्याघ्रमहोरगान् ॥ ३३ ॥
तांश्च सर्वान्महाबाहुर्वाली विपुलविक्रमः ॥ जुगोप भुजवीर्येण ऋक्षगोपुच्छवानरान् ॥ ३४ ॥
तैरियं पृथिवी शूरैः सपर्वतवनार्णवा ॥ कीर्णा विविधसंस्थानैर्नानाव्यञ्जनलक्षणैः ॥ ३५ ॥
तैर्मेघवृन्दाचलकूटकल्पैर्महाबलैर्वानरयूथपालैः ॥
बभूव भूर्भीमशरीररूपैः समावृता रामसहायहेतोः ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तदशः सर्गः ॥ १७ ॥

प्रव्रजतः वेगेनगच्छतः ॥२८॥ अन्येषामपरिच्छेद्यत्वा-द्यूथपसंख्यानमाह—ईदृशानामिति । शतंशतसहस्राणि शतलक्षाणीत्यर्थः ॥२९॥ प्रधानप्रधानानाह—तइति । ते प्रागुक्ताःसुग्रीवादिसुषेणान्तायूथपाः । प्रधानेषु हरीणांयूथेषुसमूहेषु यूथपश्रेष्ठाबभूवुः । वीरान्हरीनजनयंश्च ॥३०॥ तेषांस्थानमाह—अन्यइति । ऋक्षवतः पर्वतविशेषस्य ।प्रस्थान् सानूनि ॥३१॥ राजयुवराजमन्त्रिणोदर्शयतिसूर्येत्यादिसार्धश्लोकेन। सुग्रीवं युवराजं। वालिनं राजानं । नलादीन्मन्त्रिणः ॥ ३२ ॥ तेषांदुश्शासनत्वमाह—तइति । तार्क्ष्यः गरुडः ॥ ३३ ॥ सर्वेषांशासितारमाह—तांश्चेति ॥ ३४ ॥ साहाय्यसंपत्तिपौष्कल्यंदर्शयति—तैरिति । अर्णवः अर्णववद्वीपं । विवधसंस्थानैः स्थूलसूक्ष्महस्वदीर्घादिविविधदेहसंस्थानवद्भिः । नानाव्यञ्जनलक्षणैः नानात्वाभिव्यञ्जकासाधारणधर्मवद्भिः ॥ ३५ ॥ उक्तमेवार्थंपुनःसर्गान्तेसंगृह्यदर्शयति—तैरिति । भीमशरीररूपैः भयंकरशरीरवेषैः । रामसहायहेतोः रामसाहाय्यार्थं । भावप्रधानोनिर्देशः ॥३६॥ नन्वस्मिन्सर्गे "धनदस्यसुतःश्रीमान्वानरोगन्धमादनः॥ वरुणोजनयामाससुषेणंनामवानरं ॥ शरभंजनयामासपर्जन्यस्तुमहाबलं"इत्युच्यते । युद्धकाण्डेतु रावणंप्रतिशार्दूलवाक्ये "सुषेणश्चात्रधर्मात्मापुत्रो धर्मस्यवीर्यवान् ॥ पुत्रावैवस्वतस्याथपञ्चकालान्तकोपमाः। गजोगवाक्षोगवयःशरभोगन्धमादनः" इति । कथमिदंसंगच्छते । उच्यते।अत्रवाल्मीकिनोक्तमेवतथ्यं "नतेवागनृताकाव्येकाचिदत्रभविष्यति" इतिब्रह्मवरप्रसादात् । शार्दूलस्तुभ्रान्त्योक्तवान् "रुधिरासिक्तसर्वाङ्गोविह्वलश्चलितेन्द्रियः"इतितत्रैवोक्तेः । अत्रेदंशङ्क्यते । ऋश्यशृङ्गेणपुत्रेष्ट्युपक्रमानन्तरंदेवादिसंमेलनं ततोविष्णोरवतितीर्षा पुत्रत्वंतुगतेविष्णौवानरोत्पत्तिरित्युक्तं तद्विरुध्यते। वालिसुग्रीवयोरावणदिग्विजयकालिकत्वात् । वक्ष्यत्युत्तरकाण्डे "अर्जुनेनविमुक्तस्तुरावणोराक्षसाधिपः"इत्यारभ्य "ततःकदाचित्किष्किन्धां नगरींवालिपालितां ॥ गत्वाह्वयतियुद्धायवालिनंहेममालिनं"इत्यादिना । तथाचकार्तवीर्यार्जुनकालिको वालीकथंरामसमवयस्कःस्यात् । किंच"भगवन्राक्षसः क्रूरोयदाप्रभृतिमेदिनीं ॥ पर्यटत्किंतदालोकाःशून्या आसन्द्विजोत्तम॥ राजावाराजमात्रोवाकिंतदानात्रकश्चन ॥ धर्षणांयेननप्राप्तोरावणोराक्षसेश्वरः"इतिदिग्विजयवृत्तान्तेरामेणपृष्टेअगस्त्येनार्जुनवालिभ्यांपरिभवउच्यमानोर्जुनवालिनोरेककालत्वमवगमयति । अपिचमयोरावणायमन्दोदरीप्रदानकाले "द्वौसुतौतुममत्वस्यांभार्यायांसंबभूवतुः ॥ मायावीप्रथमस्तावद्दुन्दु-

[पा०] १ क. ख. प्रव्राजितान्वने. ग. घ. प्रव्रजितान्वने. २ ट. वातरंहसाम्. ३ ख. घ. ङ. झ. ट. श्रेष्ठान्वीरांश्चा. ४ घ. ङ. च. झ. ञ. ट. सर्वेचहरियूथपाः. ५ ङ. च. छ. झ. ञ. यन्सर्वान्सिंह. ६ ङ. झ. महाबलोमहा. ७ ज. वृन्दाचलसंनिकाशैः. ८ घ-छ. झ. ञ. कूटसंनिभैः. ९ ङ. झ. यूथपाधिपैः.

भिस्तदनन्तरः" इत्युक्तवान् ॥ तत्रदुन्दुभिर्यौवनमदाद्वरदानाच्चमत्तोवालिनाहतइत्युच्यते । अतोवालिनोरावणदिग्विजयकालिकत्वंव्यज्यते । सुग्रीवश्चवालिभयात्परिभ्रमन्दुन्दुभिकलेवरप्रक्षेपकृतमतङ्गशापानन्तरंऋश्यमूकेप्रत्यतिष्ठत् । अतःसुग्रीवस्यापिवालितुल्यकालत्वंगम्यते । एवंमैन्दद्विविदादयोपिचिरकालस्थायिनोऽवगम्यन्ते । वक्ष्यतिरावणंप्रतिशार्दूलः "मैन्दश्चद्विविदश्चोभौताभ्यांनास्तिसमोयुधि ॥ ब्रह्मणासमनुज्ञातावमृतप्राशनावुभौ" इति । तेनतयोरमृतमथनकालवर्तित्वंप्रतीयते । सारणवाक्येच "एषगन्धर्वकन्यायामुत्पन्नःकृष्णवर्त्मनः । तदादैवासुरेयुद्धेसाहाय्यार्थंदिवौकसां" इति । क्रोधनस्यदेवासुरयुद्धेव्यापारकथनात् चिरन्तनत्वंतत्प्रायपठितानामन्येषामपिवालिसुग्रीवमन्त्रिप्रभृतीनांसिद्धंचिरकालत्वं । एवमन्यत्रापिवानरयूथपानामतिचिरस्थायित्वंव्यञ्जनावृत्त्यावगम्यते । अतः कथमेषांरामावतारकालिकत्वमत्रोच्यतइति । अत्रास्मद्गुरुचरणाः । यद्यपिपूर्वसर्गान्ते विष्णोर्गर्भप्रवेशमुक्त्वा "पुत्रत्वंतुगतेविष्णौ" इत्यारभ्यब्रह्मानुशासनंकथितं । तथापि "उवाचदेवताःसर्वाःस्वयंभूर्भगवानिदं" इत्यादिनासामान्येनदेवताउद्दिश्य ब्रह्मासंदिष्टवान् । "तेतथोक्ताभगवतातत्प्रतिश्रुत्यशासनं । जनयामासुरेवंतेपुत्रान्वानररूपिणः" इतिसामान्येनदेवैर्वानरसृष्टिश्चोक्ता । अथब्रह्मणोजांबवत्सृष्टिवत्पूर्वसिद्धामिन्द्रादिभ्योवाल्यादिसृष्टिमनुवदति "वानरेन्द्रंमहेन्द्राभमिन्द्रोवालिनमूर्जितं" इत्यादिना । अतएवहि "वालिनंजनयामास" इत्येवोक्तं । नतुतदाजनयामासेति । अन्यत्रतु "बहवोजनयामासुर्हृष्टास्तत्रसहस्रशः" इति तत्कालवाचीतत्रशब्दः प्रयुक्तः । इन्द्रादयः खल्वेवममन्यन्त ब्रह्मनियोगानन्तरंकिमपूर्वसर्गेण पूर्वमन्यार्थमुत्पन्नाएवसहाय्यंकरिष्यन्तीति । यैस्तुपूर्वंपुत्रानोत्पादितास्तेपुनस्तदाजनयामासुः । अतएव "एषगन्धर्वकन्यायामुत्पन्नःकृष्णवर्त्मनः । तदादैवासुरेयुद्धेसहायार्थंदिवौकसां" इत्यादिनाक्रोधनादीनामन्यार्थंसृष्टिरुच्यते । तस्मान्नकोपि विरोधइत्याहुः । यद्वा रामावतारकालएववाल्यादिजन्म । वालिजयश्चनार्जुनजयाव्यवहितोत्तरकालिकः ततइशब्दस्यानन्तर्यमात्रपरत्वात् । अतएवततःकदाचिदित्युक्तं । अगस्त्येनार्जुनवालिविजययोर्युगपत्कथनंरावणजयत्वेन कृष्णःकंसशिशुपालौजघानेतिवत् । दुन्दुभिश्चवरदानेनसदायुवामत्तश्च । ततश्चतस्यबहुकालानन्तरमपिवालिनायुद्धंसंभवत्येव । एवमन्यदप्यूह्यम् । सर्वथोपक्रमावगतःक्रमोनबाधितव्यः । दैवासुरे युद्धेसाहाय्यार्थमित्यत्रापिसाहाय्यसमर्थइत्यर्थोबोध्यः । अमृतप्राशिनौअमृतप्राशितुल्याविल्यर्थः । यद्वा । अयं ब्रह्मानुशासनप्रकारःप्राचीनएव प्रसङ्गाद्व्यकविनोपवर्ण्यते । पुत्रत्वंतुगतेविष्णौ गन्तुंव्यवसितइत्यर्थः । व्यवसायश्च । विष्णोर्ब्रह्मणाविविक्तेप्रार्थनात् । अतएवपूर्वसर्गे "हन्तायंविदितस्तस्यवधोपायोदुरात्मनः" इत्युक्तम् । अतएवामुंवृत्तान्तंसनत्कुमारोविदित्वासुमन्त्रायोवाचेतिबोध्यम् । ब्रह्मप्रार्थनंचरावणस्यमानुषादन्यत्रभयंनास्ति त्वंऋश्यशृङ्गेणयक्ष्यमाणस्यदशरथस्य पुत्रोभवेति । अतएवकृतसंकेततयाविष्णुरुपयातइत्युक्तम् । यद्वा "ततोदेवाःसगन्धर्वा" इत्यादिकात्पूर्वसर्गात्प्रभृतिब्रह्मलोकवृत्तान्तः । तस्मिन्सदसि ब्रह्मसदसीत्यर्थः । अतएवस्वलोकमागच्छेत्युक्तं नतुगच्छेति । तथाचैवंसंगतिः । पुत्रकामेष्टिपर्यन्तमुक्त्वातत्राग्निपुरुषाविर्भावोपोद्घातत्वेनचिरंतनवृत्तान्तमुपक्षिपति । ततोदेवाइत्यादि । ततइतिप्रस्तावान्तरारंभार्थः । अथ "पितरंरोचयामासतदादशरथंनृपं" इत्यन्तेविष्णुवृत्तान्तेभिहिते । पुत्रत्वंतुगते अभ्युपगते इतिपुत्रत्वाङ्गीकारानन्तरंदेवांशवानरोत्पत्तेर्वक्तव्यत्वेपितंवृत्तान्तं तत्रावस्थाप्य "सकृत्वानिश्चयंविष्णुरामन्त्र्यचपितामहं ॥ अन्तर्धानंगतोदेवैःपूज्यमानोमहर्षिभिः" इत्यादिनाविष्णुवृत्तान्तमेवानुक्रम्यगर्भप्रवेशपर्यन्तमुक्त्वा प्रागवस्थापितंदेववृत्तान्तमेवपुत्रत्वंतुगतइत्यादिनापुनःप्रतिपादयति । एतावद्वृत्तान्तकालस्यदेवमानेनाल्पत्वेपिमनुष्यमानेनबहुवर्षागताःरेवतीवरप्रार्थनावत् । अतोभागप्रहार्थंसमवेत्यब्रह्मसदसिगत्वाकार्यंविज्ञाप्यततोश्वमेधभागान्गृहीत्वागतादेवाइतिसर्वंसमञ्जसम् ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणेमणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तदशस्सर्गः ॥ १७ ॥

अष्टादशः सर्गः ॥ १८ ॥

श्रीरामावतारघट्टः ।

दशरथेनयज्ञसमापनानन्तरंपूर्वमागतानांराज्ञांप्रेषणपूर्वकंपत्नीभिःसहसपरिवारमयोध्यांप्रत्यागमनं ॥ १ ॥ ततोवत्सरान्ते चैत्रशुक्लनवम्यांकर्कटेकौसल्यायांश्रीरामावतारः ॥ २ ॥ परेद्युर्दशम्यांमीनेकैकेय्यांभरतजननम् ॥ ३ ॥ तस्मिन्नेवदिनेकर्कटे सुमित्रायांलक्ष्मणशत्रुघ्नयोर्जननम् ॥ ४ ॥ ततोदशरथेक्रमेणोपनयनादिभाजामात्मजानांदारक्रियांचिन्तयतिदैवाद्विश्वामित्रेणतत्समीपंप्रत्यागमनम् ॥ ५ ॥ दशरथेनतत्पूजनपूर्वकंतदभीप्सितकरणप्रतिज्ञानम् ॥ ६ ॥

निर्वृत्ते तु क्रतौ तस्मिन्हयमेधे महात्मनः ॥ प्रति[1]गृह्य सुरा भागान्प्रतिजग्मुर्यथागतम् ॥ १ ॥
समाप्तदीक्षानियमः पत्नीगणसमन्वितः ॥ प्रविवेश [2]पुरीं राजा [3]सभृत्यबलवाहनः ॥ २ ॥
यथार्हं पूजितास्तेन [4]राज्ञा वै पृथिवीश्वराः ॥ मुदिताः प्रययुर्देशान्प्रणम्य मुनिपुङ्गवम् ॥ ३ ॥
श्रीमतां गच्छतां तेषां [5]स्वपुराणि पुरात्ततः ॥ बलानि राज्ञां शुभ्राणि प्रहृष्टानि चकाशिरे ॥ ४ ॥
गतेषु पृथिवीशेषु राजा [6]दशरथस्तदा ॥ प्रविवेश [7]पुरीं श्रीमान्पुरस्कृत्य [8]द्विजोत्तमान् ॥ ५ ॥
शान्तया प्रययौ सार्धमृश्यशृङ्गः सुपूजितः ॥ [9]अन्वीयमानो [10]राज्ञाऽथ [11]सानुयात्रेण धीमता ॥ ६ ॥
एवं विसृज्य तान्सर्वान्राजा संपूर्णमानसः ॥ उवास सुखितस्तत्र पुत्रोत्पत्तिं विचिन्तयन् ॥ ७ ॥
ततो यज्ञे समाप्ते तु ऋतूनां षट् [12]समत्ययुः ॥ ८ ॥
ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ ॥ नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु ॥ ९ ॥

"कोसलोनाममुदितःस्फीतोजनपदोमहान्" इत्यारभ्यभगवतोवतारनिमित्तान्युक्तानि । अथावतारंदर्शयत्यष्टादशे—निर्वृत्तेत्वित्यादि । अत्रपुत्रोत्पत्तिंविचिन्तयन्नित्येवमन्तोग्रन्थः "हुताशनादित्यसमानतेजसोचिरेणगर्भान्प्रतिपेदिरेतदा" इत्येतच्छेषोनूद्यते । निर्वृत्ते समाप्ते । हयमेधे पुत्रेष्टिसहितइतिशेषः ॥ १ ॥ दीक्षार्थोनियमोदीक्षानियमः । प्रविवेश प्रवेष्टुमुपचक्रमे । आदिकर्मद्योतकःप्रशब्दः ॥ २ ॥ मुनिपुङ्गवं वसिष्ठं ॥ ३ ॥ शुभ्राणि दशरथदत्तवस्त्रादिभिः ॥ ४ ॥ द्विजोत्तमान् वसिष्ठादीन् ॥ ५ ॥ अथ नगरप्रवेशानन्तरं । सानुयात्रेण सभृत्येन । राज्ञा रोमपादेन । अन्वीयमानः अनुगम्यमानः ॥ ६ ॥ एवं ऋश्यशृङ्गवत् । तान् द्विजोत्तमान् । संपूर्णमानसः संपूर्णमनोरथः ॥ ७ ॥ ततइत्यर्धमेकं ॥ ८ ॥ अथ भगवतः प्रादुर्भावंदर्शयतित्रिभिः—ततश्चेत्यादि । ततः अश्वमेधसमाप्त्यपेक्षया पायसोपयोगाद्वा । सच वैशाखादौ भवेत् । द्वादशे "तस्यपूरणे" इतिडट् । चैत्री पौर्णमास्यस्मिन्निति चैत्रः । "सास्मिन्पौर्णमासीति" इतिसंज्ञायामण् । चकारोवारसमुच्चयार्थः । नावमिके नवम्यां । विनयादित्वात्स्वार्थेठक् । "तिथयोद्वयोः" इति तिथिशब्दस्यपुँल्लिङ्गस्यापिसंभवात्क्लीबभावः । अदितिर्देवतायस्य तददितिदैवतं तस्मात् । देवतान्तात्तादर्थ्येयत्छान्दसः । नक्षत्रे पुनर्वस्वोरित्यर्थः । "पुनर्वसूनक्षत्रमदितिर्देवता" इतिश्रुतेः । पञ्चसुग्रहेषुस्वोच्चसंस्थेषु सूर्यगुरुशुक्राङ्गारकशनिषु स्वोच्चस्थानस्थितेषुसत्सु । उच्चस्थानलक्षणमुक्तंवराहमिहिरेण "अजवृषभमृगाङ्गनाकुलीराझषवणिजौचदिवाकरादितुङ्गाः" इति । कर्कटे कर्कटाख्ये । लग्ने राश्युदये । "राशीनामुदयोलग्नं" इत्यमरः । वाक्पतौ बृहस्पतौइन्दुनासह । प्रोद्यमाने उदयतिसति । आर्षमात्मनेपदं । अत्रप्रोद्यमानइत्युक्त-

ति० मुनिपुङ्गवं वसिष्ठं ऋश्यशृङ्गंच ॥ ३ ॥ शि० पुनःप्रवेशोक्त्यापूर्वंपुरींप्रविश्यराजप्रस्थापनार्थंबहिर्निर्गतइतिध्वनितम् ॥ ५ ॥ ति० ऋतूनामितिप्रथमार्थेषष्ठी ॥ ८ ॥

[पा०] १ ङ. झ. ञ. गृह्यामरा. २ ख. ग. पुरं. ३ घ. समृद्धबल. ४ झ. राज्ञाच. ५ ङ—झ. स्वगृहाणि. ६ क. घ—झ. ट. दशरथःपुनः. ७ ग. घ. पुरं. ८ क. ग. घ. च. छ. ज. द्विजोत्तमम्. ९ क. घ. ङ—ञ. अनुगम्यमानो. १० क. ख. घ. ङ. च. छ. झ. राज्ञाच. ११ ज. सानुकूल्येन. १२ ख. समाययुः.

ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह ॥ प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम् ॥ १० ॥

त्वात्पुनर्वसुनक्षत्रस्यकर्कटराशित्वाच्च तत्रेन्दुःस्थितइत्यवगम्यते । कर्कटकस्तुगुरोरुच्चस्थानं इन्दुनावर्तमानो गुरुस्तत्रवर्ततइतिगुरुरुच्चस्थः । चैत्रमासेसूर्यस्यमेषप्रवेशात्सूर्योप्युच्चगतएव । बुधःसदारविसंनिहितोनतदोच्चस्थानस्थः । चन्द्रश्चकर्कटगोनोच्चस्थः । तथाच परिशेषात् मन्दाङ्गारकशुक्रास्तुलामकरमीनसंस्थाइति पञ्चानामुच्चस्थत्वं । नामकीर्तनंविनापञ्चोच्चस्थत्वकीर्तनं तत्फलविशेषप्रतिपादनाय । यथाहुः "एकग्रहोच्चजातस्यसर्वारिष्टविनाशनम् ॥ द्विग्रहोच्चेतुसामन्तस्त्रिग्रहोच्चेमहीपतिः ॥ चतुर्ग्रहोच्चेसम्राट्स्यात्पञ्चोच्चेलोकनायकः" इति । प्रत्येकोच्चफलंचाहुः "सूर्येस्वोच्चगते जातस्सेनापत्यमवाप्नुयात् ॥ भौमेस्वोच्चगतेजातोवने राजाभविष्यति ॥ गुरौस्वोच्चगतेजातोधनीराज्याधिपो भवेत् ॥ शुक्रेस्वोच्चगतेजातोराज्यश्रियमवाप्नुयात् ॥ शनौस्वोच्चगतेजातोराज्याधिपसमोभवेत्" इति । गुरुचन्द्रयोगफलमुक्तंमिहिरेण "दृढसौहृदोविनीतःस्वबन्धुसंमानकृद्धनेशश्च ॥ शशिगुर्वोर्गुणशीलःसुरद्विजेभ्योरतोभवेत्पुरुषः" इति । रविबुधयोगफलंचतेनैवोक्तं "वेदान्तवित्स्थिरधनोरविज्ञयोःप्रायशोयशोर्थीस्यात् ॥ आर्यःक्षितिपतिदयितःसतांचबलरूपविद्यावान्" । चैत्रमासजन्मफलं "चैत्रेमधुरभाषीस्यादहङ्कारसुखान्वितः" ॥ नवमीजन्मफलं "दीर्घवैरीभुविख्यातो वश्यःशूरश्चपण्डितः ॥ निर्भयःसर्वभूतेभ्यो नवम्यांजायतेनरः" ॥ पुनर्वसुनक्षत्रफलं "सहिष्णुर्गूढवृत्तिश्च श्लेष्मलोनाट्यकोविदः ॥ अगृध्नुरल्पसंतुष्टः शीघ्रगोदितिधिष्ण्यजः" ॥चतुर्थपादजन्मफलं "कान्तप्रियवपुःश्लक्ष्णःसज्जनःप्रियदर्शनः ॥ लक्ष्मीवान्प्रियवादीचआदित्यान्तेप्रजायते" ॥ उच्चस्थेनबृहस्पतिनासमं चन्द्रस्यस्थितिः कर्कटकएवेति पुनर्वसुचतुर्थपादत्वं सिद्धम् । चैत्रपुनर्वसू शुक्लपक्षएवेतिसिद्धं । कर्कटकलग्नजन्मफलं "कर्कटेलग्नकेचन्द्रयुक्तेदृष्टेचभोगवान् ॥ गुरुणावीक्षितेयुक्तेधनाढ्योबहुभोगवान् ॥" तानिमान्फलविशेषान्सूचयितुंमासतिथ्यादिकीर्तनं । तथैवाहं—जगन्नाथमित्यादिना। जगन्नाथमित्यनेन "पञ्चोच्चेलोकनायकः" इत्युक्तंफलंदर्शितं । लग्नस्यगुरुयोगफलमाह—सर्वलोकनमस्कृतमिति । यथाहोराप्रदीपे "कविःसुगीतःप्रियदर्शनःसुखीदाताचभोक्तानृपपूजितःशुचिः ॥ देवद्विजाराधनतत्परोथभवेन्नरोदेवगुरौतनुस्थिते" रामं पश्चाद्रामाख्यं । यद्वा रामं श्यामवर्णं "अथोरामौसावित्रौ" इत्यत्राथश्यामाविति व्याख्यानात् । अनेनकर्कटेकन्यांशेजातइतिव्यज्यते । कन्यायाबुधांशत्वात् । बुधस्यचश्यामत्वात् । शुक्रांशत्वाद्वा । यथाह मिहिरः "रक्तश्यामोभास्करोगौरइन्दुर्नात्युच्चाङ्गोरक्तगौरश्चवक्रः ॥ दूर्वाश्यामोज्ञोगुरुर्गौरगात्रःश्यामःशुक्रोभास्करिःकृष्णदेहः" इति । सर्वलक्षणसंयुतं सर्वलक्षणैः सामुद्रिकोक्तैःपूर्णं । इदंलग्नचन्द्रफलं "पूर्णेशीतकरेलग्नेतेजस्वीनित्यगर्वितः" इतिहोराशास्त्रात् । विष्णोरर्धं विष्णुमयस्यपायसस्यार्धांशपरिणामभूतं । पुत्रं पुन्नाम्नोनरकात्त्रायतइतिपुत्रः तं । पुनस्तंविशेषयति ऐक्ष्वाकवर्धनमिति । ऐक्ष्वाकस्यदशरथस्यवर्धनं । अनेनलग्नस्यसौम्यग्रहयोगफलंदर्शितं । यथा "नरश्चिरायुर्नृपपूजितःसुखीलग्नंभवेत्सौम्ययुतंयथातथा ॥ लग्नेतथास्वामिनिरीक्षितेधनीकुशाग्रबुद्धिःकुलकीर्तिवर्धनः" ॥ महाभागं महाभाग्ययुक्तं । अनेन लग्नचन्द्रकृतोपिदोषोगुरुयोगात्परिह्रियतइतिसूच्यते । यथाहुर्होराप्रदीपे "जन्मकालिकलग्नांशेचन्द्रःकेन्द्रगतोयदि॥ जातस्यविनयोवित्तंज्ञानंबुद्धिश्चनैपुणं ॥ हीनंपणफरस्थेस्मिन्मध्यान्येतानितस्यच ॥ आपोक्लिमस्थचन्द्रश्चेदुत्कृष्टानिभवन्तिहि ॥ स्वांशेधिमित्रस्यनवांशकेवाचन्द्रेतुवाचस्पतिनाचदृष्टे। एवंविधेशीतकरेचरात्रौशुक्रेणदृष्टेधनवान्सुखीस्यात् ॥" एवंकेमद्रुमयोगोपिनास्तीत्युच्यते । केमद्रुमोनामचन्द्रलग्नस्योभयपार्श्वेग्रहाभावः । नह्यत्रमिथुनेसिंहेवाकश्चिद्ग्रहोस्ति । तथाहगार्ग्यः "व्ययार्थोभयगश्चन्द्राद्विनाभानुंनचेद्ग्रहः ॥ योगःकेमद्रुमोनामजातःस्यादत्रगर्हितः ॥ संतानबन्धुजनवस्त्रसुहृद्विहीनोदारिद्र्यदैन्यगददुःखमलैरुपेतः ॥ प्रेष्यः खलःसकललोकविरुद्धवृत्तिःकेमद्रुमेभवतिपार्थिववंशजोपि" ॥ एतत्सर्वमात्मानुभावेनपरिह्रियतइत्युच्यते

ति० । सर्वलोकनमस्कृतं अस्यसर्वलोकरूपश्चासौनमस्कृतश्चतमित्यर्थः । तेनादौप्रादुर्भावसमयेमात्राविराड्रूपस्यदर्शनंततस्तद्रूपदर्शनविस्मयात्तयानमस्कृतस्सन्मायया बालभावंदधाविति सूचितम् ॥ १० ॥

[पा०] १ ङ. सर्वदेव.

कौसल्याऽजनयद्रामं सर्वलक्षणसंयुतम् ।। विष्णोरर्धं महाभागं पुत्रमैक्ष्वाकवर्धनम् ।।
[लोहिताक्षं महाबाहुं रक्तोष्ठं दुन्दुभिस्वनम्] ।। ११ ।।
कौसल्या शुशुभे तेन पुत्रेणामिततेजसा ।। यथा वरेण देवानामदितिर्वज्रपाणिना ।। १२ ।।

महाभागशब्देन । यथाहमणिबन्धः "लग्नात्केन्द्रगते-चन्द्रेग्रहैरेकादिभिर्युते ।। केमद्रुमफलंनस्यात्केचित्केन्द्र-नवांशके" ।। एवंदोषान्तरपरिहारोपि । यथा "अष्ट-मेशेकलत्रस्थेसुतेशेवाकलत्रगे ।। मङ्गलेवाकलत्रस्थेभा-र्यानाशंप्रकुर्वते"इति ।। ९ ।। १० ।। ११ ।। रामावता-रोनकेवलंयज्ञकृतः किंतु कौसल्यातपःकृतइत्याह । कौसल्यातेनशुशुभे । कुतः पुत्रेण पुत्रत्वेनावतीर्णेन । पुत्रत्वेनावतीर्यस्वमनोरथपूरणादितिभावः । अमितते-जसा "सउश्रेयान्भवतिजायमानः" इत्युक्तरीत्या ज-न्मलब्धनिरवधिकतेजसा । यथा अदितिः वज्रपाणि-ना परत्वचिह्नभूतरेखामयवज्रयुक्तपाणितलेन । देवा-नांवरेण उपेन्द्रेण शुशुभे तथा यथापूर्वजन्मन्यदितिर-नुष्ठितव्रतविशेषैर्विष्णुंपुत्रंलब्धवती तथेयमपीत्यर्थः । यद्वा अमिततेजसा जगत्प्रकाशकादित्यस्यकुलस्यापिप्र-काशकेन । "सूर्यस्यापिभवेत्सूर्यः" इतिवत् । "ततो-खिलजगत्पद्मबोधायाच्युतभानुना ।। देवकीपूर्वस-न्ध्यायामाविर्भूतंमहात्मना" इत्युक्ताच्युतभानोरप्य-तिशयिततेजसा । देवानांवरेण इन्द्रेणवज्रपाणिनेत्यु-भयविशेषणं । वज्रहस्तेन वज्ररेखायुक्तहस्तेनच । अनेनैवसाधारणधर्मेणोपमानोपमेयभावः । यद्वा लौ-

ति॰ विष्णोः शङ्खचक्रानन्तविशिष्टस्यविष्णोरित्यर्थः । अर्धं किंचिन्न्यूनमर्धमित्यर्थः । शङ्खचक्रादेरभावादिति भावः । **शि॰** म-हाभागं महान्इतरभागापेक्षयाधिकः भागः प्रादुर्भावनिमित्तीभूतपायसरूपांशो यस्यसतं । किंच महान्भागोभाग्यंयस्मात्सतं । किंचमहतीं लोकदर्शनयोग्यां भांदीप्तिंगच्छतिप्राप्नोतीतिसतं । किंच महान्तोब्रह्मादयो भागाः प्राप्तप्रकाशायस्मात्सतं । किंचमहती सर्वपूज्या या आभा तांगच्छतिप्राप्नोतीतिसतं । किंचमहतींआभांपरमप्रकाशंआगमयतिआश्रितान्प्रापयतिसतं । किंचमहतीआभा-यस्यसमहाभःसः अगोमणिपर्वतोविहाराधारत्वेनयस्यसतं । किंचमहानांसर्वपूज्यानांब्रह्मादीनांकर्तृभूतानांआभागः अतिशयेनसेवा-यस्मिन्सतं । ऐक्ष्वाककुलवर्धनं ऐक्ष्वाकः इक्ष्वाकुकुलप्रादुर्भूतोदशरथः तस्यकुलंवर्धयतीतिसतं रामं सर्वाभिरामदातारं । विष्णोरर्ध-मित्यनेन योहिविष्णोर्वर्धकःसतत्तुल्यानामन्येषांचवर्धकइतिकिंवक्तव्यमितिकाव्यार्थापत्तिरलङ्कारोध्वनितः । तेनरघुनाथस्याघटितघ-टनापटीयस्त्वंव्यक्तं । सर्वाभिरामदातारमित्यनेनरामएवसर्वहितत्वमितिपरिसङ्ख्यालंकारोध्वनितः । तेन यस्सर्वहितःसस्वाश्रित-हितइतिकिंवक्तव्यमितिकाव्यार्थापत्त्यलंकारोध्वनितः । तेन रघुनाथस्यपरमदयालुतातिशयःसूचितः । तेनसर्वाधीशत्वंव्यक्तं । एतेनविष्णोरर्धंविष्णुमयस्यपायसस्यार्धंअर्धांशपरिणामभूतमितिभूषणोक्तार्थआपाततोरमणीयः । वाक्यार्थस्यलाक्षणिकत्वापत्तेः । सर्वेश्वरेश्वरस्यलीलार्थंस्वयंप्रादुर्भूतस्य ब्रह्मादिप्रार्थितस्यसर्वोत्पत्त्यादिकारणीभूतेच्छावतःउपादानासंभवाच्च । ईश्वरेश्वराणांसोपादान-कत्वेऽनवस्थापत्तेश्चकार्यत्वापत्त्याऽनित्यत्वापत्तेश्च । यत्तुभट्टाः विष्णोःशङ्खचक्रानन्तविशिष्टस्यअर्धंकिंचिन्न्यूनंशङ्खचक्रादेरभावादि-तिभावइति । तदपिनशोभनं । तादृशेऽर्थेविष्णुशब्दस्यसंकेताभावात् । एतदभिप्रायेणैवेममर्थमनूद्यवस्तुतस्त्वित्यादिनापाठकैरर्था-न्तरंवर्णितं । यत्त्वत्रपाठकाः " प्रणवंहीश्वरंविद्यात्सर्वस्यहृदयेस्थितं " इत्यादिश्रुतिभ्यः "गिरामस्म्येकमक्षरं" इत्यादिस्मृतिभ्यश्च वाच्यवाचकयोरभेदाच्चात्रविष्णुशब्देनप्रणवउच्यते । तस्यार्धं अर्धमात्रा तदात्मकंराममित्यर्थः । तथाचाथर्वणश्रुतिः । " अकारा-क्षरसंभूतस्सौमित्रिर्विश्वभावनः । उकाराक्षरसंभूतश्शत्रुघ्नस्तैजसात्मकः । प्राज्ञात्मकस्तुभरतोमकाराक्षरसंभवः । अर्धमात्रात्मको-रामस्सच्चिदानन्दविग्रहः" इति । तदपिनसम्यक् । वाक्यार्थस्यलाक्षणिकत्वापत्तेः । नहिशक्यार्थेनेष्टसिद्धौलक्षणांकश्चिदभ्युपैति । किंचयत्प्रणवावयवभूतस्यमात्रार्धस्यरामपरत्वं नतत्प्रणवस्येश्वरवाचकत्वं । यस्यचाखण्डप्रणवस्येश्वरवाचकत्वं नतदवयवीभूतस्यमा-त्रार्धस्यरामपरत्वमितिलक्षणास्वीकारेपितदभीष्टार्थस्यदुरुपपादत्वात् । एतेनविष्णोश्चतुर्भुजस्यार्धंद्विभुजमित्यर्थंवदन्तोपिप्रत्युक्ताः । लाक्षणिकत्वापत्तेस्तुल्यत्वात् । चतुर्भुजमात्रेविष्णुशब्दस्यसंकेताभावाच्च । अतएवभूमदक्षयज्ञादिप्रादुर्भूतानामष्टभुजादीनांविष्णु-त्वेनव्यवहारस्संगच्छते । तावन्मात्रार्थकत्वेद्विभुजंतंमहाभागमित्यपहायविष्णोरर्धमित्युक्त्यातदभिप्रेतार्थस्यऋष्यभिप्रायविरुद्धत्वाच्च । अर्धशब्दस्यवर्धकपरत्वंनदृष्टमितितुनभ्रमितव्यं । अर्धयतिवर्धयतीत्यर्धइतिव्युत्पत्त्यायौगिकत्वस्वीकारेणवर्धकपरत्वस्यसर्वतन्त्रसि-द्धत्वात् । अतएवबृहदारण्यकेपञ्चमेऽध्याये नवमब्राह्मणेकतमोऽध्यर्धइतिप्रश्नेयोऽयंपवतइत्युत्तरम् कथमध्यर्धइतिप्रश्ने यदस्मि-न्निदꣳसर्वमध्यार्ध्नोत् इत्यादिश्रुतौअर्धशब्दस्यवर्धकपरत्वमितिदिक् । अत्राधिकव्याख्यानदर्शनकाङ्क्षिभिर्विष्णुनासदृशोवीर्ये इत्यत्र द्रष्टव्यम् ।। ११ ।।

[पा॰] १ क—ट. दिव्यलक्षण. २ ट. भागमैक्ष्वाककुलवर्धनम्. ३ ज. पुत्रमैक्ष्वाकनन्दनम्. ग. घ. पुत्रमिक्ष्वाकुनन्दनम्. ४ इदमर्धं ङ. ञ. दृश्यते. ५ च. रक्ताक्षं. ख. रक्तास्यं.

भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः ॥ साक्षाद्विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः ॥ १३ ॥
अथ लक्ष्मणशत्रुघ्नौ सुमित्राऽजनयत्सुतौ ॥ सर्वास्त्रकुशलौ वीरौ विष्णोरर्धसमन्वितौ ॥ १४ ॥
पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः ॥ सार्पे जातौ च सौमित्री कुलीरेऽभ्युदिते रवौ ॥ १५ ॥

किकानामिन्द्रेश्रेष्ठत्वबुद्ध्यातदनुसारेणोपमा "इषुवद्गच्छतिसविता" इतिवत् । यद्वा दृष्टिदोषपरिहारायहीनोपमापिक्रियते । यद्वा अयंश्लोकःपूर्वशेषतयामात्ररिष्टभङ्गेनतदतिशयावहत्वद्योतनाय । तथाहि मातृकारकश्चन्द्रः सच वार्धिष्णुर्गुरुणायुक्तोमातरमभिवर्धयति ॥१२॥ अथ पायसोपयोगक्रमेणकौसल्यानन्तरकैकेयीप्रसवमाह—भरतइति । साक्षाद्विष्णोः प्रत्यक्षविष्णोः । रामस्य चतुर्भागः चतुर्थांशः । रामस्यविष्ण्वर्धत्वात् तस्यचतुर्थांशःविष्णोरष्टमांशइत्यर्थः । यद्वा साक्षाद्विष्णोर्वैकुण्ठवासिनश्चतुर्थांशः । चतुर्थस्यांशः अष्टमभागइत्यर्थः । यद्वा साक्षात्प्रत्यक्षभूतइतिसौलभ्यमुच्यते । यद्वा साक्षात् अव्यवधानेनजज्ञे रामादनन्तरंजज्ञइत्यर्थः । सर्वैः रामसंबन्धितयोक्तैः गुणैः समुदितः युक्तः ॥ १३ ॥ अथ भरतजननानन्तरंद्विवचनेनयमलत्वमुच्यते । अर्धसमन्वितौ समन्विताधौं । परनिपातः । अर्धशब्दोंशमात्रवाची । समन्वितचतुर्थभागाष्टमभागरूपौ । "भित्तंशकलखण्डेवापुंस्यर्धोर्धंसमेंशके" इत्यमरः । अन्यथा पायसप्रदानक्रमविरोधः । समन्वितशब्देनयुगपदुपयुक्तत्वमुच्यते ॥ १४ ॥ त्रयाणांजन्मकालमाह—पुष्यइति । पुष्ये पुष्ययुक्तेतिथौ । "नक्षत्रेणयुक्तःकालः" इति विहितस्याणुप्रत्ययस्य "लुबविशेषे" इतिलुप् । मीनस्यगुरुक्षेत्रत्वात्तज्जन्मफल-

शि० सत्यपराक्रमः सत्याअयोध्याराजधानीअस्येतिसत्योरामः तस्यैवपराक्रमोयस्य तस्मादेवपराक्रमोयस्येतिवा सएवपराक्रमोयस्येतिवा रघुनाथाज्ञाकारीत्यर्थः । किंच सत्यःकापट्यरहितः पराक्रमोयस्यसः । साक्षाद्विष्णोर्वैकुण्ठेशस्यचतुर्भागः चत्वारोभागायस्मिन् सर्वांशइत्यर्थः । अतएवविष्णोस्तदवस्थापन्नस्यसर्वैर्गुणैस्समुदितः । यदिच विष्णोरित्यत्रषष्ठी "राहोश्शिरः" इतिवत् तर्हिसर्वैर्गुणैस्समुदितः चतुर्भागः साक्षाद्विष्णुरेवेत्यर्थः । विष्णोरित्युभयान्वयि । अत्रार्थेप्रमाणं "वैकुण्ठेशस्तुभरतः क्षीराब्धीशश्चलक्ष्मणः । शत्रुघ्नस्तुस्वयंभूमारामसेवार्थमागताः" इतिनारदपञ्चरात्रवचनं ॥ १३ ॥ वि० अथ भरतजन्मानन्तरं विष्णोरोङ्कारस्य अर्धौ अर्धांशौ अकारोकारौविश्वतैजसौविराड्ढिरण्यगर्भौ ताभ्यांसमन्वितौ तदात्मकावितियावत् । सर्वास्त्रकुशलौ लक्ष्मणशत्रुघ्नौसुतौसुमित्राअजनयदित्यन्वयः । उक्तंचाथर्वणवेदेश्रीरामोत्तरतापनीयेप्रणवव्याख्यायां । तथैतेश्लोकाभवन्ति "अकाराक्षरसंभूतस्सौमित्रिर्विश्वभावनः । उकाराक्षरसंभूतश्शत्रुघ्नस्तैजसात्मकः । प्राज्ञात्मकस्तुभरतोमकाराक्षरसंभवः । अर्धमात्रात्मकोरामोब्रह्मानन्दैकविग्रहः" इति । प्रजापतिप्रेषितपायसंतुनित्यसिद्धचिदानन्दविग्रहेनोपादानभावमर्हति । अपितुभगवदाविर्भावसूचनेनदशरथमनुगृह्णाति । अपिच "लोकवत्तुलीलाकैवल्यं" इतिन्यायानुगृहीतश्रुतिपुराणेतिहासादौश्रीरामकथाप्रसिद्धैव । श्रुतौतावात् "पूर्वापरंचरतोमाययैतौशिशूक्रीडन्तौपरियातोअध्वरम् । विश्वान्यन्योभुवनाऽभिचष्टऋतूनन्योविदधज्जायतेपुनः" इति । एतौ श्रीरामलक्ष्मणौ वस्तुतःपुराणपुरुषावेव मायया मायाभिधस्वशक्त्या शिशू दशरथराजकुमारौभूत्वा अध्वरं विश्वामित्रस्ययज्ञं अनेकरक्षोविक्षिप्तं परियातः प्राप्तौ रक्षणायेत्यर्थः । कथंभूतौ । क्रीडन्तौ ताटकासुबाह्वादिवधप्रमुखक्रीडासक्तौ । पुनःकथंभूतौ । पूर्वापरंचरतः अग्रजत्वमनुजत्वंप्राप्ताविलर्थः । तयोर्मध्येअन्यः एकः श्रीरामः विश्वानि सर्वाणि भुवना भुवनानि अभिचष्टे प्रकाशयति । स्वाध्यस्तविश्वप्रकाशहेतुरित्यर्थः । अन्यः लक्ष्मणः ऋतून्विदधत्पुनर्जायते । अयमर्थः । लक्ष्मणस्यशेषावतारत्वात्शेषस्यचकालात्मकत्वस्य "योयंकालोमयाख्यातस्सोनन्तः—" इतिपुराणादवगतेः । कालस्यचाखण्डदण्डायमानस्यवसन्तप्रमुखर्तुकारणत्वात्ऋतून्विदधदित्युक्तं । पुनरिति पुनःपुनरित्यर्थः । यदायदाश्रीरामोजायतेतदातदाशेषात्मा लक्ष्मणोपिजायतइति । अथविष्णुरेवकौसल्यायांश्रीरामरूपेणावतीर्णोगुणैरधिकंविरुरुचेइत्याहश्रुतिः । "नवोनवोभवतिजायमानोऽह्नांकेतुरुषसामेत्यग्रं । भागंदेवेभ्योविदधात्यायन्प्रचन्द्रमास्तिरतेदीर्घमायुः" इति । सआदिनारायणः श्रीरामरूपेणजायमानः नवोनवोभवति सुन्दरतयाप्रतिक्षणंनवप्रेक्षणीयोभवतीत्यर्थः । कुतइत्यतआह—चन्द्रमाइति । चन्द्रशब्दाभिलप्यइत्यर्थः । रामेचन्द्रेतिव्यपदेशोहिश्रीरामेप्रेक्षणीयतमत्वमेवाहेतिभावः । कथंभूतः । अह्नां दिनानां केतुः विशेषकः । यानिदिनानिश्रीरघुनाथोपासनयोपयान्तितानिविशिष्टानीतिभावः । यश्चश्रीरामः उषसामग्रं प्रातःकालानामग्रे ब्राह्ममुहूर्तं एति चिन्तनीयत्वेनप्राप्नोतीत्यर्थः । तदाश्रीरामस्मृतेर्बहुशोविहितत्वादितिभावः । यश्चजायमानोदेवेभ्योभागं यज्ञभागं विदधाति रावणादिकृतप्रतिबन्धशून्यंकरोतीत्यर्थः । यश्च आयन् स्मृतिमागच्छन् स्वभक्तानांदीर्घमायुरित्युपलक्षणं । संपदः प्रतिरते ददातीत्यर्थः । एवंपुराणादिषुद्रष्टव्यं । "रामतत्वंविजानातिहनुमानथलक्ष्मणः । तद्विमर्शेतुकाशक्तिरितरस्यचकस्यचित्" इति ॥ १४ ॥

[पा०] १ घ. सर्वार्थकुशलौ. २ ख. घ. ङ. झ. जातौतु.

राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक् ॥ गुणवन्तोऽनुरूपाश्च रुच्या प्रोष्ठपदोपमाः ॥ १६ ॥
जगुः कलं च गन्धर्वा ननृतुश्चाप्सरोगणाः ॥ देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्युता ॥ १७ ॥
उत्सवश्च महानासीदयोध्यायां जनाकुलः ॥ १८ ॥
रथ्याश्च जनसंबाधा नटनर्तकसंकुलाः ॥ गायनैश्च विराविण्यो वादनैश्च तथाऽपरैः ॥
[विरेजुर्विपुलास्तत्र सर्वरत्नसमन्विताः] ॥ १९ ॥
प्रदेयांश्च ददौ राजा सूतमागधवन्दिनाम् ॥ ब्राह्मणेभ्यो ददौ वित्तं गोधनानि सहस्रशः ॥ २० ॥
अतीत्यैकादशाहं तु नामकर्म तथाऽकरोत् ॥ २१ ॥
ज्येष्ठं रामं महात्मानं भरतं कैकयीसुतम् ॥ सौमित्रिं लक्ष्मण इति शत्रुघ्नमपरं तथा ॥ २२ ॥

माह—प्रसन्नधीरिति । सार्पे सर्पदेवताकेनक्षत्रे । "आश्लेषानक्षत्रंसर्पादेवता" इतिश्रुतिः । सुमित्रायाःपुत्रौ सौमित्री । बाह्वादित्वादिञ् । कुलीरेकर्कटके । रवौ अभ्युदिते । भरतजननस्योदयात्पूर्वत्वज्ञापनायात्रोदितइत्युक्तं । अन्यथा चैत्रकर्कटकस्यमध्याह्नकालिकत्वेनविरोधात् । यद्वा उदिते प्रवृद्धे मध्याह्नकालइत्यर्थः । "पञ्चोच्चत्वंगुरुचन्द्रयोगः" इत्यादि सर्वत्रसमानं । रामस्यपुनर्वसूनक्षत्रं तिथिर्नवमी । भरतस्यपुष्यनक्षत्रंदशमी । सौमित्र्योश्चदशमीआश्लेषा तारेतिविशेषः ॥ १५ ॥ एकत्वेपिपृथग्वर्तमानाः । एकस्यचतुर्धावस्थानेउपमानमाह—प्रोष्ठेति । प्रोष्ठोगौः तस्येवपादायासांताःप्रोष्ठपदाः "सुप्रात—" इत्यादिसूत्रेअच्प्रत्ययान्तोनिपातितः । रुच्या कान्त्या । प्रोष्ठपदोपमाः । राज्ञोनुरूपाश्चत्वारःपुत्राजज्ञिरे । यज्ञफलंनिर्वृत्तमितिभावः । पृथग्गुणवन्तइतिवा । प्रत्येकमनन्यसाधारणगुणवन्तइत्यर्थः । रामस्यसामान्यधर्मरुचिः लक्ष्मणस्यशेषत्वज्ञानं भरतस्यभगवत्पारतन्त्र्यधीः शत्रुघ्नस्यभागवतपारतन्त्र्यमिति परस्परविलक्षणगुणवन्तइत्यर्थः ॥ १६ ॥ जननकालिकशुभनिमित्तानिदर्शयति—जगुरिति । कलं अव्यक्तमधुरंयथाभवतितथा जगुः । खात् आकाशात् ॥ १७ ॥ अथजातकर्मोत्सवमाह—उत्सवश्चेति । अयोध्यायामित्यनेनप्रतिगृहमुत्सवोभूदित्युच्यते । जनाकुलः आकुलजनः । इदमर्धमेकम् ॥ १८ ॥ गायनैः गायकैः । वादनैः वाद्यशिल्पैः । अपरैः सूतमागधवन्दिभिश्च । विराविण्यः शब्दवत्यः । रथ्याआसन् ॥ १९ ॥ अथदानसमृद्धिमाह—प्रदेयानिति । प्रदेयान् पारितोषिकान् । सूतमागधवन्दिनामितिशेषेषष्ठी । सूताःपौराणिकाः । मागधाः वंशावलिकीर्तकाः । बन्दिनः स्तुतिपाठकाः । सूतादीनांप्रदेयान्ददावित्यन्वयः । गोधनानि गोरूपधनानि । सहस्रशः सहस्राणि ॥ २० ॥ अर्धमेकं । लक्ष्मणजन्मदिनापेक्षयाएकादशाहत्वं । रामजन्मदिनापेक्षया द्वादशदिनंतत् । तदत्ययेप्रथमसूतकेनैवनिवृत्तेनसर्वसूतकनिवृत्तेर्द्वादशाहेनामकरणवचनमुपपन्नमेव । अन्यथा क्षत्रियस्यद्वादशाहंसूतकमितिस्मृतिः । त्रयोदशेराज्ञांनामकरणमितिस्मृतिश्चविरुध्येत । नामकर्म नामकरणं । तथा जातकर्मवत् । इत्युत्सवातिशयोतिदिश्यते ॥ २१ ॥ कस्यकिंनामाक-

ति० प्रोष्ठपदोपमाः प्रोष्ठपदेतिपूर्वाभाद्रपदोत्तराभाद्रपदयोर्नाम । तयोश्चप्रत्येकंद्वेद्वेतारेइतिज्योतिश्शास्त्रप्रसिद्धं । तैत्तरीयश्रुतिरपि "चत्वारएकमभिकर्मदेवाः प्रोष्ठपदासइतियांवदन्ति" इति । तदुपमाइत्यर्थः । **शि०** प्रोष्ठपदोपमाः प्रोष्ठोगौः तस्यपदेखुरौ उपमायेषांते द्वौद्वौमिलित्वास्थिताबभूवुरित्यर्थः ॥ १६ ॥ **ति०** पतदित्यत्रअडभावश्छान्दसः ॥ १७ ॥ **ति०** एकादशाहशब्दः सूतकान्तोपलक्षणं । अन्यथा "क्षत्रियस्यद्वादशाहंसूतकं" इतिस्मृतिविरोधस्स्यात् । तथाचरामजन्मतस्त्रयोदशेदिनेनामकरणमकरोदित्यर्थः । **शि०** एकादशअहानियस्मिन्दिनसमूहेसतं । किंच एकश्चैकश्चैकौतौचदशचएकादश तेषांसंख्यापूरकमेकादशं । तदेवाहः द्वादशदिनानीत्यर्थः । अतीत्यातिक्रम्यत्रयोदशदिनइत्यर्थः । नामकर्माकरोत् । राजेतिशेषः । किंचवसिष्ठोराज्ञाऽकारयदित्यर्थः । अन्तर्भावितणिजर्थः । एकादशाहमित्यत्र प्रथमपक्षे "अच्प्रत्यन्वव" इत्यत्र अजितियोगविभागादच् । अतएव "क्षत्रियस्यद्वादशाहंसूतकं त्रयोदशेराज्ञोनामकरणं" इत्यादिस्मृतयोनुकूलाः । राजेतिशेषादेव "द्वादशेऽहनि जातस्यपितानामकुर्यात्" इति स्मृत्यानविरोधः । क्षत्रियस्य नामकरणे नाधिकारइत्युक्तौतुमूलंमृग्यं ॥ २१ ॥

[**पा०**] १ वृष्टिर्दिवच्युता. २ ङ. च. छ. झ. ञ. खात्ततत्. ३ घ. ज. ट. गायकैश्च. ४ घ. वादित्रैश्च. ख. ग. ज. वादकैश्च. क. वाद्यकैश्च. ५ इदमर्धं ङ. च. छ. झ. ञ. ट. दृश्यते. ६ ज. गोदानानि.

वसिष्ठः परमप्रीतो नामानि कृतवांस्तदा ॥ २३ ॥
ब्राह्मणान्भोजयामास पौरजानपदानपि ॥ अददद्ब्राह्मणानां च रत्नौघममितं बहु ॥ २४ ॥
तेषां जन्मक्रियादीनि सर्वकर्माण्यकारयत् ॥ २५ ॥
तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः ॥ बभूव भूयो भूतानां स्वयंभूरिव संमतः ॥ २६ ॥
सर्वे वेदविदः शूराः सर्वे लोकहिते रताः ॥ सर्वे ज्ञानोपपन्नाश्च सर्वे समुदिता गुणैः ॥ २७ ॥
तेषामपि महातेजा रामः सत्यपराक्रमः ॥ इष्टः सर्वस्य लोकस्य शशाङ्क इव निर्मलः ॥ २८ ॥
गजस्कन्धेऽश्वपृष्ठे च रथचर्यासुसंमतः ॥ धनुर्वेदे च निरतः पितुः शुश्रूषणे रतः ॥ २९ ॥
बाल्यात्प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्धनः॥ रामस्य लोकरामस्य भ्रातुर्ज्येष्ठस्य नित्यशः ॥३०॥

रोदित्यत्राह—ज्येष्ठमिति । रामं रामनामानं । रमन्ते सर्वेजनाः गुणैरस्मिन्निति व्युत्पत्त्येतिभावः । महात्मानं महास्वभावं । निरवधिकगुणमितियावत् । अनेन रामपदप्रवृत्तिनिमित्तमुक्तं । राजाज्येष्ठपुत्रंरामनामानमकरोत् । कैकयीसुतंभरतनामानमकरोत् । "भरतइति राज्यस्यभरणात्" इति सहस्रानीकोक्तरीत्या राजनिर्मुक्तेरामेचवनंगते अराजकाराज्यभरणादितिभावः । एवंसौमित्रिं सुमित्रापुत्रं । लक्ष्मणइति नामयुक्तमकरोत् । रामकैङ्कर्यलक्षणसंपद्युक्तत्वाल्लक्ष्मणः । "लक्ष्म्याअच्च"इति पामादिपाठादिकारस्याकारः । मत्वर्थीयोनः । अतएव "लक्ष्मणोलक्ष्मिसंपन्नः" इतिवक्ष्यति । अपरंसौमित्रिं शत्रुघ्नं शत्रुघ्ननामानमकरोत् । शत्रून्हन्तीतिशत्रुघ्नः ॥ २२ ॥ ननु क्षत्रियस्यनामकरणेऽनधिकारात् पुरोहितकर्तृकत्वस्मरणात्कथंदशरथस्यनामकर्मकर्तृत्वमित्याशङ्क्य पुरोहितद्वाराकर्तृत्वमित्यभिप्रेत्याह—वसिष्ठइति । तदा द्वादशेऽह्नि । अतएवाकारयदितिवक्ष्यति ॥२३॥ नामादिनान्दीकरणमितिनियमात् नामकर्मणिनान्दीकरणमाह—ब्राह्मणानिति । पौरेत्यादि ब्राह्मणविशेषणं । राज्ञेतिशेषः । ब्राह्मणानामितिसंबन्धसामान्येषष्ठी । अमितंअसङ्ख्येयं । बहु बहुप्रकारम् ॥२४॥ उक्तानुवादपूर्वकमितरसंस्कारकरणंदर्शयति—तेषामिति । अर्धं । आदिशब्देनान्नप्राशनचौलोपनयनादीनिगृह्यन्ते ॥ २५॥ उक्तंरामस्यमहात्म्यमुपपादयति—तेषामिति । तेषांसुतानांमध्येवयसाज्येष्ठः केतुरिव ध्वजइव निजकुलप्रकाशकः पितुर्भूयो रतिकरः संतोषकरः भूतानांस्वयंभूरिवसंमतः नित्यप्रेमास्पदं बभूव ॥२६॥ उपनीतानांतेषांवेदाध्ययनादिकमाह—सर्वइति । वेदविदः अधीतवेदाः । विदुलाभइत्यस्मात्क्विप् । शूराइत्यनेनाधीतधनुर्वेदत्वमुच्यते । लोकहितेरताइत्यनेन धनुर्वेदाभ्यासकार्यपरत्वं । वेदार्थज्ञानसिद्धिमाह—ज्ञानेति । ज्ञानकार्यगुणसंपत्तिमाह—समुदितागुणैरिति । गुणैर्दयादिभिः । आसन्नितिशेषः ॥२७॥ अथप्रत्येकमसाधारणान्गुणान्वक्तुमादौरामगुणानाह—तेषामिति । अपिशब्देनान्येषांरघुवंश्यानामपिमध्यइत्यर्थः । महातेजाः महाप्रतापः । सत्यपराक्रमः अमोघवीर्यः । निर्मलश्शशाङ्कइव सर्वलोकस्य इष्टः सर्वदादर्शनीयः अभवदितिशेषः ॥२८॥ अत्ररामइत्यनुषज्यते । गजस्कन्धेस्थित्वातत्प्रेरणसंमतःरामइवगजस्कन्धारोहणादौनकोपिसमर्थइतिगजसादिभिःश्लाघितइत्यर्थः । एवमुत्तरत्रापियोज्यम् ॥२९॥ अथलक्ष्मणगुणविशेषानाह—बाल्यादित्यादिभिश्चतुर्भिः । लक्ष्मींवर्धयतीतिलक्ष्मिवर्धनः । ङ्यापोःसंज्ञाछन्दसोर्बहुलं"इतिह्रस्वः । कैङ्कर्यसंपद्वर्धकोलक्ष्मणो रामस्यबाल्यात्प्रभृति बाल्यमारभ्य । प्रभृतियोगेपिपञ्चमीप्रयुज्यते । सुस्निग्धः

ति० नामानिकुरुते नामकरणमकारयदित्यर्थः । वर्तमानसामीप्येलट् । अन्तर्भावितण्यर्थताच । यत्तुकतकेन राज्ञोनामकरणादावनधिकारइत्युक्तं अकरोदित्यत्रच पुरोहितद्वारेतिशेषपूरणंकृतं तत्रमानंचिन्त्यम् । शि० वसिष्ठः नामानितथाइतिकुरुते योग्यानीमानि इत्यवदत् ॥ २३ ॥ ति० भोजयामास राजाज्ञयेतिशेषः ॥ २४ ॥ ति० अकारयत् वसिष्ठोराज्ञेतिशेषः ॥ २५ ॥ ति० गुणकथनेपौनरुक्त्यंदार्ढ्याय ॥ २८ ॥

[पा०] १ घ.—छ. झ. ञ. ट. कुरुतेतदा. २ क. ख. घ.—छ. ञ. ट. अददात् ज. संददौ. ग. अदाच्चब्राह्मणानांतु. ३ ङ. झ. ममलं. ४ क. झ. कार्याण्यकारयत्. ५ ख. ब्रह्मविदः. ६ ट. पौरहिते. ७ ग.—छ. झ. ञ. ज्ञानोपसंपन्नाः. ८ ट. सुधांशुरिव. ९ ख. ग. घ. पितृशुश्रूषणे.

सर्वप्रियकरस्तस्य रामस्यापि शरीरतः ॥ लक्ष्मणो लक्ष्मिसंपन्नो बहिःप्राण इवापरः ॥ ३१ ॥
न च तेन विना निद्रां लभते पुरुषोत्तमः ॥ मृष्टमन्नमुपानीतमश्नाति न हि तं विना ॥ ३२ ॥
यदा हि हयमारूढो मृगयां याति राघवः ॥ तदैनं पृष्ठतोऽभ्येति सधनुः परिपालयन् ॥ ३३ ॥
भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः ॥ प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः ॥३४॥
स चतुर्भिर्महाभागैः पुत्रैर्दशरथः प्रियैः ॥ बभूव परमप्रीतो देवैरिव पितामहः ॥ ३५ ॥
ते यदा ज्ञानसंपन्नास्सर्वे समुदिता गुणैः ॥ ह्रीमन्तः कीर्तिमन्तश्च सर्वज्ञा दीर्घदर्शिनः ॥३६॥
तेषामेवंप्रभावानां सर्वेषां दीप्ततेजसाम् ॥ पिता दशरथो हृष्टो ब्रह्मा लोकाधिपो यथा ॥ ३७ ॥
ते चापि मनुजव्याघ्रा वैदिकाध्ययने रताः ॥ पितृशुश्रूषणरता धनुर्वेदे च निष्ठिताः ॥ ३८ ॥
अथ राजा दशरथस्तेषां दारक्रियां प्रति ॥ चिन्तयामास धर्मात्मा सोपाध्यायः सबान्धवः ॥३९॥

सुतरांस्निग्धः। अङ्कुरात्प्रभृतिपरिमलेनैवोत्पन्नस्तुलसीकाण्डइवजन्मनःप्रभृतिनिरवधिकभक्तिसंपन्नः । यद्वा सुस्निग्धः रामपर्यङ्केणस्वपर्यङ्कायोजनेबाल्येपिननिद्रातीत्यर्थः। अनेनस्वरूपप्रयुक्तत्वंदास्यस्योक्तं। अथगुणकृतत्वमाह। लोकरामस्य लोकान्रमयतीतिलोकरामः। ण्यन्तात्कर्मण्यण् "गुणैर्दास्यमुपागतः" इत्यन्यत्रोक्तं। तस्य भ्रातुःज्येष्ठस्येत्यनेनजन्मकृतदास्यमुक्तं। नित्यशः नित्यं। सुस्निग्धइत्यन्वयः ॥३०॥ शरीरतइत्युपलक्षणं त्रिविधकरणैरपि। रामस्यसर्वप्रियकरः। यद्वा स्वशरीरादपिरामस्यप्रियकरः। स्वशरीरमुपेक्ष्यापिप्रियकरइत्यर्थः। यद्वा शरीरतोबहिःस्थितः अपरःप्राणइवस्थितः। यद्वा शरीरतः रामशरीरस्य। सार्वविभक्तिकस्तसिरित्युक्तेः। लक्ष्मणस्यदक्षिणबाहुत्वाद्रामसर्वावयवानांसर्वप्रियकरइत्यर्थः। "रामस्यदक्षिणोबाहुर्नित्यंप्राणोबहिश्चरः" इतिवक्ष्यमाणत्वात्। अस्मिन्पक्षे अपिशब्देनरामस्यस्वविषयप्रियकरत्वंसमुच्चीयते । लक्ष्मिसंपन्नइत्यनेनलक्ष्मणशब्दार्थउक्तः ॥ ३१ ॥ रामस्यलक्ष्मणेऽनुरागंदर्शयति —नचेति। तेनविना। "पृथग्विनानानाभिस्तृतीयान्यतरस्यां" इतितृतीया। निद्रांनलभते प्राणंविनाकथंनिद्रांलभेतेत्यर्थः। किंचकौसल्ययानीतंमृष्टान्नंतंविनानाश्नाति। दक्षिणबाहुंविनाकथमश्नातीतिभावः। पुरुषोत्तमः प्रेमशालिविषयेसर्वात्मनाविश्लेषासहइत्यर्थः। "क्षणेपितेयद्विरहोतिदुःसहः" इतिह्युक्तम् ॥ ३२ ॥ राघवोरामःयदाहयमारूढःसन् मृगयां आखेटमुद्दिश्ययाति। तदा तदानीमेव। एनं रामं। सधनुःसन्पालयन्। अस्थानेभयशङ्कितयापृष्ठतः वेगवद्धयसमीपएव। अभ्येति। हिःप्रसिद्धौ ॥ ३३ ॥ अथभरतशत्रुघ्नयोःपरस्परानुरागंदर्शेति— भरतस्यापीति। हि यस्मात् सशत्रुघ्नोलक्ष्मणावरजः। तस्मात्तत्तुल्यप्रकृतिकत्वात् भरतस्यापि प्राणैः प्राणेभ्योपि। प्रियतरआसीत्। तस्य शत्रुघ्नस्यच। भरतः तथाप्रियआसीत् ॥३४॥ दशरथस्यस्वाराधकस्यमनोरथपरिपूरणमेतदवतारस्यप्रथमप्रयोजनं। तन्निर्वृत्तिमाह—सइतिसदेवैश्चतुर्भिर्दिक्पालैः ॥३५॥ पूर्वलाभकृतप्रीतिरुक्ता अथतेषांज्ञानादिसंपत्तिकृतप्रीतिविशेषमाह—तइति। श्लोकद्वयमेकान्वयम्। यदा यस्मिन्वयसि। ज्ञानं शास्त्रज्ञानं। ह्रीमन्तः प्रमादात्प्राप्ताकृत्यचिन्तासुलज्जावन्तः। कीर्तिमन्तः ज्ञानकृतप्रथावन्तः। सर्वज्ञाः सकललौकिकप्रज्ञावन्तः। दीर्घदर्शिनः नित्यभाविज्ञानवन्तः। आसन्नितिशेषः। तदातेषांपिताहृष्टोबभूव ॥ ३६ ॥ ३७ ॥ पितृप्रीतिंदृष्ट्वापुनरपिविद्यारतास्तेआसन्नित्याह—तेचापीति। तेचापि पित्रुपलालिताअपि। वैदिकानां वेदसंबन्धिनांस्मृतीतिहासपुराणन्यायादीनामध्ययनेरताः निरताः ॥३८॥ अथैषांसमावर्तनोचितकालप्राप्तिंदर्शयति—अथेति। दारविषयिणीक्रियादारक्रिया। विवाहइत्यर्थः। चिन्त-

शि० बहिःप्राणइवापरइत्यभूतोपमालंकारेणलक्ष्मणसदृशोरामस्यप्रियोलक्ष्मणएवेत्यनन्वयालंकारोध्वनितः। तेनरामप्रसादाकाङ्क्षिभिर्लक्ष्मणोऽवश्यमाश्रयणीयइतिवस्तुव्यक्तं ॥ ३१ ॥ ति० देवैः चतुर्भिर्दिक्पालैः। यद्वा वसुरुद्रादित्यविश्वेदेवैः ॥ ३५ ॥ ति० दारक्रिया विवाहः "कुमारस्यविशालाक्षंपाण्डुतांमुखमाददे । कपोलतलसंलीनपाणिःपद्मासनस्थितः" इत्यादियोगवासिष्ठो-

[पा०] १ ख. नित्यंप्राणाबहिश्चराः. २ ख. घ. च. ञ. अथैनं. ३ ख. णावरजोपि. ४. ३४ तमश्लोकानन्तरं सचतुर्भिरितिश्लोकात्पूर्वं ख. पाठे एकःश्लोकोऽधिकोदृश्यते. सच–शत्रुघ्नोनुगतःश्रीमान्पुरस्ताद्भरतोऽभवत् । नित्यंसर्वेऽनुरक्ताश्चपितरंतोषयन्तिते. ५ घ. ज. श्रीमन्तः.

तस्य चिन्तयमानस्य मन्त्रिमध्ये महात्मनः ॥ [1]अभ्यागच्छन्महातेजा विश्वामित्रो [2]महामुनिः ॥४०॥
स राज्ञो दर्शनाकाङ्क्षी द्वाराध्यक्षानुवाच ह ॥ शीघ्रमाख्यात मां प्राप्तं कौशिकं [3]गाधिनन्दनम् ॥४१॥
तच्छ्रुत्वा वचनं [4]तस्य [5]राज्ञो वेश्म प्रदुद्रुवुः ॥ संभ्रान्तमनसः सर्वे तेन वाक्येन चोदिताः ॥ ४२ ॥
ते गत्वा राजभवनं विश्वामित्रमृषिं [6]तदा ॥ प्राप्तमावेदयामासुर्[7]नृपायैक्ष्वाकवे तदा ॥ ४३ ॥
तेषां तद्वचनं श्रुत्वा सपुरोधाः समाहितः ॥ प्रत्युज्जगाम [8]तं हृष्टो ब्रह्माणमिव वासवः ॥ ४४ ॥
[9]तं दृष्ट्वा ज्वलितं दीप्त्या तापसं संशितव्रतम् ॥ प्रहृष्टवदनो राजा ततोऽर्घ्यमुपहारयत् ॥ ४५ ॥
स राज्ञः प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा ॥ कुशलं चाव्ययं चैव पर्यपृच्छन्नराधिपम् ॥ ४६ ॥
[10]पुरे कोशे जनपदे बान्धवेषु सुहृत्सु च ॥ कुशलं कौशिको राज्ञः पर्यपृच्छत्सुधार्मिकः ॥ ४७ ॥
अपि ते सन्नताः सर्वे [11]सामन्ता रिपवो जिताः ॥ दैवं च मानुषं [12]चापि कर्म ते साध्वनुष्ठितम् ॥ ४८ ॥
वसिष्ठं च समागम्य कुशलं [13]मुनिपुङ्गवः ॥ [14]ऋषींश्चान्यान्यथान्यायं महा[15]भागानुवाच ह ॥ ४९ ॥
ते सर्वे हृष्ट[16]मनसस्तस्य राज्ञो निवेशनम् ॥ विविशुः [17]पूजितास्तत्र निषेदुश्च यथार्हतः ॥ ५० ॥
अथ हृष्टमना राजा विश्वामित्रं महामुनिम् ॥ उवाच परमोदारो [18]हृष्टस्तमभिपूजयन् ॥ ५१ ॥

यामासतुल्यशीलवयोवृत्ताभिजनलक्षणकन्यान्वेषणं-कृतवान् । अयमर्थोधर्मात्मेत्यनेनावगम्यते ॥ ३९ ॥ इयताप्रबन्धेनभगवदवतारोदर्शितः । अथभगवदवतारप्रयोजनानिसाधुपरित्राणदुष्कृद्विनाशनधर्मस्थापनानिदर्शयत्याशास्त्रसमाप्तेः । तत्रसाधुपरित्राणंप्रधानं । कर्षकस्यसस्यवृद्धिरिव दुष्कृद्विनाशस्त्वानुषङ्गिकः । सस्यप्रतिबन्धकतृणोन्मूलनवत् । अतोदुष्कृद्विनाशनान्तरीयकंसाधुपरित्राणंवक्तुमुपक्रमतेविश्वामित्रवृत्तान्तेन । अर्थाद्धर्मसंस्थापनमपिसिध्यतीतिबोध्यम् । चिन्तयमानस्य चिन्तयमाने । स्वयंतत्कार्यसमर्थोपिरामवैभवप्रकटनायतदागमनमितिसूचयति—महातेजाइति ॥४०॥ कौशिकं कुशिकगोत्रजं ॥ ४१ ॥ तेनवाक्येन-चोदितास्तच्छ्रुत्वावेश्मप्रतिप्रदुद्रुवुः ॥४२॥ ऐक्ष्वाकवे इक्ष्वाकुवंश्याय । क्रियाग्रहणंकर्तव्यमितिसंप्रदानत्वं । अभ्यागतविलंबासहिष्णवइतिभावः ॥ ४३ ॥ सपुरोधाः पुरोहितसहितः । ब्रह्माणं चतुर्मुखं ॥ ४४ ॥ ज्वलितं । अकर्मकत्वात् "गत्यर्थाकर्मक—" इतिकर्तरि क्तः । संशितव्रतं तीक्ष्णनियमं । अर्घ्यं पूजार्थोदकं । उपहारयत् वसिष्ठेनेतिशेषः । अडभावआर्षः ॥४५॥ शास्त्रदृष्टेनकर्मणा समर्पितमितिशेषः । कुशलं अपूर्वार्थप्राप्तिं । अव्ययं तस्याक्षयं ॥ ४६ ॥ कुशलं अनुपद्रवम् ॥ ४७ ॥ दैवं यज्ञादिकं । मानुषं अतिथिसत्कारादिकम् ॥ ४८ ॥ समागम्य समीपंगत्वा । ऋषीन् वामदेवादीन् । यथान्यायं यथाक्रमम् ॥ ४९ ॥ निवेशनं सभां । पूजिताः विश्वामित्रेणेतिशेषः । यथार्हतः यथान्यायं । प्रथमार्थेतसिः ॥ ५० ॥ हृष्टः पुल-

---

कत्वात्संसारासारत्वदर्शनेन जातानांमुखपाण्डुतादीनांकामकृतत्वसंभावनयाविवाहक्रियाचिन्तनमितिबोध्यं ॥ ३९ ॥ ति० विलंबेशापत्रासात् द्वाराध्यक्षाः राजवेश्मत्वरयाप्रविविशुः ॥ ४२ ॥ इक्ष्वाकवे तद्वंशजत्वात्ताच्छब्द्यं ॥ ४३ ॥ ति० ब्रह्माणं बृहस्पतिं । "बृहस्पतिर्देवानांब्रह्मा" इतिश्रुतेः ॥ ४४ ॥ ति० कुशलपदमनामयोपलक्षणं । "क्षत्रबन्धुमनामयं" इतिस्मृतेः । अव्ययं वृद्धिं ॥ ४६ ॥ ती० मानुषंकर्म सामदानभेदादिकंगजबन्धनादिकंच ॥ ४८ ॥ ति० राज्ञःप्रेरितार्घ्यदातृत्वेनप्रथमतोराज्ञेऽनामयादिपृष्ट्वाततोवसिष्ठेनसमागम्यालिङ्गनादिकृत्वा । कुशलमित्यस्यपप्रच्छेतिशेषः । अनेन राजपुरोहितत्वकृतः पूर्वस्पर्धयेषदपमानोवसिष्ठस्यविश्वामित्रकृतस्सूचितः । "वसिष्ठश्चसमागम्यप्रहसन्मुनिपुङ्गवः । यथार्हंपूजयित्वैनंपप्रच्छकुशलंतदा" इति क्वचित्पाठः । तत्रपूर्वंमांस्पर्धमानोपिमद्राजसंनिधावागतइतिहासः ॥ ४९ ॥ वि० पूजिताइत्यस्यराज्ञेतिशेषः ॥ ५० ॥

[पा०] १ ग. घ. ज. ट. अभ्यगच्छन्महा. २ घ. महामनाः. ज. महाद्युतिः. ३ ख. ग. ङ—ञ. गाधिनःसुतम्. ४ ख. ग. छ. ज. ञ. त्रासाद्राजवेश्म. ५ च. ज. राजवेश्म. ६ ट. तथा. ७ ङ. झ. ञ. ट. नृपायेक्ष्वाकवे. ८ ख. घ. ङ. च. ज. झ. ञ. ट. संहृष्टो. ९ ख. ग. ङ. झ. ञ. सदृष्ट्वा. छ. सदृष्ट्वाज्वलितं. १० ज. पुरेजनपदेलोके. ११ झ. सामन्तरिपवो. १२ ङ. च. झ. चैव. १३ ञ. मुनिपुङ्गवम्. १४ ङ.—ट. ऋषींश्चतान्यथा. १५ ङ. झ. भागउवाच. १६ घ. मनसस्ततो. १७ ङ. च. ञ. पूजितास्तेन. १८ घ. हृष्टःसमभि.

यथाऽमृतस्य संप्राप्तिर्यथा वर्षमनूदके ॥ यथा सदृशदारेषु पुत्रजन्माप्रजस्य च ॥ ५२ ॥
प्रनष्टस्य यथा लाभो यथा हर्षो महोदये ॥ तथैवागमनं मन्ये स्वागतं ते महामुने ॥ ५३ ॥
कं च ते परमं कामं करोमि किमु हर्षितः ॥ पात्रभूतोसि मे[3] ब्रह्मन्दिष्ट्या प्राप्तोसि धार्मिक ॥ ५४ ॥
अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ ५५ ॥ [यस्माद्विप्रेन्द्रमद्राक्षं सुप्रभाता निशा मम] ॥
पूर्वं राजर्षिशब्देन तपसा द्योतितप्रभः ॥ ब्रह्मर्षित्वमनुप्राप्तः पूज्योसि बहुधा मया[6] ॥ ५६ ॥
तदद्भुतमिदं[7] ब्रह्मन्पवित्रं परमं मम ॥ शुभक्षेत्रगतश्चाहं तव संदर्शनात्प्रभो ॥ ५७ ॥
ब्रूहि यत्प्रार्थितं तुभ्यं कार्यमागमनं प्रति ॥ इच्छाम्यनुगृहीतोऽहं त्वदर्थपरिवृद्धये ॥ ५८ ॥
कार्यस्य न विमर्शं च गन्तुमर्हसि कौशिक ॥ कर्ता चाहमशेषेण दैवतं हि भवान्मम ॥ ५९ ॥
मम चायमनुप्राप्तो महानभ्युदयो द्विज[11] ॥ तवागमनजः कृत्स्नो धर्मश्चानुत्तमो मम ॥ ६० ॥

इति हृदयसुखं निशम्य वाक्यं श्रुतिसुखमात्मवता विनीतमुक्तम् ॥
प्रथितगुणयशा गुणैर्विशिष्टः परमऋषिः परमं जगाम हर्षम् ॥ ६१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टादशः सर्गः ॥ १८ ॥

कितः । "हृषेर्लोमसु" इतीडभावः । परमोदारः परमदाता । अभिपूजयन् स्तुवन् ॥ ५१ ॥ यथेत्यादिश्लोकद्वयमेकान्वयम् । अमृतस्य सुधायाः । अनूदके अनुदके । "अन्येषामपिदृश्यते" इतिदीर्घः । अप्रजस्य अपुत्रस्य । प्रनष्टस्य निध्यादेः । महः पुत्रविवाहाद्युत्सवः । "महउद्धवउत्सवः" इत्यमरः । तस्योदये । स्वागतं अचिन्तितोपनतं । ते आगमनंतथामन्ये ॥५२॥ ॥ ५३ ॥ कामं अभीष्टं । किमु केनप्रकारेण । करोमि करवाणि । पात्रभूतः दानयोग्यः । दिष्ट्या शुभादृष्टवशेन । दिष्ट्येत्यानन्दद्योतकमव्ययमित्यप्याहुः ॥५४॥ अद्येत्यर्धमेकम् ॥ ५५ ॥ राजर्षिशब्देनोपलक्षितःराजर्षिशब्दवाच्यइत्यर्थः । अनु पश्चात् । तपसाद्योतितप्रभः सन्ब्रह्मर्षित्वंप्राप्तोसि । अतःबहुधा राजर्षित्वेनब्रह्मर्षित्वेनचैं । पूज्योसि ॥ ५६ ॥ हेब्रह्मन्तदिदमागमनं ममपरमंपवित्रं परममद्भुतंच । हेप्रभो तवसंदर्शनादहं शुभक्षेत्रगतः पुण्यक्षेत्रगतः । त्वद्दर्शनादिदंमत्क्षेत्रंतीर्थभूतंजातमित्यर्थः ॥ ५७ ॥ तुभ्यमितितृतीयार्थेचतुर्थी । आगमनंप्रतित्वयायत्कार्यंयत्फलंप्रार्थितंतद्ब्रूहि । अहंत्वयानुगृहीतःसन्त्वदर्थपरिवृद्धयेइच्छामि । त्वदर्थपरिवृद्धिंकर्तुमिच्छामीत्यर्थः । "रुच्यर्थानांप्रीयमाणः" इतिचतुर्थी ॥ ५८ ॥ कार्यस्यविमर्शं कार्यविषयंसंशयम् ॥ ५९ ॥ अयं त्वदागमनरूपः ॥ ६० ॥ हृदयसुखं अर्थसौष्ठवाद्धृदयसुखकरं । श्रुतिसुखं शब्दमार्दवाच्छ्रुतिसुखं । आत्मवता बुद्धिमता । विनीतं विनयवद्यथाभवतितथा । उक्तं वाक्यं निशम्य । प्रथितगुणयशाः पृथुतरगुणविषयकीर्तिः । नकेवलंकीर्तिमात्रं गुणैर्विशिष्टः । परमऋषिरित्यत्र "ऋत्यकः" इतिप्रकृतिभावः । पुष्पिताग्रावृत्तम् ॥ ६१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने अष्टादशःसर्गः १८

ति० । हेप्रभो तवसंदर्शनात् शुभक्षेत्रं सकलपापाभावविशिष्टसकलशुभसाधनपुण्यवद्देहं गतः प्राप्तवान् । तेन सफलजन्मतानिष्पापताचध्वनिता । "इदंशरीरंकौन्तेयक्षेत्रमित्यभिधीयते" इतिभगवद्गीतोक्तेः । शि० शुभक्षेत्रगतः शुभानियानिक्षेत्राणि तानिसर्वाणिगतःप्राप्तः । सर्वशुभक्षेत्रयात्राफलंप्राप्तोहमित्यर्थः । चोहेतौ ॥ ५७ ॥ ति० हर्षातिशयात्द्विजेतिपुनरुक्तिर्नदोषाय ॥ ६० ॥ इत्यष्टादशस्सर्गः ॥ १८ ॥

[पा०] १ घ. ङ. च. झ. जन्माप्रजस्यवै. ज. ट. पुत्रजन्मप्रशस्यते. २ ग. ङ. ज. झ. महोदयः. ३ घ. ज. मेविप्रदिष्ट्या. ४ ङ. च. छ. झ. मानद. ५ इदमर्धं ङ. च. छ. झ. ञ. ट. दृश्यते. ६ ञ. मम. ७ ग. घ. च. ज. ञ. ट. मिदंविप्र.वित्रं. ङ. झ. मभूद्विप्रपवित्रं. ८ ज. शुभक्षेत्रेगत. ९ ख. घ. ङ. झ. त्वदर्थंपरि. १० ङ. च. छ. झ. ञ. ट. सुव्रत. ११ ङ. च. छ. झ. ञ. ङ. द्विज.

एकोनविंशः सर्गः ॥ १९ ॥

विश्वामित्रेणदशरथंप्रतिराममहिमप्रख्यापमपूर्वकंसुबाहुमारीचादिहननेनस्वीययज्ञरक्षणार्थंस्वाश्रमंप्रतितत्प्रेषणार्थना ॥ १ ॥

तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरम् ॥ हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ॥ १ ॥
सदृशं राजशार्दूल तवैतद्भुवि नान्यथा ॥ महाकुलप्रसूतस्य वसिष्ठव्यपदेशिनः ॥ २ ॥
यत्तु मे हृद्गतं वाक्यं तस्य कार्यस्य निश्चयम् ॥ कुरुष्व राजशार्दूल भव सत्यप्रतिश्रवः ॥ ३ ॥
अहं नियममातिष्ठे सिध्यर्थं पुरुषर्षभ ॥ तस्य विघ्नकरौ द्वौ तु राक्षसौ कामरूपिणौ ॥ ४ ॥
व्रते मे बहुशश्चीर्णे समाप्त्यां राक्षसाविमौ ॥ मारीचश्च सुबाहुश्च वीर्यवन्तौ सुशिक्षितौ ॥
समांसरुधिरौघेण वेदिं तामभ्यवर्षताम् ॥ ५ ॥
अवधूते तथाभूते तस्मिन्नियमनिश्चये ॥ कृतश्रमो निरुत्साहस्तस्माद्देशादपाक्रमे ॥ ६ ॥
न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव ॥ तथाभूता हि सा चर्या न शापस्तत्र मुच्यते ॥ ७ ॥
स्वपुत्रं राजशार्दूल रामं सत्यपराक्रमम् ॥ काकपक्षधरं शूरं ज्येष्ठं मे दातुमर्हसि ॥ ८ ॥
शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा ॥ राक्षसा ये विकर्तारस्तेषामपि विनाशने ॥ ९ ॥
श्रेयश्चास्मै प्रदास्यामि बहुरूपं न संशयः ॥ त्रयाणामपि लोकानां येन ख्यातिं गमिष्यति ॥१०॥
न च तौ राममासाद्य शक्तौ स्थातुं कथंचन ॥ न च तौ राघवादन्यो हन्तुमुत्सहते पुमान् ॥११॥

अथविश्वामित्राभ्यर्थनमेकोनविंशे—तच्छ्रुत्वेत्यादि । अद्भुतस्यविस्तरोयस्मिन्तदद्भुतविस्तरं । हृष्टरोमा पुलकितरोमा ॥ १ ॥ नान्यथा नमिथ्योच्यतइत्यर्थः । वसिष्ठेनव्यपदेशः कीर्तिः उपदेशोवा । तृतीयेतियोगविभागात्समासः । सोस्यास्तीतितथा ॥ २ ॥ मेहृद्गतं यत्कार्यं वाक्यंवक्तव्यंतस्यनिश्चयं करणाध्यवसायं । कुरुष्व । सत्यप्रतिश्रवः सत्यप्रतिज्ञः ॥ ३ ॥ हृद्गतंकार्यमाह—अहमित्यादिना। सिद्ध्यर्थं फलार्थं। नियमं यज्ञदीक्षां । आतिष्ठे आस्थितोस्मि । तस्य नियमस्य । विघ्नकरौकामरूपिणौ द्वौराक्षसौ । स्तइतिशेषः ॥४॥ व्रते दीक्षारूपे । चीर्णे अनुष्ठिते। विघ्नकरणप्रकारमाह—मारीचइति । समांसरुधिरौघेण मांसयुक्तरक्तप्रवाहेण । तांवेदिं यज्ञवेदिं । अभ्यवर्षतां अभ्यषिञ्चताम् ॥ ५ ॥ तथाभूते बहुशश्चीर्णे । नियमनिश्चये व्रतसंकल्पे । अवधूते विघ्निते । अपाक्रमे आगतोस्मि ॥६॥ तर्हिकुतोनतौशप्तौतत्राह—नचेति । तत्रहेतुमाह—तथेति। साचर्या यज्ञाचारः । तथाभूताहि शापानर्हकालाहि । अतः तत्र मारीचसुबाह्वोः । शापोनमुच्यते ॥ ७ ॥ तत्रमयाकिंकर्तव्यंतत्राह—स्वपुत्रमिति । काकपक्षः बालस्यशिखा । काकपक्षधरमपीत्यर्थः ॥ ८ ॥ बालोयंकथंतौनाशयिष्यतितत्राह—शक्तइति । मयाकर्त्रा। तेजसाकरणेन । विकर्तारः विघ्नकर्तारः । तेषां । नकेवलंतयोरितिभावः ॥ ९ ॥ बहुरूपं बहुविधं । कीदृक्श्रेयस्तत्राह—त्रयाणामिति । लोकानांमध्येख्यातिं । विश्वामित्राध्वरत्राताअहल्याशापमोक्षदः हरधनुर्भञ्जकइत्येवंरूपांकीर्तिम् ॥ १० ॥ कथंबालस्तन्निरसनेप्रभविष्यतितत्राह—नचेति । अहमेवतदर्थंयास्यामीत्यत्राह

ति० नान्यतः नान्यस्य ॥ २ ॥ शि० समाप्त्यांतु यागसमाप्तिकालेवा । तौ तस्करप्रायौ । "तस्चोरामृत—" इत्यभिधानम् ॥ ५ ॥ शि० चर्या तपश्चरणं । तथाभूता शापदानार्हा ॥ ७ ॥ ति० श्रेयश्चेति । बहुरूपं अन्नदानादिविवाहादिरूपं । किंच मुखपाण्डुलादिनिवर्तकं बहुरूपं विपुलतरंपरमार्थरूपंच । श्रेयआत्मस्वरूपांप्रदास्यामि वसिष्ठद्वारादापयिष्यामि बोधयिष्यामीत्यर्थः । रामस्यशुद्धमुक्तस्वभावलेपिलोकानांतत्प्रबोधनमेव रामबोधनस्यफलं ॥ १० ॥

[पा०] १ झ. तवैवभुवि. २ क. घ.—छ. झ. ञ. नान्यतः. ३ क. ग.—ञ. महावंश. ४ क. नरशार्दूल. ५ ग. ङ. च. छ. झ. ञ. ट. व्रतेतु. ६ च. राक्षसावुभौ. ७ क. ग.—ट. तौमांस. ८ ङ. विद्यते. ९ क. त्वंपुत्रं. १० ङ. च. छ. झ. ञ. वीरं. ११ क. येपकर्तार. ज. विघ्नकर्तार.

वीर्योत्सिक्तौ हि तौ पापौ कालपाशवशं गतौ ॥ रामस्य राजशार्दूल न पर्याप्तौ महात्मनः ॥
न च पुत्रकृतस्नेहं कर्तुमर्हसि पार्थिव ॥ १२ ॥
[दशरात्रस्तु यज्ञश्च तस्मिन्रामेण राक्षसौ ॥ हन्तव्यौ विघ्नकर्तारौ मम यज्ञस्य वैरिणौ ॥]
अहं ते प्रतिजानामि हतौ तौ विद्धि राक्षसौ ॥ १३ ॥
अहं वेद्मि महात्मानं रामं सत्यपराक्रमम् ॥ वसिष्ठोपि महातेजा ये चेमे तपसि स्थिताः ॥ १४ ॥

—नचताविति ॥११॥ तथापिमहावीर्यौतौकथंजेतुंशक्याविल्याशङ्क्यपापवशेनासन्नकालौनरामस्यपर्याप्ताविल्याह—वीर्येति । उत्सिक्तौ गर्वितौ । कालः यमः सएवपाशःतद्वशंगतौ । पुत्रकृतं पुत्रत्वकृतं ॥ १२ ॥ हताविति भूतप्रत्ययेनवधस्यसुकरत्वंसूचितम् ॥ १३ ॥ रामस्यपरब्रह्मत्वंसूचयन्नाह—अहमिति । अहं बहुगुरूपासनेनलब्धज्ञानः । यद्वा योगबलसाक्षात्कृतपरावरतत्वयाथात्म्यः । भवांस्तुकेवलकर्मठः । अहं जटावल्कलधारी । त्वंतु क्रोधभराक्रान्तः । अहं सात्विकप्रकृतिः । त्वंतुराजसः । अहं "गर्भभूतास्तपोधनाः" इत्युक्तरीत्या रामस्यगर्भभूतः । त्वंतु रामेगर्भत्वाभिमानी । योगक्रमज्ञानवानहं त्वंतु भोगक्रमज्ञः । अहं मोक्षकामेष्टिकृत् त्वंतु पुत्रकामेष्टिकृत् । अहं धर्ममोक्षपरः त्वंतु अर्थकामपरः । एतत्सर्वप्रसिद्धपरामर्शिनाऽहमित्यनेन सर्वनामशब्देनोच्यते । ननु "सोअङ्गवेदयदिवानकिलेतिवेदस्संदेग्ध्यनर्घविदमात्मनिरञ्जनाथम्" "विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरं" इत्युक्तरीत्याअपरिच्छिन्नंवस्तु कथंत्वयाज्ञातमित्यत्राह । महात्मानं । अपरिच्छिन्नमहिमतयावेद्मीत्यर्थः । तथाचश्रुतिः "वेदाहमेतंपुरुषंमहान्तं" इति । श्रुतौएतमितिसौलभ्यमुच्यते । पुरुषमितिपराक्रमः । तदुभयमप्याह—रामंसत्यपराक्रममिति। परत्वसौलभ्येहि राज्ञश्छत्रचामरवदसाधारणे। यद्वा "तेजसांहिनवयःसमीक्ष्यते" इति बाल्येपिनिरवधिकवैभवं । यद्वा महात्मानं "सत्यस्यसत्यं" इतिवदात्मनो जीवस्याप्यात्मानं । "यआत्मनितिष्ठन्" इत्यादिश्रुतेः। यद्वा आत्मा देहः । "आत्माजीवेधृतौदेहे" इत्यमरः । अप्राकृतदिव्यमङ्गलविग्रहमित्यर्थः । "नतस्यप्राकृतामूर्तिः" इतिस्मृतेः । यद्वा महात्मानं महास्वभावं । "अभयंसर्वभूतेभ्योददाम्येतद्व्रतंमम" इतिवक्ष्यमाणत्वात् । यद्वा रामंमहात्मानं अवतारकृतमहास्वभावयुक्तम् । "सउश्रेयान्भवतिजायमानः" इतिश्रुतेः । सत्यपराक्रमं सदैकरूपपराक्रमं । "नाविजित्यनिवर्तते" इतिवक्ष्यते । यद्वा सत्यपराक्रमं परमार्थपराक्रमं । यद्वा सत्यात्परानाक्रमतीतितथा । गच्छानुजानामीति बहुवारंप्रकृतिसंबन्धकृतप्रातिकूल्यनिवर्तनेयत्नंकृत्वा तथाप्यननुकूलत्वेतान्हन्तीत्यर्थः । यद्वा अयत्नकालेपि शत्रुभयङ्करः । "सुखसुप्तःपरंतपः" इतिवक्ष्यति । संस्थानविशेषौज्ज्वल्यदर्शनेनशत्रुहृदयविदारकइतिभावः । नाहंकार्यवशेनवदामीत्याह—वसिष्ठोपीति । आप्ततमोहिभवतःकुलाचार्योवसिष्ठः । अपिशब्दोविरोधे । अस्मद्विरोध्यपीत्यर्थः । यद्वा समुच्चये । महातेजाः सरस्वतीवल्लभपुत्रःयोगसिद्धज्ञानः । यद्वा यद्वाक्येनाहंब्रह्मर्षिरभवं सोपीत्यर्थः । यद्वा "सत्यंवद धर्मंचर" इतितवउपदिश्य स्वयमनुष्ठाता । ननु "यद्ब्राह्मणश्चाब्राह्मणश्चप्रश्नमेयातांब्राह्मणायाधिब्रूयात्" इति तवमचविवादे अस्यत्वयिपक्षपातःस्यादित्यत्राह—येचेति। राजद्वारसंबन्धरहिततयापक्षपातशून्याः । "तस्यधीराःपरिजानन्तियोनिं" इतिअवताररहस्यवेदिनः । येचेमे "पुलस्त्योगस्त्यः" इतिप्रसिद्धाचार्यपदनिर्वाहकाः । यद्वा गर्भस्थऋषिर्वामदेवःप्रतिपेदे "सप्तकल्पस्थितोमुनिरित्यादिनोत्तरोत्तरंब्रह्मविदग्रेसरा वामदेवमार्कण्डेयादयस्तिष्ठन्त्येतेतवप्रियकराः। केवलपरमैकान्तिनोविजानन्तीत्याह तपसिस्थिताः। कायिकव्या-

शि० रामस्यरणाजिरे रामरणभूमौ ॥ १२ ॥ **शि०** हिशब्दोप्यर्थे । महात्मानं महानांसर्वपूज्यानांब्रह्मादीनां आत्मानं नियन्तारं । नच "यस्यामतंतस्यमतंमतंयस्यनवेदसः" इत्यादिश्रुत्या परमात्माममविज्ञातइतिवदतामज्ञानवत्ताप्रतिपादनात् परमप्रमाणभूतेनज्ञानिनाविश्वामित्रेण राममहंवेद्मीतिकथमुक्तमितिवाच्यं । तच्छ्रुतीनांपरमात्मैश्वर्यादिसाकल्यज्ञानविषयत्वनिषेधतात्पर्यकत्वात् । अतएव "यतोवाचोनिवर्तन्तेअप्राप्यमनसासह । वेदाहमेतंपुरुषंमहान्तं" इत्यादिश्रुतयःसानुकूलाइतिदिक् ॥ १४ ॥

[पा] १ क. तिसक्तौतु. २ ट. पर्याप्तौनरणाजिरे. ३ क. घ.—ज. ञ. अयंश्लोकोदृश्यते. ४ च. ञ. यज्ञस्य. ५ ट. वसिष्ठोहिमहातेजायेचेह.

यदि ते धर्मलाभं च यशश्च परमं भुवि ॥ स्थितमिच्छसि राजेन्द्र रामं मे दातुमर्हसि ॥ १५ ॥
यदि ह्यनुज्ञां काकुत्स्थ ददते तव मन्त्रिणः ॥ वसिष्ठप्रमुखाः सर्वे राघवं मे विसर्जय ॥ १६ ॥
अभिप्रेतमसंसक्तमात्मजं दातुमर्हसि ॥ दशरात्रं हि यज्ञस्य रामं राजीवलोचनम् ॥ १७ ॥
नात्येति कालो यज्ञस्य यथाऽयं मम राघव ॥ तथा कुरुष्व भद्रं ते मा च शोके मनः कृथाः ॥१८॥
इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः ॥ विरराम महातेजा विश्वामित्रो महामुनिः ॥ १९ ॥
स तन्निशम्य राजेन्द्रो विश्वामित्रवचः शुभम् ॥ शोकमभ्यगमत्तीव्रं व्यषीदत भयान्वितः ॥ २० ॥
इति हृदयमनोविदारणं मुनिवचनं तदतीव शुश्रुवान् ॥
नरपतिरभवन्महांस्तदा व्यथितमनाः प्रचचाल चासनात् ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ॥ २० ॥

दशरथेनविश्वामित्रंप्रतिहेतूपन्यासपूर्वकंरामेणराक्षसवधस्यदुष्करत्वोपपादनेनरामस्याप्रेषणोक्तिः ॥ १ ॥

तच्छ्रुत्वा राजशार्दूलो विश्वामित्रस्य भाषितम् ॥ मुहूर्तमिव निस्संज्ञः संज्ञावानिदमब्रवीत् ॥ १ ॥
ऊनषोडशवर्षो मे रामो राजीवलोचनः ॥ न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः ॥ २ ॥

पारादीन्विनासदातपस्थिताः । तानेकैकशोरहसिपृष्ट्वा-तैरनुमतंचेद्राममंमेदेहीतिभावः । तपसिस्थिताः कायक्लेशसहाः । यद्वा ज्ञानयोगनिष्ठाः । तपआलोचने । "तस्मान्न्यासमेषांतपसामतिरिक्तमाहुः" इत्युक्तन्यासनिष्ठावा ॥ १४ ॥ धर्मलाभं धर्मवृद्धिं । स्थितं स्थिरं ॥ १५ ॥ विसर्जय प्रेषय ॥ १६ ॥ अभिप्रेतं अभीष्टं । आत्मजं । यज्ञस्य यज्ञाय । दशरात्रंदेहि । असंसक्तं अविलंबितमितिक्रियाविशेषणम् ॥ १७ ॥ ममायंयज्ञस्यकालोयथानात्येति तथाकुरुष्वेत्यन्वयः ॥ १८ ॥ धर्मार्थसहितं धर्मार्थपरं ॥ १९ ॥ शोकं दुःखं । व्यषीदत दुःखितोभूत् । विषण्णमुखोभूदित्यर्थः ॥२०॥ हृदयं मनोधिष्ठानं । अतीव अत्यर्थं । व्यथितमनाः महान् कुलेनमहान् । विचचाल मुमूर्च्छेत्यर्थः । महदितिपाठे महदत्यर्थं व्यथितमनाः अतीवविदारणमितिसंबन्धः । वृत्तमुपजातिभेदः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनविंशःसर्गः ॥१९॥

कौशिकवचनश्रवणाद्दशरथविषादोविंशे—तच्छ्रुत्वेत्यादि । निस्संज्ञइव चेतनारहितइव । मूर्च्छितइत्यर्थः ॥ १ ॥ "यज्ञविघ्नकरंहन्यां" इत्युक्तरीत्यानिजयज्ञविघ्ननिवर्तकोऽयंभविष्यतीतिमत्वाआगत्यप्रार्थयमानेविश्वामित्रेवत्सलोदशरथःप्रेमान्धतयाकलुषितहृदयः अहंवेद्मीतितदुक्तमपिमनस्यकुर्वन्रामस्यबाल्यमेवपुर-

---

ति० तइतिलमित्यर्थे । शि० इदानींरामदाने किंचिच्चेष्टादिनाराज्ञोवैमनस्यमालक्ष्याह यदीति ॥ १५ ॥ ति० ततः तदा ॥ १६ ॥ ति० तवचासंसक्तं अतीतबाल्यत्वान्मातापितृसक्तिरहितं । ईश्वरत्वात्काप्यनासक्तमितिव्यङ्ग्यं ॥ १७ ॥ ति० ततो त्थायेतिच्छान्दसं । व्यषीदतेत्यप्येवं । भयान्वितः रक्षोनिमित्तपुत्रवियोगभयान्वितः ॥ २० ॥ शि० सहृदयमनोविदारणं हृदयसहितमनसश्चालकं । महान् सर्वपूज्यः । महात्मा अतिधैर्यविशिष्टः ॥ २१ ॥ इत्येकोनविंशस्सर्गः ॥ १९ ॥

कतकं० किंचिदूनानिषोडशवर्षाणियस्यसः । इदंचयुद्धायोग्यत्वंप्रतिपादितं । षोडशवर्षः क्षत्रियकुमारएवकवचधरोयुद्धार्हः इतिशास्त्रात् । बालोद्वादशवर्षोऽयमकृतास्त्रश्चराघवइतिरावणंप्रतिमारीचवचने बालष्षोडशवर्षोयमित्येवपाठः । रावणस्यभयातिशया-

[पा०] १ ङ. झ. लाभंतु. २ क. ग. ङ. च. छ. झ. ञ. स्थिरमिच्छसि. ३ क. ग. ङ. ज. झ. ट. यद्यभ्यनुज्ञां. ४ क. राजेन्द्र. ५ क. ख. घ.—ञ. ततोरामंविसर्जय. ६ ख. ङ. च. छ. झ. ञ. महामतिः. ज. महानृषिः. ७ क. विश्वामित्रमुखोद्गतम्. ८ एतदर्धस्थाने तत्प्रतिनिधित्वेन ङ. च. छ. झ. ञ पाठेषु अर्धद्वयंदृश्यते. तच्च. शोकेनमहताविष्टश्चचालचमुमोहच । लब्धसंज्ञस्ततोत्थायव्यषीदतभयान्वितः. ९ ङ.—ज. ञ. इतिसहृदय. १० ङ. छ.—ट. रभवन्महान्महात्माव्यथित. क. ग. च. रगमद्व्यंमहात्माव्यथित. ११ ज. वर्षस्तु.

स्कुर्वन्नाह—ऊनेति। ऊनाः असंपूर्णाः षोडशवर्षायस्य-सतथोक्तः। द्वादशवर्षइतियावत्। "बालोद्वादशवर्षोयमकृतास्त्रश्चराघवः" इतिविशिष्यवक्ष्यमाणत्वात्। परिपूर्णषोडशवर्षोहियुद्धक्षमोभवति। द्वादशवर्षोबालः कथंयुद्धायप्रभवतीतिभावः। एवंवयःस्वरूपेविचार्यमाणेनास्ययुद्धयोग्यतेत्युक्तं राक्षसैस्तुसुतरांनेत्याह। राजीवलोचनइति पद्मतुल्यनयनः। पद्मंहिरात्रौमुकुलीभवति तत्तुल्यतोक्तौरात्रौनिद्रालसोरामोरात्रिंचरैःकथंयोद्धुंशक्नोतीतिभावः। मेरामः सदामदुत्सङ्गपरिवर्तित्वयामद्विरहासहिष्णुरित्यर्थः। यद्वा पुत्रालाभेनषष्टिवर्षसहस्राणिलाल्यमानस्यातिक्लेशेनोत्पन्नः। रामः "रामोरतिकरःपितुः"इतिरतिकरः सर्वस्वभूतः। अस्यकाकपक्षधरत्वादिवेषयुतोविद्याभ्यासादपिक्रीडनकस्वीकारकुतूहलीतिहस्तेननिर्दिशति। युद्धयोग्यतांनपश्यामि। किंतु क्रीडनकस्वीकारयोग्यतामेवपश्यामीत्यर्थः। युद्धयोग्यतां राक्षसशब्दश्रवणमात्रेणैवबिभ्यतां कथंयुद्धयोग्यता। सहराक्षसैः मनुष्येणापियुद्धव्यापारमजानतःकथंराक्षसैर्युद्धं। एकेनापिराक्षसेननयोग्यता-कुतोबहुभिः। अत्रशङ्क्यते। अत्रदशरथेनपित्राऊनषोडशवर्षइत्युक्तं। ऊनत्वंचमासेनमासत्रयेणषण्मासैर्वास्यात् नत्वेकवर्षद्विवर्षादिभिः। तस्मिन्नेववर्षेसीताविवाहः तदनुद्वादशवर्षाण्ययोध्यावासः "समाद्वादशतत्राहंराघवस्यनिवेशने। भुञ्जानामानुषान्भोगान्सर्वकामसमृद्धिनी"इतिसीतयावक्ष्यमाणत्वात्। तथाचवनप्रवेशकालेरामस्याष्टाविंशतिवर्षाणीतिप्रतिभाति। तदनुपपन्नं "ममभर्तामहातेजावयसापञ्चविंशकः॥ अष्टादशहिवर्षाणिममजन्मनिगण्यते" इतिसीतावचनात्। कौसल्ययाचवनप्रवेशसमयेप्रोच्यते "दशसप्तचवर्षाणिजातस्यतवपुत्रक॥ आसितानिप्रकाङ्क्षन्त्यामयादुःखपरिक्षयं"इति। तस्मात् अष्टाविंशतेःपञ्चविंशतेःसप्तदशानांचकथमविरोधइति। अत्रकेचित्। कौसल्यावाक्येजातस्येतिद्वितीयंजन्मोच्यते। क्षत्रियस्यापिद्विजत्वात्। द्वितीयंजन्मचउपनयनं। तच्चवृद्धेनदशरथेनकाम्यपक्षमाश्रित्यगर्भाष्टमएवकृतं। तथाचद्वितीयजन्मापेक्षयासप्तदशत्वं। उपनयनात्पूर्वंसप्तवर्षाणीति वयसापञ्चविंशकइतिसीतावचनमप्युपपन्नं। ऊनषोडशवर्षइत्यत्रपादोनत्वं। द्वादशवर्षइत्यन्यत्रोक्तत्वात्। अतःसर्वथावनप्रवेशकालेपञ्चविंशतिवर्षएवराम-इत्याहुः। अन्येबहुक्लेशंसहमानाएवंव्याचख्युः। अष्टाविंशतिवर्षएववनप्रवेशेरामः। ऊनषोडशवर्षइति यत्किंचिन्मासोनषोडशवर्षवयस्कइत्यर्थः। "बालोह्यकृतविद्यश्चनचवेत्तिबलाबलं" इतिदशरथवचनेबाल्ययौवनसन्धौबालइतिव्यवहर्तुंशक्यत्वात् "बालआषोडशाद्वर्षात्पौगण्डश्चेतिकीर्त्यते" इतिवचनात् "बालोद्वादशवर्षोयमकृतास्त्रश्चराघवः। अजातव्यञ्जनःश्रीमान्पद्मपत्रनिभेक्षणः" इतिमारीचवचनंतुयुद्धभीरुतयाभ्रान्तिकृतं रावणविभीषिकयोक्तंवा। अतएवस्वयंवायव्यास्त्रभग्नोप्यकृतास्त्रइत्याह। अजातव्यञ्जनत्वंचनिरुदराकन्येतिवदल्पश्मश्रुत्वं "एकवस्त्रधरोधन्वीशिखीकनकमालया"इत्यपिदृढपरिहितोत्तरीयतयासन्नद्धत्वमाह। वयसापञ्चविंशकइतितुपञ्चविंशतुल्यत्वमाह इवार्थकनोविधानात्। तेननित्ययौवनत्वंज्ञापयति। देवाहि सदापञ्चविंशतिवार्षिकाइत्युच्यन्ते। कौसल्यावाक्यमपि। "गर्भैकादशेषुराजन्यं"इतिविहितोपनयनापेक्षं रामारीचस्यात्युक्तिरसा।

शिरो० अत्रऊनषोडशवर्षोमेइत्युक्त्याविश्वामित्रसहगमनसमयेरामस्यषोडशोवर्षःप्रविष्टइतिफलितं। तस्मिन्नेववर्षेरामसीताविवाहस्यप्रसिद्धत्वेनषोडशवार्षिकस्यरामस्यविवाहइतिसिद्धं। समाद्वादशतत्राहंराघवस्यनिवेशने इतिरावणंप्रतिवक्ष्यमाणसीतावचनाद्विवाहानन्तरंद्वादशवर्षपर्यन्तंराघवनिकेतेसीतानिवासः ततोवनप्रस्थानमितिवनगमनसमयेऽष्टाविंशतिवर्षकोरामइतिनिष्पन्नं। एतदनुरोधेनदशसप्तचवर्षाणिजातस्यतवपुत्रकेतिकौसल्योक्तिपद्यघटकीभूतदशशब्दस्यैकशेषेणविंशतिरर्थः। चशब्दस्यचन्द्रवाचकत्वेनैकत्वलाभः। तथाचदशसप्त चयुक्तान्येव वर्षाणीत्यष्टाविंशतिलाभः। "चश्चण्डेशेपुमानुक्तःकच्छपेचन्द्रचोरयोः" इतिमेदिनी। ममभर्तामहातेजावयसापञ्चविंशकइत्यपिनविरुद्धं। पञ्चविंशयुक्ताः कास्त्रयोयस्येतितदर्थात्। कशब्दस्यवह्निवाचकत्वेनत्रित्वलाभः। कशब्दस्यवह्निवाचकत्वंतु "कःप्रजापतिरुद्दिष्टः कोर्कवाय्वनलेषु" इतिकोशादवगन्तव्यं। "ऊनद्वादशवर्षोयमकृतास्त्रश्चराघवः" इतिमारीचपद्यघटकद्विशब्देनैकशेषात्षड्लाभः। तेनोनषोडशवार्षिकइत्यर्थस्संपन्नः। अतएवोनषोडशवर्षोयमितिभट्टोक्तपाठान्तरेणनविरोधः। किंच ममभर्तामहातेजावयसापञ्चविंशकइतिश्रुतानुरोधात् ऊनषोडशवर्षोमेइत्येतद्घटकीभूतोनशब्देनपादोनंगृह्यते। तेनतस्मिन्समयेरामस्यद्वादशवार्षिकत्वंफलितं। ततस्त्रयोदशेवर्षेविवाहः। अतएवमारीचवचनंसानुकूलं। एवंचोक्तदिशावनप्रवेशसमयेरामस्यपञ्चविंशतिवार्षिकत्वंसिद्धं। दशसप्तचवर्षाणीत्यत्र सप्तशब्दस्यैवैकशेषेणचतुर्दशलाभइतिनविरोधः। उपनयनप्रभृतिवर्षव्यवस्थापनया भूषणादिव्याख्यानंतुचिन्त्यमेव। लोकेऽप्रसिद्धेः क्वचिज्जन्मप्रभृतिवर्षपरिगणनं क्वचिदुपनयनात्परिगणनमित्यत्रविनिगमनाविरहाच्चेतिदिक्॥ २॥

इयमक्षौहिणी पूर्णा यस्याहं पतिरीश्वरः ॥ अनया संवृतो गत्वा योद्धाऽहं तैर्निशाचरैः ॥ ३ ॥
इमे शूराश्च विक्रान्ता भृत्या मेऽस्त्रविशारदाः ॥ योग्या रक्षोगणैर्योद्धुं न रामं नेतुमर्हसि ॥ ४ ॥
अहमेव धनुष्पाणिर्गोप्ता समरमूर्धनि ॥ यावत्प्राणान्धरिष्यामि तावद्योत्स्ये निशाचरैः ॥ ५ ॥
निर्विघ्ना व्रतचर्या सा भविष्यति सुरक्षिता ॥ अहं तत्र गमिष्यामि न रामं नेतुमर्हसि ॥ ६ ॥
बालो ह्यकृतविद्यश्च न च वेत्ति बलाबलम् ॥ न चास्त्रबलसंयुक्तो न च युद्धविशारदः ॥ ७ ॥
न चासौ रक्षसां योग्यः कूटयुद्धा हि ते भृशम् ॥ ८ ॥
विप्रयुक्तो हि रामेण मुहूर्तमपि नोत्सहे ॥ जीवितुं मुनिशार्दूल न रामं नेतुमर्हसि ॥ ९ ॥
यदि वा राघवं ब्रह्मन्नेतुमिच्छसि सुव्रत ॥ चतुरङ्गसमायुक्तं मया च सहितं नय ॥ १० ॥
षष्टिर्वर्षसहस्राणि जातस्य मम कौशिक ॥ दुःखेनोत्पादितश्चायं न रामं नेतुमर्हसि ॥ ११ ॥
चतुर्णामात्मजानां हि प्रीतिः परमिका मम ॥ ज्येष्ठं धर्मप्रधानं च न रामं नेतुमर्हसि ॥ १२ ॥
किंवीर्या राक्षसास्ते च कस्य पुत्राश्च के च ते ॥ कथंप्रमाणाः के चैतान्रक्षन्ति मुनिपुङ्गव ॥ १३ ॥
कथं च प्रतिकर्तव्यं तेषां रामेण रक्षसाम् ॥ मामकैर्वा बलैर्ब्रह्मन्मया वा कूटयोधिनाम् ॥ १४ ॥

या तस्मान्नकिंचिदनुपपन्नमिति । वस्तुतोवयसापञ्च-विंशकइतिसीतायाःशापभीतायाःसंन्यासिनंप्रतिवच-नमेषयथार्थं । दशसप्तचवर्षाणीतिकौसल्यावाक्येतुच-कारेणसप्तवर्षाणिसमुच्चीयन्ते । तेनजन्मापेक्षयैवपञ्च-विंशतित्वसिद्धिः । ननुविवाहानन्तरमेवसंभोगःश्रूयते "रामस्तुसीतयासार्धंविजहारबहूनृतून्" इति । सक-थंद्वादशवर्षस्यबालस्यसंभवति । संभवत्येवसौकुमार्या-तिशयेनप्रौढशरीरतया । अतएवहिदेव्याश्चषड्वर्षएव-यौवनारंभः "अष्टादशहिवर्षाणिममजन्मनिगण्यते" इतिवनप्रवेशेऽष्टादशत्वं विवाहकालेसीतायाःषड्वर्षत्व-मवगमयतीतिसर्वंसुस्थं ॥ २ ॥ तर्हितवप्रतिज्ञाऽव्यर्था-स्यात्तत्राह—इयमिति । अक्षोरथावयवःतस्यऊहःतद्यो-गादिनिः । "ऋन्नेभ्योङीप्" इतिङीपि "पूर्वपदात्संज्ञा-यां—"इतिणत्वं । "अक्षादूहिन्यां—"इतिवृद्धिः । अक्षौहिणीस्वरूपमुक्तमादिपर्वणि "एकोरथोगजश्चैको नराःपञ्चपदातयः ॥ त्रयश्चतुरगास्तज्ज्ञैःपत्तिरित्यभि-धीयते ॥ पत्तिंतुत्रिगुणामेकंविदुःसेनामुखंबुधाः ॥ त्रीणिसेनामुखान्येकोगुल्मइत्यभिधीयते ॥ त्रयोगुल्मा-गणोनामवाहिनीतुगणास्त्रयः ॥ स्मृतास्तिस्रस्तुवाहि-न्यःपृतनेतिविचक्षणैः ॥ चमूस्तुपृतनास्तिस्रस्ताश्चतिस्र-स्त्वनीकिनी ॥ अनीकिनींदशगुणांप्राहुरक्षौहिणींबुधाः" इति । यस्याहंपतिरितिसंधिरार्षः । पतिः पालयि-ता । पातेर्डतिः । ईश्वरः नियन्ता । योद्धा । योत्स्ये । लुट् । तैः यज्ञविघ्नकरैः ॥ ३ ॥ विक्रान्ताः अक्षत-विक्रमाः ॥ ४ ॥ गोप्ता यज्ञस्येतिशेषः । सेनानांवा ॥ ५ ॥ अहंगमिष्यामि तेनसुरक्षिताभविष्यतीतियोजना ॥ ६ ॥ बालः ऊनषोडशवर्षः । अतएवअकृतविद्यः अशिक्षित-धनुर्विद्यः । बलाबलं शत्रूणामितिशेषः । "येषांचविरोधः शाश्वतिकः" इतिएकवद्भावः ॥ ७ ॥ रक्षसां युद्धइतिशेषः । कूटयुद्धाः कपटयुद्धाः । इदमर्धं ॥ ८ ॥ तिष्ठतुरामस्व-भावः मत्स्वभावश्चैवमित्याह—विप्रयुक्तइति । विप्रयु-क्तः विश्लिष्टः ॥ ९ ॥ चत्वारिअङ्गानि चतुरङ्गानि । "दि-क्सङ्ख्येसंज्ञायां" इतिसमासः ॥ १० ॥ वर्षसहस्राणि अतीतानीतिशेषः । तदनन्तरं दुःखेन उपवासदीक्षादि-क्लेशेन उत्पादितः ॥ ११ ॥ चतुर्णांपुत्राणांमध्ये रामे पर-मिकाप्रीतिः । स्वार्थेकप्रत्ययः । "प्रत्ययस्थात्" इतीत् । तस्माज्ज्येष्ठत्वादेश्चननेतुमर्हसीतियोजना ॥ १२ ॥ अथस-र्वथा रामनयनमयुक्तमितिवक्तुं योद्धव्यस्वरूपंपृच्छति—किमिति । केच किंनामधेयाः । कथंप्रमाणाः कीदृशाका-राइत्यर्थः । केरक्षन्ति के तेषांप्रधानाइत्यर्थः ॥ १३ ॥ प्रति-

ति० प्रीत्याधिक्येकारणमाह ज्येष्ठइति । अनेन राज्ययोग्यताध्वनिता । धर्मप्रधाने त्रिषुपुरुषार्थेषुधर्माधीनप्रवृत्तिके । राक्ष-सैर्युद्धेहि पाक्षिकनाशसंभावनयाराज्यविच्छेदएवभवेत् । धर्मेणप्रजापालनंचनान्योनिर्वहेत् । अतोरामोनेतुमयोग्यः ॥ १२ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. सेना. २ च. छ. झ. ञ. ट. सहितो. ३ क. भृत्याश्शस्त्रास्त्रकोविदाः. ४ ङ. च. छ. झ. ञ. ट. राक्षसाः. क. ग. ज. तेध्रुवं. ५ क. अथवा. ६ ग.—च. मयासहचतं. ७ क. ग. च.—झ. ट. षष्टिर्वर्ष. ८ ङ. झ. कृच्छ्रेणोत्पादित. ९ क. च. पारमिका. १० ङ. च. ज. झ. ज्येष्ठेधर्मप्रधाने.

सर्वं मे शंस भगवन्कथं तेषां मया रणे ॥ स्थातव्यं दुष्टभावानां वीर्योत्सिक्ता हि राक्षसाः ॥१५॥
तस्य तद्वचनं श्रुत्वा विश्वामित्रोऽभ्यभाषत ॥ १६ ॥
[1]पौलस्त्यवंशप्रभवो रावणो नाम राक्षसः ॥ १७ ॥
स ब्रह्मणा दत्तवरस्त्रैलोक्यं बाधते भृशम् ॥ महाबलो महावीर्यो राक्षसैर्बहुभिर्वृतः ॥ १८ ॥
श्रूयते[3] हि महावीर्यो[4] रावणो राक्षसाधिपः[5] ॥ साक्षाद्वैश्रवणभ्राता पुत्रो विश्रवसो मुनेः ॥ १९ ॥
यदा[6] स्वयं न यज्ञस्य विघ्नकर्ता महाबलः ॥ तेन संचोदितौ द्वौ तु राक्षसौ[7] वै महाबलौ ॥
मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः ॥ २० ॥
इत्युक्तो मुनिना तेन राजोवाच मुनिं तदा ॥ न हि शक्तोस्मि संग्रामे स्थातुं तस्य दुरात्मनः ॥२१॥
स त्वं प्रसादं धर्मज्ञ कुरुष्व मम पुत्रके ॥ मम चैवाल्पभाग्यस्य दैवतं हि भवान्गुरुः ॥ २२ ॥
देवदानवगन्धर्वा यक्षाः पतगपन्नगाः ॥ न शक्ता रावणं सोढुं किं पुनर्मानवा युधि ॥ २३ ॥
स[10] हि वीर्यवतां वीर्यमादत्ते युधि राक्षसः ॥ तेन चाहं न शक्नोमि[11] संयोद्धुं तस्य वा बलैः ॥
सबलो वा मुनिश्रेष्ठ सहितो वा ममात्मजैः ॥ २४ ॥
कथमप्यमरप्रख्यं संग्रामाणामकोविदम् ॥ बालं मे तनयं ब्रह्मन्नैव दास्यामि पुत्रकम् ॥ २५ ॥
अथ कालोपमौ युद्धे सुतौ सुन्दोपसुन्दयोः ॥ यज्ञविघ्नकरौ तौ[12] ते नैव[13] दास्यामि पुत्रकम् ॥ २६ ॥
[[14]तौ हि[15] यक्षस्य कन्यायां जातौ दैत्यकुलोद्वहौ] ॥ मारीचश्च सुबाहुश्च वीर्यवन्तौ सुशिक्षितौ ॥२७॥
तयोरन्यतरेणाहं[16] योद्धा स्यां ससुहृद्गणः ॥ [[17]अन्यथा त्वनुनेष्यामि भवन्तं सहबान्धवः] ॥ २८ ॥

इति नरपतिजल्पनाद्द्विजेन्द्रं कुशिकसुतं सुमहान्विवेश मन्युः ॥
सुहुत इव[18] समिद्भिराज्यसिक्तः समभवदुज्ज्वलितो महर्षिवह्निः ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे विंशः सर्गः ॥ २० ॥

कर्तव्यं प्रतिविधेयं ॥ १४ ॥ तेषांरणेकथंमयास्थातव्यमिति व्यूहप्रकारप्रश्नः ॥ १५ ॥ १६ ॥ राक्षसः अस्तीतिशेषः ॥ १७ ॥ किंवीर्यइत्यस्योत्तरमाह—सइति ॥ १८ ॥ प्रसिद्धश्चायमित्याह—श्रूयतइति ॥ १९ ॥ अर्धत्रयमेकान्वयं । यदायज्ञस्य स्वयंनविघ्नकर्ता अलक्ष्यत्वादिनेतिशेषः ॥ २० ॥ तस्य रावणस्य ॥ २१ ॥ अल्पभाग्यस्येति । त्वन्नियोगाकरणेनेतिशेषः । प्रसादकरणेहेतुः दैवतमिति ॥ २२ ॥ रावणसंग्रामवैमुख्यंनदोषाय । सर्वाशक्यत्वादित्याशयः ॥ २३ ॥ अर्धत्रयं । वीर्यमादत्ते स्वीकरोति । नाशयतीत्यर्थः । तस्यबलैः मारीचादिभिः ॥ २४ ॥ कथमितिप्रश्ने । राक्षसान् प्रतीतिशेषः ॥ २५ ॥ अथ शत्रुस्वरूपज्ञानानन्तरं । सुन्दोपसुन्दयोःसुतौ मारीचसुबाहू । सुन्दपुत्रोमारीचः । उपसुन्दपुत्रःसुबाहुः । पुत्रकं अनुकंपायांकन् । अतोनदास्यामीत्युपस्कार्यं ॥ २६ ॥ ॥ २७ ॥ २८ ॥ उत्तरसर्गार्थमन्तेसंगृह्णाति—इतीति । जल्पनात् असङ्गतोक्तेः । कोपाविष्टत्वेदृष्टान्तमाह—सुहुतइति । आदौसमिद्भिःसुहुतः ततआज्यसिक्तोवह्निरि-

---

ती० पुन्नांम्नोनरकात्त्रायतइतिपुत्रकं । अनेन पुत्रतनयशब्दयोर्नपौनरुक्त्यं । शि० कथमपीति । अस्यकथमपिनशक्नोमीतिपूर्वेणान्वयः ॥ २५ ॥ इतिविंशस्सर्गः ॥ २० ॥

[पा०] १ क. ग. च. पुलस्त्य. २ ग. राक्षसाधिपः. ३ ङ. च. छ. झ. ञ. श्रूयतेच. ४ ङ. झ. महाराज. ५ क. राक्षसेश्वरः. ६ क. ङ. छ.—ट. यदानखलु. च. यदामेखलु. घ. सदानखलु. ७ क. ग—ट. तौतु. ८ ङ. च. छ. झ. ञ. राक्षसौच. घ. राक्षसौतु. ग. ज. राक्षसौसु. क. राक्षसौकामरूपिणौ. ९ ग. ङ. च. छ. झ. ञ. सतु. १० ङ. च. छ. ञ. रावणः. ११ ग. ङ. च. छ. झ. ञ. ट. शक्तोस्मि. १२ च. तौतु. क. तौहि. १३ क. ग. च. छ. ज. ञ. ट. नैवदास्याम्यहंसुतम्. १४ इदमर्धं. क. ख. ङ. च. ज. ञ. ट. दृश्यते. १५ क. ङ. च. छ. तौतुराक्षस. १६ ग. ङ. च. छ. झ. ञ. ट. रन्यतरंयोद्धुं यास्यामि. १७ इदमर्धं क. ख. ङ. च. ज. ञ. ट. दृश्यते. १८ ग. ङ—ञ. इवमखेग्निराज्य. क. इवमखाग्निराज्य.

एकविंशः सर्गः ॥ २१ ॥

दशरथस्यरामाप्रेषणवचनेनरुष्टेविश्वामित्रेवसिष्ठेनदशरथंप्रतिरामविश्वामित्रमहिमनिवेदनपूर्वकंरामप्रेषणप्रार्थना ॥ १ ॥ ततोराज्ञातत्प्रेषणाङ्गीकरणम् ॥ २ ॥

तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलाक्षरम् ॥ समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिम् ॥ १ ॥
पूर्वमर्थं प्रतिश्रुत्य प्रतिज्ञां हातुमिच्छसि ॥ राघवाणामयुक्तोऽयं कुलस्यास्य विपर्ययः ॥ २ ॥
यदीदं ते क्षमं राजन्गमिष्यामि यथागतम् ॥ मिथ्याप्रतिज्ञः काकुत्स्थ सुखी भव सबान्धवः ॥३॥
तस्य रोषपरीतस्य विश्वामित्रस्य धीमतः ॥ चचाल वसुधा कृत्स्ना विवेश च भयं सुरान् ॥ ४ ॥
त्रस्तरूपं स विज्ञाय जगत्सर्वं महानृषिः ॥ नृपतिं सुव्रतो धीरो वसिष्ठो वाक्यमब्रवीत् ॥ ५ ॥
इक्ष्वाकूणां कुले जातः साक्षाद्धर्म इवापरः ॥ धृतिमान्सुव्रतः श्रीमान्न धर्मं हातुमर्हसि ॥ ६ ॥
त्रिषु लोकेषु विख्यातो धर्मात्मा इति राघवः ॥ स्वधर्मं प्रतिपद्यस्व नाधर्मं वोढुमर्हसि ॥ ७ ॥
संश्रुत्यैवं करिष्यामीत्यकुर्वाणस्य राघव ॥ इष्टापूर्तवधो भूयात्तस्माद्रामं विसर्जय ॥ ८ ॥
कृतास्त्रमकृतास्त्रं वा नैनं शक्ष्यन्ति राक्षसाः ॥ गुप्तं कुशिकपुत्रेण ज्वलनेनामृतं यथा ॥ ९ ॥
एष विग्रहवान्धर्म एष वीर्यवतां वरः ॥ एष बुद्ध्याधिको लोके तपसश्च परायणम् ॥ १० ॥

व । महर्षिवह्निः महर्षिश्रेष्ठः । उज्ज्वलितस्समभवत् संजातज्वालोबभूव । मुनिपक्षेक्रोधवृद्धिः । पुष्पिताग्रावृत्तं "अयुजिनयुगरेफतोयकारोयुजिचनजौजरगाश्चपुष्पिताग्रा" इतिलक्षणात् ॥२९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने विंशस्सर्गः ॥ २० ॥

एवं रामप्रेषणवृत्तान्तव्याकुलंराजानंवसिष्ठःप्रतिबोधयत्येकविंशे । स्नेहेन पुत्रस्नेहेन । पर्याकुलानि स्खलन्ति अक्षराणि यस्मिन् ॥ १ ॥ अर्थं प्रार्थितार्थं । अयंविपर्ययः प्रतिज्ञाहानिः । राघवाणामस्यकुलस्यायुक्तः ॥ २ ॥ इदं प्रतिज्ञातान्यथाकरणं । सुखीभवेतिव्यङ्ग्योक्तिः ॥ ३ ॥ रोषपरीतस्येतिषष्ठी सप्तम्यर्थे । भयं पूर्वकोपेनान्यथाकृतजगदयमद्य किंकरिष्यतीतिभयं ॥ ४ ॥ त्रस्तरूपं अतिशयेनत्रस्तं । प्रशंसायांरूपप् । धीरः धीमान् ॥ ५ ॥ इक्ष्वाकूणामिति त्वमितिशेषः ॥ ६ ॥ धर्मात्माइतीत्यत्र वाक्येसंहिताऽनित्या । स्वधर्मं प्रतिश्रुतनिर्वाहरूपं ॥ ७ ॥ संश्रुत्येति । एवंकरिष्यामीतिसंश्रुत्य तथाऽकुर्वाणस्येत्यर्थः । इष्टंअश्वमेधान्तोयागः । पूर्तं वाप्यादिनिर्माणं । तदुक्तं "वापीकूपतटाकादिप्रतिष्ठासेतुबन्धनम् । अन्नप्रदानमारामःपूर्तमित्यभिधीयते"इति । तयोर्वधः निष्फलत्वं ॥ ८ ॥ कृतास्त्रं शिक्षितास्त्रं । नशक्ष्यन्ति धर्षितुमितिशेषः । ज्वलनेन अग्निचक्रेण । अमृतमग्निचक्रेण सुरक्षितमितिभारतेव्यक्तं ॥ ९ ॥ राज्ञोभयनिवृत्तयेविश्वामित्रमाहात्म्यमाह—एषइति । परायणं परमस्थानं ।

ति॰ अयंविपर्ययः प्रतिज्ञाहानिरूपः राघवाणामयुक्तः । यतोऽयमस्यकुलस्यविपर्ययोनाशः । इतिविपर्ययपदावृत्तिर्बोध्या ॥ २ ॥ **ति॰** । मिथ्यावादी त्वं सुहृद्वृतस्सुखीभवेतिविपरीतलक्षणयोक्तिः ॥ ३ ॥ **ति॰** धीमतइत्यत्र रोषंदृष्ट्वेतिशेषः ॥ ४ ॥ **शि॰** अपरः नविद्यतेपरउत्तमोयस्मात् सोपरः सर्वश्रेष्ठः ॥ ६ ॥ **ती॰** नकेवलंविश्वामित्रकृतसंरक्षणेनैवास्यरघुनाथस्यदुष्प्रसहत्वं किंतु स्वरूपपर्यालोचनयापीत्याह एषविग्रहवानिति । एषः रामभद्रः । वीर्यवतांवरइत्यनेन सहजंवीर्यंतस्यैवोक्तंभवति । एषबुद्ध्याधिकइत्यनेन सहजज्ञानशक्तिःप्रतिपादिता । परायणं परमप्राप्यं । तपसोः विविदिषासाधनत्वात् । "तमेवंवेदानुवचनेन ब्राह्मणाविविदिषन्तियज्ञेनदानेनतपसानाशकेन" इतिश्रुतेः । यद्वा एवंसहजप्रभावेवर्णितेपि पुत्रबुद्ध्यातिरोहितरघुनाथप्रभावापरिज्ञानाद्दशरथस्यप्रत्ययोनोत्पद्यतइतिविचार्य राज्ञोभयनिवृत्तिं राघवस्यभविष्यच्छ्रेयःप्राप्तिंच हृदिनिधाय गोप्तुर्विश्वामित्रस्यापि रक्षणसामर्थ्यमुपपादयितुमाह एषविग्रहवानित्यादिना । **ति॰** न केवलंविश्वामित्रकृतसंरक्षणेनैवरामस्यदुर्धर्षत्वं किंतु स्वतोऽपीत्याह रामविश्वामित्रयोःश्लिष्टवर्णनेन एषइति । एषः रामो विश्वामित्रश्च । रामपक्षे विद्याधिकः सहजज्ञानशक्तिः । तपसः मननादेः

[पा॰] १ ङ. च. छ. झ. सुहृद्वृतः. २ ङ. झ. देवानांचभयंमहत्. ३ क. ग—ञ. रूपंतु. ४ घ. आश्रुत्यैवंकरिष्यामीत्युक्त्वावाक्यमकुर्वतः. ङ. झ. प्रतिश्रुत्यकरिष्येतिउक्तवाक्यमकुर्वतः. ५ क. ज. इष्टापूर्तंवृथा. ६ ङ. च. छ. झ. ञ. ट. विद्याधिको.

एषोऽस्त्रान्[1]विविधान्वेत्ति त्रैलोक्ये सचराचरे ॥ नैनमन्यः पुमान्वेत्ति न च वेत्स्यन्ति केचन ॥ ११ ॥
न[2] देवा ऋषयः केचिन्नासुरा[3] न च राक्षसाः ॥ गन्धर्वयक्षप्रवराः सकिंनरमहोरगाः ॥ १२ ॥
सर्वास्त्राणि कृशाश्वस्य[4] पुत्राः परमधार्मिकाः[5] ॥ कौशिकाय पुरा दत्ता यदा राज्यं प्रशासति ॥ १३ ॥
तेऽपि पुत्राः कृशाश्वस्य प्रजापतिसुतासुताः[6] ॥ नैकरूपा महावीर्या दीप्तिमन्तो जयावहाः ॥ १४ ॥
जया च सुप्रभा चैव दक्षकन्ये सुमध्यमे ॥ ते[7] सुवातेऽस्त्रशस्त्राणि शतं परमभास्वरम् ॥ १५ ॥
पञ्चाशतं सुतांल्लेभे[8] जया नाम परान्पुरा ॥ वधायासुरसैन्यानाममेयान्[9]कामरूपिणः ॥ १६ ॥
सुप्रभाऽजनयच्चापि सुतान्[10]पञ्चाशतं पुनः ॥ संहारान्नाम दुर्धर्षान्दुराक्रामान्बलीयसः ॥ १७ ॥
तानि चास्त्राणि वेत्त्येष यथावत्कुशिकात्मजः ॥ अपूर्वाणां च जनने शक्तो भूयस्[11] धर्मवित् ॥ १८ ॥
तेनास्य[12] मुनिमुख्यस्य सर्वज्ञस्य[13] महात्मनः ॥ न किंचिदस्त्यविदितं[14] भूतं भव्यं च राघव ॥ १९ ॥
एवंवीर्यो महातेजा विश्वामित्रो महायशाः[15] ॥ न रामगमने राजन्संशयं गन्तुमर्हसि[16] ॥ २० ॥
तेषां निग्रहणे शक्तः स्वयं च कुशिकात्मजः ॥ [धनुर्भृतोस्य[17] शक्रस्तु बिभीयात्समरे विभो ॥]
तव पुत्रहितार्थाय त्वामुपेत्याभियाचते ॥ २१ ॥

इति मुनिवचनात्[18]प्रसन्नचित्तो रघुवृषभश्च मुमोद भास्वराङ्गः[19] ॥
गमनमभिरुरोच राघवस्य प्रथितयशाः कुशिकात्मजाय बुद्ध्या ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकविंशः सर्गः ॥ २१ ॥

एतत्सदृशःकोपितपस्वीनास्तीत्यर्थः ॥१०॥ अस्त्रानिति पुंलिङ्गत्वमार्षं। सचराचरइत्यनेन सामस्त्यंगम्यते। एनं एतदवगतमस्त्रसमूहं ॥११॥ केचनेत्युक्तंप्रपञ्चयति—नदेवाइति ॥ १२ ॥ सर्वाविदितंकथमयंवेत्तीत्यत्राह—सर्वेति। कृशाश्वः प्रजापतिष्वेकः। परमधार्मिकाः परमधर्मनिष्ठाः। पापिनमस्पृशन्तइत्यर्थः। दत्ताः कृशाश्वेन। प्रशासति प्रशास्ति। अयमितिशेषः ॥ १३ ॥ पितृप्राशस्त्यमुक्त्वामातृप्राशस्त्यमाह—तेपीति। प्रजापतिः दक्षः। तस्यसुतयोःकन्ययोःसुताः ॥ १४ ॥ केप्रजापतिसुतेतत्राह—जयाचेति। सुवाते असुवातां। शस्त्राणि विशसनकर्तॄणि। परमभास्वरमितिशताभिप्रायेणैकवचनं ॥ १५ ॥ काकत्यसूयतेत्यत्राह—पञ्चाशतमिति। अमेयान् अपरिच्छेद्यवैभवान् ॥ १६ ॥ संहारान् अन्वर्थसंहारसंज्ञान्। दुर्धर्षान् परैरभिभवितुमशक्यान्। दुराक्रामान् अमोघानित्यर्थः ॥ १७ ॥ यथावत् कार्त्स्न्येन। अपूर्वाणांअस्त्राणां। सः विदितसकलास्त्रः ॥ १८—२१ ॥ भास्वराङ्गः भासनशीलः। प्रसन्नमुखइतियावत्। मुमोद मुमुदे। व्यत्ययात्परस्मैपदं ॥ २२ ॥ इत्येकविंशस्सर्गः ॥ २१ ॥

परायणंप्राप्यः। विश्वामित्रपक्षे तपसआश्रयः ॥ १० ॥ **ती०** एषोऽस्त्रान्विविधान्वेत्तीत्यनेन सर्वेश्वरस्यभूतलावतारसमये तदीयानिदिव्यायुधान्यपिसहैवागतानीतिगम्यते। तथाचवक्ष्यति “ शरानानाविधाकाराधनुरायतविग्रहम्। अनुव्रजन्तिकाकुत्स्थंसर्वे पुरुषविग्रहाः ” इति। नैनमन्यःपुमान्वेत्तीत्यत्र “सहैवसन्तंनविजानन्तिदेवाः” इतिश्रुतिःप्रमाणं। नचवेत्स्यन्तीत्यनेन नविदुश्चेतिगम्यते। **ति०** रामपक्षे अन्यःपुमान् अविद्यावृतःपुमानित्यर्थः। विश्वामित्रपक्षे एनं अस्त्रगणं ॥ ११ ॥ **ती० ति० शि० वि०** दत्ताः शिवेनेतिशेषः ॥ १३ ॥ **ति०** सूते सुवाते इत्यर्थः ॥ १५ ॥ **ति० वि०** अरूपिणः अदृश्यमानरूपान् ॥ १६ ॥ राघवस्य रामस्य। गमनबुंध्या अभिरुरोच स्वीचकार ॥ २२ ॥ इत्येकविंशस्सर्गः ॥ २१ ॥

[पा०] १ ग. एषोस्त्रंविविधं. २ ग. ङ. छ—ञ. नदेवानर्षयः. ३ ङ. च. छ. झ. नामराः. ४ क. ग. घ. च. ञ. भृशाश्वस्य. ५ क. ख. च. छ. ञ. परमदुर्जयाः. ६ क. सुतैस्समाः. ख. समास्सुताः. ७ ख. घ. ङ. झ. ञ. तेसूतेऽस्त्राणिशस्त्राणि. च तेसुवातेततोस्त्राणि. ज. तयोरपत्यान्यस्त्राणिशतं. ट. सुवातेस्त्राणिशस्त्राणि. ८ ङ झ. जयालब्धवरावरान्. च. छ. ञ. जयानामपरावरान्. ज. जयानामसुतान्पुरा. क. जयालब्धवरापुरा. ग. ट. जयानामवरान्पुरा. ९ क. मक्षयान्कामरूपिणः. ङ. च. छ. झ. ञ. मप्रमेयानरूपिणः. ख. मजेयान्कामरूपिणः. १० क. ख. ग. ङ. झ. पुत्रान्पञ्चाशतं. घ. च. ञ. पुत्रान्पञ्चशतं. ११ क. ख. घ—ञ. भूयश्च. १२ अयंश्लोकः क. ङ. ञ. दृश्यते. १३ ङ. च. छ. ञ. धर्मज्ञस्य. १४ ङ. छ. झ. दस्त्यविदितं. क. च. ञ. दस्याविदितं. १५ क. महातपाः. १६ ख. कर्तुमर्हसि. १७ इदमर्धं च. छ. ञ. दृश्यते. १८ ख. इतिमुनिवरवचनात्. १९ ङ. च. छ. झ. ञ. पार्थिवः.

द्वाविंशः सर्गः ॥ २२ ॥

विश्वामित्रेणदशरथप्रेषिताभ्यांरामलक्ष्मणाभ्यांसहस्वाश्रमंप्रतिप्रस्थानम् ॥ १ ॥ तथामध्येमार्गंक्षुत्पिपासापरिहारकरवाद्यिबहुगुणवत्ताप्रतिपादनपूर्वकंरामलक्ष्मणाभ्यांबलातिबलाख्यविद्याद्वयोपदेशः ॥ २ ॥

तथा वसिष्ठे ब्रुवति राजा दशरथः सुतम् ॥ प्रहृष्टवदनो राममाजुहाव सलक्ष्मणम् ॥ १ ॥
कृतस्वस्त्ययनं मात्रा पित्रा दशरथेन च ॥ पुरोधसा वसिष्ठेन मङ्गलैरभिमन्त्रितम् ॥ २ ॥
स पुत्रं मूर्ध्न्युपाघ्राय राजा दशरथः प्रियम् ॥ ददौ कुशिकपुत्राय सुप्रीतेनान्तरात्मना ॥ ३ ॥
[ततो भूयो वसिष्ठेन मङ्गलैरभिमन्त्रितम् ॥ आदाय विप्रो हृष्टोऽभूत्रिदशा विज्वराऽभवन् ॥ ४ ॥]
ततो वायुः सुखस्पर्शो विरजस्को ववौ तदा ॥ विश्वामित्रगतं रामं दृष्ट्वा राजीवलोचनम् ॥ ५ ॥
पुष्पवृष्टिर्महत्यासीद्देवदुन्दुभिनिस्स्वनैः ॥ शङ्खदुन्दुभिनिर्घोषः प्रयाते तु महात्मनि ॥ ६ ॥
विश्वामित्रो ययावग्रे ततो रामो महायशाः ॥ काकपक्षधरो धन्वी तं च सौमित्रिरन्वगात् ॥ ७ ॥
कलापिनौ धनुष्पाणी शोभयानौ दिशो दश ॥ विश्वामित्रं महात्मानं त्रिशीर्षाविव पन्नगौ ॥
अनुजग्मतुरक्षुद्रौ पितामहमिवाश्विनौ ॥ ८ ॥
तदा कुशिकपुत्रं तु धनुष्पाणी स्वलंकृतौ ॥ बद्धगोधाङ्गुलित्राणौ खड्गवन्तौ महाद्युती ॥ ९ ॥

पदं । राघवस्यगमनमभिरुरोच राघवंकुशिकात्मजाय दातुंबुद्ध्याचिन्तयदित्युपस्कार्यं । पूर्ववत्पुष्पिताग्रावृत्तं ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकविंशस्सर्गः ॥ २१ ॥

अथप्रसन्नहृदयेनराज्ञारामविसर्जनंद्वाविंशे—तथेत्यादि । सलक्ष्मणंराममिति तयोरविनाभावज्ञानादितिभावः ॥ १ ॥ कृतेत्यादिश्लोकद्वयमेकान्वयं । पित्रा दशरथेन । स्वेनेतिशेषः । कृतस्वस्त्ययनं कृतमङ्गलानुष्ठानं । मङ्गलैर्मङ्गलसूक्तैः "स्वस्तिनोमिमीतां"इत्यादिभिः ॥२॥३॥अथयात्रायांशुभनिमित्तसंपत्तिंदर्शयति—तत इत्यादि । गतं अनुगतं ॥४॥ प्रयाते प्रयातुमुपक्रान्ते । देवदुन्दुभिनिस्वनश्चअवतारप्रयोजनोपक्रमत्वात् शङ्खदुन्दुभिनिर्घोषोदशरथीयः ॥५॥६॥ धन्वी धनुष्मान् । व्रीह्यादित्वादिनिः ॥ ७ ॥ कलापिनावित्यादिसार्धश्लोक एकान्वयः । कलापिनौ तूणीरधारिणौ । "कलापोभूषणेबर्हेतूणीरेसंहतावपि" इत्यमरः । शोभयानौ प्रकाशयन्तौ । आनेमुगभावश्छान्दसः । विश्वस्यमित्रंविश्वामित्रः । "मित्रेचर्षौ" इतिविश्वशब्दस्यदीर्घः । श्रुतिश्च "तस्योंविश्वंमित्रमासीद्यदिदंकिंचतस्माद्विश्वामित्रइत्याचक्षते" इति । प्रत्येकंतूणीरद्वयधारणाच्छिरोभ्यांच त्रिशीर्षाविवेत्युपमानं धनुस्तूणीरशरधरत्वाद्वा । अक्षुद्रौ अनल्परूपवीर्यादिवैभवौ ॥ ८ ॥ तदेत्यादिसार्धश्लोकद्वयमेकान्वयम् । बद्धं गोधाचर्मकृताङ्गुलित्राणंययोस्तौ तथा । गोधाहस्तत्राणमित्येके । द्युतिः सामान्यशोभा । श्रीः विशेषशोभा । शोभयेतां व्यत्ययेनलङर्थेलोट् । विश्वामित्रमनुयातौरामलक्ष्मणौ स्थाणुमनुयातौकुमा-

शि० आजुहाव । एतेनगुरुवाक्येराज्ञश्श्रद्धातिशयस्सूचितः ॥ १ ॥ ति० अभिमन्त्रितंबोधितमित्यर्थः । तद्बोधनंचयोगवासिष्ठेप्रसिद्धं ॥ २ ॥ ति० ववाविल्यस्यपृष्ठतइतिशेषः ॥ ५ ॥ ती० पञ्चशीर्षाविवोरगावितिपाठे तूणीरद्वयंभुजद्वयंशिरश्चेतिप्रत्येकं पञ्चकस्यविद्यमानत्वात् पञ्चशीर्षावित्युक्तिः । ति० अत्रेदंतूणीरादिवैष्णवं गरुडेनदत्तंरामाय ताटकासुबाहुवधायमारीचस्यसमुद्रे पातनायच । नहिप्राकृतशस्त्रसाध्यमेतत् । तदुक्तंपाद्मे "पक्षीतार्क्ष्यस्समागम्यत्रीणिचास्त्राणिकार्मुकम् । सर्वभूतैरदृश्यस्सन्दत्वाताभ्यांपुनर्ययौ" इति । अस्त्राणि शस्त्राणि खड्गचर्मतूणीररूपाणि ॥ ८ ॥

[पा०] १ ङ. च. छ. झ. ञ. दशरथस्स्वयम्. घ. दशरथस्तदा. २ ख. मात्राकैकेय्याचसुमित्रया. * पुरोधसेत्यतःप्राक्.-वादेषुवादिभिर्विप्रैःसमङ्गलकृताशिषम् । आयान्तंसहसौमित्रिंप्रत्युद्गम्यचसस्वजे । अङ्कमारोप्यतौवीरौराजर्षिरमितप्रभः । एतदर्धत्रयं. ख. पाठेदृश्यते. ३ ख. सपुत्रौ. ४ ङ. च. छ. झ. ञ. दशरथस्तदा. ज. दशरथस्स्वयम्. ख. दशरथःप्रियौ. ५ अयंश्लोकः ख. दृश्यते. ६ क. ग—ञ. नीरजस्को. ७ क. ख. घ. निस्वनः. ८ ग. धनुर्धरः. ९ च. छ. ञ. ट. पञ्चशीर्षाविवोरगौ. १० अनुजग्मतुरित्यारभ्य. शोभयेतामनिन्दितौइत्यन्तं. ख. घ—झ. पाठेषु. अर्धानांक्रमेपौर्वापर्यंदृश्यते.

कुमारौ चारुवपुषौ भ्रातरौ रामलक्ष्मणौ ॥ अनुयातौ श्रिया दीप्त्या शोभयेतामनिन्दितौ ॥
स्थाणुं देवमिवाचिन्त्यं कुमाराविव पावकी ॥ १० ॥
अध्यर्धयोजनं गत्वा सरय्वा दक्षिणे तटे ॥ रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत ॥ ११ ॥
गृहाण वत्स सलिलं माभूत्कालविपर्ययः ॥ मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा ॥ १२ ॥
न श्रमो न ज्वरो वा ते न रूपस्य विपर्ययः ॥ न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः ॥१३॥
न बाह्वोः सदृशो वीर्ये पृथिव्यामस्ति कश्चन ॥ त्रिषु लोकेषु वा राम न भवेत्सदृशस्तव ॥ १४ ॥
[बलामतिबलां चैव पठतस्तव राघव] ॥ न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये ॥
नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ ॥ १५ ॥
एतद्विद्याद्वये लब्धे भविता नास्ति ते समः ॥ बला चातिबला चैव सर्वज्ञानस्य मातरौ ॥ १६ ॥
क्षुत्पिपासे न ते राम भविष्येते नरोत्तम ॥ बलामतिबलां चैव पठतः पथि राघव ॥ १७ ॥
[गृहाण सर्वलोकस्य गुप्तये रघुनन्दन] ॥ विद्याद्वयमधीयाने यशश्चाप्यतुलं त्वयि ॥ १८ ॥
पितामहसुते ह्येते विद्ये तेजस्समन्विते ॥ प्रदातुं तव काकुत्स्थ सदृशस्त्वं हि धार्मिक ॥ १९ ॥
कामं बहुगुणाः सर्वे त्वय्येते नात्र संशयः ॥ तपसा संभृते चैते बहुरूपे भविष्यतः ॥ २० ॥

राविवाशोभेतामित्यर्थः । स्थाणुं रुद्रं पावकी पावकात्प्रादुर्भूतौस्कन्दविशाखौ । "ततोभवच्चतुर्मूर्तिःक्षणेनभगवान्प्रभुः ॥ स्कन्दोविशाखःशाकश्चनैगमेषश्चपृष्ठतः" इतिभारतोक्तेः । अचिन्त्यं अचिन्त्यवैभवम् ॥ ९ ॥ १० ॥ अधिकमर्धंयस्मिन्तदध्यर्धं अध्यर्धंच तत्योजनंच अध्यर्धयोजनं । सार्धयोजनमितियावत् । तावद्दूरगमनेनबालयोः क्षुत्तृट्पीडामाभूदितितन्निवर्तकविद्याद्वयोपदेशायाऽऽह्वयते—रामेति । मधुरां भक्तिपूर्वकोच्चारणात्रामनाम्नः श्रवणानन्दकरत्वाच्च ॥११॥ सलिलंगृहाण शुद्धाचमनंकुर्वित्यर्थः । विपर्ययः अतिक्रमः विलंबइतियावत् । मन्त्रग्रामं मन्त्रसमष्टिरूपां । इदंबलातिबलयोःप्रत्येकंविशेषणम् ॥ १२ ॥ तद्ग्रहणफलमाह—नेत्यादि । विपर्ययः अन्यथाभावः । भविष्यतीतिशेषः । सुप्तं त्वामितिशेषः ॥ १३ ॥ बलामतिबलांचपठतस्तवेतिशेषः । अस्ति स्यादित्यर्थः । त्रिष्वित्यत्रसर्वगुणैर्निस्सीमत्वमुच्यते ॥ १४ ॥ सौभाग्ये सौन्दर्ये । दाक्षिण्ये सामर्थ्ये । बुद्धिनिश्चये बुद्ध्याकार्यनिश्चये । समः भवतीतिशेषः ॥ १५ ॥ सामान्येनोपसंहरति—एतदिति । तेसमोनास्ति नभविताचेत्यर्थः । मातरौ कारणभूते ॥१६॥ ते । भविष्येते भविष्यतः ॥ १७ ॥ अधीयानेत्वयि । भवेदितिशेषः ॥ १८ ॥ तेजस्समन्विते प्रभावसमन्विते । तवप्रदातुंत्वमेवसदृशोनान्यइतियोजना ॥ १९ ॥ एतदुपपादयति । काममिति । एते पूर्वोक्ताःसौभाग्यादयः कामं प्रकामं त्वयिसन्ति यद्यपि तथापि तपसासंभृते लब्धे एते विद्ये । त्वदुपदेशात् बहुरूपे लोकेबहुधा विस्तृते

ति० कालस्य अन्नभोजनकालस्य । पर्ययोतिक्रमः । गृहाणत्वमित्युपलक्षणं लक्ष्मणस्यापि । क्षुत्पिपासाशान्तिरूपफलस्योभयोरपिदर्शनादपेक्षणाच्च ॥ १२ ॥ ती० प्रमत्तं प्रमादयुक्तं । कार्यान्तरव्यासङ्गादिनाऽसावधानमितियावत् । ति० प्रमत्तंअकृताचमनादिकं ॥ १३ ॥ शि० कश्चनजातोनास्तिनचभविष्यति । अभवदित्यस्याप्युपलक्षणमेतत् । वाशब्दश्चार्थे ॥ १४ ॥ ति० सर्वज्ञानस्यमातराविति । अप्रतिभामूलक्षुधादिनिवृत्तिसामर्थ्यवत्त्वात्सर्वज्ञानजनिके ॥ १६ ॥ ति० अधीयानेत्वयीतिशेषः ॥ १८ ॥ ति० प्रदातुंममबुद्धिरितिशेषः । सदृशः तद्दानयोग्यइत्यर्थः ॥ १९ ॥ ती० बहुरूपे बहुफलप्रदे । ति० तपसा मदीयेनसंभृते पूर्णे । बहुरूपे शास्त्रोक्तफलादधिकफलप्रदे । यद्वा तपसा सर्वतपःप्राप्यत्वेनतपोरूपेणभवता । संभृते धृतेइत्यर्थः ॥२०॥

[पा०] १ क—छ. झ. ञ. त्कालस्यपर्ययः. २ ट. नश्रमो. ३ क. रूपस्यापिसंक्षयः. ४ ज. नप्रसुप्तं. ५ क. ज. राक्षसाः. ५ क. च. ञ. वैराम ट. वैरामभविष्यतितवानघ. ७ इदमर्धं क. ख. ङ—ट. दृश्यते. ८ ङ. झ. पठतस्तात. ख. ट. पठतःपथि. ९ ङ. झ. नभवेत्सदृशस्तव. १० इदमर्धं. च. छ. ज. ञ. ट. दृश्यते. ११ च. छ. भद्रकाकुत्स्थप्राप्स्यसेरघुनन्दन. १२ ङ. च. छ. झ. श्चाथभवेद्ध्रुवि. १३ क. च. छ. ञ. प्रदास्ये. १४ ङ. च. छ. झ. ञ. पार्थिव. १५ ख. वरगुणास्सर्वे. ज. महागुणास्सन्ति.

ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः ॥ प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः ॥ २१ ॥
विद्यासमुदितो रामः शुशुभे भूरिविक्रमः ॥ सहस्ररश्मिर्भगवाञ्शरदीव दिवाकरः ॥ २२ ॥
गुरुकार्याणि सर्वाणि नियुज्य कुशिकात्मजे ॥ ऊषुस्तां रजनीं तत्र सरय्वां सुसुखं त्रयः ॥ २३ ॥
दशरथनृपसूनुसत्तमाभ्यां तृणशयनेऽनुचिते तदोषिताभ्याम् ॥
कुशिकसुतवचोऽनुलालिताभ्यां सुखमिव सा विबभौ विभावरी च ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

त्रयोविंशः सर्गः ॥ २३ ॥

सरयूतीरे विश्वामित्रेणप्रातःप्रबोधनाच्छयनादुत्थितेनसलक्ष्मणेनरामेणस्नानाद्याह्निकनिर्वर्तनपूर्वकंविश्वामित्रसमीपागमनम् ॥ १ ॥ ततोविश्वामित्रेणराघवाभ्यांसहगङ्गासरयूसंगमेकामाश्रमंप्रत्यागमनम् । तथारामंप्रतितदाश्रमस्याङ्गशब्दवाच्यत्वेनिमित्तकथनपूर्वकं तत्रत्यमहर्षिपूजास्वीकरणेनतदहोरात्रंतत्रैवसुखनिवासः ॥ ३ ॥

प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः ॥ अभ्यभाषत काकुत्स्थौ शयानौ पर्णसंस्तरे ॥ १ ॥
कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ॥ उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ २ ॥

भविष्यतः ॥ २० ॥ जलंस्पृष्ट्वा आचम्येत्यर्थः । भावितात्मनः ध्यातात्मस्वरूपात् ॥ २१ ॥ विद्यासमुदितः समुदितविद्यः । लब्धविद्यइतियावत् ॥२२॥ गुरुकार्याणि गुरौकर्तव्यानि पादसंवाहनादीनि । कुशिकात्मजे नियुज्य कृत्वा । त्रयः स्वयंतौचेतित्रयः । तत्रसरय्वां सरयूतीरे । सुसुखमूषुः । यद्वा एतदर्धस्यपूर्वेणान्वयः कुशिकात्मजे गुरुकार्याणिनियुज्य विद्यासमुदितोरामःशुशुभइति ॥ २३ ॥ चतुर्थ्यर्थे "बहुलंछन्दसि" इति षष्ठ्यर्थेचतुर्थी । दशरथपुत्रयोर्विभावरी सुखमिवविबभौ प्रभातेत्यर्थः । इवशब्दोवाक्यालङ्कारे । अत्र रामाय विद्यादानंलक्ष्मणस्याप्युपलक्षणं । पश्चाद्रामोवालक्ष्मणायोपदिदिशेतिबोध्यम् । पूर्ववत्पुष्पिताग्रावृत्तं ॥२४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

अथैषामंगदेशप्राप्तिपूर्ववृत्तकथनव्याजेनव्यंजयति त्रयोविंशे—प्रभातायामित्यादि । पर्णसंस्तरे पर्णमयास्तरणे । पूर्वसर्गान्तेतृणशयनस्योक्तत्वादत्रतृणमिश्रपर्णशयनेइतिबोध्यम् ॥ १ ॥ उभयप्रबोधनार्थमागतोविश्वामित्रोरामस्य "समयाबोधितःश्रीमान्सुखसुप्तःपरंतपः" इत्युक्तरीत्यानिद्राकालिकश्रियमवलोक्य तदासक्तस्सन्स्वागमनकार्यविस्मृत्य इमंप्रसूतवतीकौसल्याकिंवातपस्तप्तवतीतितिविस्मयते । कौसल्यासुप्रजाः । बोधनकाले विस्मितमुखोमुनिरासीत् । शोभनाप्रजापुत्रोयस्याःसासुप्रजाः "नित्यमसिच्प्रजामेधयोः" इत्यसिच् । त्वज्जननीकौसल्यासुपुत्रा । यद्वा स्वगतवचनं । एतज्जननीकौसल्यासुप्रजाः । "कौसल्याशुशुभेतेनपुत्रेणामिततेजसा" इतिवत् । यद्वा कौसल्यायाःसुप्रजइतिसंबोधनं । कर्मधारयेप्यार्षोसिच् "ढ्रलोपेपूर्वस्यदीर्घोणः" इतिदीर्घः "सुपांसुलुक्" इत्यादिनापूर्वसवर्णदीर्घोवा । परशुरामव्यावृत्त्यर्थविशेषणम् । कौसल्यादशरथयोरुभयोरपितपःफलत्वेनावतीर्णत्वेपिकथंकौसल्यासुप्रजाइत्युक्तिः । उच्यते । "मातापुत्रस्यभूयांसिकर्माण्यारभते" इत्युक्तरीत्या "मातृदेवोभव पितृदेवोभव" इतिवन्मातृप्राधान्योक्तेः "पितुःशतगुणंमाता" इतिस्मृतेश्च । यद्वा कौसल्यादशरथयोर्महदन्तरमस्ति । दशरथोहि "अहंवेद्मिमहात्मानं" इतिपरत्वेननिवेद्यमानेपित्वद्किंचि-

---

ति० कुशिकात्मजोविश्वामित्रः गुरुकार्याणि गुरुविषयाणिकार्याणि पूर्वोत्थायीपश्चात्संनिवेशीत्यादीनि तानिसर्वाणि नियुज्य उपदिश्येत्यर्थः ॥ २३ ॥ इतिद्वाविंशस्सर्गः ॥ २२ ॥

ति० सुप्रजाः शोभनपुत्रवती । अतस्त्वादशस्यसुपुत्रस्यतवास्मिन्समयेनिद्राऽनुचिता ॥ २ ॥

[पा०] १ ग. ङ. झ. भीमविक्रमः. २ ङ. झ. कुशिकात्मजः. ३ घ. तीरेसरय्वाः. ४ ख. रचिते. ५ ख. ग. घ. सहोषिताभ्यां. ६ ङ. च. छ. झ. ञ. ट. विभावरी. ७ च. छ. ज. ञ. ट. काकुत्स्थंशयानं. ग. काकुत्स्थंशयने.

तस्यर्षेः परमोदारं वचः श्रुत्वा नरोत्तमौ ॥ स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपम् ॥ ३ ॥
कृताह्निकौ महावीर्यौ विश्वामित्रं तपोधनम् ॥ अभिवाद्याभिसंहृष्टौ गमनायाभितस्थतुः ॥ ४ ॥
तौ प्रयातौ महावीर्यौ दिव्यां त्रिपथगां नदीम् ॥ ददृशाते ततस्तत्र सरय्वाः सङ्गमे शुभे ॥ ५ ॥
तत्राश्रमपदं पुण्यमृषीणामुग्रतेजसाम् ॥ बहुवर्षसहस्राणि तप्यतां परमं तपः ॥ ६ ॥
तं दृष्ट्वा परमप्रीतौ राघवौ पुण्यमाश्रमम् ॥ ऊचतुस्तं महात्मानं विश्वामित्रमिदं वचः ॥
[कौतूहलात्तौ धर्मज्ञौ वीर्यवन्तं तपोधनम्] ॥ ७ ॥
कस्यायमाश्रमः पुण्यः को न्वस्मिन्वसते पुमान् ॥ भगवञ्श्रोतुमिच्छावः परं कौतूहलं हि नौ ॥८॥
तयोस्तद्वचनं श्रुत्वा प्रहस्य मुनिपुङ्गवः ॥ अब्रवीच्छ्रूयतां राम यस्यायं पूर्व आश्रमः ॥ ९ ॥
कन्दर्पो मूर्तिमानासीत्काम इत्युच्यते बुधैः ॥ १० ॥
तपस्यन्तमिह स्थाणुं नियमेन समाहितम् ॥ कृतोद्वाहं तु देवेशं गच्छन्तं समरुद्गणम् ॥
धर्षयामास दुर्मेधा हुंकृतश्च महात्मना ॥ ११ ॥

त्कृत्य "दुःखेनोत्पादितश्चायंनरामंनेतुमर्हसि" इतिरामेकेवलंपुत्रत्वंमन्वानोवसिष्ठसन्धुक्षितहृदयःरामंप्रेषितवान्।कौसल्यातुकेवलवात्सल्यपरापिद्रुतंसादरंप्रेषितवती। तदिदंतारतम्यमवलोक्यमुदितहृदयोमुनिराह—कौसल्यासुप्रजाइति । मातृवाक्यंपितृवाक्यंचपालनीयमित्यमुंधर्मंलोकेप्रवर्तयितुंस्वयंतदनुष्ठातृत्वेनसुप्रजाइत्युक्तं। अथक्रमेणगुणान्तरावगाहान्निस्तीर्यप्रबोधयति—रामेत्यादि। रामेत्यनेनस्वापकालिकसौन्दर्यमुच्यते। पूर्वासन्ध्याप्रवर्तते पूर्वासन्ध्यादिवाकरमिवरामदिवाकरंत्वांकौसल्याजनितवतीतिभावः । यद्वा मातृवत्पूर्वसन्ध्यामप्युपलालयेति । यद्वा पूर्वासन्ध्याप्रवर्तते आदित्यस्येवभवतोऽयंविरोधिनिरसनारंभसमयइति । यद्वा पूर्वासन्ध्याप्रवर्तते अज्ञानान्धकारोगतः भगवत्साक्षात्कारोमेजातः अद्यमेसुप्रभातमिति। यद्वा जगतः सर्वस्यभगवदवतारात्सत्वोद्रेककालोजातः "अद्यमेसफलंजन्मसुप्रभाताचमेनिशा ॥ यदुन्निद्राब्जपत्राक्षंविष्णोर्द्रक्ष्याम्यहंसुखम्" ॥ उत्तिष्ठ निद्राश्रीरवलोकिता प्रबोधश्रियमप्यवलोकितुमिच्छामि। नरशार्दूल नरश्रेष्ठ। नरश्रेष्ठतयाभवतापिसन्ध्योपास्या "यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः" इत्युक्तेः। उत्तिष्ठनरशार्दूल आश्रितविरोधिनिरसनशीलस्यकिंनिद्रावकाशोप्यस्ति। नरशार्दूल

मद्यज्ञनिर्वाहक। उत्थानप्रयोजनमाह—कर्तव्यंदैवमाह्निकं । देवेनसर्वेश्वरेणविहितंनित्यकर्मकर्तव्यम् । यद्वा देवशब्दोभवदर्थकः । भवदीयमाह्निकंभवदाज्ञारूपंकर्म मयाकर्तव्यं।तत्स्वीकुर्वित्यर्थः। यद्वा दैवं देवाराधनभूतं। आह्निकं अह्नानिर्वर्त्यमेकसुत्यात्मकंकर्मयज्ञात्मकं । कर्तव्यमित्यर्थः ।।२।। परमोदारं परमगंभीरमित्यर्थः। कृतोदकौ कृतार्घ्यप्रक्षेपौ । यद्वा कृतदेवार्षितर्पणौ। जप्यतइति जपः तं। गायत्रीमितियावत् । तस्याएवपरमत्वात्। "नसावित्र्याःपरंजप्यं"इतिवचनात् ॥ ३ ॥ अह्निभवमाह्निकं। कालाट्ठञ्। कृतप्रातःकृत्यावित्यर्थः। संध्योपासनब्रह्मयज्ञसमिदाधानानिप्रातःकृत्यानि । अभितस्थतुः अभिमुखंस्थितौ ॥४॥ ततः तस्माद्देशात्। प्रयातौ तत्र प्रसिद्धे। सरय्वाःसङ्गमे त्रिपथगां गङ्गां नदीं ददृशाते ॥ ५ ॥ तत्र गङ्गासरय्वोःसंगमे। ददृशातेइत्यनुषज्यते । तप्यतां तपतां । कर्तरियत्छान्दसः ॥ ६ ॥ ७ ॥ वसते वसति ॥ ८॥ प्रश्नमाधुर्यात्प्रहासः । यद्वा मानुषभावनटनात् । यस्यायमाश्रमः सश्रूयतामितियोजना । रामेतिसंबोधनं प्राधान्यात् ॥९॥ कंदर्पइत्यर्धं । यःकामइत्युच्यते सकन्दर्पः । पुरामूर्तिमानासीत् ॥ १० ॥ सार्धश्लोकः। तपस्यन्तं तपश्चरन्तम् । "कर्मणोरोमन्थतपोभ्यांवर्तिचरोः"इतिक्यङ्। इह आआ-

---

ति० प्रहस्य बालकवचनश्रवणजसंतोषाद्धासः ॥ ९ ॥ ती० कंदर्पःकुत्सितदर्पः ॥१०॥ ती० कृतोद्वाहंकरिष्यमाणोद्वाहं । यद्वाकृतोद्वाहंगच्छन्तंउद्वाहंकुलागमिष्यन्तं । वर्तमानसामीप्येभविष्यतिलट् । शि० कृतोद्वाहं कृतः उदि नराकृतिद्विभुजपरमात्मा-

[पा०] १ ख. ग. घ. नृपात्मजौ. २ ङ. झ. यातिसंहृष्टौ. क. ज. योपसंहृष्टौ. ३ क—घ. च. छ. ज. ञ. ट. गमनायोप. ४ ग. ङ. झ. ञ. प्रयान्तौ. ५ क—घ. मय्यतेजसाम्. ङ. च. छ. झ. ञ. भावितात्मनाम्. ६ च. ञ. तपतां. ७ ख. ज. ऊचतुस्तौ. ख. ऊचतुस्तौमहात्मानौ. ८ इदमर्धं ख. दृश्यते.

अवदग्धस्य[1] रौद्रेण चक्षुषा रघुनन्दन ॥ व्यशीर्यन्त शरीरात्स्वात्सर्वगात्राणि दुर्मतेः ॥ १२ ॥
तस्य[2] गात्रं हतं तत्र निर्दग्धस्य महात्मना[3] ॥ अशरीरः कृतः कामः क्रोधाद्देवेश्वरेण[4] हि ॥ १३ ॥
अनङ्ग इति विख्यातस्तदाप्रभृति राघव ॥ स चाङ्गविषयः श्रीमान्यत्राङ्गं प्रमुमोच[5] ह ॥ १४ ॥
तस्यायमाश्रमः पुण्यस्तस्येमे मुनयः पुरा ॥ शिष्या धर्मपरा[6] नित्यं तेषां पापं न विद्यते ॥ १५ ॥
इहाद्य[7] रजनीं राम वसेम[8] शुभदर्शन ॥ पुण्ययोः सरितोर्मध्ये श्वस्तरिष्यामहे वयम् ॥ १६ ॥
अभिगच्छामहे सर्वे शुचयः पुण्यमाश्रमम् ॥ इह वासः परोऽस्माकं सुखं वत्स्यामहे निशाम् ॥
स्नाताश्च कृतजप्याश्च हुतहव्या नरोत्तम[9] ॥ १७ ॥
तेषां संवदतां तत्र तपोदीर्घेण चक्षुषा ॥ विज्ञाय परमप्रीता मुनयो हर्षमागमन् ॥ १८ ॥
अर्घ्यं पाद्यं तथाऽऽतिथ्यं निवेद्य कुशिकात्मजे ॥ रामलक्ष्मणयोः पश्चादकुर्वन्नतिथिक्रियाम् ॥१९॥
सत्कारं समनुप्राप्य[10] कथाभिरभिरञ्जयन् ॥ यथार्हमजपन्सन्ध्यामृषयस्ते[11] समाहिताः ॥ २० ॥
तत्रवासिभिरानीता[12] मुनिभिः सुव्रतैः सह ॥ न्यवसन्सुसुखं तत्र कामाश्रमपदे तदा[13] ॥ २१ ॥

श्रमे तपस्यन्तं । नियमेन अविच्छेदेन । समाहितं समाधिमन्तं । कृतोद्वाहं कृतपार्वतीपरियणं । गच्छन्तं शुश्रूषणार्थंपार्वतींप्राप्नुवन्तं । देवेशं स्थाणुंरुद्रं । दुर्मेधाः कामोधर्षयामास । कृतोद्वाहमितिक्रियाविशेषणं । यदाऽयंकृतोद्वाहोभवति तदातं पार्वत्यांसाभिलाषचित्तमकरोदित्यर्थः । समरुद्गणमित्यपिक्रियाविशेषणं । तदनुमतिपूर्वकमित्यर्थः । महात्मनाहुंकृतश्चासीत् ॥ ११ ॥ व्यशीर्यन्तविशीर्णानि । शॄहिंसायांकर्तरिश्यन् ॥ १२ ॥ तत्र तदा । महात्मनानिर्दग्धस्यशरीरंहतं । अतःकामोशरीरःकृतः ॥ १३ ॥ कामस्तदाप्रभृतिअनङ्गइतिविख्यातः सोङ्गविषयः अङ्गदेशश्च विख्यातः । तत्रहेतुमाह—यत्रेति । यस्मात्कारणादत्रकामोङ्गंमुमोच तस्मादयंदेशोङ्गइत्युच्यतइत्यर्थः ॥ १४ ॥ तस्य कामस्य स्थाणोर्वा । अयमाश्रमःइमेमुनयः तस्य। पुरा पूर्वकालमारभ्य । सन्तःनपरंपरयाशिष्याः । अतएवधर्मपराः । अतएवचतेषांपापंनविद्यते । पूर्वंरुद्रशिष्यत्वेऽपिसंप्रतितच्छिष्यत्वकृतपापंनविद्यतइत्यर्थः । एतेनप्रश्नद्वयस्याप्युत्तरमुक्तं । हिमवतितपस्यन्तंकामोऽधर्षयदित्युक्तिःपुराणान्तरे कल्पान्तरमपेक्ष्य ॥ १५ ॥ इह अङ्गविषये । तरिष्यामहे । गङ्गामितिशेषः ॥ १६ ॥ स्नाताः । अतएवशुचयोभूत्वापुण्यमाश्रममभिगच्छामहे । व्यत्ययात्तङ् ॥ १७ ॥ तेषांसंवदतां तेषुसंवदत्सु । तपसा दीर्घेण विप्रकृष्टार्थग्रहणसमर्थेन । चक्षुषा ज्ञानेन । विज्ञाय दृष्ट्वा । तेषामागमनंताटकादिनिरासनिमित्तंतपोजन्यज्ञानेनविदित्वेत्यर्थः । हर्षं हर्षपुलकं ॥ १८ ॥ अर्घ्यं पूजार्थमुदकं । पाद्यं पादार्थमुदकं "पादार्घाभ्यां च"इतियत्प्रत्ययः । आतिथ्यं आचमनीयपूर्वकंभोज्यप्रदानं । अतिथिक्रियां अतिथिपूजां ॥ १९ ॥ सत्कारं कुशलप्रश्नादिकं । विश्वामित्रात्समनुप्राप्य अभिरञ्जयन् अभ्यरञ्जयन् । अतिथिभूतानितिशेषः। क्रमेण सायंसन्ध्यागमेसति । ते तद्वासिनोविश्वामित्रादयश्च । छत्रिन्यायेनऋषयइत्युक्तं । समाहिताः अनन्यपराः । सन्ध्यां अहोरात्रयोःसंधिं । अत्यन्तसंयोगे द्वितीया । यथार्हं यथायोग्यं । यथाशक्तीतियावत् । "सहस्रपरमांदेवींशतमध्यांदशावरां"इतिवचनात् । अजपन् गायत्रीमितिशेषः ॥ २० ॥ आनीताः निद्रायैस्वाश्रमंप्रा-

रघुनाथविचारे वाहः प्रयत्नोयेनतं । उच्छब्दस्यपरमात्मवाचकत्वमुपनिषत्सुप्रसिद्धं । तदर्थस्तु उद्यते तात्पर्यवृत्त्यावेदैःप्रतिपाद्यते असाविति । वि० कृतोद्वाहं समाधेःकृतव्युत्थानं कालोचितविलासदेशंगच्छन्तं ॥ ११ ॥ ति० रुद्रेण ज्ञातापराधेन । अवध्यातो दृष्टश्च । शि० अथ हुंकारानन्तरं । कामइतिशेषः ॥ १२ ॥ शि० उपलक्षणविधयारामलक्ष्मणयोरपिसांध्यप्रवृत्तिर्बोध्या ॥२०॥ इतित्रयोविंशस्सर्गः ॥ २३ ॥

[पा०] १ क. ङ—ञ. अवध्यातस्य. ग. घ. दग्धस्यतस्यरौद्रेण. ख. ङ. झ. ट. अवदग्धस्तुरुद्रेण. च. छ. झ. अवध्यातश्चरुद्रेण. २ च. छ. ञ. तस्याङ्गान्यपतन्नाम. ३ झ. महात्मनः. ४ ख. क्रोधाद्देवेनचक्षुषा. ५ क. ख. ग. ङ—ञ. समुमोच. ६ ख. ङ. छ—ट. वीर. क. वीराः. च. धीराः. ७ क. इहैवसत्कृता. ८ ट. वत्स्यामः. ९ इदमर्धं च—ट. दृश्यते. १० ज. प्रथमंप्राप्य. ११ ख. घ. ट. न्सन्ध्यांमुनयस्ते. १२ छ. रासीनाः. १३ ज. झ. तथा.

कथाभिरभिरामाभिरभिरामौ नृपात्मजौ ॥ रमयामास धर्मात्मा कौशिको मुनिपुङ्गवः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ॥ २४ ॥

प्रातःकृताह्निकैर्विश्वामित्रादिभिस्त्रिभिर्गङ्गातरणायनौकारोहणेनप्रस्थानम् ॥ १ ॥ मध्येगङ्गंतुमुलजलघोषश्राविणारामेण-विश्वामित्रंप्रतितत्कारणप्रश्नः ॥ २ ॥ तंप्रतितेनसरयूत्पत्तिप्रकारकथनपूर्वकंतस्यमहाशब्दस्यतदीयत्वकथनम् ॥ ३ ॥ गङ्गामु-त्तीर्यदक्षिणतीरंगतेषुतेषुविश्वामित्रेणरामंप्रतितत्रत्यमहावनप्रदेशस्यपुरामलदकरूशदेशत्वकथनपूर्वकंतयोस्तत्पदप्रवृत्तिनिमित्त-कथनम् ॥ ४ ॥ तथातयोर्जनपदयोस्ताटकयाविध्वंसननिवेदनपूर्वकंतद्ध्वंसनचोदनम् ॥ ५ ॥

ततः प्रभाते विमले कृत्वाऽऽह्निकमरिंदमौ ॥ विश्वामित्रं पुरस्कृत्य नद्यास्तीरमुपागतौ ॥ १ ॥
[1]ते च सर्वे महात्मानो मुनयः संशितव्रताः ॥ उपस्थाप्य [2]शुभां [3]नावं विश्वामित्रमथाब्रुवन् ॥ २ ॥
आरोहतु भवान्नावं राजपुत्रपुरस्कृतः ॥ अरिष्टं गच्छ पन्थानं मा भूत्[4]कालविपर्ययः ॥ ३ ॥
विश्वामित्रस्तथेत्युक्त्वा [5]तानृषीनभिपूज्य च ॥ ततार सहितस्ताभ्यां सरितं सागरंगमाम् ॥ ४ ॥
[6]ततः शुश्राव वै शब्दमतिसंरंभवर्धितम् ॥ [7]मध्यमागम्य तोयस्य सह रामः कनीयसा ॥ ५ ॥
अथ रामः सरिन्मध्ये पप्रच्छ मुनिपुङ्गवम् ॥ वारिणो भिद्यमानस्य किमयं तुमुलो ध्वनिः ॥ ६ ॥
[8]राघवस्य वचः श्रुत्वा कौतूहल[9]समन्वितः ॥ कथयामास धर्मात्मा तस्य शब्दस्य निश्चयम् ॥ ७ ॥
कैलासपर्वते राम मनसा निर्मितं [10]सरः ॥ ब्रह्मणा नरशार्दूल तेनेदं मानसं सरः ॥ ८ ॥
तस्मात्सुस्राव सरसः साऽयोध्यामुपगूहते ॥ सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता ॥ ९ ॥

पिता: । कामाश्रमपदे कामदाहात्कामाश्रमनामकस्य पदे स्थाने ॥ २१ ॥ कथाभिः तदाश्रमवैभवपराभिः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायण-भूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रयो-विंशः सर्गः ॥ २३ ॥

एवं कामाश्रमपदं रामचरणनलिनविन्यासेनकृतार्थीकृत्य ताटकावनमपिनिष्कल्मषीकर्तुं रामंप्रापयतिमुनिश्चतुर्विंशे—ततइत्यादि । विमले सूर्योदयेइत्यर्थः । नद्याःगङ्गायाः ॥ १ ॥ उपस्थाप्य आनाय्य ॥ २ ॥ राजपुत्राभ्यांपुरस्कृतः पूजितः । ताटकावधाभिप्रायेणाहुः—अरिष्टमिति । अरिष्टं शुभंयथाभवतितथा । "अरिष्टंपापशुभयोः"इतिहलायुधः । कालविपर्ययः कालविलंब इतियावत् ॥ ३ ॥ ततार तरितुंप्रवृत्तः । सरितं गङ्गां सागरंगच्छतीतिसागरंगमां । खश्प्रकरणे"गमेस्सुप्युपसंख्यानं"इतिखश् ॥ ४ ॥ अतिसंरंभेण तरङ्गपरस्परसंघट्टजक्षोभेण । वर्धितं अतिप्रवृद्धं ॥ ५ ॥ भिद्यमानस्य परस्परंमिलितस्य । वारिणः । तुमुलः निबिडोयं ध्वनिः । किंवारिसंभेदकृतउतान्यकृतइतिप्रश्नः ॥ ६ ॥ निश्चयं कारणनिश्चयं ॥ ७ ॥ अस्यध्वनेःकारणंवारिसंभेदएवेतिवक्ष्यन्कस्यावारिणइतिप्रक्ष्यतीतिमत्वासरय्वाइतिवक्तुंसरयूवैभवमाह—कैलासेति । कैलासपर्वते कुबेरभवने । ब्रह्मणामनसानिर्मितंसरोस्ति । तेन मनसानिर्मितत्वेन । इदंसरः मानसमित्युच्यते ॥ ८ ॥ उपगूहते आवृत्यप्रवहते । अयोध्यायाःपश्चिमभागमा-

---

शि० विमले समूलमलनिवर्तकगङ्गाजले ॥ १ ॥ **शि०** अरिष्टंनिर्विघ्नंयथाभवतितथापन्थानंगच्छ ॥ ३ ॥ **ति०** सागरंगमां सागरंगच्छति जलपूर्णत्वरूपस्वरूपंप्रापयति तां । अन्तर्भावितण्यर्थः । अगस्त्यशोषितस्यसमुद्रस्यगङ्गयापूरणंकृतमितिप्रसिद्धेः ॥ ४ ॥ **ति० वि०** पुण्यत्वेहेतुर्ब्रह्मसरश्च्युतत्वं ॥ ९ ॥

[पा०] १ ट. तेतुसर्वे. २ च. छ. ञ. शिवां. ३ ख. ट. शुभांनावं. ४ क—छ. झ. ञ. त्कालस्यपर्ययः. ५ ङ. च. झ. ञ. तानृषीन्प्रति. ६ ङ. झ. तत्रशुश्राववैशब्दंतोयसंरंभवर्धितम्. च. छ. ञ. ततश्शुश्रुवतुश्शब्दंतोयसंरंभवर्धितम्. क. ततश्शुश्रावतंशब्दंनद्यास्संरंभवर्धितम्. ज. ततश्शुश्रुवतुश्शब्दंनद्यास्संरंभवर्धितम्. ग. घ. ततश्शुश्रावतंशब्दमतिसंरंभवर्धितम्. ख. ततश्शुश्रावखेशब्दमतिसंरंभवर्धितम्. ७ ङ—ट. तोयस्यतस्यशब्दस्यनिश्चयम् । ज्ञातुकामोमहातेजास्सहरामःकनीयसा. ८ रामस्यवचनं. ९ क. ग—छ. झ. ञ. ट. समन्वितम्. १० ङ. झ. वरम्.

तस्यायमतुलः शब्दो जाह्नवीमभिवर्तते ॥ वारिसंक्षोभजो राम प्रणामं नियतः कुरु ॥ १० ॥
ताभ्यां तु तावुभौ कृत्वा प्रणाममतिधार्मिकौ ॥ तीरं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ ॥ ११ ॥
स वनं घोरसंकाशं दृष्ट्वा नृपवरात्मजः ॥ अविप्रहतमैक्ष्वाकः पप्रच्छ मुनिपुङ्गवम् ॥ १२ ॥
अहो वनमिदं दुर्गं झिल्लिकागणनादितम् ॥ भैरवैः श्वापदैः पूर्णं शकुन्तैर्दारुणारुतैः ॥ १३ ॥
नानाप्रकारैः शकुनैर्वाश्यद्भिर्भैरवैः स्वनैः ॥ सिंहव्याघ्रवराहैश्च वारणैश्चोपशोभितम् ॥ १४ ॥
धवाश्वकर्णककुभैर्मरुतिन्दुकपाटलैः ॥ संकीर्णं बदरीभिश्च किं न्वेतद्दारुणं वनम् ॥ १५ ॥
तमुवाच महातेजा विश्वामित्रो महामुनिः ॥ श्रूयतां वत्स काकुत्स्थ यस्यैतद्दारुणं वनम् ॥ १६ ॥
एतौ जनपदौ स्फीतौ पूर्वमास्तां नरोत्तम ॥ मलदाश्च करूशाश्च देवनिर्माणनिर्मितौ ॥ १७ ॥
पुरा वृत्रवधे राम मलेन समभिप्लुतम् ॥ क्षुधा चैव सहस्राक्षं ब्रह्महत्या समाविशत् ॥ १८ ॥
तमिन्द्रं स्नापयन्देवा ऋषयश्च तपोधनाः ॥ कलशैः स्नापयामासुर्मलं चास्य प्रमोचयन् ॥ १९ ॥
इह भूम्यां मलं दत्वा दत्वा कारूशमेव च ॥ शरीरजं महेन्द्रस्य ततो हर्षं प्रपेदिरे ॥ २० ॥
निर्मलो निष्करूशश्च शुचिरिन्द्रो यदाऽभवत् ॥ ददौ देशस्य सुप्रीतो वरं प्रभुरनुत्तमम् ॥ २१ ॥

रभ्यउत्तरदिग्भागेन पूर्वभागमागत्याङ्गदेशेगङ्गयासह्युज्यतेसरयूः । तयोर्नद्योःसंभेदेस्थाण्वाश्रमः । तस्मात् सरयूयुक्तगङ्गातरणदशायांसरयूजलमुन्नतात्भागीरथ्यांपततीतितस्यध्वनिरितिज्ञेयं।सरयूशब्दंनिर्वक्ति—सरइति। सरसोयौतीतिसरयूः। पाठान्तरंसरसोयातीतिसरयूः।सकारस्य शकन्ध्वादित्वात्पररूपं "ऊङुतः"इति स्त्रीप्रत्ययऊकारः। कस्मात्सरसइत्यतआह्—ब्रह्मसरश्च्युतेति ॥९॥ यागङ्गामभिवर्तते गङ्गयासंयुज्यते । अयमतुलःशब्दःतस्याःवारिसंक्षोभजः। सन्धिरार्षः । नियतः नियतमनस्कःसन् । ताभ्यांनदीभ्यां । प्रणामं कुरु । कोयंध्वनिरितिरामेणपृष्टे सरयूवारिसंघट्टजइतिवक्तव्ये तदुत्पत्तिकथनंनन्तव्यत्वाय ॥१०॥ नदीसंभेदेरात्रिमुषित्वाप्रातर्दक्षिणाभिमुखागङ्गांतेरुः । ततोगङ्गादक्षिणतीरेताटकावनमितिज्ञेयं ॥ ११ ॥ संकाशतइति संकाशः। घोरसंकाशं घोररूपमितियावत् । अविप्रहतं अक्षुण्णं जनसंचाररहितमित्यर्थः ॥१२॥ अहोइत्यादिश्लोकत्रयं । झिल्लिका भूतलाद्यन्तरितकीटविशेषः । भैरवैः भयंकरैः । श्वापदैः क्रूरमृगैः । शकुन्तैः भासैः । "शकुन्तौभासपक्षिणौ" इत्यमरः । शकुनैः पक्षिभिः। वाश्यद्भिः कुत्सितंशब्दायमानैः। धवः अश्वकर्णः ककुभः मरुतिन्दुकः पाटलः इदंवनमेतादृशं । अहोइदंवनंदारुणं। किंनु किंनामकमित्यन्वयः ॥ १३ ॥ १४ ॥ ॥ १५ ॥ एतद्दारुणंवनं यस्यप्राणिनः सश्रूयतामिति योजना ॥१६॥ स्फीतौ प्रवृद्धधनधान्यौ । मलदाश्च करूशाश्च मलदकरूशनामधेयौ । अवयवबहुत्वाद्बहुवचनं मत्स्याःपाञ्चालाइतिवत् । देवनिर्माणेन देवनिर्माणतुल्यनिर्माणेन । निर्मितौ देवलोकसमसंस्थानावित्यर्थः ॥ १७ ॥ मलदकरूशसंज्ञानिमित्तमाह्—पुरेत्यादि । वृत्रवधेकृतेसति मलेन अशुचित्वेन क्षुधा बुभुक्षयाच समभिप्लुतं व्याप्तं इन्द्रं ब्रह्महत्या समाविशत् । ब्रह्महत्यावशेनमलक्षुधाविन्द्रस्याभूतामित्यर्थः ॥ १८ ॥ स्नापयन् गङ्गादितीर्थेषुस्नापयन् । पुनर्मन्त्रपूतैः कलशैः कलशोदकैः। स्नापयामासुः। तेन स्नापनेन। अस्य इन्द्रस्य । मलं चकारात्कारूशं । प्रमोचयन् प्रामोचयन् ॥ १९ ॥ करूशमेवकारूशं । स्थानप्रमाणात् । क्षुधमित्यर्थः ॥ २० ॥ शुचिः ब्रह्महत्यातःपूतः ॥ २१ ॥

शि० तस्येतिसामान्येनपुंसकं ॥ १० ॥ **शि०** किं किंनामकंकिंस्वामिकंचेत्यर्थः । तुश्चार्थे ॥ १५ ॥ **तीर्था०** मलदाश्चकरूशाश्चेतिबहुवचनंआपोदाराइतिवच्छन्दस्स्वभावकृतं ॥ १७ ॥

[पा०] १ ख. ङ. झ. ट. नरवरात्मजः. २ ङ—ञ. संयुतम्. ३ ख. ग. ङ. च. छ. झ. ञ. कीर्णं. ४ क. च. छ. ञ. दारुणस्वनैः. ङ. झ. दारुणारवैः. ज. ट. दारुणैरुतैः. ५ ङ. च. छ. झ. ञ. श्चापिशोभितम्. क. रुपशोभितम्. ६ क. ख. ग. ङ. च. छ. झ. ञ. बिल्वतिन्दुक. ७ ट. किंत्वेतत्. ग. ङ. झ. किंन्विदं. ८ ङ. झ. मलिनंदेवाः. ९ क. ग. च. छ. ञ. सोस्मिन्देशेमलंत्यक्त्वा. १० ङ. झ. देवाः. ११ क. च. छ. ञ. वृत्रारिर्द्रोहसंभूतंततोहर्षमवाप्तवान्. १२ ङ. झ. शुद्धइन्द्रोयथा. १३ ङ. च. छ. झ. ञ. ततोदेशस्यसुप्रीतोवरंप्रादादनुत्तमम्.

इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः ॥ मलदाश्च करूशाश्च ममाङ्गमलधारिणौ ॥ २२ ॥
साधुसाध्विति तं देवाः पाकशासनमब्रुवन् ॥ देशस्य पूजां तां दृष्ट्वा कृतां शक्रेण धीमता ॥२३॥
एतौ जनपदौ स्फीतौ दीर्घकालमरिंदम ॥ मलदाश्च करूशाश्च मुदितौ धनधान्यतः ॥ २४ ॥
कस्यचित्त्वथ कालस्य यक्षी वै कामरूपिणी ॥ बलं नागसहस्रस्य धारयन्ती तदा ह्यभूत् ॥
ताटका नाम भद्रं ते भार्या सुन्दस्य धीमतः ॥ २५ ॥
मारीचो राक्षसः पुत्रो यस्याः शक्रपराक्रमः ॥ २६ ॥
वृत्तबाहुर्महावीर्यो विपुलास्यतनुर्महान् ॥ राक्षसो भैरवाकारो नित्यं त्रासयते प्रजाः ॥ २७ ॥
इमौ जनपदौ नित्यं विनाशयति राघव ॥ मलदांश्च करूशांश्च ताटका दुष्टचारिणी ॥ २८ ॥
सेयं पन्थानमावार्य वसत्यध्यर्धयोजने ॥ अतएव च गन्तव्यं ताटकाया वनं यतः ॥ २९ ॥
स्वबाहुबलमाश्रित्य जहीमां दुष्टचारिणीम् ॥ मन्नियोगादिमं देशं कुरु निष्कण्टकं पुनः ॥ ३० ॥
न हि कश्चिदिमं देशं शक्नोत्यागन्तुमीदृशम् ॥ यक्षिण्या घोरया राम उत्सादितमसह्यया ॥ ३१ ॥
एतत्ते सर्वमाख्यातं यथैतद्दारुणं वनम् ॥ यक्ष्या चोत्सादितं सर्वमद्यापि न निवर्तते ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ॥ २५ ॥

विश्वामित्रेणरामंप्रति उत्पत्तिप्रभृतिताटकावृत्तान्तकथनम् ॥ १ ॥ तथाब्रह्मवरात्तस्याइतरावध्यत्वकथनेनस्त्रीवधस्यकर्तव्यत्वेपुरावृत्तदृष्टान्तीकरणपूर्वकंतद्वधविधानम् ॥ २ ॥

अथ तस्याप्रमेयस्य मुनेर्वचनमुत्तमम् ॥ श्रुत्वा पुरुषशार्दूलः प्रत्युवाच शुभां गिरम् ॥ १ ॥

वरमेवाह—इमाविति । मलंद्यतिखण्डयतीतिमलदः "अन्येभ्योपिदृश्यते"इतिखच् । करूशमस्यास्तीतिकरूशः। अङ्गमलधारिणौ करूशस्याप्युपलक्षणमिदम्।एतौममाङ्गमलकरूशधारणान्मलदाःकरूशाश्चेतिख्यातिं गमिष्यतइत्यर्थः ॥२२॥२३॥ अतइत्यादावध्याहार्यम् ॥ २४ ॥ एवंपालनीयत्वायदेशस्यपुण्यत्वमुक्त्वातत्स्यदारुणत्वेहेतुमाह—कस्यचिदिति । अर्धत्रयम् । कस्मिंश्चित्कालेगतेसति । तदा जन्मकालएव । नागसहस्रस्य गजसहस्रस्य । बलंधारयन्तीताटकानामयक्षी अभूत् । ते तुभ्यं । भद्रमस्तु । ताटकातोभयंमाभूदित्यर्थः ॥ २५ ॥ मारीचइत्यर्धम् ॥ २६ ॥ अत्रयइतिशेषः । यःप्रजाःनित्यंत्रासयतेसमारीचोयस्याःपुत्रःसायक्षीअभूदितिपूर्वेणान्वयः ॥ २७ ॥ अस्तुताटका किंततस्तत्राह—इमाविति ॥ २८ ॥ आवार्य आवृत्य। यतःयस्मिन्मार्गे । ताटकायाःवनं । अतएवमार्गेणगन्तव्यं ॥ २९ ॥ निष्कण्टकं निरुपद्रवम् ॥ ३० ॥ ईदृशं अतीवपुण्यं। असह्यया इतरैरजेयया ॥ ३१ ॥ यथा येनप्रकारेण । दारुणं यथाच उत्सादितं निर्जनीकृतं । यथाचोत्सादनान्ननिवर्तते तदेतत्सर्वमाख्यातमितियोजना ॥३२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुर्विंशःसर्गः ॥ २४ ॥

स्त्रियाअपिसर्वलोकविनाशिन्यावधे नदोषइत्याह-

ति० । ताटकानाम तेभद्रं प्रथमशौर्यस्थानत्वेनशौर्यप्रसिद्धिकरत्वरूपंभद्रत्वमस्याइतिबोध्यं ॥२५॥ ती० पन्थानमावृत्य । अतएवन गन्तव्यं । अतस्ताटकानिरसनात्पूर्वंगन्तुमशक्यत्वान्नगन्तव्यमित्युक्तिः । अतएवचगन्तव्यमितिक्वचित्पाठः ॥२९॥ शि० मन्नियोगादित्युक्त्यास्त्रियंनहनिष्यामीतिप्रत्युत्तरंत्वयानवक्तव्यमितिहेतुर्ध्वनितः ॥३०॥ ती० उत्सादितं विजनीकृतं ॥३१॥ इतिचतुर्विंशस्सर्गः२४

शि० अथ मङ्गलमूलंवचनंश्रुत्वा ॥ १ ॥

[पा०] १ च. छ. झ. ञ. ट. मुदिताः. २ ङ. च. छ. झ. ञ. यक्षिणी. ३ क. ङ. च. छ. झ. ञ. ट. महाशीर्षो. ४ ङ—ट. मावृत्य. ५ क. प्रति. च. छ. ततः. ६ क. मासाद्य. ७ ङ. च. छ. झ. ञ. शक्तोह्यागन्तु. ८ ग. ज. ट. यदेतत्. घ. यथैतत्.

अल्पवीर्या यदा यक्षाः श्रूयन्ते मुनिपुङ्गव ॥ कथं नागसहस्रस्य धारयत्यबला बलम् ॥ २ ॥
[इत्युक्तवचनं श्रुत्वा राघवस्यामितौजसः ॥ हर्षयञ्श्लक्ष्णया वाचा सलक्ष्मणमरिंदमम् ॥ ३ ॥]
विश्वामित्रोऽब्रवीद्वाक्यं शृणु येन बलोत्तरा ॥ वरदानकृतं वीर्यं धारयत्यबला बलम् ॥ ४ ॥
पूर्वमासीन्महायक्षः सुकेतुर्नाम वीर्यवान् ॥ अनपत्यः शुभाचारः स च तेपे महत्तपः ॥ ५ ॥
पितामहस्तु संप्रीतस्तस्य यक्षपतेस्तदा ॥ कन्यारत्नं ददौ राम ताटकां नाम नामतः ॥ ६ ॥
ददौ नागसहस्रस्य बलं चास्याः पितामहः ॥ न त्वेव पुत्रं यक्षाय ददौ ब्रह्मा महायशाः ॥ ७ ॥
तां तु जातां विवर्धन्तीं रूपयौवनशालिनीम् ॥ जंभपुत्राय सुन्दाय ददौ भार्यां यशस्विनीम् ॥ ८ ॥
कस्य चित्त्वथ कालस्य यक्षी पुत्रमजायत ॥ मारीचं नाम दुर्धर्षं यः शापाद्राक्षसोऽभवत् ॥ ९ ॥
सुन्दे तु निहते राम सागस्त्यं मुनिपुङ्गवम् ॥ ताटका सह पुत्रेण प्रधर्षयितुमिच्छति ॥ १० ॥
भक्षार्थं जातसंरंभा गर्जन्ती साऽभ्यधावत ॥ ११ ॥
आपतन्तीं तु तां दृष्ट्वा अगस्त्यो भगवानृषिः ॥ राक्षसत्वं भजस्वेति मारीचं व्याजहार सः ॥ १२ ॥
अगस्त्यः परमक्रुद्धस्ताटकामपि शप्तवान् ॥ १३ ॥
पुरुषादी महायक्षी विरूपा विकृतानना ॥ इदं रूपं विहायाथ दारुणं रूपमस्तु ते ॥ १४ ॥
सैषा शापकृतामर्षा ताटका क्रोधमूर्च्छिता ॥ देशमुत्सादयत्येनमगस्त्यचरितं शुभम् ॥ १५ ॥
एनां राघव दुर्वृत्तां यक्षीं परमदारुणाम् ॥ गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमाम् ॥ १६ ॥
न ह्येनां शापसंस्पृष्टां कश्चिदुत्सहते पुमान् ॥ निहन्तुं त्रिषु लोकेषु त्वामृते रघुनन्दन ॥ १७ ॥

पञ्चविंशे—अथेत्यादि । अप्रमेयस्य अप्रमेयप्रभावस्य ॥१॥ यदा यस्मात् । यदायत्रादर्गोहेतावपि मुनिभिःप्रयुज्यन्ते । यस्माच्छ्रूयन्ते तस्मात् अबला स्त्री । कथं नागसहस्रस्यबलंधारयति ॥ २—३ ॥ येनहेतुनाबलोत्तराभवति तंशृणु । तस्यावरदानकृतंवीर्यबलमस्ति अतोऽबलापिबलंधारयति ॥ ४ ॥ वरदानप्रकारमाह—पूर्वमित्यादि ॥ ५ ॥ नामप्रसिद्धौ ॥ ६ ॥ यक्षाय सुकेतवे ॥ ७ ॥ विवर्धतीं विवर्धमानां । भार्यां ददौ भार्यात्वेनददौ ॥ ८ ॥ कस्मिंश्चित्कालेगतेसति अजायत अजनयत् ॥ ९ ॥ शापप्रकारमाह—सुन्देत्विति । निहते अगस्त्येनेतिशेषः । प्रधर्षयितुंहन्तुं । इच्छति ऐच्छत् ॥ १० ॥ जातसंरंभा स्वभर्तृवधजनितकोपा । अतएवभक्षार्थमभ्यधावत । अर्धं ॥ ११—१२ ॥ अगस्त्यइत्यर्धं ॥ १३ ॥ पुरुषादी मनुष्यभक्षिणी । त्वमिदंरूपंविहायपुरुषादीत्यादिविशेषणयुक्ताभव । अथते दारुणं क्रूरं । रूपं शरीरंअस्तु ॥ १४ ॥ अगस्त्यचरितं तदानीमितिशेषः ॥१५॥ जहि नाशय ॥ १६ ॥ शाप-

---

ति० यदा यतः । यक्षी यक्षजातिः । श्रूयते पुराणादावितिशेषः । अबलेतिसाभिप्रायं । शि० यदा यतः । यक्षी ताटका । अबलाश्रूयते भवदुक्त्याज्ञायते । अतः अल्पवीर्याभवितुमर्हतीतिशेषः । अतः नागसहस्रस्यबलंकथंधारयति ॥ २ ॥ ती० अत्र बलमात्रेप्युत्तरत्वेनवक्तव्ये वीर्यस्याभिधानं वीर्यशौर्यादयोऽन्येपिगुणाःसन्तीतिज्ञापयितुं ॥ ४ ॥ वि० तदभिसंहितगुणवतापुत्रेणात्यन्तजनपीडाभवेदितिविचार्यपुत्रंनददौ ॥ ७ ॥ शि० जंभपुत्रायेत्यत्रखञ्जुपुत्रायेतिपाठः । अत्रपाठे खञ्जूरितिजंभस्यैवनामान्तरंबोध्यं । असुरयक्षयोर्देवयोनित्वेनउचितःसंबन्धइतिनागोजिभट्टाः ॥ ८ ॥

[पा०] १ क. ङ. च. छ. झ. ञ. यक्षीश्रूयते. २ अयंश्लोकः ङ. छ. झ. ञ. दृश्यते. ३ क. ख. तस्यतद्वचनंश्रुत्वा रामस्यविदितात्मनः. ४ ङ. च. छ. झ. ञ. बलोत्कटा. ५ क. सदाचारः. ६ क. ख. ग. ङ. च. छ. झ. ञ. सुप्रीतः. ७ ङ. च. छ. झ. ञ. बालां. ख. कन्यां. ८ च. कुंभपुत्राय. क–घ. झर्झपुत्राय. छ. गर्गपुत्राय. ९ ङ. झ. ददौचासौ. च. छ. ञ. ददौचास्यै. १० क. ग—छ. झ. ञ. ट. पुत्रंव्यजायत. ११ ङ. झ. अगस्त्यमृषिसत्तमम्. १२ ख. आपतन्तींतुतांदृष्ट्वापुनस्तस्यास्तमात्मजम् । क्रुद्धःकृशानुसंकाशोह्यगस्त्योभगवानभूत् । राक्षसत्वं. १३ ङ. च. छ. झ. ञ. परमामर्षः. १४ क. ख. ङ. च. छ. झ. ञ. विकृता. १५ क. रूपंविसृज्याथ. ख. रूपंपरित्यज्य. ग. घ. रूपमपाहाय. ङ. च. छ. झ. ञ. रूपंविहायाशु. १६ ङ. च. छ. झ. ञ. अगस्त्याचरितं. १७ ट. दुर्धर्षां. १८ ङ. च. छ. झ. ञ. संसृष्टां.

न हि ते स्त्रीवधकृते घृणा कार्या नरोत्तम ॥ चातुर्वर्ण्यहितार्थाय कर्तव्यं राजसूनुना ॥ १८ ॥
नृशंसमनृशंसं वा प्रजारक्षणकारणात् ॥ पातकं वा सदोषं वा कर्तव्यं रक्षता सताम् ॥ १९ ॥
राज्यभारनियुक्तानामेष धर्मः सनातनः ॥ अधर्म्यां जहि काकुत्स्थ धर्मो ह्यस्या न विद्यते ॥ २० ॥
श्रूयते हि पुरा शक्रो विरोचनसुतां नृप ॥ पृथिवीं हन्तुमिच्छन्तीं मन्थरामभ्यसूदयत् ॥ २१ ॥
विष्णुना च पुरा राम भृगुपत्नी दृढव्रता ॥ अनिन्द्रं लोकमिच्छन्ती काव्यमाता निषूदिता ॥२२॥
एतैश्चान्यैश्च बहुभी राजपुत्र महात्मभिः ॥ अधर्मसहिता नार्यो हताः पुरुषसत्तमैः ॥
तस्मादेनां घृणां त्यक्त्वा जहि मच्छासनान्नृप ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ॥ २६ ॥

रामेणस्वधनुष्टङ्कारश्रवणात्साट्टहासमागतायास्ताटकायामुनिचोदनयाहननम् ॥ १ ॥ ततोविश्वामित्रादिभिस्तस्मिन्वने तद्रात्र्यांसुखनिवासः ॥ २ ॥

मुनेर्वचनमक्लीबं श्रुत्वा नरवरात्मजः ॥ राघवः प्राञ्जलिर्भूत्वा प्रत्युवाच दृढव्रतः ॥ १ ॥
पितुर्वचननिर्देशात्पितुर्वचनगौरवात् ॥ वचनं कौशिकस्येति कर्तव्यमविशङ्कया ॥ २ ॥
अनुशिष्टोस्म्ययोध्यायां गुरुमध्ये महात्मना ॥ पित्रा दशरथेनाहं नावज्ञेयं च तद्वचः ॥ ३ ॥
सोहं पितुर्वचः श्रुत्वा शासनाद्ब्रह्मवादिनः ॥ करिष्यामि न संदेहस्ताटकावधमुत्तमम् ॥ ४ ॥
गोब्राह्मणहितार्थाय देशस्यास्य सुखाय च ॥ तव चैवाप्रमेयस्य वचनं कर्तुमुद्यतः ॥ ५ ॥

संस्पृष्टां शापयुक्ताम् ॥ १७ ॥ ते त्वया । घृणा जुगुप्सा । कर्तव्यं कर्मेतिशेषः ॥ १८ ॥ नृशंसं क्रूरकर्म । सदोषं सापवादंकर्म रक्षता राजपुत्रेण प्रजारक्षणकारणात्कर्तव्यं ॥ १९॥ सनातनः नित्यः। अधर्म्यां अधर्मादनपेतां । एतदेवाह—धर्मइति ॥२०॥ स्त्रीवधस्यकर्तव्यत्वे इतिहासद्वयमाह—श्रूयतइत्यादिना। मन्थरां मन्थराभिधानां ॥२१॥ काव्यमाता शुक्रमाता। इयंकथामत्स्यपुराणेदर्शिता। स्वपुत्रेशुक्रेदेवशिक्षार्थंरुद्रसमीपेतपस्यतिसतिदेवपीडिताअसुराःशुक्रमातरंभृगुपत्नींशरणमगच्छन् । साचासुररक्षणार्थंदेवान्हन्तुमुद्युक्ता। तांचेन्द्रप्रार्थितोविष्णुरासाद्यतस्याःशिरश्चिच्छेदेति ॥२२॥ एतैः एतादृशैरित्यर्थः ॥२३॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चविंशःसर्गः ॥ २५ ॥

अथताटकावधःषड्विंशे—मुनेरित्यादि । अक्लीबं धृष्टं ॥ १ ॥ पितुर्वचननिर्देशात् नियोगात् कौशिकवचनं त्वयाकर्तव्यमित्येवंरूपात् । पितृवचनगौरवात् बहुमानाच्च । इति उक्तप्रकारं कौशिकस्यवचनंकर्तव्यमितिमानसव्यापारः ॥ २ ॥ मुनिंप्रत्याह—अनुशिष्टइति ॥ ३ ॥ श्रुत्वास्थितः । सोहमित्यन्वयः ॥ ४ ॥ उद्यतः

ति० वाशब्दइवार्थे । अनृशंसमिव नृशंसंक्रूरमपिकार्यमित्यर्थः । रक्षतासदेति रक्षाधर्मसमृद्धिशेषत्वेनेतिभावः ॥ १९ ॥ **ति०** अनिद्रं निद्रासुखरहितं ॥ २२ ॥ **ति०** एतैः एतादृशैः । यद्वा आर्षंबहुत्वं । एताभ्यां शक्रविष्णुभ्यामित्यर्थः । मच्छासनादिति । यथापरशुरामस्यजमदग्नेर्गुरोराज्ञयामातृवधेपिनदोषः । तथा बलादिदातृत्वेनगुरोर्ममाज्ञयास्त्रीवधेतवनदोषइतिभावः ॥ २३ ॥ इतिपञ्चविंशस्सर्गः ॥ २५ ॥

ती० अक्लीबं महार्थं ॥ १॥ **ति०** तवचहिताय अस्यहितं स्वाज्ञापरिपालनेनसंतोषरूपं । **शि०** लोकस्य अस्मदृष्टिपथस्यास्य

[पा०] १ ङ. च. झ. ञ. हितार्थंहि. २ ग. ङ. झ. ट. सदा. ख. घ. सता. ३ झ. ञ. ह्यस्यां. ४ ख. मबलामभ्य. ५ ङ. च. छ. झ. ञ. पतिव्रता. ६ झ. अनिद्रं. ७ ख. ग. घ. एतैरन्यैश्च. ८ ङ. च. छ. झ. ञ. राजपुत्रैर्महा. ख. राजभिश्च. ९ क. ग. घ. निरता. १० इदमर्धं झ. दृश्यते. ११ ख. घ. ङ. च. छ. झ. ञ. नावज्ञेयंहि. १२ ङ. च. छ. झ. ञ. देशस्यचहिताय. ट. लोकस्यचहिताय.

एवमुक्त्वा धनुर्मध्ये बद्ध्वा मुष्टिमरिंदमः ॥ ज्याघोषमकरोत्तीव्रं दिशः शब्देन नोदयन् ॥ ६ ॥
[तस्य संरंभमालोक्य सभ्रातुर्मुनिपुङ्गवः ॥ स हर्षमतुलं लेभे रामं साध्विति चाब्रवीत् ॥ ७ ॥]
तेन शब्देन वित्रस्तास्ताटकावनवासिनः ॥ ताटका च सुसंक्रुद्धा तेन शब्देन मोहिता ॥ ८ ॥
तं शब्दमभिनिध्याय राक्षसी क्रोधमूर्च्छिता ॥ श्रुत्वा चाभ्यद्रवद्वेगाद्यतः शब्दो विनिःसृतः ॥९॥
तां दृष्ट्वा राघवः क्रुद्धां विकृतां विकृताननाम् ॥ प्रमाणेनातिवृद्धां च लक्ष्मणं सोऽभ्यभाषत ॥१०॥
पश्य लक्ष्मण यक्षिण्या भैरवं दारुणं वपुः ॥ भिद्येरन्दर्शनादस्या भीरूणां हृदयानि च ॥ ११ ॥
[एनां पश्य दुराधर्षां निर्भिन्नहृदयां क्षितौ ॥ शयानां शयने वीर धूतपापां भयावहाम् ॥ १२ ॥]
एनां पश्य दुराधर्षां मायाबलसमन्विताम् ॥ विनिवृत्तां करोम्यद्य हृतकर्णाग्रनासिकाम् ॥ १३ ॥
न ह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षिताम् ॥ वीर्यं चास्या गतिं चापि हनिष्यामीति मे मतिः ॥१४॥
एवं ब्रुवाणे रामे तु ताटका क्रोधमूर्च्छिता ॥ उद्यम्य बाहू गर्जन्ती राममेवाभ्यधावत ॥ १५ ॥
विश्वामित्रस्तु ब्रह्मर्षिर्हुङ्कारेणाभिभर्त्स्य ताम् ॥ स्वस्ति राघवयोरस्तु जयं चैवाभ्यभाषत ॥ १६ ॥
उद्धून्वाना रजो घोरं ताटका राघवावुभौ ॥ रजोमोहेन महता मुहूर्तं सा व्यमोहयत् ॥ १७ ॥
ततो मायां समास्थाय शिलावर्षेण राघवौ ॥ अवाकिरत्सुमहता ततश्चुक्रोध राघवः ॥ १८ ॥
शिलावर्षं महत्तस्याः शरवर्षेण राघवः ॥ प्रतिहत्योपधावन्त्याः करौ चिच्छेद पत्रिभिः ॥ १९ ॥
ततश्छिन्नभुजां श्रान्तामभ्याशे परिगर्जतीम् ॥ सौमित्रिरकरोत्क्रोधाद्धृतकर्णाग्रनासिकाम् ॥ २० ॥
कामरूपधरा सद्यः कृत्वा रूपाण्यनेकशः ॥ अन्तर्धानं गता यक्षी मोहयन्तीव मायया ॥
अश्मवर्षं विमुञ्चन्ती भैरवं विचचार ह ॥ २१ ॥

अहमितिशेषः ॥ ५—७ ॥ सुसंक्रुद्धा प्रकृत्याअतिकोपना । मोहिता किंकर्तव्यमितिसंभ्रान्ता । आसीत् ॥ ८ ॥ अभिनिध्याय आकर्ण्य । क्रोधमूर्च्छिताआसीत् । श्रुत्वाक्रुद्धासाऽभ्यद्रवच्च ॥ ९ ॥ प्रमाणेन औन्नत्येन ॥ १० ॥ भैरवं भयंकरं । दारुणं विकृतम् ॥ ११ ॥ मायाबलं अन्तर्धानबलं विनिवृत्तां पराङ्मुखीं । एतावतैवगुरुवचनानुष्ठानसिद्धेरितिभावः ॥ १२—१३ ॥ वीर्यगतिहननं हस्तपादभञ्जनेन ॥ १४—१५ ॥ अस्त्वित्यत्रइतिशब्दोऽध्याहार्यः । अतिमानुषशक्तिंजानन्नपिताटकायाःक्रौर्यातिशयंदृष्ट्वातिशङ्कयामहर्षिर्मङ्गलमाशास्ते ॥ १६ ॥ उद्धून्वाना उत्किरन्ती ॥ १७ ॥ मायां अन्तर्धानशक्तिम् ॥ १८ ॥ प्रतिहत्य भङ्क्त्वा । करौचिच्छेद शिलावर्षहेतुत्वात् । पत्रिभिः शरैः ॥ १९ ॥ अभ्याशे समीपे । गर्जतीं गर्जन्तीं । नुमभावआर्षः ॥ २० ॥ कामरूपधरा कामरूपधरणशक्ता । अतएवानेकशोरूपाणिकृत्वामाययाअन्तर्धानंगतासती भैर-

---

देशस्य । चकारेणयशःप्राप्तिरूपलब्धिताय । चकारान्तरेणस्वनिष्ठभवच्छिष्यत्वप्रकटनाय ॥ ५ ॥ **शि०** यतः शब्दोविनिस्सृतः तंशब्दंश्रुत्वा क्रोधमूर्च्छिता राक्षसी ताटका । अभिनिध्याय शब्ददेशंनिश्चित्य । क्रुद्धायतः क्रुद्धस्यक्रोधस्यआयतोविस्तारोयस्यास्सशब्दोयतोविनिस्सृतः तंदेशमभ्यद्रवत् । अतएवक्रोधमूर्च्छितेत्यनेन क्रुद्धेत्यस्यनपौनरुक्त्यं । चशब्दोयतइत्यर्थे ॥ ९ ॥ **ती०** वीर्यं पराभिभवनशक्तिं । गतिं आकाशादिगतिं ॥ १४ ॥ **ति०** राममेव विश्वामित्रस्यदुर्धर्षत्वेनतंविसृज्यमानुषबुद्ध्यारामम्मेवेत्यर्थः ॥ १५ ॥ **ती०** रजोमोहेन रजोन्धकारेण । **वि०** रजोमेघेन रजोन्धकारेण । **शि०** रजोमेघेन मेघसदृशरजसा ॥ १७ ॥ **ती०** मायास्त्रं मायानिर्मितास्त्रं । मायाविद्यामितियावत् ॥ १८ ॥

[पा०] १ ख. ग. घ. ज्याशब्दं. २ ट. पूरयन्. ३ अयंश्लोकः ख. दृश्यते. ४ क. ङ. च. छ. झ. ञ. ट. चाभ्यद्रवत्क्रुद्धा. ५ ख. ङ. ट. क्रुद्धो. ६ घ. ट. नातिवृत्तां. ७ अयंश्लोकः क. ख. दृश्यते. ८ क. ङ. च. छ. ञ. चैव. ९ ङ. च. छ. झ. ञ. हन्यामितिहि. १० ङ. झ. बाहुं. ११ ङ. झ. ट. उद्धुन्वाना. १२ क. ख. ङ. ञ. ट. मेघेन. १३ क—घ. छ. ञ. ट. त्वमोहयत्. १४ च. छ. ज. मायास्त्रमास्थाय. १५ क. वीर्यवान्. १६ ङ. च. छ. झ. ञ. १७ ख. श्रान्तां. १८ ख. ङ. च. छ. झ. ञ. सातु. १९ ङ. च. छ. झ. ञ. ट. स्वमायया. क. ख. घ. चमायया. २० क. ख. ग. ङ. झ. विचचारसा.

[ज्योत्स्नं चक्रतुर्वीरौ वज्राशनिसमं तदा ॥ मोहिता तेन शब्देन लब्धसंज्ञा चिरात्तदा ॥ २२ ॥]
ततस्तावश्मवर्षेण कीर्यमाणौ समन्ततः ॥ दृष्ट्वा गाधिसुतः श्रीमानिदं वचनमब्रवीत् ॥ २३ ॥
अलं ते घृणया वीर पापैषा दुष्टचारिणी ॥ यज्ञविघ्नकरी यक्षी पुरा वर्धति मायया ॥ २४ ॥
वध्यतां तावदेवैषा पुरा सन्ध्या प्रवर्तते ॥ रक्षांसि सन्ध्याकालेषु दुर्धर्षाणि भवन्ति वै ॥ २५ ॥
इत्युक्तस्तु तदा यक्षीमश्मवृष्ट्याऽभिवर्षतीम् ॥ दर्शयञ्शब्दवेधित्वं तां रुरोध स सायकैः ॥२६॥
सा रुद्धा शरजालेन मायाबलसमन्विता ॥ अभिदुद्राव काकुत्स्थं लक्ष्मणं च विनेदुषी ॥ २७ ॥
तामापतन्तीं वेगेन विक्रान्तामशनीमिव ॥ शरेणोरसि विव्याध सा पपात ममार च ॥ २८ ॥
तां हतां भीमसंकाशां दृष्ट्वा सुरपतिस्तदा ॥ साधुसाध्विति काकुत्स्थं सुराश्च समपूजयन् ॥ २९ ॥
उवाच परमप्रीतः सहस्राक्षः पुरन्दरः ॥ सुराश्च सर्वे संहृष्टा विश्वामित्रमथाब्रुवन् ॥ ३० ॥
मुने कौशिक भद्रं ते सेन्द्राः सर्वे मरुद्गणाः ॥ तोषिताः कर्मणानेन स्नेहं दर्शय राघवे ॥ ३१ ॥
प्रजापतेः कृशाश्वस्य पुत्रान्सत्यपराक्रमान् ॥ तपोबलभृतो ब्रह्मन्राघवाय निवेदय ॥ ३२ ॥
पात्रभूतश्च ते ब्रह्मंस्तवानुगमने धृतः ॥ कर्तव्यं च महत्कार्यं सुराणां राजसूनुना ॥ ३३ ॥
एवमुक्त्वा सुराः सर्वे जग्मुर्हृष्टा यथागतम् ॥ विश्वामित्रं पुरस्कृत्य ततः सन्ध्या प्रवर्तते ॥ ३४ ॥
ततो मुनिवरः प्रीतस्ताटकावधतोषितः ॥ मूर्ध्नि राममुपाघ्राय इदं वचनमब्रवीत् ॥ ३५ ॥

वमश्मवर्षविमुञ्चन्तीमोहयन्तीवविचचार । अर्धत्रयम् ॥ २१—२२ ॥ श्रीमान् स्वतएवताटकावधहेतुप्राप्तिकृतहर्षेणकान्तिमान् ॥ २३ ॥ दुष्टचारिणी दुष्टंयथातथाचरणशीला । अन्तर्धानशक्त्याऽश्मवर्षशीलेत्यर्थः । एतेन ऐहिकनाशकत्वमुक्तं । पारलौकिकनाशकत्वमप्याह—यज्ञविघ्नकरीति । पुरावर्धति वर्धिष्यते । "यावत्पुरानिपातयोर्लट्" ॥ २४ ॥ सन्ध्यापुराप्रवर्तते प्रवर्तिष्यते । तावत् पूर्वमेव वध्यतां । सन्ध्याप्रवृत्तौकाहानिस्तत्राह—रक्षांसीति ॥ २५ ॥ अभिवर्षतीं अभिवर्षन्तीं । शब्दवेधित्वं श्रुतःशब्दोयस्मादुत्पन्नःतद्वेधित्वम् ॥ २६ ॥ अभिदुद्राव अप्रयोजकमन्तर्धानंविहायेत्यर्थः । विनेदुषी नादंकुर्वन्ती ॥२७॥ अशनीं "सर्वतोक्तिन्नर्थादित्येके" इतिङीष् ॥ २८ ॥ भीमसंकाशां भीमरूपां । सुरपतिः सुराश्च समपूजयन् ॥ २९ ॥ ॥ ३० ॥ सर्वे वयमितिशेषः । स्नेहंदर्शय स्नेहकार्यं प्रवर्तय ॥ ३१ ॥ एतदेवाह—प्रजापतेरिति ॥ ३२ ॥ अयमितिशेषः । अनुगमने शुश्रूषणे । धृतः स्थिरधीः ॥ ३३ ॥ पुरस्कृत्य पूजयित्वाजग्मुः । सन्ध्या सायं-

शि० ममार मं शिवसंनिधिं आर जगाम पपातच । तद्देशंप्राप्यशिवसंनिधावपतदित्यर्थः । किंच अपपातमं अपगतःपातः पुनरावृत्तिर्यस्मात्सएव मः शिवस्तंकैलासाद्रिमित्यर्थः । आरप्राप । बाणवेगेनतत्रप्रक्षिप्तेत्यर्थः । एतेनस्त्रीत्वादेवत्वंनहतासि । अतस्तत्रपुनर्नगन्तव्यमितिशिवउपदेक्ष्यतीतिहेतुर्व्यक्तः । अतएव "नह्येनामुत्सहेहन्तुंस्त्रीस्वभावेनरक्षितां" इतिप्रतिज्ञयामविरोधः । अतएव " रामोद्विर्नाभिभाषते " इतिसानुकूलं । अतएव "सुन्दस्त्रीदमनप्रमोदमुदितादास्थायविद्योदयंरामस्सत्यवतीसुतादथगतस्तस्याश्रमंलीलया ॥ कृत्स्नेकौशिकनन्दनेनचमखेतत्रागतान्राक्षसान्हत्वाऽमूमुचदाशुभाविविदसौमारीचमुग्राकृतिम् " इतिहनुमन्नाटकपद्यघटकीभूतसुन्दस्त्रीदमनप्रमोदमुदितादितिपदघटकदमनप्रयोगस्संगच्छते । अन्यथासुन्दस्त्रीहननप्रमोदमुदितादितिवदेदितिदिक् । " मोयमेसमयेऽपिस्याद्विधेचमधुसूदने । मास्त्रीपद्मालयायांस्यात्पुंलिङ्गश्चन्द्रशेखरे " इतिमेदिनी ॥ अस्मिन्नर्थे च एव ॥ २८ ॥ इतिषड्विंशस्सर्गः ॥ २६ ॥

[पा०] १ इदमर्धं ख. दृश्यते. २ क—छ. झ. ञ. राम. ३ क. ख. ग. ङ. च. छ. झ. ञ. ट. वर्धेत. ४ ङ. झ. ञ. कालेतु. ५ क. ङ. च. छ. झ. ञ. भवन्तिहि. ६ ख. ङ. झ. इत्युक्तस्सतुतांयक्षी. ट. स्तुतथायक्षी. ७ ङ. झ. वर्षिणीम्. ८ ङ. च. छ. झ. ञ. बाणजालेन. ख. शरवर्षेण. ९ ङ. च. छ. झ. ञ. पपातच. १० ख. देवपतिः. ११ ङ. च. छ. झ. ञ. सुराश्चाप्याधि. १२ क—घ. च. ञ. भृशाश्वस्य. १३ क—घ. च. छ. ञ. भृतान्. १४ ङ. झ. रतः. ट. वृतः १५ घ— छ. झ. ञ. सुमहत्कर्म. १६ ङ. झ. विहायसम्. १७ क—घ. पूजयित्वा. ङ. च. छ. झ. ञ. ट. पूजयन्तः.

इहाद्य रजनीं राम वसाम शुभदर्शन ॥ श्वः प्रभाते गमिष्यामस्तदाश्रमपदं मम ॥ ३६ ॥
विश्वामित्रवचः श्रुत्वा हृष्टो दशरथात्मजः ॥ उवास रजनीं तत्र ताटकाया वने सुखम् ॥ ३७ ॥
मुक्तशापं वनं तच्च तस्मिन्नेव तदाऽहनि ॥ [चंपकाशोकपुन्नागमल्लिकाद्यैस्सुशोभितम् ॥ ३८ ॥
चूतैश्च पनसैः पूगैर्नारिकेलैश्च शोभितम् ॥ वापीकूपतटाकैश्च दीर्घिकाभिरलङ्कृतम् ॥ ३९ ॥
मल्लिकाहेमकूटैश्च मण्टपैरुपशोभितम् ॥] रमणीयं विबभ्राज यथा चैत्ररथं वनम् ॥ ४० ॥

निहत्य तां यक्षसुतां स रामः प्रशस्यमानः सुरसिद्धसङ्घैः ॥
उवास तस्मिन्मुनिना सहैव प्रभातवेलां प्रतिबोध्यमानः ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकिये आदिकाव्ये बालकाण्डे षड्विंशस्सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ॥ २७ ॥

विश्वामित्रेण रामलक्ष्मणाभ्यां नानास्त्रमन्त्रप्रदानम् ॥ १ ॥

अथ तां रजनीमुष्य विश्वामित्रो महायशाः ॥ प्रहस्य राघवं वाक्यमुवाच मधुराक्षरम् ॥ १ ॥
परितुष्टोस्मि भद्रं ते राजपुत्र महायशः ॥ प्रीत्या परमया युक्तो ददाम्यस्त्राणि सर्वशः ॥ २ ॥
देवासुरगणान्वाऽपि सगन्धर्वोरगानपि ॥ यैरमित्रान्प्रसह्याजौ वशीकृत्य जयिष्यसि ॥ ३ ॥
तानि दिव्यानि भद्रं ते ददाम्यस्त्राणि सर्वशः ॥ दण्डचक्रं महद्दिव्यं तव दास्यामि राघव ॥ ४ ॥
धर्मचक्रं ततो वीर कालचक्रं तथैव च ॥ विष्णुचक्रं तथाऽत्युग्रमैन्द्रमस्त्रं तथैव च ॥ ५ ॥
वज्रमस्त्रं नरश्रेष्ठ शैवं शूलवरं तथा ॥ अस्त्रं ब्रह्मशिरश्चैव ऐषीकमपि राघव ॥
ददामि ते महाबाहो ब्राह्ममस्त्रमनुत्तमम् ॥ ६ ॥
गदे द्वे चैव काकुत्स्थ मोदकी शिखरी उभे ॥ प्रदीप्ते नरशार्दूल प्रयच्छामि नृपात्मज ॥ ७ ॥
धर्मपाशमहं राम कालपाशं तथैव च ॥ पाशं वारुणमस्त्रं च ददाम्यहमनुत्तमम् ॥ ८ ॥
अशनी द्वे प्रयच्छामि शुष्कार्द्रे रघुनन्दन ॥ ददामि चास्त्रं पैनाकमस्त्रं नारायणं तथा ॥ ९ ॥

सन्ध्या। प्रवर्ततेस्म॥३४-३५॥तत् पूर्वोक्तम्॥३६-३७॥ मुक्तशापं मुक्तोपद्रवं । तस्मिन्नहनि । तदैव तत्क्षण एव ॥ ३८—३९ ॥ चैत्ररथं कुबेरोद्यानम् ॥ ४० ॥ प्रतिबोध्यमानः मुनिनेतिशेषः । कौसल्यासुप्रजारामेत्येवंप्रबोधितोऽभूदित्यर्थः। उपजातिवृत्तम् ॥४१॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षड्विंशःसर्गः॥२६॥

अस्त्रगणलाभःसप्तविंशे—अथेत्यादि । उष्य उषित्वा । प्रहस्य प्रहर्षेणमन्दहासंकृत्वा ॥१॥ महायशइतिसंबुद्धित्वान्नदीर्घः । प्रीत्यापरमयायुक्तइतिपरितुष्टोस्मीत्यस्यानुवादः । सर्वशःसर्वाणि ॥२॥ आजौ युद्धे । जयिष्यसि स्वार्थेणिच् ॥ ३ ॥ दण्डचक्रादयश्चक्रभेदाः ॥ ४ ॥ सार्धश्लोकद्वयमेकान्वयं । शूलवरं शूलश्रेष्ठं । ब्रह्मशिरः ब्रह्मास्त्रादन्यत् ॥ ५—६ ॥ मोदकीशिखरीसंज्ञेयेद्वेगदेस्तः तेउभेदास्यामीतिसंबन्धः ॥ ७ ॥ वारुणमित्यस्यकाकाक्षिन्यायेनोभयत्रान्वयः ॥ ८ ॥ शुष्काशनिरार्द्राशनिरित्यन्वयः । पिनाकिनइदंपैनाकं

ति० वाशब्दश्चार्थे । गन्धर्वोरगसहितदेवासुरगणरूपशत्रूनपिप्रसह्य बलेन जयिष्यसि जेष्यसि । यदिवधेदया तदावशीकृत्यसंमोहनास्त्रादिनाजेष्यसि । अन्येषांतुकागणनेतिभावः ॥ ३ ॥ वि० दण्डचक्रादयोस्त्रभेदाः ॥ ४ ॥ ति० शूलवतं तन्नामकं ॥ ६ ॥ ति० द्वेगदे गदासंज्ञिकेअस्त्रे ॥ ७ ॥

[पा०] १ ग. घ. वसेम. २ इदमर्धचतुष्टयं ख. च. छ. ञ. दृश्यते. ३ घ. छ. महामुनिः. ४ क.—घ. प्रशस्य. ५ ङ. च. छ. झ. ञ. मधुरस्वरम्. ६ क. ङ. च. छ. झ. ञ. रगान्भुवि. ७ ग. तथा. घ. तदा. ८ क. ख. ङ. च. छ. झ. ञ. मैन्द्रंचक्रं. ९ ङ. झ. शूलवतं. १० क. च. शिखरेउभे. ङ. झ. शिखरेशुभे. ११ ग. नृपशार्दूल. १२ ञ. ददाम्यस्त्रंच.

आग्नेयमस्त्रं दयितं शिखरं नाम नामतः ॥ वायव्यं [1]प्रथनं नाम ददामि [2]च तवानघ ॥ १० ॥
अस्त्रं हयशिरो नाम क्रौञ्चमस्त्रं तथैव च ॥ शक्तिद्वयं च काकुत्स्थ ददामि तव राघव ॥ ११ ॥
कङ्कालं मुसलं घोरं कापालमथ [3]कङ्कणम् ॥ [4]धारयन्त्यसुरा यानि ददाम्येतानि सर्वशः ॥ १२ ॥
वैद्याधरं महास्त्रं च नन्दनं नाम नामतः ॥ असिरत्नं महाबाहो ददामि नृवरात्मज ॥ १३ ॥
गान्धर्वमस्त्रं दयितं [5]मानवं नाम नामतः ॥ [6]प्रस्वापनप्रशमने [7]दद्मि सौरं च राघव ॥ १४ ॥
[8]दर्पणं शोषणं चैव संतापनविलापने ॥ [9]मदनं चैव दुर्धर्षं [10]कंदर्पदयितं तथा ॥ १५ ॥
पैशाचमस्त्रं दयितं [11]मोहनं नाम नामतः ॥ प्रतीच्छ नरशार्दूल राजपुत्र महायशः ॥ १६॥
तामसं नरशार्दूल सौमनं च महाबल ॥ संवर्तं चैव दुर्धर्षं [12]मौसलं नाम नामतः ॥ १७ ॥
सत्यमस्त्रं महाबाहो तथा [13]मायाधरं परम् ॥ [14]घोरं तेजःप्रभं नाम परतेजोपकर्षणम् ॥ १८ ॥
[15]सौम्यास्त्रं [16]शिशिरं नाम त्वाष्ट्रमस्त्रं [17]सुकामदम् ॥ दारुणं च [18]भगस्यापि शीतेषुमथ [19]मानवम् ॥१९॥
एतान्नाम महाबाहो कामरूपान्महाबलान् ॥ गृहाण परमोदारान्क्षिप्रमेव नृपात्मज ॥ २० ॥
[20]स्थितस्तु प्राङ्मुखो भूत्वा शुचिर्मुनिवरस्तदा ॥ ददौ रामाय सुप्रीतो मन्त्रग्राममनुत्तमम् [21] ॥ २१ ॥
सर्वसंग्रहणं येषां दैवतैरपि दुर्लभम् ॥ तान्यस्त्राणि तदा विप्रो राघवाय न्यवेदयत् ॥ २२ ॥
जपतस्तु मुनेस्तस्य विश्वामित्रस्य धीमतः ॥ उपतस्थु[22]र्महार्हाणि सर्वाण्यस्त्राणि राघवम् ॥ २३ ॥
[23]ऊचुश्च मुदिताः सर्वे रामं प्राञ्जलयस्तदा ॥ [24]इमे स्म परमोदाराः [25]किंकरास्तव राघव ॥ २४ ॥
[[26]यद्यदिच्छसि भद्रं ते तत्सर्वं करवाम वै ॥ ततो रामः प्रसन्नात्मा तैरित्युक्तो महाबलैः] ॥२५॥

॥ ९ ॥ आग्नेयं अग्निदेवताकं । दयितं अग्नेरितिशेषः ॥ १० ॥ शक्तिद्वयं विष्णुशक्तिःरुद्रशक्तिश्चेति ॥ ११ ॥ —१२ ॥ वैद्याधरंनन्दनंनामअसिरत्नं महास्त्रमित्यर्थः । असिर्हिविद्याधरास्त्रम् ॥ १३ ॥ प्रस्वापनप्रशमनेचगान्धर्वे ॥ १४ ॥ विलापयतिपरिदेवयतीतिविलापनं । मदयतीतिमदनं ॥ १५ ॥ प्रतीच्छ गृहाण ॥ १६ ॥ मुसलान्मौसलमन्यत् ॥ १७—१८ ॥ शीतेषुं शीतेषुनामकं ॥ १९ ॥ कामरूपान् ऐच्छिकशरीरान् ॥ २० ॥ मन्त्रग्राममित्यनेन पूर्वोक्तास्त्रप्रदानंनामतत्तन्मन्त्रप्रदानमित्युक्तंभवति । तेषां कृशाश्वजन्यत्वमधिष्ठातृदेवताद्वारा ॥ २१ ॥ सर्वसंग्रहणं कार्त्स्न्येनसंग्रहणम् ॥ २२ ॥ अस्त्रमन्त्रान्दत्वा मन्त्रदेवताअपिरामाज्ञानुवर्तिनीःकारयितुं ताःस्मृत्वा जपतोविश्वामित्रस्याज्ञयाराघवं उपतस्थुः सिषेविरे ॥२३॥ राघवे-

ति० प्रथमं मुख्यं ॥ १० ॥ ति० दद्मीत्यार्षं ॥ १४ ॥ ति० मन्त्रग्रामं अस्त्राणांमन्त्रमूर्तित्वात् । मनुबलातिबलादानप्रसङ्गेपिमन्त्रग्रामंगृहाणेत्युक्तत्वात्पुनरत्रदानंविफलमितिचेन्न । गृहाणेत्येवतत्रोक्तत्वात्नतुददाविति । तेनतत्कालोपयोगिबलातिबलयोरेवतत्रदानं इतरेषांलत्रेतिविवेकः । वस्तुतोबलातिबलेमन्त्रसमूहात्मिकेइतितद्रूपमन्त्रग्राममितितत्रार्थइतिनदोषइतिपरे ॥ शि० अनुस्मरन् तत्तदस्त्रनियोजकत्वेनानुस्मारयन्रामायददौ । तुना लक्ष्मणायचददौ । स्मरन्नित्यन्तर्भावितणिजर्थः तेनरामज्ञानविषयीभूताएवतेमन्त्राइतिबोधितम् । तेनमन्त्रग्रहणंमर्यादापालनायैवेतिध्वनितम् ॥ २१ ॥ इतिसप्तविंशस्सर्गः ॥ २७ ॥

[पा०] १ क. च. छ. ञ. मथनंनाम. झ. ट. प्रथमंनाम. ङ. प्रथमंराम. २ ख. तवसुव्रत. ग. घ. ङ. तवराघव. ख. जयतांवर. ३ ङ. झ. ट. ख. किंकिणीम्. ४ क. ङ. च. छ. ज. ञ. वधार्थंरक्षसांयानि. ५ ख—ङ. झ. ट. मोहनंनाम. क. छ. मानवास्त्रंच. ६ क. ङ. झ. प्रस्वापनंप्रशमनं. ७ ख. तथासौम्यंच. ङ. झ. दद्मिसौम्यंच. क. च. छ. दद्मिसौरंच. ८ ङ. च. छ. झ. ञ. वर्षणं. ट. धर्षणं. क. दहनं. ९ ङ. झ. ञ. मादनं. १० क. च. छ. ञ. अस्त्रंकन्दर्पदैवतम्. ११ ख. मानवं. १२ क. ङ. च. छ. झ. ञ. मौसलंचनृपात्मज. १३ ङ. झ. मायामयं १४ क. ङ. च. छ. झ. ञ. सौरंतेजःप्रभं. ट. सौरंतेजःप्रदं. १५ क—च. झ. ञ. सोमास्त्रं. १६ ट. शीतलं. १७ क. घ. ङ. झ. सुदारुणं. ख. च. ञ. ट. सुदामनं. १८ ख. भगस्यास्त्रं. १९ ङ. झ. मानदम्. २० ख. घ. ततस्तु. २१ ट. मनुस्मरन्. २२ ख. घ. महात्मानं. २३ क. ख. ऊचुःप्रमुदिताः. २४ ख. इमेतववयंराम. ङ. झ. इमेचपरमोदाराः. २५ ख. किंकरास्त्वाधिनःप्रभो. २६ अयंश्लोकः ङ. च. झ. ज. ञ. दृश्यते.

प्रतिगृह्य च काकुत्स्थः समालभ्य च पाणिना ॥ मानसा मे भविष्यध्वमिति तानभ्यचोदयत् ॥२६॥
ततः प्रीतमना रामो विश्वामित्रं महामुनिम् ॥ अभिवाद्य महातेजा गमनायोपचक्रमे ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ॥ २८ ॥

विश्वामित्रेणरामायास्त्राणामुपसंहारमन्त्रोपदेशः ॥ १ ॥ ताटकावनान्निर्गत्यसिद्धाश्रमसमीपमुपागतेनरामेणविश्वामित्रंप्रति पुरतोदृश्यमानाश्रमस्यनामधेयादिविशेषप्रश्नः ॥ २ ॥

प्रतिगृह्य ततोस्त्राणि प्रहृष्टवदनः शुचिः ॥ [1]गच्छन्नेव च काकुत्स्थो विश्वामित्रमथाब्रवीत् ॥ १ ॥
गृहीतास्त्रोस्मि भगवन्दुराधर्षः [2]सुरासुरैः ॥ अस्त्राणां त्वहमिच्छामि [3]संहारं मुनिपुङ्गव ॥ २ ॥
एवं ब्रुवति काकुत्स्थे विश्वामित्रो [4]महायशाः ॥ [5]संहारं व्याजहाराथ धृतिमान्सुव्रतः शुचिः ॥ ३ ॥
सत्यवन्तं सत्यकीर्तिं धृष्टं रभसमेव च ॥ प्रतिहारतरं नाम पराङ्मुखमवाङ्मुखम् ॥ ४ ॥
लक्ष्याक्षविषमौ चैव दृढनाभसुनाभकौ ॥ दशाक्षशतवक्त्रौ च दशशीर्षशतोदरौ ॥ ५ ॥
पद्मनाभमहानाभौ दुन्दुनाभसुनाभकौ ॥ ज्योतिषं कृशनं चैव नैराश्यविमलावुभौ ॥ ६ ॥
योगन्धरहरिद्रौ च दैत्यप्रशमनौ तथा ॥ [शुचिर्बाहुर्महाबाहुर्निष्कुलिर्विरुचिस्तथा] ॥
सार्चिर्माली धृतिर्माली वृत्तिमान्रुचिरस्तथा ॥ ७ ॥
पित्र्यः सौमनसं चैव विधूतमकरावुभौ ॥ करवीरकरं चैव धनधान्यौ च राघव ॥ ८ ॥
कामरूपं कामरुचिं मोहमावरणं तथा ॥ जृंभकं सर्वनाभं च संतानवरणौ तथा ॥ ९ ॥
कृशाश्वतनयान्राम भास्वरान्कामरूपिणः ॥ प्रतीच्छ मम भद्रं ते पात्रभूतोसि राघव ॥ १० ॥

त्यनन्तरमितिकरणंबोध्यम् ॥२४॥२५॥ प्रतिगृह्यअस्त्रसेवामङ्गीकृत्य। समालभ्य संस्पृश्य। "आलंभःस्पर्शहिंसयोः"इत्यमरः। मानसाः मनोनुसारिणः। चिन्तामात्रे उपस्थिताइतियावत् । भविष्यध्वं भवत । मानसास्सन्तोमांप्राप्नुतेतिवार्थः । भूप्राप्तावितिधातुः ॥२६॥ गमनाय गन्तुं "तुमर्थाच्चभाववचनात्"इतिचतुर्थी ॥२७॥ इति श्रीगोविन्दराजवि० श्रीमद्रामायणभूषणे मणिमञ्जिराख्याने बालकाण्डव्याख्याने सप्तविंशःसर्गः २७

अस्त्रसंहारकप्रतिग्रहोष्टाविंशे—प्रतिगृह्येत्यादि । गच्छन् गमिष्यन् । "वर्तमानसामीप्येवर्तमानवद्वा" इति लट् ॥१॥ संहारंअवगतप्रयोगानामस्त्राणांपुनरुपसंहारं । तत्तदस्त्रमूलमन्त्रवर्तितत्तदस्त्रोपसंहारमन्त्रजातमित्यर्थः । जात्येकवचनम् ॥ २ ॥ धृतिमान् प्रीतिमान् ॥ ३ ॥ सत्यवन्तमित्यादिसप्तश्लोक्येकान्वया । सत्यवदादीनिउपसंहाराणांनामानि ॥ ४—६ ॥ सार्चिर्मालीत्यादिषुप्रथमाद्वितीयार्थे ॥ ७—९ ॥ मम

[पा०] १ ङ. झ. तान्यभ्यचोदयत्. २ ग. गच्छन्नेवाथ. ३ क—छ. झ. ञ. सुरैरपि. ४ क. ग. ङ. च. छ. झ. ञ. संहारान्. ५ ङ. च. छ. झ. ञ. महातपाः. ख. ग. घ. महामुनिः. क. महामनाः. ६ ङ. च. छ. झ. ञ. संहारान्. ७ ट. हृष्टंरभसमेव. झ. हृष्टसंरंभमेव. ८ क. ख. ङ. ग. च. छ. झ. ञ. ट. लक्ष्यालक्ष्याविमौ. ९ झ. खनाभकौ. १० ङ. च छ. झ. ञ. ट. शकुनं. घ. कुशनं. ग. कृथनं. ११ घ. ङ. झ. ञ. यौगन्धरहरिद्रौ. च. क. सौगन्धन. क. ङ. च. छ. झ. ञ. ट. विनिद्रौच. ख. हरिद्रौचमदनप्रमथौतथा. क. ग.—छ. झ. ञ. ट. दैत्यप्रमथनौतथा. १२ इदमर्धं क. ङ. च. छ. झ. ञ. ट. दृश्यते. १३ ङ. च. छ. झ. ञ. ट. निष्कलिर्विरुचस्तथा. १४ क. ग. ङ. च. छ. झ. ञ. ट. सार्चिमाली. १५ ख. धृतिज्वाला. १६ घ. निरुचिस्तथा. च. विरजस्तथा. ग. विचिरस्तथा. १७ ख. पित्र्यंसौमनसं. क. चन्द्रासौमनसं. च. छ. चन्द्रसौमनसं. ङ. झ. ट. पित्र्यस्सौमनसं. ञ. चन्द्रंसौमनसं. १८ ख. ग. विधूम. १९ ङ. च. ञ. करवीररतिं. झ. परवीररतिं. ख. करवीरंकनिं. २० ट. धनधान्ये. २१ ङ. झ. सर्पनाथं. २२ ख. घ. संतानवरुणावुभौ. क. च. छ. ञ. संधानवरुणावुभौ. ङ. झ. पन्थानवरुणौतथा. २३. क. ख. ग. च. भृशाश्व. २४ ग. प्रतीच्छचास्त्रान्भद्रं.

बाढमित्येव काकुत्स्थः प्रहृष्टेनान्तरात्मना ॥ [[1]ततस्सर्वमग्रहीद्रामो विश्वामित्रान्महामुनेः] ॥११॥
दिव्यभास्वरदेहाश्च मूर्तिमन्तः सुखप्रदाः ॥ केचि[2]दङ्गारसदृशाः केचिद्धूमोपमास्तथा ॥ १२ ॥
चन्द्रार्कसदृशाः केचित्प्रह्वाञ्जलिपुटास्तथा ॥ रामं प्राञ्जलयो भूत्वाब्रुवन्मधुरभाषिणः ॥ १३ ॥
इमे स्म नरशार्दूल शाधि किं करवाम ते ॥ १४ ॥
मानसाः कार्यकालेषु साहाय्यं मे करिष्यथ ॥ गम्यतामिति तानाह यथेष्टं रघुनन्दनः ॥ १५ ॥
अथ ते राममामन्त्र्य [3]कृत्वा चापि प्रदक्षिणम् ॥ एवमस्त्विति काकुत्स्थमुक्त्वा जग्मुर्यथागतम् ॥
[[4]प्रणम्य शिरसा रामं सर्वे संमतविक्रमाः] ॥ १६ ॥
[[5]ततस्तु रामः काकुत्स्थः शासनाद्ब्रह्मवादिनः ॥ लक्ष्मणाय च तान्सर्वान्वरास्त्रान्रघुनन्दनः ॥
संहारान्स च संहृष्टः श्रीमांस्तस्मै न्यवेदयत्] ॥ १७ ॥
स च तान्राघवो ज्ञात्वा विश्वामित्रं महामुनिम् ॥ गच्छन्नेवाथ मधुरं श्लक्ष्णं वचनमब्रवीत् ॥१८॥
कि[6]न्न्वेतन्मेघसंकाशं पर्वतस्याविदूरतः ॥ [7]वृक्षषण्डमितो भाति परं कौतूहलं हि मे ॥ १९ ॥
दर्शनीयं मृगाकीर्णं [8]मनोहरमतीव च ॥ नानाप्रकारैः शकुनैर्व[9]ल्गुनादैरलंकृतम् ॥ २० ॥
निःसृताः स्म मुनिश्रेष्ठ कान्ताराद्रोमहर्षणात् ॥ २१ ॥
अनया त्ववगच्छामि देशस्य सुखवत्तया ॥ सर्वं मे शंस भगवन्कस्याश्रमपदं त्विदम् ॥ २२ ॥
संप्राप्ता यत्र ते पापा ब्रह्मघ्ना दुष्टचारिणः ॥ तव यज्ञस्य विघ्नाय [10]दुरात्मानो [11]महामते ॥ २३ ॥
[12]भगवंस्तस्य को देशः सा यत्र तव याज्ञिकी ॥ रक्षितव्या क्रिया ब्रह्मन्म[13]मे वध्याश्च राक्षसाः ॥ २४ ॥
एतत्सर्वं मुनिश्रेष्ठ श्रोतुमिच्छाम्यहं [14]प्रभो ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

मत्त: ॥ १० ॥ बाढमित्यर्धं । बाढमित्यङ्गीकारे । प्रहृष्टेनान्तरात्मना प्रतिजग्राहेतिशेषः ॥११॥ मन्त्रस्वीकारानन्तरंमन्त्रदेवतासाक्षात्कारंदर्शयति—दिव्येत्यादिश्लोकद्वयेन । दिव्याःश्लाघ्याःभास्वराश्चदेहायेषांते । तथा । मूर्तिमन्तः शरीरकाठिन्यवन्तः । "मूर्तिःकाठिन्यकाययोः"इत्यमरः । सुखप्रदाः आह्लादकाः॥१२॥ प्रह्वाः नम्राः । अञ्जलिपुटाः अञ्जलिपुटयुक्ताः । अर्श-आदित्वादच् । प्राञ्जलयः कृताञ्जलयः । मधुरभाषिणः मधुरभाषणशीलाः । केचित्पुरुषाः राममब्रुवन् ॥ १३ ॥ इमइत्यर्धं । स्मेत्यार्षःसलोपः । शाधि आज्ञापय । "शाहौ"इति शास्तेःशादेशः ॥ १४ ॥ यथेष्टंगम्यतामित्यन्वयः ॥ १५ ॥ ते पुरुषाः ॥ १६ ॥ तान् उपसंहारमन्त्रान् । श्लक्ष्णं व्यक्तं ॥ १७—१८ ॥ श्लोकद्वयं । इतः अस्मिन्प्रदेशे । कौतूहलं श्रोतुमितिशेषः ॥ १९—२० ॥ कान्तारात् ताटकावनात् । रोमहर्षणात् रोमाञ्चकरात् भयंकरादितियावत् । अर्धमेकं ॥ २१ ॥ अनया देशस्यसुखवत्तया इदमाश्रमपदमित्यवगच्छामि । कस्येति नजानामि तत्सर्वंशंस आदितःप्रभृतिवदेत्यर्थः ॥ २२ ॥ संप्राप्ताइत्यादिश्लोकद्वयं । ते पूर्वोक्ताः । तवयज्ञस्य विघ्नाययत्राश्रमपदे संप्राप्ताः साचतवयाज्ञिकाक्रियायत्र रक्षितव्या राक्षसाश्चवध्याः तस्याश्रमस्यकोदेशः ॥ २३—२४ ॥ एतदित्यर्धं ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने अष्टाविंशःसर्गः ॥ २८ ॥

ति० प्रह्वाञ्जलिपुटाः प्रह्वाःनम्राश्चते अञ्जलेःपुटंसंश्लेषोयेषांतादृशाः॥१३॥**ति०**वल्गुभाषैः मधुरभाषैः ॥२०॥ इत्यष्टाविंशस्सर्गः२८

[पा०] १ इदमर्धं ख. दृश्यते. २ ख. केचिदुग्रग्रहोपमाः. ३ क. कृत्वाचाभि. ट. तंचकृत्वा. ४ इदमर्धं च. छ. दृश्यते. ५ इदमर्धत्रयं च. छ. दृश्यते. ६ ङ. च. छ. झ. ञ. किमेतन्मेघ. ७ झ. ञ. वृक्षखण्डमितोभाति. ख. च. वृक्षषण्डमिवाभाति. ८ ख. ग. मनोरम. ९ क. ङ. च. छ. झ. ञ. वल्गुभाषैः. १० घ. ट. दुष्टात्मानो. ११ ख—छ. झ. ञ. महामुने. १२ ख. भगवन्कस्यदेशोयं. १३ क—छ. झ. ञ. मया. १४ क. मुने.

एकोनत्रिंशः सर्गः ॥ २९ ॥

विश्वामित्रेणरामंप्रतिसिद्धाश्रमवृत्तान्तकथनारंभः ॥ १ ॥ बलिपराजितेन्द्रादिप्रार्थनयाविष्णुनादित्यांवामनत्वेनावतीर्यंयाच्ञाव्याजेनबलिनिग्रहपूर्वकंपुनर्देवानांस्वर्गेस्थापनम् ॥ २ ॥ विश्वामित्रेणरामंप्रतिसिद्धाश्रमपदस्यप्रवृत्तिनिमित्तकथनम् ॥ ३ ॥ तस्यैवस्वाश्रमत्वाभिधानपूर्वकंतत्रैवराक्षसहननस्यकर्तव्यत्वोक्तिः ॥ ४ ॥ ततोविश्वामित्रेणराघवाभ्यांसहसिद्धाश्रमप्रवेशपूर्वकंरामवचनाद्दीक्षाप्रवेशः ॥ ५ ॥

अथ तस्याप्रमेयस्य तं[१]द्वनं परिपृच्छतः ॥ विश्वामित्रो महातेजा व्याख्यातुमुपचक्रमे ॥ १ ॥
इह राम महाबाहो विष्णु[२]र्देववरः प्रभुः ॥ *वर्षाणि सु[३]बहून्येव तथा युगशतानि च ॥
[४]तपश्चरणयोगार्थमुवास [५]सुमहातपाः ॥ २ ॥
एष पूर्वाश्रमो राम वामनस्य महात्मनः ॥ सिद्धाश्रम इति ख्यातः सिद्धो ह्यत्र महातपाः ॥ ३ ॥
एतस्मिन्नेव काले तु राजा वैरोचनिर्बलिः ॥ निर्जित्य दैवतग[६]णान्सेन्द्रांश्च समरुद्गणान् ॥
कारयामास तद्राज्यं त्रिषु लोकेषु विश्रुतः ॥ ४ ॥
[[७]यज्ञं चकार [८]मतिमानसुरेन्द्रो [९]महाबलिः] ॥ बलेस्तु यजमानस्य देवाः साग्निपुरोगमाः ॥
समागम्य स्वयं चैव विष्णुमूचुरिहाश्रमे ॥ ५ ॥
बलिर्वैरोचनिर्विष्णो यजते यज्ञमुत्तमम् ॥ [१०]असमाप्ते क्रतौ तस्मिन्स्वकार्यमभिपद्यताम् ॥ ६ ॥

अथसिद्धाश्रमस्यनित्यंभगवत्संनिधिमत्त्वेनदिव्यदेशत्वंतत्संनिधानेपूर्वेषांसिद्धतपस्कत्वंभगवद्देशस्यैववस्तव्यत्वमित्येतत्प्रतिपादनमुखेनस्याण्वाश्रमाद्वैलक्षण्यं दर्शयत्येकोनत्रिंशे—अथेत्यादि। अप्रमेयस्य अचिन्त्यवैभवस्य मानुषभावनयापूर्ववृत्तमज्ञातमिवपृच्छतइत्यर्थः । चतुर्थ्यर्थेषष्ठी ॥ १ ॥ इहेतिसार्धश्लोकः । तपश्चरणयोगार्थं तपश्चरणफलसिध्यर्थं । यद्वा तपश्चरणंच योगश्चतदुभयार्थं । केचिदिहइहशब्दद्वयंपठन्ति तदाइहवनेतत्रापिइहप्रदेशइत्यर्थः ॥ २ ॥ वामनस्य वामनरूपेणावतरिष्यतः । पूर्वंविष्णुत्वेनरूपेणेहतपश्चचार पश्चाद्वामनरूपेणापीतितस्याश्रमस्यातिशयोदर्शितः । विष्णोरत्रतपश्चरणंलोकेतपसःप्रवर्तनाय । बदरिकाश्रमइव नारायणस्य । सिद्धाश्रमत्वंनिर्वक्ति—सिद्धइति । महातपाः काश्यपः । अत्र । हि यस्मात् । सिद्धः तपःफलंप्राप्तः । तस्मादेषसिद्धाश्रमोनाम ॥ ३ ॥ एतस्मिन्नितिसार्धश्लोकः । एतस्मिन्काले विष्णोस्तपश्चरणकाले । विरोचनः प्रह्लादसुतः तस्यापत्यंवैरोचनिः । समरुद्गणान् सवायुगणान् । कारयामास मन्त्रिभिरितिशेषः । तद्राज्यं इन्द्रराज्यं ॥ ४ ॥ बलेरिति । भावलक्षणेषष्ठी । बलौयजमाने यागंकुर्वाणे । साग्निपुरोगमाः पुरोगमेनाग्निनासहिताः । अग्निमुखत्वाद्देवानां । स्वयमेवसमागम्यइहाश्रमेतपश्चरन्तंविष्णुमूचुः ॥ ५ ॥ यज्ञंयजते यज्ञंकरोतीत्यर्थः । ओदनपाकंपचतीतिवत् । समाप्तश्चेन्नसजेतुंशक्यइत्यर्थः । स्वकार्यं

ति० । वचनं श्रुत्वेतिशेषः ॥ १ ॥ ति० यजतेःकर्त्रभिप्रायत्वादात्मनेपदं । नन्वसुरस्यबलेर्देवद्विषोयागाद्यनुपपत्तिः । यागतर्पणीयदेवताभावात् । इन्द्रादीनांतद्द्वेष्यत्वात् । नचशब्दमात्रंदेवतेतियुक्तं । अर्थवादप्रामाण्येनदेवतायाविग्रहवत्त्वस्योत्तरमीमांसायांसिद्धान्तितत्वादितिचेन्न । कर्मदेवाजानदेवभेदेनदेवानांद्वैविध्यात् । तत्रयेकर्मणादेवत्वंप्राप्तास्तेकर्मदेवाः । आजानदेवास्तुयज्ञमन्त्रार्थभूतामन्त्रेणनित्यसंबद्धाःकर्मदेवेभ्यःप्राचीनाएव । तत्कर्मदेवानांद्वेष्यत्वेप्याजानदेवानांयज्ञेतर्प्यत्वेननदोषः । विघ्नकर्तारोप्यत्रकर्मदेवा एव । यज्ञाद्यधिकाराभावोपिआजानदेवानामेव स्वयष्टव्यदेवतान्तराभावात् । कर्मदेवानांत्वस्त्येव । अतएवेन्द्रादीनांयज्ञादिश्रवणं नानुपपन्नमित्यन्यत्रविस्तरः ॥ ६ ॥

[पा०] १ ङ. च. छ. झ. ञ. वचनं. २ ङ. च. छ. झ. ञ. देवनमस्कृतः * अत्र इह रामेत्यर्धात्परं ख. पुस्तके—प्रदृश्यः सर्वभूतानांसर्वात्मासर्वलोकभृत् । मोहनार्थंतुलोकस्यसर्वेषांजगतांप्रभुः । इत्यर्धद्वयमधिकं दृश्यते. ३ क. ख. ग. ङ. च. छ. झ. ञ. सुबहूनीह. ४ ग. घ. तपसश्चरणार्थंहि. ५ ख. च. छ. समहातपाः. ६ ङ. च. झ. ञ. गणान्सेन्द्रान्सहमरुद्गणान्. ७ इदमर्धं क. ङ. छ. झ. ञ. ट. दृश्यते. ८ ङ. च. छ. झ. ञ. सुमहान्. क. भगवान्. ९ क. ङ. छ. झ. ञ. महाबलः. १० ङ. झ. असमाप्तव्रते.

ये चैनमभिवर्तन्ते याचितार इतस्ततः ॥ यच्च यत्र यथावच्च सर्वं तेभ्यः प्रयच्छति ॥ ७ ॥
स त्वं सुरहितार्थाय मायायोगमुपागतः ॥ वामनत्वं गतो विष्णो कुरु कल्याणमुत्तमम् ॥ ८ ॥
एतस्मिन्नन्तरे राम कश्यपोऽग्निसमप्रभः ॥ अदित्या सहितो राम दीप्यमान इवौजसा ॥ ९ ॥
देवीसहायो भगवान्दिव्यं वर्षसहस्रकम् ॥ व्रतं समाप्य वरदं तुष्टाव मधुसूदनम् ॥ १० ॥
तपोमयं तपोराशिं तपोमूर्तिं तपात्मकम् ॥ तपसा त्वां सुतप्तेन पश्यामि पुरुषोत्तमम् ॥ ११ ॥

देवकार्यं । आश्रितकार्यस्यस्वकार्यत्वात्तथोच्यते । अभिपद्यतां अभितःकार्त्स्न्येनसंपाद्यतां ॥ ६ ॥ ननु कथमसुरस्ययज्ञानुष्ठानं "यस्यैदेवतायैहविर्गृहीतं स्यात्तांध्यायेद्वषट्करिष्यन्साक्षाद्देवतदेवतांप्रीणाति" इतिश्रुतेः । तत्तद्देवध्यानपूर्वकंतत्तन्मन्त्रेणतत्तदुद्देशेनतत्तद्धविःप्रदानस्ययागत्वात्तस्यचदेवशत्रोरयोगात् । नचचतुर्थ्यन्तःशब्दोदेवतेतिवाच्यं । अचेतनप्रीणनासंभवात् । तत्प्रीतिमूलफलासिद्धेश्च । अतएव केवलाक्रियैवफलदेतिप्रत्युक्तं । अतोर्थवादाद्यनुरोधेनशब्दक्रियातिरिक्ता सचेतना वज्रहस्तत्वादिविशिष्टविग्रहवती देवता । नचविग्रहवत्त्वे युगपदनेकयागसंनिधानासंभवः । दिव्यशक्तिमत्त्वेननानाशरीरपरिग्रहसंभवेन तेषांसर्वयागसांनिध्यस्यसुलभत्वात् । तस्मान्नदेवतावैरिणोयागसंभवइति । उच्यते । नायंबलिनाक्रियमाणोयागइन्द्रादिदेवताराध्यकः । येनोक्तदोषःस्यात् । किंतु भगवदाराधनभूतःकश्चिद्यागविशेषः । तस्यविष्णुभक्तत्वेनप्रसिद्धत्वात् । तर्हिभक्तयज्ञविघ्नंविष्णुःकथंकुर्यात् । स्वभक्तस्यापिस्वभक्तविरोधित्वंभगवतोऽसह्यं । ततःपुत्रान्तरविरोधिपुत्रशिक्षणवत् स्वाश्रितदेवविरोधिशिक्षणंयुक्तमेव । अतएवोक्तं "ममभद्भक्तभक्तेषुप्रीतिरभ्यधिकाभवेत्" इति । तर्हितस्यधार्मिकस्यकथंनिग्रहःस्यात्तत्राह—येचेत्यादिश्लोकद्वयेन । ये यत्र वस्त्रवाहनादिषुयद्वस्तु याचितारःयाचिष्यमाणाः सन्तः इतस्ततः देशात् एनमभिवर्तन्ते तत्सर्वंतेभ्यःयथावत् सत्कारपूर्वकंप्रयच्छति ॥ ७ ॥ माया विष्णुत्वाच्छादिकाशक्तिःतस्यायोगं संबंधमुपागतः । वामनत्वं वामनरूपत्वं गतः । कल्याणं अस्मत्कार्यंकुरु । तस्मिन्नौदार्याख्योमहागुणोवर्तते । तेनत्वंवामनवेषोभूत्वा याच्ञापदेशेन तद्राज्यमपहृत्यदेहीतिभावः ॥८॥ एतस्मिन्नितिश्लोकद्वयं । एतस्मिन्नन्तरे देवप्रार्थनावसरे । कश्यपोऽदित्यासहितोव्रतंसमाप्य विष्णूद्देशेनकृतंव्रतंसमाप्य । वरदंवरदानायसंनिहितंविष्णुं देवीसहायःसन् तुष्टाव । अत्ररामपदद्वयंरूढ्यायोगेनचनिर्वाह्यं । व्रतानुष्ठानकालेवरकालेचदेवीसाहित्यद्योतनायद्विःप्रयोगोदेव्याः । अयमत्रक्रमः " सोकामयत बहुःस्यांप्रजायेयेति सतपोतप्यत" इत्युक्तरीत्या विष्णुर्जगद्रक्षणचिन्तापरोत्रदेशेचिरमदृश्यउवास । तद्विदित्वातमेवपुत्रंलब्धुकामःकश्यपोदेव्यासहदिव्यवर्षसहस्रनिर्वर्त्यंविष्ण्वाराधनरूपं किंचिद्व्रतमनुष्ठाय तदन्तेवरदानायदृश्यमानंविष्णुंतुष्टाव । तस्मिन्नेवावसरेदेवाश्चागताःप्रार्थितवन्तइति ॥ ९–१० ॥ तपोमयं तपःप्रचुरं । प्राचुर्यंचाराध्यत्वेन । तपसाराध्यमित्यर्थः । तपोराशिं तपोराशिस्वरूपं तपःफलदमितियावत् । तपोमूर्तिं ज्ञानस्वरूपं । तपआलोचनइतिधातोरसुन्प्रत्ययः । तपात्मकं तपस्स्वभावं । ज्ञानगुणकमित्यर्थः । उक्ताद्धातोर्घञर्थेकविधानमितिकः । पुरुषोत्तमं बद्धमुक्तोभयावस्थाजीवाद्विलक्षणं । त्वां । सुतप्तेन अनन्यप्रयोजनतयानुष्ठितेन । तपसा आराधनेन । पश्यामि साक्षात्करोमि । सर्वकर्मसमाराध्यंसर्वकर्मफलप्रदं ज्ञानस्वरूपत्वेनसमस्तहेयप्रत्यनीकज्ञानानन्दाद्यपरिमितगुणवत्त्वेनचसर्वस्माद्विलक्षणंत्वांसा-

ति० रामेतिद्विस्संबोधनंस्वाश्रमसंनिधानेनरामपृष्टतन्महत्त्वकथनेनहर्षातिशयाच्चबोध्यं । अदित्यासहितोव्रतंसमाप्य देवीसहायस्तुष्टावेत्यन्वयः । देव्यदितिरेव । यद्वादेवीसरस्वती । शि० रामदीप्यमानः रामनाम्नाप्रकाशमानः । देवीसहायः देवीपार्वती सहायोयस्यसभगवान् शंभुरिव ओजसाइव ओजस्तुल्ययाअदित्यासहितः कश्यपः दिव्यवर्षसहस्रकं दिव्यवर्षसहस्रसाध्यंव्रतं समाप्य मधुसूदनंतुष्टावेत्यन्वयः । इवशब्दउभयान्वयी ॥ ९ ॥ १० ॥ शि० तपोमयं तपसा वेदबोधिताभिलाषरहितकृच्छ्रचान्द्रायणादिना मयते अन्तःकरणशुद्धिपूर्वकज्ञानोत्पत्तिद्वाराप्राप्नोतितं । अतएव तपोराशिं तपसांराशिरसमूहःयस्मै । यत्प्राप्तिफलकमेवतपआद्याचरणंतं । अतएवतपोमूर्तिं तपोयुक्तामूर्तिर्विग्रहोयस्यतं । लोकशिक्षणार्थंतपश्चरन्तमित्यर्थः । तपात्मकं तपोज्ञानंश्चात्मायस्यतं ॥ ११ ॥

[पा०] १ ग—छ. झ. ञ. मुपाश्रितः, २ घ, च. छ. ञ. ट. दिव्यवर्ष. ३ क. च, छ. ञ, तपोधनम्.

शरीरे तव पश्यामि जगत्सर्वमिदं प्रभो ॥ त्वमनादिरनिर्देश्यस्त्वामहं शरणं गतः ॥ १२ ॥
तमुवाच हरिः प्रीतः कश्यपं धूतकल्मषम् ॥ वरं वरय भद्रं ते वरार्होसि मतो मम ॥
[किमिच्छसि वरं श्रेष्ठ वरदोसि महाद्युते ।] ॥ १३ ॥
तच्छ्रुत्वा वचनं तस्य मारीचः कश्यपोऽब्रवीत् ॥ १४ ॥
अदित्या देवतानां च मम चैवानुयाचतः ॥ वरं वरद सुप्रीतो दातुमर्हसि सुव्रत ॥ १५ ॥
पुत्रत्वं गच्छ भगवन्नदित्या मम चानघ ॥ भ्राता भव यवीयांस्त्वं शक्रस्यासुरसूदन ॥
शोकार्तानां तु देवानां साहाय्यं कर्तुमर्हसि ॥ १६ ॥
अयं सिद्धाश्रमो नाम प्रसादात्ते भविष्यति ॥ सिद्धे कर्मणि देवेश उत्तिष्ठ भगवन्नितः ॥ १७ ॥
अथ विष्णुर्महातेजा अदित्यां समजायत ॥ [छत्री भिक्षुकरूपेण कमण्डलुशिखोज्वलः] ॥
वामनं रूपमास्थाय वैरोचनिमुपागमत् ॥ १८ ॥
[तं दृष्ट्वाऽसुरराजेन्द्रो वामनत्वाच्च विस्मितः ॥ माधवोऽयमिति ज्ञात्वा पूजयामास धर्मतः ॥
पूजितस्तेन धर्मात्मा सर्वलोकहिताय वै ॥ १९ ॥]
[*आसाद्य यजमानं तमुवाच भगवान्हरिः ॥ स्वस्ति तेऽस्तु महाराज यज्ञश्चातीव शोभनः ॥२०॥
वयं दानार्थिनो राजञ्श्रुत्वा यज्ञमनुत्तमम् ॥ त्वां दृष्ट्वा तव योगेषु किंचिल्लब्धुमिहागताः ॥ २१ ॥
वामनेनैवमुक्तस्तु मुदा राजा तदाऽब्रवीत् ॥ अद्य मे सफलो यज्ञः कृतार्थोस्म्यद्य वामन ॥ २२ ॥
त्वदर्थं कल्पितं चैव मम सर्वस्वमेव च ॥ धनौघं रत्नराशिं वा भूषणं धान्यसंचयम् ॥ २३ ॥
ग्रामं वा नगरं वाऽपि राष्ट्रं वा यानमेव वा ॥ हस्त्यश्वरथपत्तीर्वा त्वं लभस्वान्यमेव वा ॥
किमिच्छसि महाबाहो तद्ददामि तवानघ ॥ २४ ॥
एवमुक्तस्तदा राज्ञा भगवान्पुरुषोत्तमः ॥ उवाचेषत्स्मितं कृत्वा यजमानं महाबलिम् ॥ २५ ॥
एतैः किं मम राजेन्द्र तैस्तु नास्ति प्रयोजनम् ॥ अस्मत्पादत्रयाक्रान्तां देहि भूमिं विभो तदा ॥ २६ ॥
श्रुत्वा तद्वामनेनोक्तं स्मितं कृत्वाऽसुरोत्तमः ॥ येनेष्टं पूर्यते ब्रह्मंस्तत्कुर्मेति ततोऽब्रवीत् ॥ २७ ॥
वामनाय महीं दातुं निश्चितेऽसुरसत्तमे ॥ तं निवार्य महाराजं प्राह शुक्रो द्विजोत्तमः ॥ २८ ॥
विरिञ्चभवशक्राद्या योगिनश्च सुरासुराः ॥ यं न जानन्ति वेदाश्च स एषो विष्णुरव्ययः ॥ २९ ॥
दानारक्ते ततः शुक्रे शुक्रं राजपुरोहितम् ॥ गृहीत्वा ताडयामास वैनतेयो महाबलः ॥ ३० ॥

क्षात्करोमि । एतदेवमेपरमप्रयोजनमित्यर्थः ॥ ११ ॥ इदं चेतनाचेतनात्मकं सर्वजगत् । तवशरीरेस्मिन्पश्यामि । एवं नु गीतं "पश्यामिदेवांस्तवदेवदेहेसर्वांस्तथाभूतविशेषसंघान् । ब्रह्माणमीशंकमलासनस्थमृषींश्चसर्वानुरागांश्चदिव्यान्" इति । यद्वा जगत्सर्वंशरीरमित्युक्तत्वात् शरीरतयापश्यामीत्यर्थः । त्वमनादिः उत्पत्तिरहितः । अनिर्देश्यः । एतावानितिपरिच्छेत्तुमशक्यइत्यर्थः । अतस्त्वामहं शरणं रक्षितारं । गतः ॥ १२–१३ ॥ तच्छ्रुत्वेत्यर्धं । मारीचः मरीचिपुत्रः ॥ १४ ॥ अदित्याः याचमानायाः । देवतानां याचमानानामित्यूह्यम् ॥ १५ ॥ पुत्रत्वमित्यादिसार्धश्लोकएकान्वयः ॥ १६ ॥ देशेप्यनुग्रहःक्रियतामित्याह— अयमिति । ते प्रसादात् कर्मणि मत्तपसि । सिद्धेसति । त्वयिमेपुत्रत्वंप्राप्तइत्यर्थः । अयंसिद्धाश्रमोनामभवि-

---

ति० । साहाय्यं बलिच्छलरूपं । शि० इन्द्रस्यभ्राताभवेत्यनेनइन्द्रेप्सितकार्यकारित्वंत्वस्मिन्ननुसंधेयमितिप्रार्थनासूचिता । असुरसूदनेत्यनेनसनातनोसुरद्वेषस्त्वय्यस्तीतिबोधितं । तेनासुरानिरसनीयाभवतेतिद्योतितम् ॥ १६ ॥

[पा०] १ इदमर्धं च. छ. दृश्यते. २ ङ. झ. याचितम्. ३ इदमर्धं च. छ. दृश्यते. ४ इदमर्धत्रयं च. छ. दृश्यते.
* अत्रकुण्डान्तर्गताश्चतुर्दशश्लोकाः क. पुस्तकेऽधिकादृश्यन्ते.

पत्न्या सह विनिश्चित्य यजमानो महाबलिः ॥ मायारूपेण देवेशो मम यज्ञं गतो यदि ॥
तदैतद्यज्ञसाफल्यमेवमस्त्विति चाब्रवीत् ॥ ३१ ॥
इति मत्वोदकं दत्तं वामनाय महात्मने ॥ तव पादत्रयाक्रान्तां गृहाणाद्य महीं प्रभो ॥ ३२ ॥
उदके स्पृष्टमात्रे तु विश्वरूपधरो हरिः ॥ तत्रस्थ एव ववृधे येन पूर्णं जगत्रयम् ॥
सायुधैर्बाहुभिः पूर्णा दिग्विदिक्सर्वमेव हि] ॥ ३३ ॥
त्रीन्क्रमानथ[1] भिक्षित्वा प्रतिगृह्य च मानदः[2] ॥ आक्रम्य लोकाँल्लोकात्मा[3] सर्वलोकहिते[4] रतः ॥३४॥
महेन्द्राय पुनः प्रादान्नियम्य बलिमोजसा ॥ त्रैलोक्यं स महातेजाश्चक्रे शक्रवशं पुनः ॥ ३५ ॥
तेनैष[5] पूर्वमाक्रान्त आश्रमः श्रमनाशनः ॥ मया[6] तु भक्त्या तस्यैष[7] वामनस्योपभुज्यते[8] ॥ ३६ ॥
एतमाश्रममायान्ति राक्षसा विघ्नकारिणः ॥ अत्रैव[9] पुरुषव्याघ्र हन्तव्या दुष्टचारिणः ॥ ३७ ॥
अद्य गच्छामहे राम सिद्धाश्रममनुत्तमम् ॥ तदाश्रमपदं तात तवाप्येतद्यथा मम ॥ ३८ ॥
[इत्युक्त्वा[10] परमप्रीतो गृह्य[11] रामं सलक्ष्मणम्] प्रविशन्नाश्रमपदं व्यरोचत महामुनिः ॥
शशीव गतनीहारः पुनर्वसुसमन्वितः ॥ ३९ ॥
तं दृष्ट्वा मुनयः सर्वे सिद्धाश्रमनिवासिनः ॥ उत्पत्योत्पत्य सहसा विश्वामित्रमपूजयन् ॥ ४० ॥
यथार्हं[12] चक्रिरे पूजां विश्वामित्राय धीमते ॥ तथैव राजपुत्राभ्यामकुर्वन्नतिथिक्रियाम् ॥ ४१ ॥
मुहूर्तमिव[13] विश्रान्तौ राजपुत्रावरिंदमौ ॥ प्राञ्जली मुनिशार्दूलमूचतू रघुनन्दनौ ॥ ४२ ॥
अद्यैव दीक्षां प्रविश भद्रं ते मुनिपुङ्गव ॥ सिद्धाश्रमोऽयं सिद्धः स्यात्सत्यमस्तु वचस्तव ॥ ४३ ॥
एवमुक्तो महातेजा विश्वामित्रो महामुनिः[14] ॥ प्रविवेश ततो[15] दीक्षां नियतो नियतेन्द्रियः ॥ ४४ ॥

ष्यति । तस्मादितआश्रमादुत्तिष्ठ । अवतारयेतिशेषः ॥१७–३३॥ श्लोकद्वयमेकान्वयं । क्रमान् पदविक्षेपान् । भिक्षित्वा याचित्वा । प्रतिगृह्य । मानंद्यतिखण्डयतीतिमानदः । निरभिमानोभिक्षित्वेत्यर्थः । लोकाक्रमणेहेतुर्लोकात्मेति । वामनरूपेणयाचित्वा सर्वलोकव्यापिशरीरेणक्रान्त्वेत्यर्थः । नियम्य बद्ध्वा । त्रैलोक्यस्यापिपदद्वयक्रान्तत्वेन तृतीयपदालाभात्तदर्थंबद्ध्वेत्यर्थः ॥३४–३५॥ प्रकृतमुपसंहरति—तेनेति । तेन वामनेन । श्रमनाशनः संसारश्रमनिवर्तकः । संनिहितंस्थाण्वाश्रमंविहाय भवान्किमर्थमत्रस्थितइत्यत्राह—मयात्विति । मयातु देवतान्तरेषुपरत्वबुद्धिरहितेन । भक्त्या विष्णुभक्त्या । तस्य वामनस्य । एषः आश्रमः । उपभुज्यते आश्रीयते । वामनस्येयंभूमिरितिकेवलंतामेवा जिघ्रन्वर्त इत्यर्थः ॥३६–३७॥ गच्छामहे गच्छामः । तातेत्युपलालने । तदेतदाश्रमपदंयथाम्म तथातव । स्वमितिशेषः ॥ ३८ ॥ गतनीहारः गतहिमः । पुनर्वसुभ्यांसमन्वितइतिरामलक्ष्मणसाम्यापेक्षया ॥ ३९ ॥ उत्पत्योत्पत्येतिप्रीत्यतिशयोक्तिः । आगत्यागत्येत्यर्थः । अनेननिरन्तरंतदागमनोक्त्यामुनिबहुत्वमुच्यते ॥ ४० ॥ यथार्हं मुनियोग्यतामनतिक्रम्य ॥ ४१ ॥ मुहूर्तं अल्पकालं । विश्रान्ताविवेतिमनुष्यभावेनोच्यते ॥ ४२ ॥ अद्यैव प्रवेशदिनएव । अयंसिद्धाश्रमःसिद्धःस्यात् त्वद्यज्ञसिद्ध्याअन्वर्थसिद्धसंज्ञोस्तु । सत्यमस्तुवचस्तव "अत्रैवपुरुषव्याघ्रहन्तव्यादुष्टचारिणः" इतिवचइत्यर्थः । राक्षसान्सर्वथा हनिष्यइतिभावः ॥ ४३ ॥ नियतः निगृहीतान्तः-

---

ति० लोकार्था त्रैलोक्याक्रमणार्थी ॥ ३४ ॥ शि० तेन वामनेन । श्रमनाशनोऽयमाश्रमः । भक्त्या त्वद्विषयकप्रीत्या । पूर्वमेवआक्रान्तः सेवितः मयापित्वद्विषयकप्रीत्यैवतस्यवामनस्यायमाश्रमोनिषेव्यते । एतेन रामस्याखेटखेलनवनंतदितिध्वनितं । तेनाप्रकटरूपेण सदैव तत्ररामस्यस्थितिरितिव्यञ्जितम् । तेनरामप्रश्नोविश्वामित्रज्ञानपरीक्षार्थमेवेतिव्यक्तं ॥ ३६ ॥

[पा०] १ च. ट. त्रीन्पदानथ. २ क. च. छ. ञ. वामनः. ङ. झ. मेदिनीम्. ३ ङ. झ. ञ. ट. लोकाँल्लोकार्थी. ४ ग. घ. भूतहिते. ५ ङ. च. छ. झ. ञ. ट. तेनैव. ६ ग.—छ. झ. ञ. मयापि. ७ ङ. च. तस्यैव. ८ क. ख. वामनस्यनिषेव्यते. ९ क.—छ. झ. ञ. ट. अत्रते. १० इदमर्धं च. छ. दृश्यते. ११ ख. रामं लक्ष्मणसंयुम्. १२ ख. चक्रुःपूजांयथार्हते. १३ क. ग—छ. झ. ञ. मुहूर्तमथ. १४ ग. च. झ. ञ. महानृषिः. १५ क—छ. झ. ञ. तदा.

कुमारावपि तां रात्रिमुषित्वा सुसमाहितौ ॥ प्रभातकाले चोत्थाय पूर्वां सन्ध्यामुपास्य च ॥ ४५ ॥
स्पृष्टोदकौ शुची जप्यं समाप्य नियमेन च ॥ हुताग्निहोत्रमासीनं विश्वामित्रमवन्दताम् ॥ ४६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ॥ ३० ॥

विश्वामित्रेणदिनषट्कनिर्वर्त्येयज्ञेसमुपक्रान्तेराघवाभ्यांदिनपञ्चकमनिद्रंतद्रक्षणम् ॥ १ ॥ षष्ठेऽहनिसुबाहुमारीचादिभिर्गगनमेत्यपरितोरुधिरवर्षणम् ॥ २ ॥ रामेणमानवास्त्रेणमारीचस्यसागरेप्रक्षेपणम् ॥ ३ ॥ तथासुबाहुवधपूर्वकमितरेषांवायव्येन निरसनम् ॥ ४ ॥ विश्वामित्रेणयज्ञसमापनपूर्वकंरामप्रशंसनम् ॥ ५ ॥

अथ तौ देशकालज्ञौ राजपुत्रावरिंदमौ ॥ देशे काले च वाक्यज्ञावब्रूतां कौशिकं वचः ॥ १ ॥
भगवञ्श्रोतुमिच्छावो यस्मिन्काले निशाचरौ ॥ संरक्षणीयौ तौ ब्रह्मन्नातिवर्तेत तत्क्षणम् ॥ २ ॥
एवं ब्रुवाणौ काकुत्स्थौ त्वरमाणौ युयुत्सया ॥ सर्वे ते मुनयः प्रीताः प्रशशंसुर्नृपात्मजौ ॥ ३ ॥
अद्यप्रभृति षड्रात्रं रक्षतं राघवौ युवाम् ॥ दीक्षां गतो ह्येष मुनिर्मौनित्वं च गमिष्यति ॥ ४ ॥
तौ च तद्वचनं श्रुत्वा राजपुत्रौ यशस्विनौ ॥ अनिद्रौ षडहोरात्रं तपोवनमरक्षताम् ॥ ५ ॥
उपासांचक्रतुर्वीरौ यत्तौ परमधन्विनौ ॥ ररक्षतुर्मुनिवरं विश्वामित्रमरिंदमौ ॥ ६ ॥
अथ काले गते तस्मिन्षष्ठेऽहनि समागते ॥ सौमित्रिमब्रवीद्रामो यत्तो भव समाहितः ॥ ७ ॥
रामस्यैवं ब्रुवाणस्य त्वरितस्य युयुत्सया ॥ प्रजज्वाल ततो वेदिस्सोपाध्यायपुरोहिता ॥ ८ ॥

करणः ॥ ४४ ॥ कुमारावितिश्लोकद्वयं । स्पृष्टोदकौ दत्तार्घ्यौ नियमेनजप्यंसमाप्य । अग्नेर्होत्रंहोमः औपासनहोमः । दीक्षामध्ये " नाग्निहोत्रंनदर्शपूर्णमासाभ्यांयजतइति " अग्निहोत्रस्यनिषिद्धत्वात् । मानसमग्निहोत्रमित्येके ॥ ४५-४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनत्रिंशःसर्गः ॥ २९ ॥ ॥

सुबाहुमारीचप्रभृतिदुष्टनिग्रहस्त्रिंशे—अथताविल्यादि । देशकालज्ञावितिहेतुगर्भं । देशकालज्ञत्वादुचिते-देशेउचितेकालेचाब्रूतां ॥ १ ॥ संरक्षणीयौ निवारणीयौ । धातूनामनेकार्थत्वात् । विपरीतलक्षणावा । यद्वा इष्टप्राप्तिरनिष्टनिवृत्तिश्चरक्षणं । अत्र अनिष्टनिवृत्तिः । तत्क्षणं सकालः । नातिवर्तेत अज्ञातोनातिक्रामेत् ॥ २ ॥ युयुत्सया योद्धुमिच्छया । प्रशशंसुः प्रोचुः ॥ ३ ॥ रक्षतमिति लोण्मध्यमपुरुषद्विवचनं । एतद्दिनमारभ्य षड्रात्रपर्यन्तं मुनिर्मौनित्वंगमिष्यति । अतोवयंवदाम इत्यर्थः ॥ ४ ॥ षडहोरात्रं षण्णामहोरात्राणांसमाहारः षडहोरात्रंतत् ॥ ५ ॥ उपासांचक्रतुः ऊषतुः । यत्तौ सन्नद्धौ । परमंधनुर्ययोस्तौ परमधन्विनौ । व्रीह्यादित्वादिनिः ॥ ६ ॥ कालेपञ्चदिनात्मके गते । तस्मिन् प्रधाने । अहनि सुत्यादिने । समाहितः एकाग्रचित्तः । अत्राद्यप्रभृतिषड्रात्रमित्युक्त्या पूर्वसर्गेतत्पूर्वदिने दीक्षाप्रवेशोक्त्याच सप्तरात्रनिर्वर्त्यःसत्रविशेषोऽयमिति गम्यते ॥ ७ ॥ वेदिप्रज्वलनमुत्पातोराक्षसागमसूचकः । उपाध्यायः विश्वामित्रः । पुरोहिताः ऋत्विजः ॥ ८ ॥

ति० कुमाराविव स्कन्दविशाखाविव ॥ ४५ ॥ इत्येकोनत्रिंशस्सर्गः ॥ २९ ॥

शि० संरक्षणीयौ । संरक्ष्यतेयागआभ्यामितिअपादानेअनीयर् । किंचसंरक्षणीयौ दुष्टकर्महेतुकनरकपातादितोनिवर्तनीयौ ॥ २ ॥ वि० उपाध्यायोब्रह्मा । पुरोहितउपद्रष्टा । इदमृत्विगन्तराणामप्युपलक्षणम् ॥ ८ ॥

[पा०] १ ङ. च. छ. झ. ञ. कुमाराविव. २ च. स्पृष्टोदकं. ख. शुचीकृतब्रह्मजपौसमाप्यनियमानपि. ङ. झ. प्रशुचीपरमंजाप्यं. ३ ख. हुताग्निं. ४ ङ. झ. ञ. संरक्षणीयौतौब्रूहि. च. छ. संशिक्षणीयौतौब्रह्मन्. ख. तावागमिष्यतोब्रह्मन्. ५ ग. ङ. च. छ. झ. ञ. ट. रक्षतां. ६ क. ग. ङ. च. झ. ञ. तौतुतद्वचनं. ख. तेषांतुवचनं. ७ ख. ग. युक्तौपरमधन्विनौ. छ. यत्तौपरमधार्मिकौ. घ. यत्तापरमरिंदमौ. ८ मरिंदमं. ९ ङ. झ. तथागते.

सदर्भचमसस्रुका ससमित्कुसुमोच्चया ॥ विश्वामित्रेण सहिता वेदिर्जज्वाल सर्त्विजा ॥ ९ ॥
मन्त्रवच्च यथान्यायं यज्ञोऽसौ संप्रवर्तते ॥ [एवं प्रवर्तिते यज्ञे विश्वामित्रस्य धीमतः ॥]
आकाशे च महाञ्शब्दः प्रादुरासीद्भयानकः ॥ १० ॥
आवार्य गगनं मेघो यथा प्रावृषि निर्गतः ॥ तथा मायां विकुर्वाणौ राक्षसावभ्यधावताम् ॥ ११ ॥
मारीचश्च सुबाहुश्च तयोरनुचराश्च ये ॥ आगम्य भीमसंकाशा रुधिरौघमवासृजन् ॥ १२ ॥
सा तेन रुधिरौघेण वेदिर्जज्वाल मण्डिता ॥ [दृष्ट्वा वेदिं तथाभूतां सानुजः क्रोधसंयुतः] ॥
सहसाऽभिद्रुतो रामस्तानपश्यत्ततो दिवि ॥ १३ ॥
तावापतन्तौ सहसा दृष्ट्वा राजीवलोचनः ॥ [असंभ्रान्तस्त्वरन्किंचित्सज्यं कृत्वा महद्धनुः] ॥
लक्ष्मणं त्वभिसंप्रेक्ष्य रामो वचनमब्रवीत् ॥ १४ ॥
पश्य लक्ष्मण दुर्वृत्तान्राक्षसान्पिशिताशनान् ॥ मानवास्त्रसमाधूताननिलेन यथा घनान् ॥ १५ ॥
[करिष्यामि न सन्देहो नोत्सहे हन्तुमीदृशान् ॥ इत्युक्त्वा वचनं रामश्चापे संधाय वेगवान् ॥ १६ ॥
एवं वदन्तं तं दृष्ट्वा धनुःप्रवरपाणिनम् ॥ बालोयमिति विज्ञाय तमनादृत्य दुर्मती ॥
विश्वामित्रस्य तां वेदिं सत्वरावभ्यधावताम् ॥ १७ ॥
तावुदीक्ष्य त्वरन्रामश्चापमायम्य वीर्यवान्] ॥ मानवं परमोदारमस्त्रं परमभास्वरम् ॥
चिक्षेप परमक्रुद्धो मारीचोरसि राघवः ॥ १८ ॥
स तेन परमास्त्रेण मानवेन समाहतः ॥ संपूर्णं योजनशतं क्षिप्तः सागरसंप्लवे ॥ १९ ॥
विचेतनं विघूर्णन्तं शीतेषुबलताडितम् ॥ निरस्तं दृश्य मारीचं रामो लक्ष्मणमब्रवीत् ॥ २० ॥

एतद्विवृणोति—सदर्भेति । चमसंनाम पानपात्रं । स्रुक् होमपात्रं । उच्चयः समूहः । कुसुमोच्चयोलङ्कारार्थः ॥ ९ ॥ ननु रक्षोघ्नमन्त्रजपेक्रियमाणे कथंराक्षसागमनप्रसक्तिः । नकथंचित् । किंतु दूरतएवाकाशेमेघवद्रुधिरंववर्षुः । तदिदमाह—आकाशइति । भयानकः भयंकरः ॥१०॥ प्रावृषि वर्षाकाले । निर्गतोमेघोयथा-तथाऽभ्यधावतां ॥ ११ ॥ भीमसंकाशाः भयंकराः ॥ १२ ॥ अभिद्रुतः अभिमुखंधावन् ॥ १३—१४ ॥ पिशिताशनान्मांसभक्षकान् । एतद्विधूननार्थंमानवास्त्रं प्रयोक्ष्यइतिभावः ॥ १५—१७ ॥ अत्रादौइत्युक्त्वेत्युपस्कार्यं । ननुसर्वराक्षसेष्वस्त्रप्रयोगंप्रतिज्ञाय मारीचोरसितत्प्रयोगःकथमितिचेन्न । पूर्वश्लोकेराक्षसशब्दस्यमारीचमात्रपरत्वात् ॥ १८ ॥ सागरसंप्लवे समुद्रपूरे । अत्रगायत्रीद्वितीयाक्षरंसः ॥ १९ ॥ शीतेषुशब्दोवयववृत्त्यामानवास्त्रेवर्तते । दृश्य दृष्ट्वा । मारी-

---

शि० मन्त्रवदिति मन्त्रउद्यतेउच्यतेअस्मिन्निति । किंचमन्त्रेणवन्यतेरच्यतेइतिमन्त्रवत् ॥ १० ॥ ति० समुक्षितां अभ्याशेइतिशेषः ॥ १३ ॥ ति० ईदृशान् स्थितायुश्शेषान् दुर्बलान्वा ॥ १६ ॥

[पा०] १ ट. यज्ञोऽयं. ख. यज्ञोवै. २ इदमर्धं च. छ. दृश्यते. ३ ख. सुमहान्. ४ ख. मेघौयथाप्रावृषिनिर्गतौ. ५ ख. प्रकुर्वाणौ. ६ क. ख. ङ. च. छ. ञ. ट. चरास्तथा. ७ ख. च. भीमसंकाशान्रुधिरौघानवा. ट. मेघसंकाशाः. ८ ङ. झ. ञ. तांतेनरुधिरौघेणवेदिंवीक्ष्यसमुक्षिताम्. ९ इदमर्धं ख. दृश्यते. १० क. च. छ. द्रुतान्रामः. ११ इदमर्धं ख. दृश्यते. १२ इदंसार्धपद्यद्वयं ख. दृश्यते. १३ 'चापेशरंसंधायवेगवानासीदित्यध्याहारेणयोजना. च. ट. चापंसंधाय. * एवंब्रुवाणंमारीचो-बालकंहेममालिनम् । तस्यानुजंचहेमाभंशूरंतूच्छ्रितधन्विनम् । १ । राघवौश्यामहेमाभौतावपश्यत्तदादिवि । दृष्ट्वातेजस्विनौतौ चक्षवधूतश्चतेजसा । २ । अवज्ञायसतौविप्रान्प्रधर्षयितुमारभत् । तमापतन्तंरामस्तुप्रहसँल्लीलयाततः । ३ ।' एतच्छ्लोकत्रयं–मानवंपरमोदारमित्यतःपूर्वं कुण्डलनान्तर्गतपाठप्रतिनिधित्वेन च. छ. पाठयोर्दृश्यते. १४ ख. समाहितः. १५ ङ. च. छ. झ. ञ. पीडितं.

[पश्य लक्ष्मण शीतेषुं मानवं धर्मसंहितम् ॥ मोहयित्वा नयत्येनं न च प्राणैर्वियुज्यत] ॥२१॥
इमानपि वधिष्यामि निर्घृणान्दुष्टचारिणः ॥ राक्षसान्पापकर्मस्थान्यज्ञघ्नान्रुधिराशनान् ॥ २२ ॥
[इत्युक्त्वा लक्ष्मणं चाशु लाघवं दर्शयन्निव ॥] संगृह्यास्त्रं ततो रामो दिव्यमाग्नेयमद्भुतम् ॥
सुबाहूरसि चिक्षेप स विद्धः प्रापतद्भुवि ॥ २३ ॥
शेषान्वायव्यमादाय निजघान महायशाः ॥ राघवः परमोदारो मुनीनां मुदमावहन् ॥ २४ ॥
स हत्वा राक्षसान्सर्वान्यज्ञघ्नान्रघुनन्दनः ॥ ऋषिभिः पूजितस्तत्र यथेन्द्रो विजये पुरा ॥ २५ ॥
अथ यज्ञे समाप्ते तु विश्वामित्रो महामुनिः ॥ निरीतिका दिशो दृष्ट्वा काकुत्स्थमिदमब्रवीत् ॥ २६ ॥
कृतार्थोस्मि महाबाहो कृतं गुरुवचस्त्वया ॥ सिद्धाश्रममिदं सत्यं कृतं राम महायशः ॥ २७ ॥
[स हि रामं प्रशस्यैवं ताभ्यां सन्ध्यामुपागमत्] ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिंशः सर्गः ॥ ३० ॥

एकत्रिंशः सर्गः ॥ ३१ ॥

विश्वामित्रेणरामंप्रतिमिथिलायांजनकयज्ञप्रस्तावनेनतत्रत्यदिव्यधनुःप्रभावादिनिवेदनपूर्वकंराघवाभ्यांसहमुनिभिश्रमिथिलांप्रतिप्रस्थानम् ॥ १ ॥ विश्वामित्रादिभिःसहसायाह्नेशोणाकूलंगतेनरामेणमुनिंप्रतितत्स्यदेशस्यपुरावृत्तकथनप्रार्थना ॥ २ ॥

अथ तां रजनीं तत्र कृतार्थौ रामलक्ष्मणौ ॥ ऊषतुर्मुदितौ वीरौ प्रहृष्टेनान्तरात्मना ॥ १ ॥
प्रभातायां तु शर्वर्यां कृतपौर्वाह्णिकक्रियौ ॥ विश्वामित्रं मुनींश्चान्यान्सहितावभिजग्मतुः ॥ २ ॥
अभिवाद्य मुनिश्रेष्ठं ज्वलन्तमिव पावकम् ॥ ऊचतुर्मधुरोदारं वाक्यं मधुरभाषिणौ ॥ ३ ॥
इमौ स्म मुनिशार्दूल किंकरौ समुपस्थितौ ॥ आज्ञापय यथेष्टं वै शासनं करवाव किम् ॥ ४ ॥

चस्यप्राणरक्षणंभाविकार्यान्तरसाधनाय ॥२०-२१॥ वधप्रयोजकानिनिर्घृणत्वादीनि ॥ २२ ॥ अद्भुतं-यथातथाचिक्षेप ॥ २३ ॥ निजघान हिंसितवान् ॥ २४ ॥ पुराविजये असुरविजये ॥ २५॥ निरीतिकाः निर्बाधाः ॥ २६ ॥ गुरुवचः पितृवचः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

एवंकृतार्थोविश्वामित्रोजनकसुतात्वेनावतीर्णयाश्रियारामंयोजयितुंव्याजेनमिथिलाप्रस्थानंप्रस्तौत्येकत्रिंशे—अथेत्यादि । कृतार्थौ कृतविश्वामित्रप्रयोजनौ । प्रहृष्टेन संतुष्टेन । अन्तरात्मना अन्तःकरणेन । उपलक्षितौ ॥ १ ॥ सहितौ अविनाभूतौ ॥२॥ मधुरोदारोक्तौ हेतुःमधुरभाषिणाविति ॥३॥ स्मेतिभूतार्थसूचकमव्ययं । इमौस्म आज्ञापितंसर्वमनुष्ठितवन्ताविल्यर्थः । मुनिशार्दूल ब्रह्मध्यायिपुश्रेष्ठ । अनेननिरवधिकभक्तिमत्त्वं सूचितं । किंकरौ "भक्तिक्रीतोजनार्दनः" इत्युक्तरीत्या त्वयाक्रीतौ । समुपस्थितौ भक्तंत्वांविनाक्षणमपिस्थातुमक्षमौ । "शरतल्पगतोभीष्मःशाम्यन्निवहुताशनः ॥ मां ध्यातिपुरुषव्याघ्रस्ततोमेतद्गतंमनः" इतिवत् । आज्ञापययथेष्टं क्षामकालेअल्पद्रव्यायक्रीतोराजपुत्रःपुनर्निति० मनुसंहितं मनुप्रयुक्तं ॥ २१ ॥ इतित्रिंशस्सर्गः ॥ ३० ॥

[पा०] १ इदमर्धद्वयं क. ख. ङ. च. छ. झ. ञ. ट. दृश्यते. २ ङ. च. छ. झ. ञ. मनुसंहितम्. ३ क. ख. घ—छ. झ. ञ ट. वियुज्यते. ४ इदमर्धं क. ख. ङ. च. छ. झ. दृश्यते. ५ क. ख. च. छ. ञ. ट. संगृह्यसुमहच्चास्त्रं. ङ. झ. विगृह्यसुमहच्चास्त्रं. ६ क. ङ. च. झ. ञ. ट. आग्नेयंरघुनन्दनः. ७ ख. महाबलः. ८ क. कृतार्थोऽहंमहाभाग. ९ ङ. च. छ. झ. ञ. वीर. १० इदमर्धं ङ. च. छ. झ. ञ. दृश्यते. ११ क. घ. च. छ. ञ. शौचंकृत्वामहाबलौ. १२ क. ग. ङ. च. छ. झ. विश्वामित्रमृषींश्चान्यान्सहितावधि. घ. सहितावभिगच्छतः. १३ क. ऊचतुःपरमोदारं. १४ क. उभौस्म. १५ ग—छ. झ. ञ. समुपागतौ. १६ च. छ. झ. ञ. मुनिश्रेष्ठ.

एवमुक्तास्ततस्ताभ्यां सर्व एव महर्षयः ॥ विश्वामित्रं पुरस्कृत्य रामं वचनमब्रुवन् ॥ ५ ॥
मैथिलस्य नरश्रेष्ठ जनकस्य भविष्यति ॥ यज्ञः परमधर्मिष्ठस्तस्य यास्यामहे वयम् ॥ ६ ॥
त्वं चैव नरशार्दूल सहास्माभिर्गमिष्यसि ॥ अद्भुतं धनुरत्नं च तत्र तद्द्रष्टुमर्हसि ॥ ७ ॥
तद्धि पूर्वं नरश्रेष्ठ दत्तं सदसि दैवतैः ॥ अप्रमेयबलं घोरं मखे परमभास्वरम् ॥ ८ ॥
नास्य देवा न गन्धर्वा नासुरा न च राक्षसाः ॥ कर्तुमारोपणं शक्ता न कथंचन मानुषाः ॥ ९ ॥
धनुषस्तस्य वीर्यं तु जिज्ञासन्तो महीक्षितः ॥ न शेकुरारोपयितुं राजपुत्रा महाबलाः ॥ १० ॥
तद्धनुर्नरशार्दूल मैथिलस्य महात्मनः ॥ तत्र द्रक्ष्यसि काकुत्स्थ यज्ञं चाद्भुतदर्शनम् ॥ ११ ॥
तद्धि यज्ञफलं तेन मैथिलेनोत्तमं धनुः ॥ याचितं नरशार्दूल सुनाभं सर्वदैवतैः ॥ १२ ॥
आयागभूतं नृपतेस्तस्य वेश्मनि राघव ॥ अर्चितं विविधैर्गन्धैर्माल्यैश्चागरुगन्धिभिः ॥ १३ ॥
एवमुक्त्वा मुनिवरः प्रस्थानमकरोत्तदा ॥ सर्षिसङ्घः सकाकुत्स्थ आमन्त्र्य वनदेवताः ॥ १४ ॥
स्वस्ति वोस्तु गमिष्यामि सिद्धः सिद्धाश्रमादहम् ॥ उत्तरे जाह्नवीतीरे हिमवन्तं शिलोच्चयम् ॥१५॥

वर्तयितुंनार्हः किल । शासनंकरवावकिं कर्तव्ये नसंकोचःकार्यइत्यर्थः । अनेनस्वभक्तायस्वान्यंनददाति आहूयनददाति स्वयंगत्वैवददाति स्वात्मानमिष्टविनियोगार्हंकरोतीत्युक्तं ॥ ४ ॥ अत्रविश्वामित्रेणप्रतिवक्तव्येऋषिभिर्नियोजनंरामभक्त्यतिरेकेण । पुरस्कृत्य तदनुज्ञांलब्ध्वेत्यर्थः । यद्वा विश्वामित्रप्रमुखामुनयइत्यर्थः ॥ ५ ॥ मिथिलायाईश्वरोमैथिलः "तस्येदं" इत्यण् । परमधर्मिष्ठः अतिशयेनधर्मवान् । भगवत्कैङ्कर्यरूपत्वेनकाम्यनित्याभ्यामुत्कृष्टइत्यर्थः । तस्य तस्यकृते ॥ ६ ॥ गमिष्यसि । यदीतिशेषः । धनुरत्नं धनुश्रेष्ठं दीर्घाभावआर्षः । चकाराद्यज्ञंचेत्यर्थः । तत् प्रसिद्धं ॥ ७ ॥ तस्यधनूरत्नंकुतःसमायातंतत्राह—तद्धीति । मखे सदसि दैवतैर्दत्तमित्यन्वयः ॥ ८ ॥ आरोपणं ज्यारोपणं ॥ ९ ॥ जिज्ञासन्तः जिज्ञासमानाः ॥ १० ॥ यज्ञंद्रक्ष्यसि तत्रतद्धनुश्चद्रक्ष्यसीत्यन्वयः ॥ ११ ॥ मखेकिमर्थंदत्तंतत्राह—तद्धीति । सुनाभं शोभनमुष्टिबन्धनस्थानं । दैवतैः दैवतेभ्यः । याचितं दत्तंचेत्यर्थः ॥ १२ ॥ आयागभूतं धनुरुत्सवेप्राधान्येनार्चितं धनुरायागउच्यते । अत्रविश्वामित्रेणैवानुक्तिः सर्वसंमतत्वद्योतनाय ॥ १३ ॥ पूर्वंविश्वामित्रंपुरस्कृत्येत्युक्त्याप्राधान्यात्विश्वामित्रउक्तवानित्यनूद्यते ॥ १४ ॥ जाह्नवीतीरेस्थितंहिमवन्तंगमिष्यामीत्यन्वयः । शिलोच्चयं पर्वतं । सिद्धाश्रमाद्धिमवद्गमनंमिथिलामार्गेणेतिज्ञेयं ॥ १५ ॥

वि० तयोरितिताभ्यामित्यर्थे ॥ ५ ॥ **ति०** परमेतिपृथक्पदंवा । परा मा शोभायस्मिन्नित्यर्थंकंरामसंबोधनं ॥ ६ ॥ **ती०** चकारोनुक्तस्त्रीरत्नसमुच्चयपरः । **वि०** पूर्वं पूर्वस्मिन्काले । देवराताख्यप्राचीनजनकस्ययज्ञेसदसिदैवतैर्दक्षयज्ञवधेप्रसादितात्शिवाल्लब्धं । यज्ञप्रसादितैर्शिवसहितैर्दैवतैर्देवरातहस्तेतदप्रमेयबलंधनुर्दत्तं । अतस्तत्रतिष्ठतीतिशेषः ॥ ८ ॥ **ति०** नकथंचन नकथमपीत्यर्थः । **शि०** अस्य धनुषः । आरोपणं बाणप्रक्षेपयोग्यज्यासंयोगं कर्तुंदेवाःकथंचननशक्ताः । एवंकथंचनेत्यस्यवाक्यचतुष्टयेप्यपकर्षः । मनुष्येष्वपिनहुषादिषुअधिकपराक्रमश्रुतेर्नपतत्प्रकर्षदोषाशङ्का ॥ ९ ॥ **ति०** तद्धनुर्मैथिलेननिजयज्ञप्रीतेभ्योयज्ञफलत्वेनयाचितं । युद्धेरिपूणांजयायसर्वदैवतैर्शिवसहितैर्दत्तंअतस्तत्रतिष्ठतीत्यर्थः । तदुक्तंपाद्मे । "चापंशंभोर्दयादत्तं" इति । कौर्मेपि "प्रीतश्चभगवानीशस्त्रिशूलीनीललोहितः । प्रददौशत्रुनाशार्थंजनकायाद्भुतंधनुः"इति ॥१२॥ **ति०** आयागभूतं । यजनीयदेवताभूतमित्यर्थः ॥ **वि०** अयमत्रधनुरागमनक्रमः । पूर्वंदेवास्त्रिपुरवधायविश्वकर्मणानिर्मितंधनुर्महादेवायददुः । तद्भगवतोर्बलाबलपरीक्षानिमित्तकविश्वरोधेविष्णुपदाक्रमैर्जडीकृतं । देवैःप्रार्थितोमहादेवोधनुरिच्छतोदेवरातस्यहस्तेन्यस्तवान् । ततःप्रभृतिन्यासभावेनवर्तमानंजनकेनस्वयज्ञेस्वलेनयाच्यमानंदेवैस्तस्ययज्ञफलत्वेनदत्तमिति ॥ १३ ॥ **ती०** हिमवतस्त्वाश्रमत्वादितिभावः ॥ १५ ॥

[**पा०**] १ क. ख. घ—छ. झ. ञ. ट. एवमुक्तेतयोर्वाक्ये. २ ख. नरेन्द्रस्य. ३ क. ख. घ—छ. झ. ञ. ट स्तत्र. ४ क. ग—छ. झ. ञ. अद्भुतंचधनूरत्नंतत्रत्नं. ट. तद्धनूरत्नं. ५ क—छ. झ. ट. स्तस्यवीर्यंहि. ञ. स्तत्रवीर्यंहि. ६ ङ. च. छ. झ. ञ. यज्ञंचपरमाद्भुतम्. ७ क. अप्रमेयबलंघोरंतस्य. ङ. नृपतेतस्य. ८ ख. विधिवद्गन्धैः. ९ क—छ. झ. ञ. धूपैश्चा. १० ख. एवमुक्त्वारघुवरं.

[इत्युक्त्वा मुनिशार्दूलः कौशिकः स तपोधनः ॥] प्रदक्षिणं ततः कृत्वा सिद्धाश्रममनुत्तमम् ॥
उत्तरां दिशमुद्दिश्य प्रस्थातुमुपचक्रमे ॥ १६ ॥
तं प्रयान्तं मुनिवरमन्वयादनुसारिणम् ॥ शकटीशतमात्रं च प्रायेण ब्रह्मवादिनाम् ॥ १७ ॥
मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासिनः ॥ अनुजग्मुर्महात्मानं विश्वामित्रं महामुनिम् ॥ १८ ॥
निवर्तयामास ततः पक्षिसङ्घान् मृगानपि ॥ १९ ॥
ते गत्वा दूरमध्वानं लंबमाने दिवाकरे ॥ वासं चक्रुर्मुनिवराः शोणाकूले समागताः ॥ २० ॥
तेऽस्तं गते दिनकरे स्नात्वा हुतहुताशनाः ॥ विश्वामित्रं पुरस्कृत्य निषेदुरमितौजसः ॥ २१ ॥
रामोपि सहसौमित्रिर्मुनींस्तानभिपूज्य च ॥ अग्रतो निषसादाथ विश्वामित्रस्य धीमतः ॥ २२ ॥
अथ रामो महातेजा विश्वामित्रं महामुनिम् ॥ पप्रच्छ नरशार्दूलः कौतूहलसमन्वितः ॥ २३ ॥
भगवन्कस्य देशोऽयं समृद्धवनशोभितः ॥ श्रोतुमिच्छामि भद्रं ते वक्तुमर्हसि तत्वतः ॥ २४ ॥
चोदितो रामवाक्येन कथयामास सुव्रतः ॥ तस्य देशस्य निखिलमृषिमध्ये महातपाः ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

विश्वामित्रेणरामंप्रतिशोणाकूलस्थदेशवृत्तान्तकथनप्रसङ्गेनस्ववंशवृत्तान्तकथनारंभः ॥ १ ॥ तथाशोणातटस्थदेशस्यब्रह्मसूनोःकुशस्यतनयेषुचतुर्षु कुशांबादिषुकनीयसोवसोस्संबन्धित्वकथनम् ॥ २ ॥ कुशात्मजेषुद्वितीयस्यकुशनाभस्यकन्याशते उद्यानमेत्यविहरतिसतिवायुनाताःप्रतिस्वभार्याभवनप्रार्थनम् ॥ ३ ॥ ताभिस्तदनङ्गीकारेतेनतासांशरीरप्रवेशेनकुब्जीकरणम् ॥ ४ ॥ ताभिःपितृसमीपमेत्यपरिशोचनम् ॥ ५ ॥

ब्रह्मयोनिर्महानासीत्कुशो नाम महातपाः ॥ अक्लिष्टव्रतधर्मज्ञः सज्जनप्रतिपूजकः ॥ १ ॥

ततःवनदेवतामन्त्रणानन्तरं ॥१६॥ अनुसारिणं उत्तरदिगनुसारिणंतं । प्रायेण बाहुल्येन । ब्रह्मवादिनांशकटीशतमात्रं शकट्यःशकटानि । तेषांशतमात्रं शतप्रमाणं । अन्वयात् अन्वगात् । यद्वा शतमात्रमन्वयात् । इतरत्सर्वसिद्धाश्रमएवस्थितमित्यर्थः । अत्र शकटीशब्देन शकट्यारोपिताग्निहोत्रसंभारादिकमुच्यते ॥१७॥ तद्भक्त्येतिभावः ॥ १८ ॥ निवर्तयामासेत्यर्धं । अत्रपक्ष्यादिनिवर्तनेनमुनीनांगमनंद्योतितं ॥ १९ ॥ शोणः पुंनदः सएवशोणेत्यपिव्यपदिश्यते॥२०॥शोणेस्नात्वा- दिनकरेस्तंगतेसति हुतहुताशनाइत्यन्वयः॥२१॥अभिपूज्य अभिवाद्य॥२२–२३॥ अयं शोणकूलस्थः ॥ २४ ॥ निखिलंवृत्तांतमित्यर्थः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

एवंशोणकूलदेशवैभवेपृष्टेअयंमद्वंश्यानांदेशइतिविवक्षन्स्वान्वयं प्रदर्शयतिद्वात्रिंशे—ब्रह्मयोनिरित्यादि । ब्रह्मयोनिःकारणंयस्यसःब्रह्मयोनिः अयोनिजोब्रह्मपु-

---

ति० शोणनदस्यैवशोणेत्यपिनामेत्याहुः । वस्तुतःशोणेतिगिरिव्रजसमीपस्थोनदीविशेषइत्येतदुत्तरसर्गेस्पष्टं ॥ २० ॥ ति० अस्तंगते । अस्तंजिगमिषतीत्यर्थः ॥ २१ ॥ ति० । अयंदेशः शोणाकूलस्थः ॥ २४ ॥ इत्येकविंशस्सर्गः ॥ ३१ ॥

[पा०] इदमर्धं १ क. ख. च. छ. झ. दृश्यते. २ क. ख. घ—छ. झ. ञ. ट. व्रजन्तं. ३ क. ख. घ—छ. झ. ञ. मन्वगा. ४ घ. दनुचारिणाम्. ग. ङ. झ. ञ. ट. दनुसारिणाम्. ५ ख. ङ. च. छ. झ. ञ. शतमात्रंतु. ६ क. ख. घ—छ. झ. ञ. ट. प्रयाणे. ७ ङ. झ. महात्मानो. ८ ङ. च. छ. झ. ञ. तपोधनं. ९ क. ङ. छ. झ. ञ. सर्षिसंघस्सपक्षिणः. च. सर्षिसंघसपक्षिणः. १० क. छ. झ. ञ. मुनिगणाः. ११ शोणकूलेसमागताः. क—छ. झ. ञ. शोणाकूलेसमाहिताः. १२ ख. घ. अस्तंगते. १३ ङ. झ. तपोधनं. च. छ. ञ. तपोनिधिम्. घ. महामतिं. १४ क—छ. झ. ञ. मुनिशार्दूलं. १५ ख. ग. झ. समन्वितम्. १६ क—छ. झ. ञ. न्कोन्वयंदेशः. १७ ट. महायशाः. १८ ख. व्रतधर्मश्च.

स महात्मा कुलीनायां युक्तायां सुगुणोल्बणान् ॥ वैदर्भ्यां जनयामास सदृशांश्चतुरः सुतान् ॥
कुशांबं कुशनाभं च आधूर्तरजसं वसुम् ॥ २ ॥
दीप्तियुक्तान्महोत्साहान्क्षत्रधर्मचिकीर्षया ॥ तानुवाच कुशः पुत्रान्धर्मिष्ठान्सत्यवादिनः ॥
क्रियतां पालनं पुत्रा धर्मं प्राप्स्यथ पुष्कलम् ॥ ३ ॥
ऋषेस्तु वचनं श्रुत्वा चत्वारो लोकसंमताः ॥ निवेशं चक्रिरे सर्वे पुराणां नृवरास्तदा ॥ ४ ॥
कुशांबस्तु महातेजाः कौशांबीमकरोत्पुरीम् ॥ कुशनाभस्तु धर्मात्मा पुरं चक्रे महोदयम् ॥ ५ ॥
आधूर्तरजसो राम धर्मारण्यं महीपतिः ॥ चक्रे पुरवरं राजा वसुश्चक्रे गिरिव्रजम् ॥ ६ ॥
एषा वसुमती राम वसोस्तस्य महात्मनः ॥ एते शैलवराः पञ्च प्रकाशन्ते समन्ततः ॥ ७ ॥
सुमागधी नदी रम्या मगधान्विश्रुताऽऽययौ ॥ पञ्चानां शैलमुख्यानां मध्ये मालेव शोभते ॥८॥
सैषा हि मागधी राम वसोस्तस्य महात्मनः ॥ पूर्वाभिचरिता राम सुक्षेत्रा सस्यमालिनी ॥ ९ ॥
कुशनाभस्तु राजर्षिः कन्याशतमनुत्तमम् ॥ जनयामास धर्मात्मा घृताच्यां रघुनन्दन ॥ १० ॥
तास्तु यौवनशालिन्यो रूपवत्यः स्वलंकृताः ॥ उद्यानभूमिमागम्य प्रावृषीव शतह्रदाः ॥ ११ ॥
गायन्त्यो नृत्यमानाश्च वादयन्त्यश्च सर्वशः ॥ आमोदं परमं जग्मुर्वराभरणभूषिताः ॥ १२ ॥
अथ ताश्चारुसर्वाङ्ग्यो रूपेणाप्रतिमा भुवि ॥ उद्यानभूमिमागम्य तारा इव घनान्तरे ॥ १३ ॥
ताः सर्वगुणसंपन्ना रूपयौवनसंयुताः ॥ दृष्ट्वा सर्वात्मको वायुरिदं वचनमब्रवीत् ॥ १४ ॥
अहं वः कामये सर्वा भार्या मम भविष्यथ ॥ मानुषस्त्यज्यतां भावो दीर्घमायुरवाप्स्यथ ॥ १५ ॥

त्रः । महान् ज्ञानशौर्यादिभिरितरब्रह्मपुत्रविलक्षणः । कौभूमौशेतइतिकुशः । नारदादिवत्ब्रह्मलोकेऽनवस्थायप्रजापालनेदत्तादरतयाभूमाववस्थानातकुशइत्यस्यनाम । अतएवक्षत्रियव्यापारात्क्षत्रियोयं । अक्लिष्टंनिर्बाधंव्रतंयस्यसोक्लिष्टव्रतः अक्लिष्टव्रतश्चासौधर्मज्ञश्चेतिकर्मधारयः ॥ १ ॥ सार्धश्लोकः । युक्तायां अनुरूपायां ॥२॥ सार्धश्लोकः । क्षत्रधर्मः प्रजापालनं ॥ ३ ॥ पुष्कलं समग्रं । ऋषेः कुशस्य । निवेशं संनिवेशं ॥ ४ ॥ कुशांबइत्यादिश्लोकद्वयं ॥ ५ ॥ ६ ॥ एषा शोणकूलस्था । शैलवराः गिरिव्रजसंज्ञामूलाः ॥ ७ ॥ मगधदेशादागतामागधीतिशोणएवोच्यते । आययावितिच्छेदः ॥ ८ ॥ पूर्वाभिचरिता पूर्वदेशात्प्रत्यङ्मुखवाहिनी । सुक्षेत्रा उभयपार्श्वतइतिशेषः ॥ ९ ॥ घृतवत्पुरुषंदृष्ट्वाद्रवतीसत्यश्चतीतिघृताची कुशनाभभार्या । घृतवत्पुरुषंकृत्वाश्चतीतिवा । अप्सरसः ॥ १० ॥ श्लोकद्वयं । उद्यानभूमिमागम्यशतह्रदाइवस्थिताः । शतह्रदाः विद्युतः । नृत्यमानाः नृत्यन्त्यः । वादयन्त्यः वीणाइतिशेषः । आमोदं संतोषं । स्वलंकृताः कुसुमचन्दनतिलकादिभिः ॥ ११ ॥ १२ ॥ ताराइव बभुरितिशेषः ॥ १३ ॥ सर्वगुणसंपन्नाः सर्वालंकारसंपन्नाः । सर्वत्रआत्मास्वरूपंयस्यसःसर्वात्मकः सर्वत्रसंचारीत्यर्थः ॥ १४ ॥ वः भवतीः मानुषेभवोमानुषः ।

ति० युक्तायां अशेषस्त्रीगुणयुक्तायामित्यर्थः । असूर्तरजसं नविद्यतेसूर्तंप्रसूतंरजोयस्यतं । "अच्" इतियोगविभागादच् ॥ २ ॥ ति० पूर्वाभिचरिता पूर्वदिग्गामिनी ॥९॥ ति० मत्कामनापूरणेममदेवस्यमानुष्योपिभार्याभविष्यथेत्यादिर्वशीकरणायार्थवादः । ननुमानुषीणांदेवसंबन्धोनुचितस्तत्राह—मानुषस्त्यज्यतांभावइति । मदंगीकारमात्रेणविलक्षणशक्त्याविर्भावान्मानुषभाव-

[पा०] १ च. छ. ञ. जायायां. २ ङ. च. छ. झ. ञ. ट. सदृशान्सुमहाबलान्. क—छ. झ. ञ. चतुरस्सदृशान्सुतान्. ३ ङ. अमूर्तरजसं. च. झ. ञ. असूर्तरजसं. ट. अमूर्तिरजसम्. ख. आवर्तरजसं. ४ ग. ङ. ञ. कुशस्य. क. ख. झ. ट. पितुस्ते. ५ च. ञ. चत्वारोऽमितविक्रमाः. ङ. झ. चत्वारोलोकसत्तमाः. ६ ख. निवेशांश्चक्रिरे. ७ क. पुराणि. ८ क. ङ. च. झ. ञ. नाम. ९ ङ. झ. महामतिः. १० क. ङ. छ. झ. ञ. वसुर्नामगिरिव्रजम्. च. वसुर्नाममणिव्रजम्. ११ ङ. च. छ. झ. ञ. नाम. १२ ग. पुण्या. १३ झ. मागधान्. १४ ख. घ. च. छ. ञ. ट. नाम. १५ क. ख. ट. वीर. च. छ. ञ. नाम. १६ च. मागत्य. १७ ङ. च. छ. झ. ञ. वादयन्त्यस्तुराघव. क. ख. घ. ट. वादयन्त्यश्चराघव. १८ क. ख. स्सर्वाभरण. १९ ख. मध्येशोभन्ते. २० ङ. संमताः.

चलं हि यौवनं नित्यं मानुषेषु विशेषतः ॥ अक्षयं यौवनं प्राप्ता अमर्यश्च भविष्यथ ॥ १६ ॥
तस्य तद्वचनं श्रुत्वा वायोरक्लिष्टकर्मणः ॥ अपहास्य ततो वाक्यं कन्याशतमथा[1]ब्रवीत् ॥ १७ ॥
अन्तश्चरसि भूतानां सर्वेषां [2]त्वं सुरोत्तम ॥ [3]प्रभावज्ञाः स्म ते सर्वाः [4]किमस्मानवमन्यसे ॥ १८ ॥
कुशनाभसुताः सर्वाः समर्थास्त्वां [5]सुरोत्तम ॥ स्थानाच्च्यावयितुं [6]देवं रक्षामस्तु तपो वयम् ॥१९॥
मा भूत्स कालो दुर्मेधः पितरं सत्यवादिनम् ॥ [7]नावमन्यस्व धर्मेण स्वयंवरमुपास्महे ॥ २० ॥
पि[8]ता हि प्रभुरस्माकं दैवतं परमं हि [9]नः ॥ यस्य नो दास्यति पिता स नो भर्ता भविष्यति ॥ २१ ॥
[10]तासां तद्वचनं श्रुत्वा [11]वायुः परमकोपनः ॥ प्रविश्य सर्वगात्राणि बभञ्ज भगवान्प्रभुः ॥ २२ ॥
[अरत्निमात्राकृतयो भग्नदर्पा भयार्दिताः] ॥ ताः कन्या वायुना भग्ना विविशुर्नृपतेर्गृहम् ॥
[12]प्रापतन्भुवि संभ्रान्ताः सलज्जाः [13]साश्रुलोचनाः ॥ २३ ॥
स च ता दयिता [14]दीनाः कन्याः परमशोभनाः ॥ दृष्ट्वा [15]भग्नास्तदा राजा संभ्रान्त इदमब्रवीत् ॥२४॥
किमिदं कथ्यतां पुत्र्यः को धर्ममवमन्यते ॥ कुब्जाः केन [16]कृताः सर्वा [17]वेष्टन्त्यो नाभिभाषथ ॥
[[18]श्रोतुमिच्छामि तं पुत्र्यो यस्येदं कर्म गर्हितम्] ॥ २५ ॥
एवं राजा विनिश्वस्य समाधिं संदधे ततः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

भाव: अनुरागः । त्यज्यतां । तथासतिदीर्घमायुरवाप्स्यथ ॥ १५ ॥ नित्यं सर्वदा । अक्षयमिति मद्भार्यात्वइतिशेषः ॥१६॥ अक्लिष्टकर्मणः अप्रतिहतकर्मणः । ततः तद्वाक्यश्रवणेन । अपहास्यअथाब्रवीत् ॥ १७ ॥ अन्तश्चरसि प्राणरूपेन । भूतानां प्राणिनां प्रभावज्ञाः एवंविधप्रभावज्ञाः । अस्मान् ज्ञातभवत्प्रभावाः ॥१८॥ स्थानात् अधिकारात् । देवं भवन्तं ॥ १९ ॥ सः नः पिता ते कालः मृत्युः माभूत् । हेदुर्मेधः दुर्बुद्धे । पितरंनावमन्यस्व । धर्मेण पितृप्रदानरूपेण । वरं स्वयमुपास्महे प्रतीक्षामहे । पितास्वयंयस्मैदास्यति तंप्रतीक्षामहइत्यर्थः ॥२०॥ उक्तंविवृणोति—पितेति ॥ २१ ॥ बभञ्ज कुब्जीचकार ॥ २२ ॥ सलज्जाः शरीरवैरूप्यादितिभावः ॥ २३ ॥ संभ्रान्तः पर्याकुलचित्तः ॥ २४ ॥ कोधर्ममवमन्यते बलात्कारंकरोतित्यर्थः । कुब्जाः वक्रशरीराः ॥ २५ ॥ पृष्ठेतिशेषः । विनिश्वस्य व्यथित्वा । समाधिं किंवक्ष्यन्तीतितद्वचनश्रवणावधानं ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्वात्रिंशःसर्गः ॥ ३२ ॥

त्यागेस्वतएवभवतीनांसामर्थ्यंभविष्यति ॥१५॥ **ति०** समर्थाइतिशेषः ॥१९॥ **ति०** यत्रकालेपितरंअवमन्य अपमानविषयंकृत्वा । स्वधर्मेण कामेन । स्वयंवरमुपास्महे आत्मनास्वातन्त्र्येणवयमङ्गीकुर्मः सकालःकदाचिदपिमाभूदित्यन्वयः ॥ **शि०** अवमन्य अनादृत्य । स्वधर्मेण शोभनोतिशयितोयोऽधर्मःपितरिसतिस्वातन्त्र्याचरणंतेन वरंस्वयमुपास्महेस्वीकुर्मःसकालोमाभूत् ॥ २० ॥ **ति०** सलज्जाःअन्याय्यपतिप्रसङ्गतःसलज्जाः ॥ २३ ॥ इतिद्वात्रिंशस्सर्गः ॥ ३२ ॥

[पा०] १ घ. मभाषत. २ ङ. च. छ. झ. ञ. सुरसत्तम. ३ क. ङ. च. छ. झ. ञ. ट. प्रभावज्ञाश्च. घ. प्रभावज्ञास्तु. ४ ङ. च. छ. झ. ञ. किमर्थमव. ५ ङ. झ. देवसमस्तास्सुरसत्तम. क. ख. देवसमर्थास्स्मसुरोत्तम. च. छ. ञ. देवसमर्थाश्चसुरोत्तम. ट. देवसधर्मास्स्मसुरोत्तम. ६ घ. च. देव. ७ ङ. झ. ञ. ट. अवमन्यस्व. ८ च. छ. ञ. पितावै. ९ क. ख. घ. च. छ. ञ. हिसः. ग. ङ. च. चसः. १० घ. ङ. च. झ. ञ. तासांतुवचनं. ११ ङ. च. छ. झ. ञ. ट. हरिः. १२ ङ. च. छ. झ. ञ. प्रविश्यचसुसंभ्रान्ताः. १३ क. ख. ग. झ. सास्रलोचनाः. १४ ङ. झ. भग्नाः, १५ ङ. झ. दीनाः, १६ ख. कृतायूयं. १७ च. छ. झ. ञ. ट. चेष्टन्त्यो. १८ इदमर्धं क. ख. दृश्यते.

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

कन्याभिर्वायुवृत्तंनिवेदितेनकुशनाभेनतासां क्षमाप्रशंसनपूर्वकंपरिसान्त्वनम् ॥ १ ॥ तथाचूलिसूनवेब्रह्मदत्तायभार्यात्वेनतासांप्रदानम् ॥ २ ॥ तस्यपाणिस्पर्शमात्रेणतासां कुब्जीभावापगमपूर्वकमद्भुतशोभाप्रादुर्भावः ॥ ३ ॥

तस्य तद्वचनं श्रुत्वा कुशनाभस्य धीमतः ॥ शिरोभिश्चरणौ स्पृष्ट्वा कन्याशतमभाषत ॥ १ ॥
वायुः सर्वात्मको राजन्प्रधर्षयितुमिच्छति ॥ अशुभं मार्गमास्थाय न धर्मं प्रत्यवेक्षते ॥ २ ॥
पितृमत्यः स भद्रं ते स्वच्छन्दे न वयं स्थिताः ॥ पितरं नो वृणीष्व त्वं यदि नो दास्यते तव ॥३॥
तेन पापानुबन्धेन वचनं नप्रतीच्छता ॥ एवं ब्रुवन्त्यः सर्वाः स वायुना निहता भृशम् ॥ ४ ॥
तासां तद्वचनं श्रुत्वा राजा परमधार्मिकः ॥ प्रत्युवाच महातेजाः कन्याशतमनुत्तमम् ॥ ५ ॥
क्षान्तं क्षमावतां पुत्र्यः कर्तव्यं सुमहत्कृतम् ॥ ऐकमत्यमुपागम्य कुलं चावेक्षितं मम ॥ ६ ॥
अलङ्कारो हि नारीणां क्षमा तु पुरुषस्य वा ॥ ७ ॥
दुष्करं तद्धि वः क्षान्तं त्रिदशेषु विशेषतः ॥ यादृशी वः क्षमा पुत्र्यः सर्वासामविशेषतः ॥ ८ ॥
क्षमा दानं क्षमा सत्यं क्षमा यज्ञश्च पुत्रिकाः ॥ क्षमा यशः क्षमा धर्मः क्षमया विष्ठितं जगत् ॥ ९ ॥
विसृज्य कन्याः काकुत्स्थ राजा त्रिदशविक्रमः ॥ मन्त्रज्ञो मन्त्रयामास प्रदानं सह मन्त्रिभिः ॥
देशकालौ प्रदानस्य सदृशे प्रतिपादनम् ॥ १० ॥
एतस्मिन्नेव काले तु चूली नाम महामुनिः ॥ ऊर्ध्वरेताः शुभाचारो ब्राह्मं तप उपागमत् ॥ ११ ॥

अथकुशनाभस्यकन्यावचनंशृण्वतःक्षमाविशेषउच्यतेत्रयस्त्रिंशे—तस्येत्यादि । शिरोभिश्चरणौस्पृष्ट्वा पादयोःप्रणम्येत्यर्थः ॥ १ ॥ प्रधर्षयितुं अभिभवितुं । इच्छति वर्तमानसामीप्याल्लट् । अशुभं बलात्काररूपं ॥ २ ॥ पितृमत्यःस्म अतः स्वच्छन्दे स्वातन्त्र्ये किंचित्पतिस्वीकारविषयेवयंनस्थिताः । अतोनःपितरमेववृणीष्व । सयदि नः अस्मान् तुभ्यं दास्यति तदातवभविष्यामः । तेभद्रमस्तु ॥ ३ ॥ एवंब्रुवन्त्योवयं अस्माकंवचनं नप्रतीच्छता अनंगीकुर्वता । पापानुबन्धेन पापानुसारिणा । तेन वायुना निहताः ॥ ४ ॥ अनुत्तमं क्षमावत्त्वात् ॥ ५ ॥ हेपुत्र्यः क्षमावतां कर्तव्यं कर्तुमर्हं । "कृत्यानांकर्तरि" इतिषष्ठी । क्षान्तं क्षमा भावेनिष्ठा । कृतं इदंसुमहत्कर्म देवेप्रार्थयमानेप्यविकृतचित्तत्वं शरीरंभञ्जयतिसतिनिष्क्रोधत्वंच दुष्करमितिभावः । कुलंचावेक्षितं कुलानुरूपंकुलंकृतमित्यर्थः ॥ ६ ॥ उक्तमर्थंविवृणोति—अलङ्कारइति अर्थं । क्षमा अपराधसहिष्णुत्वं ॥ ७ ॥ वः तत्क्षान्तं क्षमा । दुष्करं त्रिदशेषु रूपैश्वर्यसंपन्नेषु । विशेषतोदुष्करं । यादृशीति सर्वासामविशेषतः याक्षमा सापिदुष्करेत्यन्वयः । क्षमैवदुष्करा ततस्त्रिदशेषुदुष्करा ततोपिसर्वासामविशेषेणक्षमा दुष्करैवेत्यर्थः ॥ ८ ॥ क्षमांप्रशंसति क्षमेति । क्षमादानं दानेनयत्फलंप्राप्नोति—तत्क्षमयाप्राप्नोतीत्यर्थः । एवमुत्तरत्रापियोज्यं । धर्मः तटाकारामनिर्माणादिः । क्षमया भूमिसंबन्धिन्या । जगच्चराचरं । विष्ठितं स्थितंभवति ॥ ९ ॥ अर्धत्रयं । प्रदानं कन्याप्रदानं । चिन्ताप्रकारमाह—देशइति । प्रदानस्य कन्याप्रदानस्यउचितौदेशकालौ सदृशे स्वकुलस्यसदृशेपात्रे प्रतिपादनंच मन्त्रयामासेत्यर्थः ॥ १० ॥ एतस्मिन्नेवकाले कुशनाभीयकाले । उत्तरत्रान्वयः । ऊर्ध्वरेताः अस्खलितरेताः । ब्राह्मंतपः वैदिकंतपः ब्रह्मोद्देश्यकंवा

ति० ब्राह्मंतपः ब्रह्मविषयंचित्तैकाग्र्यं । " मनसश्चेन्द्रियाणांचऐकाग्र्यंपरमंतपः " इतिस्मृतिः ॥ ११ ॥

[पा०] १ घ—छ. झ. ञ. तासांतुवचनं. २ क. घ. च. ञ. तच्चवः. ङ. छ. झ. ट. तच्चवै. क. ग. तच्चयत्. ३ घ. ज्ञाश्च. ४ क. ख. ङ. च. झ. ञ. क्षमायांविष्ठितं. ग. क्षमायांहिस्थितं. ट. क्षमायांनिष्ठितं. ५ ङ. च. छ. झ. ञ. देशेकालेचकर्तव्यं. क. ग. घ. देशेकालेप्रदानस्य. ख. देशेकालेप्रदेयस्य. ६ ख. एतस्मिन्नन्तरेकाले. ७ ङ. च. छ. झ. ञ. महाद्युतिः.

तप्यन्तं तमृषिं तत्र गन्धर्वी पर्युपासते ॥ सोमदा नाम भद्रं ते ऊर्मिलातनया तदा ॥ १२ ॥
सा च तं प्रणता भूत्वा शुश्रूषणपरायणा ॥ उवास काले धर्मिष्ठा तस्यास्तुष्टोऽभवद्गुरुः ॥ १३ ॥
स च तां कालयोगेन प्रोवाच रघुनन्दन ॥ परितुष्टोसि भद्रं ते किं करोमि तव प्रियम् ॥ १४ ॥
परितुष्टं मुनिं ज्ञात्वा गन्धर्वी मधुरस्वरा ॥ उवाच परमप्रीता वाक्यज्ञा वाक्यकोविदम् ॥ १५ ॥
लक्ष्म्या समुदितो ब्राह्मया ब्रह्मभूतो महातपाः ॥ ब्राह्मेण तपसा युक्तं पुत्रमिच्छामि धार्मिक ॥१६॥
अपतिश्चास्मि भद्रं ते भार्या चास्मि न कस्यचित् ॥ ब्राह्मेणोपगतायाश्च दातुमर्हसि मे सुतम् ॥१७॥
तस्याः प्रसन्नो ब्रह्मर्षिर्ददौ पुत्रमनुत्तमम् ॥ ब्रह्मदत्त इति ख्यातं मानसं चूलिनः सुतम् ॥ १८ ॥
स राजा सौमदेयस्तु पुरीमध्यावसत्तदा ॥ कांपिल्यां परया लक्ष्म्या देवराजो यथा दिवम् ॥१९॥
स बुद्धिं कृतवान्राजा कुशनाभः सुधार्मिकः ॥ ब्रह्मदत्ताय काकुत्स्थ दातुं कन्याशतं तदा ॥ २० ॥
तमाहूय महातेजा ब्रह्मदत्तं महीपतिः ॥ ददौ कन्याशतं राजा सुप्रीतेनान्तरात्मना ॥ २१ ॥
यथाक्रमं ततः पाणीञ्जग्राह रघुनन्दन ॥ ब्रह्मदत्तो महीपालस्तासां देवपतिर्यथा ॥ २२ ॥
स्पृष्टमात्रे ततः पाणौ विकुब्जा विगतज्वराः ॥ युक्ताः परमया लक्ष्म्या बभुः कन्या शतं तदा ॥२३॥

॥ ११ ॥ तत्र तस्मिन्देशे । तदा तत्काले । तप्यन्तं दाहार्थेपिण्यत्ययाच्छयन् । गन्धर्वी जातिवाचित्वात् । पर्युपासते अशुश्रूषत । मध्येमध्येभद्रमस्त्वितिप्रयोगःशुभोत्तरत्वाय ॥ १२ ॥ काले कियतिकाले तुष्टोभवत् । ब्रह्मर्षित्वाद्गुरुरित्युक्तिः ॥ १३ ॥ कालयोगेन शुश्रूषापरिपाककालसंबन्धेन । करोमि कुर्याम् ॥ १४ ॥ वाक्यकोविदं वाक्येवचने कोविदं समर्थं ॥ १५ ॥ ब्राह्मयालक्ष्म्या ब्रह्मवर्चसेन । समुदितः श्रेष्ठः । अतएवब्रह्मभूतः ब्रह्मतुल्यः । महातपाअसि । तस्मात्त्वत्तःपुत्रमिच्छामि । दीप्यसेपरयालक्ष्म्येतिकोशान्तरे ॥ १६ ॥ विधवाप्यपतिर्भवतितत्राह—भार्येति । उपगतायाः शरणंगतायाः । मे । ब्राह्मेण तपोमहिम्ना ॥ १७ ॥ ब्रह्मणातपोयोगेनदत्तो ब्रह्मदत्तः । चूलिनः स्वस्य । मानसं मनस्संकल्पजं । सुतंददौ ॥ १८ ॥ राजा क्षत्रियः । क्षत्रजत्वात् । लक्ष्म्या संपदा युक्तः । एतस्मिन्नन्तरेपुरीमध्यावसदितिसंबन्धः ॥ १९ ॥ तदा ब्रह्मदत्तस्यकांपिल्याख्यायांपुर्यामावासकाले ॥ २० ॥ राजा रञ्जकः ॥ २१ ॥ तासांपाणीन्जग्राह । देवपतिर्यथा देवपतिसदृशः । तत्तुल्यविभवइत्यर्थः ॥ २२ ॥ ततः चूलिसूनुना । पाणावितिजात्येकवचनं । विकुब्जाः विगतकुब्जभावाः । शतंकन्या बभुः । विसर्गलोपआर्षः । बभुःकन्याशतमितिपाठः

ति० पर्युपासतेइतिशबलुगार्षः ॥ १२ ॥ तमितिप्रतियोगेद्वितीया । प्रतीतिशेषः । उवास तत्समीपेआसेत्यर्थः ॥ १३ ॥ ति० ब्राह्मंतपस्स्वाध्यायः । ति० धार्मिकंपुत्रमिच्छामीत्यनेनतत्संगमस्तयानप्रार्थितइतिव्यक्तं । तेनतस्याःपरमधैर्यधर्मात्मत्वंचव्यक्तं ॥ ब्रह्मभूतइत्यनेनयथाब्रह्मसकलमभिधातुंसमर्थं तथात्वमपीत्युपमालङ्कारोध्वनितः ॥ १६ ॥ शि० ब्राह्मण हेब्रह्मवेत्तः । उपगतायाः त्वांसेवमानायाः ॥ वि० ननुपुत्रप्रार्थनापत्न्यावुचिताअतआह—अपतिश्चास्मीति । इतःपरमपि अस्मि अहं । अहमर्थे अस्मीत्यव्ययं । नकस्यचिद्भार्याभविष्यामीतिशेषः । अथापिनैष्ठिकब्रह्मचारिण्याःउपगतायाःकिंकरत्वंप्राप्तायामे ब्राह्मेण ब्रह्मसंबन्धिनोपायेन सुतं दातुमर्हसि । सनकादयइवमानसःपुत्रोदेयइतिभावः ॥ १७ ॥ ति० चूलिनः चूली । फलीफलिनइतिवत्चूलीचूलिनइतिऋषेर्नामद्वयंसाधु । शि० तस्याःतस्यैगन्धर्व्यैददौ इतिहेतोःख्यातंब्रह्मदत्तंचूलिनस्सुतंवदंतीतिशेषः ॥ १८ ॥ शि० तस्यब्राह्मणदत्तत्वाद्ब्राह्मणत्वेपिक्षत्रियात्वेनप्रसिद्धायागन्धर्व्यास्सुतत्वात्क्षत्रियत्वमपि ॥ १९ ॥ ति० बभौकन्याशतंतदा । ताःकन्याविकुब्जाः कुब्जत्वरहिताः । आसन्नितिशेषः । ब्राह्मतपोयुक्तत्वादेवंसामर्थ्यंराज्ञः । एवंचसतितत्कन्याशतंपरमयालक्ष्म्याबभावित्यन्वयः ॥ २३ ॥ इतित्रयस्त्रिंशस्सर्गः ॥ ३३ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. तपस्यन्तमृषिं. २ घ. ट. धर्मिष्ठः. ३ क—च. झ. ञ. ट. मधुरस्वरम्. ४ क. ख. ग. ङ. च. छ. झ. ञ. ट. धार्मिकम्. ५ क. च. छ. ञ. ब्राह्मेणोपगतायास्त्वं. च. छ. ट. ब्राह्मणोपगतायाश्च. ६ ङ. झ. ब्राह्ममनुत्तमम्. ग. पुत्रंतथाविधम्. ७ क. ख. ट. ब्रह्मदत्तमिति. ८ ङ. च. छ. झ. ञ. ट. ब्रह्मदत्तस्तु. ९ ङ. झ. ट. मध्यवसत्. १० ट. कापिलीं. ११ ङ. च. छ. झ. ञ. यथादिवि. १२ च. छ. ञ. कुशनाभस्तु. १३ ङ. च. छ. झ. ञ. ट. तदापाणिं. १४ ङ. च. छ. झ. ञ. ट. तदापाणौ. १५ घ. ङ. च. छ. झ. ञ. ट. युक्तंपरमयालक्ष्म्याबभौकन्याशतंतदा.

स दृष्ट्वा वायुना मुक्ताः कुशनाभो महीपतिः ॥ बभूव परमप्रीतो हर्षं लेभे पुनःपुनः ॥ २४ ॥
कृतोद्वाहं तु राजानं ब्रह्मदत्तं महीपतिः ॥ सदारं प्रेषयामास सोपाध्यायगणं तदा ॥ २५ ॥
सोमदाऽपि सुसंहृष्टा पुत्रस्य सदृशीं क्रियाम् ॥ यथान्यायं च गन्धर्वी स्नुषास्ताः प्रत्यनन्दत ॥
स्पृष्ट्वास्पृष्ट्वा च ताः कन्याः कुशनाभं प्रशस्य च ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

कुशनाभेनपुत्रेष्ट्यनुष्ठानेगाधिनाम्नोविश्वामित्रपितुः तत्पुत्रत्वेनजननम् ॥ १ ॥ विश्वामित्रभगिन्यासत्यवत्याभर्त्रनुवर्तनेन स्वर्गगमनपूर्वकं अंशान्तरेणकौशिकीनदीत्वेनप्रवर्तनम् ॥ २ ॥ एवंविश्वामित्रेणस्ववंशचरितानुवर्णनपूर्वकमर्धरात्रागमेरामादिभिःसहनिद्रोपसेवनम् ॥ ३ ॥

कृतोद्वाहे गते तस्मिन्ब्रह्मदत्ते च राघव ॥ अपुत्रः पुत्रलाभाय पौत्रीमिष्टिमकल्पयत् ॥ १ ॥
इष्ट्यां च वर्तमानायां कुशनाभं महीपतिम् ॥ उवाच परमोदारः कुशो ब्रह्मसुतस्तदा ॥ २ ॥
पुत्र ते सदृशः पुत्रो भविष्यति सुधार्मिकः ॥ गाधिं प्राप्स्यसि तेन त्वं कीर्तिं लोके च शाश्वतीम् ॥३॥
एवमुक्त्वा कुशो राम कुशनाभं महीपतिम् ॥ जगामाकाशमाविश्य ब्रह्मलोकं सनातनम् ॥ ४ ॥
कस्यचित्त्वथ कालस्य कुशनाभस्य धीमतः ॥ जज्ञे परमधर्मिष्ठो गाधिरित्येव नामतः ॥ ५ ॥
स पिता मम काकुत्स्थ गाधिः परमधार्मिकः ॥ कुशवंशप्रसूतोस्मि कौशिको रघुनन्दन ॥ ६ ॥
पूर्वजा भगिनी चापि मम राघव सुव्रता ॥ नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥ ७ ॥
सशरीरा गता स्वर्गं भर्तारमनुवर्तिनी ॥ कौशिकी परमोदारा प्रवृत्ता च महानदी ॥ ८ ॥

॥ २३ ॥ वायुनामुक्ताः कन्याइतिशेषः । परमप्रीतः अनुकूलवरलाभेनपरमप्रीतः । हर्षं विकुब्जत्वकृतं ॥ २४ ॥ प्रेषयामास कांपिल्यामितिशेषः ॥ २५ ॥ सोमदेतिसार्धश्लोकः । सोमदा चूलिपुत्रमाता । पुत्रसदृशींक्रियां दारक्रियां । दृष्ट्वेतिशेषः । यथान्यायं यथाक्रमं । स्नुषाःकन्याः कुशनाभपुत्रीः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

एवंप्रासङ्गिकंपरिसमाप्यप्रकृतकथाशेषमाहचतुस्त्रिंशे—कृतोद्वाहइत्यादि । अपुत्रः कुशनाभः । पुत्रायेयं पौत्रीतां ॥ १ ॥ कुशः कुशनाभपिता ॥ २ ॥ सदृशः गुणैरितिशेषः।सपुत्रःकिंनामकः तत्राह—गाधिमिति। गाधिनामानंपुत्रंप्राप्स्यसे । तेन गाधिना । शश्वद्भवा शाश्वती । भवार्थेअण् । बहिषष्टिलोपवचनादव्ययानांभमात्रेटिलोपःकाचित्कः । अत्रनततोङीप् । तां ॥ ३ ॥ अनेनसदाब्रह्मलोकवासीकुशःपुत्रानुग्रहार्थं भुवमागतइत्यवगम्यते । सनातनंनित्यं ॥ ४ ॥ कस्यचित्कालस्य कस्मिंश्चित्कालेगतेसति । गाधिरित्येव यथापित्रोक्तंतथैवेत्यर्थः । जज्ञे घृताच्यांभार्यायां ॥ ५ ॥ यतःकुशवंशप्रसूतोस्मि अतःकौशिकसंज्ञोस्मि। कुशशब्दात्गोत्रापत्येठक् ॥६॥ पूर्वजा ज्येष्ठा । ऋचीके ऋचीकाख्यमुनयइत्यर्थः ॥ ७ ॥ भर्तारमनुवर्तिनी भर्त्रनुवर्तनधर्मप्रभावादितिभावः । नकेवलंस्वर्गगमनमस्याः महानदीत्वंचजातमित्याह—कौशिकीति ॥८॥

ति० चस्त्वर्थः कन्याशतसमुच्चयार्थोवा ॥ १ ॥ शि० आकाशमाविश्यसनातनंब्रह्मलोकंजगाम । अनेनकुशस्यकामचारगतिमत्त्वंव्यक्तं ॥ ४ ॥

[पा०] १ घ. ङ. झ. महीपतिम्. २ ख. सादरं. ३ ङ. झ. ट. सुतंदृष्ट्वा. छ. स्वयंहृष्टा. ४ क. ग. घ. च. दृष्ट्वास्पृष्ट्वा. ५ क. ख. ग. ङ. च. झ. ञ. इष्ट्यांतु. ६ क. ख. ग. ङ. च. छ. झ. ञ. ट. पुत्रस्तेसदृशःपुत्र. ७ क. च. छ. ञ. येन. ८ च. छ. ञ. कुशोनामा. ९ ख. राम.

दिव्या पुण्योदका रम्या हिमवन्तमुपाश्रिता ॥ लोकस्य हितकामार्थं प्रवृत्ता भगिनी मम ॥ ९ ॥
ततोऽहं हिमवत्पार्श्वे वसामि निरतः सुखम् ॥ भगिन्यां स्नेहसंयुक्तः कौशिक्यां रघुनन्दन ॥ १० ॥
सा तु सत्यवती पुण्या सत्ये धर्मे प्रतिष्ठिता ॥ पतिव्रता महाभागा कौशिकी सरितांवरा ॥ ११ ॥
अहं हि नियमाद्राम हित्वा तां समुपागतः ॥ सिद्धाश्रममनुप्राप्य सिद्धोस्मि तव तेजसा ॥ १२ ॥
एषा राम ममोत्पत्तिः स्वस्य वंशस्य कीर्तिता ॥ देशस्य च महाबाहो यन्मां त्वं परिपृच्छसि ॥१३॥
गतोर्धरात्रः काकुत्स्थ कथाः कथयतो मम ॥ निद्रामभ्येहि भद्रं ते मा भूद्विघ्नोऽध्वनीह नः ॥ १४ ॥
निष्पन्दास्तरवः सर्वे निलीना मृगपक्षिणः ॥ नैशेन तमसा व्याप्ता दिशश्च रघुनन्दन ॥ १५ ॥
शनैर्वियुज्यते सन्ध्या नभो नेत्रैरिवावृतम् ॥ नक्षत्रतारागहनं ज्योतिर्भिरवभासते ॥ १६ ॥
उत्तिष्ठति च शीतांशुः शशी लोकतमोनुदः ॥ ह्लादयन्प्राणिनां लोके मनांसि प्रभया विभो ॥१७॥
नैशानि सर्वभूतानि प्रचरन्ति ततस्ततः ॥ यक्षराक्षससङ्घाश्च रौद्राश्च पिशिताशनाः ॥ १८ ॥

दिव्या श्लाघ्या । हितं आमुष्मिकं । कामः ऐहिकं । तदुभयार्थं प्रवृत्ता नदीरूपेणस्वर्गाद्धिमवन्तमुपाश्रितेत्यर्थः ॥९॥ यतोहिमवन्तमाश्रिता ततइत्यर्थः ॥१०॥ सत्यवतीनामनिमित्तमाह—सात्विति ॥ ११ ॥ एवंभूतस्यसिद्धाश्रमागमननिमित्तमाह—अहंहीति । नियमात् यागनियमाद्धेतोः । समुपागतः सिद्धाश्रममिति शेषः ॥ १२ ॥ ममस्वस्यवंशस्यचोत्पत्तिः प्रसङ्गात्कीर्तिता । यत्त्वयापृष्टं तत् । देशस्य गिरिव्रजदेशस्य वैभवंचोक्तं ॥ १३ ॥ इतःपरंनप्रष्टव्यमित्याशयेनाह—गत इति । अर्धोरात्रेरर्धरात्रः । अनपुंसकत्वेपि "अर्धंनपुंसकं" इत्यार्षःसमासः "अहःसर्व"इत्यादिनासमासान्तोऽच् "रात्राह्न—" इतिपुंलिङ्गता । अत्रार्धशब्दोंशवाची । उक्तंहि "भित्तंशकलखण्डेवापुंस्यर्धोऽर्धसमेंऽशके" इति । यावतिरात्रिभागेनिद्रानिषिद्धातावान्गत इत्यर्थः । जागरणेकोदोषइत्यत्राह—माभूदिति । श्वोगन्तव्याध्वनिनिद्राभावप्रयुक्तालस्यकृतविघ्नोमाभूदित्यर्थः । ममकथाःकथयतः मयिकथांकथयति ॥ १४ ॥ अथनिशामुखंवर्णयतिचतुर्भिः—निष्पन्दाइत्यादि । निष्पन्दाः पक्षिसंचाराभावादितिभावः । निलीनाः निद्रांप्राप्ताइत्यर्थः । नैशेन सन्ध्यातिरिक्तकालिकेन ॥१५॥ सन्ध्या वियुज्यते वियुक्ता । वर्तमानसामीप्येलट् । नक्षत्रैः अश्विन्यादिभिः ताराभिःकेवलनक्षत्रैश्च गहनं व्याप्तं । नभः ज्योतिर्भिः ज्योतिष्मद्भिर्नेत्रैरावृतमिवावभासते ॥ १६ ॥ उत्तिष्ठतीति "उदोनूर्ध्वकर्मणि" इतिपरस्मैपदं । तमोनुदतीतितमोनुदः । इगुपधलक्षणःकः ॥१७॥ निशायांप्रभवन्ति नैशानि "प्रभवति" इत्यण् । भूतानि उलूकादयः । ततस्ततः तत्रतत्र । पौर्णमास्यांयज्ञंसमाप्यद्वितीयायांप्रस्थानमितिचतुर्घटिकानन्तरंचन्द्रोदय-

---

ति० नियमात् गयापिण्डदानवत्सिद्धाश्रमैकसाध्ययागजन्यसिद्धिहेतोः । आगमनकार्यंचत्वदनुग्रहात्सिद्धमित्याह—सिद्धाश्रममित्यादि ॥१२॥ शि० अर्धरात्रः रात्रेरर्धं । गतः अतीतः । अतोनिद्रामभ्येहि प्राप्नुहि । "अर्धंनपुंसकं" इतिसमासः । "रात्राह्नाहाः पुंसि" इतिपुंस्त्वं । एतेनतद्घटकीभूतार्धशब्दःखण्डवाचकइतिस्वीकृत्यआर्षस्समासइतिभूषणोक्तिश्चिन्त्या । समांशवाचकत्वेबाधकाभावात् । खण्डवाचकत्वेप्रमाणाभावाच । खण्डवाचकत्वस्वीकारेणार्धशब्दस्यप्रदोषवाचकत्वंस्वीकृत्यव्याख्यानमप्ययुक्तं । "उपास्यरात्रिशेषंतु" इतिवक्ष्यमाणेनविरोधात् ॥ १४ ॥ ति० अर्धरात्रचिह्नान्याह—निष्पन्दाइति । शि० अर्धरात्रलक्षणानिवदन्नाह—निष्पन्दाइत्यादिभिः । नैशेन निशासंबन्धिना । तमसा अन्धकारेण । दिशः अव्याप्ताः अल्पव्याप्तिविशिष्टाः । अर्धरात्रेपूर्वरात्रापेक्षयाकिञ्चित्प्रकाशाधिक्यस्यानुभवसिद्धत्वमितितात्पर्यं ॥ १५ ॥ ति० विसृज्यते व्युयुङ्क्त इत्यर्थः । वर्तमानसामीप्येभूतेलट् । सन्ध्याशब्देनतदुपासनयोग्यगौणकालसाहित्येनसार्धयामरूपःकालोविवक्ष्यते ॥ शि० अर्धरात्रोपिव्यतीतोभवतीतिबोधयन्नाह—शनैरिति । सन्ध्या सम्यक्एकाग्रतांप्राप्नुवन्तिधियश्चित्तवृत्तयोयस्यांतया पूर्वरात्रोत्तररात्रमध्यभक्त्येत्यर्थः । शनैर्वियुज्यतेव्यतीयते । आवृतं अ न आवृतं आवरणंयस्यतत् । महदित्यर्थः ॥ १६ ॥ शि० उत्तिष्ठति उदयते । एतेनतदानींकृष्णनवमीतिव्यक्तम् ॥ १७ ॥

[पा०] १ ङ. झ. हितकार्यार्थं. २ ङ. च. छ. झ. ञ. नियतः. ३ क. ख. च. ठ. भगिन्याः. ४ क. ख. च. ट. ठ. कौशिक्याः. ५ क. ख. सत्यधर्मप्रतिष्ठिता. ६ झ. मनुप्राप्तः. ७ ङ. च. छ. झ. ञ. देशस्यहि. ८ ट. कथां. ९ ङ. झ. विसृज्यते. १० च. छ. ञ. रिवभासते. ११ ङ. च. छ. झ. ञ. उत्तिष्ठते. १२ ङ. च. छ. झ. ञ. ट. त्वया.

एवमुक्त्वा महातेजा विरराम महामुनिः ॥ साधुसाध्विति तं सर्वे ऋषयो ह्यभ्यपूजयन् ॥ १९ ॥
कुशिकानामयं वंशो महान्धर्मपरः सदा ॥ ब्रह्मोपमा महात्मानः कुशवंश्या नरोत्तमाः ॥ २० ॥
विशेषेण भवानेव विश्वामित्रो महायशाः ॥ कौशिकी च सरिच्छ्रेष्ठा कुलोद्योतकरी तव ॥ २१ ॥
इति तैर्मुनिशार्दूलैः प्रशस्तः कुशिकात्मजः ॥ निद्रामुपागमच्छ्रीमानस्तं गत इवांशुमान् ॥ २२ ॥
रामोपि सह सौमित्रिः किञ्चिदागतविस्मयः ॥ प्रशस्य मुनिशार्दूलं निद्रां समुपसेवते ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

प्रातर्विश्वामित्रादिभिःशोणोत्तरणपूर्वकंदूराध्वगमनेनमध्याह्नेजाह्नवीतटेनिवासकल्पनम् ॥ १ ॥ गङ्गावृत्तान्तंपृष्टेनविश्वामित्रेण रामंप्रतिप्रासङ्गिकेनोमावृत्तान्तेनसहसंग्रहेणतत्कथनम् ॥ २ ॥

उपास्य रात्रिशेषं तु शोणाकूले महर्षिभिः ॥ निशायां सुप्रभातायां विश्वामित्रोऽभ्यभाषत ॥ १ ॥
सुप्रभाता निशा राम पूर्वा सन्ध्या प्रवर्तते ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते गमनायाभिरोचय ॥ २ ॥
तच्छ्रुत्वा वचनं तस्य कृत्वा पौर्वाह्णिकीं क्रियाम् ॥ गमनं रोचयामास वाक्यं चेदमुवाच ह ॥ ३ ॥
अयं शोणः शुभजलो गाधः पुलिनमण्डितः ॥ कतरेण पथा ब्रह्मन्संतरिष्यामहे वयम् ॥ ४ ॥
एवमुक्तस्तु रामेण विश्वामित्रोऽब्रवीदिदम् ॥ एष पन्था मयोद्दिष्टो येन यान्ति महर्षयः ॥ ५ ॥
एवमुक्ता महर्षयो विश्वामित्रेण धीमता ॥ पश्यन्तस्ते प्रयाता वै वनानि विविधानि च ॥ ६ ॥

इति सर्वथाअर्धरात्रशब्दःप्रदोषपरएव ॥१८॥ अभ्यपूजयम् अस्तुवन् ॥ १९ ॥ गाधेःकुशिकइतिनामान्तरं। कुशिकानां तद्गोत्रजानां । ब्रह्मोपमाः चतुर्मुखोपमाः ॥ २० ॥ विश्वामित्रः विश्वामित्रसंज्ञः । भवानेवमहात्मेत्यनुषङ्गः । कौशिकीच तवकुलोद्योतकरी कुलप्रकाशकरी ॥२१॥ प्रशस्तः स्तुतः। शंसु स्तुतौ। "यस्यविभाषा" इतिनेट् । "अनिदितां—" इतिनलोपः । श्रीमान् । प्रशंसाकृतहर्षजनितश्रीमान् । अस्तंगतोंशुमानिव तद्वत्परप्रबोधाजनकइत्यर्थः ॥ २२ ॥ किञ्चिदागतविस्मयः निद्रापारवश्यादितिभावः । समुपसेवते अध्वश्रमवशात्सम्यक्प्राप्तः ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुस्त्रिंशःसर्गः ॥ ३४ ॥

अथ स्वपादोद्भवगङ्गावैभवंलोकेप्रवर्तयितुंपृच्छति पञ्चत्रिंशे—उपास्येत्यादि । उपास्य स्थित्वा शयित्वेतियावत् । रात्रिशेषमिति अत्यन्तसंयोगेद्वितीया । सुप्रभातायां निवृत्तायामितियावत् । अत्ररात्रिशेषमित्यनुवादात् पूर्वसर्गेगतोर्धरात्रइत्यत्र निशीथपरत्वंस्वरसमिति गम्यते। यद्वा रात्रिशेषं ब्राह्ममुहूर्ते। उपास्य परमात्मानमितिशेषः । "ब्राह्ममुहूर्तेउत्थायचिन्तयेदात्मनोहितं" इतिस्मृतेः ॥१॥ गमनाय गन्तुं । "क्रियार्थोपपदस्य—" इति चतुर्थी ॥२॥ पूर्वाह्णेभवा पौर्वाह्णिकी तां ॥३॥ गाधः स्वल्पजलः । अतएव पुलिनमण्डितः सैकतालङ्कृतः । तथाच नावंविनागन्तुंशक्यते । कतरेणपथासंतरिष्यामहे ॥४॥ उद्दिष्टः गन्तव्यत्वेननिश्चितः ॥५–६॥

ति० शि० ब्रह्मोपमाः ब्रह्मर्षितुल्याः ॥ २० ॥ इतिचतुस्त्रिंशस्सर्गः ॥ ३४ ॥
नी० ति० प्रश्नबीजंअगाधइति । अतलस्पर्शइत्यर्थः । **शि०** कतरेणेत्युक्त्यातत्रमार्गद्वयेनमनुष्यसंतरणमितिध्वनितं । एतेन अगाधइतिपदच्छेदोनरमणीयइतिबोध्यं ॥ ४ ॥

[पा०] १ क. ङ. च. छ. झ. ञ. तेसर्वे. २ ग. ङ. च. छ. झ. ञ. मुनयो. ३ ख. छ. ट. महाधर्मपरः. ४ ङ. च. छ. झ. ञ. ट. विश्वामित्र. ५ ङ. च. छ. झ. ञ. सरितांश्रेष्ठा. ६ ङ. झ. मुदितैर्मुनि. ७ ट. कौशिकात्मजः. ८ ट. निद्रामेवोप. ९ ग. रात्रिशेषंच. १० ख. ट. शोणकूले. ११ ङ. झ. कृतपूर्वाह्णिकक्रियः. १२ क. चोदयामास. १३ ख. मयोद्दिष्टएते.

ते गत्वा दूरमध्वानं गतेऽर्धदिवसे तदा ॥ जाह्नवीं सरितां श्रेष्ठां ददृशुर्मुनिसेविताम् ॥ ७ ॥
तां दृष्ट्वा पुण्यसलिलां हंससारससेविताम् ॥ बभूवुर्मुनयः सर्वे मुदिताः सहराघवाः ॥ ८ ॥
तस्यास्तीरे ततश्चक्रुस्त आवासपरिग्रहम् ॥ ९ ॥
ततः स्नात्वा यथान्यायं संतर्प्य पितृदेवताः ॥ हुत्वा चैवाग्निहोत्राणि प्राश्य चामृतवद्धविः ॥१०॥
विविशुर्जाह्नवीतीरे शुचौ मुदितमानसाः ॥ विश्वामित्रं महात्मानं परिवार्य समन्ततः ॥
[विष्ठिताश्च यथान्यायं राघवौ च यथार्हतः] ॥ ११ ॥
अथ तत्र तदा रामो विश्वामित्रमथाब्रवीत् ॥ भगवञ्श्रोतुमिच्छामि गङ्गां त्रिपथगां नदीम् ॥ १२ ॥
त्रैलोक्यं कथमाक्रम्य गता नदनदीपतिम् ॥ १३ ॥
चोदितो रामवाक्येन विश्वामित्रो महामुनिः ॥ वृद्धिं जन्म च गङ्गाया वक्तुमेवोपचक्रमे ॥ १४ ॥
शैलेन्द्रो हिमवान्नाम धातूनामाकरो महान् ॥ तस्य कन्याद्वयं राम रूपेणाप्रतिमं भुवि ॥ १५ ॥
या मेरुदुहिता राम तयोर्माता सुमध्यमा ॥ नाम्ना मनोरमा नाम पत्नी हिमवतः प्रिया ॥ १६ ॥
तस्यां गङ्गेयमभवज्ज्येष्ठा हिमवतः सुता ॥ उमा नाम द्वितीयाऽभून्नाम्ना तस्यैव राघव ॥ १७ ॥
अथ ज्येष्ठां सुराः सर्वे देवतार्थचिकीर्षया ॥ शैलेन्द्रं वरयामासुर्गङ्गां त्रिपथगां नदीम् ॥ १८ ॥
ददौ धर्मेण हिमवांस्तनयां लोकपावनीम् ॥ स्वच्छन्दपथगां गङ्गां त्रैलोक्यहितकाम्यया ॥ १९ ॥
प्रतिगृह्य त्रिलोकार्थं त्रिलोकहितकारिणः ॥ गङ्गामादाय ते गच्छन्कृतार्थेनान्तरात्मना ॥ २० ॥

जाह्नवीं गङ्गां ॥७॥ सारसः हंसविशेषः ॥ ८ ॥ तस्या-इतिअर्धं । आवासायपरिगृह्यतइत्यावासपरिग्रहः तं । संमार्जनादिना वासस्थानंचक्रुरित्यर्थः ॥९॥ ततइत्यादिश्लोकद्वयं । यथान्यायं यथाशास्त्रं अघमर्षणसूक्तादिजपपूर्वकमित्यर्थः । पितृदेवताइतिऋषीणामप्युपलक्षणं । अग्निहोत्राणि अग्नौहोतव्यानिपञ्चमहायज्ञादीनि । अमृतवत् अमृततुल्यं । हविः यज्ञशिष्टमन्नं । "यज्ञशिष्टामृतभुजोयान्तिब्रह्मसनातनं" इतिस्मृतेः । शुचौ दृष्टदोषरहिते भोजनस्थानादन्यत्र ॥ १०—११ ॥ अथ उपवेशानन्तरं । तत्र देशे । तदा तस्मिन्नेवकाले । द्वितीयोथशब्दःप्रश्ने "मङ्गलानन्तरारंभप्रश्नकार्त्स्न्येष्वथोअथ"इत्यमरः । गङ्गां गङ्गावृत्तान्तं ॥ १२ ॥ त्रैलोक्यमित्यर्धं ॥ १३ ॥ वृद्धिंत्रैलोक्यमित्यनेनोक्तां । जन्म गङ्गांश्रोतुमित्युक्तं ॥ १४ ॥ धातूनां अयस्ताम्रादीनां । अस्तीतिशेषः । कन्याद्वयं आसीदितिशेषः ॥ १५ ॥ यामेरुदुहिता हिमवतःप्रियापत्नीमनोरमानामप्रसिद्धा सातयोर्मातेत्यन्वयः ॥ १६ ॥ कन्याद्वयस्यनामनीदर्शयति—तस्यामिति ॥१७॥ देवतार्थचिकीर्षया देवतार्थसंपादनेच्छया । प्रयोजनंच स्नानपानादि वक्ष्यमाणसेनापतिजननंवा परदेवतार्चनार्थंवा । अतएवस्वपदेनानुक्तिः ॥ १८ ॥ धर्मेण याचकानप्रत्याख्येयाइतिधर्मेण । जलप्रवाहरूपायानद्याःकथमाकाशेगमनंतत्राह—स्वच्छन्दपथगामिति । स्वच्छन्दः स्वेच्छा तदायत्तःपन्थाःस्वच्छन्दपथः "ऋक्पूरब्धूः" इत्यादिनाअप्रत्ययःसमासान्तः । तंगच्छतीति तथा । मेघजलवद्द्वारगतिविशेषेणाकाशेपिगतिःसंभवतीतिभावः ॥ १९ ॥ त्रिलोकहितकारिणः देवाइतिशेषः । प्रतिगृह्य स्वीकृत्य । आदाय स्वेष्वन्तर्भाव्य ॥ २० ॥

ति० अमृतवत् तत्सदृशंगङ्गाजलंहविश्चप्रागुक्तंप्राश्येत्यर्थः ॥ १० ॥ ति० विष्ठिताः विशेषेणस्थिताः । यथार्हतः यथाऽवस्थानमर्हतः तथास्थिताविल्यर्थः ॥ १२ ॥ ती० धर्मेण स्वकृतधर्मेण । तनयां तनयालंगतां ॥ १९ ॥ ति० त्रिलोकार्थं तारकतो भीतत्रिलोकरक्षकपुत्रोत्पत्त्यर्थं ॥ २० ॥ इतिपञ्चत्रिंशस्सर्गः ॥ ३५ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. तदासर्वेचक्रुर्वासपरिग्रहम्. २ क. स्नाता. ३ ग. चानुत्तमंहविः. ४. ङ. च. छ. ञ. शुभा. ५ इदमर्धं च. छ. झ. ञ. दृश्यते. ६ क. ग. घ. ङ. झ. ञ. ट. संप्रहृष्टमनारामो. च. छ. ञ. सुप्रहृष्टमनारामो. ७ ङ. च. झ. हिमवान्नाम. ८ क. च. छ. ञ. द्वयंजातं. ९ ङ झ. ञ. नाम्नामेनामनोज्ञावै. च. नाम्नामेनामनुष्येन्द्र. क. ख. ट. नाम्ना चमेनकाराम. १० क. ख. घ. च. छ. ञ. गङ्गासमभवत्. ११ क. ख. ग. ङ. च. त्कन्यातस्यैवराघव. १२ क. घ—छ. झ. ञ. देवकार्यचिकीर्षया. १३ ग. प्रतिगृह्यततोदेवाः. १४ ङ. झ. त्रिलोकहितकाङ्क्षिणः. ट. त्रैलोक्यहितकारिणः. १५ क. ग. वैगच्छन्.

या चान्या शैलदुहिता कन्याऽऽसीद्रघुनन्दन ।। उग्रं सा व्रतमास्थाय तपस्तेपे तपोधना ।। २१ ।।
उग्रेण तपसा युक्तां ददौ शैलवरः सुताम् ।। रुद्रायाप्रतिरूपाय उमां लोकनमस्कृताम् ।। २२ ।।
एते ते शैलराजस्य सुते लोकनमस्कृते ।। गङ्गा च सरितां श्रेष्ठा उमा देवी च राघव ।। २३ ।।
एतत्ते सर्वमाख्यातं यथा त्रिपथगा नदी ।। खं गता प्रथमं तात गतिं गतिमतांवर ।। २४ ।।
सैषा सुरनदी रम्या शैलेन्द्रस्य सुता तदा ।। सुरलोकं समारूढा विपापा जलवाहिनी ।। २५ ।।
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चत्रिंशः सर्गः ।। ३५ ।।

षट्त्रिंशः सर्गः ।। ३६ ।।

कदाचनशिवयोःसुरतेचिरायितेअनर्थाशङ्कयासुरैस्तदुपरमप्रार्थनेशिवेनक्षुभितपूर्वस्यस्वतेजसःपृथिव्यामुत्सर्जनम् ।। १ ।। रतिविघ्नकरणेनकुपितयादेव्यादेवानामनपत्यत्वशापदानम् ।। २ ।। ततःशिवेनशिवयासहहिमवतिगिरौतपश्चरणम् ।। ३ ।।

उक्तवाक्ये मुनौ तस्मिन्नुभौ राघवलक्ष्मणौ ।। अभिनन्द्य कथां वीरावूचतुर्मुनिपुङ्गवम् ।। १ ।।
धर्मयुक्तमिदं ब्रह्मन्कथितं परमं त्वया ।। दुहितुः शैलराजस्य ज्येष्ठाया वक्तुमर्हसि ।।
विस्तरं विस्तरज्ञोसि दिव्यमानुषसंभवम् ।। २ ।।
त्रीन्पथो हेतुना केन प्लावयेल्लोकपावनी ।। ३ ।।
कथं गङ्गा त्रिपथगा विश्रुता सरिदुत्तमा ।। त्रिषु लोकेषु धर्मज्ञ कर्मभिः कैः समन्विता ।। ४ ।।
तथा ब्रुवति काकुत्स्थे विश्वामित्रस्तपोधनः ।। निखिलेन कथां सर्वामृषिमध्ये न्यवेदयत् ।। ५ ।।
पुरा राम कृतोद्वाहो नीलकण्ठो महातपाः ।। दृष्ट्वा च स्पृहया देवीं मैथुनायोपचक्रमे ।। ६ ।।

गङ्गावृत्तान्तप्रसङ्गेनतदनुजावृत्तान्तमप्याह—या चेति । कन्या अलब्धभर्तृका ।। २१ ।। अप्रतिरूपाय अनुकूलाय । रुद्रार्थंतपस्यन्तीमुमांप्रसन्नायतस्मैददावित्यर्थः ।।२२।। उपसंहरति—एतेइति ।।२३।। एवंगङ्गोत्पत्तिप्रकारंप्रथमप्रश्नोत्तरमुक्त्वा द्वितीयप्रश्नोत्तरंत्रिपथगामित्वमुच्यतइत्याह—एतदिति । प्रथमंतावत् खं खात्मिकां गतिं गता । गतिमतां सुन्दरगतिमतां ।।२४।। अथसुरलोकंचसमारूढेत्याह—सैषेति ।। २५ ।। इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ।। ३५ ।।

"भगवञ्श्रोतुमिच्छामिगङ्गांत्रिपथगांनदीं"इति गङ्गायास्त्रिपथगात्वप्रकारेपृष्टेअन्तरिक्षस्वर्गगमनयोःप्रत्युक्तत्वात्तत्रतृतीयपथगमनं कथमित्याशयेनपुनःपृच्छन्तंश्रीरामंप्रत्याहषट्त्रिंशे—उक्तवाक्यइत्यादि । मुनौ उक्तवाक्ये उक्तोत्तरेसति । अत्रोभावित्युक्तेःपूर्वसर्गेरामपदं लक्ष्मणस्याप्युपलक्षणंवेदितव्यं । कथां पूर्वोक्तां ।। १ ।। अर्धत्रयं । धर्मयुक्तं धर्मफलकश्रवणमित्यर्थः । इदं वृत्तं ज्येष्ठायादुहितुःवृत्तंत्वयाकथितं । तस्यादिव्यमानुषसंभवं दिव्यलोकेमानुषलोकेच संभवंविस्तरंवक्तुमर्हसि ।। २ ।। त्रीन्पथः भूर्भुवस्स्वर्मार्गान् । केनहेतुना प्लावयेत् प्लुता । भावयेदित्यपिपाठः । लकारव्यत्ययः । इतरयोःपूर्वसर्गएवोक्तत्वात्केनहेतुनातृतीयपथंगतेतिद्वितीयप्रश्नार्थः ।। ३ ।। तृतीयप्रश्नमाह—कथमिति । त्रिपथगागङ्गा कथंविश्रुता कैःकर्मभिः व्यापारैः । सरिदुत्तमाआसीत् ।।४।। प्रथमप्रश्नोत्तरमाहेत्याह—तथेति । काकुत्स्थइतिलक्ष्मणस्याप्युपलक्षणं । निखिलेन विस्तरेण । सर्वां दिव्यसंभवां मानुषसंभवांच ।। ५ ।। निखिलेनेत्युक्तंगाङ्गेयसंभव-

---

[पा०] १ ङ. झ. ट. उग्रंसुव्रत. २ क. ग. घ. ट. तपोधनाः. ख. हिमालये. ३ ट. उमायाप्रतिरूपाय. ४ ङ. झ. यथात्रिपथगामिनी. ट. गङ्गात्रिपथगानदी. ५ ट. प्रथमंराम. ६ ट. शैलेन्द्रतनयातदा. ख. शैलेन्द्रस्यसुतापुरा. ७ क—च. झ. ञ. ट. प्रतिनन्द्यकथां. ८ क. ख. ङ. च. छ. झ. ञ. ट. कृतोद्वाहश्शितिकण्ठो. ९ क. स्पृष्ट्वाचस्पृहयादेवीं. ङ. झ. दृष्ट्वाच भगवान्देवीं.

*शितिकण्ठस्य देवस्य दिव्यं वर्षशतं गतम् ॥ [*तस्य संक्रीडमानस्य महादेवस्य धीमतः ॥ ७ ॥
एवं मन्मथयुद्धे तु तयोर्नासीत्पराजयः] ॥ न चापि तनयो राम तस्यामासीत्परंतप ॥
[धीमतो देवराजस्य रुद्रस्यापि महात्मनः] ॥ ८ ॥
ततो देवाः समुद्विग्नाः पितामहपुरोगमाः ॥ यदिहोत्पद्यते भूतं कस्तत्प्रतिसहिष्यते ॥ ९ ॥
अभिगम्य सुराः सर्वे प्रणिपत्येदमब्रुवन् ॥ १० ॥
देवदेव महादेव लोकस्यास्य हिते रत ॥ सुराणां प्रणिपातेन प्रसादं कर्तुमर्हसि ॥ ११ ॥
न लोका धारयिष्यन्ति तव तेजः सुरोत्तम ॥ ब्राह्मेण तपसा युक्तो देव्या सह तपश्चर ॥ १२ ॥
त्रैलोक्यहितकामार्थं तेजस्तेजसि धारय ॥ [रक्ष सर्वानिमाँल्लोकान्नालोकं कर्तुमर्हसि] ॥ १३ ॥
देवतानां वचः श्रुत्वा सर्वलोकमहेश्वरः ॥ बाढमित्यब्रवीत्सर्वान्पुनश्चेदमुवाच ह ॥ १४ ॥
धारयिष्याम्यहं तेजस्तेजस्येव सहोमया ॥ त्रिदशाः पृथिवी चैव निर्वाणमधिगच्छतु ॥ १५ ॥
यदिदं क्षुभितं स्थानान्मम तेजो ह्यनुत्तमम् ॥ धारयिष्यति कस्तन्मे ब्रुवन्तु सुरसत्तमाः ॥ १६ ॥
एवमुक्तास्ततो देवाः प्रत्यूचुर्वृषभध्वजम् ॥ यत्तेजः क्षुभितं ह्येतत्तद्धरा धारयिष्यति ॥ १७ ॥
एवमुक्तः सुरपतिः प्रमुमोच महीतले ॥ तेजसा पृथिवी येन व्याप्ता सगिरिकानना ॥ १८ ॥
ततो देवाः पुनरिदमूचुश्चाथ हुताशनम् ॥ प्रविश त्वं महातेजो रौद्रं वायुसमन्वितः ॥ १९ ॥

माह—पुरेति । कृतोद्वाहइतिपरपरिग्रहव्यावृत्तिः । दृष्ट्वा स्पृहया महातपोनिष्ठत्वेपिकामबाणवशात्तस्यामभिलाषेण । मैथुनाय मिथुनकर्मकर्तुं । उपचक्रमे ॥ ६ ॥ दिव्यवर्षशतंगतं मैथुनेनैवेतिशेषः ॥ ७ ॥ तनयः तनयप्रापकरेतोविसर्गः ॥८॥ पितामहपुरोगमाःदेवाः । समुद्विग्नाः भीताः । पाठान्तरे समुद्युक्ताः उद्योगंचक्रुः । किमर्थं । इह पार्वत्यां । यद्भूतं पुत्रः । उत्पद्यते उत्पत्स्यते । वर्तमानसामीप्येवर्तमानवत्प्रयोगः । तत् कः प्रतिसहिष्यते । इतिविचार्यतन्निवर्तनायसमुद्युक्ताइत्यर्थः ॥ ९ ॥ तमेवोद्योगमाह—अभिगम्येति । महादेवमितिशेषः ॥ १० ॥ देवदेवेत्यनेनमहादेवशब्दार्थउक्तः । प्रणिपातेन पादमूलपतनेन ॥ ११ ॥ तेजः तेजस्समुद्भूतंपुत्रं । नधारयिष्यन्ति नसहिष्यन्ते । अतो ब्राह्मेण वेदावगतेन । तपसा योगेन । युक्तःसन् तदङ्गतयादेव्यासहतपश्चर । नतेजः पार्वत्यांमोक्तुमर्हसीतिभावः ॥ १२ ॥ त्रैलोक्यहितमेवकामः काम्यमानः पुरुषार्थः तदर्थम् । तेजः रेतः । तेजसि तेजोमयनिजशरीरे । धारय नमुञ्चेत्यर्थः ॥ १३ ॥ सर्वलोकमहेश्वरः सर्वलोकानांपरमनियन्ता । सर्वलोकपितामहइतिपाठान्तरं ॥ १४ ॥ बाढमित्यङ्गीकृतांशमाह—धारयिष्यामीति । तेजः अक्षुभितांशं । उमया उमाप्यक्षुभितंशोणितरूपंतेजोधारयत्वित्यर्थः । पृथिवीशब्देनलोकाउच्यन्ते । निर्वाणं सुखं ॥१५॥ "पुनश्चेदमुवाचह" इत्युक्तमंशंदर्शयति—यदिदमिति । स्थानात् रेतःस्थानहृदयसंपुटात् । अनुत्तमं दुर्भरं । मे मह्यं । ब्रुवन्तु ॥ १६ ॥ धरा सर्वधारणशक्तिमती । अनेन धरा तद्धारणार्थंदेवैःप्रार्थितेतिसिद्धं ॥ १७ ॥ सुरपतिः रुद्रः । प्रमुमोच तेजइतिसिद्धं । येनतेजसापृथिवीव्याप्ता तत्प्रमुमोच॥१८॥ततः पृथिव्यांव्याप्तत्वादेवहेतोः । पृथिवीभग्नाभविष्यतीतिहुताशनमूचुः । पुनरूचुरित्यनेनाग्नेःप्रवेशभीतत्वंगम्यते । अग्निचारणहेतुतयावायुसम-

शि० यत्तेजः अद्य अस्मिन्काले । क्षुभितंतत्तेजःधराधारयिष्यति । अद्येत्युक्त्या इतःप्रभृतिअधिकंवीर्यंच्युतंचेत् तद्धारणे न कश्चनसमर्थोभवितेतिध्वनितं ॥ १७ ॥ महातेजः वायुसमन्वितएवत्वं प्रविश आत्मनिप्रवेशय । अन्तर्भावितणिजर्थः । चशब्द

[पा०] * ङ. च. झ. ञ. ट. पाठेषु. तस्यसंक्रीडमानस्य. शितिकण्ठस्यदेवस्य. इत्यर्धयोर्व्युत्क्रमोदृश्यते. १ ख. शितकण्ठस्यदेव्याश्च. * इदमर्धद्वयं क. ञ. दृश्यते. २ ख. तयासंक्रीडमानस्य. ३ ख. देवदेवस्य. ४ इदमर्धं च. दृश्यते. ५ ङ. झ. सर्वेदेवास्समुद्युक्ताः. ६ ङ. च. छ. झ. ञ. ट. सहिष्यति. ७ ट. हितेरतः. ८ इदमर्धं क. ग. च. छ. झ. ञ. दृश्यते. ९ ङ. छ. झ. स्तेजसैव. १० क. ख. घ. छ. झ. ञ. क्षुभितंह्येतद्धरा. ट. क्षुभितंतेद्यतद्धरा. ११ ङ. झ. ट. प्रमुमोचमहाबलः. १२ ङ. च. छ. झ. ञ. ट. श्चापिहुताशनम्. १३ क. ङ. च. छ. झ. ञ. ट. आविशत्वं.

तदग्निना पुनर्व्याप्तं संजातः[1] श्वेतपर्वतः ॥ दिव्यं शरवणं चैव पावकादित्यसन्निभम् ॥
यत्र जातो महातेजाः कार्तिकेयोऽग्निसंभवः ॥ २० ॥
अथोमां च शिवं चैव देवाः सर्षिगणास्तदा[2] ॥ पूजयामासुरत्यर्थं सुप्रीतमनसस्ततः[3] ॥ २१ ॥
अथ शैलसुता राम त्रिदशानिदमब्रवीत् ॥ [[4] अप्रियस्य कृतस्याद्य फलं प्राप्स्यथ मे सुराः ॥ २२ ॥
इत्युक्त्वा सलिलं गृह्य पार्वती भास्करप्रभा] ॥ समन्युरशपत्सर्वान्क्रोधसंरक्तलोचना ॥ २३ ॥
यस्मान्निवारिता चैव[5] संगतिः पुत्रकाम्यया ॥ अपत्यं स्वेषु दारेषु[6] तस्मान्नोत्पादयिष्यथ ॥ २४ ॥
अद्यप्रभृति युष्माकमप्रजाः सन्तु पत्नयः ॥ [पत्न्यो[7] न जनयिष्यन्ति ह्यद्यप्रभृति चात्मजान्] ॥
एवमुक्त्वा सुरान्सर्वाञ्शशाप पृथिवीमपि ॥ २५ ॥
अवने नैकरूपा त्वं बहुभार्या भविष्यसि ॥ न च पुत्रकृतां प्रीतिं मत्क्रोधकलुषीकृता ॥
प्राप्स्यसि[8] त्वं सुदुर्मेधे मम पुत्रमनिच्छती ॥ २६ ॥
तान्सर्वान्व्रीडितान्दृष्ट्वा[9] सुरान्सुरपतिस्तदा ॥ गमनायोपचक्राम दिशं वरुणपालिताम् ॥ २७ ॥
स गत्वा तप आतिष्ठत्पार्श्वे तस्योत्तरे गिरेः[10] ॥ हिमवत्प्रभवे शृङ्गे सहदेव्या महेश्वरः ॥ २८ ॥
एष ते विस्तरो राम शैलपुत्र्या निवेदितः ॥ गङ्गायाः प्रभवं[11] चैव शृणु मे सहलक्ष्मणः[12] ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

न्वितइत्युक्तं ॥ १९ ॥ अर्धत्रयं । तत् तेजः । अग्निना व्याप्तंसत् श्वेतपर्वतःसंजातः । ततःकालपरिपाकेनशरवणंचसंजातं । शरणांवनंशरवणं । "प्रनिरन्तश्शर—" इतिणत्वं । शरवणंविशेषयति—यत्रेति । कृत्तिकानामपत्यंपुमान्कार्तिकेयः । "स्त्रीभ्योढक्" । स्तन्यदानात्कृत्तिकापुत्रत्वं । अग्निनाधृत्वामुक्तत्वादग्निसंभवः ॥ २० ॥ पूजयामासुः मैथुनविघ्नकृतकोपशान्त्यर्थमित्यर्थः ॥ २१ ॥ अब्रवीदित्येतद्विशिष्योच्यते अशपदिति ॥ २३ ॥ पुत्रकाम्यया मया । संगतिः भर्तृसंयोगो मैथुनरूपः । सायस्मान्निवारिता तस्मात् यूयमपि स्वेषुदारेषु । अपत्यं पुत्रं । नोत्पादयिष्यथ ॥ २४ ॥ पूर्वार्धेनपूर्वश्लोकपठितमुच्यते । पत्नयइत्यार्षंह्रस्वत्वं ॥२५॥ अवनइतिसार्धश्लोकः । नैकरूपा ऊषरत्वादिरूपेणनानाविधा । बहुभार्या बहूनांराज्ञांभार्या । ममपुत्रंअनिच्छती अनिच्छन्ती । त्वं मत्क्रोधेन शापरूपेण । कलुषीकृता विपर्यस्तप्रकृतिःसती । पुत्रकृतांप्रीतिं नप्राप्स्यसीतिभावः ॥ २६ ॥ सुरपतिः रुद्रः । तान्सुरान् स्वकीयशापेनव्रीडितान् लज्जितान् । दृष्ट्वा प्रियाशापस्य दुष्परिहरत्वात्स्वीयशापदुःखस्यद्रष्टुमशक्यत्वाच्च वरुणपालितांदिशं हिमवतः प्रतीचींप्रति । गमनायोपचक्राम । परस्मैपदमार्षं ॥ २७ ॥ हिमवत्प्रभवे तस्यहिमवतोगिरेरुत्तरपार्श्वभूतेशृङ्गे देव्यासहतपआतिष्ठत् सदातपोव्रतमसंकल्पयदित्यर्थः ॥ २८ ॥ ननु "दुहितुःशैलराजस्यज्येष्ठायावक्तुमर्हसि" इति पार्वतीवृत्तान्तमुपेक्ष्यगङ्गावैभवएवमयापृष्टे तद्विहायोपेक्षितमेवपार्वतीवृत्तान्तंकिमर्थंकथितवानसीति रामस्यशङ्कांपरि-

---

एवार्थकः ॥ १८ ॥ **शि०** पावकादित्यसंनिभं पावकस्थितादित्यसदृशं ॥ २० ॥ **शि०** संगतिः सम्यक्गतिःपतिसंयोगोयस्याःसा ॥ २४ ॥ **शि०**नार्हथ अतएवयुष्माकं पत्नयःपत्न्यः । अप्रजाःसन्तु । शापेनौरसपुत्रोत्पत्तिसंनिवार्यक्षेत्रजपुत्रोत्पत्तिंनिवारयन्तीआह । अद्यप्रभृतियुष्माकंपत्न्यः आत्मजान् पुत्रान् । नैवजनयिष्यन्ति पत्यन्तरादपिनोत्पादयिष्यन्तीत्यर्थः ॥ २५ ॥ **ति०** नचपुत्रकृतांप्रीतिंवराहादुत्पन्नस्यापिनरकासुरस्यभौमस्यकृष्णावतारेतेनैवहननात् ॥ २६ ॥ **वि०** हिमवत्प्रभवे हिमवत्प्रभवाख्येशृङ्गे ॥ २८ ॥ इतिषट्त्रिंशःसर्गः ॥ ३६ ॥

[पा०] १ सजातः. २ क. ङ. च. छ. झ. ञ. ट. सर्षिगणास्तथा. ३ ख. ङ. च. छ. झ. ञ. मनसस्तदा. ४ कुण्डलान्तर्गतंअर्धद्वयं ग. पाठेदृश्यते. ५ क. ग. ङ. च. झ. ञ. चाहंसंगतापुत्रकाम्यया. ट. चाहंसंगतिःपुत्रकाम्यया. ६ क. ग. ङ. च. छ. झ. ञ. ट. दारेषुनोत्पादयितुमर्हथ. ७ इदमर्धं ट. पुस्तकेदृश्यते. ८ ङ. झ. ट. प्राप्यसेत्वं. ९ ट. न्सर्वान्व्यथितान्दृष्ट्वा. ङ. झ. न्सर्वान्पीडितान्दृष्ट्वा. १० ग. च. गिरौ. ११ ग. प्रभवंचापि. १२ क. ग. झ. ञ. सहलक्ष्मण.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

देवैर्ब्रह्माणंप्रतिशिवयोस्तपःप्रवृत्त्याअपत्योत्पादनवैमुख्यनिवेदनपूर्वकंसेनापत्युत्पादनेऽपायकल्पनप्रार्थना ॥ १ ॥ ततोब्रह्मवचनाद्देवानांचोदनयाऽग्निनास्वगतरुद्रतेजसोगङ्गायामुत्सर्जनम् ॥ २ ॥ तद्धारणाशक्तयागङ्गयाऽग्निवचनेनहिमवत्पादेसमुत्सृष्टात्तेजसःस्कन्दस्यप्रादुर्भावः ॥ ३ ॥ देवैःसैनापत्येऽभिषिक्तेनतेनकुमारेणदैत्यसेनाविजयः ॥ ४ ॥

तप्यमाने तपो देवे देवाः सर्षिगणाः पुरा ॥ सेनापतिमभीप्सन्तः पितामहमुपागमन् ॥ १ ॥
ततोऽब्रुवन्सुराः सर्वे भगवन्तं पितामहम् ॥ प्रणिपत्य सुराः [1]सर्वे सेन्द्राः साग्निपुरोगमाः ॥ २ ॥
[3]यो नः सेनापतिर्देव दत्तो भगवता पुरा ॥ [[4]स न जातोऽद्य भगवन्नसद्वैरिनिबर्हणः ॥ ३ ॥
तत्पिता भगवाञ्शर्वो [5]हिमवच्छिखरेऽद्य वै] ॥ [6]तपः परममास्थाय तप्यते स्म सहोमया ॥ ४ ॥
यदत्रानन्तरं कार्यं लोकानां हितकाम्यया ॥ संविधत्स्व विधानज्ञ त्वं हि नः परमा गतिः ॥ ५ ॥
देवतानां वचः श्रुत्वा सर्वलोकपितामहः ॥ [7]सान्त्वयन्मधुरैर्वाक्यैस्त्रिदशानिदमब्रवीत् ॥ ६ ॥
शैलपुत्र्या यदुक्तं [8]तन्न प्रजाः सन्तु पत्निषु ॥ तस्या वचनमक्लिष्टं सत्यमेतन्न [9]संशयः ॥ ७ ॥
इयम[10]काशगा गङ्गा यस्यां पुत्रं हुताशनः ॥ जनयिष्यति देवानां सेनापतिमरिंदमम् ॥ ८ ॥
ज्येष्ठा शैलेन्द्रदुहिता मानयिष्यति तत्[11]सुतम् ॥ उमायास्तद्बहुमतं भविष्यति न संशयः ॥ ९ ॥

हरति—एषइति । शैलपुत्र्याः पार्वत्याःसंबन्धी कथाविस्तरो निवेदितः । वक्ष्यमाणगङ्गावैभवकथनोपयोगित्वेनोक्तः । गङ्गायाःप्रभवं प्रभावं । त्वं शृणु । चः प्राधान्ये ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्त्रिंशःसर्गः ॥ ३६ ॥

अथ प्रतिज्ञातं स्कन्दोत्पादकत्वरूपं दिव्यसंभववैभवमाहसप्तत्रिंशे—तप्यमानइत्यादि । तप्यमाने तपःकर्मकत्वादात्मनेपदकर्मवद्भावौ । देवसेनापतित्वंविहाय केवलतपःप्रवणइत्यर्थः ॥ १ ॥ अग्निनापुरोगमेनसहिताः साग्निपुरोगमाः । सुराःसर्वेप्रणिपत्य सुराःसर्वेअब्रुवन्नितिक्रियाभेदान्नपुनरुक्तिः ॥ २ ॥ भगवता भवता यःसेनापतिरस्मभ्यमादिकालेदत्तः सइदानीमुमयासहतप्यते । स्मेतिप्रसिद्धौ ॥ ३–४ ॥ अनन्तरं सेनापतावन्यपरेसति अत्र सेनापतिविषये । यत्कार्यं तत्संविधत्स्व आलोचय । तमेवाहूयसैनापत्येनिवेशय अन्यंवोत्पादयेत्यर्थः ॥ ५ ॥ सान्त्वयन् । उग्रेतपसि वर्तमानस्यतस्यरुद्रस्यनिवर्तनमशक्यं तत्रनाभिनिवेशः कार्यइतिसमादधानइत्यर्थः ॥ ६ ॥ अन्यंवोत्पादयेत्यत्रप्रतिवक्ति—शैलेति । शैलपुत्र्या पार्वत्या देवानोपत्निषुप्रजानसन्त्वितियदुक्तं तद् वचनं अक्लिष्टं अमोघं । मयासत्यमेवोच्यते अत्रसंशयोभवद्भिर्नकर्तव्यः ॥ ७ ॥ तर्हिकागतिरित्यत्राह—इयमिति । इयं बुद्धिस्था । अस्तीतिशेषः ॥ ८ ॥ कथमिदंगङ्गासंमन्यतेकुतोवाउमानकुप्येत्तत्राह—ज्येष्ठेति । तत्सुतं अग्नेःसुतं ।

ति० तप्यमानइति । देवाइतिशेषः ॥ १ ॥ ति० अत्रसुराःसर्वेइतिपुनरुक्तं । अतःपाठान्तरमन्वेषणीयं । द्वितीयार्धेसुराराम इतिपाठः । रामसंबोधनंचैतत् । शि० सर्वे सर्वेषांमुनीनांईःईप्सितप्राप्तिर्यस्मात्तत्संबोधनंहेसर्वे । किंचसर्वान्एतिस्वप्रकाशत्रह्मद्वाराव्याप्नोतितत्संबोधनं । सुराः परमदातःहेराम । रादानइतिधातोः । सर्वेसुराःपितामहमब्रुवन् । एतेनअत्रसुरास्सर्वेइतिपुनरुक्तंअतःपाठान्तरमन्वेषणीयमितिभट्टोक्तिश्चिन्त्या । उक्तरीत्यापौनरुक्त्यस्पर्शाभावात् । यत्तुक्रियाभेदान्नपौनरुक्त्यमितिभूषणकृद्भिरुक्तंतदपिचिन्त्यं । समानकर्तृकेत्क्तोऽनुशासनेनपौनरुक्त्यतादवस्थ्यात् ॥ २ ॥ शि० ज्येष्ठा पूर्वप्रादुर्भूताशैलेन्द्रदुहितागङ्गा । तंसेनापतिंमानयिष्यति । स्वजलादुत्पन्नत्वादितिभावः । तत् गङ्गामानविषयीभूतं । उमायाबहुमतं शिवसंसर्गजनितस्वरजोहेतुक-

[पा०] १ ङ. च. छ. ञ. ट. सेन्द्रास्साग्निपुरोगमाः. २ च. छ. ञ. सर्वेसेन्द्रास्सर्षिगणास्ततः. ङ. झ. रामसेन्द्रास्साग्निपुरोगमाः. ३ ङ. झ. येनसेनापतिर्देव. ४ इदमर्धद्वयं क. घ. च. छ. ञ. दृश्यते. ५ च. छ. ञ. हिमवच्छिखरालयः. क. हिमवच्छिखरेऽवसत्. ६ ग. ङ. च. छ. झ. ञ. ट. सतपःपरमास्थाय. ७ क. ख. सान्त्वयन्विविधैर्वाक्यैः. ८ क. तदप्रजास्स्थस्वपत्निषु. ग. ञ. तन्नप्रजास्यथपत्निषु. ङ. झ. ट. तन्नप्रजास्त्वासुपत्निषु. घ. तन्नप्रजास्त्वथपत्निषु. ९ क. ख. घ. ङ च. झ. ञ. ट. मेवनसंशयः. १० ङ. झ. ट. माकाशगङ्गाच. ११ क. ख. घ.—छ. झ. ञ. ठ. तंसुतम्.

तच्छ्रुत्वा वचनं तस्य कृतार्था रघुनन्दन ॥ प्रणिपत्य सुराः सर्वे पितामहमपूजयन् ॥ १० ॥
ते गत्वा पर्वतं राम कैलासं धातुमण्डितम् ॥ अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः ॥ ११ ॥
देवकार्यमिदं देव संविधत्स्व हुताशन ॥ शैलपुत्र्यां महातेजो गङ्गायां तेज उत्सृज ॥ १२ ॥
देवतानां प्रतिज्ञाय गङ्गामभ्येत्य पावकः ॥ गर्भं धारय वै देवि देवतानामिदं प्रियम् ॥ १३ ॥
तस्य तद्वचनं श्रुत्वा दिव्यं रूपमधारयत् ॥ दृष्ट्वा तन्महिमानं स समन्तादवकीर्यत ॥ १४ ॥
समन्ततस्तदा देवीमभ्यषिञ्चत पावकः ॥ सर्वस्रोतांसि पूर्णानि गङ्गाया रघुनन्दन ॥ १५ ॥
तमुवाच ततो गङ्गा सर्वदेवपुरोहितम् ॥ अशक्ता धारणे देव तव तेजः समुद्धतम् ॥
दह्यमानाऽग्निना तेन संप्रव्यथितचेतना ॥ १६ ॥
अथाब्रवीदिदं गङ्गां सर्वदेवहुताशनः ॥ इह हैमवते पादे गर्भोऽयं सन्निवेश्यताम् ॥ १७ ॥
श्रुत्वा त्वग्निवचो गङ्गा तं गर्भमतिभास्वरम् ॥ उत्ससर्ज महातेजः स्रोतोभ्यो हि तदाऽनघ ॥ १८ ॥
यदस्या निर्गतं तस्मात्तप्तजांबूनदप्रभम् ॥ काञ्चनं धरणीं प्राप्तं हिरण्यममलं शुभम् ॥ १९ ॥
ताम्रं कार्ष्णायसं चैव तैक्ष्ण्यादेवाभ्यजायत ॥ मलं तस्याभवत्तत्र त्रपु सीसकमेव च ॥

मानयिष्यति बहुमतिपूर्वंजनयिष्यतीत्यर्थः । तदुमायाबहुमतं स्वज्येष्ठायाःप्रीत्यर्थत्वादितिभावः ॥ ९ ॥ कृतार्थाः कृतार्थप्रायाः ॥ १० ॥ दैवतशब्दःपुल्लिंगोप्यस्ति “ दैवतानिपुंसिवा ” इत्यनुशासनात् । दग्धरुद्रतेजसोऽग्नेःस्थानंकैलासः । पुत्रार्थं पुत्रोत्पादनार्थं अग्निमूर्त्यन्तरं दग्धरुद्रतेजःस्थं ॥ ११ ॥ संविधत्स्व संपादय । अस्यविवरणमुत्तरार्धं । प्रथमंसामान्येनोक्तिरग्निहृदयज्ञानाय । महातेजइतिसंबोधनं । तेजः रेतः ॥ १२ ॥ देवताभ्यस्तथेतिप्रतिज्ञायाकाशगङ्गांगत्वा हे देविगर्भंधारय इत्युवाचेतिशेषः । किमर्थमित्यतआह — देवतानामिदंप्रियमिति ॥ १३ ॥ दिव्यंरूपं दिव्यस्त्रीवेषं । सोऽग्निस्तस्यामहिमानं सौन्दर्यातिशयंदृष्ट्वा समन्तात् सर्वावयवेभ्यः अवकीर्यत अवाकिरत् । आर्षः श्यन्प्रत्ययः । हृतवीर्योभूत् “अङ्गारसदृशीनारीघृतकुंभसमःपुमान् ” इतिन्यायात् ॥१४॥ समन्ततः सर्वावयवेषु । अभ्यषिञ्चत रेतःसर्वावयवेषुयथाव्याप्तं भवतितथासिक्तवानित्यर्थः । तेनसर्वस्रोतांसि सर्वावयवाः । पूर्णानि व्याप्तानि ॥ १५ ॥ तमित्यर्धत्रयं । तेनाग्निना अग्नितेजसा । दह्यमाना अतएवसंप्रव्यथितचेतना अतिदुःखितचित्तागङ्गा । सर्वदेवानांपुरोहितं “ अग्निमीळेपुरोहितं ” इतिश्रुतेः । तमग्निमुवाच । कथं हेदेव तवतेजः समुद्धतं अभिवृद्धंभवति । अस्यधारणेअशक्तास्मीति ॥ १६ ॥ सर्वदेवानांयत् हुतंतदश्नातीतिसर्वदेवहुताशनः । पादेपर्यन्तपर्वते अग्निदग्धश्वेतपर्वतीकृतरुद्रतेजोराशावित्यर्थः ॥ १७ ॥ महातेजइतिसंबोधनं । स्रोतोभ्यः उत्कृष्येतिशेषः ॥१८॥ अस्याः गङ्गातः । निर्गतंयत् शोणितादि धरणींगतं । तस्मात्तप्तजांबूनदप्रभं द्रुतस्वर्णविशेषकान्ति काञ्चनं अमलं शुभंहिरण्यंरजतंच । अभवदितिवक्ष्यमाणमनुषज्यते । अमलमितिनिर्गतविशेषणंवा ॥ १९ ॥ गङ्गातोनिर्ग-

जनिमत्त्वेनात्यन्तप्रेमविषयीभूतंभविष्यति ॥ ९ ॥ शि० सर्वदेवताः सर्वःशिवोविष्णुर्वादेवतायेषांतेतथा । तेदेवाः । दन्त्यादिरपिसर्वशब्दःशिववाचकोस्तीतिकोशादौप्रसिद्धं । विष्णुपरतातुस्रुतमस्मिन्निखिलमितिव्युत्पत्त्यालब्धा । अतएवसर्वश्शर्वइतिसहस्रनामोक्तिस्संगच्छते ॥ ११ ॥ ति० सः ऐश्वरतेजोराशिः । पारदोऽवशीर्यत शीर्णः ॥ १४ ॥ ति० अभ्यषिञ्चत रसेश्वरेणेतिशेषः । स्रोतांसि नाड्यः ॥ १५ ॥ ति० सर्वदेवपुरोगमं पुरोगमः पुरोयायी ॥ १६ ॥ अभिजायत अडभावआर्षः ।

[पा०] १ ख. पिरघूत्तम. २ ङ. झ. परमंराम. ३ क. ग—छ. झ. ञ. ट. सर्वदेवताः. ४ क. ग. ङ. च. छ. झ. ञ. ट. समाधत्स्वहुताशन. ५ क. ग. च. छ. महातेजागङ्गायां. ६ च. गर्भंधारय. ७ क. ख. घ.—छ. झ. ञ. ट. इत्येतद्वचनंश्रुत्वा. ग. अग्नेस्तुवचनं. ८ क. घ. च. छ. ञ. ट. सतस्यामहिमांदृष्ट्वासमन्तादवकीर्यत. ङ. झ. सतस्यामहिमांदृष्ट्वासमन्तादवशीर्यत. ९ क. ख. च. छ. ञ. समन्ततस्तुतांदेवीं. १० ख. घ. च. गङ्गायांरघुनन्दन. ११ ख. ग. ङ. च. छ. झ. ञ. सर्वदेवपुरोगमं. १२ ङ. च. छ. झ. तेजस्तवसमुद्धतम्. १३ क. ख. घ—छ. झ. हैमवतेपार्श्वे. १४ क. ग. झ. महातेजाःस्रोतोभ्यो. १५ ख. घ—छ. झ. ञ. मतुलप्रभम्. क. ममलप्रभम्. ग. मभवद्वनम्. १६ ङ. झ. ञ. देवाभिजायत. क. ख. घ. च. देवाभिजायते.

[1]तदेतद्धरणीं प्राप्य नानाधातुरवर्धत ॥ २० ॥
निक्षिप्तमात्रे गर्भे तु तेजोभिरभिरञ्जितम् ॥ सर्वं पर्वतसंनद्धं सौवर्णमभवद्वनम् ॥ २१ ॥
[[2]तं देशं तु ततो ब्रह्मा संप्राप्यैनमभाषत ॥ जातस्य रूपं यत्तस्माज्जातरूपं भविष्यति] ॥ २२ ॥
जातरूपमिति ख्यातं तदाप्रभृति राघव ॥ सुवर्णं पुरुषव्याघ्र हुताशनसमप्रभम् ॥
[3]तृणवृक्षलतागुल्मं सर्वं भवति काञ्चनम् ॥ २३ ॥
तं कुमारं [4]ततो जातं सेन्द्राः सहमरुद्गणाः ॥ क्षीरसंभावनार्थाय कृत्तिकाः समयोजयन् ॥ २४ ॥
ताः क्षीरं जातमात्रस्य कृत्वा समयमुत्तमम् ॥ ददुः पुत्रोऽयमस्माकं सर्वासामिति निश्चिताः ॥ २५ ॥
ततस्तु देवताः सर्वाः कार्तिकेय इति ब्रुवन् ॥ पुत्रस्त्रैलोक्यविख्यातो भविष्यति न संशयः ॥ २६ ॥
तेषां तद्वचनं श्रुत्वा स्कन्नं गर्भपरिस्रवे ॥ स्नापयन्परया लक्ष्म्या दीप्य[5]मानं यथाऽनलम् ॥ २७ ॥
स्कन्द इत्यब्रुवन्देवाः स्कन्नं [6]गर्भपरिस्रवात् ॥ कार्तिकेयं [7]महाभागं काकुत्स्थ ज्वलनोपमम् ॥ २८ ॥
प्रादुर्भूतं ततः क्षीरं कृत्तिकानामनुत्तमम् ॥ षण्णां षडाननो भूत्वा जग्राह स्तनजं पयः ॥ २९ ॥
गृहीत्वा क्षीरमेकाह्ना सुकुमारवपुस्तदा ॥ अजयत्स्वेन वीर्येण दैत्यसैन्यगणान्विभुः ॥ ३० ॥
सुरसेनाग[8]णपतिं [9]ततस्तमतुलद्युतिम् ॥ अभ्यषिञ्चन्सुरगणाः समेत्याग्निपुरोगमाः ॥ ३१ ॥
एष ते राम गङ्गाया वि[10]स्तरोऽभिहितो मया ॥ कुमारसंभवश्चैव धन्यः पुण्यस्तथैव च ॥ ३२ ॥

तात् तैक्ष्ण्यात्क्षारात् । ताम्रंकार्ष्णायसंचाभ्यजायत । तस्याः गङ्गातः अभवत् निर्गच्छतिस्म । मलं तत्र भूमौ । त्रपु सीसकंचाभ्यजायत । कृष्णायसमेवकार्ष्णायसं । उपसंहरति—तदेतदिति । तदेतत् गङ्गातोनिर्गतं ॥२०॥ एवंगर्भोत्सर्जनकालेगङ्गातोनिर्गतानांशोणितादीनांसौवर्णादिभावमुक्त्वागर्भतेजोरञ्जनात् केषांचित्स्वर्णभावमाह—निक्षिप्तेति । गर्भे गङ्गयानिक्षिप्तमात्रे तस्यतेजोभिः अभिरञ्जितं व्याप्तं पर्वतसंनद्धं पूर्वोक्तश्वेतपर्वतसहितं । सर्वंतद्वनं शरवणं । सौवर्णं स्वर्णमयंअभवत् ॥ २१–२२ ॥ यदासुवर्णजातं तदाप्रभृति हुताशनसमप्रभंसुवर्णं जातंरूपंयस्येतिव्युत्पत्त्याजातरूपमितिविख्यातमभूत् । उपसंहरति—तृणेति ॥२३॥ एवं गङ्गयोत्सृष्टस्यगर्भस्यपोषणप्रकारमाह—तमिति । ततः गङ्गोत्सर्जनानन्तरं । जातं तंकुमारं । मरुद्गणाः देवगणाः । सह युगपत् । क्षीरसंभावनार्थाय क्षीरेणवर्धनप्रयोजनाय । कृत्तिकाःसमयोजयन् । ण्यन्तत्वाद्द्विकर्मकत्वं ॥ २४ ॥ कृत्तिकाः अयमस्माकंसर्वासांपुत्रो भवत्वितिदेवैःसह समयं संकेतं । कृत्वा निश्चिताः कृतनिश्चयाःसत्यः । जातमात्रस्यतस्यक्षीरं ददुः दातुमुद्युक्ताः ॥ २५ ॥ उक्तविशेषणःपुत्रः कार्तिकेयः कृत्तिकापुत्रोभविष्यति । इतिब्रुवन् अब्रुवन् ॥ २६ ॥ कृत्तिकाः गर्भपरिस्रवे गर्भोदके । स्कन्नं पतितं । स्नापयन् अस्नापयन् । गर्भस्रवनिवृत्त्यर्थं ॥ २७ ॥ स्कन्नत्वात् स्कन्दइत्यन्वर्थनामचक्रुरित्यर्थः ॥ २८ ॥ ततः स्नापनानन्तरं । षण्णांकृत्तिकानांक्षीरंप्रादुर्भूतं । तच्च स्तनजंपयः षडाननोभूत्वाजग्राह ॥ २९ ॥ एकाह्नेति टजभावः समासान्तस्यानित्यत्वात् । एकदिनेनस्तन्यं पीत्वाक्रमेणसुकुमारवपुरपिदैत्यगणानजयत् ॥ ३० ॥ सुरसेनागणपतित्वेनाभ्यषिञ्चन्नित्यर्थः । प्रथममभिषेकस्ततोजयइत्यर्थक्रमः ॥३१॥ विस्तरः दिव्यसंभवः ।

ति० अयंभावः । तैक्ष्ण्यमलगन्धयुक्तेनशुद्धेनस्पर्शतोविद्धंस्वर्णं । गन्धयुक्तेनविद्धंरजतं । तैक्ष्ण्ययुक्तेनविद्धंताम्रंलोहंच । मलयुक्तेनविद्धं त्रपुसीसे इतिनानाधातुस्तद्रूपं ॥ २० ॥ वि० जातरूपं रूपेणजातमित्यर्थः ॥ २३ ॥ ति० स्कन्नःपरिस्रुतइत्यर्थेस्कन्दइतिपृषोदरादित्वात्साधु ॥ २५ ॥ इतिसप्तत्रिंशस्सर्गः ॥ ३७ ॥

[पा०] १ घ. तदेवतंगिरिंप्राप्य. २ अयंश्लोकः ग. ङ च. ञ. दृश्यते. ३ क. तत्रवृक्षलतागुल्मं. ४ ग. तदाजातं. ५ क—घ. मानमिवानलम्. ६ घ. छ. झ. ञ. ट. गर्भपरिस्रवे. ७ क. ख. घ—छ. झ. ञ. महाबाहुं. ८ घ. सेनागणान्प्रभुः. * ङ. झ. गणपतिमभ्यषिञ्चन्महाद्युतिम् । ततस्तममरास्सर्वे. ९ क. च. छ. ञ. ततस्तमनलद्युतिम्. ग. घ. ततस्तममलद्युतिम्. १० घ. विस्तरोहितवोदितः. ख. विस्तरोविनिवेदितः.

भक्तश्च यः कार्तिकेये काकुत्स्थ भुवि मानवः ॥ आयुष्मान्पुत्रपौत्रैश्च स्कन्दसालोक्यतां व्रजेत् ॥३३॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

अष्टात्रिंशः सर्गः ॥ ३८ ॥

अयोध्याधिपतिनासगरेणपत्नीद्वयेनसहसुतार्थंहिमवत्पर्वतेतपश्चरणम् ॥ १ ॥ तत्रतपःप्रसादितभृगुवराज्ज्येष्ठायामसमञ्जनाम्नःपुत्रस्यजननम् ॥ २ ॥ कनिष्ठायांषष्टिसहस्रपुत्राणांजननम् ॥ ३ ॥ असमञ्जाद्वंशकरस्यांशुमतोजननम् ॥ ४ ॥ ततोमहतिगतेकालेसगरेणाश्वमेधोपक्रमः ॥ ५ ॥

तां कथां कौशिको रामे [2]निवेद्य कुशिकात्मजः ॥ पुनरेवापरं वाक्यं काकुत्स्थमिदमब्रवीत् ॥ १ ॥
अयोध्याधिपतिः शूरः पूर्वमासीन्नराधिपः ॥ सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजाः ॥ २ ॥
वैदर्भदुहिता राम केशिनी नाम नामतः ॥ ज्येष्ठा सगरपत्नी सा धर्मिष्ठा सत्यवादिनी ॥ ३ ॥
अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि ॥ द्वितीया सगरस्यासीत्पत्नी सुमतिसंज्ञिता ॥ ४ ॥
ताभ्यां सह तथा राजा पत्नीभ्यां तप्तवांस्तपः ॥ हिमवन्तं समासाद्य भृगुप्रस्रवणे गिरौ ॥ ५ ॥
अथ वर्षशते पूर्णे तपसाऽऽराधितो मुनिः ॥ सगराय वरं प्रादाद्भृगुः सत्यवतांवरः ॥ ६ ॥
अपत्यलाभः सुमहान्भविष्यति तवानघ ॥ कीर्तिं चाप्रतिमां लोके प्राप्स्यसे पुरुषर्षभ ॥ ७ ॥
एका जनयिता तात पुत्रं वंशकरं तव ॥ [11]षष्टिं पुत्रसहस्राणि अपरा जनयिष्यति ॥ ८ ॥
भाषमाणं [12]महात्मानं [13]राजपुत्र्यौ प्रसाद्य तम् ॥ ऊचतुः परमप्रीते कृताञ्जलिपुटे तदा ॥ ९ ॥
एकः कस्याः सुतो ब्रह्मन्का बहूञ्जनयिष्यति ॥ श्रोतुमिच्छावहे ब्रह्मन्सत्यमस्तु वचस्तव ॥ १० ॥
तयोस्तद्वचनं श्रुत्वा भृगुः परमधार्मिकः ॥ उवाच परमां वाणीं स्वच्छन्दोत्र विधीयताम् ॥ ११ ॥
एको वंशकरो वाऽस्तु बहवो वा महाबलाः ॥ कीर्तिमन्तो महोत्साहाः का वा कं वरमिच्छति ॥१२॥

तमेवाह—कुमारेति । एवमेतदाख्यानश्रवणफलमुक्तं—धन्यइत्यादिना ॥३२॥ अथप्रसङ्गात्तद्भक्तिफलमाह—भक्तश्चेति । सलोकएवसालोक्यं स्वार्थेष्यञ् । तस्यभावःसालोक्यता स्कन्दसमानलोकत्वमित्यर्थः ॥३३॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

एवंदिव्यसंभवंविस्तरंप्रतिपाद्यमानुषलोकसंभवविस्तरंवक्तुमुपक्रमतेष्टात्रिंशे—तामित्यादि । रामे रामाय । कौशिकशब्दार्थमाह—कुशिकात्मजइति ॥१॥ अप्रजाः अतएवप्रजाकामः ॥ २ ॥ यावैदर्भदुहिता साज्येष्ठपत्न्यासीत् ॥ ३ ॥ अरिष्टनेमिः कश्यपः ॥ ४ ॥ भृग्वधिष्ठितंप्रस्रवणंवारिप्रवाहोयस्मिंस्तथा । गिरौपर्यन्तपर्वते ॥ ५ ॥ वर्षशतेपूर्णे तपस्यतइतिशेषः ॥६॥ सुबह्वपत्यविषयत्वात्सुमहत्त्वं । कीर्तिमिति तेनेतिशेषः ॥ ७ ॥ जनयितेतिलुट् । तातेत्युपलालने ॥८॥ राजपुत्र्याविति छत्रिन्यायादुक्तं सुमतेःकश्यपपुत्रीत्वात् ॥ ९ ॥ तववचःसत्यमस्तु यस्याएकमिच्छसितस्याएकः यस्याबहूनिच्छसितस्याबह्वःसन्त्वित्यर्थः ॥ १० ॥ अत्र पुत्रविषये । स्वच्छन्दः स्वेच्छा । विधीयतां ज्ञाप्यतां ॥ ११ ॥ तदेवविवृणोति—एकइति ॥ १२ ॥

ती० भृगुप्रस्रवणे भृगुप्रस्रवणाख्येहिमवतःपादे ॥ ५ ॥ शि० राजपुत्र्यौ क्षत्रियराजवैदर्भद्विजराजकश्यपयोःपुत्र्यौ । राज-

[पा०] १ क. ख. स्कन्दसालोक्यमाप्नुयात्. २ क. ख. ग. ङ. च. छ. ट. निवेद्यमधुराक्षरम्. झ. ञ. निवेद्यमधुराक्षराम्. घ. निवेद्यमधुरांश्रुतेः. ३ ङ. च. छ. झ. ञ. ट. पतिर्वीरः. क. ख. पतिःश्रीमान्. ४ क. ख. घ—छ. झ. ञ. ट. सचाप्रजः. ५ क. ख. च. छ. ञ. विदर्भदुहिता. ६ ङ. झ. ट. अरिष्टनेमेर्दुहितासुपर्णभगिनीतुसा. ७ क. ख. घ. सहतदा. ग. ङ. च. छ. झ. ञ. ट. सहमहाराजः. ८ ग. घ. समाश्रित्य. ९ क. ख. तपसातोषितो. १० घ. सत्यपराक्रमः. ११ च. छ. षष्टिपुत्रसहस्राणि. क. ग. षष्टिःपुत्रसहस्राणि. १२ ङ. च. छ. झ. ञ. नरव्याघ्रं. १३ ख. ग. राजपत्न्यौ.

मुनेस्तु वचनं श्रुत्वा केशिनी रघुनन्दन ॥ पुत्रं वंशकरं राम जग्राह नृपसन्निधौ ॥ १३ ॥
षष्टिं पुत्रसहस्राणि सुपर्णभगिनी तदा ॥ महोत्साहान्कीर्तिमतो जग्राह सुमतिः सुतान् ॥ १४ ॥
प्रदक्षिणमृषिं कृत्वा शिरसाऽभिप्रणम्य च ॥ जगाम स्वपुरं राजा सभार्यो रघुनन्दन ॥ १५ ॥
अथ काले गते तस्मिञ्ज्येष्ठा पुत्रं व्यजायत ॥ असमञ्ज इति ख्यातं केशिनी सगरात्मजम् ॥ १६ ॥
सुमतिस्तु नरव्याघ्र गर्भतुंबं व्यजायत ॥ षष्टिः पुत्राः सहस्राणि तुंबभेदाद्विनिस्सृताः ॥ १७ ॥
घृतपूर्णेषु कुंभेषु धात्र्यस्तान्समवर्धयन् ॥ कालेन महता सर्वे यौवनं प्रतिपेदिरे ॥ १८ ॥
अथ दीर्घेण कालेन रूपयौवनशालिनः ॥ षष्टिः पुत्रसहस्राणि सगरस्याभवंस्तदा ॥ १९ ॥
स च ज्येष्ठो नरश्रेष्ठस्सगरस्यात्मसंभवः ॥ बालान्गृहीत्वा तु जले सरय्वा रघुनन्दन ॥
प्रक्षिप्य प्रहसन्नित्यं मज्जतस्तान्समीक्ष्य वै ॥ २० ॥
एवं पापसमाचारः सज्जनप्रतिबाधकः ॥ पौराणामहिते युक्तः पुत्रो निर्वासितः पुरात् ॥ २१ ॥
तस्य पुत्रोंशुमान्नाम असमञ्जस्य वीर्यवान् ॥ संमतः सर्वलोकस्य सर्वस्यापि प्रियंवदः ॥ २२ ॥
ततः कालेन महता मतिः समभिजायत ॥ सगरस्य नरश्रेष्ठ यजेयमिति निश्चिता ॥ २३ ॥
स कृत्वा निश्चयं राम सोपाध्यायगणस्तदा ॥ यज्ञकर्मणि वेदज्ञो यष्टुं समुपचक्रमे ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

इन्द्रेणसतिरोधानंसगरयाज्ञीयाश्वापहरणम् ॥ १ ॥ सगरनियोगात्तत्सुतैःषष्टिसहस्रैरश्वान्वेषणायभुवोभेदनम् ॥ २ ॥ ततःप्रजाक्षोभक्षुभितहृदयैर्देवादिभिर्ब्रह्माणंप्रतितद्दुश्चेष्टितनिवेदनम् ॥ ३ ॥

विश्वामित्रवचः श्रुत्वा कथान्ते रघुनन्दनः ॥ उवाच परमप्रीतो मुनिं दीप्तमिवानलम् ॥ १ ॥

जग्राह वरयामास ॥ १३ ॥ सुपर्णभगिनी गरुडभगिनी ॥ १४ ॥ ऋषिं भृगुं ॥ १५ ॥ व्यजायत प्रसूतवती ॥१६॥ गर्भतुंबं वृत्ताकारंगर्भपिण्डं । कथंततःपुत्रोदयइत्यतआह—षष्टिरिति। तुंबभेदात् नतुगान्धार्याइवपश्चाद्विभजनीयइत्यर्थः ॥ १७ ॥ धात्र्यः उपमातरः । तान् विभक्ततुंबान् ॥ १८ ॥ दीर्घेण कालेनेतियौवनशालित्वेहेतुत्वात्तृतीया । यौवनशालिनइतिपुंल्लिङ्गत्वमार्षं ॥ १९ ॥ अर्धत्रयं ज्येष्ठः असमञ्जः । प्रहसन् स्थितइतिशेषः ॥ २० ॥ निर्वासितः विवास्यतेस्म ॥ २१ ॥ अंशुमान्नाम आसीदितिशेषः ॥ २२ ॥ यजेयमिति निश्चितामतिः समभिजायत समभ्यजायत ॥ २३ ॥ यज्ञकर्मणिनिश्चयंकृत्वा यष्टुंसमुपचक्रमे ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने अष्टत्रिंशःसर्गः ॥ ३८ ॥

अथ रामेणस्वपूर्वकवृत्तान्तप्रस्तावेनकुतूहलात्पृष्टेसति विश्वामित्रेण तदुत्तरकथनमेकोनचत्वारिंशे—वि-

---

शब्देनोभयोर्ग्रहणम् विनिगमनाविरहाद्योग्यत्वाच्च ॥९॥ ति० नृपसंनिधावित्यनेनतस्यापिसाक्षित्वमात्रं नतुवरणनियमकर्तृत्वेति सूचितं ॥१३॥ शि० असमञ्जसइत्यानुपूर्वीकोप्येतद्वाचकोस्तीतिभागवतात्असमञ्जसवीर्यवानितिवक्ष्यमाणाच्चनविरोधः ॥१६॥ शि० विनिस्सृताः विनिस्सृतानि ॥ १७ ॥ शि० असमञ्जसवीर्यवान् असमञ्जसवीर्यसदृशवीर्यविशिष्टः ॥२२॥ इत्यष्टत्रिंशःसर्गः ॥३८॥

शि० विश्वामित्रवचःश्रुत्वाकथान्तेकथासिद्धान्तंज्ञातुंरघुनन्दनोमुनिमुवाच । अन्तेति वादंप्रतिवभ्रातिंसत्सिद्धान्तइत्यर्थः ।

[पा०] १ ट. मुनेस्तद्वचनं. २ क. च. षष्टिपुत्र. ३ घ. ट. भगिनीतथा. ४ क. घ—छ. झ. ञ. प्रणम्यतं. ५ ङ. च. छ. झ. ञ. गतेतस्यज्येष्ठा. ६ ङ. च. षष्टिपुत्रसहस्राणि ट. षष्टिःपुत्रसहस्राणि. ७ च. षष्टिपुत्रसहस्राणि. ८ क. सजले. ९ झ. प्राहसन्नित्यं. १० घ. ङ. च. स्तान्निरीक्ष्यवै. ख. स्तानवेक्ष्य. च. ट. स्तान्निरीक्षते. ११ क. ख. घ. ङ. च. झ. ञ. पित्रानिर्वासितः. १२ ट. असमञ्जसवीर्यवान्. १३ ख. बुद्धिस्समभिजायत. १४ क. घ—छ. झ. ञ. ट. निश्चयंराजा. ख. निश्चयंतात.

श्रोतुमिच्छामि भद्रं ते विस्तरेण कथामिमाम् ॥ पूर्वको मे कथं ब्रह्मन्यज्ञं वै समुपाहरत् ॥ २ ॥
[तस्य तद्वचनं श्रुत्वा कौतूहलसमन्वितः]॥ विश्वामित्रस्तु काकुत्स्थमुवाच प्रहसन्निव ॥
श्रूयतां विस्तरो राम सगरस्य महात्मनः ॥ ३ ॥
शङ्करश्वशुरो नाम हिमवानचलोत्तमः ॥ विन्ध्यपर्वतमासाद्य निरीक्षेते परस्परम् ॥ ४ ॥
तयोर्मध्ये प्रवृत्तोऽभूद्यज्ञः स पुरुषोत्तम ॥ स हि देशो नरव्याघ्र प्रशस्तो यज्ञकर्मणि ॥ ५ ॥
तस्याश्वचर्यां काकुत्स्थ दृढधन्वा महारथः ॥ अंशुमानकरोत्तात सगरस्य मते स्थितः ॥ ६ ॥
तस्य पर्वणि तं यज्ञं यजमानस्य वासवः ॥ राक्षसीं तनुमास्थाय यज्ञीयाश्वमपाहरत् ॥ ७ ॥
ह्रियमाणे तु काकुत्स्थ तस्मिन्नश्वे महात्मनः ॥ उपाध्यायगणाः सर्वे यजमानमथाब्रुवन् ॥ ८ ॥
अयं पर्वणि वेगेन यज्ञीयाश्वोपनीयते ॥ हर्तारं जहि काकुत्स्थ हयश्चैवोपनीयताम् ॥ ९ ॥
यज्ञच्छिद्रं भवत्येतत्सर्वेषामशिवाय नः ॥ तत्तथा क्रियतां राजन्यथाऽच्छिद्रः क्रतुर्भवेत् ॥ १० ॥
उपाध्यायवचः श्रुत्वा तस्मिन्सदसि पार्थिवः ॥ षष्टिं पुत्रसहस्राणि वाक्यमेतदुवाच ह ॥ ११ ॥
गतिं पुत्रा न पश्यामि रक्षसां पुरुषर्षभाः ॥ मन्त्रपूतैर्महाभागैरास्थितो हि महाक्रतुः ॥ १२ ॥
तद्गच्छत विचिन्वध्वं पुत्रका भद्रमस्तु वः ॥ समुद्रमालिनीं सर्वां पृथिवीमनुगच्छत ॥ १३ ॥

श्वामित्रेत्यादि । कथान्ते यज्ञोपक्रमकथनानन्तरं ॥ १ ॥ इमां यज्ञकथां । पूर्वकः मद्वंशकूटस्थः । समुपाहरत् कृतवान् ॥ २ ॥ प्रहसन्निव प्रसन्नवदनइत्यर्थः । स्वविवक्षितस्यैवपृष्टत्वात् प्रहासः । अजानन्निवपृष्टवानितिवा । विस्तरइति । यज्ञस्येतिशेषः ॥ ३ ॥ विन्ध्यपर्वतमासाद्य मध्येमहागिरिनिरोधाभावात्प्राप्य तथाविंध्योपिहिमवन्तं इत्येवंपरस्परमासाद्य । वीक्षानिरोधाभावात्निरीक्षेतेपरस्परं निरीक्षमाणाविवस्थिताविल्यर्थः ॥ ४ ॥ अस्त्वेवं ततःकिमित्यत्राह—हि यस्मात् सदेशः यज्ञकर्मणिप्रशस्तः । "आर्यावर्तःपुण्यभूमिर्मध्यंविन्ध्यहिमागयोः" इतिवचनात् । अतस्तयोर्मध्येयज्ञःप्रवृत्तोऽभूत् ॥ ५ ॥ अश्वचर्या अश्वानुचरणं । मते आज्ञायां ॥ ६ ॥ तंयज्ञं यजमानस्यतस्य सगरस्य यज्ञीयाश्वं यज्ञार्हाश्वं । राक्षसीं मायामयीं । तनुमास्थाय पर्वणि उक्थ्याहे । "तिथिभेदेक्षणेपर्व" इतिनिघण्टुः । अपाहरत् अपहृतवान् ॥७॥ उपाध्यायगणाः ऋत्विग्गणाः ॥ ८॥ अपनीयते "वर्तमानसामीप्येवर्तमानवद्वा" इतिलट् ॥९॥ एतद्यज्ञच्छिद्रं यज्ञापराधः "छिद्रंरन्ध्रापराधयोः" इतिवैजयन्ती । सर्वेषांनःअशिवायभवति तस्मात्क्रतुर्यथा अच्छिद्रोभवेत्तथैवक्रियतां ॥ १० ॥ पार्थिवः सगरः ॥ ११ ॥ हेपुत्राः हियस्मान्महाक्रतुः मन्त्रपूतैर्महाभागैः।आस्थितः अनुष्ठितः। तस्माद्रक्षसांगतिं आगमनं। नपश्यामि प्रसक्त्यभावादितिभावः॥ १२ ॥ अतःकेनप्रकारेणगतोश्वइतिविचिनुध्वमित्याह—तदिति। यद्वा अहंकर्मव्यग्रःस्थितः अश्वापहर्तृणांरक्षसांगतिंगन्तव्यदेशंनपश्यामि विचिनुध्वमित्याह—तदिति। समुद्रएव मालाआवरणमस्याइतिसमुद्रमालिनी तां अनुगच्छत

बन्धनार्थकस्यअतिधातोःकर्तरिक्विप् । "क्रियार्थोपपदस्यचकर्मणिस्थानिनः" इतिचतुर्थी । किंच कथान्ते कथावसानकाले । विद्यमानं मुनिमित्यन्वयः । श्रुत्वेत्यनेनपुनरुक्तिवारणायैषयत्नः । अन्यथातुपौनरुक्त्यंदुर्वारं ॥ १ ॥ ति० प्रहसन्निव विकसितवदनः । स्वपूर्वजवृत्तान्ततयाश्रवणकौतुकेनरामभद्रस्यायंप्रश्नः । अतएवमुनेर्हासः । स्ववंश्यइतिरामस्यापिलोकवत्स्नेहस्संपन्नइति ॥ ३ ॥ ति० मन्त्रपूतैर्महाभागैर्यद्यपिमहाक्रतुरास्थितःअधिष्ठितः । तथापिरक्षसांमाययायदिछिद्रंस्यात्तदाआत्मनोगतिंनपश्यामि ॥ १२ ॥

[पाठ०] १ ङ. च. छ. झ. ञ. पूर्वजोमे. २ इदमर्धं ग. ङ. च. छ. झ. ञ. ट. दृश्यते. ३ ङ. च. छ. झ. ञ. श्वशुरोनाम्ना. क. ख. ग. श्वशुरोराम. ४ ङ. च. छ. झ. ञ. हिमवानितिविश्रुतः. ५ ङ. च. झ. समभवद्यज्ञः. ६ च. नकरोत्पौत्रः. ७ क. च. छ. ञ. तस्मिन्यज्ञे. ८ ख. महात्मना. ९ क. ख. घ. च. ञ. याज्ञीयाश्वो. १० क. ङ. च. छ. झ. ञ. न्यज्ञोऽच्छिद्रःक्रतोभवेत्. ११ ङ. च. छ. झ. ञ. ट. सोपाध्यायवचः. १२ च. छ. षष्टिपुत्रसहस्राणि. १३ ङ. च. छ. झ. ञ. रास्थितोपि. १४ ख. ङ. च. छ. झ. ञ. मनुगच्छथ.

एकैकं योजनं पुत्रा विस्तारम[1]भिगच्छत ॥ १४ ॥
यावत्तुरगसंदर्शस्तावत्खनत मेदिनीम् ॥ [2]तं चैव हयहर्तारं मार्गमाणा ममाज्ञया ॥ १५ ॥
दीक्षितः पौत्रसहितः सोपाध्याय[3]गणो ह्यहम् ॥ इह स्थास्यामि भद्रं वो यावत्तुरगदर्शनम् ॥ १६ ॥
[4]इत्युक्ता हृष्टमनसो राजपुत्रा महाबलाः ॥ जग्मुर्महीतलं राम पितुर्वचनयन्त्रिताः ॥ १७ ॥
[[5]गत्वा तु पृथिवीं सर्वाम[6]दृष्ट्वा तं महाबलाः] ॥ योजनायामविस्तारमेकैको धरणीतलम् ॥
बिभिदुः [7]पुरुषव्याघ्र वज्रस्पर्श[8]समैर्नखैः ॥ १८ ॥
शूलैरशनिकल्पैश्च हलैश्चापि सुदारुणैः ॥ भिद्यमाना वसुमती ननाद रघुनन्दन ॥ १९ ॥
नागानां [9]वध्यमानानामसुराणां च राघव ॥ राक्षसानां च[10] दुर्धर्षः सत्त्वानां निनदोऽभवत् ॥ २० ॥
योजनानां सहस्राणि षष्टिं तु रघुनन्दन ॥ बिभिदु[11]र्धरणीं वीरा रसातलमनुत्तमम् ॥ २१ ॥
एवं पर्वतसंबाधं जंबूद्वीपं नृपात्मजाः ॥ खनन्तो [12]नृपशार्दूल सर्वतः परिचक्रमुः ॥ २२ ॥
ततो देवाः सगन्धर्वाः सासुरास्सहपन्नगाः ॥ संभ्रान्तमनसः सर्वे पितामहमुपागमन् ॥ २३ ॥
ते प्रसाद्य महात्मानं विषण्णवदनास्तदा ॥ [13]ऊचुः परमसंत्रस्ताः पितामहमिदं वचः ॥ २४ ॥
भगवन्पृथिवी सर्वा खन्यते सगरात्मजैः ॥ बहवश्च महात्मानो [14]हन्यन्ते तलवासिनः ॥ २५ ॥
अयं [15]यज्ञहरोऽस्माकमनेनाश्वोपनीयते ॥ इति ते सर्वभूतानि नि[16]घ्नन्ति सगरात्मजाः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

अन्वेषध्वम् ॥ १३ ॥ अर्धमेकं । प्रथममेकंयोजनंविचित्य पश्चाद्योजनान्तरमितिक्रमेणविचिनुध्वमित्यर्थः । यद्वा एकएकंयोजनमितिक्रमेणविचिनुध्वमित्यर्थः ॥१४॥ यदिभूतलेनदृश्यतेतदाकर्तव्यमाह—यावदिति ॥ १५ ॥ ममतुगमनंनयुक्तमित्याह—दीक्षितइति ॥ १६ ॥ यन्त्रिताः नियुक्ताः ॥ १७ ॥ आयामः दैर्घ्यं । विस्तारः विशालता । वज्रस्पर्शसमैः वज्रस्पर्शसमस्पर्शैरित्यर्थः ॥ १८ ॥ अशनिकल्पैः वज्रतुल्यैः ॥१९॥ नागानां सर्पाणां । असुरराक्षसाः पातालवासिनः ॥२०॥ रसातलं पातलं यथाभवतितथा धरणीं बिभिदुः ॥२१॥ संबाधं निबिडं ॥२२–२३॥ प्रसाद्य स्तुत्वा ॥ २४ ॥ तलवासिनः रसातलवासिनः ॥२५॥ यज्ञहरः यज्ञहन्ता । यज्ञहनइतिपाठे हन्तीति हनः पचाद्यच् ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

ति० दीक्षितइत्यादि । तस्यप्रवासनिषेधात्पौत्रस्यबालकत्वाच्चेतिभावः ॥ १६ ॥ शि० अनुत्तमं प्रसिद्धरसातलान्मध्यममुत्तमंवा । रसातलंकर्तुमिववीराधरणींबिभिदुः । तुशब्दइवार्थे ॥ २१ ॥ इत्येकोनचत्वारिंशःसर्गः ॥ ३९ ॥

[पा०] १ क. ङ. च. छ. ञ. मभिगच्छथ. ख. घ. मधिगच्छथ. २ क. ख. घ—छ. झ. ञ. ट. तमेवह्रयहर्तारं. ३ ङ. च. छ. झ. ञ. ट. गणस्त्वहम्. ४ क. ख. घ—छ. ञ. ट. तेसर्वेहृष्टमनसो. ५ इदमर्धं क. ख. च. छ. ञ. ट. दृश्यते. ६ क. ख. च. मदृष्ट्वाऽश्वं. ७ ङ. च. छ. झ. ञ. ट. पुरुषव्याघ्राः. ८ क. ग. घ—छ. झ. ञ. ट. स्पर्शसमैर्भुजैः. ९ ग. विध्यमानानां. ञ. बाध्यमानानां. १० ङ. झ. ञ. दुराधर्षैः. ११ ङ. च. छ. झ. ञ. धरणींराम. क—घ. धरणींवीर. १२ क—घ. नरशार्दूल. १३ ट. ऊचुःपरमसंभ्रान्ताः. १४ ख. वध्यन्तेतलवासिनः. ग. घ—छ. झ. ञ. ट. वध्यन्तेजलचारिणः. क. हन्यन्तेजलचारिणः. १५ क—च. ञ. ट. यज्ञहनोस्माकं. १६ ग—छ. झ. ञ. ट. हिंसन्तिसगरात्मजाः.

चत्वारिंशः सर्गः ॥ ४० ॥

ब्रह्मणादेवान्प्रतिसगरसुतानांकपिलकोपाग्निनाभस्मीभवननिवेदनेनसमाश्वासनम् ॥ १ ॥ सगरपुत्रैःक्रमेणप्राच्यादिदिग्विभेदनेऐशान्यांदिशिकपिलपरिसरचारिणोनिजाश्वस्यावलोकनम् ॥ २ ॥ ततस्तैःकपिलेऽश्वचोरत्वबुध्यातद्वधप्रवृत्तौतेनहुङ्कारमात्रेणतेषांभस्मीकरणम् ॥ ३ ॥

देवतानां वचः श्रुत्वा भगवान्वै पितामहः ॥ प्रत्युवाच सुसंत्रस्तान्[1] कृतान्तबलमोहितान् ॥ १ ॥
यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमतः ॥ [[2]महिषी माधवस्यैषा स[3] एष भगवान्प्रभुः] ॥ २ ॥
कापिलं रूपमास्थाय धारयत्यनिशं धराम् ॥ तस्य कोपाग्निना[4] दग्धा भविष्यन्ति नृपात्मजाः॥ ३ ॥
पृथिव्याश्चापि[5] निर्भेदो दृष्ट एव सनातनः ॥ सगरस्य च पुत्राणां विनाशोऽदीर्घ[6]जीविनाम् ॥ ४ ॥
पितामहवचः श्रुत्वा त्रयस्त्रिंशदरिंदमं[7] ॥ देवाः परमसंहृष्टाः पुनर्जग्मुर्यथागतम् ॥ ५ ॥
सगरस्य च पुत्राणां[8] प्रादुरासीन्महात्मनाम् ॥ पृथिव्यां भिद्यमानायां निर्घातसमनिःस्वनः ॥ ६ ॥
ततो[9] भित्त्वा महीं[10] सर्वे कृत्वा चापि[11] प्रदक्षिणम् ॥ सहिताः सागराः सर्वे पितरं वाक्यमब्रुवन् ॥ ७॥
परिक्रान्ता मही सर्वा सत्ववन्तश्च सूदिताः ॥ देवदानव[12]रक्षांसि पिशाचोरगकिंनराः[13] ॥ ८ ॥
न च पश्यामहेऽश्वं तमश्वहर्तारमेव च ॥ किं करिष्याम भद्रं ते बुद्धिरत्र विचार्यताम् ॥ ९ ॥
तेषां तद्वचनं श्रुत्वा पुत्राणां राजसत्तमः ॥ समन्युरब्रवीद्वाक्यं सगरो रघुनन्दन ॥ १० ॥
भूयः खनत भद्रं वो निर्भिद्य वसुधातलम् ॥ अश्वहर्तारमासाद्य कृतार्थाश्च निवर्तथ[14] ॥ ११ ॥
पितुर्वचनमासाद्य[15] सगरस्य महात्मनः ॥ [16]षष्टिः पुत्रसहस्राणि रसातलमभिद्रवन् ॥ १२ ॥
खन्यमाने[17] ततस्तस्मिन्ददृशुः पर्वतोपमम् ॥ दिशागजं विरूपाक्षं धारयन्तं महीतलम् ॥ १३ ॥
सपर्वतवनां कृत्स्नां पृथिवीं रघुनन्दन ॥ शिरसा[18] धारयामास विरूपाक्षो महागजः ॥ १४ ॥

कृतःअन्तोजननाशोयैस्तेकृतान्ताः सगरपुत्राः ॥ १ ॥ यस्येतिसार्धश्लोकः ॥ २ ॥ आस्थाय यइति शेषः ॥ ३ ॥ सनातनः प्रतिकल्पमवश्यंभावी । दृष्टः निश्चितः । अतोनतत्रापिशोकःकार्यइतिभावः । अदीर्घजीविनामितिछेदः । विनाशः दृष्टइत्यनुषङ्गः ॥ ४ ॥ त्रयस्त्रिंशद्देवाः अष्टौवसवएकादशरुद्राद्वादशादित्याअश्विनौच । इदमुपलक्षणं गन्धर्वादेर्गमनस्यापि ॥ ५ ॥ निर्घातः उत्पातविशेषः ॥ ६ ॥ सर्वेमहींप्रदक्षिणंकृत्वा पितरंगत्वा सर्वेपितरमब्रुवन् ॥ ७ ॥ श्लोकद्वयं। सत्ववन्तोबलवन्तः । करिष्यामेतिविसर्गलोपश्छान्दसः ॥ ८–९ ॥ समन्युः अश्वालाभकृतक्रोधवान् ॥ १० ॥ भूयोनिर्भिद्य खनतेत्यन्वयः । निवर्तथ निवर्तध्वं ॥ ११ ॥ अभिद्रवन् अभ्यद्रवन् ॥ १२ ॥ दिशागजं "वष्टिभागुरिः" इत्याप् । विरूपाक्षंविरूपाक्षाख्यं ॥ १३ ॥ उक्तंविवृणोति—सेति

ति० धारयति योगबलेनेतिशेषः ॥ ३ ॥ ति० दीर्घदर्शिनां दीर्घदर्शिभिः । सगरपुत्रविनाशोयंदृष्टएव । अतस्तत्रशोकोनुचितः । शेषेषष्ठी । यद्वा । अदीर्घदर्शिनामितिच्छेदः ॥ ४ ॥ ति० निर्घातसमनिस्वनः निर्घातनिस्वनसमः । शि० निर्घातसमनिस्वनः निर्घातशब्दसदृशशब्दोमहास्वनः । प्रादुरासीत् । नीलोघटोघटइतिवच्छाब्दबोधः । किंचमहान्स्वनःस्वनलंयस्मिन्सः महास्वनः निर्घातसमनिस्वनः प्रादुरासीत् ॥ ६ ॥

[पा०] १ घ. झ. सुमन्त्रस्तान्. २ इदमर्धं ङ. च. झ. ञ. ट. दृश्यते. ३. झ. सएवभगवान्. ४ ख. ग. घ. कोपाग्निनिर्दग्धाः. ५ ख. श्चापिनिर्भेदो. घ. श्चैवनिर्भेदो. ६ ङ. झ. ञ. दर्शिनाम्. ७ झ. ट. दरिंदमाः. ८ क. ग. ङ. च. छ. झ. ञ. ट. पुत्राणांप्रादुरासीन्महास्वनः. ख. पुत्रैस्तुप्रादुरासीन्महात्मभिः. ९ क. ग. ततोगत्वा. १० ख—छ. झ. ञ. ट. महींसर्वां. ११ ख. ग. ट. चाभिप्रदक्षिणम्. १२ घ. दानवगन्धर्वाः. १३ घ—छ. झ. ञ. पन्नगाः. १४ झ. ञ. ट. निवर्तत. १५ क. ग. घ. मास्थाय. ख. माश्रित्य. १६ च. षष्टिपुत्रसहस्राणि. १७ क. ख. खन्यमानेतले. १८ क. ख. घ. ङ. च. झ. ञ. ट. धारयामासशिरसा.

यदा पर्वणि काकुत्स्थ विश्रमार्थं[1] महागजः ॥ खेदाच्चालयते शीर्षं भूमिकंपस्तदा भवेत् ॥ १५ ॥
तं[2] ते प्रदक्षिणं कृत्वा दिशापालं[3] महागजम् ॥ मानयन्तो हि[4]ते राम जग्मुर्भित्त्वा रसातलम् ॥१६॥
ततः पूर्वां दिशं भित्त्वा दक्षिणां बिभिदुः पुनः ॥ दक्षिणस्यामपि दिशि ददृशुस्ते महागजम् ॥१७॥
महापद्मं महात्मानं सुमहत्पर्वतोपमम्[5] ॥ शिरसा धारयन्तं[6] ते विस्मयं जग्मुरुत्तमम् ॥ १८ ॥
ततः प्रदक्षिणं कृत्वा सगरस्य महात्मनः ॥ षष्टिः पुत्रसहस्राणि पश्चिमां बिभिदुर्दिशम् ॥ १९ ॥
पश्चिमायामपि दिशि महान्तमचलोपमम् ॥ दिशागजं सौमनसं[7] ददृशुस्ते महाबलाः ॥ २० ॥
तं[8] ते प्रदक्षिणं कृत्वा पृष्ट्वा चापि निरामयम् ॥ खनन्तः[9] समुपक्रान्ता[10] दिशं हैमवतीं[11] ततः ॥२१॥
उत्तरस्यां[12] रघुश्रेष्ठ ददृशुर्हिमपाण्डुरम् ॥ भद्रं भद्रेण वपुषा धारयन्तं महीमिमाम् ॥ २२ ॥
समालभ्य ततः सर्वे कृत्वा चैनं प्रदक्षिणम् ॥ षष्टिः पुत्रसहस्राणि बिभिदुर्वसुधातलम् ॥ २३ ॥
ततः प्रागुत्तरां गत्वा सागराः प्रथितां[13] दिशम् ॥ रोषादभ्यखनन्सर्वे पृथिवीं सगरात्मजाः ॥२४॥
ते तु सर्वे महात्मानो भीमवेगा महाबलाः ॥ ददृशुः कपिलं तत्र वासुदेवं सनातनम् ॥ २५ ॥
हयं च तस्य देवस्य चरन्तमविदूरतः ॥ प्रहर्षमतुलं प्राप्ताः सर्वे ते रघुनन्दन ॥ २६ ॥
ते[14] तं हयहरं ज्ञात्वा क्रोधपर्याकुलेक्षणाः ॥ खनित्रलाङ्गलधरा नानावृक्षशिलाधराः ॥
अभ्यधावन्त संक्रुद्धास्तिष्ठतिष्ठेति चाब्रुवन् ॥ २७ ॥
अस्माकं त्वं हि तुरगं यज्ञीयं[15] हृतवानसि ॥ दुर्मेधस्त्वं हि संप्राप्तान्विद्धि नः सगरात्मजान् ॥२८॥
श्रुत्वा[16] तु वचनं तेषां कपिलो रघुनन्दन ॥ [17]रोषेण महताऽऽविष्टो हुंकारमकरोत्तदा ॥ २९ ॥
ततस्तेनाप्रमेयेन कपिलेन महात्मना ॥ भस्मराशीकृताः सर्वे काकुत्स्थ सगरात्मजाः ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

॥ १४ ॥ पर्वणि काले । खेदाद्धेतोः । विश्रमार्थं श्रमशान्त्यर्थं । चालयते चालयति ॥ १५ ॥ मानयन्तः पूजयन्तः ॥ १६ ॥ ततइत्यस्यविवरणं पूर्वांदिशं भित्वेति ॥ १७ ॥ महागजंविशेषयति—महेति । सुमहदित्यार्षं ॥ १८ ॥ दिक्छब्देन देशउच्यते ॥ १९ ॥ सौमनसं सोमनसाख्यं ॥ २० ॥ निरामयं कुशलं । समुपक्रान्ताः गताः । हैमवतीं हिमवत्संबंधिनीं ॥ २१ ॥ भद्रं भद्राख्यं । भद्रेण शोभनेन ॥ २२ ॥ समालभ्य स्पृष्ट्वा "आलंभःस्पर्शहिंसयोः" इत्यमरः ॥ २३ ॥ प्रागुत्तरां ऐशानींदिशं । प्रथितां अश्वगमनयोग्यतावतीं । गमनखननक्रियाभेदात्सागरसगरात्मजपदप्रयोगः ॥ २४ ॥ महात्मानः महाकायाः । कपिलं कपिलावतारं ॥ २५ ॥ चरन्तं तृणानिभक्षयन्तं ॥ २६ ॥ तेतमितिसार्धश्लोकः । तं कपिलं ॥ २७ ॥ दुर्मेधइतिसंबोधनं ॥ २८–२९ ॥ अप्रमेयेन अप्रमेयवैभवेन ॥ ३० ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणेमणिमञ्जीराख्याने बालकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

शि० हिते अश्वप्राप्तये ॥ १६ ॥ इतिचत्वारिंशःसर्गः ॥ ४० ॥

[पा०] १ क. ङ. ञ. विश्रामार्थं. २ झ. ञ. तेतंप्रदक्षिणं. ३ च. दिशांपालं. ट. दिशःपालं. ४ ख. ट. दिशंहित्वा. ५ ग. ङ. झ. ञ. ट. सुमहापर्वतोपमम्. ६ ङ. च. छ. झ. ञ. ट. धारयन्तंगां. ७ क. सुमनसं. ८ झ. ङ. तेतंप्रदक्षिणं. ९ ख. खनितुं. १० क. ग. ङ. झ. ञ. समुपाक्रान्ताः. ११ क—छ. झ. ञ. सोमवतींतदा. ट. हैमवतींतथा. १२ ख. उत्तरस्यामपिदिशि. १३ च. प्रस्थितादिशम्. १४ घ. ङ. झ. ट. तेतंयज्ञहनं. च. छ. तेतंयज्ञहरं. क. तेतंयज्ञहयं. १५ घ. याज्ञीयं. १६ घ. तच्छ्रुत्वावचनं. क. ख. ग. च. छ. झ. ञ. ट. श्रुत्वातद्वचनं. १७ क. ख. क्रोधेनमहता.

एकचत्वारिंशः सर्गः ॥ ४१ ॥

सगरेणचिरतरमनागतेषुपुत्रेषुतदन्वेषणायपौत्रस्यांशुमतःप्रेषणम् ॥ १ ॥ अंशुमतापितृखातमार्गगमनेनदिशागजपूजनपूर्वकंभस्मीभूतनिजपितॄणामश्वस्यचविलोकनम् ॥ २ ॥ तथातेषांजलदानार्थंतदन्वेषणायपरितोदक्प्रसारणेगरुडस्यदर्शनम् ॥ ३ ॥ गरुडेनतंप्रतिपितृवृत्तान्तनिवेदनपूर्वकंगङ्गावतारणेनतदंभसातदस्थ्नामाप्लवनचोदना ॥ ४ ॥ अंशुमताऽश्वानयनपूर्वकंपुत्रवृत्तान्तंज्ञापितेनसगरेणयज्ञसमापनम् ॥ ५ ॥ तथाचिरतरंराज्यरक्षणपूर्वकंगङ्गावतारणोपायानध्यवसायेनैवस्वर्गगमनम् ॥ ६ ॥

पुत्रांश्चिरगताञ्ज्ञात्वा सगरो रघुनन्दन ॥ नप्तारमब्रवीद्राजा दीप्यमानं स्वतेजसा ॥ १ ॥
शूरश्च कृतविद्यश्च पूर्वैस्तुल्योसि तेजसा ॥ पितॄणां गतिमन्विच्छ येन चाश्वोपवाहितः ॥ २ ॥
अन्तर्भौमानि सत्वानि वीर्यवन्ति महान्ति च ॥ तेषां त्वं प्रतिघातार्थं सासिं गृह्णीष्व कार्मुकम् ॥ ३ ॥
अभिवाद्याभिवाद्यांस्त्वं हत्वा विघ्नकरानपि ॥ सिद्धार्थस्सन्निवर्तस्व मम यज्ञस्य पारगः ॥ ४ ॥
एवमुक्तोंऽशुमान्सम्यक्सगरेण महात्मना ॥ धनुरादाय खड्गं च जगाम लघुविक्रमः ॥ ५ ॥
स खातं पितृभिर्मार्गमन्तर्भौमं महात्मभिः ॥ प्रापद्यत नरश्रेष्ठस्तेन राज्ञाऽभिचोदितः ॥ ६ ॥
दैत्यदानवरक्षोभिः पिशाचपतगोरगैः ॥ पूज्यमानं महातेजा दिशागजमपश्यत ॥ ७ ॥
स तं प्रदक्षिणं कृत्वा पृष्ट्वा चैव निरामयम् ॥ पितॄन्स परिपप्रच्छ वाजिहर्तारमेव च ॥ ८ ॥
दिशागजस्तु तच्छ्रुत्वा प्रीत्याहांशुमतो वचः ॥ आसमञ्ज कृतार्थस्त्वं सहाश्वः शीघ्रमेष्यसि ॥ ९ ॥
तस्य तद्वचनं श्रुत्वा सर्वानेव दिशागजान् ॥ यथाक्रमं यथान्यायं प्रष्टुं समुपचक्रमे ॥ १० ॥
तैश्च सर्वैर्दिशापालैर्वाक्यज्ञैर्वाक्यकोविदैः ॥ पूजितः सहयश्चैव गन्तासीत्यभिचोदितः ॥ ११ ॥
तेषां तद्वचनं श्रुत्वा जगाम लघुविक्रमः ॥ भस्मराशीकृता यत्र पितरस्तस्य सागराः ॥ १२ ॥
स दुःखवशमापन्नस्त्वसमञ्जसुतस्तदा ॥ चुक्रोश परमार्तस्तु वधात्तेषां सुदुःखितः ॥ १३ ॥
यज्ञीयं च हयं तत्र चरन्तमविदूरतः ॥ ददर्श पुरुषव्याघ्रो दुःखशोकसमन्वितः ॥ १४ ॥

नप्तारं पौत्रं ॥ १ ॥ पूर्वैः पितृभिः । पितॄणां कनिष्ठपितॄणां । गतिं मार्गं । अन्विच्छ अन्वेषय । अश्वोयेनापवाहितस्तस्यचगतिमन्विच्छ ॥ २ ॥ अन्तर्भौमानि भूमेरन्तर्जातानि भूबिलमाश्रितानीत्यर्थः । यानीतिशेषः ॥ ३ ॥ पारगः समाप्तिकरः ॥ ४ ॥ लघुविक्रमः शीघ्रगमनः ॥ ५ ॥ खातं कृतमित्यर्थः ॥ ६ ॥ अपश्यत अपश्यत् ॥ ७ ॥ परिपप्रच्छ कास्तइतिशेषः ॥ ८ ॥ आसमञ्ज असमञ्जपुत्र । इत्वभावआर्षः ॥ ९ ॥ समुपचक्रमइतिसविनयत्वप्रकटनं ॥ १० ॥ वक्तुमर्हंवाक्यं । "ऋहलोर्ण्यत्" "चजोःकुघिण्ण्यतोः इतिकुत्वं । वाक्यकोविदैः कालदेशोचितवक्तव्यार्थज्ञैः । यद्वा परवाक्याशयज्ञैः स्वयंवाक्यप्रयोगकुशलैश्चेत्यर्थः । सहयःपितामहसमीपंगन्तासीत्यभिचोदितोऽभूत् ॥ ११ ॥ तस्य अंशुमतः । पितरोयत्रभस्मराशीकृतास्तंदेशंजगाम ॥ १२ ॥ पूर्वमदर्शनाद्दुःखवशमापन्नः तेषां वधात् वधदर्शनात् सुदुःखितः परमार्तः भृशंतप्तः । चुक्रोश रुरोद ॥१३॥ शोकः विलापः ॥ १४ ॥

शि० महात्मभिः अतिप्रयत्नैः ॥ ६ ॥ शि० हेस अरिनिवर्तकत्वाद्युक्तगुणविशिष्टराम । सोंऽशुमान् ॥ ८ ॥ शि० एतेन गजानांपरमाभिज्ञत्वंसूचितं । विशेषवृत्तानुक्त्यादयालुत्वंचसूचितं । आसमञ्जशब्दःशिवाद्यणन्तः ॥ ९ ॥ शि० सुदुःखितः अत्यन्तदुःखंप्राप्तः । अतएव परमार्तः पृथिव्यांलुण्ठितः ॥ १३ ॥ ति० लोकसंमतः लोकहितः । एतन्मूलकतयासर्वलोकहितगङ्गाया

[पा०] १ च. छ. ज. ञ. ट. चाश्वोपहारितः. २ ङ. झ. तेषांतुप्रतिघातार्थं. ३ क. ट. नरश्रेष्ठतेन. ४ ख. राज्ञानियोजितः. ५ ङ. च. छ. झ. ञ. देवदानव. ६ क. च. छ. ञ. पूज्यमानो. ७ ङ. च. छ. झ. ञ. प्रत्युवाचमहामतिः. घ. प्रीत्याहांशुमतोवचः. ८ क. ख. ग. घ. च—ञ. वाक्यकोविदः. ९ क. ख. घ. पितरस्तत्रसागराः. १० क. ख. घ. च. छ. याज्ञीयं.

स तेषां राजपुत्राणां कर्तुकामो जलक्रियाम् ॥ [1]सलिलार्थी महातेजा न चापश्यज्जलाशयम् ॥१५॥
विसार्य निपुणां दृष्टिं [2]ततोपश्यत्खगाधिपम् ॥ पितॄणां मातुलं राम सुपर्ण[3]मनिलोपमम् ॥ १६ ॥
[4]स चैवमब्रवीद्वाक्यं वैनतेयो महाबलः ॥ मा शुचः पुरुषव्याघ्र वधोऽयं लोकसंमतः ॥ १७ ॥
कपिलेनाप्रमेयेन [5]दग्धा हीमे महाबलाः ॥ सलिलं [6]नार्हसि प्राज्ञ दातुमेषां हि लौकिकम् ॥ १८ ॥
गङ्गा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ ॥ तस्यां कुरु महाबाहो [7]पितॄणां तु जलक्रियाम् ॥ १९ ॥
भस्मराशीकृतानेतान्प्लावयेल्लोकपावनी ॥ तया क्लिन्नमिदं भस्म गङ्गया लोककान्तया ॥
[8]षष्टिं पुत्रसहस्राणि [9]स्वर्गलोकं [10]नयिष्यति ॥ २० ॥
[[11]गङ्गामानय भद्रं ते देवलोकान्महीतलम् ॥ क्रियतां [12]यदि शक्नोसि गङ्गायास्तव तारणम्] ॥ २१ ॥
[13]गच्छ चाश्वं महाभाग संगृह्य पुरुषर्षभ ॥ यज्ञं पैतामहं वीर [14]संवर्तयितुमर्हसि ॥ २२ ॥
सुपर्णवचनं श्रुत्वा सोंशुमानतिवीर्यवान् ॥ त्वरितं हयमादाय पुनरायान्[15]महायशाः ॥ २३ ॥
ततो राजानमासाद्य दीक्षितं रघुनन्दन ॥ न्यवेदयद्यथावृत्तं सुपर्ण[16]वचनं तथा ॥ २४ ॥
तच्छ्रुत्वा घोरसंकाशं वाक्यमंशुमतो नृपः ॥ यज्ञं [17]निर्वर्तयामास [18]यथाकल्पं यथाविधि ॥ २५ ॥
स्वपुरं [19]चागमच्छ्रीमानिष्टयज्ञो महीपतिः ॥ गङ्गायाश्चागमे राजा निश्चयं [20]नाध्यगच्छत ॥ २६ ॥
[21]अकृत्वा निश्चयं राजा कालेन महता महान् ॥ त्रिंशद्वर्षसहस्राणि राज्यं कृत्वा दिवं गतः ॥२७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

जलक्रिया तर्पणं ॥ १५ ॥ विसार्य समन्तात्प्रसार्य । निपुणां दूरवीक्षणक्षमां । अनिलोपमं वेगेनेतिशेषः। लोकसंमतः लोकहितः ॥१७॥ हि यस्मात् कपिलेन हताः । लौकिकं लोकतःप्राप्तं । सलिलंदातुंनार्हसि । "चण्डालादुदकात्सर्पाद्वैद्युताद्ब्राह्मणादपि ॥ दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणां ॥ उदकंपिण्डदानंचएतेभ्योयद्विधीयते ॥ नोपतिष्ठतितत्सर्वमन्तरिक्षेविनश्यति" इतिस्मृतेः । कपिलोब्राह्मणः ॥ १८ ॥ गङ्गा अस्तीतिशेषः ॥ १९ ॥ नकेवलंतत्रजलक्रिया तयासेचनीयंचेत्याह—भस्मेति । सार्धश्लोकः । यदिप्लावयेत् सेचयेत् तदा तया क्लिन्नं सिक्तं । भस्म नयिष्यति नेष्यति ॥ २०—२१ ॥ संवर्तयितुं समापयितुं ॥ २२ ॥ आयात् आगच्छत् ॥ २३ ॥ वृत्तं पितृवृत्तान्तं । सुपर्णवचनंचयथातथान्यवेदयदित्यन्वयः ॥ २४ ॥ यथाकल्पं यथाक्रमं ॥ २५ ॥ निश्चयं उपायं ॥ २६ ॥ महताकालेन दिवंगतइत्यन्वयः॥२७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकचत्वारिंशःसर्गः ॥ ४१ ॥

भूलोकेऽवतारणात् ॥ १७ ॥ ति० यतश्च महाबलाः महाबलवत्त्वेनप्रायश्चित्तमर्यादातिक्रान्तपापवन्तः अतोलौकिकसलिलंदातुंनार्हसि ॥ १८ ॥ ति० गमिष्यति प्रापयिष्यतीत्यर्थः । अनेन अकृतप्रायश्चित्तानामपिमहापातकिनांऔर्ध्वदेहिकायोग्यानां गङ्गाजलस्पृष्टपुद्गलानांविनापिप्रायश्चित्तान्तरंतत्कालएवसकलौर्ध्वदेहिकक्रियायोग्यत्वंचसूचितं ॥ २० ॥ इत्येकचत्वारिंशःसर्गः ॥ ४१ ॥

[पा०] १ घ—छ. झ. ञ. सजलार्थी. २ क. सचापश्यत्खगाधिपम्. ट. तत्रापश्यत्. ३ क. च. छ. ज. ञ. मचलोपमम्. घ. मनलोपमम्. ४ क—ट. सचैनमब्रवीत्. ५ क. ख. निर्दग्धाहि. ठ. हताहीमे. ६ ङ. च. छ. झ. ञ. नार्हसेप्राज्ञ. ७ ङ—ट. पितॄणांसलिलक्रियाम्. ८ च. षष्टिपुत्रसहस्राणि. ९ ख. ब्रह्मलोकं. १० ङ. झ. गमिष्यति. ११ अयंश्लोकः क. च. छ. ञ. दृश्यते. १२ क. च. छ. यदिशक्नोषि. १३ ङ. झ. निर्गच्छाश्वं. १४ ङ. ज. झ. निर्वर्तयितुमर्हसि. १५ क. घ—छ. झ. ञ. न्महातपाः. १६ क. ख. ग. ज. ञ. वचनंयथा. १७ च. छ. ज. ट. निवर्तयामास. १८ क. ग. घ. यथातत्त्वंयथाविधि. १९ ङ. छ. झ. ञ. ट. त्वगमच्छ्रीमान्. २० क. नाभ्यगच्छत. २१ क—ट. अगत्वानिश्चयं.

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

सगरपौत्रेणांशुमतास्वपुत्रेदिलीपेराज्यनिधानपूर्वकंगङ्गावतारणायहिमवच्छिखरेतपश्चरणम् ॥ १ ॥ तस्मिंस्तपःफलाला-भेनैवस्वर्गतेतदुपायंचिन्तयतापिदिलीपेनतदप्राप्त्यैवस्वर्गगमनम् ॥ २ ॥ तत्सूनुनाभगीरथेनमन्त्रिषुराज्याधानपूर्वकंगङ्गावता-रणायगोकर्णेतपश्चरणम् ॥ ३ ॥ तथातपःप्रसन्नंब्रह्माणंप्रतिगङ्गावतरणवरणपूर्वकंस्वकुलानुच्छित्त्यैसंततिवरणम् ॥४॥ ब्रह्मणा तंप्रतिगङ्गायाधरणीतलावतरणनियोजनपूर्वकंतद्धारणायहरप्रसादनचोदना ॥ ५ ॥

कालधर्मं गते राम सगरे प्रकृतीजनाः ॥ राजानं रोचयामासुरंशुमन्तं सुधार्मिकम् ॥ १ ॥
स राजा सुमहानासीदंशुमान्रघुनन्दन ॥ तस्य पुत्रो महानासीद्दिलीप इति विश्रुतः ॥ २ ॥
तस्मिन्राज्यं[1] समावेश्य दिलीपे रघुनन्दन ॥ हिमवच्छिखरे[2] पुण्ये तपस्तेपे सुदारुणम् ॥ ३ ॥
द्वात्रिंशच्च[3] सहस्राणि वर्षाणि सुमहायशाः[4] ॥ तपोवनं[5] गतो राम स्वर्गं लेभे[6] तपोधनः ॥ ४ ॥
दिलीपस्तु महातेजाः श्रुत्वा पैतामहं वधम् ॥ दुःखोपहतया बुद्ध्या निश्चयं नाध्यगच्छत[7] ॥ ५ ॥
कथं गङ्गावतरणं कथं तेषां जलक्रिया ॥ तारयेयं कथं चैनानिति[8] चिन्तापरोऽभवत् ॥ ६ ॥
तस्य चिन्तयतो नित्यं धर्मेण विदितात्मनः[9] ॥ पुत्रो भगीरथो नाम जज्ञे परमधार्मिकः ॥ ७ ॥
दिलीपस्तु महातेजा यज्ञैर्बहुभिरिष्टवान् ॥ त्रिंशद्वर्षसहस्राणि राजा राज्यमकारयत् ॥ ८ ॥
अगत्वा निश्चयं राजा तेषामुद्धरणं प्रति ॥ व्याधिना नरशार्दूल कालधर्ममुपेयिवान् ॥ ९ ॥
इन्द्रलोकं गतो राजा स्वार्जितेनैव कर्मणा[10] ॥ राज्ये भगीरथं पुत्रमभिषिच्य नरर्षभः[11] ॥ १० ॥
भगीरथस्तु राजर्षिर्धार्मिको रघुनन्दन ॥ अनपत्यो महातेजाः[12] प्रजाकामः सचाप्रजः[13] ॥ ११ ॥
मन्त्रिष्वाधाय तद्राज्यं गङ्गावतरणे रतः ॥ १२ ॥
स[14] तपो दीर्घमातिष्ठद्गोकर्णे रघुनन्दन ॥ ऊर्ध्वबाहुः पञ्चतपा मासाहारो जितेन्द्रियः ॥ १३ ॥
तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः ॥ अतीतानि महाबाहो तस्य राज्ञो महात्मनः ॥ १४ ॥

अथ गङ्गायास्त्रिपथगमनहेतुप्रश्नस्यपूर्वप्रक्रान्तस्यसाक्षादुत्तरमाह—कालधर्ममित्यादि । जातमात्रस्यकालेनावश्यंप्राप्तव्योधर्मः कालधर्मः । मरणमितियावत् । प्रकृतीजनाइत्यत्रदीर्घश्छान्दसः । अमात्यवर्गाः । "प्रकृतिःसहजेयोनावमात्येपरमात्मनि" इतिवैजयन्ती । रोचयामासुः न्यायप्राप्तत्वादैच्छन् ॥ १ ॥ सः सुमहान्राजाऽऽसीदित्यन्वयः ॥ २ ॥ तेपे गङ्गावतरणायेतिशेषः ॥ ३ ॥ स्वर्गंलेभे नतुगङ्गां ॥ ४ ॥ वधं अपमृत्युं । दुःखोपहतया पित्रादुश्चरेतपसिकृतेपि तेषांगतिर्नाभूदित्येवंरूपया । नाध्यगच्छत नाध्यगच्छत् ॥५॥ निश्चयानधिगममेवाह—कथमित्यादिना ॥६॥ धर्मेण प्रयोजकेन । चिन्तयतः ॥ ७ ॥ अकारयत् अकरोत् ॥ ८ ॥ उपेयिवान् ययौ ॥ ९ ॥ अभिषिच्य इन्द्रलोकंगतः ॥ १० ॥ अनपत्यः अतएवप्रजाकामोऽभूत् । सचाप्रजइत्युत्तरशेषः ॥ ११ ॥ गोकर्णे हिमवत्पादविशेषे । पञ्चाग्नयः चतुर्षुपार्श्वेष्वग्नयउपरिसूर्यश्च तेषांमध्येतपोयस्यसः पञ्चतपाः । मासस्यसकृदाहारोयस्यसः मासाहारः । उभयत्रमध्यमपदलोपीसमासः । पृषोदरादित्वात्साधुत्वं ॥ १३ ॥ तस्यराज्ञोमहात्मनइ-

ति० तद्दिलीपवंशजरघुपुत्रकोदिलीपः कालिदासोक्तोन्यएवेतिबोध्यं ॥ ८ ॥ ति० सचप्रजाइत्यस्यमन्त्रिष्वाधायेत्युत्तरेणान्वयः ॥ ११ ॥ ति० गोकर्णः दक्षिणदिक्स्थतीर्थविशेषोवा ॥ १३ ॥ ति० यद्यस्तीत्यादि असंदिग्धे संदिग्धवचनं " वेदाश्चेत्प्रमाणं-

[पा०] १ ङ. च. छ. झ. ञ. तस्यैराज्यं. २ क. घ—ट. च्छिखरेरम्ये. ३ ङ. च. छ. झ. ञ. द्वात्रिंशच्छतसाहस्रं. ४ ख. ग. सुमहातपाः. ५ क. ख. घ—ट. तपोवनगतोराजा. ६ क. ख. लेभेस्वकर्मभिः. ग. लेभेमहायशाः. ७ क. ग. घ. ज. नाधिगच्छति. ८ क. घ—झ. ट. चैतानितिचिन्ता. ९ क. विजितात्मनः. १० ग. स्वार्जितैरेवकर्मभिः. ११ क. च. ञ. ट. नरर्षभम्. १२ ङ. झ. ट. अनपत्योमहाराजः. १३ ख. समाहितः. झ. सचप्रजाः. १४ ङ. च. झ. ञ. ट. तपोदीर्घसमातिष्ठत्.

सुप्रीतो भगवान्ब्रह्मा प्रजानां पतिरीश्वरः ॥ १५ ॥
ततः सुरगणैः सार्धमुपागम्य पितामहः ॥ भगीरथं महात्मानं तप्यमानमथाब्रवीत् ॥ १६ ॥
भगीरथ महाभाग प्रीतस्तेऽहं जनेश्वर ॥ तपसा च सुतप्तेन वरं वरय सुव्रत ॥ १७ ॥
तमुवाच महातेजाः सर्वलोकपितामहम् ॥ भगीरथो महाभागः कृताञ्जलिरुपस्थितः ॥ १८ ॥
यदि मे भगवन्प्रीतो यद्यस्ति तपसः फलम् ॥ सगरस्यात्मजाः सर्वे मत्तस्सलिलमाप्नुयुः ॥ १९ ॥
गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम् ॥ स्वर्गं गच्छेयुरत्यन्तं सर्वे मे प्रपितामहाः ॥२०॥
देया च संततिर्देव नावसीदेत्कुलं च नः ॥ इक्ष्वाकूणां कुले देव एष मेऽस्तु वरः परः ॥ २१ ॥
उक्तवाक्यं तु राजानं सर्वलोकपितामहः ॥ प्रत्युवाच शुभां वाणीं मधुरां मधुराक्षराम् ॥ २२ ॥
मनोरथो महानेष भगीरथ महारथ ॥ एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्धन ॥ २३ ॥
इयं हैमवती गङ्गा[12] ज्येष्ठा हिमवतः सुता ॥ तां वै [13]धारयितुं शक्तो हरस्तत्र नियुज्यताम् ॥ २४ ॥
गङ्गायाः पतनं राजन्पृथिवी न [14]सहिष्यति ॥ तां वै [15]धारयितुं वीर नान्यं पश्यामि शूलिनः ॥ २५ ॥
तमेवमुक्त्वा राजानं [16]गङ्गां चाभाष्य लोककृत् ॥ जगाम त्रिदिवं देवै[17]स्सह देवैर्मरुद्गणैः ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्युत्तरशेषः ॥ १४ ॥ सुप्रीतइत्यर्धम् ॥ १५ ॥ अथउपगमनानन्तरं ॥ १६ ॥ तेतपसाप्रीतः ॥ १७ ॥ महातेजाः तपःकृतनिरवधिकतेजाः ॥ १८ ॥ मेतपसइत्यन्वयः ॥ १९ ॥ नकेवलंसलिलाप्तिरन्यच्चेत्याह— गङ्गायाइति । अत्यन्तं अक्षय्यं ॥ २० ॥ इक्ष्वाकूणां कुलेजातस्यमेसंततिर्देया ययानः कुलंनावसीदेत् एषवरः परः द्वितीयोवरोस्त्वित्यन्वयः । तपसेनिर्गमदशायामपिहिप्रजाकामइत्युक्तं ॥ २१ ॥ शुभां शुभहेतुं । मधुरां अर्थतोमनोज्ञां ॥ २२ ॥ मनोरथः तावकइतिशेषः ॥२३॥ इयं संनिहिता । हैमवती हिमवत्संनिहिता । धारयितुंशक्तः हरः । तत्र धारणे । नियुज्यतां प्रार्थ्यतां ॥ २४ ॥ धारयितुं शक्तमितिशेषः ॥ २५ ॥ आभाष्य वत्सेराजानंयथाकालमनुगृहाणेत्युक्त्वेतियावत् । मरुद्गणैः वायुगणैः ॥२६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

स्युः'' इतिवत् । सलिलं स्पर्शमात्रेणस्वर्गतिसाधनंसलिलं ॥ १९ ॥ ति० इक्ष्वाकूणांकुलेजातस्यममसंततिर्देया । यथानःकुलंनावसीदेत् । संतत्यैइतिचतुर्थीप्रथमार्थे । एषपरोवरः द्वितीयवरइत्यर्थः । परेतु संतत्यैतदर्थंनःकुलंनावसीदेदितिचयाचे । मत्कुलेअसंततिःकोपिमाभूदित्यर्थः । उपसंहरति—इक्ष्वाकूणामिति । तत्कुलेजातस्यएषएवपरोवरोस्तु । नातोऽधिकंतृतीयंवरान्तरंयाचेइत्यर्थः । एतेनपूर्वापरोपकारिताभगीरथस्यदर्शितेत्याहुः ॥ २१ ॥ ति० तांगङ्गां । तत्रगङ्गागमनसमये धारयितुंहरएवनियुज्यतां । वैशब्दएवार्थे ॥ २४ ॥ ति० देवैःआजानजैः । मरुद्गणैःकर्मदेवैः । शि० पुनर्मरुद्गणोपादानंब्राह्मणवसिष्ठन्यायेनेतिबोध्यं ॥ २६ ॥ इतिद्विचत्वारिंशस्सर्गः ॥ ४२ ॥

[पा०] १ क. घ—छ. झ. ञ. प्रभुरीश्वरः. २ घ. ङ. च. झ. ञ. महाराज. ज. ट. महातेजः. ३ ङ—ट. जनाधिप. क. ख. नरेश्वर. ४ ट. तेसुतप्तेन. ५ ङ. च. छ. झ. ञ. महाबाहुः. ६ ङ. च. छ. झ. ञ. कृताञ्जलिपुटस्स्थितः. क. ग. कृताञ्जलिरवस्थितः. ७ झ. भगवान्प्रीतो. ८ च. छ. ञ. सर्वेते. ङ. झ. सर्वेच. ९ ङ. झ. देयायाचेहसंतत्यै. १० घ. तपोधनमहातेजः. ११ घ. कुलनन्दन. क. ञ. कुलमव्ययम्. १२ ङ—ञ. ज्येष्ठागङ्गा. १३ क—ट. धारयितुंराजन्. १४ ग. ङ. झ. ञ. ट. सहिष्यते. १५ क. ङ. च. झ. ञ. ट. धारयितुंराजन्. १६ क. च. ज. ञ. गङ्गामाभाष्य. १७ ग. ङ. च. छ. झ. ञ. देवैस्सर्वैस्सहमरुद्गणैः. ख. देवोब्रह्मासहमरुद्गणैः.

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

भगीरथतपस्तुष्टेहरेर्धारणायसमुद्युक्तेगङ्गयासवेगमाकाशाच्छिवशिरसिनिपतनम् ॥ १ ॥ हरेणगङ्गागर्वखण्डनायजटामण्डलेतन्निरोधनम् ॥ २ ॥ भगीरथेनपुनस्तपःप्रसादितेनगङ्गायाबिन्दुसरसिविसर्जनम् ॥३॥ ततोनिर्गत्यभगीरथरथानुयायिन्यागङ्गयाजन्हुकन्यात्वप्राप्तिपूर्वकंस्वजलैःसगरसुतशरीरभस्मनामाप्लावनम् ॥ ४ ॥ तेनधूतकल्मषैस्तैःस्वर्गगमनम् ॥ ५ ॥

देवदेवे गते तस्मिन्सोऽङ्गुष्ठाग्रनिपीडिताम् ॥ कृत्वा वसुमतीं राम संवत्सरमुपासत ॥ १ ॥
ऊर्ध्वबाहुर्निरालंबो वायुभक्षो निराश्रयः ॥ अचलस्स्थाणुवत्स्थित्वा रात्रिंदिवमरिंदम ॥ २ ॥
अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः ॥ उमापतिः पशुपती राजानमिदमब्रवीत् ॥ ३ ॥
प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तव प्रियम् ॥ [तमब्रवीन्नृपवरो गङ्गां धारय वै हर ॥ ४ ॥
इत्युक्तो वचनं भर्गः करिष्यामि प्रियं तव] ॥ शिरसा धारयिष्यामि शैलराजसुतामहम् ॥ ५ ॥
ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता ॥ [उमापतेर्वचश्श्रुत्वा गङ्गा क्रोधसमन्विता] ॥ ६ ॥
तदा साऽतिमहद्रूपं कृत्वा वेगं च दुस्सहम् ॥ आकाशादपतद्राम शिवे शिवशिरस्युत ॥ ७ ॥
अचिन्तयच्च सा देवी गङ्गा परमदुर्धरा ॥ विशाम्यहं हि पातालं स्रोतसा गृह्य शंकरम् ॥ ८ ॥
तस्यावलेपनं ज्ञात्वा क्रुद्धस्तु भगवान्हरः ॥ तिरोभावयितुं बुद्धिं चक्रे त्रिणयनस्तदा ॥ ९ ॥
सा तस्मिन्पतिता पुण्या पुण्ये रुद्रस्य मूर्धनि ॥ हिमवत्प्रतिमे राम जटामण्डलगह्वरे ॥ १० ॥
सा कथंचिन्महीं गन्तुं नाशक्नोद्यत्नमास्थिता ॥ नैव निर्गमनं लेभे जटामण्डलमोहिता ॥ ११ ॥
तत्रैवाबंभ्रमद्देवी संवत्सरगणान्बहून् ॥ तामपश्यन्पुनस्तत्र तपः परममास्थितः ॥ १२ ॥
अनेन तोषितश्चाभूदत्यर्थं रघुनन्दन ॥ विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति ॥ १३ ॥
तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे ॥ १४ ॥

अथगङ्गाप्लवनेनसागराणांस्वर्गगतिस्त्रिचत्वारिंशे— देवदेवइत्यादि । उपासत उपास्त । शिवमितिशेषः ॥ १—२ ॥ उमापतिरित्यनेनोमयासहागतइत्युच्यते ॥ ३—४ ॥ प्रियंकरिष्यामीत्येतद्विवृणोति—शिरसेति ॥ ५—६ ॥ अर्धत्रयमेकान्वयं । हैमवती हिमवत्कन्या । शिवे शुद्धे । उतेतिप्रसिद्धौ ॥ ७ ॥ महारूपदुःसहवेगकरणेनिमित्तमाह—अचिन्तयदिति । दुर्धरा धर्तुमशक्या । गृह्य गृहीत्वा ॥ ८ ॥ वलेपनं गर्वं । "वष्टिभागुरिः"इत्यल्लोपः । तिरोभावयितुं तिरोहितां कर्तुं ॥ ९ ॥ जटामण्डलमेवगह्वरंगुहायस्मिंस्तत्तथा ॥ १० ॥ निर्गमनंजटामण्डलान्निस्सरणमात्रमपि जटामण्डलेमोहितासंजातमोहा ॥ ११ ॥ अबंभ्रमत् पुनःपुनरभ्रमत् । यङ्लुगन्ताल्लङ् । आस्थितः राजेतिशेषः ॥ १२ ॥ अनेन तपसा । तोषितश्चासीत् विससर्जच । बिन्दुसरोनाम हिमवतिब्रह्मनिर्मितस्सरोविशेषः ॥ १३ ॥ तस्यामित्यर्धं । स्रोतांसि प्रवाहाः

ति० देवदेवे आजानजानामपिदेवानांदेवेपूज्ये ॥ १ ॥ ति० तस्यावलेपनमितिसन्धिरार्षः । शि० तदा तु गङ्गाविचारसमयएव । तस्याः गङ्गायाः । लेपनं खेलनेच्छावृद्धिंज्ञात्वा क्रुद्धोव क्रुद्धइवहरः तिरोभावयितुं स्वशिरसिगङ्गांगोपयितुं बुद्धिं निश्चयं चक्रे । एतेनशिवस्यापिखेलनेच्छासूचिता । तुशब्दएवार्थे । वशब्दइवार्थे अतएवसन्धौनार्षत्वकल्पना ॥९॥ ति० जटामण्डलेनगह्वरे गंभीरे । हिमवत् हिमबिंदुवत्पतिता ॥ १० ॥ ति० जटामण्डलंभ्रान्त्वाप्रान्तभागतापिअन्ततःतत्प्रान्तभागतोपिनिर्गमं नलेभे । प्रान्तभागेपितन्मध्यत्वभ्रमस्यमाययाभगवतोत्पादनात् ॥ ११ ॥ ति० अबभ्रमत् आर्षत्वात्सन्वदित्वं । शि० अवभ्र-

[पा०] १ अयंश्लोकः क—छ. झ. दृश्यते. अचलस्स्थाणुवत्. ऊर्ध्वबाहुरिति ज. पाठेक्रमोदृश्यते. २ ङ. च. छ. ज. स्थाणुवन्नित्यं. ३ क. घ. च. छ. ज. रात्रिंदिवमतन्द्रितः. ङ. रात्रिंदिवमुपागतः. ४ इदमर्धद्वयं च. छ. दृश्यते. ५ इदमर्धं च. छ. दृश्यते. ६ क. च. छ. ज. सासुमहद्रूपं. क. घ. सातुमहद्रूपं. ७ क. ख. घ. च. छ. ज. ट. दपतद्गङ्गा. ८ घ. एतंनयाम्यपातालं. ९ ख. ज्ञालाऽवलेपनंतस्याः. १० क. सातस्यपतितापुण्या. घ. एतस्मिन्पतिता. ११ च. छ. ज. हिमवत्पतितारास. १२ क—ट. नैवसानिर्गमंलेभे. १३ ङ. झ. जटामण्डलमन्ततः. १४ क.—ङ. झ. ज. तत्रैवाबभ्रमद्देवी. ढ. तत्रैवावभ्रमत. च. छ. ज. तत्रैवविभ्रमद्देवी. १५ ङ. झ. ज. सतेनतोषितश्चासी. १६ घ. ङ. झ. म. दत्यन्तंरघुनन्दन.

ह्रादिनी पावनी चैव [1]नलिनी च तथाऽपरा ॥ [2]तिस्रः प्राचीं दिशं [3]जग्मुर्गङ्गाश्शिवजलाश्शुभाः ॥१५॥
सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी ॥ तिस्रस्त्वेता दिशं जग्मुः प्रतीचीं तु शुभोदकाः ॥१६॥
[[4]तथैव चालिकानाम विश्रुता लोकपावनी] ॥ सप्तमी चान्वगात्तासां [5]भगीरथमथो नृपम् ॥१७॥
भगीरथोपि राजर्षिर्दिव्यं स्यन्दनमास्थितः ॥ प्रायादग्रे महातेजा [6]गङ्गां तं चाप्यनुव्रजत् ॥ १८ ॥
गगनाच्छङ्करशिरस्ततो [7]धरणिमाश्रिता ॥ [8]व्यसर्पत जलं तत्र [9]तीव्रशब्दपुरस्कृतम् ॥ १९ ॥
मत्स्यकच्छपसङ्घैश्च शिंशुमारगणैस्तदा ॥ पतद्भिः [10]पतितैश्चान्यैर्व्यरोचत वसुंधरा ॥ २० ॥
ततो देवर्षिगन्धर्वा [11]यक्षाः सिद्धगणास्तदा ॥ व्यलोकयन्त ते तत्र गगनाद्गां [12]गतां तथा ॥ २१ ॥
[13]विमानैर्नगराकारैर्हयैर्गज[14]वरैस्तदा ॥ [15]पारिप्लवगतैश्चापि देवता[16]स्तत्र विष्ठिताः ॥ २२ ॥
[17]तदद्भुततमं लोके [18]गङ्गापतनमुत्तमम् ॥ दिदृक्षवो देवगणाः [19]समीयुरमितौजसः ॥ २३ ॥
संपतद्भिः सुरगणैस्तेषां चाभरणौजसा ॥ शतादित्यमिवाभाति गगनं गततोयदम् ॥ २४ ॥
शिंशुमारोरगगणैर्मीनैरपि च चञ्चलैः ॥ विद्युद्भिरिव [20]विक्षिप्तमाकाशमभवत्तदा ॥ २५ ॥
पाण्डुरैः सलिलोत्पीडैः कीर्यमाणैः [21]सहस्रधा ॥ शारदाभ्रैरिवाकीर्णं गगनं हंससंप्लवैः ॥ २६ ॥
क्वचिद्द्रुततरं याति कुटिलं क्वचिदायतम् ॥ [22]विनतं [23]क्वचिदुद्धूतं क्वचिद्याति शनैःशनैः ॥ २७ ॥
सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः ॥ मुहुरू[24]र्ध्वमुखं गत्वा पपात [25]वसुधातलम् ॥ २८ ॥

॥ १४ ॥ स्रोतसांनामनिर्देशपूर्वकंगतिभेदमाह—ह्रादिनीति । शुभाः शोभमानाः ॥ १४ ॥ महानदीति सर्वविशेषणं॥१६॥ सप्तमीत्यर्धं । तासांमध्ये ॥१७॥ स्यन्दनं रथं अनुव्रजत् अन्वव्रजत् । अत्रस्वर्गाकाशभूमिगमनात् त्रिपथगात्वमित्येके दिक्त्रयगमनादित्यपरे॥१८॥ एवं त्रीन्पथःकेनहेतुनेत्यस्योत्तरमभिधाय कर्मभिःकैः समन्वितेत्यस्यचरितभेदप्रश्नस्योत्तरमाह—गगनादिति । तीव्रशब्देहेतुरयं ॥ १९ ॥ शिंशुमारः अंबुकरी " शिंशुमारस्त्वंबुकरी " इतिवैजयन्ती । अन्यैः जलजन्तुविशेषैः ॥ २० ॥ गगनात् रुद्रजटागगनात् । गां भूमिं ॥ २१ ॥ नगराकारैः नगरवद्विपुलैः । पारिप्लवगतैः पारिप्लवंसंभ्रमं गतैरिति विमानादिविशेषणं।तत्र गङ्गापतनप्रदेशे । विष्ठिताः विशेषेणस्थिताः ॥ २२ ॥ लोके भूलोके । अमितौजसइत्यनेन प्रधानदेवाउच्यन्ते ॥ २३ ॥ सुरगणैः अमिततेजोभिरितिसिद्धं । आभाति अभात् ॥ २४ ॥ आकाशं चञ्चलैः शिंशुमारादिभिः विद्युद्भिरिव विक्षिप्तं व्याप्तं अभवत् ॥ २५ ॥ वेगवशेनसहस्रधाकीर्यमाणैः सलिलोत्पीडैः फेनैः हंससंप्लवैः हंससंकुलैः शारदाभ्रैरिव गगनमाकीर्णमित्यन्वयः ॥ २६ ॥ अत्रगङ्गेत्यनुषज्यते । द्रुततरमित्यादिक्रियाविशेषणं । आयतं ऋजु। विनतं निम्नेनसंकुचितं । उद्धूतं पाषाणस्खलनादिनाऊर्ध्वमुखं । सर्वत्रव्यत्ययेनभूतेलट् ॥२७॥ अभ्याहतं वातव्यावर्तितं

मत् अवाभ्रमत् । आगमशास्त्रस्यानित्यत्वादड्विरहः ॥ १२ ॥ ति० शिंशुमारो नक्रः ॥ २० ॥ ति० पारिप्लवः यानभेदः

[पा०] १ क. ख. घ—ट. नलिनीचतथैवच. २ ख. ङ. च. झ. ञ. ट. तिस्रश्चैतादिशं. ३ ङ. झ. जग्मुःप्रतीचीं तुदिशंशुभाः. ४ इदमर्धं ख. दृश्यते. ५ ङ. झ. भगीरथरथंतदा. ६ ख. गङ्गातंचान्वगाच्छनैः. ७ क—ट. धरणिमागता. ८ ङ. झ. असर्पतजलं. ९ क. ख. तीव्रवेगपुरस्कृतम्. १० ख. ङ. च. छ. झ. ञ. पतितैश्चैव. ११ घ—ट. यक्षसिद्धगणास्तदा. ख. यक्षास्सुरगणास्तदा. क—ट. सिद्धगणास्तथा. १२ क. ट. गतांतदा. १३ ख. ग. छ. ज. ञ. ट. विमानैर्गगनाकारैः. १४ क—घ. च. छ. ज. ञ. ट. वरैस्तदा. १५ क—ञ. पारिप्लवगताश्चापि. १६ क. ख. च. छ. स्तत्रविस्मिताः. घ. स्तत्रशोभिताः. १७ ङ. च. छ. झ. ञ. तदद्भुतमिमं. १८ ङ. च. छ. झ. गङ्गावतरमुत्तमम्. ञ. गंगावतरणंशुभम्. १९ ख. ग. घ. ज. समेयुरमितौजसः. २० क. ञ. विक्षिप्तैः. २१ ख. सहस्रशः. २२ क. ख. घ. विततं. ट. विनीतं. २३ क—घ. झ. क्वचिदुद्धूतं. २४ क—ञ. मुहुरूर्ध्वपथं. ट. मुहुरूर्ध्वपातिं. २५ ख. ग. ङ. च. छ. झ. ञ. वसुधांपुनः.

तच्छङ्करशिरोभ्रष्टं भ्रष्टं भूमितले पुनः ॥ व्यरोचत तदा तोयं निर्मलं गतकल्मषम् ॥ २९ ॥
तत्र देवर्षिगन्धर्वा वसुधातलवासिनः ॥ भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुः ॥ ३० ॥
शापात्प्रपतिता ये च गगनाद्वसुधातलम् ॥ कृत्वा तत्राभिषेकं ते बभूवुर्गतकल्मषाः ॥ ३१ ॥

तरङ्गसलिलेनाभिमुखमाहृतमित्यर्थः ॥ २८ ॥ शंकरशिरसिभ्रष्टं पतितमपि। ततःभूमितले पतितमपि। निर्मलं गतंकल्मषंयेन तद्गतकल्मषं पापापहमित्यर्थः ॥ २९ ॥ पवित्रं पावनं। तत्रज्ञापकहेतुमाह—भवाङ्गपतितमिति। भवेन रुद्रेण शिरसाधृतत्वात्पवित्रमितिज्ञात्वापस्पृशुरित्यर्थः। पवित्रमिति सामान्योक्त्याभवस्यान्येषांचपवित्रमित्युक्तं। अतएव "हरस्य गात्रसंस्पर्शात्पवित्रत्वमुपागता" इत्यत्रापिहरस्यशुद्धिप्रदत्वमुपागतेत्यर्थः। अन्येप्यृषयऊचुः श्रीमद्भागवते। "यच्छौचनिस्सृतसरित्प्रवरोदकेनतीर्थेनमूर्ध्निविधृतेनशिवःशिवोभूत्" इति। भारते "तदम्बुपतितंदृष्ट्वादधारशिरसाहरः। पावनार्थंजटामध्येयोग्योस्मीत्यवधारणात्" इति। अत्राप्ययोध्याकाण्डेवक्ष्यति "विष्णुपादोद्भवांदिव्यां" इति। गङ्गायाविष्णुपादोद्भवत्वेन पवित्रत्वरूपंदिव्यत्वं। भवाङ्गात्पतितमितिवार्थः। "द्वितीयाश्रितातीतपतित—"इतिद्वितीयासमासविधानात् पञ्चमीसमासानुपपत्तेश्च भवेनधृतत्वादस्माभिरपिधार्यमितिपस्पृशुरित्येवार्थः। यद्वा भवाङ्गपतितत्वात्पवित्रंनतुपूर्ववदतिपवित्रं। अतएवपस्पृशुः नतुसस्नुः। यद्वा यद्यपिभवाङ्गात्पतितं तथापि विष्णुपादोद्भूतत्वात्पवित्रमितिवा। "नदीवेगेनशुध्यति" इतिन्यायाद्भवसंपर्कविगमेपवित्रमितिवापस्पृशुः ॥ ३० ॥ शापाद्धेतोः

शिबिकादिरूपःशिबिकादियानस्थाइत्यर्थइत्यन्ये ॥ २२ ॥ ति० हंससंप्लवैः हंससंचारैश्च आकीर्णं व्याप्तं ॥ २६ ॥ शि० निर्मलं शिलाम्बुपातेनपङ्कादिरूपमलरहितं। किंच निर्गतोयोमःपरिमाणं। "घञर्थेकविधानं" इतिमाधातोःकः। तंलातिगृह्णातीतिनिर्मलं इयत्तारहितप्रभाववदित्यर्थः। गतकल्मषं गतानिनिवृत्तानिकल्मषाणि आश्रितानांपापानियस्मात्तत्। क्तप्रत्ययोपस्थितकालस्यात्राविवक्षा "कर्तुरीप्सिततमं" इतिसूत्रघटकीभूतक्तप्रत्ययोपात्तवर्तमानत्वस्येव। आश्रिताचाविवक्षा "गन्ताविदेशंपथिकःप्रियो मेत्वद्वाक्यमात्रावधिरेवयात्रा। अतोतिमौनंकुरुताम्रचूडत्वांस्वर्णचूडाख्यमहंवदिष्ये" इत्यादौ। तेनयदैवगङ्गादर्शनादितदैवतत्कर्तृणांपापक्षयइतिफलितं। शंकरशिरोभ्रष्टं शंकरशिरश्च्युतं पुनरनन्तरंभूमितलंभ्रष्टं ॥ २९ ॥ ति० पस्पृशुः सस्नुरित्यर्थः। शि० तत्रेति। तत्र गङ्गापतनकाले। ऋषिगणगन्धर्वाः वसुधातलवासिनश्च। भवाङ्गपतितं भवाङ्गात्पतितमित्यतःपवित्रं अतिशुद्धंतोयंपस्पृशुरेव। "सर्ववाक्यंसावधारणंभवति" इतिन्यायेनैवकारलाभः। अत्रपस्पृशुरेवेत्युक्त्यानसस्नुरितिफलितं। तेनावगाहानर्हवेगवत्त्वं तज्जलस्यसूचितं। पञ्चमीतियोगविभागेन संबन्धसामान्यषष्ठ्यावासमासः पूर्वविधावनल्विधावित्यादाविव। अतिपवित्रमित्यनेनस्वतःपवित्रत्वेसिद्धेपि भवाङ्गस्पर्शद्वारालोकानपिपावयिष्यतीतिहेतुर्ध्वनितः। एतेन अनुशासनविरहात्पञ्चमीसमासानुपपत्तिरितिप्रत्युक्तं। यत्तुसामान्योक्त्याशिवस्यापिपवित्रत्वकारकमितिभूषणकृद्भिरुक्तं तच्चिन्त्यं। हरस्येश्वरत्वेनतत्रमलसंबन्धस्यासंभवेनतत्पवित्रत्वकारकत्वस्यदुर्वचत्वात्। यदीश्वरेपिमलसंबन्धस्स्वीक्रियते तर्हि इयंनुक्तेर्न्यूनतातेषांस्यात्। किंच हरिहरभक्तानांतीर्थपावनसामर्थ्यमस्तीतिस्मृत्यादिसिद्धम्। अतएव "साधवोन्यासिनश्शान्ताब्रह्मिष्ठालोकपावनाः। हरन्त्यघंतेऽङ्गसङ्गात्तेष्वास्तेह्यघभिद्धरिः" इति। गङ्गागमनसमयेगङ्गांप्रतिभगीरथवचनं। "भवद्विधाभागवतास्तीर्थभूतास्स्वयंप्रभो। तीर्थीकुर्वन्तितीर्थानिस्वान्तस्थेनगदाभृता" इत्यादिविदुरंप्रतियुधिष्ठिरवचनंचसंगच्छते। एतेनगङ्गाजलसंबन्धाद्धरश्शुद्धः हराङ्गसंबन्धाच्चगङ्गामतिपवित्रातात्याजेतिवचनंश्रेयस्कामैर्दूरतःपरिवर्जनीयं। आदरणीयंचेदंहरगात्रस्पर्शादतिपवित्रत्वंप्राप्तागङ्गेति। अतएव "हरस्यगात्रसंस्पर्शात्पवित्रत्वमुपागता" इत्यादीनिसंगच्छन्ते। संगच्छतेच "विष्णुपादोद्भवांदिव्यां" इत्यादि। पवित्रत्वमुपागतेत्यत्रपवित्रशब्दोतिपवित्रपरः। "यच्छौचनिस्सृतसरित्प्रवरोदकेनतीर्थेनमूर्ध्न्यधिधृतेनशिवश्शिवोभूत्" इतिभागवतस्थलस्यमर्थः। शिवःस्वतस्सिद्धकल्याणस्वरूपः शिवः लोकानांकल्याणप्रदोऽभूदिति। अयंभावः। यदिशिवोगङ्गांनधारयेत्। तर्हिगङ्गापृथिव्यांनोपलभ्येत। तथाचलोककल्याणंनस्यात् धारणेतुसर्वंसिद्धमिति। अतएव "तदम्बुपतितंदृष्ट्वादधारशिरसाहरः। पावनार्थंजटामध्येगतोस्मीत्यवधारणात्" इतिभारतपद्ये पूप्रकृतिकणिजन्तप्रकृतिकल्युडन्तप्रयोगः लोकानांपावनार्थमित्यर्थः। अन्यथा "तदम्बुपतितंदृष्ट्वादधारशिरसाहरः। पूतोभूत्सजटामध्येगतोस्मीत्यवधारणात्" इत्येववदेत्। हरस्येश्वरत्वेप्रमाणंतु "सत्वंरजस्तमइतिप्रकृतेर्गुणास्तैः" इत्यादि। "धारयिष्यतितेवेगंरुद्रस्त्वात्माशरीरिणाम्। यस्मिन्नोतमिदंप्रोतंविश्वंशाटीवतन्तुषु। अहंब्रह्माचशर्वश्चजगतःकारणंपरम्" इत्यादिभागवतादिवचनमितिदिक् ॥ ३० ॥

[पा०] १ ट. भूमितलंपुनः. २ क. ख. घ—ट. तत्रर्षिगणगन्धर्वाः.

धूतपापाः पुनस्तेन तोयेनाथ सुभास्वता ॥ पुनराकाशमाविश्य स्वाँल्लोकान्प्रतिपेदिरे ॥ ३२ ॥
मुमुदे मुदितो लोकस्तेन तोयेन भास्वता ॥ कृताभिषेको गङ्गायां बभूव विगतक्लमः ॥ ३३ ॥
भगीरथोपि राजर्षिर्दिव्यं स्यन्दनमास्थितः ॥ प्रायादग्रे महातेजास्तं गङ्गा पृष्ठतोऽन्वगात् ॥ ३४ ॥
देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः ॥ गन्धर्वयक्षप्रवराः सकिंनरमहोरगाः ॥ ३५ ॥
सर्वाश्चाप्सरसो राम भगीरथरथानुगाम् ॥ गङ्गामन्वगमन्प्रीताः सर्वे जलचराश्च ये ॥ ३६ ॥
यतो भगीरथो राजा ततो गङ्गा यशस्विनी ॥ जगाम सरितांश्रेष्ठा सर्वपापविनाशिनी ॥ ३७ ॥
ततो हि यजमानस्य जह्नोरद्भुतकर्मणः ॥ गङ्गा संप्लावयामास यज्ञवाटं महात्मनः ॥ ३८ ॥
तस्यावलेपनं ज्ञात्वा क्रुद्धो जह्नुश्च राघव ॥ अपिबच्च जलं सर्वं गङ्गायाः परमाद्भुतम् ॥ ३९ ॥
ततो देवाः सगन्धर्वा ऋषयश्च सुविस्मिताः ॥ पूजयन्ति महात्मानं जह्नुं पुरुषसत्तमम् ॥
गङ्गां चापि नयन्तिस्म दुहितृत्वे महात्मनः ॥ ४० ॥
ततस्तुष्टो महातेजाः श्रोत्राभ्यामसृजत्पुनः ॥ ४१ ॥
[विसृज्य गङ्गां राजेन्द्रो ज्ञात्वा प्राप्तं भगीरथम् ॥ पूजयित्वा यथान्यायं यज्ञवाटमुपागमत्] ॥
तस्माज्जह्नुसुता गङ्गा प्रोच्यते जाह्नवीति च ॥ ४२ ॥
जगाम च पुनर्गङ्गा भगीरथरथानुगा ॥ सागरं चापि संप्राप्ता सा सरित्प्रवरा तदा ॥
रसातलमुपागच्छत्सिद्ध्यर्थं तस्य कर्मणः ॥ ४३ ॥
भगीरथोपि राजर्षिर्गङ्गामादाय यत्नतः ॥ पितामहान्भस्मकृतानपश्यद्दीनचेतनः ॥ ४४ ॥
अथ तद्भस्मनां राशिं गङ्गासलिलमुत्तमम् ॥ प्लावयद्धूतपाप्मानः स्वर्गं प्राप्ता रघूत्तम ॥ ४५ ॥

॥ ३१ ॥ आकाशमाविश्य आकाशमार्गेणेत्यर्थः ॥३२॥ मुदितो मुमुदे पुनःपुनर्जहर्षेत्यर्थः ॥३३–३४॥ देवाइतिश्लोकद्वयं । भगीरथरथानुगांगङ्गामन्वगमन् ॥ ३५–३६ ॥ यतः यत्र । ततः तत्र ॥ ३७ ॥ अद्भुतकर्मणइतिवक्ष्यमाणगङ्गापानाभिप्रायं । यज्ञवाटं यज्ञक्षेत्रं ॥ ३८ ॥ वलेपनं गर्वं । परमाद्भुतमितिक्रियाविशेषणं ॥ ३९ ॥ ततइतिसार्धश्लोकः । दुहितृत्वे नयतिस्म दुहितरमकुर्वन्नित्यर्थः ॥ ४० ॥ ततः दुहितृत्वप्रापणात् । श्रोत्राभ्यां नरावयवेषुश्रोत्रस्यातिपावनत्वादितिभावः ॥ ४१–४२ ॥ जगामेत्यर्धत्रयं । तस्यकर्मणः भगीरथयत्नस्य ॥ ४३ ॥ भस्मकृतान् भस्मत्वेनकृतान् ॥ ४४ ॥ तत्सलिलं प्लावयत् । अप्ला-

ति० मुदितः दर्शनमात्रेण । मुमुदे स्नानपानादिना ॥ ३३ ॥ शि० अत्र प्रार्थनांविनैवगङ्गायज्ञशालांप्रापेत्यनेनजह्नोर्गङ्गोपासकत्वंसूचितं ॥ ३८ ॥ शि० हेराघव तस्यागङ्गायाः वले यागशालायाआच्छादने। प्लावनेइत्यर्थः । पनं अहोभाग्यमेतस्ययस्ययज्ञशालांगङ्गाप्राप्तेतिस्वकीयांस्तुतिमेव ज्ञात्वा। अतएव अक्रुद्धः क्रोधरहितएव जह्नुः । परमाद्भुतं लौकिकविलक्षणं सर्वंगङ्गायाजलं अपिबत् । तेनजह्नोःगङ्गाविषयकप्रीत्यतिशयस्सूचितः । तुशब्दावेवार्थे । यत्तुक्रुद्धइतिच्छित्वागङ्गासंप्रदानककोपंवर्णयन्ति तच्चिन्त्यं । गङ्गायाभगीरथानुगमनशीलत्वेनकोपाविषयत्वात् । भगीरथसंप्रदानककोपावर्णनाच्च ॥ ३९ ॥ इतित्रिचत्वारिंशस्सर्गः ॥ ४३ ॥

[पा०] १ च. छ. ञ. धूतशापाः. २ ङ. झ. तोयेनाथशुभान्विताः. क. ख. च. छ. ञ. तोयेनानेनभास्वता. ट. तोयेनचसुभास्वता. ३ क. च. छ. ञ. स्वर्गलोकंप्रपेदिरे. ४ ख. ङ. च. छ. झ. ञ. बभूवगतकल्मषः. ५ ङ. च. छ. झ. ञ. भगीरथोहि. ६ ख. झ. माश्रितः. ७ ङ. झ. दग्रेमहाराजः. ८ घ. ङ. झ. सर्वांश्चाप्सरसो. ९ क. ट. रथानुगाः. १० ख. ङ. च. छ. झ. ञ. सर्वपापप्रणाशिनी. ११ घ. जह्नोरमिततेजसः. १२ क—ट. क्रुद्धोजह्नुस्तु. ग. क्रुद्धोयज्वाच. घ. ज. क्रुद्धोराजाच. १३ क. ख. घ—ट. अपिबत्तुजलं. १४ क. ख. ततोदेवाश्च. १५ घ. तपोधनाः. १६ घ. ततस्तुष्टोमहाराजः. १७ ङ. झ. मसृजत्प्रभुः. १८ इदमर्धद्वयं ख. च. छ. ञ. दृश्यते. १९ ङ. च. छ. झ. ञ. नपश्यद्गतचेतनः. २० ख. घ. ज. झ. प्लावयत्पूतपाप्मानः.

[ततस्तु गङ्गां प्रतिलभ्य राजा दिलीपसूनुर्गगना···· ।
हृष्टोऽवतार्याशु नृपाच जह्नोः संभावयामास पितामहान्सः] ॥ ४६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

ब्रह्मणाभगीरथंप्रतिसश्लाघंपितामहानांसलिलदानचोदनपूर्वकंस्वलोकगमनम् ॥ १ ॥ भगीरथेनतदनुष्ठानपूर्वकंस्वपुरमेत्य-प्रजापालनेनसुखनिवासः ॥ २ ॥

स गत्वा सागरं राजा गङ्गयाऽनुगतस्तदा ॥ प्रविवेश तलं भूमेर्यत्र ते भस्मसात्कृताः ॥ १ ॥
भस्मन्यथाप्लुते राम गङ्गायाः सलिलेन वै ॥ सर्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत् ॥ २ ॥
तारिता नरशार्दूल दिवं याताश्च देववत् ॥ षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः ॥ ३ ॥
सागरस्य जलं लोके यावत्स्थास्यति पार्थिव ॥ सगरस्यात्मजाँस्तावत्स्वर्गे स्थास्यन्ति देववत् ॥ ४ ॥
इयं हि दुहिता ज्येष्ठा तव गङ्गा भविष्यति ॥ त्वत्कृतेन च नाम्नाऽथ लोके स्थास्यति विश्रुता ॥५॥
गङ्गा त्रिपथगा राजन्दिव्या भागीरथीति च ॥ त्रीन्पथो भावयन्तीति ततस्त्रिपथगा स्मृता ॥ ६ ॥
पितामहानां सर्वेषां त्वमत्र मनुजाधिप ॥ कुरुष्व सलिलं राजन्प्रतिज्ञामपवर्जय ॥ ७ ॥
पूर्वकेण हि ते राजंस्तेनातियशसा तदा ॥ धर्मिणां प्रवरेणापि नैष प्राप्तो मनोरथः ॥ ८ ॥
तथैवांशुमता तात लोकेऽप्रतिमतेजसा ॥ गङ्गां प्रार्थयता नेतुं प्रतिज्ञा नापवर्जिता ॥ ९ ॥
राजर्षिणा गुणवता महर्षिसमतेजसा ॥ मत्तुल्यतपसा चैव क्षत्रधर्मस्थितेन च ॥ १० ॥
दिलीपेन महाभाग तव पित्रातितेजसा ॥ पुनर्न शङ्किता नेतुं गङ्गां प्रार्थयताऽनघ ॥ ११ ॥
सा त्वया समतिक्रान्ता प्रतिज्ञा पुरुषर्षभ ॥ प्राप्तोसि परमं लोके यशः परमसंमतम् ॥ १२ ॥

वयत् । प्राप्ताः सगरपुत्राइतिशेषः ॥ ४५-४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिचत्वारिंशःसर्गः ॥ ४३ ॥

पूर्वसर्गान्तेसंग्रहेणोक्तंविस्तृणीते चतुश्चत्वारिंशे—सगत्वेत्यादि । भूमेस्तलं पातालं । भस्मसात्कृताः सर्वात्मनाभस्मस्वभावापत्तयेसंपादिताः । "विभाषासातिकार्त्स्न्ये" इतिसातिः ॥ १-२ ॥ तारिताः प्रेतभावान्मोचिताः ॥३॥ स्वर्गप्राप्तेर्विशेषंचाह—सागरस्येति ॥ ४ ॥ त्वत्कृतेननाम्ना लोकेविश्रुता ॥ ५ ॥ तदेवनामद्वयंदर्शयन् त्रिपथगाशब्दंव्युत्पादयति—गङ्गेति ॥ ६ ॥ प्रतिज्ञां गङ्गासलिलप्रदानेनसागरांस्तारयिष्यामीतिप्रतिज्ञां । अपवर्जय समापय ॥ ७ ॥ पूर्वकेण सगरेण ॥ ८ ॥ नापवर्जिता नसमापिता ॥९॥ राजर्षिणेतिश्लोकद्वयं । गङ्गांप्रार्थयतापि सापुनर्नेतुंनशङ्किता नविचारितेत्यर्थः ॥ १०-११ ॥ समतिक्रा-

---

ति० भस्मसात्कृताःकार्त्स्न्येनभस्मकृताः ॥ १ ॥ ति० पूर्वकेण सगरेण । एषः गङ्गालाभरूपः । पूर्वकेणेति कप्रत्ययेन एषैवकुत्सा. द्योत्यते ॥ ७ ॥ ति० गङ्गांनेतुंप्रार्थयता सा गङ्गा नेतुंनशकितेत्यर्थः । यत्तुमहेश्वरतीर्थीये गङ्गामानेतुं नशङ्किता नविचारिता प्रतिज्ञेतिशेषः । चिन्ताविषयमपिनप्रापितेत्यर्थइति । तत् प्रार्थयतेतिपदस्वरसविरोधाच्चिन्त्यं ॥ ११ ॥

[पा०] १ इदंपद्यं ख. दृश्यते. २ च. छ. ज. षष्टिपुत्रसहस्राणि. ३ च. छ. झ. ञ. स्सर्वेदिविस्थास्यन्ति. ४ क. ख. इयंचदुहिता. ५ ख. ग. घ. ज. ट. नाम्नावै. ६ क.—ट. त्रिपथगानाम. ७ क. गमयन्तीति. ८ ङ. झ. तस्मात्रिपथगा. ९ क. मपवर्तय. घ. ज. मनुवर्जय १० क. ख.. घ. च. ञ. पूर्वकेणापिते. ११ ज. ट. यशसातथा. १२ क. ख. घ.—ट. प्रवरेणापि. १३ क. ख. घ.—ट. मतावत्स. १४ घ. महाराज. १५ ङ. झ. नशकितानेतुं.

यच्च गङ्गावतरणं त्वया कृतमरिंदम ॥ अनेन च भवान्प्राप्तो धर्मस्यायतनं महत् ॥ १३ ॥
प्लावयस्व त्वमात्मानं नरोत्तम सदोचिते ॥ सलिले पुरुषव्याघ्र शुचिः पुण्यफलो भव ॥ १४ ॥
पितामहानां सर्वेषां कुरुष्व सलिलक्रियाम् ॥ स्वस्ति तेऽस्तु गमिष्यामि स्वं लोकं गम्यतां नृप ॥१५॥
इत्येवमुक्त्वा देवेशः सर्वलोकपितामहः ॥ यथाऽऽगतं तथा गच्छद्देवलोकं महायशाः ॥ १६ ॥
भगीरथोपि राजर्षिः कृत्वा सलिलमुत्तमम् ॥ यथाक्रमं यथान्यायं सागराणां महायशाः ॥ १७ ॥
कृतोदकः शुची राजा स्वपुरं प्रविवेश ह ॥ समृद्धार्थो नरश्रेष्ठ स्वराज्यं प्रशशास ह ॥ १८ ॥
प्रमुमोद च लोकस्तं नृपमासाद्य राघव ॥ नष्टशोकः समृद्धार्थो बभूव विगतज्वरः ॥ १९ ॥
एष ते राम गङ्गाया विस्तरोऽभिहितो मया ॥ स्वस्ति प्राप्नुहि भद्रं ते सन्ध्याकालोतिवर्तते ॥ २० ॥
धन्यं यशस्यमायुष्यं पुत्र्यं स्वर्ग्यमतीव च ॥ यः श्रावयति विप्रेषु क्षत्रियेष्वितरेषु च ॥
प्रीयन्ते पितरस्तस्य प्रीयन्ते दैवतानि च ॥ २१ ॥
इदमाख्यानमव्यग्रो गङ्गावतरणं शुभम् ॥ यः शृणोति च काकुत्स्थ सर्वान्कामानवाप्नुयात् ॥
सर्वे पापाः प्रणश्यन्ति आयुः कीर्तिश्च वर्धते ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

प्रातःकृताह्निकैर्विश्वामित्रादिभिर्नौकयागङ्गामुत्तीर्यउत्तरतटेविशालाख्यनगरीदर्शनम् ॥ १ ॥ विशालावृत्तान्तंपृष्टेनविश्वामित्रेणरामंप्रतितदुपोद्घाततयाक्षीरोदमथनकथाकथनम् ॥ २ ॥

विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः ॥ विस्मयं परमं गत्वा विश्वामित्रमथाब्रवीत् ॥ १ ॥
अत्यद्भुतमिदं ब्रह्मन्कथितं परमं त्वया ॥ गङ्गावतरणं पुण्यं सागरस्यापि पूरणम् ॥ २ ॥

न्तानिस्तीर्णा ॥ १२ ॥ आयतनं प्रतिष्ठां ॥१३॥ प्लावयस्व स्नानंकुर्वित्यर्थः । सदोचिते सदास्नानयोग्ये । अन्यासामेवहिनदीनांरजोदोषइतिभावः ॥ १४ ॥ गम्यतां त्वयापीतिशेषः ॥१५॥ यथाऽऽगतं तथाऽगच्छत् । एकएवेत्यर्थः ॥ १६ ॥ भगीरथइतिश्लोकद्वयं । यथाक्रमं कृतोदकः अन्येषामपीतिशेषः । प्रशशासह प्रशशासचेत्यर्थः ॥ १७ ॥ १८ ॥ विगतज्वरः निरामयइत्यर्थः ॥ १९ ॥ उपसंहरति—एषइति । भद्रंतेस्त्वितिवचनपरिपाटी । सन्ध्याकालोतिवर्तते । इतःपरंनप्रष्टव्यमितिभावः ॥ २० ॥ अथगङ्गावतारश्रावणफलमाह—धन्यमिति । धनादिप्रदमित्यर्थः । सर्वत्रसाधुत्वार्थेयत्प्रत्ययः । इदमाख्यानमित्यनुषज्यते । अर्धत्रयम् ॥ २१ ॥ श्रावयितुःफलमुक्तं संप्रतिश्रोतुःफलमुच्यते । गङ्गावतरणं गङ्गावतरणाख्यं । अर्धत्रयम् ॥२२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुश्चत्वारिंशःसर्गः ॥ ४४ ॥

एवंदशभिःसर्गैर्गङ्गागाङ्गेयसंभववर्णनव्याजेनधातुमोक्षणगङ्गापूतत्वनिमित्तकं देवतान्तरावरत्वं दर्शितं । अथत्रिभिस्सर्गैःमहेन्द्रस्यावरत्वमुपपाद्यते—विश्वामित्रेत्यादि ॥ १ ॥ पूरणं खननेनाभिवर्धनं ॥ २ ॥

ति० धर्मस्यायतनं । धर्मप्राप्यस्थानं महद्ब्रह्मलोकरूपं ॥ १३ ॥ ति० पुण्यफलइति मत्वर्थीयाजन्तोबहुव्रीहिर्वा ॥ १४ ॥ ति० गम्यतां स्वपुरमितिशेषः ॥ १५ ॥ ति० उत्तमं उत्तमलोकप्रापकं ॥ १७ ॥ इतिचतुश्चत्वारिंशस्सर्गः ॥ ४४ ॥

ति० पूरणं गङ्गयेतिशेषः ॥ २ ॥

[पा०] १ ङ. च. छ. झ. ञ. तच्चगङ्गावतरणं. २ क. ख. ङ.—ट. पुरुषश्रेष्ठ. ३ ख. स्वर्लोकं. ञ. स्वलोकं. ४ क. घ. ट. नरश्रेष्ठः. ५ घ. सराज्यं. ६ ख. घ. पौत्र्यं. ७ क. ङ.—ट. स्वर्ग्यमथापिच. ८ ङ. च. छ. झ. ञ. मायुष्यं. ९ क. सर्वेपापाः. ट. सर्वपापानिनश्यन्ति.

क्षणभूतेव नौ रात्रिः संवृत्तेयं महातपः ॥ इमां चिन्तयतस्सर्वां निखिलेन कथां तव ॥ ३ ॥
[संतुष्टं मे मनो ब्रह्मन्नित्युक्त्वा विरराम ह] ॥ तस्य सा शर्वरी सर्वा सह सौमित्रिणा तदा ॥
जगाम चिन्तयानस्य विश्वामित्र कथांशुभाम् ॥ ४ ॥
ततः प्रभाते विमले विश्वामित्रं महामुनिम् ॥ उवाच राघवो वाक्यं कृताह्निकमरिंदमः ॥ ५ ॥
गता भगवती रात्रिः श्रोतव्यं परमं श्रुतम् ॥ ६ ॥
तराम सारितां श्रेष्ठां पुण्यां त्रिपथगां नदीम् ॥ नौरेषा हि सुखास्तीर्णा ऋषीणां पुण्यकर्मणाम् ॥
भगवन्तमिह प्राप्तं ज्ञात्वा त्वरितमागता ॥ ७ ॥
तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ॥ संतारं कारयामास सर्षिसङ्घः सराघवः ॥ ८ ॥
उत्तरं तीरमासाद्य संपूज्यर्षिगणं तदा ॥ गङ्गाकूले निविष्टास्ते विशालां ददृशुः पुरीम् ॥ ९ ॥
ततो मुनिवरस्तूर्णं जगाम सहराघवः ॥ विशालां नगरीं रम्यां दिव्यां स्वर्गोपमां तदा ॥ १० ॥
अथ रामो महाप्राज्ञो विश्वामित्रं महामुनिम् ॥ पप्रच्छ प्राञ्जलिर्भूत्वा विशालामुत्तमां पुरीम् ॥११॥
कतरो राजवंशोऽयं विशालायां महामुने ॥ श्रोतुमिच्छामि भद्रं ते परं कौतूहलं हि मे ॥ १२ ॥
तस्य तद्वचनं श्रुत्वा रामस्य मुनिपुङ्गवः ॥ आख्यातुं तत्समारेभे विशालस्य पुरातनम् ॥ १३ ॥
श्रूयतां राम शक्रस्य कथां कथयतः शुभाम् ॥ अस्मिन्देशे तु यद्वृत्तं तदपि शृणु राघव ॥ १४ ॥
पूर्वं कृतयुगे राम दितेः पुत्रा महाबलाः ॥ अदितेश्च महाभाग वीर्यवन्तः सुधार्मिकाः ॥ १५ ॥
ततस्तेषां नरश्रेष्ठ बुद्धिरासीन्महात्मनाम् ॥ अमरा अजराश्चैव कथं स्याम निरामयाः ॥ १६ ॥
तेषां चिन्तयतां राम बुद्धिरासीन्महात्मनाम् ॥ क्षीरोदमथनं कृत्वा रसं प्राप्स्याम तत्र वै ॥ १७ ॥

क्षणभूतेवनौरात्रिरितिश्लोको गताभगवतीत्यर्धोत्परमनुसन्धेयः ॥३॥ क्षणभूतेव जगामेत्यर्थः ॥ ४ ॥ विमले प्रभाते सम्यक्प्रभातइत्यर्थः ॥ ५ ॥ गतेत्यर्धत्रयं । भगवती सत्कथायुक्तत्वात्पूज्या ॥ ६ ॥ तरामेत्यर्धत्रयं । ऋषीणांनौः ऋषितरणार्हा नौः ॥ ७ ॥ सराघवःसर्षिसङ्घः । कारयामास अकरोत् । स्वार्थेणिच् ॥ ८ ॥ ऋषिगणं नौतारणार्थआगतं । संपूज्य पूजापूर्वकंनिवर्त्य । निविष्टाः क्षणंस्थिताः ॥ ९ ॥ विशालां प्रतीतिशेषः ॥ १० ॥ विशालां विशालामाहात्म्यं ॥ ११ ॥ विशालायांवर्तमानो राजवंशःकतरइति द्वितीयःप्रश्नः ॥ १२ ॥ विशालस्य विशालाख्यनगरस्य । पुरातनं कर्म प्रथमपृष्टंवैभवं । आख्यातुंसमारेभे ॥ १३ ॥ अस्मिन्देशेयद्वृत्तंतच्छृणु । तच्छेषतयाशक्रस्यकथांकथयतोमत्तःश्रूयतां ॥ १४ ॥ पूर्वं कृतयुगे दितेःपुत्रामहाबलाआसन् । अदितेःपुत्रावीर्यवन्तोधार्मिकाश्चासन् ॥ १५ ॥ म्रियन्तइतिमराः पचाद्यच् । अमराः मरणरहिताः । अजराः जरारहिताः । तेषां देवासुराणां ॥ १६ ॥ रसं अमृतं । तत्र क्षीरोदे

ति० विश्वामित्रेतिसंबोधनं । उक्तस्यैवादरातिशयबोधनायपुनरुपादानम् ॥७॥ **ति०** कारयामास नाविकैरितिशेषः ॥ ८ ॥ **ति०** विशालस्येतिपाठेतन्नगरीनिर्माताराजाविशालोनाम ॥ १३ ॥ **ति०** शक्रस्यकथां विशालवैभवप्रतिपादिकांकथांकथयतस्सकाशान्मयाश्रुताम् ॥ १४ ॥ **वि०** रसं अमृतरूपंरसायनम् ॥ १७ ॥

[पा०] १ ङ. सारात्रिः. २ ङ. झ. परंतप. ३ इदमर्धं ज. ट. दृश्यते. ४ झ. ममसौमित्रिणासह. ५ ङ. च. छ. झ. तपोधनम्. ६ झ. परमाद्भुतम्. ७ ख. गंगांत्रिपथगां. ८ ङ. झ. ञ. सर्षिसंघस्यकौशिकः. ९ क. ख. घ.—ट. गणंततः. १० क. मुनिवरश्रेष्ठः. ११ ग. घ. सौम्यां. १२ क. ट. महाप्राज्ञं. १३ ङ. झ. कतमो. १४ ख. ज. झ. विशालायाःपुरातनम्. १५ झ. कथयतश्श्रुताम्. १६ क. च. ट. तांमेनिगदतोवत्सश्रृणुतत्वेनराघव. ङ. च. छ. झ. ञ. अस्मिन्देशेहि. क. ग. घ. ज. अस्मिन्हिदेशे. १७ क. ग. ङ—ट. नरव्याघ्र. घ. महाभाग. १८ ख. अमरानिर्जराश्चैव. क. घ—ज. ञ. विज्वराश्चैव. झ. ट. विजराश्चैव. १९ ङ. झ. चिन्तयतांतत्र. २० क. ख. ङ—ट. रासीद्विपश्चिताम्.

ततो निश्चित्य मथनं योक्त्रं[1] कृत्वा च वासुकिम् ॥ मन्थानं मन्दरं कृत्वा ममन्थुरमितौजसः ॥१८॥
[*अथ[2] वर्षसहस्रेण योक्त्रसर्पशिरांसि च ॥ वमन्त्यतिविषं[3] तत्र ददंशुर्दशनैः शिलाः ॥ १९ ॥
उत्पपाताग्निसंकाशं हालाहलमहाविषम् ॥ तेन दग्धं जगत्सर्वं सदेवासुरमानुषम् ॥ २० ॥
अथ देवा महादेवं शंकरं शरणार्थिनः ॥ जग्मुः पशुपतिं रुद्रं त्राहित्राहीति तुष्टुवुः ॥
एवमुक्तस्ततो देवैर्देवदेवेश्वरः प्रभुः ॥ २१ ॥
प्रादुरासीत्ततोऽत्रैव शङ्खचक्रधरो हरिः ॥ उवाचैनं स्मितं कृत्वा रुद्रं शूलभृतं[4] हरिः ॥ २२ ॥
दैवतैर्मथ्यमाने तु यत्पूर्वं[5] समुपस्थितम् ॥ तत्त्वदीयं सुरश्रेष्ठ सुराणामग्रजोसि यत् ॥ २३ ॥
अग्रपूजामिमां[6] मत्वा गृहाणेदं [7]विषं प्रभो ॥ इत्युक्त्वा च सुरश्रेष्ठस्तत्रैवान्तरधीयत ॥ २४ ॥
देवतानां भयं दृष्ट्वा श्रुत्वा वाक्यं तु शार्ङ्गिणः ॥ हालाहलविषं[8] घोरं स जग्राहामृतोपमम्[9] ॥२५॥
देवान्विसृज्य देवेशो जगाम भगवान्हरः ॥ ततो देवासुराः सर्वे ममन्थू रघुनन्दन ॥ २६ ॥
प्रविवेशाथ पातालं मन्थानः [10]पर्वतोऽनघ ॥ ततो देवाः सगन्धर्वास्तुष्टुवुर्मधुसूदनम् ॥ २७ ॥
त्वं गतिः सर्वभूतानां विशेषेण दिवौकसाम् ॥ पालयास्मान्महाबाहो गिरिमुद्धर्तुमर्हसि ॥ २८ ॥
इति श्रुत्वा हृषीकेशः कामठं रूपमास्थितः ॥ पर्वतं पृष्ठतः कृत्वा शिश्ये तत्रोदधौ हरिः ॥ २९ ॥
[11]पर्वताग्रं तु लोकात्मा हस्तेनाक्रम्य केशवः ॥ देवानां मध्यतः स्थित्वा ममन्थ पुरुषोत्तम ॥ ३० ॥
उदतिष्ठत्स धर्मात्मा आयुर्वेदमयः पुमान्] ॥ ३१ ॥
अथ वर्षसहस्रेण सदण्डः सकमण्डलुः ॥ [12]पूर्वं धन्वन्तरिर्नाम अप्सराश्च सुवर्चसः ॥ ३२ ॥
अप्सु निर्मथनादेव [13]रसस्तस्माद्वरस्त्रियः ॥ उत्पेतुर्मनुजश्रेष्ठ तस्माद्[14]प्सरसोऽभवन् ॥ ३३ ॥

॥ १७ ॥ योक्त्रं मथनरज्जुं । मन्थानं मथनदण्डं ॥ १८—३१ ॥ धन्वन्तरिरुत्पपात अप्सराश्च उत्पेतुरितिशेषः । आकारान्तत्वमार्षं ॥ ३२ ॥ अप्सरश्शब्दंनिर्वक्ति । अत्रापूशब्देनतद्विकारभूतंक्षीरमुपलक्ष्यति०

योक्त्रसर्पोमन्थानरज्जुभूतस्सर्पः । वमन्तइतिपुंस्त्वमार्षं । अतिअतिशयितंविषं ॥ १९ ॥

[पा०] १ क. कृत्वायोक्त्रंच. * कुण्डलान्तर्गतपाठस्थाने. क. ख. पुस्तकयोरयंपाठोदृश्यते—

अथ दीर्घेण कालेन कालाग्निसदृशं विषम् । उदतिष्ठन्नरश्रेष्ठ हालाहलमिति श्रुतम् ॥ १ ॥
सुरासुराश्च वित्रस्ता दग्धास्तेन विषाग्निना । शरण्यं शरणं जग्मुर्भगवन्तं महेश्वरम् ॥ २ ॥
कृत्वाऽल्पपिण्डं पाणिस्थं तद्विषं भगवान्हरः । सर्वलोकहितार्थाय भगवान्परमेश्वरः ॥ ३ ॥
कण्ठस्थमकरोत्प्राश्य लीलया लोकपूजितः । प्रणम्य विज्वरा जग्मुर्देवदेवं वृषध्वजम् ॥ ४ ॥
मन्दरं पूर्ववत्कृत्वा ममन्थुरमितौजसः । ततः पर्वतमूलं तु पातालं तु प्रवेशितम् ॥ ५ ॥
सुरासुराश्च निश्चेष्टा बभूवुः क्लेशविक्लवाः । देवदुःखनिवृत्त्यर्थमागतः पुरुषोत्तमः ॥ ६ ॥
भयं त्यजत भद्रं व उद्धरिष्याम्यहं गिरिम् । इत्युक्त्वा कूर्मरूपेण विवेश क्षीरवारिधौ ॥ ७ ॥
मन्दरं पृष्ठतः कृत्वा ववृधे कूर्मरूपधृत् । सुरासुरैरनाक्रान्तमुद्धृतोऽथ नरोत्तम ॥ ८ ॥
नगाग्रं पीडयामास वामहस्तेन माधवः । ममन्थ देवतानां च मध्ये नारायणो हरिः ॥ ९ ॥
अथ वर्षसहस्रेण ज्येष्ठा नाम वराङ्गना । उत्पपात वरारोहा सागरैरेव कल्पिता ॥ १० ॥
अभवत्पारिजाताख्यो वृक्ष इन्द्राय कल्पितः ॥ ११ ॥

२ एतदादयःकुण्डलान्तर्गतास्त्रयोदशश्लोकाः. ङ—ट. पाठेषुदृश्यन्ते. ३ ङ—ट. वमन्तोतिविषं. ४ ङ. च. छ. झ. ञ. शूलधरं हरिः. ५ ङ. ज. झ. ट. अग्रतोह्यियत्. ६ ङ—ट. अग्रपूजामिहस्थिला. ७ ट. विषंविभो. ८ ङ. छ. ज. झ. ञ. हालाहलंविषं. ९ ङ—ट. संजग्राहामृतोपमम्. १० ङ. झ. ञ. ट. मन्थानःपर्वतोत्तमः. ११ च. छ. ज. पर्वताग्रेतु. १२ ङ. च. छ. झ. ञ. ट. अथधन्वन्तरिर्नाम. ज. धन्वन्तरीराम. घ. धन्वन्तरिस्समुत्तस्थावप्सराश्च. १३ ख.—ट. रसात्तस्माद्वरस्त्रियः. क. ततस्तस्माद्वरस्त्रियः. १४ ख. दप्सरसस्स्मृताः.

षष्टिः कोट्योऽभवंस्तासामप्सराणां सुवर्चसाम् ॥ असंख्येयास्तु काकुत्स्थ यास्तासां परिचारिकाः ॥३४॥
न ताः स्म प्रतिगृह्णन्ति सर्वे ते देवदानवाः ॥ अप्रतिग्रहणादेव तेन साधारणाः स्मृताः ॥ ३५ ॥
वरुणस्य ततः कन्या वारुणी रघुनन्दन ॥ उत्पपात महाभागा मार्गमाणा परिग्रहम् ॥ ३६ ॥
दितेः पुत्रा न तां राम जगृहुर्वरुणात्मजाम् ॥ अदितेस्तु सुतो वीर जगृहुस्तामनिन्दिताम् ॥३७॥
असुरास्तेन दैतेयाः सुरास्तेनादितेः सुताः ॥ हृष्टाः प्रमुदिताश्चासन्वारुणीग्रहणात्सुराः ॥ ३८ ॥
उच्चैःश्रवा हयश्रेष्ठो मणिरत्नं च कौस्तुभम् ॥ [उदतिष्ठन्नरश्रेष्ठ सोमदेवस्तथैव च ॥ ३९ ॥
तुरगं देवराजाय कौस्तुभं केशवाय च ॥ धन्वन्तरिर्महातेजा लोकरक्षणतत्परः ॥ ४० ॥
आयुर्वेदमयो राम तथा साधारणः स्मृतः ॥ सुरासुराश्च गन्धर्वाः क्षोभयामासुरंबुधिम् ॥ ४१ ॥
ततो दीर्घेण कालेन चोत्पन्ना कमलालया ॥ अतीव रूपसंपन्ना प्रथमे वयसि स्थिता ॥ ४२ ॥
सर्वाभरणपूर्णाङ्गी सर्वलक्षणलक्षिता ॥ मकुटाङ्गदचित्राङ्गी नीलकुञ्चितमूर्धजा ॥ ४३ ॥
तप्तहाटकसंकाशा मुक्ताभरणभूषिता ॥ चतुर्भुजा महादेवी पद्महस्ता वरानना ॥ ४४ ॥
सा च देवी तथोत्पन्ना पद्मा श्रीर्लोकपूजिता ॥ सा पद्मा पद्मनाभस्य ययौ वक्षस्स्थलं हरेः] ॥४५॥
उदतिष्ठन्नरश्रेष्ठ तथैवामृतमुत्तमम् ॥ ४६ ॥
अथ तस्य कृते राम महानासीत्कुलक्षयः ॥ अदितेस्तु ततः पुत्रा दितेः पुत्रानसूदयन् ॥ ४७ ॥
एकतोऽभ्यागमन्सर्वे ह्यसुरा राक्षसैस्सह ॥ युद्धमासीन्महाघोरं वीर त्रैलोक्यमोहनम् ॥ ४८ ॥
यदा क्षयं गतं सर्वं तदा विष्णुर्महाबलः ॥ अमृतं सोहरत्तूर्णं मायामास्थाय मोहिनीम् ॥ ४९ ॥
ये गताऽभिमुखं विष्णुमक्षयं पुरुषोत्तमम् ॥ संपिष्टास्ते तदा युद्धे विष्णुना प्रभविष्णुना ॥ ५० ॥

ते । अप्सुयन्निर्मथनंतस्माद्घोरसस्तस्माद्रसाद्यतउत्पेतुस्तस्मादप्सरसोऽभवन् । पृषोदरादित्वात्साधुः ॥३३॥ तासां प्रधानभूतानां ॥३४॥ नताःस्मप्रतिगृह्णन्ति नासाधारण्येनप्रतिगृह्णन्तिस्मेत्यर्थः । कुतः अप्रतिग्रहणात् कोवाममपतिरितिमार्गणाकरणादित्यर्थः । तेन असाधारण्येनपरिग्रहाकरणेन ॥३५॥ वरुणस्य समुद्राधिदेवतायाः । वारुणी सुराधिदेवता । परिग्रहं ममेयमितिपरिग्रहस्यकर्तारं ॥३६–३७॥ प्रसङ्गात्सुरासुरशब्दौनिर्वक्ति—असुराइति । तेन सुरायाः परिग्रहणेन । सुराः अर्शआदित्वादजन्तः । पिष्टादिविकृतिरेवसुरानिन्द्या । हृष्टाः पुलकिताः ॥३८—४५॥ उत्तमं पूर्वोत्पन्नेभ्यःश्रेष्ठं ॥४६॥ तस्यकृते अमृतस्यग्रहणार्थमित्यर्थः । कुलक्षयः उभयपक्षेपिसञ्जातविनाशः । तदेवोपपादयति—अदितेरित्यादिना ॥ ४७ ॥ अनन्तरमसुराः । एकतः एकतां । अभ्यागमन् । बलवृद्धयइतिभावः ॥ ४८ ॥ मोहिनीं काममोहजननीं । मायां आश्चर्यशक्तिं । आस्थाय अवलंब्य स्वमाययाद्भुतयोषिदाकृतिंपरिगृह्य । तद्रूपेणतानवञ्चयित्वातेभ्योमृतमहरदित्यर्थः । यद्वा सर्वमोहकरीमन्तर्धानशक्तिमास्थायामृतमाहरदित्यर्थः । पुराणान्तरवृत्तान्तःकल्पभेदेनेतिबोध्यम् ॥ ४९ ॥ अत्रसन्धिरार्षः । येअसुराः अक्षयं अस्तिजायतेपरिणमतेविवर्धतेअपक्षीयतेविनश्यतीत्युक्तषड्भावबि-

शि० तेन देवासुरसमूहेन तासामप्रतिग्रहणादेव तास्साधारणास्स्मृताः । ताइत्युभयान्वयि ॥ ३५ ॥ ति० अदितिसुतांगीकारेहेतुः—अनिन्दितामिति । निषेधशास्त्रंतुमानुषविषयं ॥ ३७ ॥ शि० तत्रासुरशब्देबहुव्रीहिः । सुरशब्दोर्शआद्यजन्तः । एतदनुरोधेन "अथासीद्वारुणीदेवीकन्याकमललोचना । असुराजगृहुस्तांवैहरेरनुमतेनते" इतिभागवतस्यलयमर्थः । हरेरनुमतेस्थिताअसुराःतांवारुणींकन्यांनजगृहुः सुराएवजगृहुरित्यर्थः । किंचअसुराःजगृहुःसुरैर्ग्राहयामासुरिति ॥ ३८ ॥ ति० अत्रममन्थुरमितौजसइतिश्लोकानन्तरं "अथवर्ष–"इत्यादि "आयुर्वेदमयःपुमान्" इत्यन्तत्रयोदशश्लोकाःप्रक्षिप्ताइतिबहवः ।

[पा०] १ ङ. झ. ग्रहणादेवतावै. ग. घ. ग्रहणाचैव. क. ग्रहणाच्चेति. २ क. ज. ट. सुराराम. ३ क. उच्चैश्श्रवास्तुतुरगः. ज. ट. उच्चैश्श्रवाहरिश्रेष्ठो. ४ एतत्कुण्डलान्तर्गतंसार्धश्लोकषट्कं क. ख. च. छ. पुस्तकेषुदृश्यते. ५ ख. ममन्थुःक्षीरवारिधिम्. ६ ख. लोकविश्रुता. ७ ङ. च. छ. झ. ञ. दितिपुत्रानयोधयन्. ८ ङ. झ. ञ. एकतामगमन्सर्वे. क. घ. ज. ट. एकतोभ्यगमन्. ९ ज. ह्यमराराक्षसैस्सह. १० क. ख. च. छ. येतदाभिमुखं. ११ ङ. झ. मक्षरंपुरुषोत्तमम्.

अदितेरात्मजा वीरा दितेः पुत्रान्निजघ्निरे ॥ तस्मिन्युद्धे महाघोरे दैतेयादित्ययोर्भृशम् ॥ ५१ ॥
निहत्य दितिपुत्रांश्च राज्यं प्राप्य पुरंदरः ॥ शशास मुदितो लोकान्सर्षिसङ्घान्सचारणान् ॥ ५२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सुरनिहतपुत्रयादित्याभर्तारंकश्यपंप्रतिइन्द्रहन्तृपुत्रप्रदानप्रार्थना ॥ १ ॥ इन्द्रेणभर्तृचोदनयापुत्रार्थंतपश्चरन्त्यादितेःशुश्रूषणम् ॥ २ ॥ कदाचनदिवास्वपन्त्यास्तस्याउदरंप्रविष्टेनेन्द्रेणसप्तधातद्गर्भविभेदनम् ॥ ३ ॥ ततःप्रतिबुद्धांतांप्रतिइन्द्रेणस्वापराधक्षमापनम् ॥ ४ ॥

हतेषु तेषु पुत्रेषु दितिः परमदुःखिता ॥ मारीचं कश्यपं राम भर्तारमिदमब्रवीत् ॥ १ ॥
हतपुत्राऽस्मि भगवंस्तव पुत्रैर्महाबलैः ॥ शक्रहन्तारमिच्छामि पुत्रं दीर्घतपोर्जितम् ॥ २ ॥
साऽहं तपश्चरिष्यामि गर्भं मे दातुमर्हसि ॥ [बलवन्तं महेष्वासं स्थितिज्ञं समदर्शिनं] ॥
ईश्वरं शक्रहन्तारं त्वमनुज्ञातुमर्हसि ॥ ३ ॥
तस्यास्तद्वचनं श्रुत्वा मारीचः काश्यपस्तदा ॥ प्रत्युवाच महातेजा दितिं परमदुःखिताम् ॥ ४ ॥
एवं भवतु भद्रं ते शुचिर्भव तपोधने ॥ जनयिष्यसि पुत्रं त्वं शक्रहन्तारमाहवे ॥ ५ ॥
पूर्णे वर्षसहस्रे तु शुचिर्यदि भविष्यसि ॥ पुत्रं त्रैलोक्यभर्तारं मत्तस्त्वं जनयिष्यसि ॥ ६ ॥

कारैःशून्यं । पुरुषोत्तमं सर्वपुरुषेषूत्तमं । विष्णुंअभिमुखंगताः अभिमुखतयाप्रातिकूल्येनगताः । ते विष्णुना संपिष्टाः चूर्णिताः । संविष्टाइतिपाठेयेअमुमभिमुखंगताः शरणागताःदेवाः तेयुद्धे संविष्टाःआविष्टाःआप्यायितबलाआसन्नित्यर्थः ॥५०॥ दितेःपुत्रान् अवशिष्टानितिशेषः । यद्वा अदितेरात्मजाआप्यायितबलाःसन्तःतस्मिन्दैतैयादित्ययोर्देवासुरयोर्युद्धेअसुरान्निजघ्निरे ॥ ५१ ॥ चकारादमृतमपीत्यर्थः । अस्मिन्सर्गेद्वात्रिंशच्छ्लोकाः अन्येकल्पिताः । यद्यप्यत्रकालकूटाद्युत्पत्तिरपेक्षिता तथाप्युत्तरकथाशेषत्वेनसर्वासुरक्षयएवप्रधानतयोपात्तइतिबोध्यम् ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

विष्णुपक्षविरोधेमहानपियत्नोविफलःस्यादित्याह षट्चत्वारिंशे—हतेष्वित्यादि । मारीचं मरीचिपुत्रं ॥१॥ तपोर्जितं तपसाऊर्जितं दृढं । आर्षःसन्धिः ॥ २ ॥ गर्भं पुत्रं । ईश्वरं त्रैलोक्यनियन्तारं । ईदृशमितिपाठेप्ययमर्थोविवक्षितः । अनुज्ञातुं तपइतिशेषः । भर्त्रनुज्ञांविनातपसिस्त्रियाअस्वातन्त्र्यादितिभावः ॥ ३–४ ॥ शुचिर्भव यावत्पुत्रोत्पत्तीतिशेषः ॥ ५ ॥ मत्तः मदनु-

---

अमृतदानराहुशिरश्छेदाद्यवर्णनवत् हालाहलोत्पत्त्याद्यवर्णनमितितदाशयः ॥ ५० ॥ **शि०** अत्रास्मिन्सर्गेद्वात्रिंशच्छ्लोकाः अन्येकल्पिताइतिभूषणकृद्भिरुक्तं तत्रान्येषांकल्पितत्वमूलयुक्तेरभावात् श्लोकार्थानामबाधकत्वाच्च भारतादिप्रसिद्धविषयबोधकत्वाच्च सर्वपुस्तकेषूपलंभाच्च तदप्रमाणमितिप्रामाणिकाः । अतएवममन्धुरमितौजसइतिश्लोकानन्तरंअथवर्षेत्यादिआयुर्वेदमयःपुमानित्यन्तं त्रयोदशश्लोकाःप्रक्षिप्ताइत्यादिनात्रयोदशानामेवप्रक्षिप्तत्वंभट्टैरुक्तं । तन्मतेऽप्येकोनविंशतेःश्लोकानांकल्पितत्वाभाववत्त्वंसिद्धमेव । उक्तत्रयोदशश्लोकानांकल्पितत्वेपिप्रमाणमलब्ध्वाबहवइत्युक्तं तेनतन्मतेपिसर्वेषांकल्पितत्वाभाववत्त्वमर्थतःफलितं । अतएवतीर्थादिव्याख्यासुकल्पितत्वप्रसङ्गानुत्थानमितिदिक् ॥ ५२ ॥ इतिपञ्चचत्वारिंशस्सर्गः ॥ ४५ ॥

शि० दीर्घतपोर्जितं दीर्घतपेनराज्यविषयकात्यन्तज्ञानेन ऊर्जितं प्रवृद्धं । आलोचनार्थकतपधातोः अच् ॥ २ ॥ **ति०** त्रैलो-

[पा०] १ ङ. च. छ. झ. ञ. अस्मिन्घोरेमयायुद्धे. क. घ. ट. तस्मिन्घोरेमहायुद्धे. २ क. ग—झ. ट. दितिपुत्रांस्तु— ख. दितिपुत्रांस्तान्. ३ क. तदाराज्यं. ४ ङ. च. छ. झ. ञ. महात्मभिः. घ. महारथैः. ५ ग. पुत्रंमेदातु. ६ इदमर्धं ग. ज. दृश्यते. ७ क. ग. घ—ञ. ईदृशंशक्र. ८ ग. तपोधना. ९ ङ. ज. झ—ट. त्रैलोक्यहन्तारं. घ. छ. त्रैलोक्यहर्तारं.

एवमुक्त्वा महातेजाः पाणिना [1]सं ममार्ज ताम् ॥ [2]समालभ्य ततः स्वस्तीत्युक्त्वा स तपसे ययौ ॥७॥
गते तस्मिन्नरश्रेष्ठ दितिः परमहर्षिता ॥ [3]कुशप्लवनमासाद्य तपस्तेपे सुदारुणम् ॥ ८ ॥
तपस्तस्यां हि कुर्वन्त्यां परिचर्यां चकार ह ॥ सहस्राक्षो नरश्रेष्ठ परया गुणसम्पदा ॥ ९ ॥
अग्निं कुशान्काष्ठमपः फलं मूलं तथैव च ॥ न्यवेदयत्सहस्राक्षो यच्चान्यदपि काङ्क्षितम् ॥ १० ॥
[4]गात्रसंवहनैश्चैव श्रमापनयनैस्तथा ॥ शक्रः सर्वेषु कालेषु दितिं परिचचार ह ॥ ११ ॥
[5]अथ वर्षसहस्रे तु दशोने रघुनन्दन ॥ [6]दितिः परमसंप्रीता सहस्राक्षमथाब्रवीत् ॥ १२ ॥
*याचितेन सुरश्रेष्ठ [7]पित्रा तव महात्मना ॥ वरो वर्षसहस्रान्ते [8]मम दत्तः सुतं प्रति ॥ १३ ॥
तपश्चरन्त्या वर्षाणि दश वीर्यवतां वर ॥ अवशिष्टानि भद्रं ते भ्रातरं द्रक्ष्यसे ततः ॥ १४ ॥
[9]तमहं त्वत्कृते [10]पुत्रं [11]समाधास्ये जयोत्सुकम् ॥ त्रैलोक्य[12]विजयं पुत्रं सह भोक्ष्यसि विज्वरः ॥ १५ ॥
एवमुक्त्वा [13]दितिः शक्रं प्राप्ते मध्यं [14]दिवाकरे ॥ निद्रयाऽपहृता देवी पादौ कृत्वाऽथ शीर्षतः ॥१६॥
दृष्ट्वा तामशुचिं शक्रः [15]पादतः कृतमूर्धजाम् ॥ [16]शिरःस्थाने कृतौ पादौ जहास च मुमोद च ॥१७॥

प्रह्वादित्यर्थः ॥ ६ ॥ ममार्जेत्याश्वासनप्रकारः । ततः मार्जनानन्तरं । उदरं समालभ्य स्वस्ति पुत्रोत्पत्तिरूपंशुभं भवत्वित्युक्त्वानुगृह्य । सः काश्यपस्तपसेययौ ॥७॥ कुशप्लवनं विशालायाः पूर्वस्थानं ॥८॥ गुणसम्पदा विनयादिसमृद्ध्या ॥९॥ अग्निमिति परिचर्याप्रकारः ॥ १० ॥ मातृत्वात् गात्रसंवहनानि । श्रमापनयनैः व्यजनवीजनादिभिरितिशेषः ॥ ११ ॥ दशोने दशवर्षोने ॥ १२ ॥ शुश्रूषाकृतप्रीत्यतिशयाद्वैरंविस्मृतवतीतिभावः ॥ १३ ॥ ततः दशवर्षान्ते ॥ १४ ॥ समाधास्ये विगतवैरंभ्रातृस्नेहवंतमेवकरिष्यामीत्यर्थः । त्रैलोक्यविजयं त्वद्भ्रातृकृतमितिशेषः । अमोघभर्त्रनुग्रहेणाप्रतिबन्धसुतोत्पत्तिंमन्वाना ऋजुतयाशुश्रूषाफलमुक्तवती ॥ १५ ॥ मध्यं गगनमध्यं । शीर्षतः शिरसि । पादौकृत्वा स्थितेतिशेषः । मध्याह्नेशयनपरिग्रहप्रसङ्गाभावेनासनएवोपविशन्त्यास्तस्यानिद्रापारवश्येननम्रंशिरःपादयोःसंसक्तमभवदित्यर्थः ॥ १६ ॥ पादतःकृतमूर्धजां पादौकृत्वाथशीर्षतइत्यस्यविवरणं । अतएव अशुचिं तां दृष्ट्वा शिरस्स्थानेकृतौपादो शिरस्स्पृष्टौपादाविति । मुमोद तेन जहासच । यद्वा प्राप्तेमध्यंदिवाकर इत्यनेन दिवास्वापरूपाशौचंदर्शितं ।

क्यहन्तारं तदधिपशक्रहन्तारं । **शि०** त्रैलोक्यहन्तारं त्रिलोकीहननसमर्थं पुत्रंमत्तस्त्वंजनयिष्यसि । त्रैलोक्यहन्तारमित्यनेनयदित्रिलोकहननयोग्यस्सः तर्हीन्द्रहननयोग्यइतिकिंवक्तव्यमितिकाव्यार्थापत्तिरलङ्कारोध्वनितः । किंच त्रैलोक्यंनियम्यत्वेनास्यास्तीतित्रैलोक्यइन्द्रः । किंचत्रिलोक्याअयंस्वामीत्रैलोक्यः । "तस्येदं"इत्यण् । "यस्येतिच" इतिलोपाभावस्तु संज्ञापूर्वकविधेरनित्यत्वात् ॥ ६ ॥ **ति०** संममार्जतादृशपुत्रोत्पत्तिप्रतिबन्धकीभूतदुरितध्वंसार्थंमार्जनंचकारेत्यर्थः । अथतामालभ्यस्पृष्ट्वा ॥ ७ ॥ **शि०** अथइदंअब्रवीत् । अथशब्दइदमर्थे ॥ १२ ॥ **ति०** तमाधास्ये हेपुत्र यंपुत्रमहंत्वत्कृतेत्वन्नाशार्थंयाचितवती । तं तवजयोत्सुकमाधास्ये विगतवैरंभ्रातृस्नेहवन्तमेवकरिष्यइत्यन्वयः ॥ १५ ॥ **शि०** पादौशीर्षतः शिरस्स्थापनोचितदेशेदक्षिणेपूर्वेवाकृत्वा निद्रयाअपहृता अपहृतबुद्धिरासीदितिशेषः । अथशब्देनपादयोर्मूर्धजांश्चकृत्वेत्यर्थः ॥ १६ ॥ **शि०** ययाशिरस्स्थानेपादौकृतौतांपादयोःकृतमूर्धजांअतएवाशुचिंतांदितिं शक्रोदृष्ट्वाजहाससमुमोदच । जहासेत्यनेन एतावन्तंश्रमंकृत्वापि "सहभोक्ष्यसिविज्वरः" इत्याशीर्वादोमात्रादत्तइतिस्मृतिर्व्यञ्जिता । पादयोर्मूर्धजस्पर्शस्यपूर्वदक्षिणयोःपादस्थापनस्यचाशुचित्वकारणत्वंधर्मशास्त्रादौप्रसिद्धम् ॥ १७ ॥ इतिषट्चत्वारिंशस्सर्गः ॥ ४६ ॥

[पा०] १ ङ—ट. संममार्जताम्. २ ङ. झ. तामालभ्यततः. ज. ट. समालंब्य. क. च. ञ. समालभ्यस्वभवनंजगामसमहानृषिः. ख. समालभ्यस्वभवनंजगामसहसाऋषिः. ग. स्वस्तीत्युक्त्वाच. ३ ख. ङ—ञ. कुशप्लवंसमासाद्य. ४ क. ग. घ. ङ. छ. झ. ञ. ट. गात्रसंवाहनै. ५ ङ. झ. ट. पूर्णेवर्षसहस्रेसा. च. छ. ञ. पूर्णवर्षसहस्रेसा. घ. ज. अथवर्षसहस्रेसा. ६ ङ—ट. दितिःपरमसंहृष्टा. घ. परमसुप्रीता. * अयंश्लोकः ङ. च. छ. झ. ञ. पुस्तकेषुतमहमितिश्लोकात्परतोदृश्यते. ७ ग. घ. ज. तवपित्रा. ८ क—घ. दत्तोममसुतं. ९ ङ. झ. ट. यमहंत्वत्कृते. १० क. ख. ग. ङ. ज. झ. पुत्र. ११ ङ. झ. तमाधास्ये. क. च. छ. समाधंत्स्ये. १२ क. ख. घ. च. छ. झ. ञ. ट. विजयंपुत्र. १३ ख. घ. च. छ. ञ. ट. दितिस्तत्र. १४ ङ. झ. ञ. ट. दिनेश्वरे. १५ ङ. च. छ. झ. ञ. ट. पादयोःकृतमूर्धजाम्. १६ क. शीर्षोपधानेपादौच.

तस्याः शरीरविवरं विवेश[1] च पुरंदरः ॥ गर्भं च सप्तधा राम बिभेद[2] परमात्मवान् ॥ १८ ॥
भिद्यमानस्ततो गर्भो वज्रेण शतपर्वणा ॥ रुरोद सुस्वरं[3] राम ततो दितिरबुध्यत ॥ १९ ॥
मारुदो मारुदश्चेति गर्भं शक्रोऽभ्यभाषत ॥ बिभेद च महातेजा रुदन्तमपि वासवः ॥ २० ॥
न[4] हन्तव्यो न हन्तव्य इत्येवं दितिरब्रवीत् ॥ निष्पपात ततः शक्रो मातुर्वचनगौरवात् ॥ २१ ॥
प्राञ्जलिर्वज्रसहितो दितिं शक्रोऽभ्यभाषत ॥ अशुचिर्देवि सुप्तासि पादयोः कृतमूर्धजा ॥ २२ ॥
तदन्तरमहं लब्ध्वा शक्रहन्तारमाहवे ॥ अभिदं[5] सप्तधा देवि तन्मे त्वं क्षन्तुमर्हसि ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

इन्द्रेणसप्तानांगर्भच्छेदानांदितिवचनाद्वायुस्कन्धसप्तकस्थानपालकत्वकल्पनम् ॥ १ ॥ विश्वामित्रेणैवमुपोद्घातकथनेनतस्मिन्नेवदितितपश्चरणदेशेइक्ष्वाकुसूनुनाविशालेनविशालाख्यपुरनिर्माणकथनपूर्वकमद्यतनस्यसुमतिनाम्नोराज्ञोविशालवंश्यत्वकथनम् ॥ २ ॥ सुमतिनाराज्ञाविश्वामित्रमुपगम्यसादरपूजनम् ॥ ३ ॥

सप्तधा तु कृते गर्भे दितिः परमदुःखिता ॥ सहस्राक्षं दुराधर्षं वाक्यं सानुनयाऽब्रवीत् ॥ १ ॥
ममापराधाद्गर्भोऽयं सप्तधा विफलीकृतः[6] ॥ नापराधोस्ति[7] देवेश तवात्र बलसूदन ॥ २ ॥
प्रियं[8] तु कर्तुमिच्छामि मम गर्भविपर्यये ॥ मरुतां सप्त सप्तानां[9] स्थानपाला भवन्त्विमे[10] ॥ ३ ॥
वातस्कन्धा इमे[11] सप्त चरन्तु दिवि पुत्रक[12] ॥ मारुता इति विख्याता दिव्यरूपा ममात्मजाः ॥४॥
ब्रह्मलोकं चरत्वेक इन्द्रलोकं तथाऽपरः ॥ दिवि[13] वायुरिति ख्यातस्तृतीयोपि महायशाः ॥ ५ ॥

शीर्षतः शिरस्स्थाने शिरस्स्थानइत्यनुवादात्। पादतः पादस्थाने। शयनपरिग्रहाभावेपिकृष्णाजिनाद्यास्तरणेपादस्थानेशिरः शिरस्स्थानेचपादौ कृत्वा सुप्तवतीत्यर्थः । पादोपधानेशीर्षं शीर्षोपधानेपादौचकृत्वेत्यर्थः । रन्ध्रान्वेषणफलंजातमितिमोदः । वृथागर्वितेयमितिहासः ॥१७॥ शरीरविवरं योनिविवरं । आत्मवान् धैर्यवान् ॥ १८ ॥ शतपर्वणा शतकोटिना ॥ १९ ॥ मारुद इति। रुदिर्अश्रुविमोचनइत्यस्माल्लुङ् । माङ्योगादडभावः ॥ २० ॥ नहन्तव्यः भेदनेकृतेपिप्राणवियोजनंमाकुर्वित्यर्थः ॥ २१—२२ ॥ अन्तरं अवकाशं । क्षन्तुमर्हसि स्वहिंसापरांगामपिहिंस्यादितिन्यायेनयुक्तत्वादितिभावः ॥२३॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

दुराधर्षं दुर्जयं ॥१॥ अपराधात् प्रमादात् । विफलीकृतः शकलीकृतः ॥ २ ॥ गर्भविपर्यये उपहतगर्भविषये । प्रियं श्रेयः । कर्तुमिच्छामि । तदेवश्रेयआह—मरुतामिति । सप्तानांमरुतां वातस्कन्धानां । इमे सप्तभागाः स्थानपालाः लोकपालाः। भवन्तु । सप्तमरुतश्चोक्ताः । "गगनःस्पर्शनोवायुरनिलश्चतथापरः ॥ प्राणःप्राणेश्वरोजीवइत्येतेसप्तमारुताः" इति । विष्णुपुराणेतु "आवहप्रवहसंवहोद्वहविवहपरिवहपरावहाः सप्तमारुताः"इत्युक्तं ॥३॥ वातस्कन्धाः वातस्कन्धाभिमानिदेवताः । मरुदभिमानिदेवतात्वान्मारुताइतिविख्याताः । त्वत्कृतेन मारुदइत्युच्चारणेन मारुताइतिविख्याताः । पृषोदरादित्वाद्वर्णव्यत्ययइत्याहुः ॥४॥ सप्तमरुतःकुत्रवर्ततेतेषांस्थानपालनंचकथमित्यत्राह—ब्रह्मेति । दिवि अन्तरिक्षे विष्णुपदाख्ये विष्णुलोके ।

शि० वातस्कन्धाः वातभेदाः । सप्त सप्तावयवकसप्तगणाः ॥ ४ ॥ **ति०** एकइति एकः गणइत्यर्थः । प्रथमंसप्तधाविभज्य

[पा०] १ ङ—ट. प्रविवेशपुरन्दरः. २ ङ—छ. झ. ञ. चिच्छेदपरमात्मवान्. ३ ग. घ. सस्वरं. ४ ग. झ. नहन्तव्यं नहन्तव्यमित्येव. ५ क. ख. ग. ङ. ज. झ. अभिन्दं. ६ ङ. च. ज. झ. ञ. शकलीकृतः. ७ ङ. च. झ. ञ. नापराधोहि. ८ ख. झ. ञ. प्रियंत्वत्कृतमिच्छामि. क. तत्कर्तुमिच्छामि. ९ ख. शक्रसप्तानां. १० ग. छ. झ. ञ. भवन्तुते. घ. च. भवन्तुमे. ११ ग. इमेपुत्र. १२ क—घ. च. छ. ज. ञ. ट. पुत्रकाः. १३ झ. ञ. ट. दिव्यवायुरितिख्यातः. घ. दिविवातइति.

चत्वारस्तु सुरश्रेष्ठ दिशो वै तव शासनात् ॥ संचरिष्यन्तु भद्रं ते देवभूता ममात्मजाः ॥
त्वत्कृतेनैव नाम्ना च मारुता इति विश्रुताः ॥ ६ ॥
तस्यास्तद्वचनं श्रुत्वा सहस्राक्षः पुरन्दरः ॥ उवाच प्राञ्जलिर्वाक्यं दितिं बलनिषूदनः ॥ ७ ॥
सर्वमेतद्यथोक्तं ते भविष्यति न संशयः ॥ विचरिष्यन्ति भद्रं ते देवरूपास्तवात्मजाः ॥ ८ ॥
एवं तौ निश्चयं कृत्वा मातापुत्रौ तपोवने ॥ जग्मतुस्त्रिदिवं राम कृतार्थाविति नः श्रुतम् ॥ ९ ॥
एष देशस्स काकुत्स्थ महेन्द्राध्युषितः पुरा ॥ दितिं यत्र तपस्सिद्धामेवं परिचचार सः ॥ १० ॥
इक्ष्वाकोस्तु नरव्याघ्र पुत्रः परमधार्मिकः ॥ अलम्बुसायामुत्पन्नो विशाल इति विश्रुतः ॥ ११ ॥
तेन चासीदिह स्थाने विशालेति पुरी कृता ॥ विशालस्य सुतो राम हेमचन्द्रो महाबलः ॥ १२ ॥
सुचन्द्र इति विख्यातो हेमचन्द्रादनन्तरः ॥ सुचन्द्रतनयो राम धूम्राश्व इति विश्रुतः ॥ १३ ॥
धूम्राश्वतनयश्चापि सृञ्जयः समपद्यत ॥ सृञ्जयस्य सुतः श्रीमान्सहदेवः प्रतापवान् ॥ १४ ॥
कुशाश्वः सहदेवस्य पुत्रः परमधार्मिकः ॥ कुशाश्वस्य महातेजाः सोमदत्तः प्रतापवान् ॥ १५ ॥
सोमदत्तस्य पुत्रस्तु काकुत्स्थ इति विश्रुतः ॥ १६ ॥
तस्य पुत्रो महातेजाः संप्रत्येष पुरीमिमाम् ॥ आवसत्यमरप्रख्यः सुमतिर्नाम दुर्जयः ॥ १७ ॥
इक्ष्वाकोस्तु प्रसादेन सर्वे वैशालिका नृपाः ॥ दीर्घायुषो महात्मानो वीर्यवन्तः सुधार्मिकाः ॥१८॥
इहाद्य रजनीं राम सुखं वत्स्यामहे वयम् ॥ श्वःप्रभाते नरश्रेष्ठ जनकं द्रष्टुमर्हसि ॥ १९ ॥
सुमतिस्तु महातेजा विश्वामित्रमुपागतम् ॥ श्रुत्वा नरवरश्रेष्ठः प्रत्युद्गच्छन्महायशाः ॥ २० ॥
पूजां च परमां कृत्वा सोपाध्यायः सबान्धवः ॥ प्राञ्जलिः कुशलं पृष्ट्वा विश्वामित्रमथाब्रवीत् ॥२१॥
धन्योस्म्यनुगृहीतोस्मि यस्य मे विषयं मुनिः ॥ संप्राप्तो दर्शनं चैव नास्ति धन्यतरो मया ॥२२॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

चरत्वित्यनुषङ्गः ॥ ५ ॥ चत्वारइतिसार्धश्लोकः ॥६॥ दितिगर्भखण्डनेन सहस्राक्षत्वादीनिसिद्धानीतिभावः ॥ ७ ॥ यथोक्तमित्यस्यविवरणंविचरिष्यन्तीति ॥८॥ नः अस्माभिरित्यर्थः । "क्तस्यचवर्तमाने" इतिषष्ठी ॥९॥ प्रकृतमुपसंहरति—एषइति । सएषइत्यन्वयः । सः इन्द्रः ॥ १० ॥ अथकतरोराजवंशइतिद्वितीयप्रश्नस्योत्तरमाह—इक्ष्वाकोरित्यादिना ॥ ११–१३ ॥ सृञ्जयःसमपद्यत सृञ्जयनामाऽऽसीत् ॥ १४—१५ ॥ सोमदत्तस्येत्यर्धमेकं ॥ १६ ॥ "उपान्वध्याङ्वसः" इत्याधारस्यकर्मत्वं ॥ १७ ॥ कथंकतिपयैरेवपुरुषैरिदानीमिक्ष्वाकुवंशइत्यत्राह—इक्ष्वाकोरिति । विशालानिवासएषांतेवैशालिकाः । कुमुदादित्वात्ठक् । विशालप्रार्थनमिक्ष्वाकुप्रसादनिमित्तं ॥१८॥ वत्स्यामहे आर्षमात्मनेपदं ॥१९॥ प्रात्युद्गच्छत् प्रत्युदगच्छत् ॥२०–२१ ॥ विषयं स्थानं । दर्शनंचप्राप्तइत्यनुषङ्गः । मया सदृश इतिशेषः ॥ २२ ॥ इति गोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

पुनरेकशस्सप्तधाकरणमित्यस्यार्थस्यपुराणान्तरेस्पष्टमुक्तत्वात् इहापि "बिभेदचमहातेजारुदन्तमपि"—इत्यादिनाध्वनितत्वाच्चेति बोध्यं । एवमपरइत्याद्यपिव्याख्येयं । इन्द्रलोकमिति रुद्रलोकमितिप्रचुरः पाठः । दिव्यवायुः दिविअन्तरिक्षेभवइत्यर्थः ॥ ५ ॥ इतिसप्तचत्वारिंशस्सर्गः ॥ ४७ ॥

[पा०] १ क. झ. ञ. ट. संचरिष्यन्तिभद्रंते. २ झ. कालेनहिममात्मजाः. ३ झ. ञ. ट. नाम्नावै. ख. नाम्नाते. क. नाम्नातु. ४ झ. मितीदंबलसूदनः. च. छ. ञ. दितिंचबलसूदनः. ५ क—घ. देवभूतास्तवात्मजाः. ६ क. ख. ज. ञ. हेमचन्द्रादनन्तरम्. ७ क. सुतश्श्रीमान्. ८ क. च. छ. ञ. पुत्रोऽभूत्. ९ क. निवसत्यमरप्रख्यः. १० ग. सुमतिर्नामविश्रुतः. ११ च. छ. झ. ञ. रजनीमेकां. १२ च. छ. स्थास्यामहेवयम्. झ. ञ. ट. स्वप्स्यामहे. १३ ख. च. छ. झ. ञ. ट. प्रत्यागच्छन्महायशाः. १४ छ. झ. ञ. विषयंमुने. ज. ट. विषयंगतः. १५ ञ. दर्शनाचैव. १६ च. छ. ञ. ट. धन्यतरोमम.

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

विश्वामित्रेणसुमतयेरामलक्ष्मणवृत्तान्तनिवेदनपूर्वकंतदातिथ्यस्वीकारेणरात्रौतत्रनिवासः ॥ १ ॥ परेद्युःसहरामादिभिर्गौतमाश्रमागमनम् ॥ २ ॥ तथारामंप्रतिइन्द्राहल्यावृत्तान्तकथनपूर्वकंगौतमात्तयोःशापप्राप्तिकथनम् ॥ ३ ॥

पृष्ट्वा तु कुशलं तत्र परस्परसमागमे ॥ कथान्ते सुमतिर्वाक्यं व्याजहार महामुनिम् ॥ १ ॥
इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ॥ गजसिंहगती वीरौ शार्दूलवृषभोपमौ ॥ २ ॥
पद्मपत्रविशालाक्षौ खड्गतूणीधनुर्धरौ ॥ अश्विनाविव रूपेण समुपस्थितयौवनौ ॥ ३ ॥
यदृच्छयैव गां प्राप्तौ देवलोकादिवामरौ ॥ कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ॥ ४ ॥
भूषयन्ताविमं देशं चन्द्रसूर्याविवांबरम् ॥ परस्परस्य सदृशौ प्रमाणेङ्गितचेष्टितैः ॥ ५ ॥
किमर्थं च नरश्रेष्ठौ संप्राप्तौ दुर्गमे पथि ॥ वरायुधधरौ वीरौ श्रोतुमिच्छामि तत्वतः ॥ ६ ॥
तस्य तद्वचनं श्रुत्वा यथावृत्तं न्यवेदयत् ॥ [अयोध्याधिपतेः पुत्रो राज्ञो दशरथस्य हि ॥
मम यज्ञसमाप्त्यर्थमागतौ रामलक्ष्मणौ ॥ ७ ॥
सिद्धाश्रममनुप्राप्य राक्षसानभिहत्य च ॥ इमं देशमनुप्राप्तौ वीरौ दशरथात्मजौ] ॥
सिद्धाश्रमनिवासं च राक्षसानां वधं तथा ॥ ८ ॥

अथरामस्यपरमपावनत्वंदर्शयत्यष्टचत्वारिंशे—पृष्ट्वात्वित्यादि । परस्परेत्यविभक्तिकनिर्देशः । परस्परंकुशलंपृष्ट्वा कथान्ते तदुत्तरान्तेइतियोजना ॥ १ ॥ इमावित्यादिपञ्चश्लोकी । इमौकुमारौ कोयंकुमारभावइतिविस्मयते । दृष्टिदोषोमाभूदित्याह—भद्रंतइति । देवतुल्यपराक्रमौ संस्थानविशेषदर्शनेननूनमेतौविष्णुतुल्यपराक्रमावितिमन्यामहे । गजसिंहगतीवीरौशार्दूलवृषभोपमौ ॥ चतुर्गतित्वमुच्यते । गांभीर्यगमनेगजतुल्यौ पराभिभवनार्हगमनेसिंहतुल्यौ भयंकरगमने शार्दूलतुल्यौ सगर्वगमनेवृषभसदृशावित्यर्थः । विशेषेणरावयतः शत्रूनितिवीरौ अनुभवितॄणांविरोधिनिवर्तकावित्यर्थः । पद्मपत्रविशालाक्षौ द्रष्टॄणामाकर्षकावयवविशेषौ । नयनसौन्दर्यंहि लावण्यपरमकाष्ठा । खड्गतूणीधनुर्धराविति आभरणकोटौ आयुधकोटौच एषामन्तर्भावः । अश्विनाविवरूपेण । रूपवत्सु अश्विनौ प्रसिद्धौ । रूपेणासाधारणधर्मेण ताविवस्थितौ । समुपस्थितयौवनौ रूपानुरूपंप्रादुर्भवद्यौवनौ । यदृच्छयैव भाग्यवशादेव । देवलोकाद्गां भुवं । प्राप्तौ अमरौ कौचिद्देवशेषाविवस्थितौ । तेजसादेवकुमारतुल्यावित्यर्थः । एतत्तेजोविशेषविलोकनेनैतौमर्त्यावपिअमर्त्यावितिप्रतिभातीतिभावः । कथंपद्भ्यांइहप्राप्तौ अतीवकोमलाभ्यांपद्भ्यामिहदुर्गमेपथिकथंप्राप्तावित्युदरंपरिस्पृशति । किमर्थं एतद्रूपदर्शनेनैवावाप्तसमस्तकामावितिनिश्चिनुमः । कस्यवापुत्रावित्यर्थः । यद्वा कस्यपुरुषस्यकतमप्रयोजनायइहप्राप्तावित्यर्थः । मुने सर्वज्ञोभवानिममर्थंजानात्येवेत्यर्थः । चन्द्रसूर्याविवाम्बरमिव इमंदेशंभूषयन्तौ शैत्यप्रतापाभ्यामुभावपिचन्द्रसूर्यतुल्यौ । अयंलोकोविष्णुपदमासीदितिभावः । भूषयन्तौ निजतेजसेतिभावः । प्रमाणं शरीरौन्नत्यादि । इङ्गितं अन्तर्गतभावसूचकस्मितादिचेष्टितं गमनभाषणविलोकनादि । एतैः परस्परसदृशौतुल्यपुरुषान्तराभावात् । नरश्रेष्ठावपिदुर्गमेपथिकिमर्थंसंप्राप्तौ । पूर्वंपद्भ्यांकथंप्राप्तावित्युक्तं संप्रतिदुर्गमंवनंकिमर्थंप्राप्तावित्युच्यते । वरायुधधरौ आयुधश्रेष्ठधनुरादिधरौ । पूर्वमाभरणान्वयेनखड्गादिकमुक्तं इदानींतान्येवायुधतयोच्यन्ते । यद्वा पूर्वोक्तानांवरायुधत्वमुच्यते । वरायुधधरौ आयुधश्रेष्ठधनुरादिधरौ । पूर्वमाभरणान्वयेनखड्गादिकमुक्तं इदानींतान्येवायुधतयोच्यन्ते । यद्वा पूर्वोक्तानांवरायुधत्वमुच्यते । वीरौ वीर्ययुक्तौ । पूर्ववीरशब्दोऽन्यथा व्याख्यातः । श्रोतुमिच्छामितत्वतः यद्यपि राजपुत्रौकस्यचिद्विघ्नस्यशान्तयेआगतावितिसामान्यतोजानामि तथापि विशेषतोज्ञातुमिच्छामीत्यर्थः ॥२–७॥ स्वस्य-

ती० देवतुल्यपराक्रमौ इन्द्रतुल्यपराक्रमौ । शार्दूलवृषभोपमौ अधृष्यत्वेशार्दूलोपमौ सविलासगमनेवृषभोपमौ । पद्मपत्रविशा-

[पा०] १ घ. पृष्ट्वाच. २ झ. तूणधनुर्धरौ. ३ झ. ञ. परस्परेणसदृशौ. ४ ख. ग. मुनिश्रेष्ठ. ५ च. छ. ञ. कस्यपुत्रौ महामुने. ६ ख. यथान्यायंन्यवेदयत्. ७ एतच्छ्लोकद्वयं घ. च. छ. दृश्यते. ८ ख. ग. द. राक्षसानांचतद्वधम्.

विश्वामित्रवचः श्रुत्वा राजा परम[1]हर्षितः ॥ अतिथी परमौ[2] प्राप्तौ पुत्रौ दशरथस्य तौ ॥
पूजयामास विधिवत्सत्कारार्हौ महाबलौ ॥ ९ ॥
ततः परमसत्कारं सुमतेः प्राप्य राघवौ ॥ उष्य तत्र निशामेकां जग्मतुर्मिथिलां ततः ॥ १० ॥
ता[3]न्दृष्ट्वा मुनयः सर्वे जनकस्य पुरीं शुभाम् ॥ साधुसाध्विति शंसन्तो मिथिलां समपूजयन् ॥११॥
मिथिलोपवने तत्र आश्रमं दृश्य राघवः ॥ पुराणं निर्[4]जनं रम्यं पप्रच्छ मुनिपुङ्गवम् ॥ १२ ॥
श्रीमदा[5]श्रमसंकाशं किंन्वि[6]दं मुनिवर्जितम् ॥ श्रोतुमिच्छामि भगवन्कस्यायं पूर्व आश्रमः ॥ १३ ॥
तच्छ्रुत्वा राघवेणोक्तं वाक्यं वाक्यविशारदः ॥ प्रत्युवाच महातेजा विश्वामित्रो महामुनिः ॥१४॥
हन्त ते कथयिष्यामि शृणु तत्त्वेन राघव ॥ यस्यैतदाश्रमपदं शप्तं कोपान्महात्मना[7] ॥ १५ ॥
गौतमस्य नरश्रेष्ठ पूर्वमासीन्महात्मनः ॥ आश्रमो दिव्यसंकाशः सुरैरपि सुपूजितः ॥ १६ ॥
[8]स चेह तप आतिष्ठदहल्यासहितः पुरा ॥ वर्ष[9]पूगाननेकांश्च राजपुत्र म[10]हायशः ॥ १७ ॥
[[11]कदाचिद्दिवसे राम ततो दूरं [12]गते मुनौ] ॥ तस्यान्तरं विदि[13]त्वा तु सहस्राक्षः शचीपतिः ॥
मुनिवेषधरो[14]ऽहल्यामिदं वचनमब्रवीत् ॥ १८ ॥
ऋतुकालं प्रतीक्षन्ते नार्थिनः सुसमाहिते ॥ संगमं त्वहमिच्छामि त्वया सह सुमध्यमे ॥ १९ ॥
मुनिवेषं सहस्राक्षं विज्ञाय रघुनन्दन ॥ [15]मतिं चकार दुर्मेधा देवराजकुतूहलात् ॥ २० ॥
अथाब्रवीत्सुरश्रेष्ठं कृतार्थेनान्तरात्मना ॥ [16]कृतार्थोऽसि सुरश्रेष्ठ गच्छ शीघ्र[17]मितः प्रभो ॥ २१ ॥

सिद्धाश्रमनिवासं तत्र स्वयज्ञविघ्नकरराक्षसानामेताभ्यांवधं चकारादिमौदशरथकुमारौहरधनुर्दर्शनायमिथिलांगच्छतइत्येतत्समुच्चीयते । एतत्सर्वंयथावृत्तमब्रवीदितियोजना ॥८॥ विश्वामित्रेतिसार्धश्लोकः ॥ ९ ॥ उष्य उषित्वा । ततः प्रातःकाले । मिथिलांप्रतीतिशेषः ॥ १० ॥ तान् मिथिलांप्रतिप्रस्थितान्रामादीन् । पूजाप्रकारः—साधुसाध्विति ॥ ११ ॥ मिथिलाया उपसमीपेवर्तमानंवनं मिथिलोपवनं तस्मिन् । शून्यं उटजसंस्थानरहितं । दृश्य दृष्ट्वा ॥ १२ ॥ आश्रमसंकाशं आश्रमवद्भासमानं । किंन्विदमित्यस्यविवरणंकस्यायमिति ॥ १३—१४ ॥ अहल्यानुग्रहहेतुकालस्मृतिजसंतोषे हन्तेति । महात्मना कोपाच्छप्तं प्राप्तशापं । इदमाश्रमपदंयस्यभवति तंकथयिष्यामितत्त्वेन शृणु ॥ १५ ॥ दिव्यसंकाशः दिव्यत्वेनभासमानः ॥ १६ ॥ वर्षपूगान् वर्षसमूहान् ॥ १७ ॥ अन्तरं मुनिरहितकालं । मुनिवेषधरः गौतमवेषधरः ॥ १८ ॥ ऋतुकालं । "षोडशर्तुर्निशास्त्रीणां" इत्युक्तकालं । अर्थिनः कामाद्भोगार्थिनः । अनृतुकालत्वान्नायमवसरइत्यहल्ययाप्रतिषिद्धमित्यवगम्यते । सुसमाहिते सम्यक्त्रह्मणानिर्मिते । अतिसुन्दरीत्यर्थः ॥ १९ ॥ सहस्राक्षंविज्ञाय कदाचिदपिमुनिनैवमर्थनाभावादन्यस्यात्रप्रवेष्टुमशक्तेरिन्द्रस्यैवात्मनिबहुकालमभिलाषश्रवणाच्चेतिभावः ॥ २० ॥ कृतार्थेन संतुष्टेनेत्यर्थः । अन्तरात्मना मनसाउपलक्षिता ॥ २१ ॥

लाक्षाविल्यनेन भाग्यसंपत्तिस्सूचिता । **ति०** प्रभुत्वाद्गजगतीरामः । अन्यगतिर्लक्ष्मणः । तथाशार्दूलाकृतीरामः वृषभाकृतिर्लक्ष्मणः । **शि०** किंच देवौ क्रीडाशीलौ । तुल्यपराक्रमौ परस्परंसदृशपराक्रमौ ॥ २ ॥ **ति०** तस्यआश्रमस्य । अन्तरं मुनिसंनिधानरहितंकालं । शचीपतिरित्यनेनशचीतोपिसौन्दर्यमहल्यायाध्वनितं । मुनिवेषधरः गौतमवेषधरः । ममरूपंसमास्थायेतिवक्ष्यमाणत्वात् ॥ १८ ॥ **ति०** सहस्राक्षंविज्ञाय ऋतुकालंप्रतीक्षन्तेनार्थिनः इतिवचनात्तपसाच आश्रमवर्तिसर्वप्राणिजातस्यशङ्काभावायगौतम-

[पा०] १ च. छ. झ. ञ. परमविस्मितः. २ झ. परमंप्राप्तौ. ३ झ. ट. तांदृष्ट्वा. ञ. तेदृष्ट्वा. ४ ख. निर्जनंरामः. ५ झ. ञ. इदमाश्रमसंकाशं. ६ च. छ. ञ. किंत्विदंमुनिवर्जितम्. ७ झ. ट. कोपान्महात्मनः. ख. कोपान्महर्षिणा. क. ञ. महामुनेः. ८ ङ. च. छ. झ. ञ. सचात्रतपआतिष्ठत्. ९ ख. ग. च—ट. वर्षपूगान्यनेकानि. १० ख. ज. महायशाः. ११ इदमर्धं क. ख. ङ. च. छ. ञ. दृश्यते. १२ ङ. च. छ. दूरगतेमुनौ. १३ ज. ट. त्वाथ. ङ. च. छ. ञ. विदित्वाच. १४ ङ. च. छ. झ. ञ. धरोभूत्वाअहल्यामिदमब्रवीत्. १५ क. ख. च. झ. ञ. रतिंचकार. १६ ग. कृतार्थोसि. १७ घ. शीघ्रमलक्षितः.

आत्मानं मां च देवेश सर्वदा रक्ष मानद ॥ इन्द्रस्तु प्रहसन्वाक्यमहल्यामिदमब्रवीत् ॥ २२ ॥
सुश्रोणि परितुष्टोस्मि गमिष्यामि यथागतम् ॥ २३ ॥
एवं संगम्य तु तया निश्चक्रामोटजात्ततः ॥ ससंभ्रमात्त्वरन्राम शङ्कितो गौतमं प्रति ॥ २४ ॥
गौतमं स ददर्शाथ प्रविशन्तं महामुनिम् ॥ देवदानवदुर्धर्षं तपोबलसमन्वितम् ॥ २५ ॥
तीर्थोदकपरिक्लिन्नं दीप्यमानमिवानलम् ॥ गृहीतसमिधं तत्र सकुशं मुनिपुङ्गवम् ॥ २६ ॥
दृष्ट्वा सुरपतिस्त्रस्तो विवर्णवदनोऽभवत् ॥ २७ ॥
अथ दृष्ट्वा सहस्राक्षं मुनिवेषधरं मुनिः ॥ दुर्वृत्तं वृत्तसंपन्नो रोषाद्वचनमब्रवीत् ॥ २८ ॥
मम रूपं समास्थाय कृतवानसि दुर्मते ॥ अकर्तव्यमिदं तस्माद्विफलस्त्वं भविष्यसि ॥ २९ ॥
गौतमेनैवमुक्तस्य सरोषेण महात्मना ॥ पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणात् ॥ ३० ॥
[व्यथितस्सहसा चासीद्धतौजा विफलीकृतः ॥ धर्षितस्तपसोग्रेण कश्मलं चैवमाविशत्] ॥३१॥
तथा शप्त्वा स वै शक्रमहल्यामपि शप्तवान् ॥ इह वर्षसहस्राणि बहूनि त्वं निवत्स्यसि ॥ ३२ ॥
वायुभक्षा निराहारा तप्यन्ती भस्मशायिनी ॥ अदृश्या सर्वभूतानामाश्रमेस्मिन्निवत्स्यसि ॥ ३३ ॥
यदा चैतद्वनं घोरं रामो दशरथात्मजः ॥ आगमिष्यति दुर्धर्षस्तदा पूता भविष्यसि ॥ ३४ ॥

रक्ष अप्रकाशगमनादितिभावः ॥ २२ ॥ सुश्रोणीत्यर्धं ॥ २३ ॥ सः । संभ्रमात् भयात् । "संभ्रमोह्यादरे भये" इतिनिघण्टुः । शङ्कितः शङ्कावान् ॥ २४ ॥ गौतममितिश्लोकद्वयं । अथ उटजान्निष्क्रमणकालएव । परिक्लिन्नं स्नात्वाऽऽगतमित्यर्थः । तत्र आश्रमे ॥२५—२६ ॥ दृष्ट्वेत्यर्धं । विवर्णवदनः शुष्कमुखः ॥ २७ ॥ मुनिवेषधरं स्ववेषधरं ॥ २८ ॥ स्वभार्यासंगमस्यदुःशीलत्वेनावाच्यत्वादिदमित्याह । विफलः विगतवृषणः । "लाभनिष्पत्तिभोगेषुबीजेफालेधनेफलं" इतिनिघण्टुः ॥ २९—३२ ॥ कथंनिवासमात्रस्यशापत्वमितितद्विवृणोति—वायुभक्षेति । निराहारा अन्नपानादिरहिता । तप्यन्ती तप्यमाना । भस्मशायिनी भस्मशयना । अत्रबुद्धिपूर्वकव्यभिचारस्यविधीयमानंप्रायश्चित्तंशापापदेशेनोच्यते । एवंव्यक्ततयावाल्मीकिवचनेस्थिते शैलीभवेतिशापः रामपादस्पर्शात्शिलात्वमुक्तिरितिपुराणकथा कल्पान्तरवृत्तमनुसृत्येतिबोध्यं ॥ ३३ ॥ पूता भविष्यसि तत्पादपरागस्पर्शादितिभावः । एतेनबहुवर्षप्रायश्चित्तकरणमपिभगवत्पादरेणुस्पर्शस्यकलांनार्हे-

---

वेषोऽयमिन्द्रइतिज्ञात्वेत्यर्थः । देवराजकुतूहलात् समामभिलषतीतिकौतुकात् दिव्यरतिकौतुकाच्चेत्यर्थः ॥ २० ॥ **ति०** शीघ्रगमनेहेतुःशापतोरक्षणं । विशिष्टस्त्रीचरितेनप्रहासः रक्षणस्यदुर्लभत्वाद्वा गौतमतपोभङ्गस्यस्वेष्टस्यकरणेनाग्रिमशापादिभयमल्पमितिवा ॥२२॥ **ति०** तप्यन्ती स्वकृताकार्यस्मरणेनपीडिता । पुराणादिप्रसिद्धशिलारूपप्राप्तिशापस्तुकल्पान्तरीणइतिन विरोधः । अत्रशिलारूपत्वेतात्पर्यकल्पने वातभक्षेत्यनेनविरोधःस्पष्टएवेतिकेचित् । वस्तुतस्तुअदृश्येत्यस्यस्वरूपेणादृश्या शिलाप्रतिमारूपेणसर्वदृश्येत्यर्थः । नचतावताचैतन्यहानिरितिक्षुधापीडास्यादेवेत्यतोवातभक्षा । तदतिरिक्ताहाराभावाच्चनिराहारा । तप्यन्तीस्वकर्मणेतिशेषः । तादृश्यपिभस्मशायिनीनतुस्थिता इतिनकश्चिद्विरोधः ॥ अयंशापउपलक्षणमत्रानन्तभगवत्त्वशापस्य । तदुक्तंपाद्मे । "शापदग्धापुराभर्त्रारामशक्रापराधतः । अहल्याख्याशिलाजज्ञेशतलिङ्गःकृतस्स्वराट्"इति । शिला तत्प्रतिमाकारा । शतशब्दोऽनन्तवाची । लिङ्गशब्देनभगाकारंचिह्नं । स्वराडिन्द्रः ॥ ३३ ॥

[पा०] १ ग. ङ. च. छ. झ. ञ. ट. सर्वथारक्ष. ङ. च. छ. झ. ञ. रक्षगौतमात्. २ क. ख. ग. च. परितुष्टोस्मिसुश्रोणि. ३ ङ. झ. संगम्यतुतदा. च. छ. संगम्यतुतथा. ४ ख. टजात्तदा. ५ ख. घ. ससंभ्रमस्त्वरन्. ज. ससंभ्रमात्परिक्रामन्. ६ क—ज. ञ. ट. संददर्शाथ. ७ ख. समिधंशक्रः. ८ ख. ग. च—ट. विषण्णवदनोऽभवत्. ९ ङ—ट. अकर्तव्यमिदंयस्मात्. १० ग. गौतमेनैवमुक्तेतु. ११ झ. सुरोषेण. घ. गौतमेनैवमुक्तस्यसहस्राक्षस्यतत्क्षणात्. पेततुर्वृषणौभूमौसरोषेणमहात्मना. १२ अयंश्लोकः ख. दृश्यते. १३ घ. अथशप्त्वाचवैशक्रंभार्यामपिचशप्तवान्. ङ. च. छ. झ. ञ. ट. तथाशप्त्वाचवैशक्रं भार्यामपिच. क. तथाशप्त्वासहस्राक्षं. १४ ख. थदेवेशं. १५ ङ. च. छ. झ. ञ. बहूनिनिवसिष्यसि. घ. बहून्यत्रनिवत्स्यसि. १६ ङ. च. छ. झ. ञ. वातभक्षा. क. वायुभक्षाशिलाभूत्वा. १७ ख. मलिनाभस्मशायिनी. १८ ङ—ट. माश्रमेऽस्मिन्वसिष्यसि. क. ख. घ. माश्रमेस्मिन्भविष्यसि. १९ ख. ङ—ट. यदात्वेतद्वनं.

तस्यातिथ्येन दुर्वृत्ते लोभमोहविवर्जिता ॥ मत्सकाशे मुदा युक्ता स्वं वपुर्धारयिष्यसि ॥ ३५ ॥
एवमुक्त्वा महातेजा गौतमो दुष्टचारिणीम् ॥ इममाश्रममुत्सृज्य सिद्धचारणसेविते ॥
हिमवच्छिखरे रम्ये तपस्तेपे महातपाः ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

देवैः गौतमशापेनवृषणरहितस्यदेवेन्द्रस्यपितृदेवप्रसादनेनमेषवृषणसंयोजनम् ॥ १ ॥ विश्वामित्रनिदेशेनगौतमाश्रमप्रवेशिनोरामस्यदर्शनमात्रेणप्रादुर्भूतदिव्यरूपयाऽहल्ययातदानींसंनिहितेनगौतमेनसहश्रीरामाराधनम् ॥ २ ॥

अफलस्तु ततः शक्रो देवानग्निपुरोधसः ॥ अब्रवीत्त्रस्तवदनः सर्षिसङ्घान्सचारणान् ॥ १ ॥
कुर्वता तपसो विघ्नं गौतमस्य महात्मनः ॥ क्रोधमुत्पाद्य हि मया सुरकार्यमिदं कृतम् ॥ २ ॥
अफलोस्मि कृतस्तेन क्रोधात्सा च निराकृता ॥ शापमोक्षेण महता तपोस्यापहृतं मया ॥ ३ ॥
तस्मात्सुरवराः सर्वे सर्षिसङ्घाः सचारणाः ॥ सुरसाह्यकरं सर्वे सफलं कर्तुमर्हथ ॥ ४ ॥
शतक्रतोर्वचः श्रुत्वा देवाः साग्निपुरोगमाः ॥ पितृदेवानुपेत्याहुः सर्वे सह मरुद्गणैः ॥ ५ ॥
[पुराऽविचार्य मोहेन ऋषिपत्नीं शतक्रतुः ॥ धर्षयित्वा मुनेश्शापात्तत्रैव विफलः कृतः ॥
इदानीं कुप्यते देवान्देवराजः पुरन्दरः] ॥ ६ ॥
अयं मेषः सवृषणः शक्रो ह्यवृषणः कृतः ॥ मेषस्य वृषणौ गृह्य शक्रायाशु प्रयच्छथ ॥ ७ ॥

तीत्युक्तं ॥ ३४ ॥ पूतत्वेपिपूर्वरूपप्राप्तिस्तत्पादपूजांविनानसंभवतीत्याह—तस्येति । मत्सकाशे मत्समीपे । स्थितेतिशेषः । स्वंवपुः दृश्यंवपुः । केचिदिदंश्लोकद्वयंप्रक्षिप्तमित्याहुः । तन्न । "स्मरन्तीगौतमवचः" इत्यग्रिमुत्तरसर्गवचनविरोधात् ॥ ३५ ॥ एवमितिसार्धश्लोकः । तपस्तेपे तच्छापकृतपापप्रायश्चित्तार्थं ॥३६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

अनयोर्द्वयोःशापयोरेकःपूर्वमेवमुक्तः अपरस्त्वयामोचनीयइत्याशयेनाह एकोनपञ्चाशे—अफलइत्यादि । अग्निपुरोधसः अग्निपुरोगमान् । त्रस्तवदनः त्रस्तशब्देनतत्कार्यदैन्यमुच्यते ॥१॥ महात्मनःगौतमस्य तपसः अस्मत्पदच्यवनकारणस्य विघ्नं। क्रोधमुत्पाद्य तस्यक्रोधजननमुखेन कुर्वतामयाइदं गौतमतपोभङ्गरूपं । सुरकार्यकृतं सर्वदेवपदच्यवनार्हतपोगौतमेनकृतं । तस्यतपोनाशकमहाक्रोधोत्पादनायतद्भार्ययातुमयाव्यभिचारःकृतइत्यर्थः ॥२॥ तेन गौतमेन । सा अहल्या । निराकृता शापमोक्षपूर्वकंत्यक्ता। शापमोक्षेण मयिअहल्यायांचशापदानेन ॥ ३ ॥ हेसर्वेसुरवरा इतिसंबोधनं । द्वितीयसर्वशब्दस्य सर्वेयूयमितिसंबन्धः । साह्यं साहाय्यं । सफलं मामितिशेषः ॥ ४ ॥ पितृदेवान् अग्निकव्यवाहनादीन् ॥ ५—६ ॥ अयं इदानीं

शि० मत्सकाशंममसकाशःसामीप्यंयस्मात् मत्समीपगमनयोग्यमित्यर्थः । स्वंवपुः । अत्रप्रार्थनामन्तरेणानुग्रहवचनोक्त्यामुनेर्दयालुत्वंव्यक्तं । ती० स्वंवपुर्धारयिष्यसीत्यनेन पद्मपुराणोक्तपाषाणावस्थासूच्यते । तथाचपाद्मे "साततस्तस्यरामस्यपादस्पर्शान्महात्मनः । अभूत्सुरूपावनितासमाक्रान्तामहाशिला" इति ॥ ३५ ॥ इत्यष्टचत्वारिंशस्सर्गः ॥ ४८ ॥

[पा०] १ ख. तस्यातिथ्यंसुदुर्वृत्तेकृत्वापापविवर्जिता. २ ङ—ट. मत्सकाशं. ३ ङ—ञ. देवानग्निपुरोगमान्. ख. घ. देवान्साग्निपुरोधसः. ४ ङ. च. छ. झ. ञ. त्रस्तनयनः. ख. दार्तवदनः. ५ ङ. च. छ. झ. ञ. सिद्धगन्धर्वचारणान्. ६ ख. कोपमुत्पाद्य. ७ क. ङ. ज. झ. ञ. तन्मांसुरवराः. ख. तन्मांसुरगणाः. ८ ग. सुरसाह्यकृतं. क. ख. ङ. झ. ञ. सुरकार्यकरं. ९ ङ. झ. यूयंसफलं. ख. नित्यंसफलं. १० ख. ग. सहसर्वैर्मरुद्गणैः. ज. सर्वैस्सहमरुद्गणैः. ११ इदमर्धत्रयं ख. च. छ. दृश्यते. १२ ग. ङ. झ. प्रयच्छत. च. छ. ञ. प्रदीयताम्.

अफलस्तु कृतो मेषः परां तुष्टिं प्रदास्यति ॥ ८ ॥
भवतां हर्षणार्थे च ये च दास्यन्ति मानवाः ॥ [अक्षयं हि फलं तेषां यूयं दास्यथ पुष्कलम्] ॥९॥
अग्नेस्तु वचनं श्रुत्वा पितृदेवाः समागताः ॥ उत्पाट्य मेषवृषणौ सहस्राक्षे न्यवेशयन् ॥ १० ॥
तदाप्रभृति काकुत्स्थ पितृदेवाः समागताः ॥ अफलान्भुञ्जते मेषान्फलैस्तेषामयोजयन् ॥ ११ ॥
इन्द्रस्तु मेषवृषणस्तदाप्रभृति राघव ॥ गौतमस्य प्रभावेन तपसश्च महात्मनः ॥ १२ ॥
तदागच्छ महातेज आश्रमं पुण्यकर्मणः ॥ तारयैनां महाभागामहल्यां देवरूपिणीम् ॥ १३ ॥
विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः ॥ विश्वामित्रं पुरस्कृत्य तमाश्रममथाविशत् ॥ १४ ॥
ददर्श च महाभागां तपसा द्योतितप्रभाम् ॥ लोकैरपि समागम्य दुर्निरीक्षां सुरासुरैः ॥ १५ ॥
प्रयत्नान्निर्मितां धात्रा दिव्यां मायामयीमिव ॥ सतुषारावृतां साभ्रां पूर्णचन्द्रप्रभामिव ॥ १६ ॥
[धूमेनापि परीताङ्गीं दीप्तामग्निशिखामिव] ॥ मध्येऽम्भसो दुराधर्षां दीप्तां सूर्यप्रभामिव ॥ १७ ॥
सा हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह ॥ त्रयाणामपि लोकानां यावद्रामस्य दर्शनम् ॥
शापस्यान्तमुपागम्य तेषां दर्शनमागता ॥ १८ ॥
राघवौ त्वतिथी तस्याः पादौ जगृहतुस्तदा ॥ स्मरन्ती गौतमवचः प्रतिजग्राह सा च तौ ॥ १९ ॥
पाद्यमर्घ्यं तथाऽऽतिथ्यं चकार सुसमाहिता ॥ प्रतिजग्राह काकुत्स्थो विधिदृष्टेन कर्मणा ॥ २० ॥

यज्ञेयुष्मभ्यंनियुज्यमानोमेषः । गृह्य गृहीत्वा ॥ ७ ॥ तद्दानेऽस्मत्तुष्टिवैकल्यंस्यादित्यत्राह—अफलइत्यर्ध । प्रदास्यतीत्यनुगृह्णन्ति ॥ ८ ॥ दातृणामपिफलन्यूनतानभवत्वित्यनुगृह्णन्ति । भवतामिति । दास्यन्ति अवृषणमितिशेषः ॥ ९ ॥ अग्निपुरःसराणामित्यर्थः । मेषस्य तदायूपेनियुक्तस्यमेषस्यवृषणौ ॥ १० ॥ तदाप्रभृति वृषणदानात्प्रभृति । दत्तसजातीयत्वाद्वृषणौविनामेषान्भुञ्जते । तेषां सवृषणानां । फलैः सवृषणमेषदानफलैरित्यर्थः । अयोजयन् दातृनितिशेषः ॥ ११ ॥ गौतमस्यतपसःप्रभावेनवृषणहान्या मेषवृषणोभूदित्यर्थः ॥१२॥ तत् त्वदागमनावधित्वादहल्याशापस्येत्यर्थः ॥ १३–१४ ॥ रामसंनिधानमात्रेणाहल्यामुक्तशापास्वरूपंप्राप्तेत्याह—ददर्शेचेति सार्धश्लोकद्वयं । तपसा वाय्वाहारत्वादितपसा । द्योतितप्रभां अतिशयितप्रभां । अतएव लोकैः मानुषैः । सुरासुरैरपि । समागम्य समीपमागत्य । दुर्निरीक्षां । दिव्यां अतिमानुषरूपां । मायामयीमिव मायानिर्मितामिवस्थितां । वृक्षलताकुसुमान्तर्वर्तित्वेनसतुषारावरणां । साभ्रांचन्द्रप्रभामिवस्थितां । आवृतशब्दआवरणार्थकः । भावेनिष्ठा सइतिभिन्नंपदंवा । अक्रौर्यदुर्निरीक्ष्यत्वाभ्यांप्रतिबिंबसूर्यप्रभातुल्यां ॥ १५–१७ ॥ अदृश्यासाकथमिदानींदृश्याऽऽसीदित्यत्राहसार्धेन—साहीत्यादि ॥ १८॥ तस्याः वृद्धमुनिपत्न्याः । गौतमवचः "तस्यातिथ्येन दुर्वृत्ते" इत्यादिकं । प्रतिजग्राह पूजनीयत्वेनेतिशेषः ॥ १९ ॥ विधिदृष्टेन शास्त्रदृष्टेन । कर्मणा प्रकारेण ।

ति० अंभसः लक्षणयातद्युक्तमेघस्य मध्यस्थांरविप्रभामिवददर्श ॥ १७ ॥ ति० तौरामपादौप्रतिजग्राह स्पृष्ट्वाप्रणनाम । यत्तु तौ रामलक्ष्मणौ प्रतिजग्राह पूज्यत्वबुद्धिमकरोदिति । तन्न । अग्रेकाकुत्स्थइत्येकवचनप्रयोगात् ॥ शि० तौरामलक्ष्मणौ ॥ १९ ॥ शि० काकुत्स्थः लक्ष्मणसहितोरामः । ति० काकुत्स्थोरामः । तस्यैवमुख्यतयापूजमात् ॥ २० ॥ इत्येकोनपञ्चाशस्सर्गः ॥ ४९ ॥

[पा०] १ ज. सर्वांतुष्टिं. २ ङ. च. छ. झ. ञ. ट. हर्षणार्थंच. क. ख. ग. ज. हर्षणार्थाय. ३ इदमर्धं ग. ङ. च. छ. झ. ञ. ट. दृश्यते. ४ ख. इत्यग्नेर्वचनंश्रुत्वा. ५ ङ—ञ. तपसाचमहात्मनः. ट. तापसस्य. ६ ख. ग. महातेजाः. ७ ग. तदाश्रममथाविशत्. क. ख. घ—ट. आश्रमंप्रविवेशह. ८ क. तुषारेणावृतांसाभ्रां. ९ इदमर्धं क. घ—ट. दृश्यते. क. ख. ङ. च. छ. झ. ञ. ट. पुस्तकेषुसतुषारावृतां –धूमेनापिपरीताङ्गीं–इत्यर्धयोर्व्युत्क्रमोदृश्यते. ग. पुस्तकेसूर्यप्रभामिवेत्यनन्तरं–धूमेनापीत्यर्धंदृश्यते. १० ङ. झ. ट. भिपरीतांगीं. ११ च. छ. ज. ट. सापिगौतम. १२ घ. ट. दर्शनात्. १३ ङ. च. छ. झ. ञ. राघवौतुतदातस्याः. क—घ. राघवौतुततस्तस्याः. ज. तथातस्याः. १४ ङ. च. छ. झ. ञ. मुदा. १५ क. घ—छ. झ. ञ. ट. सापितौ. १६ ग. तदातिथ्यं. मथातिथ्यं.

पुष्पवृष्टिर्महत्यासीद्देवदुन्दुभिनिस्वनैः ॥ गन्धर्वाप्सरसां चापि महानासीत्समागमः ॥ २१ ॥
साधुसाध्विति देवास्तामहल्यां समपूजयन् ॥ तपोबलविशुद्धाङ्गीं गौतमस्य वशानुगाम् ॥ २२ ॥
गौतमो हि महातेजा अहल्यासहितः सुखी ॥ रामं संपूज्य विधिवत्तपस्तेपे महातपाः ॥ २३ ॥
रामोपि परमां पूजां गौतमस्य महामुनेः ॥ सकाशाद्विधिवत्प्राप्य जगाम मिथिलां ततः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ॥ ५० ॥

जनकेनरामलक्ष्मणाभ्यांसहविश्वामित्रस्यस्वपुरपरिसरागमनश्रवणाच्छतानन्देनसहप्रत्युद्गमनेनपरिपूजनम् ॥ १ ॥ विश्वामित्रेणजनकंप्रतिसाकल्येनरामवृत्तान्तनिवेदनपूर्वकंधनुर्दिदृक्षाकथनम् ॥ २ ॥

ततः प्रागुत्तरां गत्वा रामः सौमित्रिणा सह ॥ विश्वामित्रं पुरस्कृत्य यज्ञवाटमुपागमत् ॥ १ ॥
रामस्तु मुनिशार्दूलमुवाच सहलक्ष्मणः ॥ साध्वी यज्ञसमृद्धिर्हि जनकस्य महात्मनः ॥ २ ॥
बहूनीह सहस्राणि नानादेशनिवासिनाम् ॥ ब्राह्मणानां महाभाग वेदाध्ययनशालिनाम् ॥ ३ ॥
ऋषिवाटाश्च दृश्यन्ते शकटीशतसंकुलाः ॥ देशो विधीयतां ब्रह्मन्यत्र वत्स्यामहे वयम् ॥ ४ ॥
रामस्य वचनं श्रुत्वा विश्वामित्रो महामुनिः ॥ निवेशमकरोद्देशे विविक्ते सलिलायुते ॥ ५ ॥
विश्वामित्रमनुप्राप्तं श्रुत्वा स नृपतिस्तदा ॥ शतानन्दं पुरस्कृत्य पुरोहितमनिन्दितम् ॥
प्रत्युज्जगाम सहसा विनयेन समन्वितः ॥ ६ ॥
ऋत्विजोपि महात्मानस्त्वर्घ्यमादाय सत्वरम् ॥ विश्वामित्राय धर्मेण ददुर्मन्त्रपुरस्कृतम् ॥ ७ ॥

पाद्यादिकंचकारेत्यन्वयः ॥ २० ॥ रामस्येतिशेषः । सम्यगागमःसमागमः नृत्तगीतादिकमितियावत् ॥ २१ ॥ गौतमस्यवशानुगामित्यनेन गौतमस्तदा रामागमनंविदित्वासमागतइत्यवगम्यते ॥ २२ ॥ तेपे तत्रैवाश्रमइतिशेषः ॥ २३ ॥ ततः तस्माद्देशात् ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनपञ्चाशःसर्गः ॥ ४९ ॥

एवंरामस्यपरमपावनत्वमुक्तं अथतस्यसीताविवाहवृत्तान्तंप्रस्तौतिश्रियःपतित्वंप्रतिपादयितुंपञ्चाशे–ततः प्रागित्यादि । प्राच्याउत्तरस्याश्चदिशोन्तरालंयत्साप्रागुत्तरातां ऐशानींदिशमित्यर्थः । ततः तस्मादाश्रमात् । यज्ञवाटं जनकस्येतिशेषः ॥ १ ॥ यज्ञसमृद्धिः यज्ञसंभारसामग्री ॥२॥ तामेवाह्—बहूनीति । ब्राह्मणानांसहस्राणीत्यन्वयः । दृश्यन्तइतिवक्ष्यमाणमनुषज्यते ॥ ३ ॥ ऋषिवाटाः ऋषिनिवासाः । विधीयतां कल्प्यतां । बहुसंकुलत्वेनैवमुक्तं ॥४॥ विविक्ते विजने पूतेवा । "विविक्तौपूतविजनौ" इत्यमरः। आयुते युक्ते । यौतेर्मिश्रणार्थात्क्तः ॥ ५ ॥ विश्वामित्रमितिसार्धश्लोकः । प्रत्युज्जगाम दीक्षितविमितप्रदेशसीमानमनतिलङ्घयन्नित्यर्थः ॥ ६ ॥ अर्घ्यमित्यातिथ्यस्योपल-

---

शि० इयंयज्ञसमृद्धिःसाध्वी । हिशब्दइयमित्यर्थे ॥२ ॥ **ति०** विश्वामित्रमित्यादिसार्धश्लोकद्वयमेकान्वयं । ऋत्विजोपीत्यत्रपुरस्कृत्येत्यनुकर्षः । महात्मानइतिद्वितीयार्थेप्रथमा । धर्मेण धर्मशास्त्रमार्गेण ददौ । अर्घ्यमितिशेषः । धर्मपुरस्कृतमित्यर्घ्यविशेषणं । "महाजंवामहोक्षंवाश्रोत्रियायोपकल्पयेत्" इतिशास्त्रोक्तेनधर्मसाधनेनपुरस्कृतं तत्सहितमितियावत्॥ **शि०** सत्वराः त्वरायुक्ताः महात्मानऋत्विजः धर्मेण धर्मोत्पादकविधिना मन्त्रपुरस्कृतंअर्घ्यमादाय ग्राहयित्वा ददुः जनकेनदापयामासुः ॥ ७ ॥

[पा०] १ क—घ. च. दुंदुभिनिस्वनः. २ ख. गन्धर्वाप्सरसानांच. क. ङ. च. छ. झ. ञ. अप्सरसांचैव. ३ क. ख. ङ. च. छ. झ. ञ. स्समुत्सवः. ४ ट. महायशाः. ५ ख. घ. ज. ट. महात्मनः. ६ क. ङ. च. छ. झ. ञ. ट. निवासमकरोद्देशे. ७ क. ङ. ञ. झ. ट. सलिलान्विते. ८ क—घ. विश्वामित्रंमुनिश्रेष्ठं. ९ ङ. च. छ. झ. ञ. नृपवरस्तदा. १० ङ. च. छ. झ. ञ. मनिन्दितः. ११ ङ. च. छ. झ. ञ. पुस्तकेषु प्रत्युज्जगामसहसा–ऋत्विजोपिमहात्मानः इत्यर्धयोःपौर्वापर्यंदृश्यते. १२ ज. विस्मयेनसमन्वितः. १३ क. ख. ग. ज. ट. सत्वराः. १४ ङ. छ. झ. ञ. ददौधर्मपुरस्कृतम्.

[1]प्रतिगृह्य तु तां पूजां जनकस्य महात्मनः ॥ पप्रच्छ कुशलं राज्ञो यज्ञस्य च निरामयम् ॥ ८ ॥
[2]स तांश्चापि मुनीन्पृष्ट्वा सोपा[3]ध्यायपुरोधसः ॥ [4]यथान्यायं ततः सर्वैः स[5]मागच्छत्प्रहृष्टवत् ॥ ९ ॥
अथ राजा मुनिश्रेष्ठं कृताञ्जलिरभाषत ॥ आसने [6]भगवन्नास्तां सहैभि[7]र्मुनिसत्तमैः ॥ १० ॥
जनकस्य वचः श्रुत्वा निषसाद महामुनिः ॥ पुरोधा ऋत्विजश्चैव राजा च सह मन्त्रिभिः ॥ ११ ॥
आसनेषु यथान्याय[8]मुपविष्टान्समन्ततः ॥ दृष्ट्वा स नृपतिस्तत्र विश्वामित्रमथाब्रवीत् ॥ १२ ॥
अद्य यज्ञसमृद्धिर्मे सफला दैवतैः कृता ॥ अद्य यज्ञफलं प्राप्तं भगवद्दर्शनान्मया ॥ १३ ॥
धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुङ्गव ॥ यज्ञोपसदनं ब्रह्मन्प्राप्तोसि मुनिभिः सह ॥ १४ ॥
द्वादशाहं तु ब्रह्मर्षे [9]शेषमाहुर्मनीषिणः ॥ ततो भागार्थिनो देवान्द्रष्टुमर्हसि कौशिक ॥ १५ ॥
इत्युक्त्वा मुनिशार्दूलं [10]प्रहृष्टवदनस्तदा ॥ [11]पुनस्तं परिपप्रच्छ प्राञ्जलिः [12]प्रणतो नृपः ॥ १६ ॥
इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ॥ [13]गजसिंहगती वीरौ शार्दूलवृषभोपमौ ॥ १७ ॥
पद्मपत्रविशालाक्षौ खड्गतूणीधनुर्धरौ ॥ अश्विनाविव रूपेण समुपस्थितयौवनौ ॥ १८ ॥
[14]यदृच्छयैव [15]गां प्राप्तौ देवलोकादिवामरौ ॥ [[16]पुण्डरीकविशालाक्षौ वरायुधधरावुभौ ॥ १९ ॥
बद्धगोधाङ्गुलित्राणौ खड्गवन्तौ महाद्युती ॥ काकपक्षधरौ वीरौ कुमाराविव पावकी ॥
रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणौ ॥ २० ॥
प्राकाश्यं कुलमस्माकं मामुद्धर्तुमिहागतौ] ॥ कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ॥ २१ ॥
वरायुधधरौ वीरौ कस्य पुत्रौ [17]महामुने ॥ भूषयन्ताविमं देशं चन्द्रसूर्याविवांबरम् ॥ २२ ॥
परस्परस्य सदृशौ [18]प्रमाणेङ्गितचेष्टितैः ॥ [19]काकपक्षधरौ वीरौ श्रोतुमिच्छामि तत्वतः ॥ २३ ॥
तस्य तद्वचनं श्रुत्वा जनकस्य महात्मनः ॥ न्यवेदयन्[20]महात्मानौ पुत्रौ दशरथस्य तौ ॥ २४ ॥

क्षणं । मन्त्रपुरस्कृतमित्यनेनमधुपर्ककरणमुच्यते ॥७॥ निरामयं निरुपप्लवत्वं ॥ ८ ॥ तान् अर्घ्यदातॄन् । सोपाध्यायपुरोधसः उपाध्यायाः ऋत्विजः । पुरोधाः शतानन्दः तत्सहितांस्तान् । कुशलंपृष्ट्वेत्यर्थः । सर्वैः जनैः शतानन्दऋत्विगादिभिः । प्रहृष्टवत् सहर्षमित्यर्थः । भावेनिष्ठा । यथान्यायं यथाक्रमं । पृष्ट्वेत्यन्वयः ॥ ९—१० ॥ राजाचेति विश्वामित्रवचनादित्यर्थसिद्धम् ॥ ११ ॥ उपविष्टान् तानितिशेषः ॥ १२ ॥ यज्ञसमृद्धिः समग्रता जातेतिशेषः । सादैवतैःसफलाकृताच । तिष्ठतुयज्ञः भवद्दर्शनमेवयज्ञफलमित्याह—अद्ययज्ञफलमिति ॥ १३—१४ ॥ द्वादशअहानिसमाहृतानिद्वादशाहं "राजाहस्सखिभ्यष्टच्" इतिटच् । "नसङ्ख्यादेः—" इत्यहादेशाभावः । द्वादशदिनान्यवशिष्टानियज्ञस्येतिमनीषिणऋत्विजआहुः । ततःभागार्थिनोदेवानिति द्वादशदिनान्तेसुत्याहोमोभविष्यतीत्यर्थः ॥ १५ ॥ प्रहृष्टेतिकुतूहलविशेषःसूच्यते ॥१६॥ इमावित्यादिश्लोकपञ्चकंव्याख्यातं ॥ १७—२३ ॥ तौ दशरथस्यपुत्राविति न्यवेदयदित्यर्थः ॥ २४ ॥

ति० यज्ञसमृद्धिः अङ्गवैकल्यराहित्यंसाद्गुण्यंच । अतएवसफलाकृता । इष्टिरितिशेषः ॥ १३ ॥ **ति०** दीक्षांकर्तव्यत्वेनाहुः । दीक्षायास्तावन्तिदिनान्यवशिष्टानिऋत्विजआहुः ॥ १५ ॥ इतिपञ्चाशस्सर्गः ॥ ५० ॥

[पा०] १ क. ग. प्रतिगृह्यच. २ ङ. च. छ. झ. ञ. ट. सतांश्चाथ. ज. सतानितिमुनिःपृष्ट्वा. क. ग. सतांश्चापिमुनिर्दृष्ट्वा. घ. सतांश्चायमुनिश्रेष्ठान्. ख. मुनीन्दृष्ट्वा. ३ क. ख. सोपाध्यायपुरोहितः. ४ ङ. च. छ. झ. ञ. ट. यथार्हमृषिभिस्सर्वैः. ख. यथान्यायंमुनिवरैः. घ. ज. यथान्यायमृषिस्सर्वैः. क. यथान्यायंमुनिवरान्. ५ घ. समागम्यप्रहृष्टवत्. ६ क. ग. ङ. च. छ. झ. ञ. ट. भगवानास्तां. ७ ख. ग. ङ. च. छ. झ. ञ. मुनिपुंगवैः. ८ क—छ. झ. ञ. ट. मुपविष्टास्समन्ततः. ९ ङ. झ. दीक्षामाहुर्मनीषिणः. ङ. च. छ. ञ. शेषमाहुर्मनस्विनः. १० क. घ. प्रहृष्टवदनंतदा. ख. प्रहृष्टवदनस्तथा. झ. प्रहृष्टवचनस्तदा. ११ क. ततःपुनस्तंपप्रच्छ. १२ क.—ट. प्रयतोनृपः. १३ ङ. झ. ञ. गजतुल्यगती. १४ ङ—ञ. यदृच्छयैव. १५ घ. ज. ट. संप्राप्तौ. १६ एतदर्धपंचकं क. ख. ज. दृश्यते. च. छ. पुस्तकयोःप्रमाणेङ्गितचेष्टितैरित्यतःपरंदृश्यते. १७ ख. महाबलौ. १८ ख. घ. ज. ट. रूपेणेङ्गितचेष्टितैः. १९ ख. सर्वलक्षणसंपन्नौ. क. कस्यपुत्रौमुनिश्रेष्ठ. २० क. ङ. च. छ. झ. ञ. दमेयात्मा.

सिद्धाश्रमनिवासं च राक्षसानां वधं तथा ॥ तंत्रागमनमव्यग्रं विशालायाश्च दर्शनम् ॥ २५ ॥
अहल्यादर्शनं चैव गौतमेन समागमम् ॥ महाधनुषि जिज्ञासां कर्तुमागमनं तथा ॥ २६ ॥
एतत्सर्वं महातेजा जनकाय महात्मने ॥ निवेद्य विरराभाथ विश्वामित्रो महामुनिः ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

विश्वामित्रेणशतानन्दंप्रतितन्मातुरहल्यायाःपत्यागौतमेनसौमनस्येनपरिपूजनकथनम् ॥ १ ॥ शतानन्देनरामंप्रतिविस्तरेणविश्वामित्रचरित्रकथनारंभः ॥ २ ॥ ब्रह्मपौत्रपौत्रेणविश्वामित्रेणराज्ञाकदाचनसहसेनयाभूसंचरणानुसारेणवसिष्ठाश्रमाभिगमनम् ॥ ३ ॥

तस्य तद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः ॥ हृष्टरोमा महातेजाः शतानन्दो महातपाः ॥ १ ॥
गौतमस्य सुतो ज्येष्ठस्तपसा द्योतितप्रभः ॥ रामसंदर्शनादेव परं विस्मयमागतः ॥ २ ॥
सँ तौ निषण्णौ संप्रेक्ष्य सुखासीनौ नृपात्मजौ ॥ शतानन्दो मुनिश्रेष्ठं विश्वामित्रमथाब्रवीत् ॥ ३ ॥
अँपि ते मुनिशार्दूल मम माता यशस्विनी ॥ दर्शिता राजपुत्राय तपोदीर्घमुपागता ॥ ४ ॥
अपि रामे मँहातेजा मम माता यशस्विनी ॥ वन्यैरुपाहरत्पूजां पूजार्हे सर्वदेहिनाम् ॥ ५ ॥
अपि रामाय कथितं यँथावृत्तं पुरातनम् ॥ मम मातुर्महातेजो दैवेनँ दुरनुष्ठितम् ॥ ६ ॥
अपि कौशिक भद्रं ते गुरुणा मम संगता ॥ माँतां मम मुनिश्रेष्ठ रामसंदर्शनादितः ॥ ७ ॥

सिद्धेत्यादित्रयः । अव्यग्रं रक्षस्सहस्रावृतेमार्गेनिर्भयागमनं ॥२५॥ जिज्ञासांसारासारपरीक्षां ॥२६—२७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

अथाचार्यवैभवस्यज्ञेयत्वाभिप्रायेणविश्वामित्रचरित्रंप्रस्तौति—तस्यतद्वचनंइत्यादिभिःपञ्चदशभिःसर्गैः । तस्येत्यादिद्वौ । हृष्टरोमा संजातरोमाञ्चः । विस्मयमागतः अहोमहिमारामस्य यन्मेमाताकृतार्थीकृतेतिविस्मयंप्राप्तोभूदित्यर्थः ॥ १—२ ॥ निषण्णावित्यस्यविवरणं—सुखासीनाविति ॥३॥ स्वमातरिरामकृतानुग्रहस्यश्रुतस्यविस्मयावहतयापुनःपृच्छति—अपीत्यादि । अपिःप्रश्ने । ते त्वया । दीर्घतपउपागता पूर्वोक्तभस्मशायित्वादिलक्षणंतपःप्राप्ता । अनेनपाषाणीभूयस्थितेति पक्षोनवाल्मीकेः ॥ ४ ॥ रामे रामविषये । वन्यैः कन्दमूलफलादिभिः । अनेनपूर्वमपिवन्यैरेतस्यजीवनमितिगम्यते । सर्वदेहिनांपूजार्हइत्यनेन परत्वंव्यञ्जितं ॥ ५ ॥ हेमहातेजः विश्वामित्र । ममभातुर्विषये दैवेन इन्द्रेण विधिनावा । दुरनुष्ठितं दुरनुष्ठानरूपं । पुरातनंवृत्तं चरितं । यथा यथावत् । कथितंचापि कथितंकिं ॥ ६ ॥ गुरुणा पित्रा । इतः अस्मादुपस्थिताद्रामसंदर्शनात् । यद्वा रामसंदर्शनादितः रामसंदर्शनादिना । तृतीयार्थेतसिः । पूजा अपिशब्दार्थः ॥ ७ ॥

शि० विस्मयमागतः प्राप्तः । आसीदितिशेषः । एतेन रघुनाथशरीरशोभादेर्लौकिकविलक्षणत्वंध्वनितम् ॥२॥ शि० यशस्विनीत्यनेनपतिवेषोपिनानादरणीयइतिबुद्ध्यैवेन्द्रस्वीकारःकृतइतिध्वनितम् । तेनतस्याःपतिव्रताग्रणीत्वंव्यक्तं ॥४॥ ति० । ममगुरुणा ममभातेत्यन्वयः । अत्रवारद्वयंममेतिप्रयोगःहर्षातिशयात् । रामसंदर्शनादितइत्यस्यगतशापेतिशेषः । आदिनापूजापादस्पर्शौ ॥७॥

[पा०] १ ख. राक्षसानांचतद्वधम्. २ ङ. झ. ट. तत्रागमन. ३ च. कर्तुमारोपणंतदा. क. ख. मारोपणंतथा. छ. ज. मागमनंतदा. ४ ङ. च. छ. झ. ञ. एतौनिषण्णौ. ५ ङ. च. छ. पुस्तकेषु. शतानन्दोनृपात्मजौ. सुखासीनौमुनिश्रेष्ठंइतिपाठक्रमो दृश्यते. ६ ख. घ. अपिसामुनिशार्दूल. ७ च. छ. ञ. महाभाग. ग. ट. महातेजो. ८ ङ. च. छ. झ. ञ. यद्वृत्तंतत्पुरातनम्, ९ ङ—ञ. देवेनदुरनुष्ठितम्. ट. देवेनयदनुष्ठितम्. ख. घ. दैवेनयदनुष्ठितम्. १० ग. ङ. च. छ. ञ. ममभाता,

अपि मे गुरुणा रामः पूजितः कुशिकात्मज ॥ इहागतो महातेजाः [1]पूजां प्राप्तो महात्मनः ॥ ८ ॥
अपि शान्तेन मनसा गुरुर्मे कुशिकात्मज ॥ इहागतेन रामेण [2]प्रयतेनाभिवादितः ॥ ९ ॥
तच्छ्रुत्वा वचनं तस्य विश्वामित्रो महामुनिः ॥ प्रत्युवाच शतानन्दं [3]वाक्यज्ञो वाक्यकोविदम् ॥ १० ॥
नातिक्रान्तं मुनिश्रेष्ठ यत्कर्तव्यं कृतं मया ॥ संगता मुनिना पत्नी भार्गवेणेव रेणुका ॥ ११ ॥
तच्छ्रुत्वा वचनं तस्य [4]विश्वामित्रस्य धीमतः ॥ शतानन्दो महातेजा रामं वचनमब्रवीत् ॥ १२ ॥
स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोसि राघव ॥ विश्वामित्रं पुरस्कृत्य [5]महर्षिमपराजितम् ॥ १३ ॥
[6]अचिन्त्यकर्मा तपसा [7]ब्रह्मर्षिरतुलप्रभः ॥ विश्वामित्रो [8]महातेजा [9]वेत्स्येनं परमां गतिम् ॥ १४ ॥
नास्ति धन्यतरो राम त्वत्तोऽन्यो भुवि कश्चन ॥ गोप्ता कुशिकपुत्रस्ते येन तप्तं महत्तपः ॥ १५ ॥
[10]श्रूयतामभिधास्यामि कौशिकस्य महात्मनः ॥ यथाबलं [11]यथावृत्तं तन्मे निगदतः शृणु ॥ १६ ॥
[12]राजाऽभूदेष धर्मात्मा दीर्घकाल[13]मरिन्दमः ॥ [14]धर्मज्ञः कृतविद्यश्च प्रजानां च हिते रतः ॥ १७ ॥
प्रजापतिसुतस्त्वासीत्कुशो नाम महीपतिः ॥ कुशस्य पुत्रो बलवान्कुशनाभः सुधार्मिकः ॥ १८ ॥
कुशनाभसुतस्त्वासीद्गाधिरित्येव विश्रुतः ॥ गाधेः पुत्रो महातेजा विश्वामित्रो महामुनिः ॥ १९ ॥
विश्वामित्रो महातेजाः पालयामास मेदिनीम् ॥ बहुवर्षसहस्राणि राजा राज्यमकारयत् ॥ २० ॥
[15]कदाचित्तु महातेजा योजयित्वा [16]वरूथिनीम् ॥ अक्षौहिणीपरिवृतः परिचक्राम मेदिनीम् ॥ २१ ॥
नगराणि [17]च राष्ट्राणि सरितश्च [18]तथा गिरीन् ॥ आश्रमान्क्रमशो [19]रामे विचरन्नाजगामह ॥ २२ ॥
वसिष्ठस्याश्रमपदं [20]नानावृक्षसमाकुलम् ॥ नानामृगगणाकीर्णं सिद्धचारणसेवितम् ॥ २३ ॥
देवदानवगन्धर्वैः किंनरै[21]रुपशोभितम् ॥ [22]प्रशान्तहरिणाकीर्णं द्विजसङ्घनिषेवितम् ॥ २४ ॥

इह् अस्मदाश्रमे । आगतः महातेजाः गुरुः । महात्मनः रामात् । पूजां अहल्यालाभरूपां । अपिप्राप्तः ॥ ८ ॥ शान्तेन कोपरहितेन । मनसा उपलक्षितोगुरुः । इह अस्मदाश्रमे । आगतेन । प्रयतेन मनस्सक्तिरूपयत्नवता । रामेण अभिवादितःकिं ॥ ९—१० ॥ नातिक्रान्तं मयासमयातिक्रमोनकृतः । समयेयत्कर्तव्यं तत्कृतं । तदेवाह्—संगतेति । नातिक्रान्तमित्यस्यविवरणं—यत्कर्तव्यमिति । तस्यविवरणं—संगतेति । भार्गवेण जमदग्निना । रेणुका परशुराममातेवेतिभावः ॥ ११—१२ ॥ दिष्ट्या दैवयोगेन ॥ १३ ॥ विश्वामित्रंस्तौति—अचिन्त्येत्यादि । तपसाब्रह्मर्षिः तपसाप्राप्तब्रह्मर्षिभावः । परमांगतिं तवपरमहितप्रदं । वेत्सीत्यत्रकाकुरनुसन्धेया ॥ १४ ॥ एतदेवाह्—नास्तीति । धन्यत्वेहेतुः—गोप्तेति । येन कुशिकपुत्रेण ॥ १५ ॥ बलं तपोबलं । यथा यादृशं । वृत्तं चरित्रंच । यथा यादृशं । तथा तत्सर्वं । मे मत्तः । शृणु ॥ १६—१७ ॥ कस्यराज्ञःपुत्रइत्यत्राह्—प्रजापतीत्यादिश्लोकत्रयं ॥ १८—१९ ॥ पालयामासेत्यस्यविवरणं—बह्विति ॥ २० ॥ कदाचिदित्याद्यष्टौश्लोकाः । वरूथिनी चतुरङ्गबलं । योजयित्वा उपस्थाप्य ॥ २१—२३ ॥ प्रशान्तत्ववि-

---

ति० महातेजारामः मद्गुरोस्सकाशात्पूजांप्राप्य इहयज्ञभूमावागतइतिपृष्टस्यैवार्थस्यभङ्ग्यन्तरेणप्रश्नः ॥ ८ ॥ ति० शान्तेनमनसोपलक्षितोमेगुरुः । इहागतेन गौतमाश्रमेआगतेन । गौतमपूजितेनरामेणाभिवादितः । नतुमन्मातृदोषात्तिरस्कृतइति प्रश्नान्तरं । पूजाङ्गीकारवन्दनेअतिरस्कारचिह्नमितिभावः ॥ ९ ॥ ति० गोप्ता अन्नदानादिना ॥ १५ ॥ ती० बलं क्षत्रबलं । यथा

[पा०] १ क—ट. पूजांप्राप्य. २ ङ. च. छ. झ. ञ. पूजितेनाभिवादितः. घ. प्रयत्नेनाभि. ३ घ. वाक्यज्ञंवाक्यकोविदः. ४ क—घ. ज. विश्वामित्रस्यभाषितं. ५ क. च. ञ. मभिपूजितम्. ६ च. अचिन्त्यतपसायुक्तो. ७ ग. ङ. च. छ. झ. ञ. रमितप्रभ. ८ ख. महाभाग. क. च. छ. ञ. महाबाहो. ९ ङ. झ. ट. वेद्म्येनं. १० ख—छ. झ. ञ. श्रूयतांचापि. ११ ख. ङ. च. छ. झ. ञ. यथातत्वं. १२ ङ. च. छ. झ. ञ. राजासीदेष. १३ क. ख. घ. च. मरिंदम. १४ क. ख. सर्वज्ञः. १५ घ. कदाचित्समहातेजाः. १६ ग. षडङ्गिनीम्. १७ ख. घ. सराष्ट्राणि. १८ क. ख. च. छ. झ. ञ. महागिरीन्. १९ क. ख. घ—छ. झ. ञ. ट. राजा. २० ङ. ज. झ. ट. नानापुष्पलताद्रुमम्. क. ख. घ. नानापुष्पफलद्रुमम्. च. नानापक्षिलताद्रुतम्. छ. ञ. नानापक्षिलताद्रुमम्. २१ घ. रपिसेवितम्. २२ क. ख. प्रकीर्णद्विजसंघातैर्हरिणौघनिपेवितम्.

ब्रह्मर्षिगणसंकीर्णं देवर्षिगणसेवितम् ॥ तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभिः ॥ २५ ॥
[1][संततं संकुलं श्रीमद्ब्रह्मकल्पैर्महात्मभिः] ॥ अ[2]ब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा ॥
फलमूलाशनैर्दान्तैर्जितरो[3]षैर्जितेन्द्रियैः ॥ २६ ॥
ऋषिभिर्वालखिल्यैश्च जपहोमपरायणैः ॥ अन्यैर्वैखानसैश्चैव समन्तादुपशोभितम् ॥ २७ ॥
वसिष्ठस्याश्रमपदं ब्रह्मलोकमिवापरम् ॥ ददर्श जयतां श्रेष्ठो विश्वामित्रो महाबलः ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकपञ्चाशस्सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ॥ ५२ ॥

वसिष्ठेनससैन्यस्यविश्वामित्रस्यातिथ्यायनिजहोमधेनुं शबलांप्रतिसोपस्करान्नसर्जननियोजनम् ॥ १ ॥

स[4] दृष्ट्वा परमप्रीतो विश्वामित्रो महाबलः ॥ प्र[5]णतो विनयाद्वीरो वसिष्ठं जपतांवरम् ॥ १ ॥
स्वागतं तव चेत्युक्तो वसिष्ठेन महात्मना ॥ आसनं चास्य भगवान्वसिष्ठो व्यादिदेश ह ॥ २ ॥
उपविष्टाय च तदा विश्वामित्राय धीमते ॥ यथान्यायं मु[6]निवरः फ[7]लमूलमुपाहरत् ॥ ३ ॥
प्र[8]तिगृह्य च तां पूजां वसिष्ठाद्राजसत्तमः ॥ तपोग्निहोत्रशिष्येषु कुशलं पर्यपृच्छत ॥ ४ ॥
विश्वामित्रो महातेजा वनस्पतिगणे त[9]था ॥ सर्वत्र कुशलं चा[10]ह वसिष्ठो राजसत्तमम् ॥ ५ ॥
सुखोपविष्टं राजानं विश्वामित्रं महातपाः ॥ पप्रच्छ जपतां श्रेष्ठो वसिष्ठो ब्रह्मणः सुतः ॥ ६ ॥
कच्चित्ते कुशलं राजन्कच्चिद्धर्मेण रञ्जयन् ॥ प्रजाः पा[11]लयसे वीर राजवृत्तेन धार्मिक ॥ ७ ॥
कच्चित्ते संभृ[12]ता भृत्याः कच्चित्तिष्ठन्ति शासने ॥ कच्चित्ते विजिताः सर्वे रिपवो रिपुसूदन ॥ ८ ॥
कच्चि[13]द्बलेषु कोशेषु मित्रेषु च परंतप ॥ कुशलं ते नरव्याघ्र पु[14]त्रपौत्रे त[15]वानघ ॥ ९ ॥

शेषणाय पुनर्हरिणोपादानं ॥ २४—२५ ॥ अब्भक्षैः अम्मात्रभक्षैः । दान्तैर्नियतमनस्कैः ॥ २६ ॥ वालखिल्याः ब्रह्मणोवालजाऋषयः । वैखानसाः तन्नखजाः "येनखास्तेवैखानसाः । येवालास्तेवालखिल्याः" इतिश्रुतेः । वसिष्ठाश्रमवैभववर्णनं एवंभूतेनापिसंमानितोविश्वामित्रइतितस्यवैभवकथनार्थं ॥ २७—२८ ॥ इति गोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

विश्वामित्रसंमानंद्विपञ्चाशे—सदृष्ट्वेत्यादि । वसिष्ठंदृष्ट्वा प्रणतः प्रणनाम ॥ १ ॥ उक्तः ऊचे । व्यादिदेश दापयामासेत्यर्थः ॥ २ ॥ उपविष्टायेत्यादिचत्वारः । फलमूलमिति "जातिरप्राणिनां" इत्येकवत्त्वं ॥ ३—४ ॥ राजसत्तमं प्रतीतिशेषः ॥ ५—६ ॥ कच्चिदित्यादित्रयः कच्चिदितिकामप्रवेदनेऽव्ययं । "कच्चित्कामप्रवेदन" इत्यमरः । तवकुशलंममेप्सितमित्यमुमर्थंद्योतयति । राजवृत्तेन चतुर्विधेन । उपलक्षितः । यथाहुः "न्यायेनार्जनमर्थस्यवर्धनंपालनंतथा । सत्पात्रेप्रतिपत्तिश्चराजवृत्तंचतुर्विधं" इति ॥ ७ ॥ संभृताः पोषिताः । तिष्ठन्तीतिशेषः ॥ ८ ॥ बलेषुचतुरङ्गबलेषु । कोशेषु अर्थसमूहेषु पुत्रपौत्रइति गवा-

---

याद्दर्शं । वृत्तं तपोरूपं । ति० तत्वं ब्रह्मर्षित्वंच ॥१६॥ ति० ज्ञानमात्राधिकृतानारदाद्यादेवलोकसंचारिणोदेवर्षयः । ज्ञानकर्मोभयाधिकृताब्रह्मर्षयोभूप्रतिष्ठाः । शि० अग्निकल्पैः अग्निंकल्पयन्तिप्रतिदिनंविधिनास्थापयन्तितेअग्निहोत्रिणइतियावत् । तैः ॥२५॥ शि० श्रीमद्ब्रह्मकल्पैः श्रीमन्तोयेब्रह्म वेदंकल्पयन्ति वेदशाखाविभागकर्तारइतियावत् । तैः ॥ २६ ॥ इत्येकपञ्चाशस्सर्गः ॥५१॥

[पा०] १ इदमर्धं ख—ट. दृश्यते. २ घ. अग्निभक्षै. ३ ङ. झ. जितदोषैः. ४ ङ—ट. तंदृष्ट्वा. ५ क. ख. प्रणम्य. ६ क. ख. मुनिश्रेष्ठः. घ. ऋषिवरः. ७ क. ख. घ. फलमूलान्युपाहरत्. ८ घ—छ. झ. ञ. प्रतिगृह्यतु. ९ ग—ञ. तदा. १० ङ. च. छ. झ. ञ. प्राह. ११ घ—ञ. पालयसेराजन्. १२ ग. ट. सुभृताः. १३ क. ख. घ. द्बलेचकोशेच. ज. द्बलेवाकोशेवा. १४ घ. ज. पुत्रेपौत्रे. १५ ङ—ट. तथानघ.

सर्वत्र कुशलं राजा वसिष्ठं प्रत्युदाहरत् ॥ विश्वामित्रो महातेजा वसिष्ठं विनयान्वितः ॥ १० ॥
कृत्वोभौ सुचिरं कालं धर्मिष्ठौ ताः कथाश्शुभाः॥ मुदा परमया युक्तौ प्रीयेतां तौ परस्परम् ॥११॥
ततो वसिष्ठो भगवान्कथान्ते रघुनन्दन ॥ विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥ १२ ॥
आतिथ्यं कर्तुमिच्छामि बलस्यास्य महाबल ॥ तव चैवाप्रमेयस्य यथार्हं संप्रतीच्छ मे ॥ १३ ॥
सत्क्रियां हि भवानेतां प्रतीच्छतु मयोद्यताम् ॥ राजा त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः ॥१४॥
एवमुक्तो वसिष्ठेन विश्वामित्रो महामतिः ॥ कृतमित्यब्रवीद्राजा प्रियवाक्येन मे त्वया ॥ १५ ॥
फलमूलेन भगवन्विद्यते यत्तवाश्रमे ॥ पाद्येनाचमनीयेन भगवद्दर्शनेन च ॥ १६ ॥
सर्वथा च महाप्राज्ञ पूजार्हेण सुपूजितः ॥ गमिष्यामि नमस्तेस्तु मैत्रेणेक्षस्व चक्षुषा ॥ १७ ॥
एवं ब्रुवन्तं राजानं वसिष्ठः पुनरेव हि ॥ न्यमन्त्रयत धर्मात्मा पुनः पुनरुदारधीः ॥ १८ ॥
बाढमित्येव गाधेयो वसिष्ठं प्रत्युवाच ह ॥ यथा प्रियं भगवतस्तथाऽस्तु मुनिसत्तम ॥ १९ ॥
एवमुक्तो महातेजा वसिष्ठो जपतां वरः ॥ आजुहाव ततः प्रीतः कल्माषीं धूतकल्मषः ॥ २० ॥
एह्येहि शबले क्षिप्रं शृणु चापि वचो मम ॥ सबलस्यास्य राजर्षेः कर्तुं व्यवसितोऽस्म्यहम् ॥
भोजनेन महार्हेण सत्कारं संविधत्स्व मे ॥ २१ ॥
यस्य यस्य यथाकामं षड्रसेष्वभिपूजितम् ॥ तत्सर्वं कामधुक् क्षिप्रमभिवर्ष कृते मम ॥ २२ ॥
रसेनान्नेन पानेन लेह्यचोष्येण संयुतम् ॥ अन्नानां निचयं सर्वं सृजस्व शबले त्वर ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

श्वप्रभृतिल्वादेकवस्त्वं ॥ ९ ॥ सर्वत्र वसिष्ठपृष्टसर्वविषयइत्यर्थः । वसिष्ठं धनिकं ॥१०॥ ताःकथाः अन्योन्यकुशलप्रश्नोत्तररूपाः । प्रीयेतां अप्रीणयतां ॥११॥ ततइत्यादित्रयः । प्रहसन्निव प्रसन्नमुखइत्यर्थः ॥१२॥ संप्रतीच्छ प्रतिगृहाण ॥ १३ ॥ उद्यतांचिकीर्षितां ॥ १४ ॥ एवमितित्रयः । प्रियवाक्येन आतिथ्यंकरिष्यामीत्यनेनवचनेन । आतिथ्यंकृतं ॥ १५ ॥ तवाश्रमेयद्विद्यते तेनफलमूलेनसुपूजितइत्यन्वयः । पूजार्हेण त्वयेतिशेषः । मैत्रेण स्नेहयुक्तेन । मत्वर्थीयाजन्तः ॥ १६—१७ ॥ एवंब्रुवन्तमितिद्वौ । पुनःन्यमन्त्रयत भोजनार्थंप्रार्थनमकरोत् । पुनःपुनरित्यत्र न्यमन्त्रयतेत्यनुषज्यते । बहुशःप्रत्युत्तरेपि पुनःपुनर्न्यमन्त्रयतेत्यर्थः ॥ १८ ॥ गाधेयः गाधिपुत्रः । बाढमित्यस्यैवविवरणं यथेति ॥ १९ ॥ कल्माषीं चित्रवर्णां । शबलामितियावत् । "चित्रंकिर्मीरकल्माष—"इत्यमरः ॥२०॥ एहीतिसार्धश्लोकः । सबलस्यास्यराजर्षेःसत्कारंकर्तुं व्यवसितोस्मि । संविधत्स्व तदुपयोगिवस्तुजातंसंपादय ॥ २१ ॥ षड्रसेषु यद्यस्ययस्य अभिपूजितं अभिमतं । तत्सर्वं यथाकामं ममकृते अभिवर्षेत्यन्वयः । " अर्थेकृतेचतादर्थ्येनिपातद्वयमव्ययं " इतिनिघण्टुः ॥२२॥ रसेन रसायनभेदेन । अन्नेन भक्ष्येण शष्कुलीलाजादिना । पानेन पेयेन पानकरसादिना । लेह्य-

---

ति० एकोवसिष्ठशब्दोवरिष्ठवाची । शि० आवशिष्ठं अतिकान्तिमन्तं । विनयान्वितं विनयो विश्वामित्रकर्तृकविनम्रता । अन्वितःप्राप्तःयस्यैतं । आवशिष्ठशब्दःआङ्पूर्वककान्त्यर्थकवशधातुप्रकृतिकः औणादिकथन्प्रत्ययान्तः ॥ १० ॥ मुनिभा० कृतमित्येतत्पदंराजपदादुपरि वाक्यादौनिवेश्यं । वसिष्ठेनैवमुक्तोमहामतिर्विश्वामित्रो राजा कृतं वाक्येनमेपूजात्वयाकृतैवेत्यब्रवीत् ॥ १५ ॥ इतिद्विपञ्चाशस्सर्गः ॥ ५२ ॥

[पा०] १ ट. वशिष्ठं. २ ङ. च. ज. झ. ट. विनयान्वितम्. ३ ङ. च. छ. झ. ञ. कृत्वातौ. ४ ख. घ. ज. धर्मिष्ठौतौ. ५ क. ङ. च. छ. झ. ञ. ट. कथास्तदा. ६ क. घ. सत्क्रियांतु. ७ क. महर्तीत्वेतां. ख. घ. ज. ट. हिभवांस्त्वेतां. ८ क. प्रतीच्छत्वं. ९ ङ. झ. ञ. ट. मयाकृताम्. १० क. ख. घ—ट. राजंस्त्वमतिथि. ११ च. घ.—छ. झ. महामुनिः. १२ ख.—ञ. पूजावाक्येन. १३ ज. सर्वदा. १४ ख. सुमहाप्राज्ञ. १५ झ. नमस्तेऽस्तुगमिष्यामि. १६ ग. ङ. च. छ. झ. ञ. मुनिपुङ्गव. १७ ङ. च. छ. झ. ञ. एवमुक्तस्तथातेन. १८ ङ. च. छ. झ. ञ. ट. धूतकल्मषाम्. १९ ख—ट. कामधुग्दिव्ये. २० ग. ज. प्रवर्षस्वकृतेमम. २१ ग. ज. ट. अन्नाद्यनिचयं. २२ ज. ट. शबलेत्विह.

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

शबलाकल्पितविविधान्नभोजनेनपरिजनैःसहपरितोषमुपगतवताविश्वामित्रेणवसिष्ठंप्रतिप्रतिनिधितयाबहुगोधनधानादिस्वीकारेण शबलादानप्रार्थनेपिवसिष्ठेनतदनङ्गीकरणम् ॥ १ ॥

एवमुक्ता वसिष्ठेन शबला शत्रुसूदन ॥ विदधे कामधुक्कामान्यस्य यस्य यथेप्सितम् ॥ १ ॥
इक्षून्मधूंस्तथा लाजान्मैरेयांश्च वरासवान् ॥ पानानि च महार्हाणि भक्ष्यांश्चोच्चावचांस्तथा ॥ २ ॥
उष्णाढ्यस्यौदनस्यात्र राशयः पर्वतोपमाः ॥ मृष्टान्नानि च सूपांश्च दधिकुल्यास्तथैव च ॥ ३ ॥
नानास्वादुरसानां च षाडवानां तथैव च ॥ भाजनानि सुपूर्णानि गौडानि च सहस्रशः ॥ ४ ॥
सर्वमासीत्सुसंतुष्टं हृष्टपुष्टजनायुतम् ॥ विश्वामित्रबलं राम वसिष्ठेनाभितर्पितम् ॥ ५ ॥
विश्वामित्रोऽपि राजर्षिर्हृष्टः पुष्टस्तदाऽभवत् ॥ सान्तःपुरवरो राजा सब्राह्मणपुरोहितः ॥ ६ ॥
सामात्यो मन्त्रिसहितः सभृत्यः पूजितस्तदा ॥ युक्तः परमहर्षेण वसिष्ठमिदमब्रवीत् ॥ ७ ॥
पूजितोऽहं त्वया ब्रह्मन्पूजार्हेण सुसत्कृतः ॥ श्रूयतामभिधास्यामि वाक्यं वाक्यविशारद ॥ ८ ॥
गवां शतसहस्रेण दीयतां शबला मम ॥ ९ ॥
रत्नं हि भगवन्नेतद्रत्नहारी च पार्थिवः ॥ तस्मान्मे शबलां देहि ममैषा धर्मतो द्विज ॥ १० ॥

चोष्येण लेह्येन जिह्वास्वाद्येनक्षौद्रादिना । चोष्येण अधरपुटग्राह्येणदध्यादिनाच । समन्वितं "सर्वोद्वन्द्वो विभाषयैकवद्भवति" इत्येकवद्भावः । अन्नानां शाल्यन्नादीनां । निचयं राशिं । अनेनभक्ष्यभोज्यलेह्यचोष्यपेयखाद्यरूपषड्विधाभ्यवहारादर्शिताः ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

कामधेनुप्रार्थनंत्रिपञ्चाशे—एवमुक्तेत्यादि । यस्यस्ययथेप्सितं तथा कामान् काङ्क्षितान् । विदधे ॥ १ ॥ उक्तमेवप्रपञ्चयति—इक्षूनित्यादि । मधूनितिपुँल्लिङ्गत्वमार्षं । मैरेयाः मद्यविशेषाः मैरेयाख्यानित्यर्थः । "मैरेयमासवोधात्रीधातकीगुडवारिभिः" इतिवैजयन्ती । पानानि पानकादीनि । भक्ष्यान् अपूपविशेषान् । उच्चावचात् नानाप्रकारान् । "उच्चावचंनैकभेदं" इत्यमरः । विदधइत्यनुषज्यते ॥२॥ आसन्निति शेषः । मृष्टान्नानि इष्टान्नानि पायसभेदाइतियावत् ॥ ३ ॥ नानाविधाःस्वादवोरुच्याःरसाःमाधुर्यादयोयेषांतेषां । षाडवाः षड्रसविकृताःभक्ष्यविशेषाः । शैषिकोण् । तेषांपूर्णानि तैःपूर्णानीत्यर्थः । "पूरणगुण—" इत्यादिना तृतीयार्थेषष्ठी । गौडानि गुडविकाराः । अत्राप्यासन्नितिशेषः ॥ ४ ॥ पूर्वमेवहृष्टपुष्टजनायुतंविश्वामित्रबलंसर्वं सुसंतुष्टमासीदित्यन्वयः ॥ ५ ॥ हृष्टः आदरेण । पुष्टः भोजनादिना ॥ ६ ॥ अमात्याः कर्मणिसहायाः । मन्त्रिणः मन्त्रसहायाः ॥ ७ ॥ पूजार्हेण अस्मदादिभिरितिशेषः । पूजितः बहूकृतः । सुसत्कृतः आतिथ्येनसत्कृतः ॥ ८ ॥ शतसहस्रेण निष्क्रयभूतेन । अर्धम् ॥ ९ ॥ हि यस्मात् । एतत्रत्नं स्वजातिश्रेष्ठं । "रत्नंस्वजातिश्रेष्ठेपि" इत्यमरः । यतःपार्थिवोर-

ति० दधिकुल्याइत्युपलक्षणंदुग्धादेरपि ॥ ३ ॥ कत० खाण्डवानां भक्ष्यविशेषाणां । शेषेषष्ठी । तैःपूर्णानि । भोजनानि भोजनपात्राणि । गौडानि राजतानि । आसन्नितिशेषः । "रजतेगुडः" इत्यभिधानं ॥ ४ ॥ शि० सर्वनाम्नामुद्देश्यविधेयान्यतर-

[पा०] १ क. ग. ङ. छ. झ. न. ट. यस्येप्सितंयथा. ख. यस्ययथेप्सितान्. च. यस्येप्सितान्यथा. घ. यस्येप्सितंतथा. २ ग. मधुरसांल्लाजान्. ३ क. महार्हाणिचपानानि. ४ ङ. च. छ. झ. ञ. वचानपि. घ. वचांस्तदा. ५ क. ख. दनस्यापि घ. दनस्यास. ६ क. ख. ग. च. छ. ञ. मृष्टान्नानिचसूपांश्च. घ. मृष्टान्यन्नानिपूपांश्च. ७ ख. ग. घ. च. ज. षड्रसानांतथैवच. ङ. छ. झ. ञ. ट. खाण्डवानां. ८ ङ. च. झ. ञ. ट. भोजनानि. ९ घ. च. सुवर्णानि. १० क—घ. जनाकुलम्. ११ क. ख. बलंसर्वं. १२ ख. ग. घ. नाभितर्पितम्. ङ—ट. नसुतर्पितम्. १३ ङ. च. छ. झ. ञ. विश्वामित्रोहि. १४ ख. ग. ज. सुष्टःपुष्ट. १५ क. घ. सान्तःपुरचरो. १६ ख. ग. पुरोगमः. १७ क. घ—छ. ञ. परेणहर्षेण. १८ घ. चाभिधास्यामि. १९ घ. रत्नंचभगवन्.

एवमुक्तस्तु भगवान्वसिष्ठो मुनिसत्तमः ॥ विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिम् ॥ ११ ॥
नाहं शतसहस्रेण नापि कोटिशतैर्गवाम् ॥ राजन्दास्यामि शबलां राशिभी रजतस्य वा ॥ १२ ॥
न परित्यागमर्हेयं मत्सकाशादरिन्दम ॥ शाश्वती शबला मह्यं कीर्तिरात्मवतो यथा ॥ १३ ॥
अस्यां हव्यं च कव्यं च प्राणयात्रा तथैव च ॥ आयत्तमग्निहोत्रं च बलिर्होमस्तथैव च ॥ १४ ॥
स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा ॥ आयत्तमत्र राजर्षे सर्वमेतन्न संशयः ॥ १५ ॥
सर्वस्वमेतत्सत्येन मम तुष्टिकरी सदा ॥ कारणैर्बहुभी राजन्न दास्ये शबलां तव ॥ १६ ॥
वसिष्ठेनैवमुक्तस्तु विश्वामित्रोऽब्रवीत्ततः ॥ संरब्धतरमत्यर्थं वाक्यं वाक्यविशारदः ॥ १७ ॥
हैरण्यकक्ष्याग्रैवेयान्सुवर्णाङ्कुशभूषितान् ॥ ददामि कुञ्जराणां ते सहस्राणि चतुर्दश ॥ १८ ॥
हैरण्यानां रथानां ते श्वेताश्वानां चतुर्युजाम् ॥ ददामि ते शतान्यष्टौ किंकिणीकविभूषितान् ॥१९॥
हयानां देशजातानां कुलजानां महौजसाम् ॥ सहस्रमेकं दश च ददामि तव सुव्रत ॥ २० ॥
नानावर्णविभक्तानां वयस्स्थानां तथैव च ॥ ददाम्येकां गवां कोटिं शबला दीयतां मम ॥२१॥
यावदिच्छसि रत्नं वा हिरण्यं वा द्विजोत्तम ॥ तावद्ददामि तत्सर्वं शबला दीयतां मम ॥ २२ ॥
एवमुक्तस्तु भगवान्विश्वामित्रेण धीमता ॥ न दास्यामीति शबलां प्राह राजन्कथंचन ॥ २३ ॥
एतदेव हि मे रत्नमेतदेव हि मे धनम् ॥ एतदेव हि सर्वस्वमेतदेव हि जीवितम् ॥ २४ ॥
दर्शश्च पूर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः ॥ एतदेव हि मे राजन्विविधाश्च क्रियास्तथा ॥ २५ ॥

ब्रह्मरी तस्माद्धर्मतः न्यायतः । ममैषा मेदेहीत्यन्वयः ॥ १० ॥ एवमित्यादिषट् ॥ ११—१२ ॥ परित्यागं विश्लेषं । प्राप्तुंनार्हा । आत्मवतः मनस्विनः । कीर्तिरिव । मह्यं मम। शबला शाश्वती नित्यसंबन्धा ॥१३॥ हव्यं देवार्थं । कव्यं पित्रर्थं। प्राणयात्रा प्राणाग्निहोत्रं। अग्निहोत्रं सायंप्रातःकर्तव्योहोमविशेषः । बलिः भूतबलिः। होमः दर्शपूर्णमासादिः । एतत्सर्वं अस्यांआयत्तं एतदधीनं ॥१४॥ स्वाहाकारः स्वाहेतिमन्त्रः । वषट्कारो वषडितिमन्त्रः । विविधाविद्याः वेदाद्याश्च । अस्यामायत्ताः एतत्पयआदिप्राशनेनचित्तशुद्धेःप्राणत्प्रेर्देहबलादेश्चसाध्यत्वात्तदेकमूलत्वं। अत्रार्थे नसंशयः ॥१५॥ सत्येनवदामीत्यर्थः । कारणैः उक्तैरनुक्तैश्च ॥ १६ ॥ संरब्धतरं अत्यन्ताभिनिवेशयुक्तं ॥ १७ ॥ हैरण्यानि हिरण्मयानि कक्ष्याग्रैवेयाणियेषांते । कक्ष्या मध्यबन्धनार्थारज्जुः । "कक्ष्याप्रकोष्ठेहर्म्यादेःकाञ्च्यांमध्येभबन्धने "इत्यमरः । ग्रैवेयाणि ग्रीवाबन्धनरज्जवः । "ग्रीवाभ्योण्च" इतिचाढञ् । सहस्राणीत्यस्यपुंल्लिङ्गविशेषणमार्षं ॥ १८ ॥ चतुर्युजां चतुर्भिरश्वैर्युक्तानां । गमकत्वात्समासः । सङ्ख्यानियमपरत्वान्नपुनरुक्तिः । किङ्किणीकैर्विभूषितान् ॥ १९ ॥ देशाःकांभोजबाह्लीकादयः । कुलजानां गन्धर्वकुलजातानां । "गन्धर्वकुलजातस्त्वं " इतिपुराणवचनात् ॥ २० ॥ नानावर्णैःविभक्तानां अन्योन्यविलक्षणानां ॥ २१ ॥ यावत्प्रमाणमिच्छसि तावत्प्रमाणंसर्वंददामि ॥ २२ ॥ हे-राजन् शबलांनदास्यामीत्यन्वयः ॥ २३ ॥ एतदित्या-

लिङ्गतेतिसिद्धान्तात्एतदित्येतच्छन्दस्यनपुंसकत्वं ॥ १० ॥ ति० होमो वैश्वदेवादिः । स्वाहाकारवषट्कारौ तत्साध्ययज्ञौ ॥ १४ ॥ ति० किङ्किणीकविभूषितानिति षष्ठ्यर्थेद्वितीया । रथानांविशेषणमेतत् ॥ १९ ॥ इतित्रिपञ्चाशस्सर्गः ॥ ५३ ॥

[पा०] १ ङ. च. छ. झ. ञ. मुनिपुङ्गवः. २ घ. इमांदास्यामि. ग. नाहंदास्यामि. ३ ख. शबलाशाश्वती. ४ क. ख. ग. बलिहोम. ५ घ. आयत्तंमम. ६ ख. ङ. झ. करीतथा. ७ क. ख. ब्रवीद्वचः. ङ. च. झ. ट. ब्रवीत्तदा. ८ झ. कक्षाग्रैवेयान्. ९ ग. ङ. च. झ. ट. रथानांच. १० ज. दास्यामिते. ११ झ. किङ्किणीशत. १२ ज. ट. दास्यामितव. १३ क. ख. सवत्सानां. १४ ङ. च. छ. झ. ञ. रत्नानि. १५ क. ख. तावद्दास्यामि. १६ ङ. च. झ. ञ. दीयतांशबलामम. १७ क. ङ. ज. एतदेवहिमेसर्वं. १८ एतदेवहिसर्वस्वं. दर्शश्चपूर्णमासश्च. इत्यर्धयोः ज. पुस्तकेव्युत्क्रमोदृश्यते. १९ ज. मेरत्नं. २० च. यज्ञश्चैवसदक्षिणः.

अदोमूलाः क्रियाः सर्वा मम राजन्न संशयः ॥ बहुना किं प्रलापेन न दास्ये कामदोहिनीम् ॥२६॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

विश्वामित्रभटैर्बलात्काल्यमानयाशबलया वसिष्ठनिकटमेत्यसरोदनंशोचनम् ॥ १ ॥ वसिष्ठचोदनयाशबलोत्सृष्टभटैर्विश्वामित्रसेनानिरसनेरुष्टेनतेनाखतेजसा तत्सेनायादूरोत्सारणम् ॥ २ ॥

कामधेनुं वसिष्ठोपि यदा न त्यजते मुनिः ॥ तदास्य शबलां राम विश्वामित्रोन्वकर्षत ॥ १ ॥
नीयमाना तु शबला राम राज्ञा महात्मना ॥ दुःखिता चिन्तयामास रुदन्ती शोककर्शिता ॥ २ ॥
परित्यक्ता वसिष्ठेन किमहं सुमहात्मना ॥ याऽहं राजभटैर्दीना ह्रियेयं भृशदुःखिता ॥ ३ ॥
किं मयाऽपकृतं तस्य महर्षेर्भावितात्मनः ॥ यन्मामेनागसं भक्तामिष्टां त्यजति धार्मिकः ॥ ४ ॥
[इति सा चिन्तयित्वा तु विनिश्वस्य पुनःपुनः ॥ जगाम वेगेन तदा वसिष्ठं परमौजसम्] ॥ ५ ॥
निर्धूय तांस्तदा भृत्याञ्शतशः शत्रुसूदन ॥ जगामानिलवेगेन पादमूलं महात्मनः ॥ ६ ॥
शबला सा रुदन्ती च क्रोशन्ती चेदमब्रवीत् ॥ वसिष्ठस्याग्रतः स्थित्वा मेघदुन्दुभिराविणी ॥ ७ ॥
भगवन्किं परित्यक्ता त्वयाऽहं ब्रह्मणः सुत ॥ यस्माद्राजभृता मां हि नयन्ते त्वत्सकाशतः ॥ ८ ॥
एवमुक्तस्तु ब्रह्मर्षिरिदं वचनमब्रवीत् ॥ शोकसंतप्तहृदयां स्वसारमिव दुःखिताम् ॥ ९ ॥
न त्वां त्यजामि शबले नापि मेऽपकृतं त्वया ॥ एष त्वां नयते राजा बलान्मत्तो महाबलः ॥ १० ॥
न हि तुल्यं बलं मह्यं राजा त्वद्य विशेषतः ॥ बली राजा क्षत्रियश्च पृथिव्याः पतिरेव च ॥ ११ ॥
इयमक्षौहिणी पूर्णा सवाजिरथसंकुला ॥ हस्तिध्वजसमाकीर्णा तेनासौ बलवत्तरः ॥ १२ ॥

दित्रयं ॥ २४—२५ ॥ अदोमूलाः एतन्मूलाः । प्रलापेन भवतइतिशेषः । कामान्दोग्धुंशीलमस्त्यस्या इतिकामदोहिनीं "सुप्यजातौ" इतिणिनिः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

अथबलात्कारकुपितवसिष्ठप्रहितकामधेनोर्बलसृष्टिश्चतुःपञ्चाशे—कामधेनुमित्यादिदशकं ॥१—२॥ ह्रियेयं कर्मणिसंप्रश्नेलिङ् । कथमपिह्रियेयमित्यर्थः । भृशदुःखिता भृशंदुःखिता । वृत्तिविषयेमकारलोपोभृशमादिमान्ताव्ययस्येष्यते ॥ ३—६ ॥ क्रोशन्ती आर्तस्वरंकुर्वन्ती ॥७॥ राजभृताः राजभटाः । त्वत्सकाशतः त्वत्समीपतः ॥८—९ ॥ मत्तः मत्सकाशात् ॥ १० ॥ मह्यं मम । तर्हितपोबलेनकिमितिनदण्ड्यते तत्राह—राजात्वद्यविशेषतइति । राजातपोबलेन नदण्ड्यइत्यर्थः ॥ ११ ॥ इयमित्यादिपञ्च । सवाजि-

ति० राजभृतैः राजसेवकैः ॥ ३ ॥ **ति०** दृष्टा ज्ञालापि ॥ ४ ॥ **ति०** रोदनमश्रुपातः । क्रोशनमार्तशब्दः । रुदन्त्यैव ऋषिसमीपगमनं रुदन्त्यैवच कथनमित्येतदर्थद्विःरुदन्तीति । **शि०** क्रोशन्ती हेऋषेइत्याह्वानंकुर्वती । रुदन्ती स्वरोदनहेतुककरुणोत्पादनेनान्यानपिरोदयन्तीच ॥७॥ **ति०** मत्तः अविवेकी ॥१०॥ **ती०** हस्तिध्वजाः हस्तिषुस्थिताध्वजाः तैस्समाकीर्णा ॥ १२ ॥

[पा०] १ क. ख. ग. घ—छ. झ. ञ. अतोमूलाः. ज. ततोमूलाः. २ च. झ. रुदती. ३ झ. ञ. ट. राजभृतैर्दीना ह्रियेय. क. घ. ङ. च. ज. राजभृतैर्दीनाह्रियेयं. ख. दीनाबद्धापाशसुपीडिता. ४ ख. घ. मनागसीं. ५ क. ङ. च. झ. ञ. दृष्टाभक्तांत्यजति. ६ अयंश्लोकः क—ट. दृश्यते. ७ ख. घ. ङ. झ. संचिन्तयित्वातु. ८ ख. ट. निश्वस्यच. ९ क. ख. मुहुर्मुहुः. १० घ. मुनिमब्रवीत्. ११ ख. ग. ज. वसिष्ठस्याभितः. १२ ङ. च. छ. झ. ञ. ट. रुदन्तीमेघनिस्वना. १३ ख. ङ. च. झ. ञ. द्राजभटाः. १४ ग. ट. नयन्ति. १५ घ. बलोन्मत्तो. १६ क. ज. ट. तुल्यबलं. ग. तुल्यबलंकामं. १७ ख. राज्ञानेनविशेषतः. १८ क. ख. सबलीक्षत्रियोराजा. १९ क. पतिरीश्वरः. २० ञ. सेना. २१ ख. घ—ञ. गजवाजिरथाकुला. क. रथकुञ्जरा. २२ ङ. च. छ. झ. ञ. बलवत्तमः.

एवमुक्ता वसिष्ठेन प्रत्युवाच विनीतवत् ॥ वचनं वचनज्ञा सा ब्रह्मर्षिममितप्रभम् ॥ १३ ॥
न बलं क्षत्रियस्याहुर्ब्राह्मणो बलवत्तरः ॥ ब्रह्मन्ब्रह्मबलं दिव्यं क्षत्रात्तु बलवत्तरम् ॥ १४ ॥
अप्रमेयबलं तुभ्यं न त्वया बलवत्तरः ॥ विश्वामित्रो महावीर्यस्तेजस्तव दुरासदम् ॥ १५ ॥
नियुङ्क्ष्व मां महातेजस्त्वद्ब्रह्मबलसंभृताम् ॥ तस्य दर्पबलं यत्तन्नाशयामि दुरात्मनः ॥ १६ ॥
इत्युक्तस्तु तया राम वसिष्ठस्तु महायशाः ॥ सृजस्वेति तदोवाच बलं परबलारुजम् ॥ १७ ॥
तस्य तद्वचनं श्रुत्वा सुरभिः साऽसृजत्तदा ॥ १८ ॥
तस्या हुंभारवोत्सृष्टाः पप्लवाः शतशो नृप ॥ नाशयन्ति बलं सर्वं विश्वामित्रस्य पश्यतः ॥ १९ ॥
बलं भग्नं ततो दृष्ट्वा रथेनाक्रम्य कौशिकः ॥ स राजा परमक्रुद्धः क्रोधविस्फारितेक्षणः ॥
पप्लवान्नाशयामास शस्त्रैरुच्चावचैरपि ॥ २० ॥
विश्वामित्रार्दितान्दृष्ट्वा पप्लवाञ्शतशस्तदा ॥ भूय एवासृजत्कोपाच्छकान्यवनमिश्रितान् ॥ २१ ॥
तैरासीत्संवृता भूमिः शकैर्यवनमिश्रितैः ॥ प्रभावद्भिर्महावीर्यैर्हेमकिञ्जल्कसन्निभैः ॥ २२ ॥
दीर्घासिपट्टसधरैर्हेमवर्णाम्बरावृतैः ॥ निर्दग्धं तद्बलं सर्वं प्रदीप्तैरिव पावकैः ॥ २३ ॥
ततोऽस्त्राणि महातेजा विश्वामित्रो मुमोच ह ॥ तैस्तैर्यवनकाम्भोजाः पप्लवाश्चाकुलीकृताः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

पुनर्वसिष्ठचोदनयाशबलया निजावयवोत्सृष्टैर्म्लेच्छादिभिर्विश्वामित्रसेनानिश्शेषीकरणम् ॥ १ ॥ ततोवसिष्ठेनजिघांसया समभ्यापततस्तत्सुतशतस्यहुङ्कारेणभस्मीकरणम् ॥ २॥ विश्वामित्रेणहतावशिष्टनिजात्मजस्य राज्यनियोजनपूर्वकं तपसेहिमवद्गमनम् ॥ ३ ॥ तथामहादेवात्सकलास्त्रलाभदर्पेणवसिष्ठाश्रममेत्यमहास्त्रतेजसामुनिजनविक्षोभणम् ॥ ४ ॥ वसिष्ठेनदण्डोद्यमनेनतदग्रेसमवस्थानम् ॥ ५ ॥

ततस्तानाकुलान्दृष्ट्वा विश्वामित्रास्त्रमोहितान् ॥ वसिष्ठश्चोदयामास कामधुक्सृज योगतः ॥ १ ॥

रथसंकुला वाजिसहितरथैस्संकुला ॥ १२—१४ ॥ तुभ्यं तव । त्वया त्वत्तः ॥ १५ ॥ त्वद्ब्रह्मबलेन त्वन्मन्त्रबलेन । संभृतां संवर्धितप्रभावां ॥ १६ ॥ इत्युक्तइत्याद्यष्टौ । आरुजति हिनस्तीत्यारुजं । बलं सैन्यं ॥ १७—१८॥ हुंभारवः पशूनां हुंभाशब्दः । उत्सृष्टाः निर्मिताः । पप्लवशकयवनादिशब्दाः म्लेच्छजातिविशेषवचनाः । पश्यतइत्यनादरेषष्ठी ॥ १९ ॥ विस्फारितं विवृतं ॥ २० ॥ अर्दितान् हिंसितान् ॥ २१ ॥ हेमकिञ्जल्कसन्निभैः हेमशब्दश्चंपकपरः तस्यकनकाह्वयत्वात् । तत्केसरतुल्यैरित्यर्थः ॥ २२ ॥ पट्टसः असिविशेषः ॥ २३—२४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुष्पञ्चाशःसर्गः ॥ ५४ ॥

अथपुनर्दिव्यास्त्रलाभपूर्वविश्वामित्रेणवसिष्ठाश्रमसंरोधःपञ्चपञ्चाशे—ततस्तानित्यादि । हेकामधुक् ।

ति० क्षत्रात् क्षत्रियबलादपि । बलवत्तरमधिकं ॥ १४ ॥ ति० नियुङ्क्ष्वेति । कामधेनुत्वान्नियोगापेक्षा । परकाम्यार्थसृष्टावेवतस्याःसामर्थ्यात् । ब्रह्मबलसंभृतां तादृशकार्यसमर्थत्वेनमांध्यायस्वेत्यर्थः ॥ १६ ॥ इतिचतुष्पञ्चाशस्सर्गः ॥ ५४ ॥

[पा०] १ ज. वचनज्ञासौ. २ क—घ. ममितप्रभम्. ३ ङ. च. छ. झ. ञ. ट. ब्राह्मणाबलवत्तराः. ४ च. क्षत्रंचाबलवत्तरं. ङ. छ. झ. ञ. क्षत्राच्चबलवत्तरम्. ५ ख. ग. ङ—ञ. अप्रमेयं. ६ ख. नत्वत्तोबल. घ. नत्वत्तोबल. ७ ग. महाभाग. ८ क. ङ. च. छ. झ. ञ. त्वंब्रह्मबल. घ. त्वद्बृहद्बल. ९ क. ख. ग. ङ—झ. ट. दर्पबलं. १० झ. यत्नंनाश. ११ क. तथा. १२ ख. ग. सुमहायशाः. १३ क. घ. ङ. च. छ. झ. ञ. ट. बलार्दनम्. ख. बलदुहम्. ज. बलार्दन. १४ घ. हुंकारतोत्सृष्टाः. ख. हुंकारवोत्सृष्टाः. ङ. च. ज. हंभारवोत्सृष्टाः. १५ क. पह्लवाश्शतशो. ख. पह्लवाश्शस्त्रपाणयः. १६ घ. धीमतः. १७ ग. रोषविष्फारिते. १८ ख. माययैवासृजद्घोरान्. क. घ—छ. झ. ञ. ट. भूयएवासृजद्घोरान्. १९ ख. ङ. च. छ. ञ. तीक्ष्णासिपट्टिश. २० घ. च. झ. तैस्तैयवन. २१ ङ. च. छ. झ. ञ. बर्बराश्च.

तस्या [1]हुंभारवाज्जाताः कांभोजा रविसन्निभाः ॥ [2]ऊधसस्त्वथ [3]संजाताः [4]पह्लवाः शस्त्रपाणयः ॥ २ ॥
योनिदेशाच्च यवनाः शकृद्देशा[5]च्छकास्तथा ॥ रोमकूपेषु [6]च म्लेच्छा [7]हारीतास्सकिरातकाः ॥ ३ ॥
[8]तैस्तैर्निषूदितं [9]सर्वं विश्वामित्रस्य तत्क्षणात् ॥ [10]सपदातिगजं साश्वं [11]सरथं रघुनन्दन ॥ ४ ॥
दृष्ट्वा निषूदितं सैन्यं वसिष्ठेन महात्मना ॥ विश्वामित्रसुतानां तु शतं नानाविधायुधम् ॥
अभ्यधावत्सुसंक्रुद्धं वसिष्ठं जपतांवरम् ॥ ५ ॥
हुंकारेणैव तान्सर्वान्द[12]दाह भगवानृषिः ॥ ६ ॥
ते [13]साश्वरथपादाता वसिष्ठेन महात्मना ॥ भस्मीकृता मुहूर्तेन विश्वामित्रसुतास्[14]तदा ॥ ७ ॥
दृष्ट्वा [15]विनाशितान्पुत्रान्बलं च सुमहायशाः ॥ [16]सव्रीडश्चिन्तयाविष्टो विश्वामित्रोऽभवत्तदा ॥ ८ ॥
समुद्र इव निर्वेगो [17]भग्नदंष्ट्र इवोरगः ॥ उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः ॥ ९ ॥
हतपुत्रबलो दीनो लूनपक्ष इव द्विजः ॥ [18]हतदर्पो हतोत्साहो निर्वेदं समपद्यत ॥ १० ॥
स पुत्रमेकं राज्याय पालयेति नियुज्य च ॥ पृथिवीं क्षत्रधर्मेण [19]वनमेवान्वपद्यत ॥ ११ ॥
स गत्वा हिमवत्[20]पार्श्वं [21]किंनरोरगसेवितम् ॥ महादेवप्रसादार्थं तपस्तेपे [22]महातपाः ॥ १२ ॥
केनचित्त्वथ कालेन देवेशो वृषभध्वजः ॥ दर्शयामास वरदो विश्वामित्रं [23]महाबलम् ॥ १३ ॥
किमर्थं तप्यसे राजन्ब्रूहि यत्ते विवक्षितम् ॥ वरदोस्मि [24]वरो यस्ते काङ्क्षितः सोभिधीयताम् ॥ १४ ॥
एवमुक्तस्तु देवेन विश्वामित्रो [25]महातपाः ॥ प्रणिपत्य [26]महादेवमिदं वचनमब्रवीत् ॥ १५ ॥
यदि तुष्टो महादेव धनुर्वेदो ममानघ ॥ साङ्गोपाङ्गोपनिषदः [27]सरहस्यः प्रदीयताम् ॥ १६ ॥

योगतः योगमहिम्ना । तिरश्चोपि ब्रह्मप्रसादाद्योगशक्तिरस्तीतिज्ञेयं ॥ १ ॥ तस्याइत्यादिचत्वारः । ऊधसः स्तनात् ॥२॥ हारीताः किरातजातिविशेषाः ॥३—४॥ दृष्ट्वेत्यादिषट् । वसिष्ठमभ्यधावत् तस्यसर्वविनाशमूलत्वादितिभावः । जपतांवरंइति हुंकारेणनिरासेहेतुः ॥ ५—६ ॥ मुहूर्तेनेति मासेनानुवाकोऽधीतइतिवदुपसर्गेतृतीया ॥७—८॥ निर्वेगः युद्धप्रवृत्तिरहितः । उरगइव निश्शक्तिरितिशेषः । उपरक्तः राहुग्रस्तः॥९॥ निर्वेदं दुःखं ॥ १० ॥ सइत्यादिचत्वारः । एकं अवशिष्टमितिशेषः । राज्याय राज्यंकर्तुं । पृथिवींक्षत्रधर्मेणपालयेत्यन्वयः ॥ ११—१२ ॥ दर्शयामास आत्मानमितिशेषः ॥१३—१४॥ एवमित्यादिचत्वारः ॥१५॥ साङ्गोपाङ्गोपनिषदइत्यकारान्तत्वमार्षं । अङ्गंसन्निपत्योपकारकं उपाङ्गंआरादुपकारकं उपनिषत्रहस्यमन्त्रः ।

ति० सव्रीडमितिक्रियाविशेषणं । **विष०** सर्वान् पुत्रान् ॥ ८ ॥ **ती०** निर्वेदं चतुरङ्गबलेनिष्फलत्वबुद्धिं । **ति०** हतसर्वबलोत्साहः सर्वाणिबलानिशारीरबौद्धास्त्रादीनि तज्जन्योत्साहहीनः ॥ १० ॥ **ती०** क्षत्रधर्मेणपृथिवींपालयेति । अन्यथाऽहमिवभविष्यतीत्याशयः ॥ ११ ॥ **ति०** साङ्गोपाङ्गोपनिषदः । समाहारद्वन्द्वे "द्वन्द्वाचुद–" इतिटच् । तेनसहितः ॥ १६ ॥

[पा०] १ ङ. च. छ. झ. ञ. हुंकारतोजाताः. ज. हंभारवाज्जाताः. क. हुंफारतोजाताः. २ ङ. च. छ. झ. ञ. ऊधसश्चाथ. ३ ग. ङ—ट. संभूताः. ४ ङ. च. छ. झ. ञ. बर्बराः. ५ ङ. च. छ. झ. ञ. च्छकास्स्मृताः. ६ क. ङ. च. छ. झ. ञ. म्लेच्छाश्च. ज. ट. म्लेच्छास्तु. ७ ग. ट. हारीताः. ८ क. ङ—झ. ट. तैस्तन्निषूदितं. ९ क. सैन्यं. १० ग. सपदातिरथं. ११ ग. सगजं. १२ क—छ. झ. ञ. ट. निर्ददाहमहानृषिः. घ. महामुनिः. १३ घ. साश्वरथसंबाधा. १४ ख. ङ. च. छ. झ. ञ. स्तथा. १५ ङ. झ. ञ. विनाशितान्सर्वान्. १६ झ. सव्रीलंचिन्तया. क. व्रीडितश्चिन्तया. १७ ग. भिन्नदंष्ट्रइवोरगः. १८ च. छ. ञ. गतसर्वबलोत्साहो. ङ. झ. हतसर्वबलोत्साहो. १९ ङ. च. छ. झ. ञ. ट. वनमेवाभ्यपद्यत. घ. वनमेकोन्वपद्यत. २० ङ. झ. त्पार्श्वे. २१ क. ख. किंनरैरुपशोभितम्. ङ. झ. किंनरोरगसेविते. २२ क. सुदारुणम्. २३ क. ख. ङ. च. छ. झ. ञ. महामुनिम्. २४ क. ख. वरोमत्तः. २५ क. ख. महामुनिः. २६ घ—ट. महादेवंविश्वामित्रोऽब्रवीदिदम्. २७ ख. ज. ञ. सरहस्यं.

१ अनेनव्याख्यानेनश्लोकचतुष्टयसद्भावःप्रतीयतेउपलभ्यन्तेतुत्रयएवश्लोकाःअन्योपिगवेषणीयः ।

यानि देवेषु चास्त्राणि दा[1]नवेषु महर्षिषु ॥ गन्धर्वयक्षरक्षस्सु प्रतिभान्तु ममानघ ॥
तव प्रसादाद्भवतु देवदेव ममेप्सितम् ॥ १७ ॥
एवमस्त्विति देवेशो वाक्यमुक्त्वा ग[2]तस्तदा ॥ १८ ॥
प्रा[3]प्य चास्त्राणि राजर्षिर्विश्वामित्रो म[4]हाबलः ॥ द[5]र्पेण महता युक्तो दर्पपूर्णोऽभवत्तदा ॥ १९ ॥
विवर्धमानो वीर्येण समुद्र इव प[6]र्वणि ॥ ह[7]तमेव तदा मेने वसिष्ठमृषिसत्तमम् ॥ २० ॥
ततो गत्वाऽऽश्रमपदं मुमोचास्त्राणि पार्थिवः ॥ यै[8]स्तत्तपोवनं सर्वं निर्दग्धं चास्त्रतेजसा ॥ २१ ॥
उदीर्यमाणमस्त्रं तद्विश्वामित्रस्य धीमतः ॥ दृष्ट्वा विप्र[9]द्रुता भीता मु[10]नयः शतशो दिशः ॥ २२ ॥
वसिष्ठस्य च ये शिष्यास्त[11]थैव मृगपक्षिणः ॥ विद्रवन्ति भयाद्भीता नानादिग्भ्यः सहस्रशः ॥२३॥
वसिष्ठस्याश्रमपदं शून्यमासीन्महात्मनः ॥ मुहूर्तमिव निश्शब्दमासीदिरिणसंनिभम् ॥ २४ ॥
वदतो वै वसिष्ठस्य मा[12] भैरिति मुहुर्मुहुः ॥ ना[13]शयाम्यद्य गाधेयं नीहारमिव भास्करः ॥ २५ ॥
एवमुक्त्वा महातेजा वसिष्ठो जपतांवरः ॥ विश्वामित्रं तदा वाक्यं सरोषमिदमब्रवीत् ॥ २६ ॥
आश्रमं चिर[14]संवृद्धं यद्वि[15]नाशितवानसि ॥ दु[16]राचारोसि त[17]न्मूढ तस्मात्त्वं नभविष्यसि ॥ २७ ॥
इत्युक्त्वा परमक्रुद्धो दण्डमुद्यम्य सत्वरः ॥ वि[18]धूममिव कालाग्निं य[19]मदण्डमिवापरम् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

सरहस्यः उपदेशगम्यार्थसहितः ॥ १६ ॥ प्रतिभान्तु तानीतिशेषः । ममेप्सितं अन्यदपीतिशेषः ॥ १७—१८ ॥ प्राप्येत्यादिसप्त । दर्पपूर्णइति क्षत्रियत्वादिदर्पयुक्तः । विशेषास्त्रलाभादिदानींदर्पपूर्णोभूदित्यर्थः ॥ १९—२० ॥ यैरस्त्रैः । अस्त्रतेजसा स्वतेजसा ॥२१॥ उदीर्यमाणं प्रयुज्यमानं ॥ २२ ॥ भयात् भयदादस्त्रात् । नानादिग्भ्यइति व्यत्ययेनद्वितीयार्थेचतुर्थी । नानादिग्भ्यः स्वस्वस्थानेभ्यइतिवा ॥ २३ ॥ आश्रमपदं वनं । शून्यं निस्तरुगुल्मं । इरिणं ऊषरं ॥ २४ ॥ वसिष्ठेरक्षकेविद्यमानेकुतोविद्रवन्तीत्यत्राह—वदतइति । भावलक्षणेषष्ठी अनादरेवा । गाधेयंनाशयामिमाभैरितिवदतोवसिष्ठस्यवचनमनादृत्यविद्रवन्तीतिपूर्वेणान्वयः ॥ २५ ॥ एवमित्यादित्रयः । उक्त्वा स्वानितिशेषः ॥ २६ ॥ नभविष्यसि नशिष्यसीतियावत् ॥ २७ ॥ उद्यम्य तस्थावितिशेषः ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

वि० तवप्रसादात् नतूपदेशापेक्षेतिभावः ॥ १७ ॥ शि० अस्त्रतेजसायुक्तः पार्थिवः विश्वामित्रः । आश्रमपदं श्रमनिवर्तकवसिष्ठस्थानं ॥ २१ ॥ शि० दुराचारः परवस्त्वपहरणरूपनिषिद्धाचरणमनाश्वासि । यन्मूढ यतःक्रोधादिनिवृत्तेः मूःबंधनं प्रतिबन्धकत्वमितियावत् वहतिप्राप्नोतितत्संबोधनं निवृत्तिप्रतिबन्धकेत्यर्थः ॥ २७ ॥ इतिपञ्चपञ्चाशस्सर्गः ॥ ५५ ॥

[पा०] १ घ. मानवेषु. २ क. ख. दिवंगतः. ३ ख. ज. प्राप्यशस्त्राणि. क. ख. ङ. च. छ. झ. ञ. ट. प्राप्यचास्त्राणिदेवेशाद्विश्वामित्रो. ४ ख. महातपाः. ५ हर्षेणमहता. ६ क. पर्वसु. ७ क. ङ. च. छ. झ. ञ. हतंमेनेतदाराम. ८ क. च. यत्तत्तपोवनं. घ. ङ. च. झ. यैस्तत्तपोवनंनाम. ९ ज. विप्रकृता. ग. विप्रद्रुतास्सर्वे. १० घ. शतशोमुनयोदिशः. ११ ङ. च. छ. झ. ञ. येचवैमृग. १२ क. ग. ज. माभैष्टेति. १३ घ. नाशयिष्यामि. क. नाशयामिच. १४ ज. संसिद्धं. क. संवृत्तं. १५ क. ख. तद्विनाशित. १६ ङ. च. झ. ञ. ट. दुराचारोहि. १७ क. ख. च. छ. ट. यन्मूढ. ङ. ग. झ. यन्मूढस्तस्मा. १८ क. ख. घ—छ. झ. ञ. ट. विधूमइवकालाग्निः. १९ क. ख. च. छ. झ. ञ. यमदण्डइवापरः.

षट्पञ्चाशः सर्गः ॥ ५६ ॥

वसिष्ठब्रह्मदण्डेनविश्वामित्रास्त्राणांनिगिरणेतेनक्षत्रबलगर्हणपूर्वकं ब्राह्मण्याधिगमायतपश्चरणनिर्धारणम् ॥ १ ॥

एवमुक्तो वसिष्ठेन विश्वामित्रो महाबलः ॥ आग्नेयमस्त्रमुत्क्षिप्य[1] तिष्ठतिष्ठेति चाब्रवीत् ॥ १ ॥
ब्रह्मदण्ड संमुत्क्षिप्य[2] कालदण्डमिवापरम् ॥ [प्राहिणोत्तद्वसिष्ठाय[3] विश्वामित्रो महाबलः] ॥
वसिष्ठो[4] भगवान्क्रोधादिदं वचनमब्रवीत् ॥ २ ॥
क्षत्रबन्धो स्थितोऽस्म्येष[5] यद्बलं तद्विदर्शय[6] ॥ नाशयाम्यद्य[7] ते दर्पं शस्त्रस्य[8] तव गाधिज ॥ ३ ॥
क्व च ते क्षत्रियबलं क्व च ब्रह्मबलं महत् ॥ पश्य ब्रह्मबलं दिव्यं मम क्षत्रियपांसन ॥ ४ ॥
तस्यास्त्रं गाधिपुत्रस्य घोरमाग्नेयमुद्यतम्[9] ॥ ब्रह्मदण्डेन तच्छान्तमग्नेर्वेग इवांभसा ॥ ५ ॥
वारुणं चैव रौद्रं च ऐन्द्रं पाशुपतं तथा[10] ॥ ऐषीकं चापि चिक्षेप कुपितो[11] गाधिनन्दनः ॥ ६ ॥
मानवं मोहनं[12] चैव गान्धर्वं स्वापनं तथा ॥ जृंभणं मादनं चैव संतापनविलापने[13] ॥ ७ ॥
शोषणं दारणं[14] चैव वज्रमस्त्रं[15] सुदुर्जयम् ॥ ब्रह्मपाशं कालपाशं वारुणं पाशमेव च ॥ ८ ॥
पैनाकास्त्रं[16] च दयितं शुष्कार्द्रे[17] अशनी उभे ॥ दण्डास्त्रमथ पैशाचं क्रौञ्चमस्त्रं[18] तथैव च ॥ ९ ॥
धर्मचक्रं कालचक्रं विष्णुचक्रं तथैव च ॥ वायव्यं[19] मथनं चैव अस्त्रं हयशिरस्तथा ॥ १० ॥
शक्तिद्वयं च चिक्षेप कङ्कालं मुसलं तथा ॥ वैद्याधरं महास्त्रं च कालास्त्रमथ दारुणम् ॥
त्रिशूलमस्त्रं घोरं च कापालमथ[20] कङ्कणम् ॥ ११ ॥
एतान्यस्त्राणि चिक्षेप सर्वाणि रघुनन्दन ॥ वसिष्ठे जपतांश्रेष्ठे[21] तदद्भुतमिवाभवत् ॥ १२ ॥
तानि सर्वाणि दण्डेन ग्रसते ब्रह्मणः सुतः ॥ तेषु[22] शान्तेषु ब्रह्मास्त्रं क्षिप्तवान्गाधिनन्दनः ॥ १३ ॥
तदस्त्रमुद्यतं दृष्ट्वा देवाः साग्निपुरोगमाः ॥ देवर्षयश्च संभ्रान्ता गन्धर्वाः समहोरगाः ॥ १४ ॥
त्रैलोक्यमासीत्संत्रस्तं ब्रह्मास्त्रे समुदीरिते ॥ १५ ॥
तदप्यस्त्रं महाघोरं ब्राह्मं ब्राह्मेण तेजसा ॥ वसिष्ठो ग्रसते सर्वं ब्रह्मदण्डेन राघव ॥ १६ ॥

अथसर्वास्त्रबलसंपूर्णक्षत्रवीर्यादपिब्रह्मबलंबलीयइत्याहषट्पञ्चाशे—एवमुक्तइत्यादि । तिष्ठतिष्ठेति भयजननार्थोक्तिः ॥ १ ॥ ब्रह्मदण्डमित्यादित्रयोविंशतिः । ब्रह्मदण्डं ब्राह्मणासाधारणंदण्डं ॥ २ ॥ क्षत्रबन्धो क्षत्रियाधम । तेदर्पंतवशस्त्रस्यदर्पंच नाशयामीत्यन्वयः ॥ ३ ॥ क्षत्रियपांसनेत्यनन्तरंवसिष्ठोऽब्रवीदिति अनुकृष्यते ॥ ४—११ ॥ वसिष्ठेजपतांश्रेष्ठइत्यनेनजपवैभवमिदंग्रसनमितिद्योतितं । तत् अस्त्रक्षेपणं । अद्भुतमिवाभवत् कार्यलेशस्याप्यदर्शनादितिभावः ॥ १२ ॥ अद्भुतमेवाह—तानीति । ग्रसते अग्रसत ॥ १३ ॥ संभ्रान्ताः आसन्नितिशेषः ॥ १४ ॥ समुदीरिते प्रयुक्ते ॥ १५ ॥ ब्राह्मेणतेजसा ब्रह्मविद्याभ्यासजनिततेजसा । उपबृंहितेनब्रह्मदण्डेनेत्यर्थः । अत्र ग्रासक्रियायांनदण्डस्यान्वयः पुत्रैर्गर्दभीभारंवहतीति

ति० अग्निपुरोगमोवायुःतत्सहिताः अग्निसहितोवायुःपुरोगमोयेषांयुद्धइतिवा ॥ १४ ॥

[पा०] १ ख. घ. मुद्यम्य. ङ. च. छ. झ. ञ. मुद्दिश्य. ग. ज. मुत्सृज्य. २ ग. ज. सचोत्क्षिप्य. ङ. च. झ. ञ. ट. समुद्यम्य. ३ इदमर्धं ज. दृश्यते. ४ ज. तदस्त्रंप्रहितंवीक्ष्यवसिष्ठःप्रत्युवाचह. ५ च. छ. ह्येषः. ६ घ. तन्निदर्शय. ७ ख. घ. ज. म्येषते. क. म्येषवै. ८ ग. च. छ. ञ. क्षत्रस्यतव. ९ क. ङ—ट. माग्नेयमुत्तमम्. १० क. तदा. ११ क—घ. च. ट. रुषितो. १२ क. ग. ज. झ. ञ. मोहनंचैव. ङ. च. छ. ठ. मानदंरौद्रं. ख. चैववायव्यं. १३ ख. विलेपने. १४ क. ङ—ज. ञ. ट. दारुणं. १५ क. ग. वज्रमस्त्रंच. क. जृंभमस्त्रं. १६ क—घ. ज. पिनाकास्त्रंच. १७ घ. शुष्कास्त्रमशनिंतथा. ङ. च. झ. ञ. अशनीतथा. ख. चाशनीतथा. क. अशनीतदा. १८ घ. मस्त्रंसुदर्शनम्. १९ घ. आग्नेयमस्त्रंवायव्यं. ख. ब्राह्मंचमथनं. २० ट. कपालमथकिङ्किणीम्. ज. कापालिमथकिङ्किणीम्. २१ ङ. च. ज. जयतांश्रेष्ठे. २२ ख. शान्तेषुतेषुब्रह्मास्त्रं.

ब्रह्मास्त्रं ग्रसमानस्य वसिष्ठस्य महात्मनः ॥ त्रैलोक्य[1]मोहनं रौद्रं रूपमासीत्सुदारुणम् ॥ १७ ॥
रोमकूपेषु सर्वेषु वसिष्ठस्य महात्मनः ॥ मरीच्य इव निष्पेतुरग्नेर्धूमाकुलार्चिषः ॥ १८ ॥
प्रोज्वलद्ब्रह्मदण्डश्च[2] वसिष्ठस्य करोद्यतः ॥ विधूम[3] इव कालाग्निर्यमदण्ड इवापरः ॥ १९ ॥
ततोस्तुवन्मुनिगणा[4] वसिष्ठं जपतां[5]वरम् ॥ अमोघं ते बलं ब्रह्मंस्तेजो धारय[6] तेजसा ॥ २० ॥
निगृहीतस्त्वया ब्रह्मन्विश्वामित्रो महातपः[7] ॥ प्रसीद[8] जपतांश्रेष्ठ लोकाः सन्तु गतव्यथाः ॥ २१ ॥
एवमुक्तो महातेजाः शमं चक्रे महातपाः ॥ विश्वामित्रोपि निकृतो[9] विनिश्वस्येदमब्रवीत् ॥ २२ ॥
धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम् ॥ एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे ॥ २३ ॥
तदेतत्[10]समवेक्ष्याहं प्रसन्नेन्द्रियमानसः ॥ तपो महत्समास्थास्ये[11] यद्वै ब्रह्मत्वकारणम्[12] ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

ब्राह्मण्याधिगमाय भार्यया सह दक्षिणस्यां दिशि तपश्चरति विश्वामित्रे ब्रह्मणा तदाश्रममेत्य तस्मै राजर्षित्वदानेन स्वलोकगमनम् ॥ १ ॥ विश्वामित्रेण स्वाभीप्सितानवाप्तेः पुनस्तपश्चरणम् ॥ २ ॥ अत्रावसरे त्रिशङ्कुना राज्ञा सशरीरं स्वर्गं जिगमिषया वसिष्ठं प्रति तथा याजनप्रार्थना ॥ ३ ॥ तेन तदधिक्षेपे तत्पुत्रान्प्रति तन्निवेदनपूर्वकं तथा याजनप्रार्थनम् ॥ ४ ॥

ततः संतप्तहृदयः स्मरन्निग्रहमात्मनः ॥ विनिश्श्वस्य विनिश्श्वस्य कृतवैरो महात्मना ॥ १ ॥
स दक्षिणां दिशं गत्वा महिष्या सह राघव ॥ तताप परमं घोरं विश्वामित्रो महत्तपः[13] ॥ २ ॥
[फलमूलाशनो[14] दान्तश्च[15]कार परमं[16] तपः] ॥ अथास्य जज्ञिरे पुत्राः सत्यधर्मपरायणाः ॥
हविष्यन्दो[17] मधुष्यन्दो दृढनेत्रो महारथः ॥ ३ ॥

वत् । अतोनवक्ष्यमाणेनविरोधः ॥ १६ ॥ त्रैलोक्यस्यमोहनं भयान्मूर्छाजनकं । रौद्रं स्मरणेपि भयंकरं । सुदारुणं दुर्दर्शं ॥ १७ ॥ एतदेवाह—रोमेति । अग्नेरिवमरीच्योविस्फुलिङ्गानिष्पेतुरितियोजना ॥ १८ ॥ दण्डश्चप्राज्वलत् पूर्वास्त्रग्रासेनेतिशेषः ॥ १९ ॥ तेजः ब्रह्मास्त्रतेजः । तेजसा महिम्ना । धारय उपशमय ॥ २०—२१ ॥ शमं कोपशान्तिं निकृतः अपकृतः तिरस्कृतइतियावत् ॥ २२ ॥ क्षत्रियबलं बलंधिक् निन्द्यंबलमित्यर्थः । "धिगुपर्यादिषु" इतिद्वितीया । ब्रह्मतेजसःब्राह्मण्यरूपतेजसः बलं बलं । तदेवप्रशस्तमितियावत् । सर्वास्त्राणि ब्रह्मास्त्रभिन्नानि ॥ २३ ॥ ब्रह्मत्वकारणं ब्राह्मण्यापादकं । प्रसन्नेन्द्रियमानसः परित्यक्तक्षत्ररोषइत्यर्थः २४ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्पञ्चाशःसर्गः ॥ ५६ ॥

एवंपशुपतिवितीर्णसरहस्यसर्वास्त्रवैघट्यदर्शनेनरुद्रस्यापरत्वमुपपादितं । अथपूर्वप्रस्तुतब्राह्मण्यस्यात्यन्तदुर्लभत्वंदर्शयतिनवभिः सर्गैः । तत्रत्रिशङ्कुशरणागत्यनुगुणशक्तिमत्वंदर्शयतिसप्तपञ्चाशे—ततःसंतप्तहृदयइत्यादि । श्लोकद्वयमेकान्वयं । महात्मना वसिष्ठेन । कृतवैरः अनेनास्यतपोनाशमूलंदर्शितं । ब्रह्मविदपचारोहिसर्वश्रेयोविनाशकः । दक्षिणां शरावत्यपेक्षया । महिष्येत्यनेन भावियाजकत्वानुगुणगार्हस्थ्यंदर्शितं । महत्तपः परमंयथातथाततापेत्यन्वयः ॥ १ ॥ २ ॥ कामक्रोधाद्यनुवृत्तिंदर्शयति—अथेति

ति० हेब्रह्मन्तेबलंअमोघमस्तु अरातावविसर्जनेनाक्षीणमस्तु प्रतिब्रह्मास्त्रंमाप्रयुङ्क्ष्वेतियावत् ॥ २० ॥ इतिषट्पञ्चाशस्सर्गः ॥ ५६ ॥

[पा०] १ च. छ. ञ. मोहनघोरं. २ ग. ज. प्रोज्ज्वलन्ब्रह्मदण्डश्च. ख. प्रज्वलद्ब्रह्म. ३ क. घ. च. छ. ज. सधूमइव. ४ घ. न्मुनिगणो. ५ छ. जयतां. ६ घ. धारयतेजसि. ७ क. ख. ङ. च. छ. झ. ञ. महाबलः. ८ ङ. च. छ. झ. ञ. अमोघंतेबलंश्रेष्ठ. ९ क. ख. ग. ङ. च. छ. झ. ञ. विनिकृतो. १० तदद्भुतमवेक्ष्याहं. ग. ङ. च. झ. ञ. तदेतत्प्रसमीक्ष्याहं. ११ क. ख. घ. त्समाधास्ये. १२ ग. कारकम्. १३ क. घ—छ. झ. ञ. ट. महातपाः. ख. महामुनिः. १४ इदमर्धं ग—छ. झ. ञ. दृश्यते. १५ ग—छ. झ. ञ. श्चचार. १६ ग. सुमहत्तपः. १७ ञ. हविष्पन्दोमधुष्पन्दः.

पूर्णे वर्षसहस्रे तु ब्रह्मा लोकपितामहः ॥ अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनम् ॥ ४ ॥
जिता राजर्षिलोकास्ते तपसा कुशिकात्मज ॥ अनेन तपसा त्वां तु राजर्षिरिति विद्महे ॥ ५ ॥
एवमुक्त्वा महातेजा जगाम सह दैवतैः ॥ त्रिविष्टपं ब्रह्मलोकं लोकानां परमेश्वरः ॥ ६ ॥
विश्वामित्रोपि तच्छ्रुत्वा ह्रिया किंचिदवाङ्मुखः ॥ दुःखेन महताऽऽविष्टः समन्युरिदमब्रवीत् ॥ ७ ॥
तपश्च सुमहत्तप्तं राजर्षिरिति मां विदुः ॥ देवाः सर्षिगणाः सर्वे नास्ति मन्ये तपःफलम् ॥ ८ ॥
एवं निश्चित्य मनसा भूय एव महातपाः ॥ [कोपेन महताऽऽविष्टस्त्रैलोक्यं व्यथयन्निव] ॥
तपश्चकार काकुत्स्थ परमं परमात्मवान् ॥ ९ ॥

एतस्मिन्नेव काले तु सत्यवादी जितेन्द्रियः ॥ त्रिशङ्कुरिति विख्यात इक्ष्वाकुकुलवर्धनः ॥ १० ॥
तस्य बुद्धिः समुत्पन्ना यजेयमिति राघव ॥ गच्छेयं सशरीरेण देवानां परमां गतिम् ॥ ११ ॥
स वसिष्ठं समाहूय कथयामास चिन्तितम् ॥ अशक्यमिति चाप्युक्तो वसिष्ठेन महात्मना ॥ १२ ॥
प्रत्याख्यातो वसिष्ठेन स ययौ दक्षिणां दिशम् ॥ ततस्तत्कर्मसिद्ध्यर्थं पुत्रांस्तस्य गतो नृपः ॥ १३ ॥
वासिष्ठा दीर्घतपसस्तपो यत्र हि तेपिरे ॥ त्रिशङ्कुः सुमहातेजाः शतं परमभास्वरम् ॥
वसिष्ठपुत्रान्ददृशे तप्यमानान्यशस्विनः ॥ १४ ॥
सोभिगम्य महात्मानः सर्वानेव गुरोः सुतान् ॥ अभिवाद्यानुपूर्व्येण ह्रिया किंचिदवाङ्मुखः ॥
अब्रवीत्सुमहात्मानस्सर्वानेव कृताञ्जलिः ॥ १५ ॥
शरणं वः प्रपद्येऽहं शरण्याञ्शरणागतः ॥ प्रत्याख्यातोस्मि भद्रं वो वसिष्ठेन महात्मना ॥ १६ ॥

॥ ३ ॥ अतएवतपसोमन्दफलत्वंदर्शयति—पूर्णइति ॥ ४ ॥ विद्महे आर्षमात्मनेपदं ॥ ५ ॥ एवमित्यादिचत्वारः । ब्रह्माब्रह्मलोकंजगाम । त्रिविष्टपं देवाजग्मुरित्यर्थः ॥ ६ ॥ समन्युः सदैन्यः । "मन्युर्दैन्येक्रतौक्रुधि" इत्यमरः ॥ ७ ॥ नास्तिमन्येतपःफलं एतन्मात्रंमत्तपःफलंनभवति । ब्राह्मण्यस्यैवमदभिमतत्वादितिभावः ॥ ८ ॥ परमंतपः पूर्वकृततपसोप्यतिशयितंतपः । परमात्मवान् अतिशयितयत्नवान् ॥ ९ ॥ विख्यातः अभूदितिशेषः ॥ १० ॥ सशरीरेण आत्मनेतिशेषः । परमांगतिं स्वर्गमितियावत् ॥ ११ ॥ चिन्तितं सशरीरस्वर्गसाधनयज्ञमित्यर्थः । अशक्यं सशरीरस्वर्गसाधनयज्ञकरणमितिशेषः । अशक्यत्वंचनऋषेरसामर्थ्यात् नापितादृशकर्मविधानाभावात् "सशरीरएवस्वर्गंलोकमेति" इतिश्रुतेः । किंतु । त्रिशङ्कोस्तादृशस्वर्गप्राप्तिर्नास्तीतिपूर्वकल्पवृत्ततज्ज्ञानादितिमन्तव्यं । उक्तः अभूदितिशेषः ॥ १२ ॥ तत्कर्मसिद्ध्यर्थं सशरीरस्वर्गसाधनकर्मसिद्ध्यर्थं ॥ १३ ॥ वासिष्ठाइतिसार्धः । यत्रतेपिरे । तत्रगत्वेतिशेषः । शतंवासिष्ठानिति । बह्वर्थेशतमितिनिपातनात्सामानाधिकरण्यं ॥ १४ ॥ सइतिसार्धः । ह्रिया वसिष्ठप्रत्याख्यानकृतया । महात्मानस्सुमहात्मानइति व्यत्ययेनप्रथमा ॥ १५ ॥ शरणं

वि० परमात्मवान् परमात्मध्यानवान् परमधीरश्च ॥ ९ ॥ **ति०** शरणंगतोऽन्येषांरक्ष्याणांशरणंगतोपि शरणत्वंप्राप्तोपीत्यर्थः । **शि०** वः युष्माकं । शरणं रक्षकत्वं । गतः ज्ञातवानहं शरणं रक्षायथास्यात्तथा । शरण्यान् शरणहितान् । वोयुष्मान् । प्रपद्ये प्राप्तोस्मि । एकश्शरणशब्दोभावप्रधानः । गत्यर्थानांज्ञानार्थकत्वं "गमिरवबोधने" इत्यादिव्याख्यानेस्पष्टमेव । वइत्युभ-

[पा०] १ घ. ब्रह्मलोकान्पितामहः. २ क. घ. ङ. च. ज—ट. त्वांहि. ३ ऋषिगणास्सर्वे. ४ इदमर्धं ग. ज. दृश्यते. ५ क. ख. ग. ङ. छ. झ. ञ. तपश्चचार. ६ क. ख. ङ. च. छ. झ. ञ. धर्मात्माकाकुत्स्थपरमात्मवान्. ७ क. घ. कुलनन्दनः. ८ क. ख. ग. ङ. छ—ट. स्वशरीरेण. ९ ङ. छ. झ. ञ. देवतानांपरागतिम्. १० ङ. च. ज—ट. वसिष्ठंससमाहूय. क. छ. वसिष्ठं च. ११ क. घ. प्रययौ. १२ क. ख. ग. समहातेजाः. ङ. च. छ. झ. ञ. स्तुमहातेजाः. १३ घ. वसिष्ठस्यचतान्पुत्रांस्तप्य. ज. ट. वासिष्ठान्संददर्शाथतप्य. १४ ङ. च. ज. झ. ञ. न्मनस्विनः. १५ घ. महातेजाः. १६ ग. त्सुमहाभागान्. घ. सुमहातेजाः, १७ ङ. च. ज—ट. प्रपन्नोऽहं. १८ क. ख. ङ. च. छ. झ. ञ. ट. शरणंगतः.

यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ ॥ गुरुपुत्रानहं सर्वान्[1]नमस्कृत्य प्रसादये ॥ १७ ॥
शिरसा प्रणतो याचे ब्राह्मणांस्तपसि स्थितान् ॥ ते मां भवन्तः सिद्ध्यर्थं[2] याजयन्तु समाहिताः ॥
सशरीरो यथा[3]ऽहं हि देवलोकमवाप्नुयाम् ॥ १८ ॥
प्रत्याख्यातो वसिष्ठेन गतिमन्यां तपोधनाः ॥ गुरुपुत्रानृते सर्वान्नाहं पश्यामि कां[4]चन ॥ १९ ॥
इक्ष्वाकूणां[5] हि सर्वेषां पुरोधाः परमा गतिः ॥ पुरोधसस्तु विद्वांसस्तारयन्ति स[6]दा नृपान् ॥ २० ॥
त[7]स्मादनन्तरं सर्वे भवन्तो दैवतं मम ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

वासिष्ठैःपित्रतिक्रमेणयाजनानङ्गीकारे त्रिशङ्कुनातान्प्रतिस्वस्ययाजकान्तरानुसरणवचनम् ॥ १ ॥ वासिष्ठैश्चण्डालतांप्रापितेनत्रिशङ्कुनाविश्वामित्रमेत्यस्ववृत्तान्तनिवेदनपूर्वकंयाजनप्रार्थना ॥ २ ॥

ततस्त्रिशङ्कोर्वचनं श्रुत्वा क्रोधसमन्वितम् ॥ ऋषिपुत्रशतं राम राजानमिदमब्रवीत् ॥ १ ॥
प्र[8]त्याख्यातो हि दु[9]र्बुद्धे गुरुणा सत्यवादिना ॥ तं कथं समतिक्रम्य शाखान्तरमुपेयिवान् ॥ २ ॥
इक्ष्वाकूणां[10] हि सर्वेषां पुरोधाः प[11]रमो गुरुः ॥ न चातिक्रमितुं शक्यं वचनं सत्यवादिनः ॥ ३ ॥
अशक्य[12]मिति चोवाच वसिष्ठो भगवानृषिः ॥ तं वयं वै समाहर्तुं क्र[13]तुं शक्ताः कथं तव ॥ ४ ॥
बालिशस्त्वं नरश्रेष्ठ गम्यतां स्व[14]पुरं पुनः ॥ याजने भगवाञ्शक्तस्त्रैलोक्यस्यापि पार्थिव ॥ ५ ॥
अव[15]मानं च तत्कर्तुं तस्य[16] शक्ष्यामहे कथम् ॥ ६ ॥

रक्षितारं आगतः "शरणंगृहरक्षित्रोः" इतिवचनात् । रक्षित्रपेक्षयाआगतोहं । शरण्यान् शरणसमर्थान् । शरणंप्रपद्ये रक्षितृन्प्राप्नोमीत्यर्थः । यद्वा शरणागतःप्रत्याख्यातइत्युत्तरेणान्वयः । तर्ह्याचार्यएवगन्तव्यइत्यत्राह—प्रत्याख्यातइति ॥ १६ ॥ किमर्थंशरणागतिस्तत्राह—यष्टुकामइति । तत् यज्ञानुष्ठानं ॥ १७ ॥ शिरसेतिसार्धः । ब्राह्मणान् ब्रह्मविदः । समाहिताः अवहिताः ॥ १८ ॥ गुरुपुत्रानृते अन्यांकांचनगतिं यजनोपायंनपश्यामीत्यन्वयः ॥ १९ ॥ पुरोधाःपुरोहितः वसिष्ठः ॥ २० ॥ तस्मादित्यर्धं । तस्मात् वसिष्ठात् । अनन्तरं पश्चात् । तस्यारक्षकत्वेभवन्तएवरक्षकाइतिभावः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमंजीराख्याने बालकाण्डव्याख्याने सप्तपञ्चाशःसर्गः ॥ ५७ ॥

गुरुत्यागिनांफलंदर्शयत्यष्टपञ्चाशे—ततस्त्रिशङ्कोरित्यादि । क्रोधसमन्वितमितिशतविशेषणं ॥ १ ॥ शाखान्तरं आश्रयान्तरं ॥ २ ॥ नशक्यं त्वयैक्ष्वाकेणेतिशेषः । सत्यवादिनः तस्येतिशेषः ॥ ३ ॥ अशक्यंयंक्रतुमितिशेषः ॥४॥ बालिशः मूर्खः । "मूर्खवैधेयबालिशाः" इत्यमरः ॥ ५ ॥ अवमानमित्यर्धं । तत्

यान्वयि शब्दाधिकारश्च । यद्वा शरणं स्वेप्सितप्रध्वंसेनवधप्रायं गतः प्राप्तोहं शरणं जीवनालंबोयथास्यात्तथावोयुष्मान्प्रपद्ये । 'शरणंगृहरक्षित्रोर्वधरक्षणयोरपि' इतिमेदिनी ॥ १६ ॥ **ति०** ब्राह्मणान् अन्वर्थब्राह्मणान् ॥ १८ ॥ इतिसप्तपञ्चाशस्सर्गः ॥५७॥

ति० सोवाचेति "सोचिलोपेचेत्—" इतिसाधु ॥४॥ **ति०** त्रैलोक्यस्यापि सिद्ध्यर्थंयाजनेइत्यर्थः । भगवान् वसिष्ठः ॥६॥

[पा०] १ ख नभिवाद्यप्रसादये. २ घ. च. सिद्धार्थं. ३ ङ. च. छ. झ. ञ. यथाहंवै. ४ क. ग. घ. च. छ. ञ. कंचन. ख. किंचन. ५ क. घ. च. इक्ष्वाकूणांतु. ६ क. घ. च. नृपान्सदा. ७ ज. अस्मादनन्तरं. ८ च. झ. ञ. प्रत्याख्यातोसि. ९ ङ. झ. ञ. दुर्मेधाः. १० घ. इक्ष्वाकूणांतु. ११ क. ख. ङ. च. छ. झ. ञ. परमागतिः. १२ ग. मितिहोवाच. झ. ञ. मितिसोवाच. १३ ग. कथंशक्ताःक्रतुंतव. ख. घ. ङ. झ. क्रतुंशक्ताःकथंचन. च. ञ. क्रतुंशक्ताःकथंचतत्. १४ घ. स्वपुरंततः. १५ ख. ङ—ट. अवमानंकथंकर्तुं. क. घ. अवमानंवयंकर्तुं. १६ ख. ग. ङ. छ—ट. तस्यशक्ष्यामहेवयम्.

तेषां तद्वचनं श्रुत्वा क्रोधपर्याकुलाक्षरम् ॥ स राजा पुनरेवैतानिदं वचनमब्रवीत् ॥ ७ ॥
प्रत्याख्यातोसि गुरुणा गुरुपुत्रैस्तथैव च ॥ अन्यां गतिं गमिष्यामि स्वस्ति वोऽस्तु तपोधनाः ॥८॥
ऋषिपुत्रास्तु तच्छ्रुत्वा वाक्यं घोराभिसंहितम् ॥ शेपुः परमसंक्रुद्धाश्चण्डालत्वं गमिष्यसि ॥९॥
एवमुक्त्वा महात्मानो विविशुस्ते स्वमाश्रमम् ॥ १० ॥
[तच्छ्रुत्वा घोरसंकाशमृषिपुत्रैश्च भाषितम् ॥ प्राविशत्स्वपुरं राजा चिन्तयामास दुःखितः] ॥११॥
अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः ॥ नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्धजः ॥
चित्यमाल्यानुलेपश्च आयसाभरणोऽभवत् ॥ १२ ॥
तं दृष्ट्वा मन्त्रिणः सर्वे त्यज्य चण्डालरूपिणम् ॥ प्राद्रवन्सहिता राम पौरा येऽस्यानुगामिनः ॥१३॥
एको हि राजा काकुत्स्थ जगाम परमात्मवान् ॥ दह्यमानो दिवारात्रं विश्वामित्रं तपोधनम् ॥१४॥
विश्वामित्रस्तु तं दृष्ट्वा राजानं विफलीकृतम् ॥ चण्डालरूपिणं राम मुनिः कारुण्यमागतः ॥ १५ ॥
कारुण्यात्स महातेजा वाक्यं परमधार्मिकः ॥ इदं जगाद भद्रं ते राजानं घोररूपिणम् ॥ १६ ॥
किमागमनकार्यं ते राजपुत्र महाबल ॥ अयोध्याधिपते वीर शापाच्चण्डालतां गतः ॥ १७ ॥
अथ तद्वाक्यमाज्ञाय राजा चण्डालतां गतः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं वाक्यज्ञो वाक्यकोविदम् ॥१८॥
प्रत्याख्यातोसि गुरुणा गुरुपुत्रैस्तथैव च ॥ अनवाप्यैव तं कामं मया प्राप्तो विपर्ययः ॥ १९ ॥
सशरीरो दिवं यायामिति मे सौम्यदर्शनम् ॥ मया चेष्टं क्रतुशतं तच्च नावाप्यते फलम् ॥२०॥

असाध्यार्थसाधनरूपं ॥ ६ ॥ तेषामितिद्वौ । अन्यांगतिं याजकान्तरं ॥ ७ ॥ ८ ॥ घोराभिसंहितं साक्षात्कुलगुरुंब्रह्मपुत्रंवसिष्ठमतिक्रम्यपुरोहितान्तराश्रयणरूपघोराभिप्राययुक्तमित्यर्थः । गमिष्यसीत्यनन्तरमितिकरणंद्रष्टव्यं ॥ ९ ॥ एवमित्यर्धं ॥ १०—११ ॥ अत्रचण्डालत्वंनतत्सादृश्यमात्रं । किंतुक्षत्रियत्वप्रहाणेनचण्डालत्वजातिप्राप्तिः । ब्राह्मणत्वादिजातेःकर्ममूलत्वेनतदपायेतदपायादित्याह—अथेत्यादि सार्धः । चण्डालतांगतः वक्षस्स्थंयज्ञोपवीतमेववध्र्यासीदित्यर्थः। नीलवस्त्रधरः कटिस्थपीतांबरमेवचण्डालार्हनीलवस्त्रंजातमित्यर्थः । नीलः पूर्वस्थितराजतेजएवनीलवर्णोभवदित्यर्थः । एवमुत्तरत्रापियोज्यं । परुषः रूक्षाङ्गः । ध्वस्तमूर्धजः ह्रस्वकेशः । चित्यमाल्यानुलेपः चिता श्मशानं तत्रभवंचित्यं तादृशंमाल्यं अनुलेपः चिताभस्मरूपोऽङ्गरागश्चयस्यसतथा। आयसाभरणः अयोविकाराभरणः ॥१२—१३॥ परमात्मवान् परमधृतिमान् भूत्वा । दह्यमानः दुःखेनेतिशेषः । विश्वामित्रं वसिष्ठवैरिणं जगाम ॥१४॥ विफलीकृतं वासिष्ठविनाशितैहिकामुष्मिकसाधनमित्यर्थः ॥१५॥ स्ववंशावमानप्रकटनेनरामस्यकोपोभविष्यतीतिसान्त्वयति—भद्रंतइति ॥ १६ ॥ चण्डालतांगतः केनहेतुनेतिशेषः ॥ १७ ॥ आज्ञाय श्रुत्वेत्यर्थः ॥ १८ ॥ तंकामं यमुद्दिश्यगुर्वाद्युपासनंकृतमित्यर्थः । विपर्ययः विपरीतप्रयोजनोहेतुविशेषः ॥ १९ ॥ कस्तेकामइत्यत्राह—सशरीरइति । सौम्येतिसंबुद्धिः । दर्शनंबुद्धिः । तच्चफलं क्रतुशतफ-

शि० हेवीरयस्त्वंचण्डालतांगतः तस्यतेइहागमनेकिंप्रयोजनंतद्वदेतिभावः । एतेनत्रिशङ्कुशापः पूर्वमेवविश्वामित्रेणश्रुतइतिध्वनितं । ति० सौम्यदर्शनेतिसंबोधनम् ॥ २० ॥

[पा०] १ घ. पर्याकुलेक्षणः. २ क. ख. ङ—ट. ख्यातोभगवता. घ. ख्यातोवसिष्ठेन. ३ ङ. च. छ. झ. स्तथैवहि. घ. विशेषतः. ४ ङ. च. छ. झ. ञ. ट. इत्युक्त्वाते. ५ ङ. च. छ. झ. ञ. ट. स्वंस्वमाश्रमम् . ६ अयंश्लोकः क. ङ. च. छ. ञ. दृश्यते. ७ क. संकाशंगुरुपुत्रैश्च. ८ ग. रक्तमाल्यानुलेपश्च. क. चित्रमाल्यांगरागश्च. ख. ङ—ञ. चित्यमाल्यांगरागश्च. घ. भ्रष्टमाल्यांगरागश्च. ९ घ. ट. त्यक्त्वाचण्डाल. क. छ. त्याज्यंचण्डाल. १० ख. घ—ट. घोरदर्शनम्. ११ घ. किमागमनकृत्यंते. १२ क. ख. घ. महायशः. १३ ङ. च. छ. झ. ञ. ट. माकर्ण्य. क. मादाय. ज. मास्थाय. १४ ख. चण्डालएवसः. १५ क. अनवाप्यचतत्कर्म. १६ क—छ. झ. ञ. ट. सौम्यदर्शन.

अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ॥ कृच्छ्रेष्वपि गतः सौम्य क्षत्रधर्मेण ते शपे ॥ २१ ॥
यज्ञैर्बहुविधैरिष्टं प्रजा धर्मेण पालिताः ॥ गुरवश्च महात्मानः शीलवृत्तेन तोषिताः ॥ २२ ॥
धर्मे प्रयतमानस्य यज्ञं चाहर्तुमिच्छतः ॥ परितोषं न गच्छन्ति गुरवो मुनिपुङ्गव ॥ २३ ॥
दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ॥ दैवेनाक्रम्यते सर्वं दैवं हि परमा गतिः ॥ २४ ॥
तस्य मे परमार्तस्य प्रसादमभिकाङ्क्षतः ॥ कर्तुमर्हसि भद्रं ते दैवोपहतकर्मणः ॥ २५ ॥
नान्यां गतिं गमिष्यामि नान्यः शरणमस्ति मे ॥ दैवं पुरुषकारेण निवर्तयितुमर्हसि ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ॥ ५९ ॥

विश्वामित्रेणत्रिशङ्कुंप्रतिशरीरसाहित्येनैवस्वर्गप्रापणप्रतिज्ञानपूर्वकंशिष्याणांनानाश्रमेभ्योमुनिगणानयनायप्रेषणम् ॥ १ ॥ शिष्यैर्विश्वामित्रंप्रतिमुनिजनागमननिवेदनपूर्वकंवासिष्ठानामपहासवचनानुवादः ॥ २ ॥ विश्वामित्रेणतेषांनीचयोनिजननरूपशापदानम् ॥ ३ ॥

उक्तवाक्यं तु राजानं कृपया कुशिकात्मजः ॥ अब्रवीन्मधुरं वाक्यं साक्षाच्चण्डालरूपिणम् ॥ १ ॥
ऐक्ष्वाक स्वागतं वत्स जानामि त्वां सुधार्मिकम् ॥ शरणं ते भविष्यामि मा भैषीर्नृपपुङ्गव ॥ २ ॥
अहमामन्त्रये सर्वान्महर्षीन्पुण्यकर्मणः ॥ यज्ञसाह्यकरान्राजंस्ततो यक्ष्यसि निर्वृतः ॥ ३ ॥
गुरुशापकृतं रूपं यदिदं त्वयि वर्तते ॥ अनेन सह रूपेण सशरीरो गमिष्यसि ॥ ४ ॥

लं सशरीरस्वर्गः ॥२०॥ वसिष्ठप्रत्याख्यानमूलंपापंमयिनास्तीत्याशयेनाह—अनृतमिति । यद्वा "यज्ञोनृतेनक्षरति" इतिवचनात् ऋतुनाशकत्वेनावगतमनृतमपिमयिनास्तीत्याह । मे मया । क्षत्रधर्मेण तत्साक्षितयेत्यर्थः । कृच्छ्रेष्वपिगतः आपद्गतोपि । ते पुरतइतिशेषः ॥ २१ ॥ यज्ञैरिति पूर्वंसशरीरत्वसाधनक्रतुशतमुक्तं अत्रनित्यकर्मेतिभिदा । यद्वा पूर्वंक्रतुशतं इष्टं यष्टुमुपक्रान्तमित्यर्थः । तच्चनावाप्यते तादृशक्रत्वनुष्ठानमनोरथोनावाप्यतइत्यर्थः । शीलवृत्तेन शीलयुक्तवृत्तेन । शीलं सद्गुणः । वृत्तमाचारः ॥ २२ ॥ प्रयतमानस्येतिसप्तम्यर्थेषष्ठी । ममेतिशेषः ॥२३॥ अतइत्युपस्कार्यं । दैवमत्रप्रारब्धफलमदृष्टं । परं श्रेष्ठं । पुरुषहिताहितप्रापकमित्यर्थः । पौरुषं इदानींतनधर्मानुष्ठानं । निरर्थकं प्रारब्धकर्मतिरस्कारानर्हमित्यर्थः । आक्रम्यते अभिभूयते । परमागतिः इतरतिरस्कारेणैहिकसुखदुःखादिप्रापकमित्यर्थः ॥ २४ ॥ प्रसादं दैवानुकूल्यं ॥ २५ ॥ गतिं शरणं । वसिष्ठेनस्वयमाहूतश्चेत्किकरिष्यसीत्यत्राह—नान्यःशरणमस्तीति । पुरुषकारेण त्वत्प्रसादरूपानुकूल्यकरणेन ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्यानेऽष्टपञ्चाशःसर्गः ॥५८॥

जातिचण्डालस्यकदाचित्तद्भावनिवृत्तिरस्ति नतुकर्मचण्डालस्येत्याहएकोनषष्टितमे—उक्तवाक्यमित्यादि । साक्षाच्चण्डालरूपिणं चण्डालचिह्नधारित्वान्नशास्त्रगम्यचण्डालभावइत्यर्थः ॥ १ ॥ ऐक्ष्वाकेत्यादिचत्वारः ॥ २ ॥ यज्ञसाह्यकरान् यज्ञसहायकरान् ॥ ३ ॥ गमिष्यसि स्वर्गमितिशेषः । अनेनेत्यनेन

शि० सर्वकालंसद्वृत्तत्वात्पापान्तरस्यापिमयिसंभावनानकर्तव्येतिबोधयितुमाह—**यज्ञैरिति** ॥२२॥ इत्यष्टपञ्चाशः सर्गः ॥५८॥

शि० साक्षादेवाब्रवीत् । तुशब्दएवार्थे । साक्षादब्रवीदित्यनेनचण्डालस्साक्षादभिभाषणानर्हइतिनिषेधस्यानर्हःसइतिध्वनितं । तेनकर्मणाजात्याचसनचण्डालइतिव्यञ्जितं । अतएव चण्डालरूपिणमितिविशेषणम् ॥ १ ॥

[पा०] १ ख. दैवतंपरमंमन्ये. २ ख. नान्यांगतिंप्रपश्यामि. ३ क. घ. ङ. च. झ. ञ. नान्यच्छरणमस्तिमे. ४ ख. उक्तवाक्यंतुराजानंसाक्षाच्चण्डालरूपिणम् । अब्रवीन्मधुरंवाक्यंकृपयाकुशिकात्मजः. ५ घ. शापाच्चण्डालरूपिणम्. ङ. च. छ. झ. ञ. साक्षाच्चण्डालतांगतम्. ६ ख. ङ—ट. इक्ष्वाको. क. घ. ऐक्ष्वाको. ७ क. ख. स्वागतंतेस्तु. ८ क. ख. ङ. च. छ. झ. ञ. तेप्रदास्यामि. ९ घ. माभैषीर्मनुजाधिप. १० घ. यज्ञसाहायिकान्. ११ क. ख. अनेनैवहिरूपेण. १२ घ. स्वर्गलोकंगमिष्यसि.

हस्तप्राप्त[1]महं मन्ये स्वर्गं तव [2]नराधिप ॥ यस्त्वं कौशिकमागम्य शरण्यं [3]शरणागतः ॥ ५ ॥
एवमुक्त्वा महातेजाः पुत्रान्परमधार्मिकान् ॥ व्यादिदेश महाप्राज्ञान्यज्ञसंभारकारणात् ॥
सर्वाञ्शिष्यान्समाहूय वाक्यमेतदुवाच ह ॥ ६ ॥
[4]सर्वानृषिगणान्वत्सा आनयध्वं ममाज्ञया ॥ [5]सशिष्यसुहृदश्चैव सर्त्विजः [6]सबहुश्रुतान् ॥ ७ ॥
[7]यदन्यो वचनं ब्रूयान्मद्वाक्यबलचोदितः ॥ [8]तत्सर्वमखिलेनोक्तं [9]ममाख्येयमनादृतम् ॥ ८ ॥
तस्य तद्वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया ॥ आजग्मुरथ देशेभ्यः सर्वेभ्यो ब्रह्मवादिनः ॥ ९ ॥
ते[10] च शिष्याः समागम्य मुनिं [11]ज्वलिततेजसम् ॥ ऊचुश्च [12]वचनं सर्वे सर्वेषां ब्रह्मवादिनाम् ॥१०॥
श्रुत्वा ते [13]वचनं सर्वे समायान्ति [14]द्विजातयः ॥ सर्वदेशेषु चागच्छन्वर्जयित्वा महोदयम् ॥ ११ ॥
[15]वासिष्ठं तच्छतं सर्वं [16]क्रोधपर्याकुलाक्षरम् ॥ [17]यदाह वचनं सर्वं शृणु त्वं मुनिपुङ्गव ॥ १२ ॥
क्षत्रियो याजको यस्य चण्डालस्य विशेषतः ॥ कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ॥ १३ ॥
ब्राह्मणा वा महात्मानो भुक्त्वा [18]चण्डालभोजनम् ॥ कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः ॥१४॥
एतद्वचननैष्ठुर्यमूचुः संरक्तलोचनाः ॥ वासिष्ठा मुनिशार्दूल [19]सर्वे ते समहोदयाः ॥ १५ ॥
तेषां तद्वचनं श्रुत्वा सर्वेषां मुनिपुङ्गवः ॥ [20]क्रोधसंरक्तनयनः [21]सरोषमिदमब्रवीत् ॥ १६ ॥
ये[22] दूषयन्त्यदुष्टं मां तप उग्रं समास्थितम् ॥ भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः ॥१७॥
अद्य ते कालपाशेन नीता वैवस्वतक्षयम् ॥ सप्तजातिशतान्येव [23]मृतपाः सन्तु सर्वशः ॥ १८ ॥

ऋषिशापकृतरूपस्य ब्रह्मणाप्यवार्यत्वेन जातिचण्डालताऽभावेन मत्तपोमहिमोपबृंहितयज्ञेन सशरीरःस्वर्गंगमिष्यसीतिभावः ॥ ४ ॥ हस्तप्राप्तं अनायासेन सद्योलब्धं । तत्रहेतुः—यस्त्वमिति ॥ ५ ॥ एवमितिसार्धः । शिष्यान् भृत्यान् ॥ ६ ॥ सुहृदः मत्सुहृदः । शोभनहृदयान्वा ॥ ७ ॥ मद्वाक्यबलेनचोदितः आहूतः यःकश्चनान्यः अनादृतं उपेक्षारूपं चण्डालंयाजयतीतिनिन्दारूपंवा यद्वाक्यंब्रूयात् तेनोक्तंतत्सर्वमखिलेनममाख्येयं ॥ ८ ॥ तस्येतिद्वौ । ब्रह्मवादिनः शिष्याः ॥ ९ ॥ ब्रह्मवादिनांवचनमित्यन्वयः ॥ १० ॥ यदनादरवचनंमुनीनांतदपिवक्तव्यमित्युक्तत्वात्तदपिवदन्ति श्रुत्वेत्यादिषट् । सर्वदेशेषु स्थिताइतिशेषः । महोदयमिति । तदाख्यमृषिमित्यर्थः । वासिष्ठशतंचवर्जयित्वेतिद्रष्टव्यं ॥ ११ ॥ वासिष्ठंयदाहेत्यत्रमहोदयश्चेत्यपिबोध्यं उपसंहारेतथादर्शनात् ॥ १२ ॥ विप्रस्यैवयाजनाधिकारात् चण्डालस्ययाज्यत्वानधिकारात् तस्यसदसिदेवताःकथंहविर्भोक्तारः । लुट् ऋषयश्चकथमिष्टशिष्टभोक्तारइतिभावः ॥ १३ ॥ पालिताइतिक्षेपोक्तिः । अयाज्ययाजयितारः ऋषयः कथंस्वर्गंगमिष्यन्तीतिभावः ॥ १४—१६ ॥ "तेषांतेजोविशेषेणप्रत्यवायोनविद्यते" इतिन्यायेनचण्डालयाजनमपिजीर्यतीत्यविज्ञाययेदूषन्ति तेभस्मीभूताभविष्यन्तीत्यर्थः ॥ १७ ॥ अद्येत्यादिपञ्च । क्षयं गृहं । सप्तजातिशतानि सप्तजन्मशतानि । मृत-

---

शि० महोदयंवर्जयित्वेत्यनेन तस्यवसिष्ठपुत्रानुयायित्वंध्वनितं ॥११॥ ति० वासिष्ठंयच्छतंतदपिवर्जयित्वेतियोजना ॥१२॥ शि० सुरर्षयः सुराश्चऋषयश्च हविर्भोक्तारःकथं नभोक्तारइत्यर्थः ॥ १३ ॥ शि० पूर्वमनधिकारियाजकप्रयुक्ताशुद्धिंहविषउक्त्वा इदानींअनधिकारियाज्यप्रयुक्ताशुद्धिंहविषोबोधयन्नाह—ब्राह्मणाइति ॥ १४ ॥ ति० यत् यस्मात् ॥ १७ ॥ ति० मृतपाः

[पा०] १ घ. मिमंमन्येस्वर्गलोकं. २ क. ख. घ. नरेश्वरम्. ३ घ. ज. ट. शरणंगतः. ४ ख. ङ. च. छ. झ. ञ. ट. सर्वानृषीन्सवासिष्ठान्. घ. ज. सर्वानृषिवरान्साधून्. ५ ख. घ—ट. सशिष्यान्सुहृदश्चैव. ६ ङ. च. छ. झ. ञ. ट. सुबहुश्रुतान्. ७ ज. यद्यन्यो. ८ घ. तत्सर्वमखिलोक्तंहि. ९ घ. समाख्येयमनावृतम्. १० ख. तेतुशिष्याः. ११ ख. ज्वलिततेजसः. १२ क. ख. ङ. च. झ. ञ. वचनंसर्वे. १३ घ. वचनंसर्वे. १४ ख. द्विजोत्तमाः. १५ ङ. च. छ. झ. ञ. वासिष्ठंयच्छतं. क. वासिष्ठंतुशतं. १६ ज. क्रोधपर्याकुलेक्षणम्. घ. कोपपर्याकुलाक्षरम्. १७ क. ङ—ञ. यथाहवचनं. १८ ङ. छ. झ. ट. चाण्डालभोजनम्. १९ क. ख. घ—ट. सर्वेसहमहोदयाः. २० ख. कोपसंरक्तनयनः. २१ क. इदंवचनमब्रवीत्. २२ क. ग. घ. झ. ञ. ट. यद्दूषयन्ति. २३ ङ. च. छ. झ. ञ. मृतपास्संभवन्तुते.

श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः ॥ विकृताश्च विरूपाश्च लोकाननुचरन्त्विमान् ॥ १९ ॥
महोदयश्च दुर्बुद्धिर्मामदूष्यं ह्यदूषयत् ॥ दूषितः सर्वलोकेषु निषादत्वं गमिष्यति ॥ २० ॥
प्राणातिपातनिरतो निरनुक्रोशतां गतः ॥ दीर्घकालं मम क्रोधाद्दुर्गतिं वर्तयिष्यति ॥ २१ ॥
एतावदुक्त्वा वचनं विश्वामित्रो महातपाः ॥ विरराम महातेजा ऋषिमध्ये महामुनिः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

विश्वामित्रेणमुनिगणमध्येस्वाभिप्रायनिवेदनेनतैःसहयज्ञोपक्रमः ॥ १ ॥ तथाभागार्थमाह्वानेष्यनागतेषुदेवेषुतपोबलेन त्रिशङ्कोःस्वर्गप्रापणम् ॥ २ ॥ इन्द्रादिभिःप्रतिरोधे अवाक्छिरस्त्वेनपततातेनमुनिंप्रत्याक्रोशनम् ॥ ३ ॥ विश्वामित्रेणत्रिशङ्कुस्तंभनपूर्वकंस्वर्गान्तरसर्जनप्रतिज्ञानेनकतिपयनक्षत्रसर्जनेदेवैस्तत्परिसान्त्वनम् ॥ ४ ॥ देवैस्त्रिशङ्कोर्मुनिसृष्टनक्षत्राणांचतत्रैवावस्थानानुमतिपूर्वकंपुनःस्वलोकगमनम् ॥ ५ ॥

तपोबलहतान्कृत्वा वासिष्ठान्समहोदयान् ॥ ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत ॥ १ ॥
अयमिक्ष्वाकुदायादस्त्रिशङ्कुरिति विश्रुतः ॥ धर्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः ॥
तेनानेन शरीरेण देवलोकजिगीषया ॥ २ ॥
यथाऽयं स्वशरीरेण स्वर्गलोकं गमिष्यति ॥ तथा प्रवर्त्यतां यज्ञो भवद्भिश्च मया सह ॥ ३ ॥
विश्वामित्रवचः श्रुत्वा सर्व एव महर्षयः ॥ ऊचुः समेत्य सहिता धर्मज्ञा धर्मसंहितम् ॥ ४ ॥
अयं कुशिकदायादो मुनिः परमकोपनः ॥ यदाह वचनं सम्यगेतत्कार्यं न संशयः ॥ ५ ॥
अग्निकल्पो हि भगवाञ्शापं दास्यति रोषितः ॥ तस्मात्प्रवर्त्यतां यज्ञः सशरीरो यथा दिवम् ॥६॥
गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा ॥ तथा प्रवर्त्यतां यज्ञः सर्वे समधितिष्ठत ॥ ७ ॥

पाः शवभक्षकाः ॥ १८ ॥ मुष्टिकाः हीनजातिविशेषाः । विकृताः विकृतवचनव्यापारादयः । विरूपाः विकृतवेषाः ॥ १९ ॥ अदूष्यं उक्तन्यायेनेतिभावः । महोदयश्चेत्यनेन पूर्वशप्तावसिष्ठपुत्राएवेतिगम्यते ॥ २० ॥ प्राणातिपातः बलात्प्राणनाशनं । निरनुक्रोशतां निर्घृणतां । वर्तयिष्यति प्राप्स्यति । ननूग्रतपस्वित्वेपिक्षत्रियस्यचण्डालयाजनं सर्वथाअन्याय्यमेवेति कथंयथार्थवादिषुशापप्रवृत्तिरितिचेदत्रोत्तरं । वसिष्ठवैरनिर्यातनकामस्यविश्वामित्रस्य तपःफलमिदमिति ॥ २१—२२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनषष्टितमःसर्गः ॥ ५९ ॥

अथसशरीरस्यत्रिशङ्कोस्स्वर्गप्रापणंषष्टितमे—तप इत्यादि ॥ १ ॥ अयमितिसार्धः । दायमत्तीतिदायादः पुत्रपौत्रादिः । पचाद्यच् । वंशइतियावत् । तेन पूर्वं क्षत्रियरूपेण । अनेन इदानींचण्डालरूपेण । शरीरेण देवलोकजिगीषया स्वर्गस्ववशीकर्तुमिच्छया । मांशरणंगतः ॥ २ ॥ यथेतिपद्य ॥ ३ ॥ ऊचुः अन्योन्यमितिशेषः ॥ ४ ॥ सम्यक्कार्यमित्यन्वयः ॥ ५ ॥ स-

---

शववस्त्रादिहारिणः ॥ १८ ॥ ति० मुष्टिकानाम तन्नामानः । इदानींडोंबाइतिप्रसिद्धाः ॥ १९ ॥ इत्येकोनषष्टितमस्सर्गः ॥५९॥

ति० ज्ञात्वा योगबलेन ॥ १ ॥

[पा०] १ ख. घ. महोदयस्तु. २ क. च. ट. मदूषयत्. घ. ञ. हिदूषयन्. ३ ङ. झ. ञ. ट. हताञ्ज्ञात्वा. ४ क. ख. ग. ङ. च. छ. झ. ञ. ट. स्वेनानेन. घ. स्वकेनैव. ५ ग. ङ. च. छ. झ. ञ. देवलोकं. ६ ङ. च. छ. झ. ञ. ट. ऊचुस्समेतास्सहसा. ७ ङ. झ. ञ. ट. रोषतः. ८ क. ग. च. छ. ज. प्रवर्तताां. ९ ङ. च. छ. झ. ञ. यथादिवि. १० क. ख. च. छ. ज. ततःप्रवर्तताां. घ. ङ. झ. ञ. ट. ततःप्रवर्त्यतां.

एवमुक्त्वा महर्षयः चक्रुस्तास्ताः क्रियास्तदा ॥ याजकश्च महातेजा विश्वामित्रोऽभवत्क्रतौ ॥ ८ ॥
ऋत्विजश्चानुपूर्व्येण मन्त्रवन्मन्त्रकोविदाः ॥ चक्रुः सर्वाणि कर्माणि यथाकल्पं यथाविधि ॥ ९ ॥
ततः कालेन महता विश्वामित्रो महातपाः ॥ चकारावाहनं तत्र भागार्थं सर्वदेवताः ॥ १० ॥
नाभ्यागमंस्तदाऽऽहूता भागार्थं सर्वदेवताः ॥ ११ ॥
ततः क्रोधसमाविष्टो विश्वामित्रो महामुनिः ॥ स्रुवमुद्यम्य सक्रोधस्त्रिशङ्कुमिदमब्रवीत् ॥ १२ ॥
पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर ॥ एष त्वां सशरीरेण नयामि स्वर्गमोजसा ॥
दुष्प्रापं स्वशरीरेण दिवं गच्छ नराधिप ॥ १३ ॥
स्वार्जितं किंचिदप्यस्ति मया हि तपसः फलम् ॥ राजन्स्वतेजसा तस्य सशरीरो दिवं व्रज ॥ १४ ॥
उक्तवाक्ये मुनौ तस्मिन्सशरीरो नरेश्वरः ॥ दिवं जगाम काकुत्स्थ मुनीनां पश्यतां तदा ॥ १५ ॥
देवलोकगतं दृष्ट्वा त्रिशङ्कुं पाकशासनः ॥ सह सर्वैः सुरगणैरिदं वचनमब्रवीत् ॥ १६ ॥
त्रिशङ्को गच्छ भूयस्त्वं नासि स्वर्गकृतालयः ॥ गुरुशापहतो मूढ पत भूमिमवाक्छिराः ॥ १७ ॥
एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतत्पुनः ॥ विक्रोशमानस्त्राहीति विश्वामित्रं तपोधनम् ॥ १८ ॥
तच्छ्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः ॥ रोषमाहारयत्तीव्रं तिष्ठतिष्ठेति चाब्रवीत् ॥ १९ ॥
ऋषिमध्ये स तेजस्वी प्रजापतिरिवापरः ॥ सृजन्दक्षिणमार्गस्थान्सप्तर्षीनपरान्पुनः ॥ २० ॥
नक्षत्रमालामपरामसृजत्क्रोधमूर्च्छितः ॥ दक्षिणां दिशमास्थाय मुनिमध्ये महायशाः ॥ २१ ॥

मधितिष्ठत स्वस्वार्त्विज्यमितिशेषः ॥ ६—७ ॥ तास्ताःक्रियाः स्वस्वार्त्विज्यकर्माणि । याजकः अध्वर्युः । स्रुवमुद्यम्येतिवक्ष्यमाणत्वात् ॥ ८ ॥ मन्त्रवदितिक्रियाविशेषणं । यथाकल्पं कल्पसूत्रमनतिक्रम्य । यथाविधि यथाशास्त्रं ॥ ९ ॥ महताकालेन द्वित्रिर्मन्त्रावृत्त्या । सर्वदेवताः प्रतीतिशेषः ॥ १० ॥ नेत्यर्धं । नाभ्यागमन् अनधिकारिणा अन्यायेनच कृतमकृतमितिन्यायादितिभावः ॥ ११ ॥ स्रुवोद्यमनं कोपजचेष्टाविशेषः ॥ १२ ॥ पश्येतिसार्धः । त्वदभिमतयागस्त्वास्त्वामितिभावः । एषइत्यव्यवधाने । ओजसा तपोवीर्येण । दुष्प्रापं अन्यैरितिशेषः ॥ १३ ॥ स्वार्जितं सुष्ठ्वार्जितं । स्वतेजसा स्वासाधारणप्रभावेन ॥ १४ ॥ मुनीनांपश्यतां मुनिषुपश्यत्सुसत्सु ॥ १५ ॥—देवेतिचत्वारः ॥१६॥ स्वर्गकृतालयः स्वर्गालयार्हः ॥१७—१८ ॥ आहारयत् अकरोत् ॥ १९ ॥ सृजन् अभूदितिशेषः । असृजदित्यर्थः ॥२०॥ मुनिमध्येस्थितएव दक्षिणांदिशमास्थाय तामधिकरणंकृत्वा । नक्षत्रमालां सप्तविंशतिनक्षत्रमालां । यथोत्तरतोध्रुवोचलस्तिष्ठति एवंत्रिशङ्कुस्तिष्ठतु । तंपरितोयथासप्तर्षिमण्डलं तद्वदत्रापिभवतु । तत्रयथानक्षत्राणि तद्वदत्रापीत्यर्थः

शि० मन्त्रकोविदाः मन्त्रोपलक्षितयागनिपुणाः ॥ ९ ॥ शि० सक्रः अतिक्रियासहितः । अधः कोपान्तर्धारणासमर्थः । क्रइत्यत्रक्रुधातोः ''घञर्थेकविधानं'' इतिकः । नञ्पूर्वकधारणार्थकधाधातुप्रकृतिककप्रत्ययान्तोऽधइति । अतएवक्रोधसमाविष्ट इत्यनेननपौनरुक्त्यं । ति० सक्रोधः कोपस्यैवाधिकावस्थाक्रोधः ॥ १२ ॥ ति० हेराजंस्त्वं तस्यतेजसा वैभवेन दिवंव्रज । क्रुद्धत्वात्पुनरुक्तिर्नदोषः ॥ १४ ॥

[पा०] १ ट. एवमुक्ताः. २ क. ख. घ. च. छ. झ. ञ. संजहुस्ताःक्रियास्तदा. ज. ट. संचक्रुस्ताःक्रियास्तदा. च. छ. ञ. चक्रुस्तास्ताःक्रियास्तथा. क. ख. क्रियास्ततः. ३ घ. महाक्रतोः. ४ घ. यथावन्मन्त्रकोविदाः. ५ ङ. च. छ. झ. ञ. स्तादातत्र. ख. घ. ज. ट. स्ततस्तत्र. क. स्तत्रतत्र. ६ ङ. च. छ. झ. ञ. कोपसमाविष्टो. ७ ग. ङ. च. छ. झ. ञ. ट. स्वशरीरेण. ८ ङ. च. छ. झ. ञ. ट. स्वर्गंगच्छनरेश्वर. ९ ज. किंचिदद्यास्ति. घ. किंचिदत्रास्ति. १० घ. मयाद्यतपसः. ११ क. ग. ङ. च. छ. झ. ञ. ट. राजंस्त्वं. १२ क. ख. ग. नराधिपः. १३ ट. देवलोकंगतं. ङ. च. छ. झ. ञ. स्वर्गलोकंगतं. १४ घ. सहस्राक्षस्सुरगणैः. १५ च. छ. स्वर्गेकृतालयः. १६ ख. अपतद्भुवि. १७ ज. ट. क्रोधमाहारयत्तीव्रं. ग. रोषमाहारयंस्तीव्रं. १८ ङ. च. झ. नक्षत्रवंशमवरं. १९ ग. ङ. च. छ. झ. ञ. ऋषिमध्ये. २० क. ग. घ. महातपाः.

सृष्ट्वा नक्षत्रवंशं च क्रोधेन कलुषीकृतः ॥ अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः ॥
दैवतान्यपि स क्रोधात्स्रष्टुं समुपचक्रमे ॥ २२ ॥
ततः परमसंभ्रान्ताः सर्षिसङ्घाः सुरासुराः ॥ [सकिंनरमहायक्षाः सहसिद्धाः सचारणाः]
विश्वामित्रं महात्मानमूचुः सानुनयं वचः ॥ २३ ॥
अयं राजा महाभाग गुरुशापपरिक्षतः ॥ सशरीरो दिवं यातुं नार्हत्येव तपोधन ॥ २४ ॥
तेषां तद्वचनं श्रुत्वा देवानां मुनिपुङ्गवः ॥ अब्रवीत्सुमहद्वाक्यं कौशिकः सर्वदेवताः ॥ २५ ॥
सशरीरस्य भद्रं वस्त्रिशङ्कोरस्य भूपतेः ॥ आरोहणं प्रतिज्ञाय नानृतं कर्तुमुत्सहे ॥ २६ ॥
स्वर्गोस्तु सशरीरस्य त्रिशङ्कोरस्य शाश्वतः ॥ नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्यथ ॥ २७ ॥
यावल्लोका धरिष्यन्ति तिष्ठन्त्वेतानि सर्वशः ॥ मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ ॥ २८ ॥
एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुङ्गवम् ॥ २९ ॥
एवं भवतु भद्रं ते तिष्ठन्त्वेतानि सर्वशः ॥ गगने तान्यनेकानि वैश्वानरपथाद्बहिः ॥ ३० ॥
नक्षत्राणि मुनिश्रेष्ठ तेषु ज्योतिष्षु जाज्वलन् ॥ अवाक्छिरास्त्रिशङ्कुश्च तिष्ठत्वमरसंनिभः ॥ ३१ ॥
अनुयास्यन्ति चैतानि ज्योतींषि नृपसत्तमम् ॥ कृतार्थं कीर्तिमन्तं च स्वर्गलोकगतं तथा ॥ ३२ ॥
विश्वामित्रस्तु धर्मात्मा सर्वदेवैरभिष्टुतः ॥ ऋषिभिश्च महातेजा बाढमित्याह देवताः ॥ ३३ ॥

॥ २१ ॥ सृष्ट्वेतिसार्धः । नक्षत्रवंशं क्षुद्रनक्षत्रगणं । द्वितीयार्धान्तेइतिसंकल्प्येत्युपस्कार्यं । अन्यमिन्द्रंकरिष्यामि विद्यमानलोकस्यान्येन्द्रंकरिष्यामि । अनिन्द्रको लोकोवास्यात् । इन्द्ररहितंलोकान्तरंवाकरिष्यामीत्यर्थः । अतएवाहुराचार्याः "अन्येन्द्रकंभुवनमन्यदनिन्द्रकंवाकर्तुंक्षमेकविरभूदयमन्ववाये" इति । अस्मिन्नर्थेइन्द्रंनाशयिष्यामीत्यर्थःस्यात् । सोनुचितः । सृष्ट्यन्तरोपक्रमविरोधात् । "दैवतान्यपिसक्रोधात्स्रष्टुं समुपचक्रमे" इत्यनन्तरविरोधाच्च । अतएवायमर्थो भवितुमर्हति मयासृज्यमानस्यस्वर्गस्यान्यमिन्द्रंकरिष्यामि अथवामयासृज्यस्वर्गलोकोऽनिन्द्रकोवास्तु तत्रत्रिशङ्कुरेवेन्द्रोभवतु तत्परिवारान्सृजेयमितिताढशदेवान्स्रष्टुमुपचक्रमइत्यर्थः ॥ २२ ॥ परमसंभ्रान्ताः स्वप्रतिसृष्टेरतिदुस्सहत्वादितिभावः । सानुनयं ससान्त्वं ॥ २३ ॥ अनुनयमेवाह—अयमित्यादि । नार्हति अदुष्टत्रैवर्णिकसभ्यत्वात्स्वर्गस्येतिभावः ॥ २४ ॥ तेषामितिचत्वारः ॥ २५ ॥ भद्रंवइतिप्रतिसान्त्वं ॥ २६ ॥ स्वर्गोस्तु अयंत्रिशङ्कुस्थितिदेशएवेतिशेषः । मत्कृतानि मत्सृष्टानि । अतएवमामकानि । लोकाः भूरादयः । यावद्धरिष्यन्ति स्थास्यन्ति । सर्वशः सर्वप्रकारेण । ध्रुवाणि भवन्तु । प्रार्थनायांलोट् । तत् पूर्वोक्तं । अनुज्ञातुं अङ्गीकर्तुं ॥ २७—२८ ॥ एवमुक्ताइत्यादिसार्धाःपञ्च ॥ २९ ॥ सर्वशः सर्वाणि । वैश्वानरपथात् वैश्वानरः ज्योतिः तत्पथात्प्रसिद्धानादिज्योतिश्चक्रमार्गात् ॥ ३० ॥ तेषु त्वत्सृष्टेषु । जाज्वलन् अतिशयेनप्रकाशमानः । अवाक्छिराः गुर्वपचारफलप्रकटनायाधोमुखः । अमरसन्निभः तेजसाअमरतुल्यः । तिष्ठतु ध्रुवइवेतिभावः ॥३१॥ अनुयास्यन्ति स्वर्गनक्षत्राणिध्रुवमिवेतिभावः । स्वर्गलोकगतंयथा स्वर्गलोकगतमिव । कृतार्थमित्यन्वयः ॥ ३२ ॥ बाढमित्यङ्गीकारद्योतकंवचनं ॥ ३३ ॥

तनि० लोकोवास्यात् सेन्द्रं लोकान्तरंवास्यादित्यर्थः । अनिन्द्रकस्यात् विद्यमानंभुवनमिन्द्ररहितमनायकंवास्यादित्यर्थः ॥२२॥ ति० स्वर्गोस्तु स्वर्गपदवाच्यसुखविशेषानुभवोस्तु ॥ २७ ॥ ति० बाढमित्येव आहेतिशेषः । दुराग्रहस्यानर्थहेतुतांप्रतिसंधाय

[पा०] १ क. कुलानक्षत्र. २ ज. चक्रोधात्. क. ख. ग. संक्रोधात्. ट. सक्रोधस्स्रष्टुं. ३ ज. सचारणाः. ख. सुरर्षभाः. क. सुरर्षयः. ४ इदमर्धं ग. ज. दृश्यते. ५ ज. सुरासुराः. ६ ग. नार्हत्येष. ज. नार्हतीति. घ. नचार्हति. ७ क. ख. घ. ज. तेषांतुव. ८ ङ. च. छ. झ. ञ. ट. आरोहणंप्रतिज्ञातं. ज. आरोहणे. ९ क. घ. ज. रेवशाश्वतम्. ट. रेष. १० क. ध्रुवाणिच. ११ झ. यत्कृतानि. १२ ग. तानिसर्वाणि. १३ ग. घ. च. ज. ज्योतिष्षुजज्वलुः. १४ क. ट. स्वर्गलोकंगतं. घ. ब्रह्मलोकगतं. क—ट. गतंयथा. १५ ङ. च. छ. झ. ञ. ऋषिमध्ये. १६ क. ङ—ट. मित्येवदेवताः.

ततो देवा महात्मानो [1]मुनयश्च तपोधनाः ॥ जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षष्टितमः सर्गः ॥ ६० ॥

एकषष्टितमः सर्गः ॥ ६१ ॥

अंबरीषेणयजनारंभेइन्द्रेणगूढंयज्ञपशोरपहारेपुरोहितेनानुकल्पतयाराजानंप्रतिनरपशोरानयनचोदना ॥१॥ पशुक्रयणाय पर्यटताराज्ञाभृगुतुन्देऋचीकमृषिंप्रतिगोशतसहस्रस्वीकारेणपशुभावेन सुतविक्रयणप्रार्थना ॥ २ ॥ मातापितृभ्यांज्येष्ठकनिष्ठयोर्विक्रयणानङ्गीकरणे अंबरीषेणपरिशेषादात्मविक्रयनिश्चयात्स्वयमुपागतेनशुनश्शेपनाम्नामध्यमेनसहनिर्गमनम् ॥ ३ ॥

विश्वामित्रो [2]महात्माऽथ प्रस्थितान्[3]प्रेक्ष्य तानृषीन् ॥ अब्रवीन्नरशार्दूलः[4]सर्वांस्तान्वनवासिनः ॥ १ ॥
[5]महान्विघ्नः प्रवृत्तोऽयं [6]दक्षिणामास्थितो दिशम् ॥ दिशमन्यां [7]प्रपत्स्यामस्तत्र [8]तप्स्यामहे [9]तपः ॥ २ ॥
[10]पश्चिमायां विशालायां पुष्करेषु [11]महात्मनः ॥ सुखं [12]तपश्चरिष्यामो [13]वरं तद्धि तपोवनम् ॥ ३ ॥
एवमुक्त्वा [14]महातेजाः पुष्करेषु महामुनिः ॥ तप उग्रं [15]दुराधर्षं तेपे मूलफलाशनः ॥ ४ ॥
एतस्मिन्नेव काले तु अयोध्याधि[16]पतिर्नृपः ॥ अंबरीष इति ख्यातो यष्टुं समुपचक्रमे ॥ ५ ॥
[17]तस्य वै यजमानस्य पशुमिन्द्रो [18]जहार ह ॥ प्रनष्टे तु [19]पशौ विप्रो राजानमि[20]दमब्रवीत् ॥ ६ ॥
[21]पशुरद्य हृतो राजन्प्रनष्टस्तव दुर्नयात् ॥ अरक्षितारं राजानं घ्नन्ति दोषा नरेश्वर ॥ ७ ॥
प्रायश्चित्तं [22]महद्ध्येतन्नरं वा पुरुषर्षभ ॥ आनयस्व पशुं शीघ्रं यावत्कर्म [23]प्रवर्तते ॥ ८ ॥

यज्ञस्यान्तइत्यनेनविश्वामित्रेणयजमानप्रतिनिधिंकृत्वा यज्ञःसमापितः । देवैर्भागश्चगृहीतइतिगम्यते ॥३४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

अथ शरणागतशुनःशेपरक्षणोचितशक्तिंवक्तुं तपोन्तरमाहैकषष्टितमे—विश्वामित्रइत्यादि । तान् स्वाज्ञयासमागतान् । वनवासिनः स्वतपोवनवासिनः । ॥ १ ॥ योहंदक्षिणांदिशमास्थितः तस्यमेमहान्विघ्नः प्रवृत्तइत्यर्थः ॥ २ ॥ विशालायां विशालतपोवनवत्यां पश्चिमायांदिशिवर्तमानेषु । पुष्करेषु पुष्करतीर्थेषु । तत्तीरेष्वित्यर्थः । महात्मनः हेमहात्मानः ॥ ३—५ ॥ विप्रः पुरोहितइतियावत् ॥६॥ दुर्नयात् अनवधानादित्यर्थः । हृतः केनापीतिशेषः । प्रनष्टः अदृष्टः । णशअदर्शनइतिधातोर्निष्ठा । दोषाः पशुनाशादयः ॥७॥ प्रायश्चित्तं एतत् पशुनाशनिमित्तकं । नरंवा आनयस्व गोभिःक्रीत्वा पशुप्रतिनिधित्वेनेतिशेषः । यावत्प्रवर्त-

---

देवतावचनमङ्गीचकार ॥ ३३ ॥ **वि०** इतिकुशलवयोराख्यानेतृतीयेह्निवर्तमानकथासमाप्ता ॥ ३४ ॥ इतिषष्टितमस्सर्गः ॥ ६० ॥

ति० सर्वांस्तान्विनयान्वितानितिपाठान्तरं ॥ १ ॥ **ति०** दक्षिणांदिशं आ समन्ताद्व्याप्य स्थितः अयं त्रिशङ्कुरूपः महाविघ्नः । अस्माकंतपोनाशकत्वात् तच्छायाक्रान्तत्वाच्चायंदेशोतःपरंतपोऽयोग्यइतिभावः ॥ २ ॥ **शि०** पुष्करेषु तीर्थविशेषे । बहुवचनमादरार्थं । महात्मनः अतिप्रयत्नशीलमुनीनां । एकवचनंजात्यभिप्रायेण ॥ ३ ॥ **ति०** अभ्याहृतः इदानींअस्माभिरानीतः पशुः तवदुर्नयात् त्वत्पापवशात् तावकरक्षिणांप्रमादाच्चप्रनष्टः ॥ ७ ॥ **ति०** एतत् पशुनाशरूपं महत्प्रायश्चित्तं महतःप्रायश्चित्तस्यकारणं । प्रक्रान्तंकर्मयावत्प्रवर्तते प्रवर्तिष्यते । तावत् ततःप्रागेव । नष्टंपशुमन्विष्यानय । तत्प्रतिनिधित्वेनक्रीत्वानरंवापशु-

[पा०] १ घ. ङ. च. छ. झ. ञ. ऋषयश्च. २ ङ. च. छ. झ. ञ. महातेजाः. ३ ङ. च. छ. झ. ञ. ट. न्वीक्ष्यतानृषीन्. ४ ग. स्तान्सर्वान्वनवासिनः. ५ क—घ. झ. ञ. महाविघ्नः. ६ घ. दक्षिणामाश्रितोदिशं. ख. दक्षिणांदिशमास्थितः. ७ क. प्रवेक्ष्यामः. ग. ट. प्रवत्स्यामः. च. प्रयास्यामः. ८ घ. ज. तप्यामहे. ९ घ. ज. वयम्. १० क. घ. च. ज. पश्चिमस्यां. ११ ख. महामुनिः. ख. घ. च. महामनाः. १२ क. ख. तपश्चरिष्यामि. १३ क—घ. ज. परंतद्धि. ङ. च. छ. झ. ञ. सुखंतद्धि. १४ क. महाबाहो. १५ ख. दुराधर्षः. १६ क. घ—ट. पतिर्महान्. १७ ख. तस्यैवयजमानस्य. १८ घ. जहारच. १९ ख. पशौविप्राः. २० ख. मब्रुवन्. २१ ङ. झ. पशुरभ्याहृतो. ख. घ. ञ. पशुरद्याहृतो. २२ ज. मखस्यैतत्. ट. मघस्यैतत्. २३ ज. समाप्यते.

उपाध्यायवचः श्रुत्वा स राजा पुरुषर्षभ ॥ अन्विवेष महाबुद्धिः पशुं गोभिः सहस्रशः ॥ ९ ॥
देशाञ्जनपदांस्तांस्तान्नगराणि वनानि च ॥ आश्रमाणि च पुण्यानि मार्गमाणो महीपतिः ॥ १० ॥
स पुत्रसहितं तात सभार्यं रघुनन्दन ॥ भृगुतुन्दे समासीनमृचीकं संददर्श ह ॥ ११ ॥
तमुवाच महातेजाः प्रणम्याभिप्रसाद्य च ॥ ब्रह्मर्षिं तपसा दीप्तं राजर्षिरमितप्रभः ॥
पृष्ट्वा सर्वत्र कुशलमृचीकं तमिदं वचः ॥ १२ ॥
गवां शतसहस्रेण विक्रीणीषे सुतं यदि ॥ पशोरर्थे महाभाग कृतकृत्योस्मि भार्गव ॥ १३ ॥
सर्वे परिसृता देशा याज्ञीयं न लभे पशुम् ॥ दातुमर्हसि मूल्येन सुतमेकमितो मम ॥ १४ ॥
एवमुक्तो महातेजा ऋचीकस्त्वब्रवीद्वचः ॥ नाहं ज्येष्ठं नरश्रेष्ठ विक्रीणीयां कथंचन ॥ १५ ॥
ऋचीकस्य वचः श्रुत्वा तेषां माता महात्मनाम् ॥ उवाच नरशार्दूलमम्बरीषं तपस्विनी ॥ १६ ॥
अविक्रेयं सुतं ज्येष्ठं भगवानाह भार्गवः ॥ ममापि दयितं विद्धि कनिष्ठं शुनकं नृप ॥
तस्मात्कनीयसं पुत्रं न दास्ये तव पार्थिव ॥ १७ ॥
प्रायेण हि नरश्रेष्ठ ज्येष्ठाः पितृषु वल्लभाः ॥ मातॄणां च कनीयांसस्तस्माद्रक्षे कनीयसम् ॥ १८ ॥
उक्तवाक्ये मुनौ तस्मिन्मुनिपत्न्यां तथैव च ॥ शुनश्शेपः स्वयं राम मध्यमो वाक्यमब्रवीत् ॥ १९ ॥
पिता ज्येष्ठमविक्रेयं माता चाह कनीयसम् ॥ विक्रीतं मध्यमं मन्ये राजन्पुत्रं नयस्व माम् ॥ २० ॥
[अथ राजा महाबाहो वाक्यान्ते ब्रह्मवादिनः ॥ हिरण्यस्य सुवर्णस्य कोटिभी रत्नराशिभिः] ॥ २१ ॥
गवां शतसहस्रेण शुनःशेपं नरेश्वरः ॥ गृहीत्वा परमप्रीतो जगाम रघुनन्दन ॥ २२ ॥

ते प्रवर्तिष्यते "यावत्पुरानिपातयोः—"इतिलट् । तावत् ततःपूर्वमेव । अश्वमेधपशुविसर्जनानन्तरंकर्मकालस्यव्यवहितत्वादितिभावः । वाकारेणपशुंवान्विष्यानयस्वेतिलभ्यते ॥ ८ ॥ सहस्रशः सहस्रसङ्ख्याभिः। मूल्यभूताभिरितिशेषः ॥ ९ ॥ देशानितिजनपदादिसर्वविशेषणं ॥ १० ॥ सइतिच्छेदः । भृगुतुन्दे भृगोर्गिरितटस्यतुन्दे अभ्यन्तरे । भृग्वाख्यऋषिवासस्थानप्रदेशेवा ॥ ११ ॥ सार्धएकान्वयः । तं मुनिं । इदं वक्ष्यमाणं । वचउवाच । ब्रवीतिर्द्विकर्मकः ॥ १२ ॥ पशोः अर्थे प्रयोजनाय । पशुप्रतिनिध्यर्थमित्यर्थः । यदिविक्रीणीषे विक्रीणीथाः । तदाकृतकृत्योस्मि कृतार्थःस्यां ॥ १३ ॥ परिसृताः संचरिताः । याज्ञीयं यज्ञायहितं । "तस्मैहितं" इतिछः । वृद्धिरार्षी । इतः एतेषुसुतेषु । सार्वविभक्तिकस्तसिः ॥ १४ ॥ कथंचन बहुमूल्येनापि । इतरयोरप्रतिषेधादनुमतिर्गम्यते । "अप्रतिषिद्धमनुमतंभवति" इतिन्यायात् शास्त्रेणापत्यदानविक्रययोर्निषेधेपि मूलावसादेधर्मोयापत्यदानवद्यज्ञायापत्यविक्रयोनदोषायेतिभावः ॥ १५—१६ ॥ कनीयमानयेत्यर्थः । **शि०** यावत्कर्मप्रवर्तते तावदेवनरंपशुंशीघ्रमानयस्व । एतदेव अघस्य अघविशिष्टपुरुषस्य । प्रायश्चित्तं अनवधानताजनितपापशोधनं । "प्रायःपापमितिप्रोक्तंचित्तंतच्छोधनंस्मृतं" इत्यनुशासनम् । एतेनोपायान्तरंनास्तीतिसूचितं । हिवाशब्दौ एवार्थे ॥ ८ ॥ **शि०** कापत्यभ्रमवारणायतादृशानुरागेसदाचारंप्रमाणयन्नाह—**प्रायेणेति** । पितृषुवल्लभाः पितृनिष्ठानुरागविषयीभूताः । भवन्तीतिशेषः । **ति०** पितृषु पितॄणां । रक्षिष्यामीत्यर्थेरक्ष्यइत्यार्षं ॥ १८ ॥ **ति०** विक्रेयं मातापित्रोर्विक्रेयत्वेनसंमतं । मन्ये अर्थादितिशेषः ॥ २० ॥ इत्येकषष्टितमस्सर्गः ॥ ६१ ॥

[पा०] १ झ. पुरुषर्षभः. २ ग. रम्याणि. ३ ख. तंपुत्रसहितं. ४ क. ख. समहीपतिः. ५ ङ—ट. भृगुतुंगे. ख. भृगुपुत्रं. ६ क. ख. उवाचचमहातेजाः. ७ ग. झ. महर्षिं. ८ ग. सइदंवचः. क. घ. तदिदंवचः. ९ ङ. च. छ. झ. ञ. परिगतादेशाः. ट. परिस्रुतादेशाः. ख. ज. परिष्कृतादेशाः. १० ग. ङ. ज. झ. ट. यज्ञीयं. ११ ख. कमतोमम. घ. कंततोमम. १२ ख. स्त्विदमब्रवीत्. १३ क. ङ. च. छ. झ. ञ. ट. मंबरीषमिदंवचः. ख. घ. मंबरीषंमहातपाः. १४ ङ. च. छ. झ. ञ. ट. शुनकंप्रभो. १५ क. प्रायेणतु. १६ झ. ज्येष्ठाःपितृषुवल्लभः. ञ. ज्येष्ठाहिपितृवल्लभाः. १७ ख. स्यान्मोक्ष्येकथंसुतम्. १८ घ. राजानंवाक्यमब्रवीत्. १९ ङ. झ. ञ. विक्रेयंमध्यमंमन्येराजन्पुत्रं. क. घ—ट. राजपुत्र. २० अयंश्लोकः ङ. च. छ. झ. ञ. दृश्यते. २१ क. नरेश्वर.

अंम्बरीषस्तु राजर्षी रथमारोप्य सत्वरः ॥ शुनःशेपं महातेजा जगामाशु महायशाः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ॥ ६२ ॥

अंबरीषेपुष्करक्षेत्रमेत्यमध्याह्नेविश्रममाणेशुनश्शेपेनतत्रतपस्यन्तंविश्वामित्रमेत्य निजवृत्तान्तनिवेदनपूर्वकंराजकार्याविरोधेनस्वरक्षणप्रार्थना ॥ १ ॥ विश्वामित्रान्मन्त्रद्वयमुपलब्धवताशुनश्शेपेनसहनगरमागतेनांबरीषेणयागोपक्रमः ॥ २ ॥ तत्रपशूकृतेनशुनश्शेपेनविश्वामित्रोपदिष्टगाथाभ्यामिन्द्रोपेन्द्रस्तवनेतुष्टेनेन्द्रेणतन्मोचनपूर्वकंराज्ञोयज्ञफलदानम् ॥ ३ ॥

शुनश्शेपं नरश्रेष्ठ गृहीत्वा तु महायशाः ॥ व्यश्राम्यत्पुष्करे राजा मध्याह्ने रघुनन्दन ॥ १ ॥

तस्य विश्रममाणस्य शुनःशेपो महायशाः ॥ पुष्करक्षेत्रमागम्य विश्वामित्रं ददर्श ह ॥

तप्यन्तमृषिभिः सार्धं मातुलं परमातुरः ॥ २ ॥

विवर्णवदनो दीनस्तृष्णया च श्रमेण च ॥ पपाताङ्के मुनेराशु वाक्यं चेदमुवाच ह ॥ ३ ॥

न मेस्ति माता न पिता ज्ञातयो बान्धवाः कुतः ॥ त्रातुमर्हसि मां सौम्य धर्मेण मुनिपुङ्गव ॥ ४ ॥

त्राता त्वं हि मुनिश्रेष्ठ सर्वेषां त्वं हि भावनः ॥ ५ ॥

राजा च कृतकार्यः स्यादहं दीर्घायुरव्ययः ॥ स्वर्गलोकमुपाश्नीयां तपस्तप्त्वा ह्यनुत्तमम् ॥ ६ ॥

त्वं मे नाथो ह्यनाथस्य भव भव्येन चेतसा ॥ पितेव पुत्रं धर्मात्मंस्त्रातुमर्हसि किल्बिषात् ॥ ७ ॥

तस्य तद्वचनं श्रुत्वा विश्वामित्रो महातपाः ॥ सान्त्वयित्वा बहुविधं पुत्रानिदमुवाच ह ॥ ८ ॥

यत्कृते पितरः पुत्राञ्जनयन्ति शुभार्थिनः ॥ परलोकहितार्थाय तस्य कालोयमागतः ॥ ९ ॥

समित्यकारान्तत्वमार्षं ॥१७—२३॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

अथ शुनःशेपस्य शरणागतिरुच्यते द्विषष्टितमे—शुनःशेपमित्यादि ॥ १ ॥ तस्यविश्रममाणस्य तस्मिन्विश्राम्यतिसति । आगम्येत्यत्र "वा ल्यपि "इत्यनुनासिकलोपाभावःपक्षे। मातुलं "ऋचीकायकौशिकीप्रतिपादिता" इत्युक्तत्वात् ॥ २ ॥ तृष्णयापिपासया। प्राणपरित्राणलोभेनवा । श्रमेण अध्वश्रमेण मातुलत्वादङ्कपतनं ॥ ३ ॥ नास्ति अरक्षकत्वादसत्प्रायाइत्यर्थः । धर्मेण धर्मरूपप्रयोजनोद्देशेन ॥ ४ ॥ त्रातेत्यर्थं । भावनः हितप्रापकः ॥ ५ ॥ यथाचराजाकृतकार्यःस्यात् अहंच अव्ययः अविनाशः दीर्घायुः अनुत्तमं तपस्तप्त्वा स्वर्गलोकमुपाश्नीयां तथाकुरुष्वेतिशेषः ॥ ६ ॥ भव्येन शुभेन । किल्बिषात् तन्मूलकविपत्तेरित्यर्थः ॥ ७—८ ॥ यस्यप्रयोजनस्यकृते यत्प्रयोजनाय । तादर्थ्येऽव्ययं । पुत्रान्जनयन्ति । मम युष्माकंच परलोकहितार्थाय धर्माय । तस्य वाक्यकरणस्य अयंकालआगतः "जीवतोर्वाक्यकरणात्" इतिस्मृतेः

ती० अङ्के समीपे ॥ ३ ॥ ति० अव्ययः धर्मलोपाभाववान् । अश्नीयां प्राप्नुयां । शि० राजकार्यसिद्धिमन्तरास्वरक्षामहंनवाञ्छामीतिबोधयितुंस्वेप्सितंप्रार्थयन्नाह—राजेति ॥ ६ ॥ वि० भव्येन प्रसन्नेन ॥ ७ ॥

[पा०] १ ख. अंबरीषोमहातेजाः. २ ख. घ. सत्वरम्. ३ ख. शुनश्शेपंतुराजर्षिः. घ. शुनश्शेपंमहाराज. ४ क. घ. महातपाः. ५ ङ. नरश्रेष्ठं. ६ ख. गृहीत्वाथ. ७ क. महाबलम्. ख. महाबलः. घ. महातपाः. ज. सुमहायशाः. ८ ङ. छ. ज. झ. ञ. व्यश्रमत्. क. ग. विश्राम्यत्. घ. विश्राम्य. ९ ज. ट. पुष्करेतीर्थे. १० क—घ. च. ज. ट. पुष्करंश्रेष्ठमागम्य. ङ. छ. झ. ञ. पुष्करंज्येष्ठमागम्य. ११ परमात्मनः. १२ क—च. ज—ट. विषण्णवदनो. १३ क. पपाताग्रे. १४ ज. मुनिराम. क. ख. घ—छ. झ. ञ. ट. मुनेराम. १५ क. ख. नचबान्धवाः. १६ क. ङ—ट. नरश्रेष्ठ. १७ घ. सर्वेषामपिकौशिक. क. ख. भावन. १८ घ. सुदुर्लभम्. १९ क. ख. ङ. च. ज. झ. ञ. समेनाथो. ग. ममनाथोह्यनाथस्य. २० ज. ट. ते-सा. २१ क. धर्मज्ञ. घ. धर्मात्मा. २२ ज. ट. शान्तयित्वा.

अयं मुनिसुतो बालो मत्तश्शरणमिच्छति ॥ अस्य[1] जीवितमात्रेण प्रियं कुरुत पुत्रकाः ॥ १० ॥
सर्वे सुकृतकर्माणः[2] सर्वे धर्मपरायणाः ॥ पशुभूता नरेन्द्रस्य तृप्तिमग्नेः प्रयच्छत[3] ॥ ११ ॥
नाथवांश्च शुनश्शेपो यज्ञश्चाविघ्नितो भवेत्[4] ॥ देवतास्तर्पिताश्च स्युर्मम चापि कृतं वचः[5] ॥ १२ ॥
मुनेस्तु वचनं श्रुत्वा[6] मधुष्यंदादयः[7] सुताः ॥ साभिमानं नरश्रेष्ठ सलीलमिदमब्रुवन् ॥ १३ ॥
कथमात्मसुतान्हित्वा[8] त्रायसेऽन्यसुतं विभो ॥ अकार्यमिव पश्यामः श्वमांसमिव भोजने ॥ १४ ॥
तेषां तद्वचनं श्रुत्वा पुत्राणां मुनिपुङ्गवः ॥ क्रोधसंरक्त[9]नयनो व्याहर्तुमुपचक्रमे ॥ १५ ॥
निस्साध्वसमिदं प्रोक्तं धर्मादपि विगर्हितम् ॥ अतिक्रम्य तु मद्वाक्यं दारुणं रोमहर्षणम् ॥ १६ ॥
श्वमांसभोजिनः[10] सर्वे वासिष्ठा इव जातिषु ॥ पूर्णं वर्षसहस्रं तु पृथिव्यामनुवत्स्यथ[11] ॥ १७ ॥
कृत्वा शापसमायुक्तान्पुत्रान्मुनिवरस्तथा[12] ॥ शुनश्शेपमुवाचार्तं[13] कृत्वा रक्षां निरामयम्[14] ॥ १८ ॥
[इदमाह[15] मुनिश्रेष्ठो विश्वामित्रो महातपाः] ॥
पवित्रपाशैरासक्तो[16] रक्तमाल्यानुलेपनः ॥ वैष्णवं यूपमासाद्य वाग्भिरग्निमुदाहर ॥ १९ ॥
[* इन्द्राविष्णू[17] सुरश्रेष्ठौ स्तुहि त्वं मुनिपुत्रक[18]] ॥ इमे तु गाथे[19] द्वे दिव्ये गायेथा मुनिपुत्रक ॥
अंबरीषस्य यज्ञेऽस्मिंस्ततः सिद्धिमवाप्स्यसि ॥ २० ॥
शुनश्शेपो गृहीत्वा ते द्वे गाथे सुसमाहितः ॥ त्वरया राजसिंहं तमंबरीषमुवाच ह ॥ २१ ॥

॥९॥ शरणं रक्षणं । जीवितमात्रेण जीवनप्रदानमात्रेण ॥१०॥ स्वनियोगकरणार्थमुपश्लोकयति—सर्वइति । प्रयच्छतेतिबहुवचनेन युष्मासु यःकश्चन भवत्विति सूच्यते ॥११॥ मयारक्षितोनाथवान्भवतु । कृतं स्यादिति शेषः ॥१२॥ साभिमानं सगर्वं । सलीलं सपरिहासं ॥१३॥ भोजने भोज्ये । प्राप्ते तत्परित्यागेन श्वमांसभक्षणमिवाकार्यमित्यर्थः । द्वितीयइवशब्दोवाक्यालंकारे ॥१४—१५॥ निस्साध्वसं पितृप्रतिवचनभयरहितं । धर्मात् जीवतोर्वाक्यकरणरूपधर्मात् । विगर्हितं भ्रष्टं । इदमुभयंक्रियाविशेषणं । दारुणं पितृभक्तिरहिततया-परुषं । अतएव रोमहर्षणं रोमाञ्चविकारकरं ॥१६॥ अत्रादौ तस्मादित्युपस्कार्यं । जातिषु मुष्टिकजातिषु ॥ १७ ॥ निरामयं निर्भयं यथाभवतितथा । रक्षां मन्त्रितभस्मधूल्यादिप्रक्षेपरूपाम् ॥ १८ ॥ पाशैः दर्भरशनादिभिः । आसक्तः बद्धः । वैष्णवं विष्णुदेवताकं । "वैष्णवोवैदेवतयायूपः" इतिश्रुतेः । वाग्भिः वक्ष्यमाणगाथाद्वयरूपाभिः । अग्निंप्रत्युदाहर स्तुहि । अग्न्यभिमुखोभूत्वा इन्द्रमिन्द्रानुजंचस्तुहीत्यर्थः ॥१९॥ गाथेदर्शयति—इमेइति । गाथे इन्द्रोपेन्द्रविषये । एका इन्द्रविषया । अन्या उपेन्द्रविषया । ततः गाथाभ्यां । सिद्धिं जीवितसिद्धिं ॥ २० ॥—शुनश्शेपइत्यादि

शि० भोजने प्राप्तपायसादिभोज्ये । पतितंश्वमांसमिव अकार्यंकार्यध्वंसकमेव । पश्यामः । यथाऽग्निहोत्रिणांभोज्येपायसादौ पतितंश्वमांसंभोजनरूपकार्यमात्रध्वंसकं तथा रक्षणीयस्वसुतरक्षासमयेप्राप्तैषाऽन्यसुतरक्षाअवश्यकार्यस्वसुतरक्षामात्रविघातिकेत्यर्थः । एकइवशब्दएवार्थे । इतिवयं पश्यामः निश्चिनुमः । एकइवशब्दइत्यर्थकः ॥ १४ ॥ **शि०** जातिषु श्वपचजातिविशेषेषु ॥ १७ ॥ **ति०** निरामयां सर्वदुःखनाशिकां ॥ १८ ॥

[पा०] १ घ. तस्यजीवित. २ क. ख. सर्वेचकृतकर्माणः. ३ क. ख. ग. ङ. च. छ. ज. ञ. प्रयच्छथ. ४ क. ख. घ. ङ. च. झ. ञ. ट. श्चाविघ्नतोभवेत्. ५ ख. छ. ट. ममापिचकृतंवचः. ६ ङ. च. झ. मुनेस्तद्वचनं. त. ज. ऋषेस्तु. ७ ङ. च. छ. झ. ञ. मधुच्छन्दादयः. ट. मधुस्यन्दादयः. ८ ङ. सुतान्हत्वा. ९ घ. कोपसंरक्त. १० क. ख. च. ज. श्वमांसभोजनाः. पूर्णवर्षसहस्रंतु. श्वमांसभोजिनस्सर्वेइत्यनयोरर्धयोः ट. पुस्तके व्युत्क्रमोदृश्यते. ११ ग. मनुवर्तथ. १२ ख. ग. घ. ङ. छ. झ. ञ. ट. न्मुनिवरस्तदा. १३ ख. मुवाचेदं. १४ क—छ. झ. ञ. ट. निरामयाम्. १५ इदमर्धं च. छ. ज. दृश्यते. १६ ङ. छ. झ. ट. रावद्धो. * इदमर्धं क. ख. ङ. च. छ. ञ. ट. दृश्यते. १७ ख. छ. इन्द्रविष्णू. १८ ङ. मुनिपुङ्गव. १९ क. ख. ङ. च. छ. झ. ञ. इमेचगाथे.

राजसिंह महासत्व शीघ्रं गच्छावहे सदः ॥ निर्वर्तयस्व राजेन्द्र दीक्षां च समुपाविश ॥ २२ ॥
तद्वाक्यमृषिपुत्रस्य श्रुत्वा हर्षसमुत्सुकः ॥ जगाम नृपतिः शीघ्रं यज्ञवाटमतन्द्रितः ॥ २३ ॥
सदस्यानुमते राजा पवित्रकृतलक्षणम् ॥ पशुं रक्तांबरं कृत्वा यूपे तं समबन्धयत् ॥ २४ ॥
स बद्धो वाग्भिरग्र्याभिरभितुष्टाव वै सुरौ ॥ इन्द्रमिन्द्रानुजं चैव यथावन्मुनिपुत्रकः ॥ २५ ॥
ततः प्रीतः सहस्राक्षो रहस्यस्तुतितर्पितः ॥ दीर्घमायुस्तदा प्रादाच्छुनश्शेपाय राघव ॥ २६ ॥
स च राजा नरश्रेष्ठ यज्ञस्य च समाप्तवान् ॥ फलं बहुगुणं राम सहस्राक्षप्रसादजम् ॥ २७ ॥
विश्वामित्रोपि धर्मात्मा भूयस्तेपे महातपाः ॥ पुष्करेषु नरश्रेष्ठ दशवर्षशतानि च ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ॥ ६३ ॥

ब्रह्मणापुष्करक्षेत्रमेत्यविश्वामित्रायऋषिपददानम् ॥ १ ॥ पुष्करेमेनकादर्शनक्षुभितमनसाविश्वामित्रेणतयासहवत्सरदशकंसुखविहरणम् ॥ २ ॥ ततःपश्चात्तक्षेनतेनतद्विसर्जनपूर्वकंहिमवद्गिरौतपश्चरणम् ॥ ३ ॥ ब्रह्मणातस्मैमहर्षिशब्ददानम् ॥ ४ ॥ तथापितेनापरितोषात्पुनस्तपश्चरणम् ॥ ५ ॥

पूर्णे वर्षसहस्रे तु व्रतस्नातं महामुनिम् ॥ अभ्यागच्छन्सुराः सर्वे तपःफलचिकीर्षवः ॥ १ ॥
अब्रवीत्सुमहातेजा ब्रह्मा सुरुचिरं वचः ॥ ऋषिस्त्वमसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः ॥ २ ॥

॥ २१ ॥ सदः यज्ञवाटमित्यर्थः ॥२२—२३॥ सदस्यानुमते सदस्यानां उपद्रष्टृप्रभृतीनां अनुमते अनुमतौ स्थितइतिशेषः । पवित्रैर्दर्भरज्जुभिः । कृतलक्षणं कृतलाञ्छनंकृतपशुत्वज्ञापनमित्यर्थः । पशुंकृत्वा उपाकरणादिसंस्कारसंस्कृतंकृत्वा ॥२४॥ इन्द्रं पशुभोक्तारं । इन्द्रानुजं यूपदेवं । तुष्टाव इन्द्रानुजंपुरुषकारीकृत्य फलप्रदमिन्द्रंस्तुतवानित्यर्थः ॥ २५ ॥ ततइन्द्रस्यैव फलप्रदत्वमाह—ततइति। प्रीतः स्वस्तुत्यातुष्टः । रहस्यस्तुतितर्पितः स्वस्वामिभूतविष्णुरहस्यस्तुत्यातोषितः ॥ २६ ॥ समाप्तवान् प्राप्तवान् । ननुहरिश्चन्द्रोहवैधसऐक्ष्वाकोराजापुत्रआसेत्यादिबह्वृचब्राह्मणोक्तेतिहासविरुद्धोयंकथमुपपद्यतइतिचेन्न । अंबरीषस्यैवहरिश्चन्द्र इतिसंज्ञान्तरमित्यविरोधस्यनेयत्वात् ॥ २७—२८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

पुत्रविषयक्रूरशापदानेनक्रोधनिर्जयाभावान्नब्रह्मर्षित्वसिद्धिरित्याहत्रिषष्टितमे—पूर्णइत्यादि । व्रतस्नातं व्रतान्तेस्नातं । समाप्तपुनश्चरणमितियावत् । तपःफल चिकीर्षवः तपःफलंदातुमिच्छवः ॥ १ ॥ ऋषिस्त्वमसि। पूर्वंतपसाराजर्षिरसि इदानीमृषिरेवासि । अनेन

ती० अभितुष्टाववैसुराविति उपदेशसमये अग्निंवाग्भिरुदाहर इमेद्वेगाथेगायेथाइतिमुनिनोक्तत्वात् वाग्भिरग्निमभिष्टूयतदनन्तरंगाथाद्वयगानेनइन्द्रोपेन्द्रावभितुष्टावेतिवेदितव्यं । वैशब्दोऽग्निस्तवनसमुच्चायकः ॥ २५ ॥ **शि०** ततः तस्मै । चतुर्थ्यन्तात्तसिः ॥ २६ ॥ **शि०** दशवर्षशतानि सहस्रत्रयवर्षपर्यन्तं ॥ २८ ॥ इतिद्विषष्टितमस्सर्गः ॥ ६२ ॥

शि० वर्षसहस्रे वर्षाणिसहस्राणियस्मिंस्तस्मिन् त्रिसहस्रात्मकेसमये ॥ १ ॥

[पा०] १ क. अंबरीषमहाभागशीघ्रंगच्छामहेपुरम्. २ ङ. च. छ. झ. ञ. ट. महाबुद्धे. ३ ङ. च. छ. झ. ञ. गच्छामहेवयम्. ४ घ. निवर्तस्वमहाभाग. ५ क. ख. ग. ङ. च. ज—ट. समुपाहर. घ. समुदाहर. ६ ऋषिपुत्रस्य तद्वाक्यं. ७ ङ. च. छ. झ. ञ. ट. हर्षसमन्वितः. ख. हर्षेणसोत्सुकः. ८ क. ख. ग. छ. सतस्यानुमते. ९ क. ख. ग. पवित्रीकृतलक्षणम्. १० क. पशुंरक्तांबरधरं. ११ घ. समयोजयत्. १२ च. ज. सुरान्. १३ च. यथाहमुनि. १४ ख. ग. छ. मुनिपुङ्गवः. १५ ङ—ट. स्तुतितोषितः. १६ ख. घ. ज. ठ. दीर्घमायुस्ततः. १७ क. ख. घ—छ. झ. ञ. ठ. वासवः. १८ ज. ट. बहुविधं. १९ ञ. विश्वामित्रोऽथ. २० घ. ज. तपस्तेपे. २१ ज. शतानिसः. २२ ज. विश्वामित्रं. २३ क. ख. ङ—ट. अभ्यगच्छन्. २४ ज. चिकीर्षया. २५ घ. सानुनयंवचः.

तमेवमुक्त्वा देवेशस्त्रिदिवं पुनरभ्यगात् ॥ विश्वामित्रो [1]महातेजा भूयस्तेपे [2]महत्तपः ॥ ३ ॥
ततः कालेन महता मेनका [3]परमाप्सराः ॥ पुष्करेषु नरश्रेष्ठ स्नातुं समुपचक्रमे ॥ ४ ॥
तां ददर्श महातेजा मेनकां कुशिकात्मजः ॥ रूपेणाप्रतिमां तत्र विद्युतं जलदे यथा ॥ ५ ॥
दृष्ट्वा [4]कंदर्पवशगो मुनिस्तामिदमब्रवीत् ॥ ६ ॥
अप्सरः स्वागतं तेऽस्तु वस चेह ममाश्रमे ॥ अनुगृह्णीष्व भद्रं ते [5]मदनेन सुमोहितम् ॥ ७ ॥
इत्युक्ता सा वरारोहा [6]तत्र वासमथाकरोत् ॥ तपसो हि महाविघ्नो विश्वामित्र[7]मुपागतः ॥ ८ ॥
तस्यां वसन्त्यां वर्षाणि पञ्चपञ्च च राघव ॥ विश्वामित्राश्रमे [8]राम सुखेन व्यतिचक्रमुः ॥ ९ ॥
अथ काले गते तस्मिन्विश्वामित्रो महामुनिः ॥ सव्रीड इव संवृत्तश्चिन्ताशोकपरायणः ॥ १० ॥
बुद्धिर्मुनेः समुत्पन्ना सामर्षा रघुनन्दन ॥ [9]सर्वं सुराणां कर्मैतत्तपोपहरणं महत् ॥ ११ ॥
अहोरात्रापदेशेन गताः संवत्सरा दश ॥ काममोहाभिभूतस्य [10]विघ्नोऽयं प्रत्युपस्थितः ॥ १२ ॥
विनिश्वसन्[11]मुनिवरः पश्चात्तापेन दुःखितः ॥ भीतामप्सरसं दृष्ट्वा वेपन्तीं [12]प्राञ्जलिं स्थिताम् ॥१३॥
मेनकां मधुरैर्वाक्यैर्विसृज्य कुशिकात्मजः ॥ उत्तरं पर्वतं राम विश्वामित्रो जगाम ह ॥ १४ ॥
स कृत्वा नैष्ठिकीं बुद्धिं जेतुकामो महायशाः ॥ कौशिकीतीरमासाद्य तपस्तेपे [13]सुदारुणम् ॥ १५ ॥
[14]तस्य वर्षसहस्रं तु [15]घोरं तप उपासतः ॥ उत्तरे पर्वते राम देवतानामभूद्भयम् ॥ १६ ॥
[16]आमन्त्रयन्समागम्य सर्वे [17]सर्षिगणाः सुराः ॥ महर्षिशब्दं लभतां साध्वयं कुशिकात्मजः ॥ १७ ॥
देवतानां वचः श्रुत्वा सर्वलोकपितामहः ॥ अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनम् ॥ १८ ॥
महर्षे [18]स्वागतं वत्स तपसोग्रेण तोषितः ॥ महत्त्वमृषिमुख्यत्वं ददामि तव कौशिक ॥ १९ ॥

राजपदाप्रयोगेणक्षत्रियत्वविश्लेषःकियान्कृतइतिगम्यते ॥ २ ॥ विश्वामित्रोमहातेजाभूयस्तेपेमहत्तपइति । अत्रगायत्रीतृतीयाक्षरम् ॥ ३ ॥ अथास्यजितेन्द्रियत्वाभावख्यापनायकथान्तरंप्रस्तौति—ततःकालेनेत्यादि । अप्सरश्शब्दएकवचनान्तोप्यस्ति । देवप्रेषितेतिसिद्धं ॥ ४ ॥ तत्र सरसि । स्नान्तीमेनका जलदमण्डलमध्यवर्तिनी विद्युदिव स्थितेतिभावः ॥ ५—६ ॥ अनुगृह्णीष्व मत्कामतापंशमयेत्यर्थः ॥ ७—८ ॥ पञ्चपञ्चचेति दशेत्यर्थः । सुखेनवसन्त्यामित्यन्वयः ॥ ९ ॥ सव्रीडइवेत्यत्र इवशब्दोवाक्यालङ्कारे ॥ १० ॥ बुद्धिरित्यादिद्विकं । अहोरात्रापदेशेन अहोरात्रतुल्यतया । अन्तेइतिकरणमध्याहार्यं । इतिबुद्धिरुत्पन्नेत्यन्वयः ॥ ११—१२ ॥ विनिश्वसन्नित्यादिद्विकं । वेपन्तीं वेपमानां । मधुरैः त्वयाकिंकृतं कामपरतन्त्रस्यममैवापराधोयमित्येवंरूपैरित्यर्थः । उत्तरंपर्वतं हिमवन्तं ॥ १३—१४ ॥ नैष्ठिकीं व्रतसमापनपर्यन्तां । जेतुकामः इन्द्रियाणीतिशेषः ॥ १५—१८ ॥ महत्त्वमि-

---

ति० कन्दर्पकृतोदर्पोमदः ॥ ६ ॥ शि० सुखेनव्यतिचक्रमुरित्यन्वयः ॥ ९ ॥ शि० तस्मिन् दशवर्षात्मके कालेगतेसत्येव । संवृत्तः सम्यक्वृत्तंवर्तनंयस्यसः । महामुनिर्विश्वामित्रः । सव्रीडः अप्सरस्सङ्गहेतुकव्रीडासहितः । अतएवचिन्ताशोकपरायणः । आसेतिशेषः । इवशब्दएवार्थे ॥ १० ॥ ति० मधुरैःमत्प्रार्थनयास्थितासीतितवनकश्चनदोषइत्यादिवाक्यैः ॥ १४ ॥ ति० नैष्ठिकीं कामस्याप्यकरणंसंकल्पशात्युत्कटब्रह्मचर्यविषयां । बुद्धिं दृढनिश्चयं ॥ १५ ॥ शि० अयं महार्षिशब्दं लभतां । एतेनमहर्षिपदलाभमन्तराएतत्तपोनिवृत्तिर्नभविष्यतीतिदेवतानांनिश्चयोध्वनितः ॥ १७ ॥ चि० देवप्रार्थनयामहर्षिशब्देनैवसंबोधयति—

[पा०] १ ज. ट. महर्षिस्तु. ङ. पिधर्मातमा. २ क. घ. ङ. महातपाः. ३ च. ज. झ. ञ. परमाप्सरा. ४ क. घ—ट. कन्दर्पदर्पवशगो. ५ ङ. च. झ. ञ. ट. मदनेनविमोहितम्. ज. मदनेनानुमोहितम्. ६ ङ. च. झ. ञ. तत्रावासमथा. ७ घ—छ. झ. ञ. ट. मुपागमत्. ८ ग. ङ—ञ. सौम्ये. क. ख. तस्मिन्. घ. रम्ये. ९ ज. सत्यं. १० ख. घ. विघ्नोऽयंसमुपस्थितः. ११ ङ. च. छ. झ. ञ. ट. सनिश्वसन्. १२ क. ग. घ. प्राञ्जलिस्थिताम्. १३ ङ. च. छ. झ. ञ. ट. दुरासदम्. १४ क. ङ—ट. तस्यवर्षसहस्राणि. क. घ. तस्यवर्षसहस्रेण. १५ घ. घोरेतपसितिष्ठतः. १६ ख. ग. ङ. च. ज. झ. अमन्त्रयन्. १७ ज. सर्वेऋषिगणाः. १८ ख. स्वागतंतेऽस्तु.

ब्रह्मणस्स वचः श्रुत्वा सर्वलोकेश्वरस्य ह ॥ नविषण्णो न संतुष्टो विश्वामित्रस्तपोधनः ॥ २० ॥
प्राञ्जलिः प्रणतो भूत्वा सर्वलोकपितामहम् ॥ प्रत्युवाच ततो वाचं विश्वामित्रो महामुनिः ॥ २१ ॥
महर्षिशब्दमतुलं स्वार्जितैः कर्मभिः शुभैः ॥ यदि मे भगवानाह ततोऽहं विजितेन्द्रियः ॥ २२ ॥
तमुवाच ततो ब्रह्मा न तावत्त्वं जितेन्द्रियः ॥ यतस्व मुनिशार्दूल इत्युक्त्वा त्रिदिवं गतः ॥ २३ ॥
विप्रस्थितेषु देवेषु विश्वामित्रो महामुनिः ॥ ऊर्ध्वबाहुर्निरालंबो वायुभक्षस्तपश्चरन् ॥ २४ ॥
घर्मे पञ्चतपा भूत्वा वर्षास्वाकाशसंश्रयः ॥ शिशिरे सलिलस्थायी रात्र्यहानि तपोधनः ॥ २५ ॥
एवं वर्षसहस्रं हि तपोघोरमुपागमत् ॥ २६ ॥
तस्मिन्संतप्यमाने तु विश्वामित्रे महामुनौ ॥ संभ्रमः सुमहानासीत्सुराणां वासवस्य च ॥ २७ ॥
रंभामप्सरसं शक्रस्सह सर्वैर्मरुद्गणैः ॥ उवाचात्महितं वाक्यमहितं कौशिकस्य च ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुष्षष्टितमः सर्गः ॥ ६४ ॥

विश्वामित्रेणस्वतपोभङ्गायइन्द्रप्रेषितायारंभायाःपाषाणीकरणपूर्वकंक्रोधजयेनतपश्चरणप्रतिज्ञानम् ॥ १ ॥

सुरकार्यमिदं रंभे कर्तव्यं सुमहत्त्वया ॥ लोभनं कौशिकस्येह काममोहसमन्वितम् ॥ १ ॥
तथोक्ता साऽप्सरा राम सहस्राक्षेण धीमता ॥ व्रीडिता प्राञ्जलिर्भूत्वा प्रत्युवाच सुरेश्वरम् ॥ २ ॥
अयं सुरपते घोरो विश्वामित्रो महामुनिः ॥ क्रोधमुत्स्रक्ष्यते घोरं मयि देव न संशयः ॥

त्यस्यविवरणं ऋषिमुख्यत्वमिति ॥ १९—२१ ॥ ततोहंविजितेन्द्रियः यदिमहर्षित्वंभवतादत्तं ततोहंविजितेन्द्रियश्चासीत्यर्थः ॥ २२ ॥ नतावत्त्वंजितेन्द्रियः विकारहेतुसंनिधानेपियावन्नविकरोषि तावन्तंकालंतवजितेन्द्रियत्वंनास्तीत्यर्थः ॥ २३—२४ ॥ आकाशसंश्रयः वर्षावरणरहितदेशस्थः ॥ २५–२६ ॥ संभ्रमः किमस्मत्पदंकाङ्क्षतइति अस्थानेभयशङ्का ॥२७॥ अहितंकौशिकस्यचेत्यनेन तद्विषयवैरनिर्यातनार्थंच रंभाप्रेरणमित्यपिगम्यते ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिषष्टितमःसर्गः ॥ ६३ ॥

अथरंभयातपोविघ्नश्चतुष्षष्टितमे—सुरकार्यमित्यादि। लोभनं प्रलोभनं। काममोहेन कामकृतवैचित्त्येन। समन्वितं युक्तं। इह अस्मिन्काले। कौशिकप्रलोभनरूपं सुमहत् सुरकार्यं कर्तव्यमित्यन्वयः ॥ १ ॥ व्रीडिता अशक्यार्थवचननिमित्तलज्जावती ॥ २ ॥ उत्स्रक्ष्यते उत्स्रक्ष्यति । ततः तस्मात् क्रोधोत्सर्जनात् । मे

महर्षेइति ॥१९॥ **ति०** ब्रह्मर्षिशब्दं मदभीष्टं स्वार्जितैःकर्मभिः प्राप्ययदि यतः भगवान्नाह नवदति ततोमन्येहंविजितेन्द्रियः । अत्रकाकुः नविजितेन्द्रियइत्यर्थः ॥ २२ ॥ **शि०** निरालंबः गृहाद्यालंबरहितः ॥ २४ ॥ **शि०** वर्षसहस्राणि त्रिसहस्रवर्षपर्यन्तंघोरंतपः । उपागमत् अकरोत् ॥ २६ ॥ इतित्रिषष्टितमस्सर्गः ॥ ६३ ॥

[पा०] १ ङ. च. छ. झ. ञ. ब्रह्मणस्तुवचः. घ. ब्रह्मणोवचनं. २ क. ख. घ—ट. विश्वामित्रस्तपोधनः. ३ इदमर्धं ग. पुस्तकवर्जंअन्यपुस्तकेषुनदृश्यते. ४ क. घ. ज. ट. प्रयतोभूत्वा. ५ घ. ट. प्रत्युवाचमहायशाः. ६ इदमर्धं घ. ट. पुस्तकयोर्नदृश्यते. ७ ज. महायशाः. ८ क. ख. घ. ङ. छ. ज. झ. ञ. ब्रह्मर्षिशब्दमतुलं. ९ ख. यतोमे. १० क. ख. घ. ङ. छ—ञ. भगवन्नाह. ११ ख. तदाहं. १२ ज. ट. तमुवाचमहातेजाः. १३ क. ख. तावद्विजितेन्द्रियः. १४ ख. ज. जयस्व. १५ घ. संप्रस्थितेषु. १६ ग. वायुभक्षोचरत्तपः. १७ ङ. च. छ. झ. ञ. सलिलेशायी. १८ ग. ज. ट. वर्षसहस्राणि. क. वर्षसहस्रंतु. १९ ख. तपउग्रंसमागमत्. क. उग्रंतपउपागमत्. २० ग. तस्मिन्हितप्यमानेतु. ख. एवंसुतप्यमानेतु. २१ ङ—ट. संतापस्सुमहानासीत्. २२ ख. सर्वैश्शक्रस्सहमरुद्गणैः. ङ—ट. शक्रस्सर्वैस्सहमरुद्गणैः. २३ क. ग. ङ. च. छ. झ. ञ. प्राञ्जलिर्वाक्यं. २४ झ. ट. क्रोधमुत्स्रक्ष्यते. ख. घोरमुत्सृजतिक्रोधं. च. ज. ञ. क्रोधमुत्सृजतेक्रूरं. क. ग. घोरमुत्स्रज्यतेक्रोधं.

ततो हि मे भयं देव प्रसादं कर्तुमर्हसि ॥ ३ ॥
एवमुक्तस्तया राम [1]रंभया भीतया तदा ॥ तामुवाच सहस्राक्षो वेपमानां कृताञ्जलिम् ॥ ४ ॥
[2]मा भैषि रंभे भद्रं ते कुरुष्व मम शासनम् ॥ ५ ॥
कोकिलो हृदयग्राही [3]माधवे रुचिरद्रुमे ॥ अहं कन्दर्पसहितः स्थास्यामि [4]तव पार्श्वतः ॥ ६ ॥
त्वं हि रूपं बहुगुणं कृत्वा परमभास्वरम् ॥ तमृषिं कौशिकं [5]रंभे भेदयस्व [6]तपस्विनम् ॥ ७ ॥
सा श्रुत्वा वचनं तस्य कृत्वा रूपमनुत्तमम् ॥ लोभयामास ललिता विश्वामित्रं शुचिस्मिता ॥ ८ ॥
[7]कोकिलस्य तु शुश्राव वल्गु व्याहरतः स्वनम् ॥ संप्रहृष्टेन मनसा [8]तत एनामुदैक्षत ॥ ९ ॥
अथ तस्य च शब्देन गीतेनाप्रतिमेन च ॥ दर्शनेन च रंभाया मुनिः सन्देहमागतः ॥ १० ॥
[[9]ध्यात्वा मुहूर्तं तेजस्वी दण्डाहत इवोरगः । त्रसन्क्रोधसमाविष्टो विपर्वे इव भानुमान्] ॥ ११ ॥
सहस्राक्षस्य [10]तत्कर्म विज्ञाय मुनिपुङ्गवः ॥ रंभां [11]क्रोधसमाविष्टः शशाप कुशिकात्मजः ॥ १२ ॥
यन्मां [12]लोभयसे रंभे कामक्रोधजयैषिणम् ॥ दश वर्षसहस्राणि शैली स्थास्यसि दुर्भगे ॥ १३ ॥
ब्राह्मणः सुमहातेजास्तपोबलसमन्वितः ॥ उद्धरिष्यति रंभे त्वां मत्क्रोधकलुषीकृताम् ॥ १४ ॥
एवमुक्त्वा महातेजा विश्वामित्रो [13]महामुनिः ॥ अशक्नुवन्धारयितुं [14]क्रोधं [15]संतापमागतः ॥ १५ ॥
तस्य शापेन महता रंभा [16]शैली तदाऽभवत् ॥ वचः श्रुत्वा च कन्दर्पो महर्षेः स च [17]निर्गतः ॥ १६ ॥
कोपेन [18]सुमहातेजास्तपोपहरणे कृते ॥ [19]इन्द्रियैरजितै राम न लेभे शान्तिमात्मनः ॥ १७ ॥
बभूवास्य [20]मनश्चिन्ता तपोपहरणे कृते ॥ १८ ॥
[21]नैव क्रोधं गमिष्यामि न च वक्ष्ये कथंचन ॥ अथवा नोच्छ्वसिष्यामि संवत्सरशतान्यपि ॥ १९ ॥

मम । भयं भीतिः । प्रसादं नियोगनिवृत्तिरूपं ॥३–४॥ माभैषिरंभेइत्यत्र आर्षोह्रस्वः ॥ ५ ॥ अहंकोकिलोभूत्वा माधवे वसन्तेसति । स्थास्यामि ॥ ६ ॥ रूपं सौन्दर्यं । बहुगुणं बहवः शृङ्गारचेष्टारूपा गुणा यस्य तथोक्तं । भेदयस्व चलचित्तंकारय ॥ ७ ॥ ललिता सुन्दरी ॥८॥ वल्गु मनोहरं । संप्रहृष्टेन कोकिलरवश्रवणजसंतोषवता ॥ ९ ॥ तस्य कोकिलस्य गीतेन रंभायाइत्यनुषज्यते । सन्देहं सहस्राक्षप्रेरिता स्वयमागतावेति ॥ १०—११ ॥ तत् रंभाप्रलोभनं । सहस्राक्षस्यकर्मेति विज्ञाय संगीतादिप्रलोभनेनहेतुनानिश्चित्य ॥ १२ ॥ शैली शिलाप्रतिमा । दुर्भगे दुष्टप्रयत्ने । "भगःश्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु" इत्यमरः ॥ १३ ॥ स्वामिपरतन्त्रायाःकिमस्याःशापेनेतिपश्चात्तापेनानुगृह्णाति—ब्राह्मणइति । ब्राह्मणः ब्रह्मपुत्रो वसिष्ठइत्याहुः ॥ १४ ॥ संतापं शापनिमित्तपश्चात्तापं ॥१५॥ वचः रंभाशापरूपं । सच इन्द्रश्च ॥१६॥ इन्द्रियैरजितैरिति उक्तरीत्याकामक्रोधाहतत्वादितिभावः । इन्द्रियैःहेतुभिः । आत्मनः मनसः । शान्तिं दुःखोपशमं ॥ १७ ॥ मनश्चिन्ता संकल्पः ॥ १८ ॥ नचवक्ष्येकथंचन मौनमेवकरिष्यामीत्यर्थः । नोच्छ्वसि-

ति० कोपेन चात्कामेनच ॥ १६ ॥ इतिचतुष्षष्टितमस्सर्गः ॥ ६४ ॥

[पा०] १ ग. ङ. च. छ. झ. ञ. ट. सभयंभीतया. २ ङ. च. छ. झ. ञ. ट. माभैषीरंभे. ३ क. माधवोरुचिरद्रुमः. ४ ग. मुनिपार्श्वतः. ५ ख. ङ. झ. कौशिकंभद्रे. ६ ख. तपोधनम्. ७ ख. कोकिलस्यच. क. ट. कोकिलस्यस. ८ ङ. च. छ. झ. ञ. सचैनामन्ववैक्षत. ९ अयंश्लोकः क. च. छ. दृश्यते. १० ङ. च. छ. झ. ञ. तत्सर्वं. ११ घ. कोपसमाविष्टः. १२ ख. क्रोधयसे. १३ ज. ट. महातपाः. १४ घ. ङ. ज. झ. ञ. कोपंसंताप. क. ख. ग. च. छ. कोपसंताप. १५ क. ख. ङ—ञ. मात्मनः. १६ क. शैलीरंभातदाभवत्. ग. ज. शैलीरंभाऽभवत्तदा. १७ घ. निस्सृतः. १८ क—घ. ज. समहातेजाः. ङ. च. छ. झ. ञ. ट. चमहातेजाः. १९ ज. इन्द्रियैःक्षुभितोराम. २० घ. ज. पुनश्चिन्ता. २१ ज. झ. ट. नैवंक्रोधं. क. नवैक्रोधं.

अहं विशोषयिष्यामि ह्यात्मानं विजितेन्द्रियः ॥ तावद्यावद्धि मे प्राप्तं ब्राह्मण्यं तपसार्जितम् ॥
अनुच्छ्वसन्नभुञ्जानस्तिष्ठेयं शाश्वतीः समाः ॥ २० ॥
न हि मे तप्यमानस्य क्षयं यास्यन्ति मूर्तयः ॥ २१ ॥
एवं वर्षसहस्रस्य दीक्षां स मुनिपुङ्गवः ॥ चकाराप्रतिमां लोके प्रतिज्ञां रघुनन्दन ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुष्षष्टितमः सर्गः ॥ ६४ ॥

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

पूर्वस्यांदिशिदुश्चरंतपश्चरताविश्वामित्रेण ब्रह्मादिभिर्ब्रह्मर्षित्ववरदानेपितपसोऽनुपरमे देवगणवचसावसिष्ठेनपरमेष्ठिवराज्ञु-मोदनेनतन्निवर्तनम् ॥ १ ॥ एवंशतानन्देनविश्वामित्रंबोधितेनजनकेन तत्पूजनपूर्वकंतदनुमत्यास्वभवनगमनम् ॥ २ ॥

अथ हैमवतीं राम दिशं त्यक्त्वा महामुनिः ॥ पूर्वां दिशमनुप्राप्य तपस्तेपे सुदारुणम् ॥ १ ॥
मौनं वर्षसहस्रस्य कृत्वा व्रतमनुत्तमम् ॥ चकाराप्रतिमं राम तपः परमदुष्करम् ॥ २ ॥
पूर्णे वर्षसहस्रे तु काष्ठभूतं महामुनिम् ॥ विघ्नैर्बहुभिराधूतं क्रोधो नान्तरमाविशत् ॥ ३ ॥
स कृत्वा निश्चयं राम तप आतिष्ठदव्ययम् ॥ ४ ॥
तस्य वर्षसहस्रस्य व्रते पूर्णे महाव्रतः ॥ भोक्तुमारब्धवानन्नं तस्मिन्काले रघूत्तम ॥
इन्द्रो द्विजातिर्भूत्वा तं सिद्धमन्नमयाचत ॥ ५ ॥
तस्मै दत्वा तदा सिद्धं सर्वं विप्राय निश्चितः ॥ निश्शेषितेऽन्ने भगवानभुक्त्वैव महातपाः ॥
न किंचिदवदद्विप्रं मौनव्रतमुपस्थितः ॥ ६ ॥
[तथैवासीत्पुनर्मौनमनुच्छ्वासं चकार ह] ॥ अथ वर्षसहस्रं वै नोच्छ्वसन्मुनिपुङ्गवः ॥ ७ ॥

ष्यामिकेवलंकुंभकंकरिष्यामीत्यर्थः । उच्छ्वासेनखलु-क्रोधादयोभविष्यन्तीतिभावः ॥ १९ ॥ यावत्पर्यन्तं ब्राह्मण्यंप्राप्तंभविष्यतितावत्पर्यन्तं आत्मानं शरीरंशोषयिष्यामि ॥ २० ॥ मूर्तयः शरीरावयवाः । क्षयंनयास्यन्ति । तपःप्रभावादितिभावः ॥ २१ ॥ वर्षसहस्रस्य वर्षसहस्रसंबन्धिनीं । वर्षसहस्रानुयायिनीं । दीक्षां अनुच्छ्वासाभोजनसंकल्पं । उद्दिश्येतिशेषः । अप्रतिमां निस्तुलां । प्रतिज्ञां एवमेवसर्वदाकरिष्यामीत्यध्यवसायं चकार ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुष्षष्टितमःसर्गः ॥ ६४ ॥

अथविश्वामित्रस्यब्रह्मर्षित्वप्राप्तिः पञ्चषष्टितमे— अथहैमवतीमित्यादि ॥ १ ॥ वर्षसहस्रस्य वर्षसहस्रसंबन्धि तत्साध्यमित्यर्थः । मौनंव्रतं मौनरूपंव्रतं । कृत्वा संकल्प्येत्यर्थः ॥ २ ॥ काष्ठभूतं काष्ठवदवस्थितं । आधूतं आकुलीकृतमपि । आन्तरं अन्तरवन्तं । दृढान्तःकरणवन्तमितियावत् । यद्वा तंप्रति क्रोधः अन्तरं अवकाशं । नाविशत् ॥ ३—४ ॥ तस्य पूर्वसंकल्पितस्य । वर्षसहस्रस्य संबन्धिनि । व्रतेपूर्णे । तस्मिन्काले पारणकाले । सिद्धं पक्वं । याचिर्द्विकर्मकः ॥ ५ ॥ निश्चितः तपस्सिद्ध्येसर्वथैवान्नंदातव्यमितिनिश्चयवानित्यर्थः । निश्चितः अशङ्कितइतिवा । निश्शेषित-इत्यनेनसर्वमन्नमिन्द्रेणयाचितमितिगम्यते । अभुक्त्वे-

---

ति० मौनंचात्रकाष्ठमौनं ॥ २ ॥ **शि०** निश्चितः निर्गतंचितंसंचयोयस्य अन्नान्तरसंचयरहितइत्यर्थः । किंच निश्चितः याचकोनप्रत्याख्येयइतिनिश्चयंप्राप्तः ॥ ६ ॥ **शि०** मुनिपुङ्गवः विश्वामित्रः । अनुच्छ्वासं उच्छ्वासरहितं । मौनं पुनश्चकार आरेभे । अथ तादृशमौनव्रतप्रारंभानन्तरं । वर्षसहस्रं नोच्छ्वसन् उच्छ्वासरहितस्सन्नेव । तथैववक्रोच्चारादिरहितएवआसीत् । ह्प्रसिद्धं ।

[पा०] १ ङ—ट. अहंहिशोष. २ क. ख. ग. ङ—ट. यिष्यामिआत्मानं. ३ च. तपसोर्जितम्. क—घ. ज. ट. स्वतपोर्जितम्. ४ घ. तीक्ष्णां. ५ क. घ. ङ. च. झ. ञ. ट. आतिष्ठताव्ययम्. ६ ख. सिद्धमन्नं. ७ घ. नभुक्लाच. ८ ट. मौनंव्रत. ९ क. ङ. छ. झ. ञ. ट. मुपास्थितः. ग. घ. ज. मथास्थितः. १० इदमर्धं क—ट. दृश्यते. ११ ङ. च. छ. झ. ञ. सहस्रंच.

तस्यानुच्छ्वसमानस्य मूर्ध्नि धूमो व्यजायत ॥ त्रैलोक्यं येन संभ्रान्तमादीपितमिवाभवत्[1] ॥ ८ ॥
ततो देवास्सगन्धर्वाः[2] पन्नगासुरराक्षसाः[3] ॥ मोहितास्तेजसा तस्य तपसा[4] मन्दरश्मयः ॥
कश्मलोपहताः सर्वे पितामहमथाब्रुवन् ॥ ९ ॥
बहुभिः कारणैर्देव[5] विश्वामित्रो महामुनिः ॥ लोभितः क्रोधितश्चैव तपसा चाभिवर्धते ॥
न ह्यस्य वृजिनं किंचिद्दृश्यते[6] सूक्ष्ममप्यथ[7] ॥ १० ॥
न दीयते यदि त्वस्य मनसा यदभीप्सितम् ॥ विनाशयति[8] त्रैलोक्यं तपसा[9] सचराचरम् ॥ ११ ॥
व्याकुलाश्च दिशः सर्वा न[10] च किंचित्प्रकाशते ॥ सागराः क्षुभिताः सर्वे विशीर्यन्ते च पर्वताः ॥१२॥
प्रकंपते च[11] पृथिवी वायुर्वाति[12] भृशाकुलः ॥ ब्रह्मन्न प्रतिजानीमो नास्तिको जायते जनः ॥ १३ ॥
संमूढमिव त्रैलोक्यं संप्रक्षुभितमानसम् ॥ भास्करो निष्प्रभश्चैव महर्षेस्तस्य तेजसा ॥ १४ ॥
बुद्धिं न कुरुते यावन्नाशे देव[13] महामुनिः ॥ तावत्प्रसाद्यो भगवानग्निरूपो[14] महाद्युतिः ॥ १५ ॥
कालाग्निना यथा पूर्वं त्रैलोक्यं दह्यतेऽखिलम्[15] ॥ देवराज्यं चिकीर्षेत दीयतामस्य यन्मतम्[16] ॥१६॥
ततः सुरगणाः सर्वे पितामहपुरोगमाः ॥ विश्वामित्रं महात्मानं वाक्यं[17] मधुरमब्रुवन् ॥
ब्रह्मर्षे स्वागतं तेऽस्तु तपसा स्म सुतोषिताः ॥ १७ ॥
ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक ॥ दीर्घमायुश्च ते ब्रह्मन्ददामि समरुद्गणः ॥
स्वस्ति प्राप्नुहि भद्रं ते गच्छ सौम्य[18] यथासुखम् ॥ १८ ॥
पितामहवचः श्रुत्वा सर्वेषां च[19] दिवौकसाम् ॥ कृत्वा प्रणामं मुदितो व्याजहार महामुनिः ॥१९॥
ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथैव च ॥ ओंकारश्च[20] वषट्कारो वेदाश्च वरयन्तु माम् ॥ २० ॥

ति पुनःपाकार्हतण्डुलासंपादनादितिभावः ॥६—७॥ आदीपितं तापितं ॥८॥ तपसातेजसातपोरूपाग्निना । मोहिताः मूर्च्छिताः । कश्मलोपहताः दुःखोपहताः ॥ ९ ॥ लोभितः लोभकारणैरंभादर्शनादिभिःप्रलोभितः । क्रोधितःक्रोधकारणैर्वर्षसहस्रान्तसिद्धकृतान्नयाचनादिभिःक्रोधितः । वृजिनं पापंरागद्वेषादिलक्षणं । सूक्ष्मं स्वल्पं ॥ १० ॥ विनाशयति विनाशयेत् असावितिशेषः॥११—१२॥ नप्रतिजानीमः प्रतिक्रियामितिशेषः । नास्तिकोजायतइति उक्तसंक्षोभवशान्नास्तिकइवकर्मानुष्ठानशून्योजायतइत्यर्थः ॥ १३ ॥ उक्तार्थानुवादपूर्वकमनुष्ठेयांशउच्यते—संमूढमिवेत्यादि ॥१४॥हेदेव ब्रह्मन् अतःपरंविश्वामित्रः नाशे जगत्क्षये। यावत्बुद्धिंनकुरुते तावत्प्रसाद्यः अनुग्राह्यः ॥ १५ ॥ पूर्वं प्रलयकाले । कालाग्निना त्रैलोक्यं यथा अदह्यत । तथैव त्रैलोक्यं अनेन दह्यते धक्ष्यते । अयंदेवराज्यंचिकीर्षेतापि । अतः अस्ययत्ब्रह्मर्षित्वंमतं । तद्दीयतामित्यर्थः ॥ १६ ॥ ततः देवविज्ञापनानन्तरं ॥१७॥ ब्रह्मवचनंप्राधान्येन ॥ १८—१९ ॥ वरयन्तु अध्या-

---

वैशब्दएवार्थे ॥ ७ ॥ **ति०** धूमइति धूमकेतुरित्यर्थः । अग्निरितियावत् । अतएवाग्रे "आतापितमिव" इतिवक्ष्यति । अयं शुद्धसत्वगुणप्रभवोऽग्निः इतरेषांरजस्तमःप्रधानानांतन्मिश्रसत्वप्रधानानांचदेवादीनांतापजनकइतिबोध्यं ॥ ८ ॥ **शि०** वृजिनं असत्कृतविघ्नजनितदुःखं ॥ १० ॥ **ती०** नास्तिकः नास्तिपरलोकइतिमन्यमानः । **शि०** नास्तिकः नास्ति कं सुखंयस्यसः अत्यन्तव्याकुलत्वेनसुखरहितइत्यर्थः ॥१३॥ **ति०** यद्यसौदेवराज्यमपिचिकीर्षेत तदा तदप्यस्यदीयतामित्यर्थइतिकेचित् । यदस्याभीष्टंनदीयते तदाऽसौदेवराज्यंचिकीर्षेत । अतोस्ययन्मनः तत्स्थंब्रह्मर्षित्वं तद्दीयतामित्यर्थइत्यन्ये ॥ १६ ॥ **शि०** अप्रार्थितमपि ददामीत्याह—**दीर्घमायुश्चेति** । समरुद्गणइत्युक्त्यायावद्वायुसंचारमीदृक्केख्यातिर्भविष्यतीतिसूचितं ॥ १८ ॥ **ति०** ओमिति

[पा०] १ ङ. झ. ञ. मातापितमिवा. ज. मुदीपितमिवा. २ घ—ट. देवर्षिगन्धर्वाः. ३ क—ट. पन्नगोरगराक्षसाः. ४ ङ. च. छ. झ. ञ. स्तपसातस्यतेजसा. ट. देवतास्तस्य. क. स्तेजसातस्यतपसो. ५ ङ. दैवैर्विश्वामित्रो. ६ क. ख. द्रक्ष्यते. ७ ङ. झ. मप्युत. ८ ख. विनाशमेति. ९ घ. तपसाच. १० आदित्योनप्रकाशते. ११ झ. वसुधा. १२ ङ. च. छ. झ. ञ. वातीहसंकुलः. ज. वात्यशुभाकुलः. १३ ख. देवयावन्नाशे. ज. देवयावदेषजगत्क्षये. १४ ङ—ट. भगवन्नग्नि. १५ क. घ. भृशम्. १६ ङ. झ. ञ. ट. यन्मनः. १७ घ. मिदंवचनमब्रुवन्. १८ ज. सौम्ययथागतम्. १९ ङ—ट. त्रिदिवौकसाम्. २० क. घ—ट. ओंकारोथ.

क्षत्रवेदविदांश्रेष्ठो ब्रह्मवेदविदामपि ॥ ब्रह्मपुत्रो वसिष्ठो मामेवं वदतु देवताः ॥
यद्ययं परमः कामः कृतो यान्तु सुरर्षभाः ॥ २१ ॥
ततः प्रसादितो देवैर्वसिष्ठो जपतांवरः ॥ सख्यं चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवीत् ॥ २२ ॥
ब्रह्मर्षिस्त्वं न संदेहः सर्वं संपत्स्यते तव ॥ इत्युक्त्वा देवताश्चापि सर्वा जग्मुर्यथागतम् ॥ २३ ॥
[विश्वामित्रोपि धर्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमम् ॥ पूजयामास ब्रह्मर्षिं वसिष्ठं जपतांवरम् ॥
कृतकामो महीं सर्वां चचार तपसि स्थितः] ॥ २४ ॥
एवं त्वनेन ब्राह्मण्यं प्राप्तं राम महात्मना ॥ एष राम मुनिश्रेष्ठ एष विग्रहवांस्तपः ॥
एष धर्मपरो नित्यं वीर्यस्यैष परायणम् ॥ २५ ॥
एवमुक्त्वा महातेजा विरराम द्विजोत्तमः ॥ २६ ॥
शतानन्दवचः श्रुत्वा रामलक्ष्मणसन्निधौ ॥ जनकः प्राञ्जलिर्वाक्यमुवाच कुशिकात्मजम् ॥ २७ ॥
धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुङ्गव ॥ यज्ञं काकुत्स्थसहितः प्राप्तवानसि धार्मिक ॥ २८ ॥
पावितोऽहं त्वया ब्रह्मन्दर्शनेन महामुने ॥ [विश्वामित्र महाभाग ब्रह्मर्षीणां वरोत्तम] ॥
गुणा बहुविधाः प्राप्तास्तव संदर्शनान्मया ॥ २९ ॥
विस्तरेण च ते ब्रह्मन्कीर्त्यमानं महत्तपः ॥ श्रुतं मया महातेजो रामेण च महात्मना ॥ ३० ॥
सदस्यैः प्राप्य च सदः श्रुतास्ते बहवो गुणाः ॥ ३१ ॥
अप्रमेयं तपस्तुभ्यमप्रमेयं च ते बलम् ॥ अप्रमेया गुणाश्चैव नित्यं ते कुशिकात्मज ॥
[पितामहस्य च यथा यथा चैव ह्युमापतेः] ॥ ३२ ॥
तृप्तिराश्चर्यभूतानां कथानां नास्ति मे विभो ॥ कर्मकालो मुनिश्रेष्ठ लंबते रविमण्डलम् ॥ ३३ ॥

पनयाजनार्हाभवन्त्विलर्थः ॥ २० ॥ ब्रह्मानुग्रहेपिस-जातीयपरिग्रहार्थमाह—क्षत्रेति । क्षत्रवेदाः क्षत्रिया-णांशान्तिपुष्ट्यादिप्रयोजनाआथर्वणवेदाः तद्विदांश्रेष्ठः। सूर्यवंशानादिपुरोहितत्वादितिभावः । ब्रह्मवेदाःब्रह्मप्र-तिपादकावेदाः । वेदान्ताइत्यर्थः । यद्वा ब्राह्मणमात्र-प्रवचनार्हावेदास्त्रयीरूपाः । एवंवदतु ब्रह्मर्षिरितिवद-तु । अयंकामः वसिष्ठमुखेनब्रह्मर्षित्ववादरूपःकामः । यदिकृतः। तदैव मद्विषयेकृतकृत्या यान्तु नान्यथेत्यर्थः ॥२१—२२॥ एवमस्त्वित्यस्यविवरणंब्रह्मर्षिस्त्वमिति। सर्वं ब्राह्मण्यं । तद्भृतयाजनाध्यापनादिकंच ॥ २३ ॥ अथशतानन्दवचनं—एवमित्यादि । तपइति अकारा-न्तपुँल्लिङ्गत्वमार्षं ॥ २५—३० ॥ सदःप्राप्यस्थितैः स-दस्यैः ॥ ३१ ॥ अप्रमेयाः इयत्तयाज्ञातुमशक्याः॥३२॥ कथानामिति "पूरणगुण—" इतितृतीयार्थेषष्ठी। तृप्तिः

ब्रह्मज्ञानसाधनं । वषडिति यज्ञसाधनं । वेदाश्च तदपेक्षिताङ्गोपाङ्गादिप्रतिपादकाः । वरयन्तु यथावसिष्ठादीन्सहजब्राह्मणान्वरय-न्तितथा । वरणंच अध्यापनयाजनयोरनुमतिः । **शि०** ओं प्रणवं कारयतिप्रकटयतिस्वनियम्यब्रह्मद्वारेति ओंकारोरघुनाथः । वषट्कारः वषडुपलक्षितस्वाहादेःकारः करणं उच्चारणमितियावत् । यस्मिन् स रामोद्देश्यकसाङ्गसकलयागःवरयन्तु वसिष्ठादिष्वि-वमयिसाक्षात्काराःभवन्त्वित्यर्थः । अथशब्दश्चार्थे ॥ २० ॥ **वि०** ब्रह्माद्यनुग्रहेपिजातिब्राह्मण्याभावाद्वसिष्ठेनानङ्गीकारेव्यर्थमे-वसर्वमतआह—**क्षत्रेत्यादि** ॥ २१ ॥ **ति०** सर्वं ब्राह्मण्यप्रयोजकंब्राह्मणाज्जन्मतत्संस्कारादि संपद्यते संपन्नं । अनेनत्रिपुरुषप-र्यन्तंविश्वामित्रस्यब्राह्मण्यलाभस्सूचितः । एतच्च "अनृष्यानन्तर्ये—"इतिसूत्रेमहाभाष्येस्पष्टं। इतिवसिष्ठोक्तंदेवताअप्युक्त्वाजग्मु-रित्यन्वयः ॥ २३ ॥ **ति०** गुणाः कर्मश्रैष्ठ्यजातिश्रैष्ठ्यलक्षणाः ॥ २९ ॥ इतिपञ्चषष्ठितमस्सर्गः ॥ ६५ ॥

[पा०] १ ङ. च. छ. झ. ञ. यद्येवंपरमः. २ क. ख. ङ. च. छ. झ. ञ. संपद्यतेतव. ३ अयंश्लोकः क—ट. दृश्यते. ४ ख. ब्रह्मर्षिपूजयामास. ५ ख. घ. ट. विग्रहवत्तपः. ६ ग. घ. ट. मुनिपुङ्गवः. ७ ख. घ. धार्मिकः. क. ङ. च. छ. झ. ञ. कौशिक. घ. कौशिकः. ८ इदमर्धं ग. च. ज. दृश्यते. ९ ङ. च. छ. झ. ञ. विस्तरेणचवैब्रह्मन्. घ. सुविस्तरेणतेब्रह्मन्. १० क. ख. ग. च. सदा. ११ ख. तवतपअप्रमेयं च. १२ क. ग. घ. अप्रमेयगुणाश्चैव. १३ इदमर्धं ग. ज. दृश्यते.

श्वः प्रभाते महातेजो द्रष्टुमर्हसि मां पुनः ॥ [रामेण रमणीयेन लक्ष्मणेन च संगतः]॥
स्वागतं तपतां श्रेष्ठ मामनुज्ञातुमर्हसि ॥ ३४ ॥
एवमुक्तो मुनिवरः प्रशस्य पुरुषर्षभम् ॥ विससर्जाशु जनकं प्रीतं प्रीतमनास्तदा ॥ ३५ ॥
एवमुक्त्वा मुनिश्रेष्ठं वैदेहो मिथिलाधिपः ॥ प्रदक्षिणं चकाराशु सोपाध्यायः सबान्धवः ॥ ३६ ॥
विश्वामित्रोपि धर्मात्मा सरामः सहलक्ष्मणः ॥ स्ववाटमभिचक्राम पूज्यमानो महर्षिभिः ॥ ३७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

परेद्युर्विश्वामित्रेणजनकंप्रतिराघवयोर्धनुर्दर्शनचोदना ॥ १ ॥ जनकेनतंप्रतिधनुष्प्रभाववर्णनपूर्वकंस्वस्यतल्लाभप्रकारकथनम् ॥ २ ॥ तथास्वस्यसीतालाभप्रकारादिनिवेदनपूर्वकंरामेणधनुरारोपणेतद्दानप्रतिज्ञानम् ॥ ३ ॥

ततः प्रभाते विमले कृतकर्मा नराधिपः ॥ विश्वामित्रं महात्मानमाजुहाव सराघवम् ॥ १ ॥
तमर्चयित्वा धर्मात्मा शास्त्रदृष्टेन कर्मणा ॥ राघवौ च महात्मानौ तदा वाक्यमुवाच ह ॥ २ ॥
भगवन्स्वागतं तेऽस्तु किं करोमि तवानघ ॥ भवानाज्ञापयतु मामाज्ञाप्यो भवता ह्यहम् ॥ ३ ॥
एवमुक्तस्तु धर्मात्मा जनकेन महात्मना ॥ प्रत्युवाच मुनिर्वीरं वाक्यं वाक्यविशारदः ॥ ४ ॥
पुत्रौ दशरथस्येमौ क्षत्रियौ लोकविश्रुतौ ॥ द्रष्टुकामौ धनुःश्रेष्ठं यदेतत्त्वयि तिष्ठति ॥ ५ ॥
एतद्दर्शय भद्रं ते कृतकामौ नृपात्मजौ ॥ दर्शनादस्य धनुषो यथेष्टं प्रति यास्यतः ॥ ६ ॥
एवमुक्तस्तु जनकः प्रत्युवाच महामुनिम् ॥ श्रूयतामस्य धनुषो यदर्थमिह तिष्ठति ॥ ७ ॥

अलंबुद्धिः । स्वागतमिति त्वदागमनंशुभकृज्जातमित्यर्थः ॥ ३३—३६ ॥ स्ववाटं स्वनिवेशं ॥ ३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

एवं स्वमातृशापमोचनघटकत्वकृतोपकारस्मृत्या शतानन्दप्रतिपादितेनप्रासङ्गिकेनविश्वामित्रचरित्रेण उपकारकगुरुवैभवोज्ञेयः कामक्रोधौसर्वदादुर्निरोधौ जितकामक्रोधएवब्राह्मणोत्तमः ब्राह्मण्यंच नसुलभं ब्रह्मविदपचारःसर्वारंभनिरोधकः इत्यादिव्यञ्जितमिति प्रबन्धगतवस्तुना वस्तुध्वनिः । अथ स्वयमेवसमस्तजनरक्षणावसरप्रतीक्षोभगवान् देवशरणागतिंव्याजीकृत्यरावणवधायावतीर्णः तदवान्तरोपायभूतां वेदवत्यवतारेस्वतःकृतसङ्कल्पां लक्ष्मीं तुल्यशीलवयोवृत्ताभिजनैव कन्यावरणीयेत्यमुमर्थविशेषंप्रवर्तयिष्यन् जनककुलेऽवतार्य तत्परिणयनायप्रवृत्तः तत्प्रीणनायताटकाताटकेयादिदुष्टवधं कौशिकाध्वरत्राणाहल्याशापमोक्षादिरूपंशिष्टपरिपालनंच विधाय साक्षात्सीतालाभोपायाय यततइत्याह—ततःप्रभातइत्यादिनासर्गद्वयेन ॥ १ ॥ राघवौचार्चयित्वेत्यन्वयः । कर्मणा अर्घ्यप्रदानादिना ॥ २—४ ॥ द्रष्टुकामौ भवतइतिशेषः ॥५॥ अस्यदर्शनादेवकृतकामौभूत्वा प्रतियास्यतइत्यन्वयः ॥ ६ ॥ धनुः यदर्थं यत्प्रयोजनाय। इह अस-

---

शि० कृतकामौ प्रकटितधनुर्दर्शनविषयकेच्छावन्तौ नृपात्मजौ । एतत् भवत्स्थापितं । धनुर्दर्शय । दर्शयेतिकर्मलं । अस्यधनुषोदर्शनात् इष्टमीप्सितं । यथा यथावत् । प्रतियास्यतः प्राप्स्यतः ॥ ६ ॥

[पा०] १ ग. च. छ. ज. महातेजाः. २ इदमर्धं ख. दृश्यते. ३ क—च. ज—ट. स्वागतंजपतां. ४ क. ख. चकाराथ. ५ क—ञ. सहरामस्सलक्ष्मणः. ६ क. ख. ग. ट. स्ववाट. ङ. झ. स्ववास. ७ ङ. च. छ. झ. ञ. महात्मभिः. ८ च. ञ. राघवौतु. छ. राघवौतौ. ९ ङ. किंकरोस्मि. १० क. ख. ग. ङ. ज. भवताप्यहम्. ११ ख—ञ. स्सधर्मात्मा. १२ ङ—ट. मुनिश्रेष्ठो. १३ क. वाक्यविदांवरः. १४ ञ. स्यैतौ.

देवरात इति ख्यातो निमेर्[1]षष्ठो महीपतिः ।। न्यासोऽयं तस्य भगवन्हस्ते दत्तो [2]महात्मना ।। ८ ।।
दक्षयज्ञवधे पूर्वं [3]धनुरायम्य वीर्यवान् ।। रु[4]द्रस्तु त्रिदशान्रोषात्सलीलमिदमब्रवीत् ।। ९ ।।
यस्माद्भागार्थिनो [5]भागान्नाकल्पयत मे सुराः ।। वराङ्गाणि महार्हाणि धनुषा [6]शातयामि वः ।।१०।।
ततो विमनसः सर्वे देवा वै मुनिपुङ्गव ।। [7]प्रसादयन्ति देवेशं तेषां प्रीतोऽभवद्भवः ।। ११ ।।
प्रीतिर्[8]युक्तः स सर्वेषां ददौ तेषां महात्मनाम् ।। १२ ।।
तदेतद्देवदेवस्य धनूरत्नं महात्मनः ।। न्यासभूतं त[9]दा न्यस्तमस्माकं [10]पूर्वके विभो ।। १३ ।।
अथ मे कृषतः क्षेत्रं लाङ्गला[11]दुत्थिता मया ।। क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता ।। १४ ।।
भूतलादुत्थिता सा तु व्यवर्धत ममात्मजा ।। वीर्यशुल्केति मे कन्या स्थापितेयमयोनिजा ।। १५ ।।
भूतलादुत्थितां तां तु वर्धमानां ममात्मजाम् ।। वरयामासुरा[12]गम्य राजानो मुनिपुङ्गव ।। १६ ।।
तेषां वरयतां कन्यां सर्वेषां पृथिवीक्षिताम् ।। वीर्यशुल्केति भगवन्न ददामि सुतामहम् ।। १७ ।।
ततः सर्वे नृपतयः समेत्य मुनिपुङ्गव ।। मिथिलामभ्युपागम्य वीर्यजिज्ञासव[13]स्तदा ।। १८ ।।
तेषां जिज्ञासमानानां [14]वीर्यं धनुरुपाहृतम् ।। न शेकुर्ग्रहणे तस्य धनुषस्तोलनेपि वा ।। १९ ।।
तेषां वीर्यवतां वीर्यमल्पं ज्ञात्वा महामुने ।। प्रत्याख्याता नृपतयस्तन्निबोध तपोधन ।। २० ।।

द्भूहे । तिष्ठति । अस्यधनुषः तत्प्रयोजनं श्रूयतामित्यर्थः ।। ७ ।। निमेः जनककूटस्थस्य । न्यासः निक्षेपरूपं ।।८।। उक्तमर्थंविवृणोति—दक्षेत्यादिना । आयम्य आकृष्य ।। ९ ।। भागार्थिनः स्विष्टकृदादिभागार्थिनः । मेममेत्यन्वयः । वराङ्गाणि शिरांसि । अत्रतस्मादित्युपस्कार्यं । शातयामि छिनद्मि ।। १० ।। विमनसः दीनाः । भवः रुद्रः ।।११ ।। ददौ धनुरितिशेषः ।।१२।। धनूरत्नं धनुःश्रेष्ठं । पूर्वके देवराते । न्यासभूतंन्यस्तं देवैरितिशेषः ।। १३ ।। अथेतिवृत्तान्तान्तरारंभे । क्षेत्रं यागभूमिं । मेकृषतः मयिकर्षतीत्यर्थः । चयनार्थमितिशेषः "लाङ्गलंपवीरवमितिद्वाभ्यामृषभेणकृषति" इत्यादिशास्त्रात् । लाङ्गलात् लाङ्गलपद्धतेरित्यर्थः । उत्थितेति कन्येतिशेषः । साचक्षेत्रंशोधयतामयालब्धेतिहेतोर्नाम्नासीतेतिविश्रुताआसीत् सीता लाङ्गलपद्धतिः । सीतायांजातत्वात्सीतेत्युच्यते ।। १४ ।। व्यवर्धत मत्कृतपोषणादितिशेषः । अतोममात्मजा । वीर्यं धनुरारोपणं तदेवशुल्कं मूल्यं यस्याः सावीर्यशुल्का इति हेतौ । वीर्यशुल्कत्वात्स्थापिता नकस्मैचिद्दत्तेतिभावः ।। १५—१७ ।। वीर्यजिज्ञासवः धनुस्सारजिज्ञासवः । अभवन्नितिशेषः ।। १८ ।। वीर्यजिज्ञासमानानांतेषांकृते धनुः उपाहृतं आनीतं । ग्रहणे धारणे । तोलने भारपरीक्षार्थंहस्तेनचालने ।। १९ ।। तन्निबोधेति । तदित्यव्ययं । तस्मात्कारणात् । अनन्तरंयद्वृत्तं

ति० न्यासोनिक्षेपः । अयं धनूरूपः । अपरेतु नितरामास्तेदेवतायत्रेतिव्युत्पत्त्यान्यासोदेवपूजास्थानं । तत्पूजार्थंशत्रुवधार्थंचदत्तइत्यर्थः । निक्षेपपरतयाव्याख्यानेतु निक्षेपस्यशुल्कीकरणमनुचितं । भगवतातद्ग्रहेचनिक्षेपारक्षणप्रयुक्तदोषभागिता जनकस्यस्यादितिप्राहुः । शि० निमेः निमिवंशोद्भवस्य सुकेतोरित्यर्थः । ज्येष्ठः ज्येष्ठपुत्रः । किंच निमिपुत्रस्यमिथेरेवदेवरातइतिनामान्तरं । निमेष्षष्ठइतिपाठेतु निमिंपरित्यज्यषष्ठइत्यर्थः । अतएव देवरातस्यसप्तमत्वेपिनक्षतिः । न्यासो निक्षेपभूतः । यद्वा न्यासः नितरां आ समन्ताद्भावेन अस्यन्तेरिपवोयेनसः शत्रुनाशकइत्यर्थः । युक्तश्चायमर्थः । अन्यस्वामिकेवस्तुनिस्वातन्त्र्यानुपपत्तेः ।। ८ ।। शि० दक्षयज्ञवधइति निमित्तसप्तमी । शि० वधेइति हिंसार्थकवधधातुप्रकृतिकक्विबन्तप्रकृतिकचतुर्थ्यन्तं । साच "क्रियार्थोपपद" इतिविहिता ।। ९ ।। शि० प्रसादयन्त प्रासादयन्त ।। ११ ।। ति० शिवसहितैर्देवैः । न्यासभूतं देवपूजास्थानभूतं । न्यस्तं दत्तं । शि० न्यासभूतं नितरांआसः शत्रुविध्वंसनानुकूलोव्यापारस्तंभूतं प्राप्तं शत्रुसंहारकमित्यर्थः । आन्यस्तं अपुनर्ग्रहायस्थापितं । शिवाज्ञयादेवैर्दत्तमित्यर्थः ।। १३ ।।

[पा०] १ ङ. झ. निमेर्ज्येष्ठो. २ ख. ग. छ. ञ. महासनः. ३ क. धनुरादाय. ख. धनुरानम्य. ४ क. ख. घ—ञ. विध्वस्यत्रिदशान्. ५ ग. ज. ट. भागंनकल्पयथ. ख. भागंनाकल्पयत. ६ ख. पातयामिवः. ७ क. च. छ. ञ. प्रसादयन्तो. ज. ट. प्रसादयन्त. ८ ङ. च. छ. झ. ञ. प्रीतियुक्तस्तु. ९ घ. तदादत्तं. १० ङ. झ. पूर्वजेविभौ. ११ ङ. च. छ. झ. ञ. दुत्थिताततः. ख. दुत्थिताशुभा. १२ घ—ट. रागत्य. १३ क. स्तथा. १४ ख. ङ. च. छ. झ. ञ. शैवंधनुरुपाहृतम्. क. ऐशंधनु.

ततः परमकोपेन राजानो नृपपुङ्गव ॥ न्यरुन्धन्मिथिलां सर्वे वीर्यसन्देहमागताः ॥ २१ ॥
आत्मानमवधूतं ते विज्ञाय नृपपुङ्गवाः ॥ रोषेण महताऽऽविष्टाः पीडयन्मिथिलां पुरीम् ॥२२॥
ततः संवत्सरे पूर्णे क्षयं यातानि सर्वशः ॥ साधनानि मुनिश्रेष्ठ ततोऽहं भृशदुःखितः ॥ २३ ॥
ततो देवगणान्सर्वांस्तपसाहं प्रसादयम् ॥ ददुश्च परमप्रीताश्चतुरङ्गबलं सुराः ॥ २४ ॥
ततो भग्ना नृपतयो हन्यमाना दिशो ययुः ॥ अवीर्या वीर्यसन्दिग्धाः सामात्याः पापकर्मणः ॥२५॥
तदेतन्मुनिशार्दूल धनुः परमभास्वरम् ॥ रामलक्ष्मणयोश्चापि दर्शयिष्यामि सुव्रत ॥ २६ ॥
यद्यस्य धनुषो रामः कुर्यादारोपणं मुने ॥ सुतामयोनिजां सीतां दद्यां दाशरथेरहम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ॥ ६७ ॥

जनकेनविश्वामित्रचोदनयाभटैर्मुनिनिकटंप्रतिधनुरानयनम् ॥ १ ॥ रामेणमुनिजनकयोरनुमत्याधनुषःसमारोपणेनमध्ये-भञ्जनम् ॥ २ ॥ जनकेनसहर्षंरामप्रशंसनपूर्वकंविश्वामित्रानुमत्यादशरथानयनायायोध्यांप्रतिदूतप्रेषणम् ॥ ३ ॥

जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः ॥ धनुर्दर्शय रामाय इति होवाच पार्थिवम् ॥ १ ॥
ततः स राजा जनकः सामन्तान्व्यादिदेश ह ॥ धनुरानीयतां दिव्यं गन्धमाल्यविभूषितम् ॥ २ ॥
जनकेन समादिष्टाः सचिवाः प्राविशन्पुरीम् ॥ तद्धनुः पुरतः कृत्वा निर्जग्मुः पार्थिवाज्ञया ॥ ३ ॥
नृणां शतानि पञ्चाशद्व्यायतानां महात्मनाम् ॥ मञ्जूषामष्टचक्रां तां समूहुस्ते कथंचन ॥ ४ ॥
तामादाय तु मञ्जूषामायसीं यत्र तद्धनुः ॥ सुरोपमं ते जनकमूचुर्नृपतिमन्त्रिणः ॥ ५ ॥
इदं धनुर्वरं राजन्पूजितं सर्वराजभिः ॥ मिथिलाधिप राजेन्द्र दर्शनीयं यदिच्छसि ॥ ६ ॥

तन्निबोधेत्यर्थः ॥ २० ॥ वीर्यसंदेहं वीर्यशैथिल्यं ॥२१॥ मिथिलावरोधेनिमित्तान्तरमाह—आत्मानमिति । ते नृपाः । आत्मानं स्वात्मानं । मया अवधूतं वीर्यशुल्ककरणेनतिरस्कृतं विज्ञाय । पीडयन् अपीडयन् ॥ २२ ॥ साधनानि दुर्गरक्षणसाधनानि ॥ २३ ॥ प्रसादयं प्रासादयं ॥ २४ ॥ वीर्यसन्दिग्धाः सन्दिग्धवीर्याः । पापकर्मणः पापकर्माणः ॥२५—२७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्षष्टितमःसर्गः ॥६६॥

अथ धनुर्भङ्गादिवृत्तान्तःसप्तषष्टितमे—जनकस्येत्यादि ॥ १ ॥ सामंतान् कर्मसचिवान् ॥ २—३ ॥ व्यायतानां दीर्घदेहानां । नृणां । पञ्चाशत्शतानि पञ्चसहस्राणि । अष्टचक्रां अष्टचक्रवच्छकटारोपितामित्यर्थः । मञ्जूषां धनुष्पेटिकां । समूहुः आचकर्षुः । तेचपञ्चसहस्रसंख्याविशिष्टाअपि कथंचन महताप्रयत्नेन । समूहुरितियोजना । अन्येतु अष्टचक्रां अष्टाधश्चक्ररक्षाबन्धवतीं । ऊहुः हस्तैरितिशेषइत्याहुः ॥ ४ ॥ यत्र मञ्जूषायां ॥ ५ ॥ यद्धनुर्दर्शनीयमिच्छसि । तदिदं

ति० मे मया ॥ २२ ॥ शि० दाशरथेरेवयोग्यांसीतांसुतामहंदद्यां । दाशरथयएवेतिप्रत्यासत्त्यालब्धं । षष्ठीमहिम्नायोग्यामित्यध्याहृतं । संप्रदानत्वाविवक्षयाषष्ठीवा ॥ २७ ॥ इतिषट्षष्टितमस्सर्गः ॥ ६६ ॥

शि० ते पुण्यस्थाने । "तश्चोरामृतपुच्छेषुकोडेम्लेच्छेचकुत्रचित् । अपुमांस्तरणेपुण्येकथितःशब्दवेदिभिः" इत्यभिधानं ॥४॥

[पा०] १ क—च. ज. ट. अरुन्धन्. २ ङ. झ. मवधूतंमे. ३ ख. ग. घ. ज. ट. मुनिपुङ्गव. ४ क. ख. न्मिथिलामिमाम्. ५ क. घ. ङ. च. छ. ञ. ट. पापकारिणः. ६ क. ख. ङ—ट. सचिवान्व्यादिदेशह. घ. समेतान्व्या. ग. संमतान्व्या. ७ ख. छ. रादीयतां. ८ ङ. झ. माल्यानुलेपितम्. च. छ. ञ. माल्यानुलेपनम्. ९ क. ख. घ. ङ. छ. ञ. ट. न्पुरम्. १० ङ. च. छ. झ. ञ. ट. निर्जग्मुरमितौजसः. ११ ङ. च. छ. झ. ञ. सुमञ्जूषां. १२ ज. ट. दर्शयैनंयदिच्छसि. क. यथेच्छसि. झ. ञ. ठ. यदीच्छसि.

तेषां नृपो वचः श्रुत्वा कृताञ्जलिरभाषत ॥ विश्वामित्रं महात्मानं तौ चोभौ रामलक्ष्मणौ ॥ ७ ॥
इदं धनुर्वरं ब्रह्मञ्जनकैरभिपूजितम् ॥ राजभिश्च महावीर्यैरशक्तैः पूरितुं पुरा ॥ ८ ॥
नैतत्सुरगणाः सर्वे नासुरा न च राक्षसाः ॥ गन्धर्वयक्षप्रवराः सकिन्नरमहोरगाः ॥ ९ ॥
क्व गतिर्मानुषाणां च धनुषोस्य प्रपूरणे ॥ आरोपणे समायोगे वेपने तोलनेऽपि वा ॥ १० ॥
तदेतद्धनुषां श्रेष्ठमानीतं मुनिपुङ्गव ॥ दर्शयैतन्महाभाग अनयो राजपुत्रयोः ॥ ११ ॥
विश्वामित्रः स धर्मात्मा श्रुत्वा जनकभाषितम् ॥ वत्स राम धनुः पश्य इति राघवमब्रवीत् ॥ १२ ॥
महर्षेर्वचनाद्रामो यत्र तिष्ठति तद्धनुः ॥ मञ्जूषां तामपावृत्य दृष्ट्वा धनुरथाब्रवीत् ॥ १३ ॥
इदं धनुर्वरं ब्रह्मन्संस्पृशामीह पाणिना ॥ यत्नवांश्च भविष्यामि तोलने पूरणेपि वा ॥ १४ ॥
बाढमित्यब्रवीद्राजा मुनिश्च समभाषत ॥ १५ ॥
लीलया स धनुर्मध्ये जग्राह वचनान्मुनेः ॥ पश्यतां नृसहस्राणां बहूनां रघुनन्दनः ॥ १६ ॥
[आरोपयत्स धर्मात्मा सलीलमिव तद्धनुः] ॥ आरोपयित्वा धर्मात्मा पूरयामास तद्धनुः ॥
तद्बभञ्ज धनुर्मध्ये नरश्रेष्ठो महायशाः ॥ १७ ॥
तस्य शब्दो महानासीन्निर्घातसमनिःस्वनः ॥ भूमिकंपश्च सुमहान्पर्वतस्येव दीर्यतः ॥ १८ ॥
निपेतुश्च नराः सर्वे तेन शब्देन मोहिताः ॥ वर्जयित्वा मुनिवरं राजानं तौ च राघवौ ॥ १९ ॥
प्रत्याश्वस्ते जने तस्मिन्राजा विगतसाध्वसः ॥ उवाच प्राञ्जलिर्वाक्यं वाक्यज्ञो मुनिपुङ्गवम् ॥ २० ॥
भगवन्दृष्टवीर्यो मे रामो दशरथात्मजः ॥ अत्यद्भुतमचिन्त्यं च न तर्कितमिदं मया ॥ २१ ॥
जनकानां कुले कीर्तिमाहरिष्यति मे सुता ॥ सीता भर्तारमासाद्य रामं दशरथात्मजम् ॥ २२ ॥

धनुः । आनीतमितिशेषः ॥ ६ ॥ तौचोभाविति उद्दिश्येतिशेषः ॥ ७ ॥ राजभिः पूर्वंसीतार्थिभिः । पूजितं अहोमहासारमैश्वरंधनुरितिश्लाघितमित्यर्थः ॥८॥ एतत् धनुः । सुरगणादयः प्रपूरणादिकंकर्तुंनशक्ताइत्यर्थसिद्धं ॥ ९ ॥ प्रपूरणे नम्रीकरणे । आरोपणे मौर्व्यासंयोजने । समायोगे शरेणयोजने । वेपने मौर्व्याकर्षणे । तोलने भारपरीक्षार्थंकंपनेच मानुषाणांमध्येकपुरुषे गतिःशक्तिः ॥ १० ॥ तथाप्यनयोर्दर्शयेत्याह—तदेतदिति ॥ ११—१२ ॥ अपावृत्य अपगतावरणंकृत्वा ॥१३—१५॥ लीलया अप्रयत्नेन ॥१६॥ पूरयामास आकर्णमाकृष्टवान् । ननु उक्तरीत्यामहोन्नतस्यधनुषःकथंबालेनारोपणंसंभवति अग्रस्पर्शाभावादितिचेत् उच्यते । आश्चर्यशक्तिकस्यरामस्यकरस्पर्शादेवावनतंधनुः॥१७॥ निर्घातेति । तल्लक्षणमुक्तंज्योतिषे "वायुनाभिहतोवायुर्गगनात्पततिक्षितौ ॥ यदादीप्तःखगरुतःसनिर्घातोतिदोषकृत्" इति । पर्वतस्येवदीर्यतः पर्वते दीर्यति भिद्यति यथाभूमिकंपः तथाभूमिकंपश्चासीदित्यर्थः ॥१८—१९॥ विगतसाध्वसइत्यनेन रामजामातृकताप्रापकंधनुरारोपणमपिनभवेदिति पूर्वंभीतोऽभूदितिगम्यते॥२०॥ अचिन्त्यं अन्यत्रादर्शनात् । नतर्कितं मनुष्येष्वसंभावितत्वात् । अत्यद्भुतं बालेनकृतत्वात् । इदं ईशधनुरारोपणं ॥२१॥ जनकानां "अनन्तं

ति० जनकैः देवरातातिरिक्तैः । पूजितं ऐश्वरत्वादीश्वरवदेवकेवलंपूजितमित्यर्थः ॥ ८ ॥ **शि०** अथाब्रवीत् मङ्गलवचनमकथयत् ॥ १३ ॥ **ति०** जग्राह पादाङ्गुलेनोन्नतंकुलाकरेणजग्राह । तदुक्तंपाद्मे । "रामोपितद्धनुष्कोटिंस्पृष्ट्वापादाङ्गुलात्ततः । उन्नतंचापमारोप्यबभञ्जेमोहिताजनाः "इति । अतिभारवद्वस्तुनःपादाङ्गुल्यामध्यभागपर्यन्तमुन्नमनं मध्येगृहीलोद्धारश्च महाबलसाध्यइतिमहाबलवत्त्वमनेनसूचितं ॥ १६ ॥ इतिसप्तषष्टितमस्सर्गः ॥ ६७ ॥

[पा०] १ ङ. च. छ. झ. ञ. तावुभौ. २ क. ख. रशक्यंपूरितुंतदा. ङ. ञ. रशक्तैःपूरितुंतदा. झ. रशक्तैःपूरितंतथा. च. छ. अशक्यंपूरितंतदा. ३ क. गणाश्शक्ताः. ४ ङ. च. छ. झ. ञ. तोलनेतदा. ५ क. घ. सुधर्मात्मा. ङ. झ. स्सरामस्तु. ६ ङ. च. छ. झ. ञ. दिव्यं. ७ घ. समाकृष्यामिपाणिना. ८ ग. वेपनेपूरणेपिवा. ९ क—घ. मित्येवतंराजा. १० ग. यत्सधर्मात्मा. क. ङ. च. छ. झ. ञ. ट. यिलामौर्विंच. ११ ग. वीर्यवान्. १२ ख. ङ—ट. मचिन्त्यंचअतर्कित. क. मचिन्त्यंवाप्यतर्कित.

मम सत्या प्रतिज्ञा च वीर्यशुल्केति कौशिक ॥ सीता प्राणैर्बहुमता देया रामाय मे सुता ॥ २३ ॥
भवतोऽनुमते ब्रह्मञ्शीघ्रं गच्छन्तु मन्त्रिणः ॥ मम कौशिक भद्रं ते अयोध्यां त्वरिता रथैः ॥ २४ ॥
राजानं प्रश्रितैर्वाक्यैरानयन्तु पुरं मम ॥ प्रदानं वीर्यशुल्कायाः कथयन्तु च सर्वशः ॥ २५ ॥
मुनिगुप्तौ च काकुत्स्थौ कथयन्तु नृपाय वै ॥ प्रीयमाणं तु राजानमानयन्तु सुशीघ्रगाः ॥ २६ ॥
कौशिकश्च तथेत्याह राजा चाभाष्य मन्त्रिणः ॥ अयोध्यां प्रेषयामास धर्मात्मा कृतशासनान् ॥
यथावृत्तं समाख्यातुमानेतुं च नृपं तदा ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ॥ ६८ ॥

जनकदूतैरयोध्यामेत्यदशरथंप्रतिधनुर्भञ्जनादिरामवृत्तान्तनिवेदनपूर्वकंसीतारामविवाहमहोत्सवप्रवर्तनार्थंजनकप्रार्थनानिवेदनम् ॥ १ ॥ दशरथेनसहर्षंवसिष्ठादिभिःसहपरेद्युर्मिथिलांप्रतिप्रस्थाननिर्धारणम् ॥ २ ॥

जनकेन समादिष्टा दूतास्ते क्लान्तवाहनाः ॥ त्रिरात्रमुषिता मार्गे तेयोध्यां प्राविशन्पुरीम् ॥ १ ॥
[राज्ञो भवनमासाद्य द्वारस्थानिदमब्रुवन् ॥ शीघ्रं निवेद्यतां राज्ञे दूतान्नो जनकस्य च ॥
इत्युक्ता द्वारपालास्ते राघवाय न्यवेदयन्] ॥ २ ॥
ते राजवचनाद्दूता राजवेश्मप्रवेशिताः ॥ ददृशुर्देवसंकाशं वृद्धं दशरथं नृपम् ॥ ३ ॥
बद्धाञ्जलिपुटाः सर्वे दूता विगतसाध्वसाः ॥ राजानं प्रयता वाक्यमब्रुवन्मधुराक्षरम् ॥ ४ ॥

बतमेवित्तंयस्यमेनास्तिकिंचन ॥ मिथिलायांप्रदीप्तायां नमेकिंचित्प्रदह्यते" इतिप्रोक्तनिरतिशयकीर्तिमतामपि । कुले "कुलंतारयतेतातसप्तसप्तचसप्तच" इतिवत् । कीर्तिमित्येकवचनेनैकरूपत्वंव्यज्यते । आहरिष्यति सद्यःप्रापयिष्यति । सिद्धस्यादानंह्याहरणं । सुता सुतश्चेत्स्वार्जितामेवकीर्तिंप्रापयिष्यति । मेसुता स्वसंबन्धप्रयुक्तातिशयः । सीता जन्मप्रयुक्तातिशयः । भर्तारमासाद्य भर्तृसंबन्धकृतातिशयः । भर्तारं भरणदक्षं । "वित्तमिच्छन्तिमातरः" इत्युक्तधनवन्तमित्यर्थः । रामं "रूपमिच्छतिकन्यका" इत्युक्तरूपवन्तं । दशरथात्मजं "बान्धवाःकुलमिच्छन्ति" इत्युक्तरीत्याबन्धुकाङ्क्षितं । एवं सर्वसंमतवरप्राप्त्या कीर्तिमाहरिष्यतीतिभावः ॥ २२ ॥ सत्या जातेतिशेषः । सीता वीर्यशुल्केतिप्रतिज्ञा सत्याजाता । प्राणैः प्राणेभ्यः । बहुमता । सीतादेयेतिसीतापदमुभयत्रान्वेति ॥ २३ ॥ भवतोनुमते भवदनुमत्या । गच्छन्त्वित्यर्थः ॥ २४ ॥ प्रश्रितैः विनयान्वितैः । सर्वशः सर्वमत्रत्यवृत्तान्तमित्यर्थः ॥ २५—२६ ॥ आभाष्य आहूय । कृतशासनान् दत्तकल्याणसंदेशपत्रिकानित्यर्थः । नृपं दशरथं ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तषष्टितमःसर्गः ॥ ६७ ॥

अथजानकीविवाहायदशरथाह्वानमष्टषष्टितमे— जनकेनेत्यादि । त्रिरात्रमिति । तिस्रोरात्रयस्त्रिरात्रं । सङ्ख्यादित्वात्राव्यन्तादच्समासान्तः । अत्यन्तसंयोगे द्वितीया ॥१॥ राजवचनात् जनकोस्मानिहप्रेषितवानितिस्वराजसंकीर्तनात् ॥३॥ विगतसाध्वसाः दशर-

शि० अते निरन्तरगमनविशिष्टाधिकरणीभूतेमार्गे । अतइत्यत्रनिरन्तरगमनार्थकाद्धातोरधिकरणेकः । अतएवतेइत्यनेननपौनरुक्त्यं ॥ १ ॥

[पा०] १ ङ. झ. प्रतिज्ञासा. २ ख. नुमताद्ब्रह्मन्. ३ ङ. च. झ. ञ. ट. प्रीतियुक्तंतु. ४ ग—छ. झ. ञ. ट. कौशिकस्तु. ५. ङ.—ट. नृपंतथा. ६. ग. दूतास्तु. ७ इदमर्धत्रयं ग. वर्तते. ८ ङ. च. छ. झ. ञ. राजवचनाद्गत्वा. ९ ख. प्रदुद्रुवुः. १० ख. प्रणतावाक्यं. ख. ङ—ट. प्रश्रितंवाक्यं.

मैथिलो जनको राजा सा[1]ग्निहोत्रपुरस्कृतम् ॥ कुशलं चाव्ययं चैव सोपाध्यायपुरोहितम् ॥ ५ ॥
मुहुर्मुहुर्मधुरया स्नेह[2]संयुक्तया गिरा ॥ [3][कुशलं चाव्ययं चैव सोपाध्यायपुरोहितम्] ॥
जनकस्त्वां म[4]हाराजाऽऽपृच्छते सपुरस्सरम् ॥ ६ ॥
पृष्ट्वा कुशलम[5]व्यग्रं वैदेहो मिथिलाधिपः ॥ कौशिका[6]नुमते वाक्यं भवन्तमिदम[7]ब्रवीत् ॥ ७ ॥
पूर्वं प्रतिज्ञा विदि[8]ता वीर्यशुल्का ममात्मजा ॥ राजानश्च कृतामर्षा निर्वीर्या विमुखीकृताः ॥ ८ ॥
सेयं मम सुता राजन्विश्वामित्रपुरस्सरैः[9] ॥ यदृच्छयाऽऽगतै[10]र्वीरैर्निर्जिता तव पुत्रकैः ॥ ९ ॥
[11]तच्च राजन्धनुर्दिव्यं मध्ये भग्नं महात्मना ॥ रामेण हि म[12]हाराज महत्यां जनसंसदि ॥ १० ॥
अस्मै देया मया सीता वीर्यशुल्का म[13]हात्मने ॥ प्रतिज्ञां क[14]र्तुमिच्छामि त[15]दनुज्ञातुमर्हसि ॥ ११ ॥
सोपाध्यायो महाराज पुरोहितपु[16]रस्सरः ॥ शीघ्रमागच्छ भद्रं ते द्रष्टुमर्हसि राघवौ ॥ १२ ॥
प्रीतिं[17] च मम राजेन्द्र निर्वर्तयितुमर्हसि ॥ पुत्रयोरुभयोरेव[18] प्रीतिं त्वमपि लप्स्यसे ॥ १३ ॥
एवं विदेहाधिपतिर्मधुरं वाक्यमब्रवीत् ॥ विश्वामित्राभ्यनुज्ञातः शतानन्दमते स्थितः ॥
[19][इत्युक्त्वा विरता दूता राजगौरवशङ्किताः] ॥ १४ ॥
दूतवाक्यं तु तच्छ्रुत्वा राजा परमहर्षितः ॥ वसिष्ठं वामदेवं च [20]मन्त्रिणोन्यांश्च सोऽब्रवीत् ॥ १५ ॥
गुप्तः कुशिकपुत्रेण कौसल्यानन्दवर्धनः ॥ लक्ष्मणेन सह भ्रात्रा विदेहेषु वसत्यसौ ॥ १६ ॥
दृष्टवीर्यस्तु काकुत्स्थो जनकेन महात्मना ॥ संप्रदानं सुतायास्तु राघवे कर्तुमिच्छति ॥ १७ ॥

थसौजन्येनविज्ञापनेनिर्भयाः ॥ ४ ॥ मैथिलइत्यादि-श्लोकद्वयमेकान्वयं । मैथिलः मिथिलेश्वरः । पुरस्कृताग्निहोत्रसहितः साग्निहोत्रपुरस्कृतः । आहिताग्न्यादित्वान्निष्ठायाःपरनिपातः । पुरःसरन्तीतिपुरस्सराः भृत्याः । तत्सहितं । एवंभूतंत्वां ।कुशलं क्षेमं ।अव्ययं अनपायं । योगमितियावत् । आपृच्छते मद्वचनादितिशेषः ।"आङिनुपृच्छ्योरुपसङ्ख्यानं" इतिआत्मनेपदं । अत्रद्वितीयजनकशब्दोविप्रकृष्टजनकशब्दाविस्मरणार्थः ॥ ५—६ ॥ कौशिकानुमते कौशिकानुमत्या ॥ ७ ॥ वीर्यशुल्केति ममप्रतिज्ञा भवद्भिर्विदिता। राजानश्चनिर्वीर्याः धनुरारोपणासमर्थाः । विमुखीकृताइत्यपि विदितमित्यन्वयः ॥ ८ ॥ सेयं उक्तरीत्या सर्वैःप्रार्थनीया। ममसुता त्वयासहसंबन्धार्हस्यमेपुत्री। स्वपुरेतदागमनप्रसक्तिंदर्शयति—विश्वामित्रपुरस्सरैरिति । यदृच्छया मद्भागधेयात् । पुत्रकैः पूजायांबहुवचनं । जामातृत्वाध्यवसायात् महाराजकुमारत्वाद्वापूजा । अल्पार्थेनकप्रत्ययेनबाल्यंद्योतितं ॥९॥ कथंनिर्जितेत्यत्राह—तच्चेति । तच्च ऐश्वरमपिनेदमैन्द्रजालिकमित्याह—महात्मनेति । नेयं पक्षपातोक्तिरित्याह—महत्यामिति ॥ १० ॥ प्रतिज्ञां प्रतिज्ञातंसीताप्रदानं ॥ ११—१२ ॥ प्रीतिं त्वद्दर्शनप्रीतिं सीताप्रदानप्रीतिंवा। पुत्रयोः पुत्रीचपुत्रश्चतयोः। एकशेषः। प्रीतिं तद्विषयप्रीतिं। तदुभयकल्याणदर्शनप्रीतिमितियावत् । मत्पुत्र्यांत्वत्पुत्रेचेत्यर्थः । यद्वा स्नुषाचपुत्रीत्येवगृह्यते । यद्वा लक्ष्मणायोर्मिलाप्रदानंसिद्धंकृत्वोच्यते—उभयोरिति ॥ १३—१५ ॥ गुप्तइत्यादि । विदेहेषु विदेहानांनिवासभूतेदेशे । "जनपदेलुप्" इतिलुप्। असाविति बुद्धिसंनिकर्षेणोच्यते ॥१६–१७॥

शि० जनकः जनानांकंसुखंयस्मात्सः प्रजासुखदातेत्यर्थः । वि० पुरस्क्रियन्तइतिपुरस्कृताःमन्त्र्यादयः अग्निहोत्रपदेनतत्साधनऋत्विजः तैस्सहितइत्यर्थः ॥ ५ ॥ ति० जामातृत्वबुद्ध्यामहाबलत्वेनेश्वरत्वबुद्ध्याचपूज्यत्वेनपुत्रकैरितिबहुवचनप्रयोगः ॥ ९ ॥ ति० तर्तुं पूरयितुं ॥ ११ ॥ शि० पुरोहितपुरस्कृतः पुरस्कृतपुरोहितः ॥ १२ ॥

[पा०] १ ज. अग्निहोत्रपुरस्कृतम्. ङ. झ. ञ. ट. साग्निहोत्रपुरस्कृतः. २ ङ. च. छ. झ. ञ. संरक्तया. ट. संसक्तया. ३ इदमर्धं ङ. च. छ. झ. ञ. दृश्यते. ४ ज. महातेजाः. घ. महाराजः. ५ ट. मव्यग्रो. ६ क. नुमतो. ७ ख. ज. माहच. ८ ख. विहिता. ९ ङ. च. छ. झ. ञ. पुरस्कृतैः. १० क. ख. घ—ट. गतैराजन्. ११ क. ख. घ—ट. तच्चरत्नंधनुर्दिव्यं. १२ ख. ग. ङ—ट. महाबाहो. ख. घ. महातेजो. १३ ज. ममात्मजा. १४ क—ट. तर्तुमिच्छामि. १५ ख. मामनुज्ञातुमर्हसि. १६ क. ख. घ—ट. पुरस्कृतः. १७ क. घ—छ. झ. ञ. ट. प्रतिज्ञांममराजेन्द्र. १८ क. ख. प्रीतिंलप्स्यसेवीर्यनिर्जिताम्. घ. रेवप्रीतिंचमयिलप्स्यसे. ङ—ट. रेवप्रीतिंसमुपलप्स्यसे. १९ इदमर्धं ग. ज. दृश्यते. २० ङ. च. छ. झ. ञ. मन्त्रिणश्चैवमब्रवीत्.

यदि वो [1]रोचते वृत्तं जनकस्य महात्मनः ॥ पुरीं गच्छामहे शीघ्रं माभूत्कालस्य पर्ययः ॥ १८ ॥
मन्त्रिणो बाढमित्याहुः सह सर्वैर्महर्षिभिः ॥ सुप्रीतश्चाब्रवीद्राजा श्वो [2]यात्रेति स मन्त्रिणः ॥१९॥
[3]मन्त्रिणस्तां [4]नरेन्द्रस्य रात्रिं परमसत्कृताः ॥ [5]ऊषुस्ते मुदिताः सर्वे गुणैः सर्वैस्समन्विताः ॥ २० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

एकोनसप्ततितमः सर्गः ॥ ६९ ॥

सपरिजनेनदशरथेनसेनयावसिष्ठादिभिश्चसहमिथिलांप्रत्यागमनम् ॥ १ ॥ जनकेनप्रत्युद्गमनादिपूर्वकंतत्पूजनम् ॥ २ ॥ जनकदशरथाभ्यांमिथःसंभाषणम् ॥ ३ ॥ ततःसर्वैःस्वस्वावासेषुसुखेनरात्रियापनम् ॥ ४ ॥

ततो रात्र्यां व्यतीतायां सोपाध्यायः सबान्धवः ॥ राजा दशरथो हृष्टः सुमन्त्रमिदमब्रवीत् ॥ १ ॥
अद्य सर्वे धनाध्यक्षा धनमादाय पुष्कलम् ॥ व्रजन्त्वग्रे सुविहिता नानारत्नसमन्विताः ॥ २ ॥
[6]चतुरङ्गं बलं चापि शीघ्रं निर्यातु सर्वशः ॥ ममाज्ञा[7]समकालं च यानयुग्यमनुत्तमम् ॥ ३ ॥
वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ॥ [8]मार्कण्डेयः सुदीर्घायुर्ऋषिः कात्यायनस्तथा ॥ ४ ॥
एते द्विजाः [9]प्रयान्त्वग्रे स्यन्दनं योजयस्व मे ॥ यथा कालात्ययो न स्याद्दूता हि त्वरयन्ति माम् ॥५॥
[[10]इत्युक्त्वा स महातेजा राजा दशरथो रथम् ॥ आरुरोह यथा भानुर्भगवान्रघुनन्दनः] ॥ ६ ॥
[11]वचनात्तु नरेन्द्रस्य [12]सा सेना चतुरङ्गिणी ॥ राजानमृषिभिः सार्धं व्रजन्तं पृष्ठतोऽन्वगात् ॥ ७ ॥
गत्वा चतुरहं [13]मार्गं विदेहानभ्युपेयिवान् ॥ [14]राजा तु जनकः श्रीमाञ्श्रुत्वा पूजामकल्पयत् ॥ ८ ॥
ततो राजानमासाद्य वृद्धं दशरथं नृपम् ॥ [15]जनको मुदितो राजा [16]हर्षं च परमं ययौ ॥
उवाच [17]च नरश्रेष्ठो नरश्रेष्ठं [18]मुदाऽन्वितः ॥ ९ ॥

यौनसंबन्धयोग्यमितिशेषः । पर्ययः अतिक्रमः ॥ १८ ॥ श्वोयात्रेत्यब्रवीदिति तदर्थमुद्युङ्ध्वमितिभावः ॥ १९ ॥ मन्त्रिणः जनकमन्त्रिणः । गुणैः सत्कारातिशयैः । तां-रात्रिं तस्यांरात्र्यामित्यर्थः ॥ २० ॥ इति श्रीगोविन्द-राजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने अष्टषष्टितमःसर्गः ॥ ६८ ॥

अथदशरथस्यमिथिलागमनमेकोनसप्ततितमे—त-तोरात्र्यामित्यादि ॥ १ ॥ धनाध्यक्षाः कोशरक्षाधिकृ-ताः । पुष्कलं श्रेष्ठं । "श्रेयान्श्रेष्ठःपुष्कलःस्यात्" इत्यम-रः । सुविहिताः सुसंपादितकल्याणोचितकर्माणः ॥२॥ यानयुग्यमिति । यानं शिबिकान्दोलिकादि । युग्यं रथा-दि । सेनाङ्गत्वादेकवद्भावः ॥३—४॥ यथाकालात्ययः कालातिक्रमः नस्यात्तथाप्रयान्त्वितियोजना ॥५–७॥ चतुरहं चतुर्ष्वहस्सु । श्रुत्वा दशरथमागतंश्रुत्वा । पूजां उपधां ॥ ८ ॥ राजानमासाद्यमुदितः । विवाहःशीघ्र-

---

ति० एकश्चशब्दोहेतौद्वितीयएवार्थे ॥१९॥ ति० नरेन्द्रश्चेतिपाठे सचमुदितउवासेतिविपरिणामः ॥२०॥ इत्यष्टषष्टितमस्सर्गः ६८
ति० अनुत्तमानि श्रेष्ठानि । यानानि युग्यानिच यान्तु । वसिष्ठाद्यर्थमितिशेषः ॥ ३ ॥ ति० अग्रेद्विजप्रयाणं प्रयाणेकल्याणा-य ॥५॥ शि० पूजां सत्कृतिसामग्रीं । अकल्पयत् समपादयत् । ति० दूतानांत्रिदिनगम्यत्वेपिमार्गस्यचतुरङ्गबलोपेतप्रयाणलाघ्च-तुर्दिनंवासोमध्ये ॥८॥ ति० राजानमासाद्यमुदितोहर्षंययौ । मोदस्यैवाधिकावस्थाहर्षइतिभेदः । शि० वृद्धं विलक्षणैश्वर्यवत्त्वादिनावृ-द्धिंप्राप्तं । राजानं परमानुरागविशिष्टं ॥ ९ ॥

[पा०] १ ख. रोचतेवृत्तिः. २ क. ङ. च. छ. झ. ञ. ट. यात्रेतिच. ३ क—ञ. मन्त्रिणस्तु. ४ क. ख. नरेन्द्रेण. ५ क. ख. घ—ट. ऊषुःप्रमुदिताः. ६ ख—च. झ. ञ. ट. चतुरङ्गबलंचापि. क. बलंसर्वं. ७ घ. समकालंत्वं. ८ ङ. झ. मार्कण्डेयस्तु. क. ख. च. छ. मार्कण्डेयश्च. ज. ट. मार्कण्डेयोपि. ९ घ. व्रजन्त्वग्रे. १० अयंश्लोकः क. ख. दृश्यते. ११ क—छ. झ. ञ. ट. वचनाच्चनरेशस्य. १२ ङ—ट. सेनाचचतुरङ्गिणी. १३ ङ. च. छ. झ. मार्गे. १४ क—ट. राजाच. १५ ङ—ट. मुदितोजनको. १६ ङ. च. छ. झ. ञ. ट. प्रहर्षंपरमं. १७ ख. ङ. च. छ. झ. ञ. वचनंश्रेष्ठो. १८ क. ख. ग. ङ—ट. मुदान्वितम्.

स्वागतं ते महाराज दिष्ट्या प्राप्तोसि राघव ॥ पुत्रयोरुभयोः प्रीतिं लप्स्यसे वीर्यनिर्जिताम् ॥१०॥
दिष्ट्या प्राप्तो महातेजा वसिष्ठो भगवानृषिः ॥ सह सर्वैर्द्विजश्रेष्ठैर्देवैरिव शतक्रतुः ॥ ११ ॥
दिष्ट्या मे निर्जिता विघ्ना दिष्ट्या मे पूजितं कुलम् ॥ राघवैः सहसंबन्धो वीर्यश्रेष्ठैर्महात्मभिः ॥१२॥
श्वः प्रभाते नरेन्द्रेन्द्र निर्वर्तयितुमर्हसि ॥ यज्ञस्यान्ते नरश्रेष्ठ विवाहमृषिसंमतम् ॥ १३ ॥
तस्य तद्वचनं श्रुत्वा ऋषिमध्ये नराधिपः ॥ वाक्यं वाक्यविदां श्रेष्ठः प्रत्युवाच महीपतिम् ॥ १४ ॥
प्रतिग्रहो दातृवशः श्रुतमेतन्मया पुरा ॥ यथा वक्ष्यसि धर्मज्ञ तत्करिष्यामहे वयम् ॥ १५ ॥
धर्मिष्ठं च यशस्यं च वचनं सत्यवादिनः ॥ श्रुत्वा विदेहाधिपतिः परं विस्मयमागतः ॥ १६ ॥
ततः सर्वे मुनिगणाः परस्परसमागमे ॥ हर्षेण महता युक्तास्तां निशामवसन्सुखम् ॥ १७ ॥
[अथ रामो महातेजा लक्ष्मणेन समं ययौ ॥ विश्वामित्रं पुरस्कृत्य पितुः पादावुपस्पृशन्] ॥१८॥
राजा च राघवौ पुत्रौ निशाम्य परिहर्षितः ॥ उवास परमप्रीतो जनकेनाभिपूजितः ॥ १९ ॥
जनकोपि महातेजाः क्रियां धर्मेण तत्त्ववित् ॥ यज्ञस्य च सुताभ्यां च कृत्वा रात्रिमुवास ह ॥२०॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

सप्ततितमः सर्गः ॥ ७० ॥

परेद्युर्जनकेनस्वानुजन्मनःकुशध्वजस्यपरिजनैःसहदूतैरानयनम् ॥ १ ॥ जनकेनमन्त्रिमुखादाहूतेनदशरथेनविश्वामित्रादिभिःसहसभांप्रत्यागमनम् ॥ २ ॥ ततोवसिष्ठेनराजप्रार्थनयारामावधिदशरथवंशानुवर्णनम् ॥ ३ ॥

ततः प्रभाते जनकः कृतकर्मा महर्षिभिः ॥ उवाच वाक्यं वाक्यज्ञः शतानन्दं पुरोहितम् ॥ १ ॥

भावीतिहर्षययौ ॥ ९ ॥ वीर्यनिर्जितां पुत्रयोर्वीर्येण-धनुर्भङ्गादिनासंभूतामित्यर्थः ॥ १० ॥ वसिष्ठस्यशत-क्रतुसाम्यंपूर्णधर्मत्वेन ॥ ११ ॥ विघ्नाः कन्याप्रदान-प्रतिबन्धकाः । पूजितत्वेहेतुमाह—राघवैरिति । यत-इत्युपस्कार्यं ॥ १२ ॥ इक्ष्वाकुप्रथमवंशत्वेन नरेन्द्रा-णामिन्द्रत्वं । यज्ञस्यान्तइति । त्रिचतुरदिनानन्तरभा-विनीतिशेषः । ऋषिसंमतं ब्राह्मंविवाहमित्यर्थः ॥१३॥ महीपतिं जनकं ॥ १४ ॥ कन्यागवादीनांप्रतिग्रहोदा-तृवशएव । यदादातादादाति तदाप्रतिगृह्यतेप्रतिग्रहीत्रे-तिवस्तुस्थितिः । एतत् युष्मदीयंवीर्यशुल्ककन्याप्रदान-मपि । पूर्वमेवश्रुतं अतःपरं कन्याप्रदस्त्वंयथावक्ष्यसि त-थावयंकरिष्यामः ॥ १५ ॥ विस्मयमिति । प्रतिग्रहो-दातृवशइत्यादिविनयोक्तेरितिभावः ॥ १६ ॥ परस्पर-समागमे संभूतेसतीतिशेषः ॥ १७—१८ ॥ निशा-म्य दृष्ट्वा । "शमोदर्शने" इतिमित्वनिषेधान्नह्रस्वः ॥ १९ ॥ यज्ञस्यक्रियां अवशिष्टक्रियां । सुताभ्यां पु-त्र्योः । क्रियां अङ्कुरार्पणादिकं ॥२०॥ इति श्रीगोवि-न्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीरा-ख्याने बालकाण्डव्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

अथजनकेनसंबन्धार्हत्वायेक्ष्वाकुसन्तानकीर्तनं-

शि० राघवैर्भवद्भिस्सहसंबन्धात् मेकुलंपूजितं भविष्यतीतिशेषः॥१२॥ ति० संवर्तयितुंनिर्वर्तयितुं ॥१३॥ ति० एतत् वाक्यं। मयाश्रुतं । क्षत्रियतयाप्रतिग्रहधर्मस्यायाप्यज्ञानमेव । सांप्रतमेवानुभवोभविष्यतीतिश्रुतमित्युक्तं ॥१५॥ ति० विस्मयं कन्यायावीर्येणशुल्केनजितत्वान्मदनुमत्यनपेक्षायामपिराज्ञोविनयेनतादृशवचनमितिविस्मयः ॥ १६ ॥ इत्येकोनसप्ततितमस्सर्गः ॥ ६९ ॥

ति० अथब्राह्मसंबन्धसदृशेयौनसंबन्धे वध्वपेक्षितःपरस्परकुलाचारस्सर्गाभ्यां—**ततइति** ॥ १ ॥

[पा०] १ ज. स्वागतंहि. ङ. च. छ. झ. ञ. स्वागतंतेनरश्रेष्ठ. २ ख. महाराज. ३ ट. संबन्धाद्वीर्यश्रेष्ठैः. क. ख. संबन्धाद्वीर्यश्लाघ्यैः. ४ घ—ञ. महाबलैः. ५ क. च. ञ. नरेन्द्रस्त्वं. ङ. च. छ. झ. नरेन्द्रत्वं. ख. घ. नरश्रेष्ठ. ६ ख. ग. च. छ. निवर्तयितु. ङ. झ. ञ. संवर्तयितु. ७ क. ख. ङ. च. छ. झ. ञ. मृषिसत्तमैः. घ. मृषिभिस्सह. ८ घ. ट. श्रेष्ठं. ९ क. ख. ङ—ट. तद्धर्मिष्ठयशस्यंच. १० घ. परंविस्मयमाययुः. ११ ङ. च. छ. झ. ञ. तांरात्रिं. १२ अयंश्लोकः ट. दृश्यते. १३ घ. ट. उवाचपरम. १४ क—ञ. क्रियाधर्मेण. १५ ख. धर्मवित्. १६ ख. नराधिपः.

भ्राता मम महातेजा [1]यवीयानतिधार्मिकः ॥ कुशध्वज इति ख्यातः पुरी[2]मध्यवसच्छुभाम् ॥ २ ॥
[3]वार्याफलकपर्यन्तां पिबन्निक्षुमतीं नदीम् ॥ सांकाश्यां पुण्यसंकाशां विमानमिव पुष्पकम् ॥ ३ ॥
तमहं द्रष्टुमिच्छामि यज्ञगोप्ता [4]स मे मतः ॥ प्रीतिं सोपि महातेजा इमां भोक्ता मया सह ॥ ४ ॥
[[5]एवमुक्ते तु वचने शतानन्दस्य सन्निधौ ॥ आगताः केचिदव्यग्रा जनकस्तान्समादिशत्] ॥ ५ ॥
[6]शासनात्तु नरेन्द्रस्य प्रययुः शीघ्र[7]वाजिभिः ॥ [8]समानेतुं नरव्याघ्रं विष्णुमिन्द्राज्ञया यथा ॥ ६ ॥
[[9]सांकाश्यान्ते [10]समागत्य ददृशुश्च कुशध्वजम् ॥ न्यवेदयन्यथावृत्तं जनकस्य च चिन्तितम् ॥
तद्वृत्तं नृपतिः श्रुत्वा दूतश्रेष्ठै[11]र्महाबलैः] ॥ ७ ॥
[12]आज्ञयाऽथ नरेन्द्रस्य आजगाम कुशध्वजः ॥ स ददर्श [13]महात्मानं जनकं धर्मवत्सलम् ॥ ८ ॥
सोभिवाद्य शतानन्दं [14]राजानं चापि धार्मिकम् ॥ [15]राजार्हं परमं दिव्यमासनं [16]चाध्यरोहत ॥ ९ ॥
उपविष्टावुभौ तौ तु [17]भ्रातरावतितेजसौ ॥ प्रेषयामासतुर्वीरौ मन्त्रिश्रेष्ठं सुदामनम् ॥ १० ॥
गच्छ मन्त्रिपते शीघ्र[18]मैक्ष्वाकममितप्रभम् ॥ आत्मजैः सह दुर्धर्षमानयस्व समन्त्रिणम् ॥ ११ ॥
[19]औपकार्यां स [20]गत्वा तु रघूणां कुलवर्धनम् ॥ ददर्श शिरसा चैनमभिवाद्येदमब्रवीत् ॥ १२ ॥
अयोध्याधिपते वीर वैदेहो मिथिलाधिपः ॥ स त्वां द्रष्टुं व्यवसितः सोपाध्यायपुरोहितम् ॥ १३ ॥
मन्त्रिश्रेष्ठवचः श्रुत्वा राजा सर्षि[21]गणस्तदा ॥ सबन्धुरगमत्तत्र जनको यत्र वर्तते ॥ १४ ॥
स [22]राजा मन्त्रिसहितः सोपाध्यायः सबान्धवः ॥ वाक्यं वाक्यविदां श्रेष्ठो वैदेहमिदमब्रवीत् ॥ १५ ॥
विदितं[23] ते महाराज इक्ष्वाकुकुलदैवतम् ॥ वक्ता सर्वेषु कृत्येषु वसिष्ठो भगवानृषिः ॥ १६ ॥
विश्वामित्राभ्यनुज्ञातः सह सर्वैर्महर्षिभिः ॥ एष वक्ष्यति धर्मात्मा [24]वसिष्ठो मे यथाक्रमम् ॥ १७ ॥

सप्ततितमे—ततःप्रभातइत्यादि । कृतकर्मा समाप्तयज्ञादिक्रियः ॥ १ ॥ अत्रत्यविशेषणानांशतानन्दपरिज्ञातानामप्युपदेशः परंपरयादशरथादिश्रोत्रंप्रापयितुं । वार्याफलकपर्यन्तां दुर्गसंरक्षणार्थपरिखारूपेणावस्थितायां इक्षुमत्यां वारिणिआकीर्णाः निखाताः फलकाश्शूलानि येषुते वार्याफलकाः तादृशाःपर्यन्तप्रदेशायस्यास्तां । वार्यामलकपर्यन्तामितिपाठे वार्यामलकाआमलकविशेषाः तत्पर्यन्तां पुण्यसंकाशां पुण्यतुल्यां पुण्यवत्स्ववासिनांस्वतएवाभीष्टप्रदामित्यर्थः । पुष्पकंविमानमिवस्थितां सांकाश्यांपुरीं । इक्षुमतींनदीं पिबन् तज्जलंपिबन्नित्यर्थः । अध्यवसत् अधिवसति । "उपान्वध्याङ्वसः" इत्याधारस्यकर्मत्वं ॥ २ ॥ ३ ॥ यज्ञगोप्ता सांकाश्येस्थित्वायज्ञसामग्रीप्रेषणादिनेतिभावः । इमां विवाहकल्याणजां । भोक्तेतिलुट् ॥ ४—५ ॥ नरेन्द्रस्यशासनात् शतानन्दवचनद्वारकादित्यर्थः । विष्णुं उपेन्द्रं ॥ ६—८ ॥ अध्यरोहत पुरोहितराजानुज्ञयेत्यर्थः ॥९–११॥ औपकार्यांदशरथशिबिरनिवेशं । उपकार्याशब्दात्स्वार्थेष्यञ् ॥ १२—१५ ॥ विदितमिति "मतिबुद्धि—" इत्यादिनावर्तमानेक्तः । "क्तस्यचवर्तमाने" इतिषष्ठी । त्वयाविदितमित्यर्थः । दैवतं परमगुरुरित्यर्थः ॥ १६ ॥ मेवक्ष्यति कुलमितिशेषः । विश्वामित्रस्यकोपपरिहारायविश्वामित्राभ्यनुज्ञा-

---

[पा०] १ क. ख. घ—ट. वीर्यवानतिधार्मिकः. २ क. ख. च. मध्यावसच्छुभाम्. ३ क. ख. ग. वार्यामलकपर्यन्तां. घ. सद्यामलकपर्यन्तां. ४ च. छ. झ. ञ. समेततः. ५ अयंश्लोकः ग. ङ—ट. दृश्यते. ६ घ. शासनाच्च. ७ घ. शीघ्रवाजिनः. ८ क. तमानेतुं. ९ इदमर्धत्रयं ग. ङ—ट. दृश्यते. १० ग. ङ. च. छ. झ. ञ. ट. समागम्य. ११ ङ—ञ. महाजवैः. १२ क. ख. ङ—ट. आज्ञयातु. १३ क. ख. महातेजाः. १४ ङ. च. छ. झ. ञ. जनकंचातिधार्मिकम्. ख. ट. राजानमपिधार्मिकम्. १५ घ. आसनंपरमंदिव्यंराजार्हं. १६ ख. ङ—ञ. सोध्यरोहत. १७ क. ख. घ. ज. ट. वमितौजसौ. ङ. च. छ. झ. ञ. वमितद्युती. १८ क. ख. मिक्ष्वाकुममितौजसम्. १९ घ. ङ. औपकार्यं. २० ज. ट. गत्वाथ. २१ ङ. च. छ. झ. ट. गणस्तथा. २२ ङ. च. छ. झ. ञ. राजाचमन्त्रिसहितः. २३ च. विदितंतु. ग. विदितंतेमहातेजाः. २४ ख. घ. छ. ज. ञ. यथाधर्मंयथाक्रमम्.

[एवमुक्त्वा नरश्रेष्ठे राज्ञां मध्ये महात्मनाम्] ॥
तूष्णींभूते दशरथे वसिष्ठो भगवानृषिः ॥ उवाच वाक्यं वाक्यज्ञो वैदेहं सपुरोधसम् ॥ १८ ॥
अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ॥ तस्मान्मरीचिः संजज्ञे मरीचेः काश्यपः सुतः ॥१९॥
विवस्वान्कश्यपाज्जज्ञे मनुर्वैवस्वतः स्मृतः ॥ मनुः प्रजापतिः पूर्वमिक्ष्वाकुस्तु मनोः सुतः ॥ २० ॥
तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम् ॥ इक्ष्वाकोस्तु सुतः श्रीमान्कुक्षिरित्येव विश्रुतः ॥२१॥
कुक्षेरथात्मजः श्रीमान्विकुक्षिरुदपद्यत ॥ विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान् ॥ २२ ॥
बाणस्य तु महातेजा अनरण्यः प्रतापवान् ॥ अनरण्यात्पृथुर्जज्ञे त्रिशङ्कुस्तु पृथोस्सुतः ॥ २३ ॥
त्रिशङ्कोरभवत्पुत्रो धुन्धुमारो महायशाः ॥ [धुन्धुमारान्महातेजा युवनाश्वो महारथः] ॥
युवनाश्वसुतस्त्वासीन्मान्धाता पृथिवीपतिः ॥ २४ ॥
मान्धातुस्तु सुतः श्रीमान्सुसन्धिरुदपद्यत ॥ सुसन्धेरपि पुत्रौ द्वौ ध्रुवसन्धिः प्रसेनजित् ॥ २५ ॥
यशस्वी ध्रुवसन्धेस्तु भरतो नाम नामतः ॥ भरतात्तु महातेजा असितो नाम जातवान् ॥ २६ ॥
यस्यैते प्रतिराजान उदपद्यन्त शत्रवः ॥ हैहयास्तालजङ्घाश्च शूराश्च शशिबिन्दवः ॥ २७ ॥
तांस्तु स प्रतियुध्यन्वै युद्धे राजा प्रवासितः ॥ २८ ॥
हिमवन्तमुपागम्य भृगुप्रस्रवणेऽवसत् ॥ असितोऽल्पबलो राजा मन्त्रिभिः सहितस्तदा ॥ २९ ॥
द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति श्रुतम् ॥ एका गर्भविनाशाय सपत्न्यै सगरं ददौ ॥ ३० ॥

तद्दत्युक्तं । "दशपुरुषविख्यातात्" इतिशास्त्रेण यौनसंबन्धापेक्षितांवंशशुद्धिंवक्ष्यतीत्यर्थः ॥ १७—१८ ॥ अव्यक्तं प्रत्यक्षाद्यगोचरं वस्तु प्रभवः कारणं यस्य सोऽव्यक्तप्रभवः । अव्यक्तंकिंनाम वक्ष्यत्ययोध्याकाण्डे "आकाशप्रभवोब्रह्म" इति । अथकोयमाकाशोपि तमपिवक्ष्यत्युत्तरकाण्डे "संक्षिप्यहिपुरालोकान्मायया स्वयमेवहि । महार्णवेशयानोप्सुमांत्वंपूर्वमजीजनः । पद्मेदिव्येर्कसङ्काशेनाभ्यामुत्पाद्यमामपि । प्राजापत्यंलयाकर्ममयिसर्वंनिवेशितं" इत्यादिना । शाश्वतः बहुकालस्थायी । नित्यः द्विपरार्धकालंविनाशरहितः । अव्ययः प्रवाहरूपेणप्रतिकल्पमवस्थायी अस्तीतिशेषः ॥ १९ ॥ वैवस्वतः विवस्वत्पुत्रः प्रजापतिः राजा । आसीदितिशेषः ॥ २०—२३ ॥ धुन्धुमारः युवनाश्वापरनामधेयः ॥ २४—२६ ॥ मध्येअसितवृत्तान्तकथनंसगरवैभवातिशयप्रकटनाय । प्रतिराजानः प्रतिपक्षाः । शत्रवः शातयितारः । प्रतिराजानेवतान्विशेषयति—हैहयाइत्यादि ॥२७॥ प्रतियुध्यन् अभिमुखतयायुद्धंकुर्वन् । प्रवासितः राज्याद्भ्रंशितः ॥ २८ ॥ भृगुप्रस्रवणे भृगुमहामुनिसांनिध्यवन्निर्झरोपान्तप्रदेशे । इदमेवपूर्वंभृगुतुन्दइत्युक्तं ॥ २९ ॥ सगरं गरं विषं

शि० अव्यक्तप्रभवः नव्यक्तःकैश्चिज्ज्ञातः प्रभवोजन्मकारणीभूतमात्रादिर्यस्यसस्वयंभूरित्यर्थः । किंच आत् वासुदेवात् व्यक्तंप्राकट्यंयस्यतदव्यक्तंकमलं तस्मात्प्रभवःप्राकट्यंयस्य अयोनिजइत्यर्थः । किंच अव्यक्तंप्रधानंप्रभवतिप्रकटितगुणवत्त्वेनप्रकटयतिसः प्रधानगुणक्षोभहेतुरित्यर्थः । "अव्यक्तंशंकरेविष्णावव्यक्तंमहदादिषु । आत्मन्यपिस्यादव्यक्तमस्फुटेत्वभिधेयवत्" इतिकोशः ॥ १९ ॥ **शि०** जायत अजायत । आगमशास्त्रस्यानित्यत्वादड्विरहः ॥ २६ ॥ **ती०** हैहयादयःसोमवंश्याः । शत्रवः हिंसकाः

[पा०] * इदमर्धंकादिषुनक्वापिदृश्यते. १ क. वाक्यज्ञं. २ ग. घ. ट. सपुरोहितम्. ३ ज. ट. स्वतस्सुतः. ४ घ—ञ. इक्ष्वाकुश्च. ५ क. ख. ज. कुक्षिरेवेति. ६ रितिविश्रुतः. ७ क. ख. घ. ङ—ट. पृथोरपि. ८ इदमर्धं क—ट. दृश्यते. ९ महाबलः. १० ङ. च. छ. झ. ञ. सुतश्चासीत्. ज. सुतश्चापि. ग. सुतश्श्रीमान्. ११ ख. मान्धातोस्तु. ज. मान्धातस्य. १२ क. ख. घ—ञ. जायत. १३ क—घ. हेहयास्ताल. १४ ङ. च. छ. झ. ञ. तांश्चसप्रतियुध्यन्वै. ख. तैस्तुसंप्रतियुध्यद्भिर्युद्धे. ज. तांस्तुसंप्रेक्ष्ययुध्यन्सयुधिराजा. ट. युध्यन्हियुधि. १५ क. ख. ङ. च. ज—ट. भार्याभ्यांसहितोऽवसत्. १६ क. ङ. च. छ. झ. ञ. ट. कालधर्ममुपेयिवान्. घ. मन्त्रिभिश्चसुसन्धिभिः. घ. मन्त्रिभिस्सहितःपुरा. क. ख. ङ. ज. झ. ञ. सहितस्तदा. ट. सहितस्तथा. ग. च. सहितस्ततः. १७ ङ. झ. रितिश्रुतिः. १८ क. ङ—ञ. विनाशार्थं. १९ क. ग. घ. सागरंददौ. ख. तुगरं.

ततः [1]शैलवरं रम्यं बभूवाभिरतो मुनिः ॥ भार्गवश्च्यवनो नाम हिमवन्तमुपाश्रितः ॥ ३१ ॥
तत्रै[2]का तु महाभागा भार्गवं देववर्चसम् ॥ ववन्दे पद्मपत्राक्षी काङ्क्षन्ती [3]सुतमात्मनः ॥ ३२ ॥
तमृषिं [4]साऽभ्युपागम्य कालिन्दी चाभ्यवादयत् ॥ स तामभ्यवदद्विप्रः पुत्रेप्सुं पुत्रजन्मनि ॥ ३३ ॥
तव कुक्षौ महाभागे सुपुत्रः [5]सुमहाबलः ॥ महावीर्यो महातेजा अचिरात्संजनिष्यति ॥
गरेण सहितः श्रीमान्मा शुचः कमलेक्षणे ॥ ३४ ॥
[[6]एवमुक्ता महाभागा असिते स्वर्गते सति ॥ निधाय चेतो नृपतौ विद्युल्लेखेव सुप्रभा] ॥ ३५ ॥
च्यव[7]नं तु नमस्कृत्य राजपुत्री पतिव्रता ॥ पतिशो[8]कातुरा तस्मात्पुत्रं देवी व्यजायत ॥ ३६ ॥
सपत्न्या तु गरस्तस्यै दत्तो गर्भ[9]जिघांसया ॥ सह तेन गरेणैव [10]जातः स सगरोऽभवत् ॥ ३७ ॥
सगरस्यासमञ्जस्तु [11]असमञ्जात्तथांऽशुमान् ॥ दिलीपोंऽशुमतः पुत्रो दिलीपस्य भगीरथः ॥ ३८ ॥
भगीरथात्क[12]कुत्स्थश्च [13]ककुत्स्थस्य रघुस्सुतः ॥ ३९ ॥
रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः ॥ कल्माषपादो [14]ह्यभवत्तस्मा[15]ज्जातश्च शङ्खणः ॥ ४० ॥
सुदर्शनः शङ्खणस्य अग्निवर्णः सुदर्शनात् ॥ शीघ्रगस्त्वग्निवर्णस्य शीघ्रगस्य मरुः सुतः ॥
मरोः [16]प्रशुश्रुकस्त्वासीदंबरीषः प्रशुश्रुकात् ॥ ४१ ॥
अंबरीषस्य पुत्रोऽभू[17]न्नहुषः पृथिवीपतिः ॥ नहुषस्य [18]ययातिश्च [19]नाभागस्तु ययातिजः ॥ ४२ ॥
ना[20]भागस्य बभूवाज अजाद्दशरथोऽभवत् ॥ [21]अस्माद्दशरथाज्जातौ भ्रातरौ रामलक्ष्मणौ ॥ ४३ ॥
आदिवंशविशुद्धानां राज्ञां परमधर्मिणाम् ॥ इक्ष्वाकु[22]कुलजातानां वीराणां सत्यवादिनाम् ॥ ४४ ॥

सत्सहितंभक्ष्यमित्यर्थः ॥ ३० ॥ अभिरतः प्रीतःसन् हिमवन्तमुपाश्रितोभूत् स्वदेशवासाभिमानेनप्रीतःसन्-तद्वरप्रदानायसन्निहितोभूदित्यर्थः ॥ ३१—३२ ॥ कालिन्दीति सगरमुपयुक्तवत्यानाम । उपागम्य शरणंगत्वा । अभ्यवादयत् शुश्रूषतेस्म । सः पुत्रेप्सुं अप्रतिबन्धपुत्रेप्सुं । पुत्रजन्मनि पुत्रोत्पत्तिविषये ॥ ३३ ॥ गरेण सपत्नीप्रयुक्तेन । माशुचः गरप्रयोगनिमित्तंशोकंमाकुर्वित्यर्थः ॥ ३४—३५ ॥ पतिशोकेत्यनेन तदनन्तरमेवदैवात्पतिर्मृतइतिगम्यते । तस्मात् च्यवनानुग्रहात् ॥ ३६ ॥ अत्रयइत्यनुसन्धेयं । जातइत्यनन्तरंतेनेत्यनुसन्धेयं ॥३७—३९॥ पूर्वंप्रवृद्धाख्यः । ततो वसिष्ठशापात् पुरुषादकः राक्षसभूतः । ततःवसिष्ठंप्रतिशापायोद्धृतजलस्यस्वभार्यानुनयात् स्वपदप्रक्षेपेणकल्माषपादाख्यः ॥ ४०—४१ ॥ नहुषययातीचन्द्रवंश्याभ्यामन्यौ । अत्रपुराणेक्रमवैषम्यंकल्पभेदादितिज्ञेयं ॥४२–४३॥ आदिवंशविशुद्धानां आदितआरभ्यवंशेनविशुद्धानां । राज्ञामितिसंबन्धेषष्ठी । वरयइति वरणस्यपुरोहितकृत्यत्वादितिभावः । सदृशेइतिकी-

---

॥ २७ ॥ शि० आदीति आदयः सोमवंश्यापेक्षयाज्येष्ठाः वंशविशुद्धाः वंशोविशुद्धोयेषां तेएवतेइतिकर्मधारयः ॥ ४४ ॥
इतिसप्ततितमस्सर्गः ॥ ७० ॥

[पा०] १ क. ख. ङ. च. झ. ञ. ट. शैलवरेरम्ये. २ क—ट. तत्रचैकामहाभागा. ३ क. ख. घ—ञ. सुतमुत्तमम्. ४ क. ग. तत्रर्षिंसाभ्युपागम्य. ५ क. समहाबलः. ६ अयंश्लोकः ग. ज. दृश्यते. ७ ङ. च. छ. झ. ञ. च्यवनंचनमस्कृत्य. ८ झ. पत्याविरहितातस्मात्. ङ. ज. पतिनारहितातस्मात्. घ. पत्युश्शोकातुरा. ९ ख. गर्भंजिघांसया. १० ङ. च. छ. झ. संजातःसगरोऽभवत्. क. सजातस्सगरो. ११ क—ट. असमञ्जादथांशुमान्. १२ क. क. ककुत्स्थस्तु. १३ ङ—ट. ककुत्स्थाच्चरघुस्तथा. क. ककुत्स्थात्तुरघुस्तदा. घ. ककुत्स्थस्यरघुस्तदा. ख. रघुस्तस्मादजायत. १४ क. ख. ङ. च. छ. झ. ञ. प्यभवत्. १५ क—छ. झ. ञ. ट. ज्जातस्तु. १६ घ. ज. प्रशुश्रुकश्चासीत्. १७ ङ. च. छ. झ. ञ. नहुषश्चमहीपतिः. १८ ग—छ. झ. ञ. ययातिस्तु. १९ क. ख. ग. नाभागश्च. २० ज. ट. नाभागात्तु. २१ ख. घ. ज. तस्माद्दशरथात्. २२ ख. वंशजातानां.

रामलक्ष्मणयोरर्थे त्वत्सुते वरये नृप ॥ सदृशाभ्यां नरश्रेष्ठ सदृशे दातुमर्हसि ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्ततितमस्सर्गः ॥ ७० ॥

एकसप्ततितमः सर्गः ॥ ७१ ॥

जनकेननिजवंशानुकीर्तनपूर्वकंरामलक्ष्मणाभ्यांसीतोर्मिलयोर्दानप्रतिज्ञानम् ॥ १ ॥

एवं ब्रुवाणं जनकः प्रत्युवाच कृताञ्जलिः ॥ श्रोतुमर्हसि भद्रं ते कुलं नः परिकीर्तितम् ॥ १ ॥
प्रदाने हि मुनिश्रेष्ठ कुलं निरवशेषतः ॥ वक्तव्यं कुलजातेन तन्निबोध महामुने ॥ २ ॥
राजाऽभूत्त्रिषु लोकेषु विश्रुतः स्वेन कर्मणा ॥ निमिः परमधर्मात्मा सर्वसत्त्ववतांवरः ॥ ३ ॥
तस्य पुत्रो मिथिर्नाम मिथिला येन निर्मिता ॥ प्रथमो जनको नाम जनकादप्युदावसुः ॥ ४ ॥
उदावसोस्तु धर्मात्मा जातो वै नन्दिवर्धनः ॥ नन्दिवर्धनपुत्रस्तु सुकेतुर्नाम नामतः ॥ ५ ॥
सुकेतोरपि धर्मात्मा देवरातो महाबलः ॥ देवरातस्य राजर्षेर्बृहद्रथ इति स्मृतः ॥ ६ ॥
बृहद्रथस्य शूरोऽभून्महावीरः प्रतापवान् ॥ महावीरस्य धृतिमान्सुधृतिः सत्यविक्रमः ॥ ७ ॥
सुधृतेरपि धर्मात्मा दृष्टकेतुः सुधार्मिकः ॥ दृष्टकेतोस्तु राजर्षेर्हर्यश्व इति विश्रुतः ॥ ८ ॥
हर्यश्वस्य मरुः पुत्रो मरोः पुत्रः प्रतिन्धकः ॥ प्रन्तिधकस्य धर्मात्मा राजा कीर्तिरथः सुतः ॥ ९ ॥
पुत्रः कीर्तिरथस्यापि देवमीढ इति स्मृतः ॥ देवमीढस्य विबुधो विबुधस्य महीध्रकः ॥ १० ॥
महीध्रकसुतो राजा कीर्तिरातो महाबलः ॥ कीर्तिरातस्य राजर्षेर्महारोमा व्यजायत ॥ ११ ॥
महारोम्णस्तु धर्मात्मा स्वर्णरोमा व्यजायत ॥ स्वर्णरोम्णस्तु राजर्षेर्ह्रस्वरोमा व्यजायत ॥ १२ ॥
तस्य पुत्रद्वयं जज्ञे धर्मज्ञस्य महात्मनः ॥ ज्येष्ठोऽहमनुजो भ्राता मम वीरः कुशध्वजः ॥ १३ ॥
मां तु ज्येष्ठं पिता राज्ये सोभिषिच्य नराधिपः ॥ कुशध्वजं समावेश्य भारं मयि वनं गतः ॥१४॥
वृद्धे पितरि स्वर्याते धर्मेण धुरमावहम् ॥ भ्रातरं देवसंकाशं स्नेहात्पश्यन्कुशध्वजम् ॥ १५ ॥
कस्य चित्त्वथ कालस्य सांकाश्यादागमत्पुरात् ॥ सुधन्वा वीर्यवान्राजा मिथिलामवरोधकः ॥ १६ ॥
स च मे प्रेषयामास शैवं धनुरनुत्तमम् ॥ सीता कन्या च पद्माक्षी मह्यं वै दीयतामिति ॥ १७ ॥

बभावआर्षः ॥ ४४—४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्ततितमःसर्गः ॥ ७० ॥

एवंवसिष्ठेनवरवंशकीर्तनपूर्वकंवधूवरणेकृतेजनकःस्ववंशविशुद्धताज्ञापनपूर्वकंकन्याप्रदानंप्रतिजानीतेएकसप्ततितमे—एवंब्रुवाणमित्यादि ॥ १—२ ॥ सत्त्ववतां बलवतां ॥३॥ प्रथमइति। मिथिमारभ्यास्माकंजनकसंज्ञेतिभावः ॥४—६॥ सुधृतिरित्यन्वर्थसंज्ञाज्ञापनार्थं विशेषणद्वयं ॥७—१३॥ भारं भरणीयं। पोषणीयमितियावत् ॥ १४ ॥ धुरं राज्यभारं ॥ १५ ॥ कस्यचित्कालस्य कस्मिंश्चित्कालेगते। अवरोधकः अवरोद्धुमित्यर्थः। तुमुण्ण्वुलौक्रियायांक्रियार्थायामिति ण्वुल्

ति० अथ जनकः कन्यापितृत्वात् जामातृवर्गेप्रभुतायाअनौचित्येन स्ववंशंस्वयमेवाह—**एवमिति** ॥१॥ शि० प्रेषयामास

[पा०] १ सदृशोदातु. २ घ. कुलंनःकीर्तितंपरम्. ३ ङ. च. छ. झ. ञ. ट. महामते. ४ ट. राजासीत्त्रिषु. ५ क. ख. घ—छ. झ. ञ. ट. जनकोमिथिपुत्रकः. ज. निर्मितामिथिलायतः. मिथेस्तुजनकोनाम. ६ क. ख. ङ. च. छ. झ. ञ. प्रथमो. जनकोराजा. घ. मिथिलोजनकोराजाजनकादप्युपावसुः. ७ घ. उपावसोस्तु. ८ ख. राजावैनन्दिवर्धनः. ९ क. ख. घ—ट. नन्दिवर्धसुतश्शूरः. १० क. ख. घ. ज. इतिश्रुतः. ११ ज. महावीर्यःप्रतापवान्. १२ ज. महावीर्यस्य. १३ क—ट. धृष्टकेतुः. १४ धृष्टकेतोस्तु. १५ क—छ. झ. ञ. ट. प्रतीन्धकः. ज. प्रतीन्धनः. १६ घ. कीर्तिरथस्याथ. ज. कीर्तिरथस्यासीत्. १७ ज. सुविधस्सुविधस्य. १८ क. ख. घ—ट. द्वयंराज्ञो. १९ ङ. च. झ. ञ. दागतःपुरात्. २० ज. शैवंचधनुरुत्तमम्.

[1]तस्याऽप्रदानाद्ब्रह्मर्षे युद्धमासीन्मया सह ॥ स हतोऽ[2]भिमुखो राजा सुधन्वा तु मया रणे ॥ १८ ॥
[3]निहत्य तं मुनिश्रेष्ठ सुधन्वानं नराधिपम् ॥ [4]सांकाश्ये भ्रातरं वी[5]रमभ्यषिञ्चं [6]कुशध्वजम् ॥ १९ ॥
कनीयानेष मे भ्राता अहं ज्येष्ठो महामुने ॥ ददामि परमप्रीतो वध्वौ ते मुनि[7]पुङ्गव ॥ २० ॥
सीतां रामाय भद्रं ते ऊर्मिलां [8]लक्ष्मणाय च ॥ २१ ॥
वीर्यशुल्कां मम सुतां सीतां सुरसुतोपमाम् ॥ द्वितीयामूर्मिलां चैव [9]त्रिर्ददामि न संशयः ॥२२॥
[[10]ददामि परमप्रीतो वध्वौ ते [11]रघुनन्दन] ॥ रामलक्ष्मणयो [12]राजन्गोदानं कारयस्व ह ॥
पितृकार्यं च भद्रं ते ततो वैवाहिकं कुरु ॥ २३ ॥
[13]मघा ह्यद्य महाबाहो तृतीये दिवसे [14]विभो ॥ फल्गुन्यामुत्तरे राजंस्तस्मिन्वैवाहिकं कुरु ॥
राम[15]लक्ष्मणयो राज[16]न्दानं कार्यं सुखोदयम् ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

॥ १६—१७ ॥ तस्य सुधन्वनः । अप्रदानात् सीताधनुषोरप्रदानात् ॥ १८—१९ ॥ तेवध्वौददामि स्नुषात्वेनददामि । वसिष्ठेनवरणात्तेददामीत्युक्तं ॥ २० ॥ वध्वावित्युक्तंव्यवस्थयादर्शयति—सीतामित्यर्धेन॥२१॥ उक्तमर्थंसनिमित्तमुपपादयति—वीर्येति । वीर्यशुल्कामित्येतदूर्मिलायाअपिविशेषणं । यद्यपिरामेणैवधनुर्भङ्गःकृतः तथापितादृशशक्तेर्लक्ष्मणेपिदर्शनात्तद्वीर्यमेव ऊर्मिलायाअपिशुल्कमित्यर्थः । ऊर्मिला जनकस्यौरसपुत्री । त्रिः त्रिवारं । त्रिभिःकरणैर्वा ॥ २२ ॥ गोदानंनाम विवाहपूर्वसमयनियतंकिंचित्कर्म । गावःकेशाः दोःपादमूलरोमाणिच यत्रखण्ड्यन्ते तदेतद्गोदानंनाम समावर्तनाख्यंकर्मेत्याहुः । वैवाहिकंपितृकार्यं नान्दीश्राद्धं ॥ २३ ॥ तृतीये भाविनि । फल्गुन्यां फल्गुन्याख्याके । उत्तरे उत्तरनक्षत्रे । वैवाहिकं विवाहप्रयोजनं । "तदस्यप्रयोजनं" इतिठक् । दानं गोभूतिलहिरण्यादिदानं । सुखोदयं सुखोदर्कं । वधूवरयोरतिशयावहमित्यर्थः । कार्यमिति सामान्योक्त्या मयापि कन्यार्थंक्रियतइतिसूचितं । कन्यादानेउत्तरफल्गुन्याः प्रशस्तत्वमुक्तंज्योतिषे "त्रीण्युत्तराण्यपितथार्कमघानुराधामूलान्त्यसोमकमलोद्भवभान्युडूनि" इति ॥२४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकसप्ततितमः सर्गः ॥ ७१ ॥

दूतद्वाराकथयामासेत्यर्थः ॥ १७ ॥ ती० तस्याप्रदानात् तस्य उभयस्य अप्रदानात् । ति० विमुखः युद्धमुखः ॥ १८ ॥ ति० त्रिर्ददामि उक्तमपिदार्ढ्यायेत्याशयः ॥ २२ ॥ ति० अद्यतृतीयदिवसे तवमिथिलाप्रवेशात्तृतीयदिवसे । यज्ञसमाप्तेस्तृतीयदिवसे वा । अद्य मघानक्षत्रं । फल्गुन्यां पूर्वफल्गुनीनक्षत्रे । उत्तरे श्रेष्ठे । अतएव "भगोयत्रप्रजापतिः" इत्यनेनाविरोधः । उत्तरफल्गुन्यास्त्वर्यमेतिबोध्यम् । वैवाहिकं विवाहं । विनयादित्वाट्ठक् । "मघानक्षत्रंपितरोदेवताः फल्गुनीनक्षत्रमर्यमादेवता फल्गुनीनक्षत्रंभगोदेवता" इतितैत्तिरीयसंहितायाम् । "अर्यम्णःपूर्वेफल्गुनीभगस्योत्तरे" इतितद्ब्राह्मणेचोक्तलेनयथाश्रुतमेवसम्यगितितत्त्वम् । उत्तरेइतिपुंस्त्वमार्षं । यद्यप्युत्तराफल्गुनीसीतायाजन्मर्क्षं तथापितदृक्षेप्रथमचरणंविहायतज्जन्मसत्त्वेनतस्याःकन्याराशित्वात्तृतीयैकादशरूपभकूटशुद्धेस्तस्यनदोषः । भकूटशुद्धौतन्नदुष्टमितिज्योतिश्शास्त्रेप्रसिद्धम् । किंच पूर्वांशुतस्याद्वादशक्षन्द्वइतितत्रविवाहोऽनुचितएव । एकनाडीदोषेणचरामसीतयोर्वियोगइतिध्येयम् । रामलक्ष्मणयोरर्थे तदभ्युदयाय । सुखोदयं सुखोदर्कं ॥ २४ ॥ इत्येकसप्ततितमस्सर्गः ॥ ७१ ॥

[पा०] १ ज. ट. तस्याप्रदानाद्भगवन्युद्ध. २ ङ. च. झ. ञ. विमुखो. ३ घ. निहत्यतुनरश्रेष्ठ. ४ च. ञ. सांकाश्याभ्रातरं. ५ क. घ—ट. शूरमभ्यषिञ्चं. ६ क. नराधिपम्. ७ ख. घ. ज. रघुनन्दन. ८ ङ. च. छ. झ. ञ. ट. लक्ष्मणायैव. ९ क. घ. ङ. च. झ. ञ. त्रिर्वदामि. १० इदमर्धं क. छ. झ. ञ. ट. दृश्यते. ११ ङ. च. छ. झ. ञ. ट. मुनिपुङ्गव. क. रघुपुङ्गव. १२ ख. रथैं. १३ ज. मघाप्यद्य. १४ क. ग—छ. झ. प्रभो. ख. तथा. १५ ख—ञ. लक्ष्मणयोरर्थे. १६ ग. गोदानंचसुखोदयम्.

द्विसप्ततितमः सर्गः ॥ ७२ ॥

वसिष्ठविश्वामित्राभ्यांजनकंप्रतिकुशध्वजकन्ययोर्भरतशत्रुघ्नार्थेवरणम् ॥ १ ॥ जनकेनसहर्षप्रशंसनमभ्यनुज्ञानेदशरथेन विवाहाङ्गभूतगोदानादिक्रियानिर्वर्तनम् ॥ २ ॥

तमुक्तवन्तं वैदेहं विश्वामित्रो महामुनिः ॥ उवाच वचनं वीरं वसिष्ठसहितो नृपम् ॥ १ ॥
अचिन्त्यान्यप्रमेयानि कुलानि नरपुङ्गव ॥ इक्ष्वाकूणां विदेहानां नैषां तुल्योस्ति कश्चन ॥ २ ॥
सदृशो धर्मसंबन्धः सदृशो रूपसंपदा ॥ रामलक्ष्मणयो राजन्सीता चोर्मिलया सह ॥ ३ ॥
वक्तव्यं च नरश्रेष्ठ श्रूयतां वचनं मम ॥ ४ ॥
भ्राता यवीयान्धर्मज्ञ एष राजा कुशध्वजः ॥ अस्य धर्मात्मनो राजन्रूपेणाप्रतिमं भुवि ॥
सुताद्वयं नरश्रेष्ठ पत्न्यर्थं वरयामहे ॥ ५ ॥
भरतस्य कुमारस्य शत्रुघ्नस्य च धीमतः ॥ वरयामः सुते राजंस्तयोरर्थे महात्मनोः ॥ ६ ॥
पुत्रा दशरथस्येमे रूपयौवनशालिनः ॥ लोकपालोपमाः सर्वे देवतुल्यपराक्रमाः ॥ ७ ॥
उभयोरपि राजेन्द्र संबन्धेनानुबध्यताम् ॥ इक्ष्वाकोः कुलमव्यग्रं भवतः पुण्यकर्मणः ॥ ८ ॥
विश्वामित्रवचः श्रुत्वा वसिष्ठस्य मते तदा ॥ जनकः प्राञ्जलिर्वाक्यमुवाच मुनिपुङ्गवौ ॥ ९ ॥
कुलं धन्यमिदं मन्ये येषां नो मुनिपुङ्गवौ ॥ सदृशं कुलसंबन्धं यदाज्ञापयथस्स्वयम् ॥ १० ॥
एवं भवतु भद्रं वः कुशध्वजसुते इमे ॥ पत्न्यौ भजेतां सहितौ शत्रुघ्नभरतावुभौ ॥ ११ ॥

अथविश्वामित्रेणभरतशत्रुघ्नार्थेकुशध्वजसुतावरणंगोदानकरणंचद्विसप्ततितमे—तमुक्तवन्तमित्यादि । नृपं जनकं ॥१॥ अचिन्त्यानि आश्चर्यभूतानि । अप्रमेयानि अपरिच्छेद्यमहिमानि । एषां इक्ष्वाकुविदेहानां । तुल्यः कश्चन नास्ति यतः अतःकारणादचिन्त्यत्वमप्रमेयत्वंचेतिभावः ॥२॥ सीता ऊर्मिलयासह रामलक्ष्मणयोर्दीयतेइतियत् अयंधर्मसंबन्धः धर्मेणसंबन्धः । यौनसंबन्धइतियावत् । सदृशः रूपसंपदाचसदृशः । यद्वा अयंकरिष्यमाणोधर्मसंबन्धः सदृशः उभयकुलसदृशः । रूपसंपदाचसदृशः तुल्यरूपयोर्विवाहइत्यर्थः । अत्रहेतुमाह—रामेति । सीताऊर्मिलयासहरामलक्ष्मणयोः यतःसदृशीत्यनुषङ्गः । यद्वा सीता ऊर्मिलयासहरामलक्ष्मणयोः चकाराद्रामलक्ष्मणौचसीतोर्मिलयोः रूपसंपदा सदृशः । शकारान्तेबहुवचनं । अतःसदृशोधर्मसंबन्धइत्यर्थः ॥ ३ ॥ अन्यद्वक्तव्यंकिंचिदस्ति तदपिश्रूयतामित्यर्थः ॥ ४—५ ॥ पत्न्यर्थमित्युक्तं कयोरित्याकाङ्क्षायां तदुपपादयन्नाह—भरतस्येति । भरतस्य शत्रुघ्नस्यचतयोरुभयोरर्थइत्यन्वयः ॥ ६—७ ॥ उभयोर्युवयोः संबन्धेनकुलद्वयमप्यनुबध्यतामित्यर्थः । भवतःकुलमित्यनुकर्षः । अव्यग्रं निर्दोषम् । अन्योन्यसंबन्धेनान्योन्यमुत्कर्षप्राप्नुयादित्यर्थः ॥ ८ ॥ वसिष्ठस्य मते वसिष्ठानुमतइत्यर्थः ॥ ९ ॥ यद्यस्मात् । मुनिपुङ्गवौयुवां येषांनःकुलसंबन्धं इक्ष्वाकुवंशेनयौनसंबन्धं । स्वयं शिष्यमुखं विना । आज्ञापयथः तस्मात्तेषां नः इदंकुलंधन्यं भाग्यशालीति मन्ये ॥ १० ॥ पत्न्यौ भजेतांपत्नीत्वेनभजेतां । सहितौ सदासहचरौ ॥११॥

शि० अचिन्त्यानि अतिशुद्धत्वेनविवाहार्थसंदेहानर्हाणि ॥ २ ॥ ति० उभयोर्भ्रात्रोस्संबन्धेनेक्ष्वाकुकुलंसंबध्यतां तत्रचसंबन्धे पुण्यकर्मणोभवतोऽव्यग्रंचित्तंभवत्वितिशेषः । कथमीदृशेनमहाराजेनयुगपन्मयासंबन्धचतुष्टयंकार्यमितिव्यग्रतामास्त्वित्यर्थः ॥ ८ ॥ वि० मुनिपुङ्गवौभवन्तौयद्यस्मादाज्ञापयतः ॥ १० ॥

[पा०] १ क. घ. ज. रघुपुङ्गव. ख. च. छ. ञ. रघुनन्दन. २ क. ख. एषराजन्. ३ ख. ग. घ. ज. वरयेमसुते. क. वरयामसुते. च. छ. झ. ञ. ट. वरयेतेसुते. ४ ङ—ट. लोकपालसमाः. ५ ज. उभयोरेव. ६ क. संबन्धेनतु. ज. संबन्धेनानुबुध्यताम्. ७ क. ख. घ—ट. इक्ष्वाकुकुलमव्यग्रं. ग. इक्ष्वाकूणांकुलंचाग्र्यं. ८ क. ग. ङ. झ. येषांतौ. ९ ख. यथाऽऽज्ञापयथः. ज. यदाज्ञापयतः. १० ख. भद्रंवां. ज. ट. भद्रंते. क. भद्रंनः.

एकाह्ना राजपुत्रीणां चतसॄणां महामुने ॥ पाणीन्गृह्णन्तु चत्वारो राजपुत्रा महाबलाः ॥ १२ ॥
उत्तरे दिवसे ब्रह्मन्फल्गुनीभ्यां मनीषिणः ॥ वैवाहिकं प्रशंसन्ति भगो यत्र प्रजापतिः ॥ १३ ॥
एवमुक्त्वा वचः सौम्यं प्रत्युत्थाय कृताञ्जलिः ॥ उभौ मुनिवरौ राजा जनको वाक्यमब्रवीत् ॥१४॥
परो धर्मः कृतो मह्यं शिष्योस्मि भवतोः सदा ॥ १५ ॥

इमान्यासनमुख्यानि आसातां मुनिपुङ्गवौ ॥ यथा दशरथस्येयं तथाऽयोध्यापुरी मम ॥
प्रभुत्वे नास्ति सन्देहो यथार्हं कर्तुमर्हथ ॥ १६ ॥

तथा ब्रुवति वैदेहे जनके रघुनन्दनः ॥ राजा दशरथो हृष्टः प्रत्युवाच महीपतिम् ॥ १७ ॥
युवामसङ्ख्येयगुणौ भ्रातरौ मिथिलेश्वरौ ॥ ऋषयो राजसङ्घाश्च भवद्भ्यामभिपूजिताः ॥ १८ ॥
स्वस्ति प्राप्नुहि भद्रं ते गमिष्यामि स्वमालयम् ॥ श्राद्धकर्माणि सर्वाणि विधास्यामीति चाब्रवीत् ॥१९॥
तमापृष्ट्वा नरपतिं राजा दशरथस्तदा ॥ मुनीन्द्रौ तौ पुरस्कृत्य जगामाशु महायशाः ॥ २० ॥
स गत्वा निलयं राजा श्राद्धं कृत्वा विधानतः ॥ प्रभाते काल्यमुत्थाय चक्रे गोदानमुत्तमम् ॥२१॥
गवां शतसहस्राणि ब्राह्मणेभ्यो नराधिपः ॥ एकैकशो ददौ राजा पुत्रानुद्दिश्य धर्मतः ॥ २२ ॥

एकाह्नेत्यजभावआर्षः । सप्तम्यर्थेतृतीया । चतसृणामिति“छन्दस्युभयथा” इतिपक्षेदीर्घः ॥ १२ ॥ उत्तरे फल्गुनीभ्यांउपलक्षितयोर्दिवसयोःउत्तरस्मिन्दिवसे । उत्तरफल्गुन्यामित्यर्थः । यद्वाफल्गुनीभ्यामितिसप्तम्यर्थेचतुर्थी । फल्गुन्यामुत्तरे । फल्गुन्याख्येउत्तरनक्षत्रइत्यर्थः । प्रशस्ततायांहेतुः—भगइति । भगः प्रजापतिः । प्रजोत्पत्तिस्थानयोनिलिङ्गाधिष्ठाता देवता। ननु“एकस्मिंस्तुगृहेकुर्यादेकामेवशुभक्रियां । अनेकांयस्तुकुरुतेसनाशमधिगच्छति” इतिज्योतिश्शास्त्रे एकगृहेअनेकोत्सवनिषेधोदृश्यतइतिचेत् मतान्तरेएकगृहेभ्रातॄणामेकदोत्सवस्यविहितत्वात् । उक्तंहि दैवज्ञविलासे “भिन्नोदरोदयवतामुद्वाहेकल्पयेत्पृथग्वेदिं। एकगृहेजगुरार्या मण्टपमेकंपराशरेणोक्तं” इति। नन्वेवमपिलक्ष्मणशत्रुघ्नयोः कथमेकदाविवाहः “एकमातृप्रसूतानामेकस्मिन्नेववत्सरे । विवाहंमौञ्जिबन्धं चचूडाकर्मनकारयेत्” इतिनिषेधादितिचेत् सत्यं। एकस्मिन्दिनेतुकर्तव्यएव । उक्तंहिदैवज्ञविलासे“भ्रातृद्वयेस्वसृयुगेभ्रातृस्वसृयुगेतथा ॥ समानाश्चक्रियाः कुर्युर्मातृभेदेतथैवच । एकस्मिन्दिवसेत्वेकलग्नेभिन्नांशकेतयोः ॥ एकगर्भोदयवतोर्विवाहःशुभकृद्भवेत्”इति एकोदरयोरप्येकगृहेविवाहकरणवचनंद्रष्टव्यं ॥ १३ ॥ प्रत्युत्थाय आदरातिशयेनेतिभावः ॥ १४ ॥ परोधर्मः कन्याप्रदानरूपः ॥ १५ ॥ इमानीतिसार्धश्लोकएकान्वयः । मद्भ्रातुर्ममदशरथस्यच यान्यासनमुख्यानि सिंहासनानि तानि युवामासातां पुरुषव्यत्ययआर्षः । विनयायप्रथमपुरुषोवा।राज्यत्रयमपियुष्मदीयमित्यर्थः। ननु दशरथसिंहासनं कथंत्वयाशक्यंदातुं तत्राह—यथेति।इयं मिथिला यथादशरथस्येष्टविनियोगार्हा तथा अयोध्याच मम। तथाच युवयोःप्रभुत्वेसन्देहोनास्ति । अतो यथार्हं यथोचितं। प्रभुत्वंकर्तुमर्हथ । पूजायांबहुवचनं।वयंसर्वेभवदधीनाः। यूयमेवास्माकंत्रयाणांहितमुपदिश्य यथोचितंप्रकृतकार्यंकर्तुमर्हथेत्यर्थः ॥ १६ ॥ हृष्टइति । एवमेकवाक्यवादेनेतिशेषः ॥ १७—२० ॥ काल्यं कालेकर्तव्यं । गोदानं समावर्तनं ॥२१॥ तद-

---

ति० आसनमुख्यानि त्रयाणांत्रीणिसिंहासनानि । आस्यतामित्यार्षंपरिपालयेतामित्यर्थकं । आसनशब्देन दशरथजनककुशध्वजानांराज्यानिलक्ष्यन्ते ॥ १६ ॥ ति० क्षत्रियत्वेपिप्रतिग्रहीतृत्वाद्दातरिजनकेआशीःस्वस्तीत्यादि । शि० त्वंस्वस्तिप्राप्नुहिस्वसुतादानेन मङ्गलंप्रापय । अन्तर्भावितणिजर्थः ॥ १९ ॥ ति० एकैकशइत्यार्षं । शि० एकैकशइत्यत्र “उक्तार्थानां—” इतिन्यायाप्रवृत्तिस्तुद्वौब्राह्मणावित्यादाविव “द्विर्बद्धंसुबद्धंभवति” इतिस्वीकारात् आर्षइत्युक्तिस्तु तदविचारमूलिका ॥ २२ ॥

[पा] १ ङ. झ. भवतोस्तथा. २ ङ. च. छ. झ. ञ. आस्यतां. ट. आस्येतां. ख. ग. घ. ज. आसेतां. ३ ख. यथेष्टंकर्तुं. ४ ख. ङ. च. छ. झ. ञ. गमिष्यामः. ५ ङ. च. छ. झ. ञ. ट. विधिवत्. ६ क—ट. विधास्यइति. ७ घ. तौमुनीन्द्रौ. ८ ख. काल्यउत्थाय. ९ ङ. च. छ. झ. ञ. शतसहस्रंच. क. सहस्रंतु.

सुवर्णशृङ्गाः संपन्नाः सवत्साः कांस्यदोहनाः ॥ गवां शतसहस्राणि चत्वारि पुरुषर्षभः ॥ २३ ॥
वित्तमन्यच्च सुबहु द्विजेभ्यो रघुनन्दनः ॥ ददौ गोदानमुद्दिश्य पुत्राणां पुत्रवत्सलः ॥ २४ ॥
स सुतैः कृतगोदानैर्वृतस्तु नृपतिस्तदा ॥ लोकपालैरिवाभाति वृतः सौम्यः प्रजापतिः ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

त्रिसप्ततितमः सर्गः ॥ ७३ ॥

जनकेनवैवाहिकवेषभूषितैरामादिभिःसहदशरथादीनांकल्याणमण्टपप्रवेशनम् ॥ १ ॥ वसिष्ठेनजनकप्रार्थनयाविश्वामित्रशतानन्दपुरस्कारेणवैवाहिकक्रियोपक्रमः ॥ २ ॥ श्रीरामादिभिरग्निसंनिधौजनककुशध्वजाभ्यांमन्त्रोदकदानपुरस्सरचोदनेनसीतादिपाणिग्रहणम् ॥ ३ ॥ तदाविवाहोत्सवेदेवगन्धर्वाप्सरोभिःसहर्षपुष्पवर्षणगाननर्तनाद्याचरणम् ॥ ४ ॥

यस्मिंस्तु दिवसे राजा चक्रे गोदानमुत्तमम् ॥ तस्मिंस्तु दिवसे शूरो युधाजित्समुपेयिवान् ॥ १ ॥
पुत्रः केकयराजस्य साक्षाद्भरतमातुलः ॥ दृष्ट्वा पृष्ट्वा च कुशलं राजानमिदमब्रवीत् ॥ २ ॥
केकयाधिपती राजा स्नेहात्कुशलमब्रवीत् ॥ येषां कुशलकामोसि तेषां संप्रत्यनामयम् ॥ ३ ॥
स्वस्रीयं मम राजेन्द्र द्रष्टुकामो महीपतिः ॥ तदर्थमुपयातोऽहमयोध्यां रघुनन्दन ॥ ४ ॥
श्रुत्वा त्वहमयोध्यायां विवाहार्थं तवात्मजान् ॥ मिथिलामुपयातांस्तु त्वया सह महीपते ॥ ५ ॥
त्वरयाऽभ्युपयातोऽहं द्रष्टुकामः स्वसुः सुतम् ॥ [तस्य त्वं राजशार्दूल प्रीतिं कर्तुमिहार्हसि ॥ ६ ॥
तस्य तद्वचनं श्रुत्वा मधुरं मधुराक्षरम्] ॥ अथ राजा दशरथः प्रियातिथिमुपस्थितम् ॥
दृष्ट्वा परमसत्कारैः पूजनार्हमपूजयत् ॥ ७ ॥
ततस्तामुषितो रात्रिं सह पुत्रैर्महात्मभिः ॥ प्रभाते पुनरुत्थाय कृत्वा कर्माणि कर्मवित् ॥
ऋषींस्तदा पुरस्कृत्य यज्ञवाटमुपागमत् ॥ ८ ॥

ङ्गदानान्याह—गवामित्यादि ॥२२॥ संपन्नाः क्षीरसंपन्नाः । कांस्यदोहनाः कांस्यमयदोहनपात्राः ॥ २३ ॥ सुबहु अन्यद्वित्तंच ॥ २४ ॥ सौम्यः सुप्रसन्नचित्तः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विसप्ततितमःसर्गः ॥ ७२ ॥

अथसीताविवाहस्त्रिसप्ततितमे—यस्मिन्नित्यादि॥१॥ साक्षात्पदेनभिन्नोदरमातुलोप्यस्तीतिगम्यते ॥ २ ॥ केकयाधिपतिः स्वपिता । अनामयं कुशलं विद्यतइतिशेषः ॥ ३ ॥ स्वसुरपत्यंस्वस्रीयः ॥ ४—७ ॥ यज्ञवाटं यज्ञवाटसमीपं । अत्रयज्ञवाटशब्देनोत्सवशालोच्यते । पूर्वयज्ञस्यान्तइत्युक्तत्वेन यज्ञस्यसमाप्तत्वात् ।

ति० ईदृश्योयागावः तासांगवांचत्वारिलक्षाणिददौइत्युत्तरेणान्वयः ॥ २३ ॥ ति० गोदानं तदाख्यंकर्मविशेषं । "गोदानंचौलवत्कार्यंषोडशेऽब्देतदुच्यते । अक्षोपवेशनंनास्तिश्मश्रूणांमुण्डनंभवेत् । स्नात्वाचवाग्यतस्तिष्ठन्नहश्शेषंनयेदथ । आदित्येऽस्तमितेवाचंविसृजेतान्तिकेगुरोः । अहंवरंददामीतिदद्याद्गोमिथुनंततः ।" इत्याश्वलायनकारिकायां । इदंसमावर्तनपूर्वाङ्गम् । "वेदंव्रतानिवापारंनीत्वाह्युभयमेववा । गुरवेतुवरंदत्त्वास्नायीततदनुज्ञया" इतियाज्ञवल्क्यात् ॥ २४ ॥ द्विसप्ततितमस्सर्गः ॥ ७२ ॥

शि० अहं नजहातिचित्तं तत्रैवसर्वदातिष्ठतीत्यर्थः । तंस्वसुस्सुतं । नञ्पूर्वकजहातेःकर्तरिक्तः । नहीयतेचित्तेननत्यज्यतेऽ-

[पा] १ ख. सुवर्णशृङ्गसंपन्नाः. झ. ञ. ट. सुवर्णशृङ्ग्यस्संपन्नाः. २ ख. घ. सुमहद्वि. ३ च. तैस्सुतैःकृत. ४ ख. घ. ङ. च. झ. ञ. ट. वृतस्सनृपति. क. वृतश्चनृपति. ५ ग. ङ. च. छ. झ. ञ. ट. वीरो. ६ क—घ. ज. त्वभ्युपेयिवान्. ७ छ. ज. कैकयराजस्य. ८ ङ. च. ज. विवाहार्थे. ९ ख. मुपयातान्स. १० इदमर्धद्वयं ख. दृश्यते. ११ ग. मुपागतम्. १२ ख. ग. पूजार्हतमपूजयत्. ग. पूजार्हसमपूजयत्. १३ ख. काल्यउत्थाय. १४ ख. कृतकर्मानराधिपः. ग. ङ. च. छ. झ. ञ. ट. कृत्वाकर्माणितत्ववित्.

युक्ते मुहूर्ते विजये सर्वाभरणभूषितैः ॥ भ्रातृभिः सहितो रामः कृतकौतुकमङ्गलः ॥ ९ ॥
वसिष्ठं पुरतः कृत्वा महर्षीनपरानपि ॥ [पितुः समीपमाश्रित्य तस्थौ भ्रातृभिरावृतः] ॥ १० ॥
वसिष्ठो भगवानेत्य वैदेहमिदमब्रवीत् ॥ ११ ॥
राजा दशरथो राजन्कृतकौतुकमङ्गलैः ॥ पुत्रैर्नरवरश्रेष्ठ दातारमभिकाङ्क्षते ॥ १२ ॥
दातृप्रतिग्रहीतृभ्यां सर्वार्थाः प्रभवन्ति हि ॥ स्वधर्मं प्रतिपद्यस्व कृत्वा वैवाह्यमुत्तमम् ॥ १३ ॥
इत्युक्तः परमोदारो वसिष्ठेन महात्मना ॥ प्रत्युवाच महातेजा वाक्यं परमधर्मवित् ॥ १४ ॥
कः स्थितः प्रतिहारो मे कस्याज्ञा संप्रतीक्ष्यते ॥ स्वगृहे कोविचारोस्ति यथा राज्यमिदं तव ॥१५॥
कृतकौतुकसर्वस्वा वेदिमूलमुपागताः ॥ मम कन्या मुनिश्रेष्ठ दीप्ता वह्नेरिवार्चिषः ॥ १६ ॥
सज्जोऽहं त्वत्प्रतीक्षोस्मि वेद्यामस्यां प्रतिष्ठितः ॥ अविघ्नं कुरुतां राजा किमर्थमवलंबते ॥ १७ ॥
तद्वाक्यं जनकेनोक्तं श्रुत्वा दशरथस्तदा ॥ प्रवेशयामास सुतान्सर्वानृषिगणानपि ॥ १८ ॥
[विश्वामित्रो महातेजा विदेहाधिपतेः करम् ॥ कुशध्वजस्य हस्तं च वसिष्ठो भगवानृषिः ॥
गृहीत्वा प्राविशच्छिष्यैः सहितौ द्विजपुङ्गवौ ॥ १९ ॥
अथ राजा दशरथः पुत्रैः स्त्रीभिश्च संवृतः ॥ सर्वानृषीन्पुरस्कृत्य प्रविवेश महाद्युतिः ॥ २० ॥
प्रवेश्यमानं राजानं वसिष्ठं गाधिनः सुतम् ॥ सर्वान्नृपवरान्विप्राञ्जनको धर्मवत्सलः ॥ २१ ॥
वस्त्रैराभरणैश्चैव गन्धपुष्पैश्च साक्षतैः ॥ पूजयामास विधिवद्यथायोग्यं यथाक्रमम्] ॥ २२ ॥
ततो राजा विदेहानां वसिष्ठमिदमब्रवीत् ॥ कारयस्व ऋषे सर्वामृषिभिः सह धार्मिक ॥
रामस्य लोकरामस्य क्रियां वैवाहिकीं प्रभो ॥ २३ ॥
[त्वया न विदितं किंचिन्नास्ति ब्रह्मविदांवर ॥ तस्मात्त्वमेव ब्रह्मर्षे अशेषं कर्तुमर्हसि] ॥ २४ ॥
तथेत्युक्त्वा तु जनकं वसिष्ठो भगवानृषिः ॥ विश्वामित्रं पुरस्कृत्य शतानन्दं च धार्मिकम् ॥२५॥

उत्तरसर्गेदशरथानुयानोक्तेश्च ॥ ८ ॥ युक्ते विवाहानुरूपे । विजये विजयावहे । नतुविजयाख्ये । तस्यापराह्णिकत्वात् । मुहूर्तशब्दस्यघटिकाद्वयपरत्वे विजयःपूर्वाह्णएवभवति पुरतःकृत्वा उपागमदितिशेषः । कृतकौतुकमङ्गलः । कृतविवाहसूत्रबन्धनरूपमङ्गलाचारः "कौतुकंविषयाभोगेहस्तसूत्रे" इत्यमरः ॥ ९ ॥ —॥ ११ ॥ दातारमिति । त्वामितिशेषः ॥ १२ ॥ दातृप्रतिग्रहीतृभ्यामिति । योगइतिशेषः । सर्वार्थाः । दानप्रतिग्रहादयः । विवाहएववैवाह्यं श्रुत्वा । स्वधर्मं प्रतिज्ञारूपं ॥ १३—१४ ॥ प्रतिहारः द्वारपालः । किमर्थंद्रुतमागमनंपरिह्रियतइतिभावः । यथेति । त्वदीयंराज्यमिव मदीयमपिराज्यंतवैव । तथाच मद्गृहमात्रस्यस्वीयत्वेकोविचारइत्यर्थः ॥ १५ ॥ श्रुतकौतुकसर्वस्वाः अनुष्ठितविवाहोपयोगिसर्वमङ्गलाचाराः॥१६॥ अविघ्नं अविलंबं । अवलंबते विलंबते ॥१७॥ श्रुत्वेति । वसिष्ठप्रेरितपुरुषमुखादित्यर्थः ॥ १८—२२ ॥ लोका रमन्तेऽस्मिन्निति लोकरामः तस्य ॥ २३—२४ ॥ प्रपा पानीयशालिका । अभिनवनारिकेलादिपत्र-

---

सावित्यर्थेतु कर्मणि को बोध्यः । अतएवपूर्वेणाहमित्यनेननपौनरुक्त्यम् ॥६॥ ति० स्वधर्मं प्रवेशाज्ञादानरूपं । प्रतिपद्यस्व । तावत् द्वार्येवतिष्ठामइतिभावः ॥१३॥ ति० सद्यः अस्मिन्काले ॥ १७ ॥ ति० अच्छिद्रकुंभैरितिपाठेस्फुटनादिदोषरहितैःस्वर्णकुंभैरिति-

[पा] १ घ. भूषितः. २ छ. वसिष्ठंतुपुरस्कृत्य. ङ. च. झ. ञ. पुरःकृत्वा. ३ इदमर्धं क. ख. ग. ज. दृश्यते. ४ क. मागम्य. ५ घ—ट. श्रेष्ठो. क. श्रेष्ठैः. ६ झ. ञ. ट. संभवन्तिहि. ७ क. वैवाहमुत्तमम्. ८ ङ. ज. झ. ञ. ट. कस्याज्ञां संप्रतीक्षते. ९ ज. दीप्तवह्नेरिवार्चिषः. ख. ङ. ट. दीप्तावह्नेरिवार्चिषा. क. दीप्तावह्नेर्यथार्चिषः. १० झ. ञ. ट. सद्योऽहं. ११ ज. मध. १२ ङ. च. झ. ञ. अविघ्नंक्रियतांसर्वं. छ. ज. अविघ्नंक्रियतांराजा. क. अविघ्नःक्रियतांराजा. घ. अविघ्नं क्रियतांब्रह्मन्. ख. अविघ्नंक्रियतांराजन्. १३ ङ. झ. ञ. ट. किमर्थंहिविलंबते. घ. किमर्थमवलंबसे. १४ एतच्छ्लोकचतुष्टयं ख. दृश्यते. १५ छ. सहधार्मिकः. क. सहधार्मिकैः. १६ अयंश्लोकः ख. दृश्यते. १७ क. नृपतिं.

प्रपामध्ये तु विधिवद्वेदिं कृत्वा महातपाः ॥ अलंचकार तां वेदिं गंधपुष्पैः समन्ततः ॥ २६ ॥
सुवर्णपालिकाभिश्च छिद्रकुंभैश्च साङ्कुरैः ॥ अङ्कुराढ्यैः शरावैश्च धूपपात्रैः सधूपकैः ॥ २७ ॥
शङ्खपात्रैः स्रुवैः स्रुग्भिः पात्रैरर्घ्याभिपूरितैः ॥ लाजपूर्णैश्च पात्रीभिरक्षतैरभिसंस्कृतैः ॥ २८ ॥
दर्भैः समैः समास्तीर्य विधिवन्मन्त्रपूर्वकम् ॥ अग्निमाधाय वेद्यां तु विधिमन्त्रपुरस्कृतम् ॥
जुहावाग्नौ महातेजा वसिष्ठो भगवानृषिः ॥ २९ ॥
ततः सीतां समानीय सर्वाभरणभूषिताम् ॥ [पद्मां पद्मवियुक्तां वै केशवाङ्कच्युतामिव ॥
विद्युत्प्रभां विशालाक्षीं स्निग्धकुञ्चितमूर्धजाम् ॥ ३० ॥
हंसाङ्कितेन क्षौमेण किंचित्पीतेन संवृताम् ॥ वासितेनोत्तरीयेण सुरक्तेन सुसंवृताम्]॥ ३१ ॥
समक्षमग्नेः संस्थाप्य राघवाभिमुखे तदा ॥ अब्रवीज्जनको राजा कौसल्यानन्दवर्धनम् ॥ ३२ ॥
इयं सीता मम सुता सहधर्मचरी तव ॥ प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ॥ ३३ ॥

रचितमण्टपइत्यर्थः । सुवर्णपालिकाभिः साङ्कुराभिरितिलिङ्गविपरिणामेनानुकृष्यते। छिद्रकुंभैः करकैः । शङ्खपात्रैःशङ्खरूपपात्रैः । स्रुक्स्रुवौ आज्यहोमसाधनपात्रविशेषौ । अर्घ्याभिपूरितैः अर्घ्यार्थजलपूरितैः । लाजपूर्णैः पात्रैरित्यनुषज्यते । पात्रीभिः कार्यान्तरोपयुक्तपात्रान्तरैः । अभिसंस्कृतैः हरिद्रालेपनादिसंस्कारवद्भिः । अलञ्चकारेति पूर्वेणान्वयः ॥ २६—२८ ॥ समैः समपरिमाणैः । अत्र पाणिग्रहणात्पूर्वहोमआभ्युदयिकः ॥ २९–३२ ॥ अथसौन्दर्याभिजात्यादिना सीतायाःप्रतिग्रहार्हतांवदन्प्रतिग्रहमनुजानाति—इयमिति । इयं अपरिच्छेद्यसौन्दर्यसौकुमार्यलावण्यादिकंप्रत्यक्षेणनिर्दिशति । नकेवलंप्रत्यक्षंसौन्दर्यादिकं प्र-

---

कतकः । करकैरितितीर्थः ॥२७॥ **तनि०** इयं निरतिशयरूपवती। सीतेति जन्मपरिशुद्धिरुच्यते। ममसुतेत्यावासपरिशुद्धिः । तव सौन्दर्यवागुरयासर्वहृदयाकर्षकस्य । सहधर्मचरी नित्यंसहधर्मचारिणी । भविष्यतीतिकालविशेषविधानाभावात् । नित्यंसहधर्मचारिण्याःकिमिदंदानमितिनकोपःकार्यइतिप्रसादंयाचते—**भद्रंतइति** । मासोत्सवादिष्वर्चाविग्रहविवाहवदवतारानुगुणविवाहादिकंनविरुध्यतइतिहृदयम् । यद्वा मत्तोपिप्रेमातिशयस्तवापीतिदृष्टिदोषपरिहारार्थंरक्षांकरोति—**भद्रंतइति** । पाणिंगृह्णीष्वपाणिनेति तादृशावस्थानुभवेननयनसाफल्यंभजामइतिभावः। आचार्यास्तुप्रकारान्तरेणव्याचक्षते । इयं रूपौदार्यगुणैरहमेवगरीयानितिनतूष्णींस्थातव्यं । एनामपिपश्य । "तुल्यशीलवयोवृत्ता" इत्याद्युक्तलक्षणवत्त्वात्तवेयमर्हति । अतिशयान्तरमाह—**सीतेति** । आभिजात्यायोनिजत्वेअतिशयिते। इयंसीता। सुवर्णलताभूमावेवखलूत्पद्यते । हिरण्यवर्णाखल्वियं ममसुता "जनकानांकुलेकीर्तिमाहरिष्यतिमेसुता" इतिप्रसिद्धिविषया सहधर्मचरी त्वदाचरितधर्माणांप्रवर्तयित्री । प्रतीच्छ अत्यादरेणगृहाण । "नचसीतात्वयाहीना" इत्यादिवत् "नजीवेयंक्षणमपि" इत्येवंप्रकारेणच स्थातव्यं । एनामागतामपरिहारेणस्वीकुरु । पाणिंगृह्णीष्वपाणिना पाणिग्रहणेनाशिथिलकङ्कणांकुरु । भद्रंतइति गृहीतपाण्योरुभयोरपिमङ्गलाशासनंकरोति । पाणिना प्रणयापराधेपाणिनापादग्रहणंभविष्यति इदानींपाणिंगृह्णीष्व । केचिदेवंवर्णयन्ति । इयं त्वद्विश्लेषव्यतिरिक्तकालमात्रसत्तावती । पतिव्रतायाःस्त्रियाभर्तृविरहेसत्तानाश एवेतिप्रसिद्धंखलु । इयं "आर्तार्तेमुदितेहृष्टाप्रोषितेमलिनाकृशा । मृतेम्रियेतयानारीसास्त्रीज्ञेयापतिव्रता" इतिशास्त्रविषयभूतपतिव्रतास्त्रीभ्यउत्तमाखलु तद्विलक्षणाच । इयं त्वदात्मभूतात्वच्छरीरभूताच । सीतानिमित्तन्यूनतातवैवखलु स्वच्छायादोषश्छायावतएवखलु । सुता "मातरमङ्गनाः" इतिमातृगुणानुवृत्त्यापृथिवीगन्धसारभूतक्षमादिगुणवतीच । ममसुतेति नेकवलंराजकुमारीत्वेन भोगदानं किंतु हेमारविन्दन्यायेनाश्रितवैलक्षण्यानुगुण्येनविशेषतोभोगदानमिति । एनां एवंव्रतनियमैरुत्पन्नां । भद्रंते "भुङ्क्ष्वशेषमखिलंतव "इतिवत् व्रतनियमादिजन्यतायास्सफलत्वंतवैव । भोग्यवस्तुगुणपौष्कल्यंभोक्तुरेवातिशयितभोगाय । पाणिंगृह्णीष्वपाणिना सीता हस्तंप्रसार्यग्रहीतुंनजानाति त्वमेवगृह्णीष्व । पाणिंगृह्णीष्वपाणिनेति "बाहुच्छायामवष्टब्धायस्यलोकामहात्मनः" इत्यादि-

[पा०] १ घ. सभामध्येतु. ज. प्रपामध्येच. २ ग. जलकुंभैश्च. घ. झ. ञ. चित्रकुंभैश्च. ३ घ. पात्रैरर्घ्यादिपूरितैः. ङ—ञ. रर्घ्यादिपूजितैः. क. ज. ट. रर्घ्याभिपूजितैः. ख. ग. घ. पात्रैरर्घ्यादिपूरितैः. ४ ग. स्तथापात्रैः. क. श्चपात्रौघैः. ख. श्चपात्रैश्च. ५ क. ख. घ. छ—ट. रपिसंस्कृतैः. ६ झ. अग्निमाधायतंवेद्यां. क. ङ. च. ज. ञ. मादायवेद्यांतु. ७ क. ग. घ. ज. ट. वसिष्ठऋषिसत्तमः. ख. ङ. च. ञ. वसिष्ठोमुनिसत्तमः. झ. मुनिपुङ्गवः. ८ एतत्पद्यद्वयं ख. दृश्यते. ९ क. ज. ञ. राघवाभिमुखंतदा. च. राघवाभिमुखींतदा. १० घ. वाक्यं. ११ ख. घ. नन्दिवर्धनम्.

पतिव्रता महाभागा छायेवानुगता सदा ॥ इत्युक्त्वा प्राक्षिपद्राजा मन्त्रपूतं जलं तदा ॥ ३४ ॥
[प्रक्षिप्ते सलिले भूमौ गगने चोत्थितास्स्वनाः] ॥ साधुसाध्विति देवानामृषीणां वदतां तदा ॥
देवदुन्दुभिनिर्घोषः पुष्पवर्षो महानभूत् ॥ ३५ ॥
एवं दत्वा तदा सीतां मन्त्रोदकपुरस्कृताम् ॥ अब्रवीज्जनको राजा हर्षेणाभिपरिप्लुतः ॥ ३६ ॥
लक्ष्मणागच्छ भद्रं ते ऊर्मिलामुद्यतां मया ॥ प्रतीच्छ पाणिं गृह्णीष्व मा भूत्कालस्य पर्ययः ॥३७॥
तमेवमुक्त्वा जनको भरतं चाभ्यभाषत ॥ गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन ॥ ३८ ॥
शत्रुघ्नं चापि धर्मात्मा अब्रवीज्जनकेश्वरः ॥ श्रुतकीर्त्या महाबाहो पाणिं गृह्णीष्व पाणिना ॥ ३९ ॥

त्यक्षदृष्टमप्यनुमानेनबुभुत्समानस्यायोनिजत्वेनानुमेयंचेत्याह सीता। सीता लाङ्गलपद्धतिः। तज्जन्यतया तथाव्यपदेशः। इयंसीता यासिद्धाश्रमात्प्रभृति धनुर्भङ्गादिना कुतूहलगोचरतामासादिता सेयंसीता। यद्वा सीतादर्शनदशायां विद्युत्स्फुरणसमयइव कचिदप्यवयवविप्रतिपत्त्यभावेन ससंभ्रमंरामंप्रत्याह—इयंसीतेति। यद्वा "प्रासादेसापथिपथिचसापृष्ठतःसापुरः सा" इत्युक्तरीत्या अनवरतभावनाप्रकर्षेण सर्वत्र सीतायाःप्रतीयमानत्वादाह—इयंसीतेति। यद्वा यथा रामआत्मानंमानुषंमन्यते एवंसीतापि। अतोराघवत्वेभवत्सीतेत्याह—इयंसीतेति। नकेवलंसौन्दर्यमसदपेक्षितं किंत्वाभिजात्यंचेत्यत्राह—ममसुतेति। आचारप्रधानजनककुलजातायाः किंवक्तव्यमाभिजात्यमिति भावः। यद्वा ममसुता "महतातपसारामं" इतिवत् तुभ्यंदातुंविरचितविविधव्रतोपवासादिकस्यममकन्येत्यर्थः। अस्त्वियंसुन्दरीभोगार्थां धर्माचरणार्थमन्ययाभवितव्यमितिमन्येतेत्यत्राह—सहधर्मचरीतवेति। भोगार्थेयमेव धर्माचरणार्थापीतिभावः। समानोधर्मः सहधर्मः तंचरतीतिसहधर्मचरी। "दोषोयद्यपितस्यस्यात्सतामेतदगर्हितं" इतिवकुस्तवानुरूपेयं "नकश्चिन्नापराध्यति"इतिवक्ष्यतीतिभावः। एवंसौन्दर्याभिजात्यधर्माचरणशीलत्वादिमत्त्वेपि त्वदनुमत्यभावान्नैनांप्रतिगृह्णामीत्यत्राह—प्रतीच्छचैनामिति। प्रतीच्छ गृहाण। सीतायाः रामाविनाभूततया तस्याः प्रदानानर्हत्वात् ददामीत्यनुक्तिः। भद्रंते स्वतस्सिद्धायाः कस्त्वंदातुमिति रामः कुप्येदितिसान्त्वयति। यद्वा निरतिशयकन्यालक्षणशालिन्याअस्याःप्रतिग्रहे भवतःसर्वाणिमङ्गलानिभविष्यन्तीत्यर्थः। यद्वा अनुरूपवधूवरयोःसंयोगे दृष्टिदोषोभविष्यतीति मङ्गलमाशास्ते—भद्रंतइति। एवंमयानुज्ञाते गान्धर्वराक्षसाभ्यामुद्वहेदितिभीतः प्राह—पाणिंगृह्णीष्वेति। "यदिकामयेतस्त्रीरेवजनयेयमित्यङ्गुलीरेवगृह्णीयात्" इत्याद्युक्तकामव्यावृत्तये पाणिमित्युक्तं। प्रणयधारायांपादग्रहणमस्तु संप्रतिपाणिंगृह्णीष्वपाणिनेति साहित्यकृतशोभाविशेषदर्शनाभिलाषेणोक्तं। ब्राह्मणस्यैवपाणिग्रहणं क्षत्रियादेःशरादिग्रहणंविहितं अतः कथमिदंसंगच्छतइति नशङ्कनीयं। तस्यासवर्णविषयत्वात्। आहमनुः "पाणिग्रहणसंस्कारःसवर्णासुप्रदृश्यते ॥ असवर्णास्वयंज्ञेयोविधिरुद्वाहकर्मणि ॥ शरःक्षत्रिययाग्राह्यःप्रतोदोवैश्यकन्यया ॥ वासोदशाशूद्रयातुवर्णोत्कृष्टस्यवेदने" इति। अतःसर्ववर्णानामपिसवर्णासुपाणिग्रहोस्त्येव ॥ ३३ ॥ पतिव्रतेत्यादि भविष्यतीतिशेषः। प्राक्षिपत् रामहस्तइतिशेषः ॥३४॥ शुभनिमित्तमाह—साध्विति। वदतां वदत्सु। पुष्पवर्षः पुष्पवर्षश्च॥३५—३६॥ पर्ययः विलंबइत्यर्थः। भिन्नमातृकत्वाद्भरतात्पूर्वंलक्ष्मणविवाहोनदुष्यति। "पितृव्यपुत्रेसापत्नेपरनारीसुतेषुवा ॥ विवाहदानयज्ञादौपरिवेदोनदूषणं" इति-

प्रसिद्धपराक्रमशालिहस्तेनहस्तंगृह्णीष्व। ती० तवभुजवीर्यनिर्जितातवाभिमुखंस्थिताइयंसीता ममसुतेत्याभिजात्यकथनं। सहधर्मचरीति यस्त्वयानुष्ठेयोधर्मस्सोनयासहकर्तव्यइत्यर्थः। एनांप्रतीच्छ अङ्गीकुरु। पाणिंगृह्णीष्वपाणिनेति "गृभ्णामितेसौभगत्वायहस्तं" इतिमन्त्रपूर्वकंपाणिग्रहणेत्यर्थः ॥ ३३ ॥ छायेवानुगता नित्यसंबद्धा। भवत्वितिशेषः ॥ ३४ ॥ ति० मन्त्रोदकपुरस्कृतां

[पा०] १ ख. गतातव. २ क. ख. च. मन्त्रपूर्वंजलं. ३ इदमर्धं ख. दृश्यते. ४ ङ. तथा. ५ ज. ट. निर्घोषैः. ६ ख. वृष्टिश्चखाच्युता. क. वृष्टिर्महत्यभूत्. ७ क. ख. घ—ट. सुतांसीतां. ८ क. घ. ङ. ज. पिपरिप्लुतः. ९ क. ऊर्मिलाचममात्मजा. १० घ. त्कालविपर्ययः. ११ क. ख. पाणिंगृह्णीष्वमाण्डव्याः. १२ क. ङ. च. झ. ञ. ट. अब्रवीन्मिथिलेश्वरः. घ. ह्यब्रवीज्जनकेश्वरः. १३ ङ. च. झ. कीर्तेर्महाबाहो. ख. महाभाग.

सर्वे भवन्तः सौम्याश्च सर्वे सुचरितव्रताः ॥ पत्नीभिः सन्तु काकुत्स्था मा भूत्कालस्य पर्ययः ॥४०॥
जनकस्य वचः श्रुत्वा पाणीन्पाणिभिरस्पृशन् ॥ चत्वारस्ते चतसृणां वसिष्ठस्य मते स्थिताः ॥ ४१ ॥
अग्निं प्रदक्षिणीकृत्य वेदिं राजानमेव च ॥ ऋषींश्चैव महात्मानः सभार्या रघुसत्तमाः ॥
यथोक्तेन तदा चक्रुर्विवाहं विधिपूर्वकम् ॥ ४२ ॥
[काकुत्स्थैश्च गृहीतेषु ललितेषु च पाणिषु] ॥ पुष्पवृष्टिर्महत्यासीदन्तरिक्षात्सुभास्वरा ॥
दिव्यदुन्दुभिनिर्घोषैर्गीतवादित्रनिःस्वनैः ॥ ४३ ॥
ननृतुश्चाप्सरस्सङ्घा गन्धर्वाश्च जगुः कलम् ॥ विवाहे रघुमुख्यानां तदद्भुतमदृश्यत ॥ ४४ ॥
ईदृशे वर्तमाने तु तूर्योद्घुष्टनिनादिते ॥ त्रिरग्निं ते परिक्रम्य ऊहुर्भार्या महौजसः ॥ ४५ ॥
अथोपकार्यां जग्मुस्ते सभार्या रघुनन्दनाः ॥ [प्रीयमाणो दशरथः पुत्रान्पुत्रवतां वरः] ॥
राजाप्यनुययौ पश्यन्सर्षिसङ्घः सबान्धवः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

स्मरणात् ॥ ३७—३९ ॥ पत्नीभिः सहिताइतिशेषः। अत्रोदकप्रदानमर्थसिद्धं । जनकेनानुज्ञामात्रंकृतं ज्येष्ठत्वात् उदकप्रक्षेपणंतु माण्डवीश्रुतकीर्त्योः कुशध्वजेनैव । तदाह्याज्ञवल्क्यः “ पितापितामहोभ्रातासकुल्योजननीतथा ॥ कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः ” इति ॥ ४०—४१ ॥ अत्रैकस्यांवेदिकायांएकस्मिन्नेवाग्नौवसिष्ठोजुहाव तेनैवमेकमग्निंसर्वेस्वस्वभार्यापाणीन् गृहीत्वा प्रदक्षिणीकृत्यचक्रुरित्युत्तरत्रान्वयः। राजानं जनकं । यथोक्तेन शास्त्रोक्तप्रकारेण । विधिपूर्वकं कल्पसूत्रपूर्वकं । विवाहं विवाहकर्म । तदा तस्मिन्काले । चक्रुः स्वसूत्रानुरोधेनप्रत्येकंपाणिग्रहणहोमंचक्रुरित्यर्थः । पूर्ववसिष्ठेनहोमवचनमाभ्युदयिककर्मपरं । अग्निप्रतिष्ठापनपूर्वकंविवाहहोमोत्रोच्यते । पाणिग्रहणानन्तरमाग्निंब्राह्मणान् दातारंजनकंच प्रदक्षिणीकृत्य स्वकल्पोक्तविधानेन प्रत्येकमग्निंप्रतिष्ठाप्य विवाहहोमांश्चक्रुरित्यर्थः ॥ ४२ ॥ सीताप्रदानकालिकंशुभंनिमित्तमुक्तं। अथसर्वसाधारण्येनविवाहकर्मकालिकशुभनिमित्तानिदर्शयति—पुष्पवृष्टिरिति ॥४३॥ तत् पुष्पवृष्ट्यादिकं ॥ ४४ ॥ अथ लाजहोमपूर्वकंस्वस्वाग्निप्रदक्षिणत्रयंदर्शयति—ईदृशइति । ईदृशे पूर्वोक्तरूपे । तूर्याणां नृत्यगीतवाद्यानां । उद्घुष्टेन उद्घोषणेन । निनादिते नादेप्रतिध्वनिरूपेवर्तमाने । अग्निं स्वस्वाग्निं । त्रिःपरिक्रम्य ऊहुः विवाहंनिर्वर्तयामासुः ॥ ४५ ॥ राजा दशरथः । पश्यन् सभार्यान्पुत्रानित्यर्थः ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

दानीयमन्त्रोदकाभ्यांपुरस्कृताम् ॥ ३६ ॥ ति० तूर्योद्घुष्टनिनादिते तूर्याणांयदुद्घुष्टंघोषस्तन्निनादितेकाले । त्रिरग्निमित्युपसंहारेण पुनर्वादः ॥ ४५ ॥ इतित्रिसप्ततितमस्सर्गः ॥ ७३ ॥

[पा०] १ घ. कालविपर्ययः. २ क—ट. प्रदक्षिणंकृत्वा. ३ ङ. च. ज. झ. ट. ऋषींश्चापिमहात्मानः. ग. घ. महाभागान्. ४ ङ. झ. ञ. सहभार्यारघूद्वहाः. क—घ. ज. ट. रघूत्तमाः. ५ ज. ट. यथोक्तेनचतच्चक्रुः. ६ इदमर्धं ख. ज. दृश्यते. ७ ट. तदद्भुतमिवाभवत्. ८ ङ. ज. झ. ञ. अथोपकार्यं. ९ क. ख. छ. ज. सदारारघुनन्दनाः. १० इदमर्धं ख. दृश्यते.

चतुस्सप्ततितमः सर्गः ॥ ७४ ॥

विश्वामित्रेणरामादीनामाशीर्वचनपूर्वकंजनकदशरथयोरापृच्छनेनस्वाश्रमगमनम् ॥ १ ॥ दशरथेनरामादिभिःसहजनकदत्तपारिबर्हपरिग्रहपूर्वकंतदापृच्छनेनायोध्यांप्रतिनिर्गमनम् ॥ २ ॥ मध्येमार्गमपशकुनदर्शनेनविषीदतोदशरथस्यप्रश्नेवसिष्ठेनतंप्रतिभयप्रसञ्जननिवेदनपूर्वकंतदुपशमनिवेदनम् ॥ ३ ॥ अत्रान्तरेवनान्तरात्प्रादुर्भवतिभगवतिभार्गवेदशरथेचानर्थाशङ्किनिवसिष्ठादिभिस्तदाश्वासनपूर्वकंसरभसमर्घ्यादिनारामाराधनम् ॥ ४ ॥

अथ रात्र्यां व्यतीतायां विश्वामित्रो महामुनिः ॥ आपृष्ट्वा तौ[1] च राजानौ जगामोत्तरपर्वतम् ॥
[[2]आशीर्भिः पूर[3]यित्वा च कुमारांश्चै[4] सराघवान्] ॥ १ ॥
विश्वामित्रे ग[5]ते राजा वैदेहं मिथिलाधिपम् ॥ आ[6]पृष्ट्वाथ जगामाशु राजा दशरथः पुरीम् ॥ २ ॥
[[7]गच्छन्तं तं तु राजानमन्वगच्छन्नराधिपः] ॥ ३ ॥
अथ राजा विदेहानां ददौ कन्याधनं बहु ॥ ४ ॥
गवां शतसहस्राणि बहूनि मिथिलेश्वरः ॥ कंबलानां च मुख्यानां क्षौमकोट्यंबराणि च ॥ ५ ॥
हस्त्यश्वरथपादातं दिव्यरूपं स्वलङ्कृतम् ॥ ददौ कन्यापिता तासां दासीदासमनुत्तमम् ॥ ६ ॥
हिरण्यस्य सुवर्णस्य मुक्तानां विद्रुमस्य च ॥ ददौ परमसंहृष्टः[12] कन्याधनमनुत्तमम्[13] ॥ ७ ॥
दत्वा ब[14]हुधनं राजा समनुज्ञाप्य पा[15]र्थिवम् ॥ प्रविवेश स्वनिलयं मिथिलां मिथिलेश्व[16]रः ॥ ८ ॥
रा[17]जाप्ययोध्याधिपतिस्सहपुत्रैर्महात्मभिः ॥ ऋषीन्सर्वान्पुरस्कृत्य जगाम स[18]बलानुगः ॥
[[19]वाहिनीं महतीं कर्षन्कीर्तिमांश्च ययौ तदा] ॥ ९ ॥
ग[20]च्छन्तं तं नरव्याघ्रं सर्षिसङ्घं सराघवम् ॥ घोरा[21]ः स्म पक्षिणो वाचो व्याहरन्ति त[22]तस्ततः ॥
भौमाश्चैव मृगाः सर्वे गच्छन्ति स्म प्रदक्षिणम् ॥ १० ॥
तान्दृष्ट्वा राजशा[23]र्दूलो व[24]सिष्ठं पर्यपृच्छत ॥ ११ ॥

अथायोध्याप्रस्थाने मध्येमार्गेजामदग्न्यागमनं चतुस्सप्ततितमे—अथरात्र्यामित्यादि। आपृष्ट्वा आपृच्छ्य। उत्तरपर्वतं स्वावासंहिमवन्तं ॥ १ ॥ आपृष्ट्वा जगामेति क्रियावृत्त्याराजपदावृत्तिः ॥२–४॥ कन्याधनमेवविवृणोति–गवामित्यादि। कंबलानामित्यत्रापि शतसहस्राणीत्यनुषज्यते। क्षौमकोट्यंबराणि क्षौमाश्चकोट्यंबराणिचेतिद्वन्द्वः। क्षौमानामपिबहुत्वमर्थसिद्धं। क्षौमरूपकोट्यंबराणि उत्कृष्टवस्त्राणीतिवा। हस्तीत्यादि सेनाङ्गत्वादेकवद्भावः। कन्यापिता जनकः। गवाश्वादित्वाद्दासीदासमित्येकवद्भावः ॥ ५—६ ॥ हिरण्यस्य रजतस्य शतमितिशेषः ॥ ७—८ ॥ सबलानुगः बलैश्चतुरङ्गैः अनुगैः किङ्करैश्चसहितः ॥ ९ ॥ नरव्याघ्रं प्रतीतिशेषः। घोराइत्यनेनाशुभसूचकत्वमुक्तं। पक्षिणः वायसादयः। प्रदक्षिणमितिशुभसूचनं।

शि० राजा अतिदीप्त्या उपलक्षितः। राजा दशरथः। अथजगाममंगलगमनंचकार ॥ २ ॥ ती० क्षौमान् पट्टवस्त्राणि। कोटीतिभिन्नंपदंसङ्ख्यावाचि। नपुंसकत्वमार्षं। कोटिक्षौमान् कोट्यंबराणीति कोटिशब्दस्योभयत्रान्वयः ॥ ५ ॥ ती० सुवर्णस्य शोभनवर्णस्य। अत्रषष्ठ्यन्तानांपूर्वपठितकोटिशब्देनान्वयः ॥ ७ ॥

[पा०] १ ट. तौहि. २ इदमर्धं ख. ग. च. दृश्यते. ३ ग. च. पूजयित्वा. ४ ख. कुमारांश्चैवराघवे. ५ ख. गते तस्मिन्वैदेहं. ६ ग. घ. ज. ट. आपृच्छ्याथ. क. ङ. च. छ. झ. ञ. आपृष्ट्वैव. ७ इदमर्धं ख. ज. दृश्यते. ८ क. ख. मिथिलाधिपः. ट. पृथिवीपतिः. ९ क. ङ. ज. झ. क्षौमान्कोट्यंबराणिच. च. छ. ञ. ददौकोट्यंबराणिच. १० ङ. ज. झ. ट. कन्याशतं. ११ ज. दासीदाससमन्वितम्. १२ ङ. चं. छ. झ. ञ. राजासुसंहृष्टः. ग. परमसंतुष्टः. १३ ज. रत्नराशिमनुत्तमम्. १४ क. ङ—ट. बहुविधंराजा. १५ क. ख. राघवम्. १६ ज. मिथिलाधिपः. १७ ग. राजात्वयोध्याधिपतिः. १८ ङ. झ. सबलान्वितः. १९ इदमर्धं ख. दृश्यते. २० ङ. च. झ. ञ. गच्छन्तंतु. २१ ङ—ट. घोरास्तु. क. ख. घोराश्च. २२ ङ. च. छ. झ. ञ. समन्ततः. २३ क. ख. नरशार्दूलो. २४ घ. वसिष्ठंप्रत्यभाषत.

असौम्याः पक्षिणो घोरा मृगाश्चापि प्रदक्षिणाः ॥ किमिदं हृदयोत्कंपि मनो मम विषीदति ॥१२॥
राज्ञो दशरथस्यैतच्छ्रुत्वा वाक्यं महानृषिः ॥ उवाच मधुरां वाणीं श्रूयतामस्य यत्फलम् ॥ १३ ॥
उपस्थितं भयं घोरं दिव्यं पक्षिमुखाच्च्युतम् ॥ मृगाः प्रशमयन्त्येते संतापस्त्यज्यतामयम् ॥ १४ ॥
तेषां संवदतां तत्र वायुः प्रादुर्बभूव ह ॥ कंपयन्पृथिवीं सर्वां पातयंश्च द्रुमाञ्शुभान् ॥ १५ ॥
तमसा संवृतः सूर्यः सर्वा न प्रबभुर्दिशः ॥ भस्मना चावृतं सर्वं संमूढमिव तद्बलम् ॥ १६ ॥
वसिष्ठश्चर्षयश्चान्ये राजा च ससुतस्तदा ॥ ससंज्ञा इव तत्रासन्सर्वमन्यद्विचेतनम् ॥ १७ ॥
तस्मिंस्तमसि घोरे तु भस्मच्छन्नेव सा चमूः ॥ ददर्श भीमसंकाशं जटामण्डलधारिणम् ॥ १८ ॥
भार्गवं जामदग्न्यं तं राजराजविमर्दिनम् ॥ कैलासमिव दुर्धर्षं कालाग्निमिव दुस्सहम् ॥ १९ ॥
ज्वलन्तमिव तेजोभिर्दुर्निरीक्ष्यं पृथग्जनैः ॥ स्कन्धे चासाद्य परशुं धनुर्विद्युद्गणोपमम् ॥
प्रगृह्य शरमुख्यं च त्रिपुरघ्नं यथा शिवम् ॥ २० ॥
तं दृष्ट्वा भीमसंकाशं ज्वलन्तमिव पावकम् ॥ [यथा कृष्णगतिं घोरं युगान्ते प्रोद्यतं तथा] ॥
वसिष्ठप्रमुखा विप्रा जपहोमपरायणाः ॥ २१ ॥
संगता मुनयः सर्वे संजजल्पुरथो मिथः ॥ कच्चित्पितृवधामर्षी क्षत्रं नोत्सादयिष्यति ॥ २२ ॥
पूर्वं क्षत्रवधं कृत्वा गतमन्युर्गतज्वरः ॥ क्षत्रस्योत्सादनं भूयो न खल्वस्य चिकीर्षितम् ॥ २३ ॥
एवमुक्त्वाऽर्घ्यमादाय भार्गवं भीमदर्शनम् ॥ ऋषयो रामरामेति वचो मधुरमब्रुवन् ॥ २४ ॥
प्रतिगृह्य तु तां पूजामृषिदत्तां प्रतापवान् ॥ रामं दाशरथिं रामो जामदग्न्योऽभ्यभाषत ॥ २५ ॥
[तस्मिंस्तु घोरे जमदग्निसूनुना त्वासादिते राममभिप्रकोपे ॥

अन्तरिक्षेअशुभसूचनं । भूमौशुभसूचनमित्यर्थस्यद्योतनार्थंभौमाइतिपदं ॥ १०—११ ॥ हृदयमुत्कंपयितुंशीलमस्येतिहृदयोत्कंपि । इदंकिंसुखोदर्कंदुःखोदर्कंवेतिमनोविषीदति । शुभाशुभसूचनदर्शनेनोभयत्रनिर्णयकारणाभावादितिभावः ॥ १२—१३ ॥ पक्षिमुखाच्च्युतं पक्षिमुखेनसूचितमित्यर्थः । प्रशमयन्ति प्रशमंसूचयन्तीत्यर्थः ॥ १४ ॥ संवदतां संवदत्सु ॥१५॥ भस्मनाचावृतंअभूदितिशेषः ॥ १६—१८ ॥ जामदग्न्यमिति अनन्तरापत्येपियञ् । गोत्रत्वारोपात् । जामदग्न्येयमितिपाठे "इतश्चानिञः" इति बह्वचूत्वेप्यार्षत्वाड्ढक् ॥ १९ ॥ पृथग्जनैः पामरैः । विद्युद्गणोपममितितेजस्वितायांदृष्टान्तः । त्रिपुरघ्नमितिटन् । "अमनुष्यकर्तृकेच" इतिहन्तेष्टक्॥२०॥ होमोमानसः ॥ २१ ॥ कच्चिदिति मनसोविमर्शे ॥ २२ ॥ नोत्साद-

ति० दिवि खे भवंदिव्यं । पक्षिमुखाच्च्युतं वचनं । शि० दिव्यं स्वाप्नतुल्यं । पक्षिमुखाच्च्युतंवचनं । दिव्यमितिस्वप्नार्थकदिवुधातुप्रकृतिक ण्यत्प्रत्ययान्तं । संज्ञापूर्वकविधेरनित्यत्वाद्गुणाभावः ॥ १४ ॥ शि० भीमसंकाशं भयंकरप्रकाशविशिष्टं ॥ १८ ॥ ति० जपहोमपरायणाः आसन्नितिशेषः । यद्यपिहोमोऽभ्यधिकरणस्तदापथिचलनसमयेबाधितः तथापि "अपानेजुह्वतिप्राणं—" इत्यादिर्बोध्यइतिकेचित् ॥ २१ ॥ शि० अथोसंजजल्पुः मङ्गलहेतुकजल्पनंचक्रुः । यद्यपिपितृवधामर्षी क्षत्रियकृतपितृवधहेतुकामर्षविशिष्टः आसीदितिशेषः । तथापिक्षत्रं क्षत्रियवंशंनोत्सादयिष्यति । कच्चिच्छब्दोयद्यपीत्यर्थे ॥ २२ ॥ इतिचतुस्सप्ततितमस्सर्गः ॥ ७४ ॥

[पा०] १ घ. ममचसीदति. २ क. दशरथस्यैव. ३ क. दिव्यपक्षि. ४ क. घ—ज. मुखाच्च्युतम्. ५ क. ख. ग. ङ—ञ. न्मेदिनींसर्वां. ६ क. ङ. च. छ. झ. ञ. ट. महाद्रुमान्. ७ ङ. छ. झ. ञ. ट. सर्वेनावेदिषुर्दिशः. ८ क—छ. झ. ञ. ट. ऋषयश्चान्ये. ९ क. ख. घ. च. छ. विसंज्ञाइव. ट. सशङ्काइव. १० ज. हिमसंकाशं. ११ क—ट. जामदग्नेयं. १२ ङ—ट. राजाराजविमर्दनम्. घ. राजवंशविमर्दनम्. ख. राजराजविमर्दनम्. १३ क—ञ. चासज्य. १४ ङ. झ. ञ. शरमुग्रंच. च. छ. शस्त्रमुग्रंच. १५ घ. त्रिपुरघ्नोयथाशिवः. ग. त्रिपुरघ्नोयथाहरः. १६ इदमर्धं ख. दृश्यते. १७ ख. घ. प्रमुखास्सर्वे. १८ घ. ङ. च. छ. झ. ञ. मधुरंवाक्यमब्रुवन्. क. ख. मधुरांवाचमब्रुवन्. ग. अब्रुवन्मधुरांगिरम्. १९ ख. प्रतिगृह्यच. २० अयंश्लोकः ख. दृश्यते.

दृष्ट्वा नरेन्द्रस्य बलं महाबलं भयं प्रविष्टं च विषादितं च] ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुस्सप्ततितमः सर्गः ॥ ७४ ॥

पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

परशुरामेणदशरथप्रार्थनानादरणेनैव तदात्मजंरामंप्रतिशैववैष्णवधनुर्द्वयपुरावृत्तादिनिवेदनपूर्वकंवीर्यपरीक्षणायस्वीयवैष्णवधनुःप्रदानेन तदारोपणचोदना ॥ १ ॥

राम दाशरथे राम वीर्यं ते श्रूयतेऽद्भुतम् ॥ धनुषो भेदनं चैव निखिलेन मया श्रुतम् ॥ १ ॥
तदद्भुतमचिन्त्यं च भेदनं धनुषस्त्वया ॥ तच्छ्रुत्वाऽहमनुप्राप्तो धनुर्गृह्य परं शुभम् ॥ २ ॥
तदिदं घोरसङ्काशं जामदग्न्यं महद्धनुः ॥ पूरयस्व शरेणैव स्वबलं दर्शयस्व च ॥ ३ ॥
तदहं ते बलं दृष्ट्वा धनुषोऽस्य प्रपूरणे ॥ द्वन्द्वयुद्धं प्रदास्यामि वीर्यश्लाघ्यस्य राघव ॥ ४ ॥
[भीतो यदि धनुस्त्यक्त्वा निर्जितोसीति वा वद] ॥ तस्य तद्वचनं श्रुत्वा राजा दशरथस्तदा ॥
विषण्णवदनो दीनः प्राञ्जलिर्वाक्यमब्रवीत् ॥ ५ ॥
क्षत्ररोषात्प्रशान्तस्त्वं ब्राह्मणश्च महायशाः ॥ बालानां मम पुत्राणामभयं दातुमर्हसि ॥ ६ ॥
भार्गवाणां कुले जातः स्वाध्यायव्रतशालिनाम् ॥ सहस्राक्षे प्रतिज्ञाय शस्त्रं निक्षिप्तवानसि ॥ ७ ॥
स त्वं धर्मपरो भूत्वा कश्यपाय वसुंधराम् ॥ दत्वा वनमुपागम्य महेन्द्रकृतकेतनः ॥ ८ ॥
मम सर्वविनाशाय संप्राप्तस्त्वं महामुने ॥ न चैकस्मिन्हते रामे सर्वे जीवामहे वयम् ॥ ९ ॥
ब्रुवत्येवं दशरथे जामदग्न्यः प्रतापवान् ॥ अनादृत्यैव तद्वाक्यं राममेवाभ्यभाषत ॥
[रोषात्प्रस्फुरमाणोष्ठो रामं परमधन्विनम्] ॥ १० ॥

ष्यतीत्यत्रहेतुमाह—पूर्वमिति ॥ २३—२६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुस्सप्ततितमः सर्गः ॥ ७४ ॥

पूर्वमवतारप्रस्तावे जगत्पतित्वेनविष्णोःपरत्वमुक्तं "अहंवेद्मिमहात्मानं" इतिविश्वामित्रवचनेनपुरुषसूक्तं तत्र मानत्वेनसूचितं । कश्यपस्तुतौच "शरीरेतवपश्यामिजगत्सर्वमिदंप्रभो । त्वमनादिरनिर्देश्यस्त्वामहं शरणंगतः" इतिसर्वजगत्कारणत्वादिकमुक्तं। रुद्रस्य च गङ्गाधारणधातुमोक्षणादिवृत्तान्तेन कर्मवश्यत्वेन प्राकृतशरीरवर्तित्वेनचापरत्वंसूचितं । संप्रत्यल्पशक्तित्वेन तस्यापरत्वमाहपञ्चसप्ततितमे—रामेत्यादि । रोषातिरेकेण रामेतिद्विःसंबोधनं । भेदनंचेतिचकारेण ताटकावधादि समुच्चीयते ॥ १ ॥ अचिन्त्यंच भवतीतिशेषः । तच्छ्रुत्वेत्यतःपूर्वमतइत्युपस्कार्यं ॥२॥ जमदग्नेरागतं जामदग्न्यं । आगतार्थेयञार्षः ॥ ३ ॥ तत् तदा ॥ ४—५ ॥ संप्रत्यस्थानेभयशङ्कितया दशरथो रामेप्रेमभराक्रान्तोरामवैभवं ताटकाताटकेयनिरसनादिनाजानन्नपि मङ्गलाशासनमारचयति—क्षत्रेति ॥ ६ ॥ सहस्राक्षे तत्संनिधावित्यर्थः । निक्षिप्तवान् त्यक्तवानित्यर्थः ॥ ७ ॥ महेन्द्रकृतकेतनः महेन्द्रपर्वतेकृतनिवासः ॥ ८ ॥ सर्वविनाशायसंप्राप्तइत्येतदुपपादयति—नचेति ॥ ९—१० ॥

[पा०] १ क—ट. दाशरथेवीर. २ ज. मयाकृतम्. ३ ज. भेदेनधनुषश्चयत्. छ. ञ. भेदनंधनुषस्तदा. ङ च. झ. भेदनंधनुषस्तथा. ४ क. ङ—ञ. गृह्यापरंशुभम्. घ. गृह्यापरंशिवम्. ५ ञ. स्वंबलंदर्शयस्वच. घ. स्वबलंदर्शयस्वमे. ६ ङ. च. छ. झ. ञ. प्यस्यपूरणे. ७ क. ख. ङ—ट. वीर्यश्लाघ्यमहंतव. ग. घ. वीरश्लाघ्यमिदंतव. ८ इदमर्धं ख. दृश्यते. ९ क. ख. स्तथा. १० ज. क्षत्रकोपात्प्रशान्तश्च. ११ ट. स्त्वंमहातपाः. ङ—ञ. श्चमहातपाः. १२ ङ. च. छ. झ. ञ. शस्त्रंप्रक्षिप्तवानसि. १३ क. च. छ. नचैतस्मिन्हते. १४ च. छ. झ. ञ. अनादृत्यतु. १५ इदमर्धं ख. दृश्यते.

इमे द्वे धनुषी [1]श्रेष्ठे दिव्ये लोकाभि[2]विश्रुते ॥ [3]दृढे बलवती मुख्ये सुकृते विश्वकर्मणा ॥ ११ ॥
[[4]करवीरसमे गन्धे विशाले विमले शुभे] ॥ [5]अतिसृष्टं सुरैरेकं त्र्यंबकाय [6]युयुत्सवे ॥ १२ ॥
त्रिपुरघ्नं [7]नरश्रेष्ठ भग्नं काकुत्स्थ यत्त्वया ॥ [[8]इदं द्वितीयं दुर्धर्षं विष्णोर्दत्तं सुरोत्तमैः] ॥ १३ ॥
तदिदं वैष्णवं राम धनुः [9]परमभास्वरम् ॥ समानसारं काकुत्स्थ रौद्रेण धनुषा त्विदम् ॥ १४ ॥
[10]तदा तु देवताः सर्वाः पृच्छन्ति स्म पितामहम् ॥ शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया ॥१५॥
अभिप्रायं तु विज्ञाय देवतानां पितामहः ॥ विरोधं जनयामास [11]तयोः सत्यवतांवरः ॥ १६ ॥
विरोधे[12] च महद्युद्धमभवद्रोमहर्षणम् ॥ शितिकण्ठस्य विष्णोश्च [13]परस्परजिगीषिणोः ॥ १७ ॥
[14]तदा तु जृंभितं शैवं धनुर्भीमपराक्रमम् ॥ हुंकारेण महादेवः स्तंभितोथ त्रिलोचनः ॥ १८ ॥
देवैस्तदा समागम्य सर्षिसङ्घैः सचारणैः ॥ याचितौ प्रशमं तत्र जग्मतु[15]स्तौ सुरोत्तमौ ॥ १९ ॥
जृंभितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः ॥ अधिकं मेनिरे विष्णुं देवाः सर्षि[16]गणास्तदा ॥ २० ॥

लोकाभिविश्रुते लोकेसर्वतःप्रसिद्धे । बलवती इतिनपुंसकद्विवचनं।सुकृते प्रयत्नेननिर्मिते ॥११॥ अतिसृष्टं दत्तं । युयुत्सवे त्रिपुरवासिभिर्योद्धुमिच्छवे ॥ १२ ॥ यस्त्वयाभग्नं तत्त्र्यंबकायदत्तमितिपूर्वेणान्वयः ॥१३॥ समानसारं समानबलं ॥ १४ ॥ समानसारत्वेकिमिदानींपरीक्ष्यमित्याशङ्क्य रौद्रस्यधनुषोवैकल्यादितिवक्तुंप्रस्तावान्तरमुपक्षिपति—तदेत्यादि । तदा दुष्करत्रिपुरहननानन्तरकाले। बलाबलनिरीक्षया बलाबलनिरीक्षणेच्छया। कोऽनयोर्बलवानित्यपृच्छन्नित्यर्थः ॥१५॥ पूर्ववराहादिरूपेणभूम्युद्धरणादिकरणेन विष्णुरधिकइतिस्तुवतस्त्वत्तःश्रुतं अधुनाविष्णुमुपसर्जनीकृत्यत्रिपुरहननाद्रुद्रस्याधिकबलत्वंप्रतीयतइत्यभिप्रायमित्यर्थः । सत्यवतांवरइत्यनेनबहुशउपदेशेपिनैषांचित्तंसमाधत्ते अतःक्रिययैवबलतारतम्यंदर्शयिष्यामीत्यभिप्रेत्य विरोधंजनयामासेतिगम्यते । अहंधन्वीप्रधानः विष्णुस्तुममोपसर्जनइत्युक्तंरुद्रेणेतिविष्णुंप्रत्युक्त्वा शराग्रतयामयावस्थानान्मयैवत्रिपुरहननंकृतमितिविष्णुनोक्तमितिरुद्रंप्रत्युक्त्वाच विरोधजननमित्यवगम्यते ॥ १६—१७ ॥ जृंभितमित्यत्रापिहुंकारेणेत्यनुषज्यते । जृंभितं भग्नमितियावत् । हुंकारेण नत्वभिमन्त्रितबाणेन । महादेवः । महादेवशब्दोमहावृक्षसमाख्यायितइतिभावः । त्रिलोचनइत्यनेन तृतीयंलोचनमपिनिरर्थकंकृतमितिभावः ॥ १८ ॥ याचितौप्रशमंजग्मतुः । विष्णुःकिमनेनबालेन अनुकंप्यतामितियाचितस्तन्निग्रहान्निवृत्तः रुद्रस्तुस्वामितःपराजयोनास्माकंदोषायेतिसान्त्वितस्तत्तुल्यत्वाभिमानान्निवर्ततइत्यर्थः॥१९॥ अथ स्वाभिमतसिद्धिमाह—जृंभितमिति । तत् विष्ण्वधिष्ठानेनपूर्वंत्रिपुरघ्नं । जृंभितं विष्ण्वधिष्ठानाभावेनजृंभितं । दृष्ट्वा नत्वाप्तवाक्याच्छ्रुत्वा । शैवं शिवाभिमानमात्रविषयभूतं । विष्णुपराक्रमैः पूजायांबहुवचनं । हुंकारेणेतिपूर्वमुक्तेः । आधिक्यावबोधनंनपक्षपातमूलमित्याह—सर्षिगणाइति । अतीन्द्रियार्थद्रष्टा-

---

तनि॰ नकेवलंधनुषोजृंभणं किंतुतदाश्रयस्यापीत्याह—**हुङ्कारेणेति** । महादेवइतिविडंबनगर्भं । घृतकोशातकीशब्दवदनर्थकोमहादेवशब्दइत्यर्थः । **शि॰** महादेवः स्तंभितः व्यापाररहितः आसीदितिशेषः । एतेनसत्त्वगुणस्यतदानींप्राबल्यंसूचितं । **वैद्यनाथी॰** "रजस्सत्त्वंतमश्चैवकदाचिदभिभूयान्यतमद्भवति" इतिन्यायेनतयोर्युद्धकालेसत्त्वगुणप्राधान्याद्विष्णुनात्रिलोचनश्चस्तंभितः स्तंभितप्रायोऽभूत् ॥ १८ ॥ **ति॰** विष्णुं अधिकं श्रेष्ठं । सेव्यत्वेनमेनिरे ज्ञातवन्तः । वस्तुतस्तु प्रकृतयुद्धेविष्णोराधिक्यदर्शनात्त्रिपुरवधेशिवस्याधिक्यदर्शनात्तयोस्साम्यग्रहणमितितात्पर्यं । **शि॰** देवाःविष्णुमधिकंमेनिरे स्वीकृततत्सत्त्वगुणस्यतत्कालेआधिक्यंस्वीचक्रुरित्यर्थः । **वैद्यनाथीयं** परमार्थविद्भिः रुद्रोधिकोविष्णुर्न्यूनः विष्णुरधिकोरुद्रोन्यूनः इतिदुर्मतिर्दूरेत्याज्या । एकस्यैवपरमात्मनोगुणभेदमात्रनिबन्धनौरुद्रविष्णुशब्दौ भेदाभावात् । एवंचयोविष्णुस्सएवरुद्रःकदाचिल्लीलयान्यूनत्वेनाधिकत्वेनचभाति इति बोध्यम् ॥ २० ॥

[पा॰] १ ट. दिव्येश्रेष्ठे. २ ख. ग. ङ—ट. भिपूजिते. ३ ट. दृढेबहुबले. ४ इदमर्धं ख. दृश्यते. ५ ङ. च. छ. झ. अनुसृष्टंसुरैरेकं. ६ क. ग. युयुत्सते. ७ घ. धनुश्श्रेष्ठं. ८ इदमर्धं क—ट. दृश्यते. ९ क. ख. घ—ट. परपुरञ्जयम्. १० घ. कदाचिद्देवताः. ११ च. छ. तयोस्सत्यपरीक्षया. १२ ङ—ट. विरोधेतु. १३ क—ङ. ज—ट. परस्परजयैषिणोः. १४ क. ख. ग. ट. तदातज्जृंभितं. १५ क. ख. स्तौसुरेश्वरौ. १६ ङ. झ. ञ. गणास्तथा.

[[1]पूजयित्वा ततो विष्णुमामन्त्र्य च पिनाकिनम् ॥ ब्रह्मेन्द्रादीन्पुरस्कृत्य नाकपृष्ठं ययुस्तदा] ॥२१॥
धनू रुद्रस्तु संक्रुद्धो विदेहेषु महायशाः ॥ देवरातस्य राजर्षेर्ददौ हस्ते ससायकम् ॥ २२ ॥
[[2]तद्धनुर्देवरातोपि शिरसा गृह्य पूजयत् ॥ [3]भग्नं तन्मनुजश्रेष्ठ त्वया पैनाकमुत्तमम्] ॥ २३ ॥
इदं च वैष्णवं राम धनुः परपुरंजयम् ॥ ऋचीके भार्गवे प्रादाद्विष्णुः संन्यासमुत्तमम् ॥ २४ ॥
ऋचीकस्तु महातेजाः पुत्रस्याप्रतिकर्मणः ॥ पितुर्मम ददौ दिव्यं जमदग्नेर्महात्मनः ॥ २५ ॥
[4]न्यस्तशस्त्रे पितरि मे तपोबलसमन्विते ॥ अर्जुनो [5]विदधे मृत्युं प्राकृतां बुद्धिमास्थितः ॥ २६ ॥
वधमप्रतिरूपं तु पितुः श्रुत्वा सुदारुणम् ॥ [[6]अमर्षो मे महानासीत्सर्वलोकभयप्रदः ॥
शाश्वतोऽग्निर्हुतो विप्रैर्यथा हुतमुखे प्रभुः ॥ २७ ॥
अशक्नुवान्स तं क्रोधं धनुर्गृह्य परं शुभम्] ॥ [7]क्षत्रमुत्सादयन्रोषाज्जातंजातमनेकशः ॥ २८ ॥
पृथिवीं [8]चाखिलां प्राप्य कश्यपाय महात्मने ॥ [9]यज्ञस्यान्ते तदा राम दक्षिणां [10]पुण्यकर्मणे ॥ २९ ॥
दत्त्वा महेन्द्रनिलयस्तपोबलसमन्वितः ॥ [[11]स्थितोसि तस्मिंस्तप्यन्वै सुसुखं सुरसेविते ॥ ३० ॥
अद्य तूत्तमवीर्येण त्वया राम महाबल] ॥ [12]श्रुतवान्धनुषो भेदं ततोऽहं द्रुतमागतः ॥ ३१ ॥
[13]तदिदं वैष्णवं राम पितृपैतामहं महत् ॥ क्षत्रधर्मं पुरस्कृत्य गृह्णीष्व धनुरुत्तमम् ॥ ३२ ॥

रन्नृषयः तेषांगणाः वैखानसवालखिल्यादयः । "भूयसांस्याद्बलीयस्त्वं" इतिन्यायेन तज्ज्ञानंनपक्षपातमूलं नवाभ्रान्तिमूलमितिभावः । एतेन "एकएवरुद्रो नद्वितीयायतस्थे" इत्यादिश्रुतिः "नकिरिन्द्रत्वदुत्तरः" इत्यादिवदितरापेक्षयाश्रेष्ठत्वाभिप्राया । "एकोहवैनारायणआसीत्" इत्यादिश्रुत्युक्तोनारायणापरपर्यायो विष्णुरेवपरंतत्वमित्यभिहितं । एतेन तमउद्रेकेणकदाचिद्रुद्रस्यपराजयोनदोषायेतिकेनचिदुक्तंप्रत्युक्तं । तमोऽभिभवस्यैवापरत्वनियामकत्वात् । इन्द्रजिता रामपराजयस्तु अदृश्यो न शब्दवेधेनवध्यइतिधर्मप्रवर्तनाय । धर्मसंस्थापनायहि तदवतारइत्युक्तं । अत्र तु स्वरूपतएवरुद्रस्यपराजयः । किंच रुद्रपराजयस्य तमःकृतत्वे देवानामधिकत्वबुद्धिर्नस्यादेव । अयंचधनुर्भङ्गो दक्षयज्ञान्तइतिबोध्यं । अन्यथा "दक्षयज्ञवधेपूर्वंधनुरायम्यवीर्यवान्" इत्यादिना दक्षयज्ञान्ते रुद्रोदेवानांधनुर्ददावित्युक्तंविरुध्येत । अत्रेदमेवधनुस्त्रिपुरघ्नमित्युक्तत्वादेतद्विरुद्धं मेरुधनुष्ट्वं पुराणान्तरोक्तमनादरणीयं । ननु पूर्वंदक्षयज्ञान्तेरुद्रोदेवेभ्योधनुर्दत्तवानित्युक्तं पुनश्चदेवरातायरुद्रोदत्तवानित्युक्तं विश्वामित्राश्रमे मुनिभिर्यज्ञेजनकायदेवाददुरित्युक्तं अनसूयासमीपेसीतया जनकाय वरुणेनदत्तमित्युक्तं । कथमिदंसंगच्छते । श्रूयतां । पूर्वंदेवास्त्रिपुरवधायविश्वकर्मणानिर्मितं धनूरुद्रायददुः । तद्दक्षयज्ञान्ते विरोधेविष्णुहुंकारेणजृंभितं देवैः प्रार्थितोरुद्रोदेवरातस्य हस्तेदत्तवान् । ततःप्रभृति न्यासभावेनमैथिलेषुवर्तमानं तत्स्वत्वेनदेवावरुणेनजनकायादापयन्निितिक्रमः । तेनदक्षयज्ञान्तेधनुर्दानवचनं देवैर्जनकस्ययज्ञफलत्वेनदानवचनं वरुणेनदत्तत्ववचनंच समञ्जसंभवति ॥ २०—२५ ॥ अर्जुनः कार्तवीर्यार्जुनः ॥२६—२७॥ अनेकशः त्रिस्सप्तकृत्वः ॥ २८—३१ ॥ उत्तमं अशिथिलमित्यर्थः । पितृपैतामहं पितृपितामहक्रमायातं । उत्तरपदवृद्धिरार्षी । क्षत्रधर्ममिति ब्राह्मणवन्नश-

---

ती० प्राकृतां तामसीं । देहात्मबुद्धिमित्यर्थः ॥ २६ ॥ ति० उत्सादयं उत्सादितवान् । अडभावआर्षः ॥ २८ ॥ इति पञ्चसप्ततितमस्सर्गः ॥ ७५ ॥

[पा०] १ अयंश्लोकः ख. च. छ. दृश्यते. २ अयंश्लोकः ख. दृश्यते. ३ क. ख. च. धनुस्तेनसमप्रभम्. ज. धनुः परमभास्वरम्. ४ ग. न्यस्तशस्त्रेचपितरि. क. ख. न्यस्तशस्त्रेतु. ५ च. छ. विदधेतत्र. ६ इदमर्धत्रयं ख. दृश्यते. ७ क. ङ. ज. झ. ञ. क्षत्रमुत्सादयम्. ट. क्षत्रमुत्पाटयन्रोषात्. ८ ट. त्वखिलांप्राप्य. ख. चाखिलांप्रादां. ९ ङ. झ. यज्ञस्यान्तेऽददंराम. ख. स्यान्तेऽददां. ज. ददौराम. १० ज. पुण्यकर्मणाम्. ११ अयंश्लोकः ख. दृश्यते. १२ क—छ. झ. ञ. श्रुत्वातुधनुषोभेदं. ख. ग. श्रुत्वातुधनुषोभेदंविस्मितानांनभस्तले । भाषतांदेवसङ्घानांततोऽहंद्रुतमागतः. १३ च. छ. झ. ञ. तदेववैष्णवं.

योजयस्व धनुःश्रेष्ठे शरं परपुरंजयम् ॥ [1]यदि शक्नोषि काकुत्स्थ द्वन्द्वं दास्यामि [2]ते ततः ॥ ३३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

षट्सप्ततितमः सर्गः ॥ ७६ ॥

रामेणपरशुरामंप्रतिस्वशरस्यलक्ष्यभेदननियमाभिधानेनलक्ष्यविकल्पपूर्वकंतत्प्रदर्शनचोदना ॥ १ ॥ रामेणभार्गवरामवचनात्तदीयलोकेषुशरविमोचनम् ॥ २ ॥ जामदग्न्येनसुरादिसमक्षंरामस्यसाक्षान्नारायणत्वावधारणोक्तिपूर्वकंमहेन्द्रमहीधरंप्रति गमनम् ॥ ३ ॥

[3]श्रुत्वा तज्जामदग्न्यस्य वाक्यं दाशरथिस्तदा ॥ गौरवाद्यन्त्रित[4]कथः पितू राममथाब्रवीत् ॥ १ ॥
[5]श्रुतवानस्मि यत्कर्म कृतवानसि भार्गव ॥ अनुरुध्यामहे ब्रह्मन्पितुरा[6]नृण्यमास्थितः ॥ २ ॥
वीर्यहीनमिवाशक्तं क्षत्रधर्मेण भार्गव ॥ अवजानासि मे[7] तेजः पश्य मेऽद्य पराक्रमम् ॥ ३ ॥
इत्युक्त्वा राघवः क्रुद्धो भार्गवस्य [8]शरासनम् ॥ [9]शरं च प्रतिजग्राह हस्ताल्लघुपराक्रमः ॥ ४ ॥
आरोप्य [10]संधनू रामः शरं सज्यं चकार ह ॥ जामदग्न्यं ततो रामं रामः [11]क्रुद्धोऽब्रवीद्वचः ॥ ५ ॥
ब्राह्मणोसीति [12]पूज्यो मे विश्वामित्रकृतेन च ॥ तस्माच्छक्तो [13]न ते राम [14]मोक्तुं प्राणहरं शरम् ॥ ६ ॥
इमां [15]पादगतिं राम तपो[16]बलसमार्जिताम् ॥ [17]लोकानप्रतिमान्वा ते [18]हनिष्यामि यदिच्छसि ॥ ७ ॥

क्तइतिमाब्रूहीत्यर्थः ॥ ३२ ॥ यदिशक्नोषि तावतापि नत्वांमुञ्चामि अपितु ततः अनन्तरं द्वन्द्वयुद्धंदास्यामि । वीर्यपरीक्षणार्थमिदमितिभावः ॥ ३३ ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणेमणिमञ्जीराख्यानेबालकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

अथ जामदग्न्यगर्वनिर्वापणंषट्सप्ततितमे—श्रुत्वेत्यादि । पितुर्गौरवादिति पितुःसन्निधिगौरवादित्यर्थः । यन्त्रिता नियमिता कथा उच्चैःकथनं येन सतथा ॥१॥ पितुरानृण्यं पितृघातिक्षत्रवधेनपितृवैरशुद्धिंआस्थितः सन् यत्कर्म त्रिस्सप्तकृत्वःक्षत्रवधरूपं कृतवानसि तच्छ्रुतवानस्मि । तदनुरुन्ध्यामहे अनुरुन्ध्मः । अवश्यंशूरेणवैरशुद्धेःकर्तव्यत्वात् । कर्तरियगार्षः ॥२॥ वीर्यहीनं अतएवक्षत्रधर्मेणप्राप्तधनुर्ग्रहणयुद्धादावशक्तमिव मन्यमानो यन्मां अवजानासि क्षत्रधर्मंपुरस्कृत्येत्यादिनाऽवमानंकृतवानसि तन्नानुरुंध्यामहे ।"अस्मदोद्वयोश्च" इतिचकारादेकस्मिन्बहुवचनं । अतः तेजः परपरिभवासहनं । पराक्रमम् स्वशक्त्यापराभिभवनंच पश्य ॥ ३—५ ॥ विश्वामित्रकृतेन विश्वामित्रकृतस्नेहेन । विश्वामित्रभगिन्यांसत्यवत्यामृचीकाज्जातोजमदग्निः तस्यपुत्रःपरशुरामइतिविश्वामित्रसंबन्धेनेत्यर्थः ॥ ६ ॥ ते तुभ्यं पादयोर्गतिं गमनं । लोकान् लोकप्राप्तिं । यदिच्छसि अनयोर्मध्येयदिच्छसितद्वदेत्यर्थः । यदी-

---

ती० अनुरुध्यामहे पितुरानृण्यंपुत्राणांकर्तव्यमिति भवत्कृतंक्षत्रविशसनंसहामहइत्यर्थः । क्षत्रियसाधारण्येनमदवज्ञांनसहामह इतिभावः ॥ २ ॥ शि० अशक्तं ब्राह्मणोद्देश्यकातिभाषणसंबन्धिसामर्थ्यरहितं ॥ ३ ॥ ति० धनुः चात्भार्गवनिष्ठांवैष्णवींशक्तिं। जग्राह । तदुक्तंपाद्मे "इत्युक्त्वादेविवैष्णव्याशक्त्यातद्गतयासह । जग्राहवैष्णवंचापंविनयेनंचलीलया" इति । अत्राप्यग्रेवक्ष्यति 'निर्वीर्योजामदग्न्योसौ" इति । लघुरशीघ्रःपराक्रमोयस्यसः । शि० क्रुद्धः क्रुधंस्वाश्रितकोपंजहातिहापयतीतितथा । वरायुधं चापं । शरंचप्रतिसंगृह्य गृहीत्वा । धनुरारोप्यशरं सज्यं ज्यासंयुक्तं चकार ॥ ४ ॥

[पा०] १ ग. घ. झ. यदिशक्तोसि. २ ख. तेतदा. ३ ग. तच्छ्रुत्वाजामदग्न्यस्य. च. छ. झ. ञ. श्रुत्वातुजामदग्न्यस्य. ४ घ. कथोजामदग्न्यमथाब्रवीत्. ५ ज. ट. कृतवानसियत्कर्मश्रुतवानस्मिभार्गव. ६ क. ग. घ. च. छ. ज. रानृण्यमास्थितम्. ७ क. मांराम. ८ क—घ. च—ट. वरायुधम्. ९ झ. धनुश्चप्रतिजग्राह. क—घ. च. छ. ज. ञ. ट. शरंचप्रतिसंगृह्य. १० ज. तद्धनूरामः. ११ क. ख. च. छ. झ. ञ. क्रुद्धोऽब्रवीदिदम्. १२ क. ग. घ. मेपूज्यः. १३ घ. नमेराम. १४ ख. घ. मोक्ष्येप्राणहरं शरम्. १५ क—घ. च. छ. झ. ञ. ट. चालद्गतिंराम. १६ घ. च. ज. ञ. समार्जिताम्. झ. ट. समर्जितान्. १७ घ. नप्रतिमेयान्वा. क. ख. ग. च—ट. नप्रतिमान्वापि. १८ क. च. छ. झ. ञ. हनिष्यामीतिमेमतिः. ख. हरिष्यामियदिच्छसि.

न ह्ययं वैष्णवो दिव्यः शरः परपुरञ्जयः ॥ मोघः पतति वीर्येण बलदर्पविनाशनः ॥ ८ ॥
[इति ब्रुवति काकुत्स्थे भार्गवं प्रति रोषिते ॥ शतक्रतुमुखा देवाः पुरस्कृत्य शतक्रतुम्] ॥ ९ ॥
वरायुधधरं रामं द्रष्टुं सर्षिगणाः सुराः ॥ पितामहं पुरस्कृत्य समेतास्तत्र सङ्घशः ॥ १० ॥
गन्धर्वाप्सरसश्चैव सिद्धचारणकिंनराः ॥ यक्षराक्षसनागाश्च तद्द्रष्टुं महदद्भुतम् ॥ ११ ॥
जडीकृते तदा लोके रामे वरधनुर्धरे ॥ निर्वीर्यो जामदग्न्योसौ रामो राममुदैक्षत ॥ १२ ॥
तेजोभिर्हतवीर्यत्वाज्जामदग्न्यो जडीकृतः ॥ रामं कमलपत्राक्षं मन्दंमन्दमुवाच ह ॥ १३ ॥
[रामराम महाबाहो शृणु राम मयेरितम् ॥ राजसूये कृते पूर्वं यज्ञे दशरथात्मज] ॥ १४ ॥
कश्यपाय मया दत्ता यदा पूर्वं वसुन्धरा ॥ विषये मे न वस्तव्यमिति मां कश्यपोऽब्रवीत् ॥ १५ ॥
सोहं गुरुवचः कुर्वन्पृथिव्यां न वसे निशाम् ॥ कृता प्रतिज्ञा काकुत्स्थ कृता भूः कश्यपस्य हि ॥१६॥
तदिमां त्वं गतिं वीर हन्तुं नार्हसि राघव ॥ मनोजवं गमिष्यामि महेन्द्रं पर्वतोत्तमम् ॥ १७ ॥
लोकास्त्वप्रतिमा राम निर्जितास्तपसा मया ॥ जहि ताञ्शरमुख्येन मा भूत्कालस्य पर्ययः ॥१८॥
अक्षय्यं मधुहन्तारं जानामि त्वां सुरोत्तमम् ॥ धनुषोस्य परामर्शात्स्वस्ति तेऽस्तु परंतप ॥ १९ ॥
एते सुरगणाः सर्वे निरीक्षन्ते समागताः ॥ त्वामप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे ॥ २० ॥
न चेयं मम काकुत्स्थ व्रीडा भवितुमर्हति ॥ त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः ॥ २१ ॥

च्छसीतिपाठोयुक्तः । उभयथाप्रतिबद्धःकचित्तिष्ठेन्न-लोकंपीडयेदितिरामस्यहृदयं ॥ ७ ॥ वीर्येण स्वशक्त्या । मोघोनपतति लक्ष्यमभित्वानतूष्णींपततीत्यर्थः ॥ ८—९ ॥ वरायुधेत्यादि । रामं तन्महदद्भुतंकर्मच द्रष्टुं समेताइत्यन्वयः ॥ १०—११ ॥ लोके जने । जडीकृते स्तब्धे । निर्वीर्यः निर्गतवैष्णवतेजाः । तथाचपुराणान्तरं "ततःपरशुरामस्यदेहान्निर्गत्यवैष्णवम् । पश्यतांसर्वदेवानांतेजोराममुपाविशत्" इति । उदैक्षत विस्मितइतिशेषः ॥ १२ ॥ उवाच प्रश्नोत्तरमितिशेषः ॥१३—१४॥ कश्यपायेत्यादि । यदाब्रवीत्तदाप्रभृति नवसइत्यन्वयः । गुरुवचः कश्यपवचः । कुर्वन् परिपालयन् । कुतइत्यत्राह—कृतेति । हिशब्दः प्रसिद्धौ । यतः सर्वप्रसिद्धतया भूः काश्यपस्य स्वत्वेनकृता त्वद्विषये न वत्स्यामीतिप्रतिज्ञाचकृता तस्मादित्यर्थः ॥१५—१६॥ गतिं गमनं ॥१७॥ लोकहननं-नामलोकदानप्रतिबन्धः । मूर्तस्यवाअमूर्तस्यवाकार्यस्य-प्रतिहननमेव रामशरस्यापेक्षितमितिभावः॥१८॥अक्षय्यं निर्विकारं मधुहन्तारं विरोधिनिरसनशीलं । अनेन "नब्रह्मानेशानः" इतिमहोपनिषदुपबृंहिता। परामर्शात् ग्रहणात् ॥१९—२०॥ इयं त्वयाविमुखीकृतिः।

ति० तद्द्रष्टुंआगताइतिशेषः ॥ ११ ॥ ति० तपसा यज्ञादिरूपेण । निर्जिताः अर्जिताः । अत्रपुण्यार्जितलोकहननाभ्यनुज्ञयाऽस्यतलज्ञलंव्यञ्जयम् । रामस्यलोकदानप्रतिबन्धयोस्त्वातत्त्वयदर्शनेनपरेशत्वबोधनंच । पाद्मेपि । "शतयज्ञकृतंपुण्यंतद्ब्रायन्यवेदयत्" इति ॥ १८ ॥ ति० यतः "उतामृतत्वस्येशानः" इतिश्रुतिप्रसिद्धंब्रह्मैवत्वमित्याह—अक्षय्यमिति । अक्षय्यं अनाद्यन्तं केनापिपराजयंनेतुमशक्यंच ॥१९॥ ति० इयं त्वद्विषयेअशक्तिः । विमुखीकृतस्वशक्तेःस्वस्मिन्योजनेनाशक्तःकृतः । एतेन स्वस्य भगवदंशत्वं रामस्यचपूर्णभगवदवतारत्वं सूचितं । स्वातिरिक्तेनविमुखीकरणेहिव्रीडा नतुस्वात्मनामाययातथाकरणे इतिभावः ।

[पा०] १ घ. अमोघोप्रतिवीर्येण. २ ग. परदर्पविनाशनः. ३ इदमर्धं क. ख. दृश्यते. ४ इदमर्धं क. दृश्यते. ५ ज. धरंवीरं. ६ क. ख. च. छ. झ. ञ. ट. स्तत्रसर्वशः. ७ घ. चारणगुह्यकाः. ज. ट. किंनरचारणाः. ८ क. ख. जामदग्न्योथ. ९ च. छ. झ. ञ. तेजोभिर्गतवीर्यत्वात्. क. ख. ग. ट. तेजोभिर्हतवीर्यत्वात्. घ. ततोभिहतवीर्यश्च. १० ख. च. झ. मन्दमन्दमुवाचह. ११ अयंश्लोकः क. दृश्यते. १२ ज. ट. यथापूर्ववसुंधरा. घ. महतीयंवसुंधरा. १३ क. ख. च. छ. झ. ञ. ट. तदाप्रभृतिकाकुत्स्थ. ग. इतिप्रतिज्ञाकाकुत्स्थ. ङ. ज. तथाप्रतिज्ञाकाकुत्स्थ. १४ क. च. छ. झ. ञ. ट. कृतामेकश्यपस्य. ख. ग. घ. कृतावैकश्यपस्यह. १५ च. छ. तदिमांमद्गतिंवीर. घ. यदिमांतांगतिंवीर. ञ. तामिमांमद्गतिंराम. झ. तामिमांमद्गतिंवीर. १६ क. वीर. १७ ट. तपसानिर्जितामया. १८ घ. ज. माभूत्कालविपर्ययः. १९ च. झ. ञ. अक्षय्यं. २० च. छ. झ. ञ. सुरेश्वरम्. २१ ज. मेऽस्तु. २२ ट. रामकाकुत्स्थ. २३ ज. यथाहं.

शरमप्रतिमं राम मोक्तुमर्हसि सुव्रत ॥ शरमोक्षे गमिष्यामि महेन्द्रं पर्वतोत्तमम् ॥ २२ ॥
तथा ब्रुवति रामे तु जामदग्न्ये प्रतापवान् ॥ रामो दाशरथिः श्रीमांश्चिक्षेप शरमुत्तमम् ॥ २३ ॥
स हतान्दृश्य रामेण स्वाँल्लोकांस्तपसाऽऽर्जितान् ॥ जामदग्न्यो जगामाशु महेन्द्रं पर्वतोत्तमम् ॥२४॥
ततो वितिमिराः सर्वा दिशश्चोपदिशस्तथा ॥ सुराः सर्षिगणा रामं प्रशशंसुरुदायुधम् ॥ २५ ॥
रामं दाशरथिं रामो जामदग्न्यः प्रशस्य च ॥ ततः प्रदक्षिणं कृत्वा जगामात्मगतिं प्रभुः ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

सप्तसप्ततितमः सर्गः ॥ ७७ ॥

गतेजामदग्न्येरामेणतद्दत्तवैष्णवधनुषोवरुणहस्तेप्रदानम् ॥ १ ॥ भार्गवनिर्गमनश्रवणहृष्टेनदशरथेनसेनादीनामयोध्यांप्रतिगमनचोदना ॥ २ ॥ पौरैर्वादित्रघोषपुरस्सरंप्रत्युद्गम्यमानेनदशरथेनरामादिभिःसहायोध्याप्रवेशः ॥ ३ ॥ रामादिभिश्चतुर्भिःस्वस्वजायाभिःसहस्वस्वभवनेषुसुखविहरणम् ॥ ४ ॥ ततःकतिपयकालानन्तरंभरतमातुलेनयुधाजितादशरथानुमत्याभरतशत्रुघ्नयोःस्वपुरंप्रत्यानयनम् ॥ ५ ॥ श्रीरामेणपित्राज्ञयाप्रजापालनपूर्वकंश्रीसीतयासहस्वनगरेसुखविहरणम् ॥ ६ ॥

गते रामे प्रशान्तात्मा रामो दाशरथिर्धनुः ॥ वरुणायाप्रमेयाय ददौ हस्ते ससायकम् ॥ १ ॥
अभिवाद्य ततो रामो वसिष्ठप्रमुखानृषीन् ॥ पितरं विह्वलं दृष्ट्वा प्रोवाच रघुनन्दनः ॥ २ ॥
जामदग्न्यो गतो रामः प्रयातु चतुरङ्गिणी ॥ अयोध्याभिमुखी सेना त्वया नाथेन पालिता ॥ ३ ॥
[संदिशस्व महाराज सेनां त्वच्छासने स्थिताम् ॥ शासनं काङ्क्षते सेना चातकालिर्जलं यथा] ॥४॥
रामस्य वचनं श्रुत्वा राजा दशरथः सुतम् ॥ बाहुभ्यां संपरिष्वज्य मूर्ध्नि चाघ्राय राघवम् ॥ ५ ॥
गतो राम इति श्रुत्वा हृष्टः प्रमुदितो नृपः ॥ पुनर्जातं तदा मेने पुत्रमात्मानमेव च ॥ ६ ॥
चोदयामास तां सेनां जगामाशु ततः पुरीम् ॥ ७ ॥

व्रीडा लज्जा ॥ २१ ॥ शरमोक्षे सति । अहं दृष्टशरलक्ष्यस्वार्जितलोकगतिः ॥ २२—२३ ॥ दृश्य दृष्ट्वा। लोकान् हतान् लोकप्राप्तिहेतुकर्माणि विफलीकृतानीत्यर्थः ॥२४—२५॥ आत्मगतिं स्वस्थानं ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्सप्ततितमः सर्गः ॥ ७६ ॥

अथस्वपुरंप्राप्यसीतयारामःसुखमुवासेत्याहसप्ततितमे—गतइत्यादि। रामे परशुरामे। वरुणाय न्यासत्वेनेतिशेषः। अप्रमेयाय अदृश्यायेत्यर्थः ॥ १ ॥ विह्वलं परवशं । अनेन परशुरामेणकृतांपरत्वसूचिकांस्तुतिं वरुणायधनुर्दानंच दशरथोनज्ञातवानितिगम्यते ॥ २ ॥ चतुरङ्गिणीति "प्रातिपदिकान्तनुम्" इत्यादिना णत्वं ॥ ३—४ ॥ रामस्येत्यादिश्लोकद्वयमेकान्वयं। रामस्यवचनंश्रुत्वा विह्वलतयाअस्पष्टंवचनंश्रुत्वा। गतोरामइतिश्रुत्वा क्रमेणपुनःस्पष्टंश्रुत्वेत्यर्थः ।

एतद्व्यवहारप्रयोजनंच दययादशरथादीन्प्रतिस्वरूपबोधनं रामस्यपूर्णतेजोवत्त्वसंपादनंचेतिभाति । वैष्णवतेजसोंशेनान्यत्रसत्त्वेरावणवधस्यदुष्करत्वात्। एतदर्थमेवरावणवधेच्छुदेवगन्धर्वादीनांद्रष्टुमागमनंपूर्वमुक्तं ॥ २१ ॥ **ति०** दाशरथिंप्रदक्षिणीकृत्य अन्तर्यामित्वेनज्ञानात्प्रदक्षिणकरणंच क्षत्रियत्वाच्चतस्यप्रणत्यकरणंकार्येनेतिबोध्यं ॥ २६ ॥ इतिषट्सप्ततितमस्सर्गः ॥ ७६ ॥

ति० वरुणस्याप्रमेयत्वंभृगवेसाक्षाद्ब्रह्मविद्याप्रदत्वात् । इदंचतैत्तिरीयोपनिषदिस्पष्टं ॥ १ ॥ **शि०** पितरंचाभिवाद्य विकलं वीनांपक्षिणांकलंस्वस्वनीडगमनंयस्मिन् तं सायंकालं । दृष्ट्वाप्रोवाच ॥ २ ॥

[पा०] १ ख. ज. ञ. गमिष्येऽहं. २ ज. निहतान्दृश्य. ३ ज. ताँल्लोकांस्तपसा. ४ ख. श्वविदिश. ५ घ. देवास्सर्षिगणाः. ६ ज. ट. मुदान्विताः. झ. प्रपूजितः. ७ घ. च. छ. ञ. प्रशस्यह. ८ क—घच. झ. प्रदक्षिणीकृत्य. ९ क—छ. झ. ञ. ट. महायशाः. १० ङ. झ. ट. विकलंदृष्ट्वा. ११ अयंश्लोकः ख. ग. ज. दृश्यते. १२ ग. घ. ट. तद्वचश्श्रुत्वा. क. चवचश्श्रुत्वा. ख. तुवचः. १३ घ—छ. झ. ञ. मूर्ध्न्युपाघ्राय. १४ क. सुतानात्मान. ख. पुत्रांश्चात्मान.

पताकाध्वजिनीं रम्यां तूर्योद्घुष्टनिनादिताम् ॥ सिक्तराजपथां रम्यां प्रकीर्णकुसुमोत्कराम् ॥ ८ ॥
राजप्रवेशसुमुखैः पौरैर्मङ्गलवादिभिः ॥ संपूर्णां प्राविशद्राजा जनौघैः समलङ्कृताम् ॥ ९ ॥
पौरैः प्रत्युद्गतो दूरं द्विजैश्च पुरवासिभिः ॥ पुत्रैरनुगतः श्रीमाञ्श्रीमद्भिश्च महायशाः ॥ १० ॥
प्रविवेश गृहं राजा हिमवत्सदृशं पुनः ॥ ननन्द स्वजनो राजा गृहे कामैः सुपूजितः ॥ ११ ॥
कौसल्या च सुमित्रा च कैकयी च सुमध्यमा ॥ वधूप्रतिग्रहे युक्ता याश्चान्या राजयोषितः ॥१२॥
[रामं च लक्ष्मणं चैव शत्रुघ्नं भरतं तथा ॥ आर्चयन्मङ्गलाशीर्भिर्मङ्गलैरभ्यपूजयन् ॥
उपाहारैश्च संहृष्टाः कुमारानभिपूज्य च] ॥ १३ ॥
ततः सीतां महाभागामूर्मिलां च यशस्विनीम् ॥ कुशध्वजसुते चोभे जगृहुर्नृपपत्नयः ॥ १४ ॥
मङ्गलालापनैश्चैव शोभिताः क्षौमवाससः ॥ देवतायतनान्याशु सर्वास्ताः प्रत्यपूजयन् ॥ १५ ॥
अभिवाद्याभिवाद्यांश्च सर्वा राजसुतास्तदा ॥ [स्वंस्वं गृहमथासाद्य कुबेरभवनोपमम् ॥ १६ ॥
गोभिर्धनैश्च धान्यैश्च तर्पयित्वा द्विजोत्तमान्] ॥ रेमिरे मुदिताः सर्वा भर्तृभिः सहिता रहः ॥१७॥
कुमाराश्च महात्मानो वीर्येणाप्रतिमा भुवि ॥ कृतदाराः कृतास्त्राश्च सधनाः ससुहृज्जनाः ॥ १८ ॥
शुश्रूषमाणाः पितरं वर्तयन्ति नरर्षभाः ॥ [कालेकाले तु नीतिज्ञास्तोषयन्तो गुरुं गुणैः] ॥१९॥
कस्यचित्त्वथ कालस्य राजा दशरथः सुतम् ॥ [अभिवादयितुं प्राप्तं श्यामं कमललोचनम्] ॥
अक्लिष्टकारिणं शूरं परसैन्यविमर्दनम् ॥ २० ॥
विनयं देहयोगेन संप्राप्तमिव संस्थितम् ॥ भरतं कैकयीपुत्रमब्रवीद्रघुनन्दनः ॥ २१ ॥
अयं केकयराजस्य पुत्रो वसति पुत्रक ॥ त्वां नेतुमागतो वीर युधाजिन्मातुलस्तव ॥ २२ ॥
[* प्रार्थितस्तेन धर्मज्ञ मिथिलायामहं तदा ॥ ऋषिमध्ये तु तस्य त्वं प्रीतिं कर्तुमिहार्हसि *] ॥२३॥

हृष्टः पुलकितः ॥ ५—७ ॥ रम्यामितिपुनरुक्तिस्तत्तद्विशेषणकृतरमणीयत्वाभिप्रायेण पताका । ध्वजपटः। ध्वजःदण्डः । पताकान्विताध्वजाअस्यांसन्तीति पताकाध्वजिनीं । ह्रस्वदीर्घध्वजभेदइत्यप्याहुः । उद्घुष्टमितिभावेनिष्ठा । तूर्योद्घोषेणसंजातनिनादामित्यर्थः ॥ ८ ॥ राजप्रवेशेन सुमुखैः विकसन्मुखैः । मङ्गलं आशीर्वचनं वक्तुंशीलमेषामस्तीतिमङ्गलवादिभिः ॥ ९—१० ॥ जनः सम्बन्धिजनः। गृहेस्थितैरितिशेषः । काम्यन्तइतिकामाः विषयभोगपरिकराःतैः ॥ ११ ॥ वधूनां स्नुषाणां प्रतिग्रहे उपचारे स्वस्वान्तःपुरानयनेवा । "वधूर्जायास्नुषा" इत्यमरः । युक्ता आसक्ताः । आसन्नितिशेषः ॥ १२—१३ ॥ जगृहुः अन्तःपुरं प्रावेशयन् ॥ १४ ॥ मङ्गलालापनैः स्वस्तिवाचनैः । शोभिताः । मङ्गलालंभनैरितिपाठे आलंभनं चन्दनचर्चा । देवतायतनानि गृहदेवतानामर्चागृहाणि । प्रत्यपूजयन् गन्धपुष्पादिभिरपूजयन् । आयतनपूजामात्रे स्त्रीणामधिकारादितिभावः ॥ १५ ॥ सर्वाअभिवाद्य सर्वारेमिरइत्यन्वयः ॥ १६—१८ ॥ वर्तयन्ति अनुवर्तयन्तिस्म ॥ १९ ॥ कस्यचित्त्वथकालस्य कस्मिंश्चित्कालेगतेसति ॥ २०—२१ ॥ मातुलस्तवेति अतोगच्छेतिव्यञ्जनावृत्त्योक्तिः पुत्रविरहका-

ति० होमैः गृहप्रवेशनीयहोमैः ॥ १५ ॥

[पा०] १ च. छ. ज. ञ. ट. मङ्गलपाणिभिः. २ ख. स्वपुरवासिभिः. ३ क. ख. शूरैः. ४ क. ख. घ—ट. त्सदृशंप्रियम्. ५ च. छ. झ. ञ. ट. स्वजनैराजा. ६ इदमर्धत्रयं क. ख. दृश्यते. ७ ङ. च. छ. झ. ञ. ट. नृपयोषितः. ८ क. मङ्गलाभरणाश्चैव. ख. मङ्गलाभरणैश्चैव घ. मङ्गलालेपनैश्चैव. ञ. मंगलालंभनैश्चैव. ज. मङ्गलारंभकैश्चैव. ङ. च. छ. झ. मङ्गलालापनैर्होमैः. ९ ख. यथार्हंप्रत्यपूजयन्. १० ख. भिवाद्यास्ताः. ११ घ. ट. स्तथा. १२ अयंश्लोकः ख. ग. ज. दृश्यते. १३ ख. गृहंसमासाद्य. १४ ख. मुग्धाः. १५ इदमर्धं ख. ग. दृश्यते. १६ इदमर्धत्रयं ख. दृश्यते. १७ ग. घ. ज. ट. द्रघुसत्तमः. ख. द्रघुनन्दनम्. १८ ङ. च. छ. झ. ञ. वीरो. १९ अयंश्लोकः ख. ग. ज. दृश्यते.

श्रुत्वा दशरथस्यैतद्भरतः कैकयीसुतः ॥ [अभिवाद्य गुरुं रामं परिष्वज्य च लक्ष्मणम्] ॥
गमनायाभिचक्राम शत्रुघ्नसहितस्तदा ॥ २४ ॥
आपृच्छ्य पितरं शूरो रामं चाक्लिष्टकारिणम् ॥ मातॄश्चापि नरश्रेष्ठः शत्रुघ्नसहितो ययौ ॥ २५ ॥
[युधाजित्प्राप्य भरतं सशत्रुघ्नं प्रहर्षितः ॥ स्वपुरं प्राविशद्वीरः पिता तस्य तुतोष ह] ॥ २६ ॥
गते च भरते रामो लक्ष्मणश्च महाबलः ॥ पितरं देवसंकाशं पूजयामासतुस्तदा ॥ २७ ॥
पितुराज्ञां पुरस्कृत्य पौरकार्याणि सर्वशः ॥ चकार रामो धर्मात्मा प्रियाणि च हितानि च ॥ २८ ॥
मातृभ्यो मातृकार्याणि कृत्वा परमयन्त्रितः ॥ गुरूणां गुरुकार्याणि कालेकालेऽन्ववैक्षत ॥ २९ ॥
एवं दशरथः प्रीतो ब्राह्मणा नैगमास्तदा ॥ रामस्य शीलवृत्तेन सर्वे विषयवासिनः ॥ ३० ॥
तेषामतियशा लोके रामः सत्यपराक्रमः ॥ स्वयंभूरिव भूतानां बभूव गुणवत्तरः ॥ ३१ ॥
रामस्तु सीतया सार्धं विजहार बहूनृतून् ॥ मनस्वी तद्गतस्तस्या नित्यं हृदि समर्पितः ॥ ३२ ॥
प्रिया तु सीता रामस्य दाराः पितृकृता इति ॥ गुणाद्रूपगुणाच्चापि प्रीतिर्भूयोभ्यवर्धत ॥
[हृदयं चैव जानाति प्रीतियोगि परस्परम्] ॥ ३३ ॥

तर्यात् ॥ २२—२४ ॥ अक्लिष्टं कस्यापिदुःखरहितं यथाभवतितथा कर्तुंशीलमस्यस्येतितं ॥ २५—२८ ॥ परमयन्त्रितः परमं अत्यन्तं यन्त्रितः श्रुतिस्मृतिमर्यादानतिलङ्घी । गुरुकार्याणि गुरूचितशुश्रूषादिकार्याणि । अन्ववैक्षत परिपालयतिस्मेत्यर्थः ॥ २९ ॥ एवं एतादृशेन शीलवृत्तेन । नैगमाः वणिजः ॥ ३० ॥ नकेवलंशीलवृत्तेन किंतुसर्वैरपिगुणैरित्याशयेनाह—तेषामिति । तेषां ब्राह्मणादीनांमध्ये ॥ ३१ ॥ एवं धर्मपरतांरामस्योक्त्वा धर्माविरुद्धकामाभिरतिंदर्शयति—रामस्त्वित्यादिनाश्लोकचतुष्टयेन । रामस्तु । तुशब्देनपूर्वस्माद्वैलक्षण्यमुच्यते । पितृशुश्रूषणधर्मप्रवर्तनदेवताराधनादिकंहिपूर्वमुक्तं । सएवंकर्तासंप्रतिवात्स्यायनमभ्यस्यकामतन्त्रपरोभूत् । सीतया अयोनिजया । "सहयुक्तेऽप्रधाने" इतितृतीया । स्वाभाविकसौन्दर्यसमृद्धैवावतीर्णापि भोगस्रोतस्यप्रधानाभूदिति रामस्यप्राबण्यातिशयःप्रदर्शितः । विजहार । परस्मैपदेनफलापर्यवसायितोच्यते । "स्वरितञितः कर्त्रभिप्रायेक्रियाफले" इतिविहाररूपक्रियाफलस्यकर्तृगामित्वेह्यात्मनेपदमेवभवेत् । तथाच चिरतरविहारोपिभोगोपोद्घातकेलितांनातिशेतइतिभावः । बहूनृतून् । अत्यन्तसंयोगेद्वितीया । तया भोगनैरन्तर्यंसूच्यते । बहूनृतूनित्युक्तं नतुवत्सरानिति । तेनतत्तदृतूचितभोगोपकरणैर्भोगान्सबुभुजइत्युक्तं । मनोस्यास्तीतिमनस्वी । भूमार्थेमत्वर्थीयः । तथाच संश्लेषदशायांसीतासंकल्पमप्यतिशय्य भोगस्रोतःप्रवर्तयितेत्यर्थः । नित्यंतद्गतः तस्यांगतः । "सप्तमी—" इतियोगविभागात्समासः । जातिगुणवदपृथक्सिद्धतयातदेकरसोभूदित्यर्थः । सर्वदातदासक्तचित्तोऽभूदितिभावः । तस्याहृदिनित्यंसमर्पितः सीतापिरामकृततत्तद्व्यापारेणवशीकृता तदायत्तचित्ताऽऽसीत् । नित्यं सुचिरंभोगेपि सद्यस्संगतेवनिरवधिकप्रेमभारभरिताऽभूदित्यर्थः ॥ ३२ ॥ नित्यंतद्गतइत्यत्रहेतुमाह—प्रियात्विति । तुरवधारणे । पितृकृतादाराइतिहेतोरेवरामस्यसीताप्रियासीत् । तर्हिसीतावैलक्षण्यमकिंचित्करं नेत्याह । गुणात् भर्तृशुश्रूषणादिगुणात् । रूपस्य देहस्य । गुणात् सौन्दर्यात् । अपिशब्दोऽनुक्तसमुच्चयार्थः । आभिजात्यादिभिश्च । प्री-

तेषांचतुर्णांपुत्राणांमध्येसत्यपराक्रमोरामएवातियशाः । भूतानांमध्येस्वयंभूरिवगुणवत्तरोबभूवेत्यन्वयः । शि० स्वयंभवति प्रादुर्भूततांप्राप्नोतीतिस्वयंभूः रामः । लोकेभूतानां प्रादुर्भावंप्राप्तानांमध्ये अतियशाः गुणवत्तरश्च बभूव । इवश्चार्थे ॥ ३१ ॥

[पा०] १ इदमर्धं क. ख. ग. दृश्यते. २ क. ज. ट. वीरो. ३ अयंश्लोकः क. ख. ङ. च. छ. झ. ञ. ट. दृश्यते. ४ क. घ. महारथः. ५ ङ. च. छ. झ. ञ. रामस्सर्वाणि. ६ ख. राज्ञापरमयन्त्रितः. क. रामःपरमयन्त्रितः ७ क. चकारह. ८ ख. राजादशरथः. ९ क. ग. घ. ङ. झ. ञ. ट. स्तथा. १० ग. ज. शीलवृत्ताभ्यां. ११ ङ. च. छ. झ. ञ. ट. रामश्च. १२ घ. ङ. झ. ञ. ट. तद्गतमनास्तस्याहृदि. क. च. छ. तद्गतमनानित्यंहृदि. ज. तद्गतस्त्वरया. १३ घ. द्रूपकृताच्चापि. १४ ङ. च. ञ. भूयोविवर्धते. ख. ग. ज. भूयोव्यवर्धत. झ. ट. भूयोऽभिवर्धते. ख. भूयोऽन्ववर्धत. १५ इदमर्धं क. दृश्यते.

तस्याश्च भर्ता द्विगुणं हृदये परिवर्तते ॥ अन्तर्जातमपि व्यक्तमाख्याति हृदयं हृदा ॥ ३४ ॥
तस्य भूयो विशेषेण मैथिली जनकात्मजा ॥ देवताभिः समा रूपे सीता श्रीरिव रूपिणी ॥ ३५ ॥
तया स राजर्षिसुतोभिरामया समेयिवानुत्तमराजकन्यया ॥
अतीव रामः शुशुभेऽतिकामया विभुः श्रिया विष्णुरिवामरेश्वरः ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतिसहस्रिकायां संहितायां बालकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥ इति बालकाण्डः संपूर्णः ॥ १ ॥

तिर्भूयोऽभ्यवर्धत । रामस्यसीतायामित्यर्थसिद्धं । अतोबहूनृतून्विजहारेत्यन्वयः ॥ ३३ ॥ अथरामस्यैवसीताया अपि रामेनिरन्तरानुरागं दर्शयन् तस्याहृदिनित्यंसमर्पितइत्युक्तंविवृणोति—तस्याश्चेति । तस्याभर्ता रामश्च। हृदये सीतायाहृदये। द्विगुणंयथाभवतितथापरिवर्तते । रामाद्विगुणाप्रीतिःसीतायारामेभूदित्यर्थः। यथारामस्यसीतायांप्रीतिः पितृकृतदारत्वकृता सौन्दर्यकृताच एवंरामेपिसीतायाः प्रीतिर्नोभयकृता किंतु भर्तृत्वमात्रकृता । वक्ष्यत्यनसूयांप्रतिसीता "यद्यप्येषभवेद्भर्ता ममार्येवृत्तवर्जितः । अद्वैधमुपचर्तव्यस्तथाप्येषमयाभवेत् " इत्यादि । अनेन गुणादित्युक्तरामविषयानुरागोविवृतः। एतादृशानुरागोरामेणकथंविज्ञायतइत्यत्राह—अन्तरिति । अन्तर्जातं सीताहृद्गतमपिहृदयगूढभावं । अनुरागमितियावत् । हृदा तर्केण अनुभावैरितियावत् । व्यक्तमाख्याति जानाति । चक्षिङःख्याञादेशःसार्वधातुकेप्यार्षः। तस्य दर्शनार्थत्वं चख्युरित्यादौसिद्धं । परकीयहृदयंकथंव्यक्तीभवतीत्यपेक्षायां तत्रैवसर्वदापरिवर्तमानत्वादित्युक्तं पूर्वार्धे ॥ ३४॥ रामवत्सीतापि रामहृदयंविशेषेणव्यक्तंवेत्तीत्याह—तस्येति । तस्य रामस्य हृदयं सीता भूयो विशेषेण । रामादतिरिक्तंजानातीत्यर्थः। रामो यादृशभोगमभिलषति तदिङ्गितेनज्ञात्वा स्वयंतदनुरूपा भवति । नतुतदतिरिक्तभोगमभिलषते । एवंरामोपीतिभावः । रामादप्यतिशयेनसीतायाःकान्तेङ्गितपरिज्ञानेहेतुचतुष्टयमाह—मैथिलीत्यादि । देशस्वभावाद्वंशस्वभावाच्च सूक्ष्मज्ञा । देवताभिःसमेति प्रागल्भ्यमुच्यते । रूपे विषये रूपिणी सर्वैर्दृश्यमानरूपवती श्रीरिवस्थिता । अनेन सहजबुद्धिविशेषोदर्शितः ॥३५॥ एवमनवधिकमन्योन्यानुरागमुपपाद्य तदनुरूपंभोगंदर्शयति—तयेति । राजर्षिसुतः महाराजसुतत्वेननिरवधिकभोगोपकरणवान् । उत्तमराजकन्यया ततोप्यधिकतदुपकरणवत्या। रामः रमयिता अभिरामया ततोप्यतिशयेनरमयित्र्या । सः अतिशयितकामः। अतिकामया रामादप्यधिककामयेत्यर्थः। तया सीतया। समेयिवान् सम्यगेयिवान् एकीभावेन संश्लिष्टः । स्वयंमहाश्लेषविषयीभूतःसन्। " लीनेवप्रतिबिंबितेवलिखितेवोत्कीर्णरूपेवच प्रत्युप्तेवचवज्रलेपघटितेवान्तर्निखातेवच । सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभिश्चिन्तासन्ततितन्तुजालनिबिडस्यूतेव लग्ना प्रिया" इतिवत्। विभुः प्रत्यालिङ्गनादिसमर्थः। अमरेश्वरोविष्णुः आदिविष्णुः। श्रियेव मूर्तिभेदेनोपमानत्वं । अतीव अतिशयेन शुशुभेरेजे । तुल्यानुरागस्यातिशयितस्त्रीकामस्यभोगसमृद्धिहेतुत्वादितिभावः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तसप्ततितमःसर्गः ॥ ७७ ॥

वेदे शास्त्रेषु वादेष्वनितरसुलभां कीर्तिमाटीकमानः काव्यालङ्कारनाट्यप्रभृतिषु पटुधीः कोपि टीकाविधाने ॥ शुद्धान्तःपद्मशुद्धान्तितमधुमथनः शुद्धसत्वैकमूर्तिर्गोविन्दार्यो विचार्यव्यतनुत विमलां बालकाण्डस्य टीकाम् ॥ इतिबालकाण्डव्याख्यानं संपूर्णं ॥

तनि० राजर्षिसुतइति उत्तमराजकन्ययेतिचाभिजनवृत्तादितौल्यमुक्तं । अभिरामया सौन्दर्येणातिरमणीयया अतिकामया- अतिस्नेहया समेयिवान् अतिसंश्लेषेणाभेदंप्राप्तः । यद्वा अतिकामया अतिक्रान्तमन्मथया । तेनाप्राकृतविग्रहवत्तयादिव्यदंपतिभोगएवात्राभिव्यज्यते ॥ ३६ ॥ इतिसप्तसप्ततितमस्सर्गः ॥ ७७ ॥ **॥ बालकाण्डस्संपूर्णः ॥**

[पा०] १ ङ. च. झ. ञ. ट. अन्तर्गतमपि. २ ख. सदा. ३ क. तस्मिन्भूयो. ४ घ. ङ. च. झ. ञ. ट. सुतोभिकामया. क. सुतोनिकामया. ५ ङ. च. छ. ञ. ट. शुशुभेमुदान्वितो. ज. शुशुभेऽतिकान्तया.

इदं बालकाण्डं कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च
मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३२ सन १९११.